पद्मबन्धुः पुं सूर्य्यः इतिशब्दरत्नावली भ्रमरः इतिशब्दचन्द्रिका। पद्मभूः पुं ब्रह्मा इतिहलायुधः॥ पद्मश्रवी स्त्री उपलभा इतिशब्दचन्द्रिका पद्मसदृशाश्रवविशिष्टे। त्रि पद्मयोनिः पुं ब्रह्मा यथा अस्माच्च कारणात्कमलन् पुत्रो भवतो मेभवान् पद्मयोनि रिति ख्यातो मत् प्रियार्थं जगन्मयः इति॥ कौर्म्मे ९ अध्यायः॥ ॥ पद्मरागः पुं रक्तवर्णमणिविशेषः॥ षः माणिकइति भाषा तत्पर्य्यायः शोणरत्नं २ लोहितकः ३ इत्यमरः लोहितं ४ कुरुविन्दकम् ५ इतिशब्दरत्नावली राजनिर्घण्टः। क पर्य्यायश्लोमाणिक्य शब्दे द्रष्टव्यो तस्यवर्णा यथा सिंहलेत्तभवेद्रक्तं पद्मराग मत्तमं पीत्तका॥

नशरोद्भूते कुरुविंद मितिस्मृतं॥ अशोकपल्लवच्छाय मत्रसौगन्धिकं विदुः तं तुरेच्छायपानीलं नीलगन्धिप्रकीर्त्तितं उत्तमं सिंहलोद्भूतं निकृष्टं तुम्बुरोद्भवे मध्यमं मध्यमं तेयं माणिक्यंत्रेभेदतः॥ तथाच वन्धूक गुञ्जा सकलेन्द्रगोप॥ जवासनास्रक् समवर्णशोभाः आजिसवो दाडिम वीज वर्णा स्तथा परेकिंशुकपुष्पभासः सिन्दूरपद्मोत्पलकुङ्कुमानां लाक्षारसस्यापिसमानवर्णाः सान्द्रे निरागे प्रभया स्वयैव भाति स्वलस्याऽस्फटमप्रशोभाः भानोश्च भासा मनवेथ योग मासाद्यरश्मिप्रकरेण हृद्यं पार्श्वानिसर्वान्यनुरञ्जयन्ति गुणोपपन्नाः स्फटिकप्रसूताः॥ कुसम्भनीली व्यति मिश्र राग प्रस्परक्ताम्बरतस्य भासः तथापरे स्फुरकाल्हकारी पुष्पत्विषो हिंगुलकत्विषोऽन्ये चकोर पुंस्कोकिलसारसानां नेत्रावभासश्च भवन्तिकेचित् अन्ये पुनर्नातिविपुष्पितानां तस्यत्विषः कोकनदोदराणां प्रभाव काठिन्यगुरुत्वयोगैः प्रायः समानाः स्फटिकोद्भवानां आनीलरक्तोत्पल चारुभासः॥ सौगन्धिका॥

ख्या मणयोभवन्ति यो मदरा। जः कुरुविन्दजेषु स एवजातः स्फटिकोद्भवेषु निरर्च्चिषोऽन्तर्वर्णीभवन्ति प्रभाव वन्तोपि नतत्समानाः येत्र रावण गंगायां जायन्ते कुरुविन्दकाः पद्मरागा घनं। रागं विभ्राणाः स्वस्फुटार्च्चिषः व र्णाउपायिनस्तेषामंध्रदेशे तथा परे जायन्ते तयेकेचित् मूस्येरे शेमवाप्नुयुः तथैवस्फटिका॥ ख्यानां देशे तम्बुवसेत्तके सप्ताजः प्रजायन्ते स्वल्पमूल्याहि तेस्स्ताः॥ अथ जात्यादि माणिक्यस्य प्रवक्ष्यामि यथाजाति च लक्षणं ब्रह्मक्षत्रियवैश्यशूद्राख्याय यथाक्रमं रक्तश्वेतो भवेद्विप्र स्वतिरक्तस्तुक्षत्रियः वक्तपीतो भवेद्वैश्यो रक्तनीलस्तथाऽन्त्यजः पद्मरागोभवेद्विप्रः कुरुविंदस्तुबाहुजः सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथाऽन्त्यजः शोणपद्मसमाकारः खद्योतारसप्रभः पद्मरागो द्विजः प्रोक्तश्छाया भेदेन सर्वदा गुंजासिन्दूर बन्धूक नागरंग समप्रभः दाडिमी कुसुमाभासः कुरुविंदस्तु बाहुजः हिंगुलाभाशोकपुष्पाभमीषत् पीतलोहितं जवा लाक्षा

रससमायं वैश्यं सौगन्धिकं विदुः। आरक्तः कान्तिहीनश्च विकृतश्च विशेषतः मांसखण्ड समाभासोऽन्त्यजः पापनाशनः मांसखण्डस्तु नीलगन्धिः सेव्य॥ अथ दोषाः माणिक्यस्य समाख्याता अष्टौहो॥ षाप्तनीश्वरेः द्विच्छायंच द्विरूपंच सम्भेदः कर्करन्तथा अशोभनंकोकिलंच जलेभस्माभिधंचवै गु॥ एणश्चत्वार आख्याता छायाः षोडशकीर्त्तिताः छायास्तु सर्वाक्षा एव छाया द्वितय सम्बन्धाद्विच्छायं बन्धुनाशनं द्विरूपं द्विपदेतेन माणिक्येन पराभवः सम्भेदो भिन्नमित्युक्तं शस्त्रघातविधायकः कर्करं कर्करायुक्तं पशुबन्धुवि॥ नाशकृत् कुरूपनेवसमालिप्त मलनेपुष्टमुच्यते अशोभनं सशुद्धिः माणिक्यं बन्धुदुःखकृत्॥ मधुविंदुसमच्छायं कोकिलंपरिकीर्त्तितं आयुर्लक्ष्मी यशो हन्ति सदोषं तन्नधारयेत् रागहीनं जलं प्रोक्तं धनधान्यापवादकृत् धूम्रसमाकारं वैगुण्यंभयमावहेत् तथाशोभाहितयवनो दोषमाणयः त्रानिकारकाः उभयत्र पदेदोषा तेनचस्यात्पराभवः भिन्नेनपुष्टेः॥ मस्तुस्यात्॥

कर्करत्वन नाशकृत उपेयनेव स
मालिम्नः प्रटके यत्न सम्भवेत ॥
दुःखकृत्त समाख्याता नन्दपैरा
त्तनीयकः मधुविंडु समाशोभा
कोकिलानामकीर्त्तिता तेषांचवक्
भेदास्तु नेतेर्थाख्याः कदाचन ॥
अथ गुणाः गुरुत्वस्निग्धताचैववै
मल्यमतिरक्तता तथाचवर्णा
धिक्यं गुरुत्वंचस्निग्धत्वा समता
च्छताच्छता अर्चिष्मत्तामहत्ताच ॥
मणीनां गुणसंग्रहः ॥ फले ये
कर्कशा छिद्रमलोपदिग्धाः प्र
भा विमुक्ताः परुषा विवर्णाः
नतेप्रशस्ता मणयोभवन्ति समान
तोजाति गुणैःसमस्तैः दोषोप
सृष्टे मणि मप्रबाधा द्विभर्त्तियः
कश्चनकंविदेकं तेवंफडुःखा
यस्तवंधविन्नाषादयो दोषय ॥
नाभजन्ते सपत्नमध्येपि कृताधि
वासे प्रमाद हन्तारपि वर्त्तमाने न
पद्मरागस्य महागुणस्य भर्त्तारमा
यन्त सच्यपेतिकाचित दोषापस
र्गि प्रभवाश्च ये तेनोपद्रवान्तिस
समभिद्रवन्ति गुणैःसमुद्वेःस
कोले हपेतं यःपद्मरागं प्रयतो
विभर्त्ति परीक्ष्य यथा वालार्क
करसंस्पर्शात्त पःस्विरावालोहि
तावमेत् तेजपेदात्रमेवापि समहा
गुण

उच्यते उपेपशान्तगुणो हिमो रंज ॥
येम्नःसमन्ततः वमेच्छिखा लो
हितो वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे योमस्तःसन्
महामनिः प्रकाशयति सूर्याभः
सश्रेष्टः पद्मरागकः पद्मकोषेत
यन्मस्ते विकाशयति ततत्क्षणा
त पद्मरागा वरो ह्येष देवानामपि
दुर्लभः सर्वारिष्ट प्रशामनाः सर्व
सम्पत्तिदायकाः चतारस्त मः
योहिष्टा गुणिनश्च यथोत्तरं ॥
योमनिर्दृश्यते हरा ज्वलदग्नि
समच्छविः वेशकान्तिःसविज्ञेयः
सर्वसम्पत्तिदायकः पंचसप्त
नवविंशाति रागःक्लिम्पव
सकलः खल्वसो वर्जयेदम
त्ति वा कज्जाल सुमयोनर मरा
गुणिनस्तु नीलवसं उग्रवसं ॥
जलंवाय्येवनयति द्विगुन प्रमा ॥
णं तेते यथा सूर्वमति प्रशस्ताः
सौभाग्य सम्पत्ति विधान दाय
काः परिमाणं गुंजाफल प्रमाण
स्तु दशासप्त त्रि गुंजकान् पद्मराग
स्तुलयति यथा सूर्वं महागुणः ॥
कोष्ट कोलफला कारो द्वादशाष्ट
त्रियंजकान् पद्मरागस्तुलयति य
था सूर्वंमहागुणः वदरी फलतसो
यःस्वरदिगब्दमाषकः तथा धात्री

फल त्रिंशद्विंशति द्वष्ट माषकः त
था त्व फल तत्स्योपो वक्षिपदैक
माषकः तोह्रल फलमानो पश्चात
स्त्रिद्विकतोलकः विम्बी फलसमा
कारो वसुषड्पश्चतोलकः अतःप
रं प्रमाणेन मानेनचनलभ्यते यदि
लभ्येत पुण्यैन तदासिद्धिमवाप्नुया
त केचिद्याकृततरास्तन्ति जातीनाम
तिरूपकाः विजातयःप्रयत्नेन ॥
विद्वांस्ताउ पलक्षयेत कलसपु
रोद्भव सिंहलतम्बुरुदेशा स्थमुक्त
मालीयाः श्रीपर्णिकाश्च सदृशा
विजातयः पद्मरागाणां तत्रोपस
र्गात कलशाभिधान मातास्तु ॥
भावादपि तम्बुरुस्य कार्शात्तथा
सिंहल देशजाते मुक्ताभिधाने
नभसः स्वभावात श्रीपर्णावेदी ॥
त्रिनिराकृतितया द्विजाति लिंगाश्र
य प्रवभेदः तथाच स्नेह प्रदेहो
मृदुत्वा लघुत्वं विजाति लिंग खलु
साहेजन्पं यःप्रयामिकं प्रथपति
पद्मरागो यो वा तषाणामिवच्
र्णामध्यः ॥ स्नेह प्रदिग्धा नचयो
विभाति योवाप्रमृष्टःप्रजहातिदी
प्तिं आक्रान्तमूर्द्धाचतथांगुलिभ्यां
यः कालिकांपार्श्वगतो विभर्त्ति स
प्राप्यचोत्तरेप पराप्नुवन्ति वि

भर्त्तियः सर्वगुणाननीव तस्यप्रभा
णस्यच तस्यजाते योवा गुरुत्वेन
भवेन्न तस्यः प्राप्यापि रत्नाकरजो
स्वजाति लदेव्गुरुत्वेन गुणेनवि
हान अप्रगुणश्यति सन्देहे विनाधी
परिचर्चयेत् दृष्टोपी अत्यन्तशोभा
वान गरिमाणंतनसंचति सत्तेषः
कुड्जातिस्तु ज्ञेयाश्चान्ये द्विजात
यः स्वजातकं समुखेन विलिखे
द्वापरस्पर वज्रंवा कुरुविन्दम्वा
विशवान्योन्यकेनचित नशक्य ॥
लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः
जात्यस्य सर्वेपि मणेर्न जातुविजा
तयः कान्ति समानवर्णाः तथा
पि नाना करणार्थ मेवं भेद प्र॥
कारः परमःप्रदिष्टः गुणोपप
न्नेन महार्व वहो मणिस्तु धार्य्या
विशेषेन जात्यः न कौस्तुभेनापि
महार्घवन्ते विहाय विजाति विभृ
यात् कदाचित् चंडाल एकोपि
यथा द्विजातीन् समेत्य तथैव ॥
परन्मयत्नात तथा मणीन् भू
रि गुणोपपन्नान् प्राक्नोति विद्वा
वपितु विजात्तः ॥ अथ मूल्यंवा
लार्काभिमुखं कृत्वा दर्शने धारये
न्मणिं तत्रकान्ति विभागेन च्छाया
भागंविनिर्दिशेत वज्रस्य यत्तण्डु


ल संख्ययोक्तं मूल्यं समुन्मापित
गौरवस्य तत् पद्मरागस्य गुणान्
वितस्य स्यान्माषकाख्या त्वतितस्य
मूल्यं यन्मूल्यं पद्मरागस्य सगुण
स्य प्रकीर्त्तितं तावन्मूल्यं तथाम्बुदे
कुरुविन्दे विधीयते सगुणे कुरुवि
न्दे च यावन्मूल्यं प्रकीर्त्तितं तावन्
मूल्यं चतुर्थांशं हीनं स्याद्वै सौग
न्धिके यावन्मूल्यं समाख्यातं वै
श्यवर्णे च सूरिभिः तावन्मूल्यं
चतुर्थांशं हीयतेऽम्बुदजन्मनि प
द्मरागः पलयस्तु यत्नेलातात्वस
प्रभः कार्षापण सहस्राणि ॥
त्रिंशन्मूल्यं लभतसः इन्द्रगोप
कसंकाशः कर्षत्रयधृतो मणिः
द्वाविंशति सहस्राणि तस्य मूल्यं
विनिर्द्दिशेत् एकोनो नूपते य
स्तु जवाकुसुमसन्निभः कार्षा
पण सहस्राणि तस्य मूल्यं चतु
र्दश बालादित्यद्युतिनिभः कर्ष
यस्तु प्रतुल्यते कार्षापणशता
नान्तु मूल्यं सद्भिः प्रकीर्त्तितं यस्तु
दाडिम प्रभ्याभः कर्षार्द्धेन तु सं
स्मितः कार्षापण शतानान्तु विं
शतिमूल्यमादिशेत् चत्वारो मा
षका यस्तु रक्तोत्पलदलप्रभः स
ंमतस्य विधातव्यं सूरिभिः शतपंच
कं हिमाषको यस्तु गुणैः सर्वैर्व्वेवसम

न्वितः तस्य मूल्यं विधातव्यं द्विशतं
तत्त्ववेदिभिः माषकैकमितो यस्तु
पद्मरागो गुणान्वितः ॥ शतैकं
सम्मितं वाच्यं मूल्यं रत्नविचक्षणैः
अतोऽन्यून प्रमाणान्तु पद्मरागा
गुणोत्तराः स्वर्णद्विगुण मूल्येन
मूल्यं तेषां प्रकल्पयेत् ॥ कार्षा
पणः समाख्यातः पुराण द्वयसं
म्मितः अम्बुकुसुम्भ पानीय म
ञ्जिष्ठोदकसन्निभाः काषाया
इति विख्याताः स्फटिकप्रभवा ॥
अतो तेषां दोषान् गुणान् वापि प
द्मरागवदादिशेत् मूल्यमस्य तु ॥
विज्ञेयं धारणेऽस्य फलं तथा
ब्रह्मन्त्वियं वै प्रथमा अन्वर्थापि
प्रकीर्त्तिताः चतुर्विधेऽन्यपतिभि
र्धार्य्या सम्पत्तिहेतवे अतोऽन्य ॥
था धृतः कुर्य्याद्रोगशोकभयात्त
यं इति युक्तिकल्पतरौ पद्मराग
परीक्षा ॥

पद्मलाञ्छनः पुं ब्रह्मा सूर्य्यः ।
कुवेरः राजा इति मेदिनी ॥
पद्मलाञ्छना स्त्री तारा लक्ष्मीः
सरस्वती इति मेदिनी ॥ ॥
पद्मवर्णकं क्ली पुष्करमूले इ
ति जटाधरः ॥ पद्मत ॥
ल्पवर्णयुक्ते त्रि पद्मवासा ॥
स्त्री लक्ष्मीः इति हेमचन्द्रः ॥

पद्मराजं क्ली कमलवीजं तत्पर्य्या
यः पद्माक्षं २ गालोड्यं ३ कन्द
ली ४ तेलग ५ क्रौञ्चादनी ६ क्रौ
ञ्चा ७ श्यामा ८ पद्मकर्कटी ९ अ
स्य गुणाः कटुत्वं स्वादुत्वं पित्तच्छर्दिदि
दाहास्र शोषनाशित्वं पाचनत्वं रु
ग्विकारित्वं च इति राजनिर्घण्टः ॥
पद्मवीजं हिमं स्वादु कषायं तिक्त
कं गुरु विष्टम्भि वृष्यं रूक्षं च गर्भ
संस्थापकं परं कफवातकरं ब
ल्यं ग्राहि पित्तास्रदाहनुत् इति
भावप्रकाशः पद्मवीजाभं क्ली
मखान्नं माखाना इति भाषा इ
ति राजनिर्घण्टः ॥ पद्मा स्त्री ल
क्ष्मीः लवङ्गं पद्मचारिणी इत्यम
रः पन्नगी सा तु मनसा फञ्जिका
इति मेदिनी शाहूरन्ना वंश्या द्वो
माहन्मात्ता इति हेमचंद्रः ॥ कु
सुम्भ पुष्पं इति रत्नमाला वृह
द्रथ राजकन्या कल्किदेवेन वि
वाहिता यथा हरे रागमनेश्रुत्वा
महर्षीभूहृद्द्रथः पुरोधसा
स्तोगोष्ठ्यामित्रैः समंगलैः वा
द्य नागरवनीतेश्च सजयो जन
पाणिभिः जगामानयितुं क
ल्किं सार्द्धं निजनेत्रैः प्रभुः गतो
जलाशयाभ्यासं गत्वा विस्मयपराः

स्तंमणिवेदिकमासीनं भुवने
कमतिपतिं दृष्ट्वा बृहद्रथो राजा नृ
पशीलगुणाकरः साश्रुः सपुल
कः श्रीशं दृष्ट्वा साष्टाङ्गं नमः स्थियन्
ज्ञानागोचरमेतन्मे तवागमनमी
श्वर यथा मान्धातृपुत्रस्य यज्ञ
नाथेन कानने इत्यकाले सज्जा
यित्वा समानीय विनाश्रये हर्म्य
प्रासादसंबाधे स्थापयित्वा ददौ
सुतां पद्मां पद्मविशालाक्षीं प
द्मनेत्राय पद्मिनीं पद्मजादेशितः
पद्मनाभाय यादा यथा श्रियं क ॥
किलब्ध्वा प्रियां भार्य्यां सिंहलेषु
फलस्तत्कृतः समवासविशेषतः
समीत्वढीपकुलमे इति कल्कि
पुराणे १० अध्यायः ॥
पद्माकरः पुं जलाशयविशेषः
तत्पर्य्यायः तडागः २ कासारः ३
सरसी ४ सरः ५ इत्यमरः ॥
पंच सदैवागाधे महाजलाशये
सपद्मे योग्यतया निघ्नेच पं
चैव सरोमात्रे इति पञ्जिका को
ककरादयो ऽपि पद्माकरादिद्व
यं स पद्मागाधजलाशये का
सारादित्रयं कृत्रिम पद्माकरे इति
स्वाम्यादयः पद्माकरादिद्वयं पद्म
युक्तजलाशय मात्रेकासारादि



त्रये सरोवर मात्रे इत्यन्ये पद्मा।
नामाकर उत पद्मिस्थाने पद्मा
करः क्वचित् पद्मसूत्येपि योग्य
तयेति सुभूतिः इति भरतः ॥ प
माटः पुं चक्रमर्द्दः इत्यमरः ॥
पद्मालया स्त्री लक्ष्मीः लवङ्गं
इत्यमरः ॥ ॥
पद्मावती स्त्री मनसादेवी नदी
विशेषः पद्माइति ख्याता इति
शब्दरत्नावली ॥ पद्मचारिणी
इतिजटाधरः जयदेव पत्नी ॥
यथा नयति पद्मावती रमण।
जयदेव कविभारती भणित म।
तिशातं इति गीतगोविन्दः ॥
पद्मावतीप्रियः पुं जरत्कारुमुनिः
इति शब्दरत्नावली ॥ जयदेवश्च ॥
पद्मासनं क्ली योगासनविशेषः
यथा वामोरूपरिदक्षिणं निधाय
मतः संस्थाप्य वामे तथा दक्षोरूप
रिपश्चिमेन विधिना धृत्वा कराभ्यां
दृढं अङ्गुष्ठं हृदये निधाय चिबु।
कं नासाग्रमालोकयेदेतद्व्याधिवि
कारनाशनकरं पद्मासनं प्रोच्यते।
अन्यदप्यपि वामोरूपरि दक्षिणं
हि चरणं संस्थाप्य वामे तथाप्य
न्योरूपरितस्य बन्धनम विधोपृष्ठ
त्वा कराभ्यां दृढं अङ्गुष्ठे कृत।

ये निधाय चिबुकं नासाग्रमालो।
कयेदेतद्व्याधि विनाशकारियमि
नां पद्मासनं प्रोच्यते इतिगोरक्षसं।
हिता पूजार्थं धातुमय पद्माकारा
सनञ्च ॥ रतिविषयक पद्मासं।
नन्तु पद्मशाह्वे द्रष्टव्यम् ॥
पद्मासनः पुं ब्रह्मा कमलासन ॥
इत्यमरदर्शनात् ॥ ॥
पद्माह्वा स्त्री पद्मचारिणी इति
राजनिर्घण्टः ॥ ॥
पद्माक्षं क्ली पद्मबीजं इतिरत्ना
वली पद्मतस्याते त्रि ॥
पद्मिनी स्त्री पद्मयुक्तदेशः पद्मस
मूहः पद्मलता इति भरतः तत्प
र्यायः नलिनी २ विसिनी ३ इत्य
मरः मृणालिनी ४ कमलिनी ५
पुटकिनी ६ पंकजिनी ७ सरोजि।
नी ८ इतिमाधवः नालिकिनी ९
नालीकिनी १० अरविन्दिनी ११
इति कोषान्तरं अंभोजिनी १२ पु।
ष्करिणी १३ जम्बालिनी १४ इति
शब्दरत्नावली अब्जिनी १५ तस्या
लक्षणम् यथा मूलनालदलोत्फु
ल्ल फलैः समुदितासनः पद्मिनी
प्रोच्यते प्राज्ञैर्बिसिन्यादिकसा।
स्मृता तस्यागुणाः पद्मिनी मधुरा
तिक्ता कषाया शिशिरापरा पित्त

क्रिमिशोष वान्ति भ्रान्ति सन्ताप
दोषकृत् इति राजनिर्घण्टः
चतुर्विध स्त्री मध्ये स्त्री विशेषः
तस्यालक्षणं यथा भवति कम
लनेत्रा नासिका क्षुद्ररन्ध्रा अवि
रलकुच युग्मा दीर्घ केशी कृशा।
ङ्गीमृदुवचन सुशीलानृत्यगी
तानुरक्तासकलतनुसुवेशा प
द्मिनी पद्मगन्धा इतिरतिमञ्ज।
री ॥ सरोवरं पद्म इति विश्वः
मृणालं इतिशब्दमाला हस्ति।
नी इतिधरणिः ॥ ॥
पद्मिनीकान्तः पुं सूर्य्यः इति
॥ जटाधरः ॥ ॥
पद्मिनीवल्लभः पुं सूर्य्यः इ।
तिशब्दरत्नावली ॥ ॥
पद्मी पुं हस्ती इत्यमरः ॥
पद्मेशयः पुं विष्णुः इतिहेम।
चन्द्रः पद्मोत्तरः पुं कुसुम्भः ॥
इतिराजनिर्घण्टः ॥
पद्मोत्तरात्मजः पुं जिनचक्रव।
र्त्ति विशेषः इतिहेमचन्द्रः
पद्मोद्भवः पुं ब्रह्मा अब्जयोनि।
रित्यमर दर्शनात् ॥ ॥
पद्मोद्भवा स्त्री मनसा देवी य।
था कान्त्या काञ्चनसन्निभा सुव
दना पद्मासना शोभना नागेन्द्र

कृतशेखरा विषहरी पद्मोद्भवा
जांगली इतितस्याः ध्यान।
॥ णिकध्यानम् ॥
पद्यं क्ली कविकृतिः श्लोकः
इत्यमरः तस्यलक्षणं पद्यं चतु
ष्पदी तच्च वृत्तं जातिरिति द्विधा
वृत्तमक्षर संख्यातं जातिर्मात्रा ॥
कृताभवेत् इतिछन्दोमञ्जरी ॥
शाल्य इतिजटाधरः ॥
पद्यः पुं शूद्रः इतिमेदिनी ॥
पद्या स्त्री सृतिः इतिविश्वः
पन्थाः इत्यमरः ॥ ॥
पद्रः पुं इतिसिद्धान्तकौमुद्या।
मुणादिवृत्तिः ग्रामपथः इत्यु
णादिकोषः भूलोकः देश।
भेदः इति संक्षिप्तसारोणा।
दिवृत्तिः ॥ ॥
पद्रः पुं भूलोकः रथः इति
संक्षिप्तसारोणादिवृत्तिः पन्थाः
इत्युणादिकोषः ॥
पद्रा न पुं पन्थाः इतिसंक्षिप्त
सारोणादिवृत्तिः ॥ ॥
पन उ ईडे स्तुतौ इतिकवि॥
कल्पद्रुमः ॥ पनसः
पुं फलवृक्षविशेषः कँटाल।
इति भाषा तत्पर्यायः कण्टकि
फलः २ इत्यमरः महासर्ज्जः ३

फलिनः ४ फलवृन्तकः ५ मू
लः ६ कण्टफलः ७ मूलफलदः
८ अपुष्पफलदः ९ पूतफलः १०
अस्यफलगुणाः मधुरत्वं स्निग्ध
पिच्छिलत्वं गुरुत्वं कफत्वं बलवीर्य्य
वृद्धिदत्वं श्रमदाह विशोष नाशित्वं
रुचिकारित्वं ग्राहित्वं परम दुर्ज्जर
त्वंच तद्बीज गुणाः ईषत् कषाय
त्वं मधुरत्वं वातलत्वं गुरुत्वं रुच्य
त्वं तत्फलविकार दोष नाशि
त्वंच बालतनीरसं कफघ्नं मध्यपक्व
तद्दीपनं रुचिदं लवणान्वितं प
नसस्य फलं स्मृतं इति राजनिर्घण्टः
पनसः कण्टकिफलः फला
शोणितहत् फलः पनसं शीतलं
पक्वं स्निग्धं पित्तानिलापहं तर्प
णं बृंहणं स्वादु मांसलं श्लेष्मलं
भृशं बल्यं शुक्रप्रदं हन्ति रक्तपित्त
क्षत व्रणान् आमं तदेव विष्टम्भि
वातलं तुवरं गुरु दाहकृन्मधुरं
बल्यं कफमेदो विवर्द्धनं पनसो
द्भूत बीजानि वृष्याणि मधुराणि
गुरूणि बद्धवर्च्चांसि सृष्टमू
त्राणि संवदेत् अन्यच्च मज्जा प
नसजो वृष्यो वातपित्त कफा
पहः विशेषात् पनसं वर्ज्यं गु
ल्मिभिर्मन्दवह्निभिः अत्र पनसप

काय फलं कदल सम्भवं इति भा
वप्रकाशः ॥ कण्टाफलं समधु
रं हृद्यं स्निग्ध शीतलं दुर्ज्जरं वात
पित्तघ्नं श्लेष्मशुक्रबलप्रदं तदेव
सर्पिषा युक्तं स्निग्धं स्वादुबलप्रदं
छर्दिघ्नं नच वत्तव्यं वृष्यं तथा तत्पि
त्तनुत् कण्टाफलमपक्वं तु कषा
यं स्वादु वातलं रक्तपित्त हरं स्वादु
तत्फलास्थ्यपि तद्गुणं इति राज
वल्लभः ॥ पनसतालिका स्त्री
कण्टकिफले इति शब्दमाला ॥
पन्थाः न पुं पावनियान्तनेन वा
स्ता इति भाषा तत्पर्य्यायः अय
नं २ वर्त्म ३ मार्गः ४ अध्वा ५ पद
वी ६ सृतिः ७ सरणिः ८ पद्ध
तिः पद्या ९ वर्त्तनी १० एकपदी
११ इत्यमरः पथः १३ पदविः
पदवी १५ सरणी १६ धरणिः
पद्धती १८ वर्त्तनिः १९ इतिभर
तः धारणी २० वाटः २१ ॥
धर्म्मवर्त्मनि २२ मार्गः २३ विव
थः २४ वीवधः २५ इति शब्द
रत्नावली ॥ तस्य लक्षणं त्रिं
शद्धनूंषि विस्तीर्णो देश मा
र्गस्तु नैकृतः विंशद्धनु ग्राम
मार्गः सीमामार्गो दशैव तु ॥
धनूंषि दशविस्तीर्णः ॥

श्रीमान्राजपथः कृतः नृवा
जि रथनागाना मसम्बाधः सुसं
चरः धनूंषि चैवचत्वारि शाखा
रथ्याश्च निर्म्मिताः त्रिकरश्चोप
रथ्याश्च द्विकरस्तूपरथ्यका जङ्
घापथ श्चतुष्पाद स्त्रिपादस्तु गृहा
न्तरं वृतीपादस्त्वर्द्धपादः प्राग्वंशः
पादकः स्मृतः अवकरः परीवारः
पादमात्रः समन्ततः इति देवीपुरा
णे गोपुरद्वार लक्षणाध्यायः ॥
चतुष्पथ लक्षणादि यथा एक
लिङ्गे श्मशाने वा शून्यागारे चतु
ष्पथे तत्रस्थः साधयेद्योगी विद्यां
त्रिभुवनेश्वरीम् चतुष्पथमनुतत्त्वा
र्के त्रिकोणं यत्र वर्त्तते इति नील
तन्त्रम् ॥ पथ्यागमन गुणाः श्र
धा मेदः कफस्थौल्य सौकुमार्य्य
विनाशनः यत्नेन क्रमणं नाति
देह पीडाकरं भवेत् तदायुर्बललाभ
धाग्नि प्रदमिन्द्रियबोधनं ॥
इति राजवल्लभः ॥ ब्राह्मणा
दिभ्यः पथावकाशो देयो य
था पन्था देयो ब्राह्मणाय स्त्रियै
राज्ञे चक्षुषे वृद्धाय भारग्र
स्ताय रोगिणे दुर्बलाय च इ
ति कौर्म्मे उपरिभागे ११ ॥
अध्यायः ॥ गोपथप्रदा
॥ नफले यथा गोमार्ग ॥

स तथा कर्त्ता गोलोके क्रीडते
चिरं इति प्रतिष्ठातत्त्वे हयशीर्षपं
चरात्रे ॥ अस्य चारादा वुपचारो य
था वेदा विभिन्नाः स्मृतयो विभि
न्ना नासौ मुनिर्यस्य मतं न भिन्नं ॥
धर्म्मस्य तत्त्वं निहितं गुहायां महा
जनो येन गतः स पन्थाः इति धर्म्म
वकप्रश्नेयुधिष्ठिरोत्तरे ॥ नरक
विशेषः यत्राहत्यन्ते इति मनौ
अध्यायः ॥ पन्ने त्रि च्युते गलि
ते इत्यमरः पन्नः पुं अधोगमने
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः
पन्नगः पुं सर्पः इत्यमरः ओषधी
भेदः पद्मकाष्ठे इति मेदिनी ॥
पन्नगकेशरः पुं नागकेशरवृ
क्षे इति राजनिर्घण्टः ॥ ॥
पन्नगाशनः पुं गरुडः इत्यमरः ॥
पन्नगी स्त्री पन्नगपत्नी मनसादेवी
यथा पन्नग्या भक्षिते पदे स्व ॥
निष्टतिपन्नगी इति तिथितत्त्वे
सर्पिणीक्षुपः इति राजनिर्घ ॥
एटः पन्नद्धा स्त्री चर्म्मपादुका
इतिहेमचन्द्रः ॥ ॥
पन्नद्धी स्त्री चर्म्मपादुका ॥
इतित्रिकाण्डशेषः ॥
पपिः पुम् चन्द्रः पानकर्त्त
रि त्रि इति संक्षिप्तसारव्याक
रणम् ॥ ॥

पयीः पुं सूर्य्यः चन्द्रः इत्युणादि
कोषः ॥ ॥
पयुः पुं पालकः पाद्याम् स्त्री
इत्युणादिकोषः पयसा स्त्री ग॥
न्धद्रव्यविशेषः खल्लकी इति
ख्याता अस्यानुलेपनगुणाः ॥
परमालक्ष्मी रक्षो ज्वर नाशित्वं।
इतिराजवल्लभः ॥
पय्या स्त्री गौड़देशस्थ नदीविशे।
षः इत्युनादिकोशः ॥
पय ङ. गतौ इतिकविकल्पद्रुमः
पयः स क्ली जले दुग्धे इतिमेदि।
नी पयः कन्दा स्त्री क्षीरविदारी।
इतिराजनिर्घण्टः ॥
पयःफेनी स्त्री दुग्ध फेनीक्षुपः
इति राजनिर्घण्टः ॥
पयश्चयः पुं जलसमूहः ततपः
ध्यायः स्वः २ वेनिः ३ इतिजटा
धरः अयसो त्रि पयोविकारः।
घृत दध्यादि इत्यमरः पयोदिते
इतिमेदिनी ॥ ॥
पयस्यः पुं विडालः इतिशब्द
चन्द्रिका ॥ ॥
अपयस्या स्त्री दुग्धिका क्षीर॥
काकोली ॥ स्वर्णक्षीरी ॥
इतिमेदिनी अर्कपुष्पिका इ।
तिरत्नमाला ऋद्धिः ॥ ॥

नीक्षुपः इति राजनिर्घण्टः ॥
श्रामिता इतिहेमचंद्रः ॥ ॥
पय स्वलः पुं छागः इति राज।
निर्घण्टः ॥ ॥
पयस्विनी स्त्री नदी धेनुः रात्रिः
इतिमेदिनी काकोली क्षीरका ॥
कोली दुग्धफेनी क्षीरविदारी ॥
छागी इतिराजनिर्घण्टः ॥
जीवन्ती इति भावप्रकाशः ॥
पयोगड़ः पुं घनोपलः द्वीपः ॥
इति शब्दमाला ॥ ॥
पयोघनः पुं घनोपलः इतिहारा।
वली पयोजन्मा न पुं मेघः इतिश
ब्दमालापयोधरः पुं स्त्रीस्तनः मेघः
इत्यमरः कोषकारः नारिकेले ॥
कशेरुकं इति मेदिनी ॥ ॥
पयोधाः स पुं समुद्रः जलाधारः॥
इत्युणादिकोशः ॥ पयोधिः ॥
पुं समुद्रः इतिराजनिर्घण्टः
पयोधिकं क्ली समुद्रफेनः ॥
इतिराजनिर्घण्टः ॥ ॥
पयोधिः पुम् समुद्रः यथा न।
गणितेयदि जन्मपयो निधेः ॥
हरविभवः ॥ ॥
क्षिपति भूरपि विस्मृता इति ॥
नैषध चतुर्थसर्गः ॥
पयोरः पुं खदिरः इति शब्दचं।
द्रिका ॥

पयोलता स्त्री क्षीरविदारी इ
तिराजनिर्घण्टः ॥ ॥
पयोव्रतः पुं पयो मात्र पानरू।
पव्रतविशेषः यथा धर्म्यपाति
ष्ठे समासाद्य पुंग मन्वन्तरादिके
पयोव्रत स्त्रिरात्रस्या देकरात्रमथा
पिवा इतिमात्स्ये २५२ अथा
यः ॥ द्वादशाह साध्य विष्णुव्र
तविशेषः यथा कश्यपउवाच
एतन्मे भगवान्पृष्टः प्रजाकामस्य
पद्मजः ॥ यदाहते प्रवक्ष्यामि।
व्रतंकेशवतोषणं फाल्गुण॥
स्य मलेपक्षे द्वादशाहे पयोव्रतः
अर्च्चयेदरविन्दाक्षं भक्त्यापरम
यान्वितः सिनीवाल्यांमृदालिप्य
स्नायात् क्रोडविदीर्णया यदि
लभ्येतवैस्रोत स्येतन्मन्त्र मुदीर।
येत् त्वं देव्यादि वराहेण रसायाः
स्थान मिच्छता उद्धृतासि नम
स्तुभ्यं पाप्मानं मे प्रणाशय नि
निर्वर्त्ति तात्मनियमो देवमर्च्चेत्
समाहितः अर्च्चायां स्थण्डिले ॥
सूर्य्ये जले वह्नौ गुरावपि न।
मस्तुभ्यं भगवते पुरुषाय महीयसे सर्व भूतनिवासाय वा।
सुदेवाय साक्षिणे ॥ नमो॥
ऽव्यक्ताय ॥


सूक्ष्माय प्रधान पुरुषाय च चा।
तुर्विंशद्गुणज्ञाय गुणसंख्यानहे
तवे नमो द्विशीर्ष्णेत्रिपदे चतुः
शृंगाय तन्तवे सप्तहस्ताय यज्ञा
य त्रयीविद्यात्मनेनमः ॥ नमः
शिवायरुद्राय नमःशक्तिधरा
यच सर्वविद्याधिपतये भूतानां
पतयेनमः नमोहिरण्यगर्भाय
प्राणायजगदात्मने योगैश्वर्य्य
शरीराय नमस्ते योगहेतवे नम
स्तआदिदेवाय साक्षिभूतायतेन।
मः नारायणाय ऋषये नराय ह
रये नमः नमोमरकत श्यामव
पुषेऽधिगतश्रिये केशवायन।
मस्तुभ्यं नमस्तेपीतवाससे त्वं
सर्ववरदः पुंसां वरेण्य वरदर्षभ
अतस्ते श्रेयसे धीराः पादरेणुमु
पासते अन्ववर्त्तन्त यं देवाः श्रीश्च
तत् पादपद्मयोः स्पृहयन्त इ।
वामोदं भगवान्मे प्रसीदतां पत्ने
मन्त्रै र्हृषीकेश मावाहन पुर
स्कृतं अर्च्चयेच्छ्रद्धया युक्तः पा
द्योपस्पर्शनादिभिः अर्च्चित्वाग
न्धमाल्याद्यैः पयसा स्नपये॥
द्विभुम् वस्त्रोपवीताभरण पाद्यो
पस्पर्शनेस्ततः गन्धधूपादिभि।
श्चार्च्चे द्वादशाक्षरविद्यया स्तेन
यदि नैवेद्यं शाल्यन्नं विभवे

सति सर्पिः सगुडे दत्वा नकृया
न्मलविघया निवेदितं तद्भक्ता
य दद्यात्भुंजीत वा स्वयं दत्वाच
मनवर्जितं ताम्बूलं च निवेदयेत्
जपेदष्टोत्तरशतं स्तवीत स्तुतिभिः
प्रभुं कृत्वा प्रदक्षिणं भूमौ प्रणा
मेद्दण्डवन्मुदा कृत्वा शिरसि त
च्छेषं देवमुद्वासयेत्ततः द्व्यवरान्
भोजयेद्विप्रान् पायसेन यथोचितं
भुंजीत तैरनुज्ञातः शेषं सेष्टः स
भाजितैः ब्रह्मचार्य्यथ तद्रात्र्यां व्यु
ष्टे प्रथमेऽहनि स्नातः शुचिर्यथो
क्तेन विधिना सुसमाहितः पयः
सा स्नापयित्वार्चेद्यावद्व्रतसमापनं
पयोभक्ष्या व्रतमिदं चरेद्विष्णवर्च
नादृतः पूर्ववज्जुहुयादग्निं ब्राह्म
णांश्चापि भोजयेत् एवं त्वहरहः
कुर्य्याद्द्वादशाहं पयोव्रतं हरेराधा
पनं होमं अर्हणं द्विजतर्पणं प्रति
पद्दिनमारभ्य यावत्शुक्लत्रयोदशीं
ब्रह्मचर्य्यमधः स्वप्नं स्नानं त्रिस
वनं चरेत् वर्जयेदसदालापं ॥
भोगानुच्चावचांस्तथा अहिंस्रः
सर्वभूतानां वासुदेवपरायणः ।
त्रयोदश्यां मतो विष्णोः स्नपनं
पंचकैर्विभोः कारयेच्छास्त्रदृ
ष्टेन विधिना विधिकोविदैः पू

जां च महतीं कुर्य्याद्वित्तशाठ्य
विवर्जितः चरुं निरूप्य पयसि
शिपिविष्टाय विष्णवे सूक्तेन तेन
पुरुषं यजेत सुसमाहितः नै
वेद्यं चातिगुणवद्दद्यात् पुरुष
तुष्टिदं आचार्य्यं ज्ञानसंपन्नं वस्त्रा
भरणधेनुभिः तोषयेदृत्विजश्चैव
तद्विद्ध्याराधनं हरेः भोजयेत्तांस्तु
एवं तान् सदन्नेन शुचिस्मिते ॥ अ
न्यांश्च ब्राह्मणान्शक्त्या येच तत्र स
मागताः दक्षिणां गुरवे दद्यादृत्वि
ग्भ्यश्च यथार्हतः अन्नाद्येनाश्वपा
कांश्च प्रीणयेत्समुपागतान् भुक्तव
त्सु च सर्वेषु दीनान्धकृपणेषु च वि
ष्णोस्तत् प्रीणनं विद्वान् भुंजीत सहबं
धुभिः नृत्यवादित्रगीतैश्च स्तुति
भिः स्वस्तिवाचकैः कारयेत्तत्कथा
भिश्च पूजां भगवतोऽन्वहं एतत्
पयोव्रतं नाम पुरुषाराधनं परम् ॥
पितामहेनाभिहितं मयाते समुदा ॥
कृते त्वं चानेन महाभागे सम्यक्
चीर्णेन केशवं आत्मना शुद्धभावे
न नियतात्मा भजाव्ययं अयं वै सर्व
यज्ञाख्यः सर्वव्रतमिति स्मृतं तपः
सारमिदं भद्रे दानं चेश्वर तर्पणं
त एव नियमाः साक्षात् त एव च
यमोत्तमाः तपोदानं व्रतं यज्ञो

येन तुष्यत्यधोक्षजः तस्मादेतद्व्र
तं भद्रे प्रयता श्रद्धयाचर भगवान्
परितुष्टस्ते वरानाशु विधास्यति
इति श्रीभागवते ८ स्कन्धे १६ ।
अध्यायः पयोष्णिजाता स्त्री सर
स्वती नदी इति राजनिर्घण्टः ॥
पयोष्णी स्त्री नदीविशेषः सावि
न्ध्याचल दक्षिणे प्रसिद्धा अस्या
जलगुणाः पयोष्णी सलिलं रुच्यं
पवित्रं पापनाशनं सर्वामयहृ
द्वै सौख्यं बलकान्ति प्रदं लघु इ
ति राजनिर्घण्टः ॥ ॥
परं क्ली केवलं इति मेदिनी ॥
मोक्षः यथा कैवल्यममृतं परम्
इति मुक्तिपर्य्याये रत्नावली ॥
परं ऌ नियोगः शेषः इति मे
दिनी ॥ ॥ ॥
परः पुं शत्रुः इत्यमरः ब्रह्मण
आयुः यथा कालसंख्यासमासे
न पूर्वार्द्ध द्वयकल्पितं स एव
स्यात् परः काल स्तदन्ते परिकल्प्य
ते निजेन तत्प्रमाणेन चायुर्वर्षं
शतं स्मृतं तत्पराख्यं तदर्द्धं च
परार्द्धमभिधीयते अपि च श्री
णि कल्प शतानि स्युस्तथा षष्टि
द्विजोत्तमाः ॥ ब्रह्मणः ॥
॥ ॥ कथिते ॥ ॥

वर्षं पराख्यं तच्चोक्तं परे इति ॥
कौर्म्मे ५ अध्यायः ॥
परः त्रि श्रेष्ठः अरिः दूरः अन्यः
उत्तरः इति मेदिनी ॥ न्यायमते
द्रव्यगुणकर्म्म वृत्ति सत्ता इयं व्या
पकजातिः यथा सामान्यं द्विवि
धं प्रोक्तं परञ्चापरमेव च द्रव्यादि त्रि
कवृत्तिस्तु सत्ता परतयोच्यते परभि
न्ना तया जातिः सैवापरतयोच्यते ॥
द्रव्यत्वादिक जातिस्तु परापरतयो
च्यते व्यापकत्वात् परापि स्यात् ॥
व्याप्यत्वादपरापि च इति भाषापरि
च्छेदः ॥ परमादि भक्ष्यादेः श्री
नाशकत्वे यथा परान्नं च परस्वं च प
रशय्या परस्त्रियः परवेश्मनि वा
सश्च शक्रादपि हरेच्छ्रियं इति ग
रुडपुराणे ॥ श्रेष्ठवाचकपर शब्द
प्रयोगो यथा अन्नदातः शतगुणो
ऽभीष्टदेवः परः स्मृतः गुरुस्तस्मा
च्छतगुणो विद्यामन्त्रप्रदायकः अ
ज्ञान तिमिराच्छन्ने ज्ञानदीपेन चक्षु
षा यः सर्वार्थं दर्शयति तत्परः
कोपि बान्धवः गुरुदत्तेन मन्त्रेण
तपसेष्ट सुरं लभेत् सर्वज्ञत्वं स
र्वसिद्धिं तत्परः कोपि बान्धवः
पितरं मातरं भार्य्यां गुरुपत्नीम्
॥ गुरुं परम् येन पुष्णाति



कापत्यात् समहापातकी पि।
व नास्ति वेदात् परं शास्त्रं नहि
कृष्णात् परः सुरः नास्ति गंगा
समं तीर्थं न पुष्पं तुलसी पा
रं तमा वती भूषणं प्रज्ञाना॥
स्ति परः प्रियः नचदेवात् परः
शाक्तोव्रते नैका दशीविना शाल।
ग्रामात् परो यन्त्रो नतंत्रंभारतात्
परे परं पुण्यस्थलानाच पुण्यक्षेत्र
वने यथा मोक्तदानां यथा काशी
वैस्नवानां यथा शिवः नपार्वती
परा साध्वी नगणेशात् परोवशी
नच विद्यासमो बन्धु नास्ति क।
श्चिद्गुरो परः इति ब्रह्मवैवर्ते पुरा
णे गणपतिखण्डे ४४ ॥ ॥
॥ अध्यायः ॥ ॥ ऽऽ
परः शाते त्रि शात् परम् शाता
धिकसंख्या इत्यमरः ॥ ॥
परःसहस्रे त्रि सहस्रात् परे सह।
स्राधिकसंख्या इत्यमरटीकायां
परःस्वः स व्यस्वः परान्हः पर।
श्व इति भाषा इत्यमरः ॥
श्वो दिनात् परमन्हः परःश्वः प
रः सहस्रवत् पारस्करादित्वात्
सुट् परःश्व इति मधुः सुटे नेच्छ
न्त्यन्ये परश्व इत्याहुः अति क्रा।
॥ न्ते पूर्वतरे दिने परश्वो ॥

न्तान इति प्रयोगो गौणः नत्र प
रश्वतन श्वश्वेति कर्म्म धारयः
इति भरतः ॥ ॥
परकीयं त्रि परसम्बन्धि परश
ब्दस्यटेः पूर्वेण अकापरकः न
स्येदमित्यर्थे ईय प्रत्यय निष्पन्नं
परकीया स्त्री नायिकाभेदः अ
स्यालक्षणं यथा अप्रकट परपु
रुषानुरागा साच द्विविधा परो
ढा १ कन्यकाच २ कन्यायाः
पित्राद्यधीनतया परकीयत्वं अ
स्या गुप्तैवसकला चेष्टा ॥ परो
ढा यथा अयं रेवाकुंजः कुसुम
शरसेवासमुचितः समीरोऽयं।
वेलादरविदलदेला परिमलः
इयं प्रावृट् धन्यानवजलद विम्बा
सचतुरा परा धीनेचेतः सखि।
किमपि कर्त्तुमगयते ॥ सा।
विदग्धा ललिताकुलटा अनुशा।
याना मुदिता प्रभृतीनां परकी।
याया मेवान्तर्भावः गुप्ता त्रिवि
धा वृत्तसुरतगोपना १ वर्त्ति
ष्यमाणसुरत गोपना २ वर्त्तमान
सुरत गोपनाच ३ त्रिविधा यथा
श्वश्रूः कुप्यतु विदिषत्तु सुहृदो।
निन्दन्तु वा यातरस्तस्मिन् कितव
मन्दिरे सखि पुनः स्थापो विधेयो।
मया आरेखा राक्रमणाय कोण।

ईक्षरादुत् फालमा ततवती मार्जा
रीन खरैःखरैः कृतवती कांकां न।
मेऽद्यहंहंसा ॥ विदग्धा द्विविधावा
ग्विदग्धा १ क्रियाविदग्धा चेति २
प्रथमा यथा निविड तम तमाल
मल्लि वल्ली विचकिल राजि विरा
जितोपकंठे पथिक सशुचितः।
स्तवाद्य तीव्रे सवितरि तत्र सरित
टे निवासः द्वितीया यथा दासाय
भवणनाद्यैव दरी मपनेतुमादि
शति हेमन्ते हविनाक्ष्टी वयसि कुटा
रेविनिक्षिपति ललिता यथा यद्गते न
गतं यद्भूयानदपि वा भूयात् यद्भवेत
तद्भवतु वा विफलस्तवगोपनायासः।
कुलटा यथा पत्ते सारिकाणां किर
ति पुरुषान् वर्षतिनाम्भोधराः पौ
लाः शाद्वल पुष्ठमत्तिन स्रजन्ते पु।
नर्नायकान् त्रैलोक्ये तरवः फलानि
सुवते नैवान्तरन्तेगनान् धातः कात
रमालपानि कुलटा हेतो त्वयाकिं।
कृतं अपिच दृष्ट्वी लावत्रिकोणावि
पुलनद नदीग्रामकंठं तदंतं तस्या
मेवास्ति पौलो विपिन मपि ता।
धा हेत्र कासार कूपाः लोका।
ना मर्दनारी शिशु वपि तरसः ॥
कोपि रोगी विवेकी मिथ्या वा।
॥ दो ममायं पु ॥

एवर पुरवेरवः पुंश्चली पुंश्चलीति
अनुशयाना त्रिविधा वर्त्तमानस्था
न विघट्टनेन भावि स्थानाभाव
शंकया स्वानधिष्ठित संकेतस्थले
भर्तृगमनानुमानेन प्रथमक पदाहृ
रणानि सम्पागतवति चैत्रे निप
तति पत्रे लवंग लतिकायाः स्फुट
शः कपोलपाली शिवशिवतता।
ली दलद्युतिं लेभे ॥ निद्रालु के।
कि मिथुनानि कपोत पोतव्याधूतत्तू
नमहीरुह पल्लवानि तत्रापि तत्विनव
नानि कियन्ति सन्ति विघत्वनमिथन।
मस्पृहं मधाहि कणिकल्पितरसाल
मंजरी पिंजरीकृतकपोल मण्डलः
निष्पन्ननयन वारिधारया राधया म
धुरिपु निवीक्ष्यते ॥ मुदिता यथा
गोष्ठेषु तिष्ठति पतिर्वधिरा ननान्दा
नेत्रद्वयस्य नच पाटवमस्तियातु श्व
निगघसततुः कुचेके भसीम्निरोमा।
च कंचुकमुद्रेदवित मातनोति ॥ कन्य
का यथा किंचित् कुंचितहारयष्टिस
रल भ्रूवल्लि मांचिस्मितम् प्रांत॥
भ्रान्त विलोकनद्युति भुजापर्य्यन्त
कर्णात् पलम् अंशुसा स्फुरदंश
लीयकरुचाकणस्य कण्डूयनम्
कुर्वाणान्टप कन्यका सकेतिनं
सव्याज मालोकते इतिरस ॥

मञ्जरी ॥ ॥ परत्रास्थिः
पुं सर्वावधिः अंगुलि पर्व ॥
॥ इतिहारावली ॥
परच्छन्दः त्रि पराधीनः इतिहे
मचन्द्रः ॥ ॥
परच्छिद्रं क्ली परदोषः यथा।
नीचः सर्षप मात्राणि परच्छिद्रा।
णि पश्यति आत्मनो विल्वमात्रा
णि पश्यन्नपि न पश्यति इति ग
॥ रुडपुराणम् ॥
परजातः त्रि परैधितः ओदासीन्ये
न परपुष्टः परपोषितत्वात् पर।
स्माज्जातः इत्यमर भरतौ ॥ ॥
अन्येनोत पन्नश्च ॥ ॥
परजितः त्रि परपुष्टः शत्रुणा
पर जितः इतिकेचित् ॥
परंजः पुं तैलयन्त्रं छुरिकाफलः
फेनः इतिमेदिनी ॥ ॥
परंजनः पुम् वरुणः इतिहेमचं।
द्रः परंजयः पुं वरुणः इतित्रि।
काण्डशेषः शत्रुजयकर्त्ता परान्।
जयतीति खच् प्रत्ययेनव्युत्पन्नः ॥
परतन्त्रः त्रि पराधीनः इत्यमरः
परत्रभीरुः त्रि धार्म्मिकः परका
लभयशीलः यथा परत्र भीरुः ध
र्म्मिष्ठ मधुकं क्रोध वर्जिते इति
मितात्तरायां कात्यायनः ॥

परत्वं क्ली परता परस्यभावः ॥
न्यायमते तद्द्विविधं दैशिकम् १
तल्लक्षणं तत्र सूर्य्य संयोग ज्ञानजन्य।
गुणः कालिकं २ तच्च वक्ष्यमा॥
कालान्तरि तत्व ज्ञान जन्य गुणः प।
तद्द्वयं मूर्त पदार्थ गुणः दैशिक।
परत्वस्यासमवायिकारणं दिक् ॥
शरीर संयोगः कालिक परत्वस्या
समवायिकारणं काल पिण्ड संयो
गः ते अपेक्षा बुद्धि जन्ये तन्नाशाना।
शेषच यथा परत्वंचा परत्वंच द्विवि
धं परिकीर्त्तितम् दैशिकं कालिकं
चापि मूर्त्तएव तु दैशिकं परत्वे ॥
सूर्य्यसंयोग भूयस्त्व ज्ञानतो भवे
त् अपरत्वं तदल्पत्व बुद्धितःस्या।
दितीरिते तयोरस मवायीत दि।
क् संयोग स्तदाश्रये दिवाकर परि
स्पन्द भूर्स्त्वात् परत्वबुद्धितः पर।
त्व मपरत्वंतु तदनन्तरबुद्धितः
अत्रत्व समवायीतु संयोगः काल
पिण्डयोः अपेक्षा बुद्धिनाशाश्च ॥
नाशा स्तेषांनिरूपितः इतिभाषा
परिच्छेदः परदारः पुं परभा॥
र्य्या तद्गमने दोषो यथा परदा।
र रताश्चैव परद्रव्यहराश्चये ॥
अधोधो नरकेयान्ति पीड्यन्ते।
यमकिङ्करैः ॥ इतिकर्म्म

लोचने ब्राह्मणः क्षत्रियो वैश्यो।
यो रतः परयोषिति याति तस्याः प्र
ज्ञितस्य रुष्टा लक्ष्मीर्गृहादपि इहा
ति निन्द्यः सर्वत्र नाधिकारी स्वक।
र्म्मसु परत्रैवान्धकूपेच यावद्वर्ष शते।
वषात् अपिचकिंतजपेन तपसामौ।
नेनच व्रतेनच स्वराद्धेनेन तीर्थेन।
स्त्रीभिर्यस्य मनोहृते सर्वमायाकर।
राज्यश्च धर्म्ममार्गार्गलेन्द्राणां अवधा
नेच तपसा दोषाणामाश्रमेपरं कर्म्म
वन्म निवेधानां निगडे कठिने सुत
प्रदीप रूपं कीटानां मीनानां वडि।
शं यथा विषकुम्भं दुग्धमुखमा
रम्भ मधुरोपमं परिणामेदुःख
बीजं सोपानं नरकस्यच इति ब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखण्डे ३० ९९
अध्यायः ॥ यन्त्रपाणिगृहीतीं
तो हित्वान्या योषितं व्रजेत् अग।
म्या गमने तद्धि सद्यो नरकका।
रणं नित्यनैमित्तिकं काम्यं या।
गयज्ञ व्रतादिकम् लेखतीर्थाट।
नं तस्मिन् वास्या धर्म्म क्रियादिकं
स्वाध्यायादि तपो दैवं पैत्रं कर्म्म
वरानने योत्पन्नं निष्फलं सर्वं प
र स्त्री गमनात् न्यणाम् परदा
राभि गमनात् कोटि प्रकार
स्त्रीव्रतम् अपरं ॥ ॥

किमु वक्तव्यं निष्फलं निरये स्थि
तिः सत्यंसत्यंपुनःसत्यं सत्यमेव।
ब्रवीमिते परयोनौ पतन् विन्दुः
कोटिप्रज्ञो विनश्यति इति पाद्मो
त्तरखण्डे ७५ अध्यायः ॥ ॥
अपिच स्याज्जे धर्म्मान्विते नित्यं या।
रदारोपसेवने नयन्ति परदाराहि नर
कानेकविंशति सर्वेषा मेववर्णाना।
मेषधर्म्मो ध्रुवोऽव्ययः एवं पूर्णास्तुर।
यते देवर्षिरसितो व्यासः प्राह धर्म्म
व्यवस्थानं स्वर्गेच्छाया हृणायहि तस्मा
त्सहरतो वर्जयेत् परदारान् विचक्षणः
नयन्ति निकृति प्रज्ञं परदारा पराभवे
इति वामने ९२ अध्यायः ॥
परदुःखं क्ली अन्यजनपीडा यथा
त्यक्तात्मसुखभोगेच्छा सर्वसत्त्वसु।
खैषिणः भवन्ति परदुःखेन साधु।
वो नित्यदुःखिताः परदुःखानि
स्वे स्वदुःखानि महान्त्यपि नपेक्ष।
न्ते महात्मानः सर्वभूत हितेरता॥
ताः इत्यग्निपुराणम् ॥ ॥
परद्वेषी न त्रि विद्वेषकः परद्वे।
ष्टा इति शब्दमाला ॥ ॥
परध्यानं क्ली ध्यानविशेषः ॥
यथा ध्येयेमनो निश्चलता या॥
तिध्येयं विचिन्तयन् ॥ ॥

निष्पापाः गतिं गच्छन्ति सन्तुष्टा
स्तथा ह्यमायाः परमां गतिम् इति ।
महाभारते मोक्षधर्म्मः ॥
परमगवः पुं स्त्री श्रेष्ठगौः परम
श्चासौ गौश्चेति कर्म्मधारय ॥
समासे वोपदेवः ॥ ॥
परमपदः पुं क्ली श्रेष्ठस्थाने परदे
वता चरणः यथा स्वपक्षे गङ्गी
णीं कुसुमपञ्जषी मन्दिरे महो पु
रो ध्यायन् ध्यायन् यदि नपति ।
भक्तस्तव मत्रे स गन्धर्व श्रेणीप
ति रपि कविता मृतनदी नदीनः
पर्य्यन्ते परमपद लीनः प्रभवति
इति कर्पूरस्तोत्रम् ॥ ॥
परमब्रह्म नै क्ली परमेश्वरः नारा
यणः यथा सत्यतपा उवाच या
दे तत् परमं ब्रह्म तया प्रोक्तं म
हामुने ॥ तस्य रूपं न जा न
न्ति योगिनोऽपि महात्मनः ।
अतो न गोत्ररहितं मर्म्महीन म्
न्ति वर्जितम् कथं तन् ज्ञाय
ते ब्रह्म संज्ञा नाम विवर्जितम्
ततस्य संज्ञां कथय येन जा॥
नाम्य हम् गुरो दुर्वासा उवाच
यदेतत् परमं ब्रह्म वेदवा
देषु पठ्यते स ॥ ॥

देवः पुण्डरीकाक्षः स्वयं नाराय॥
णः परः सर्वज्ञे विविधे विष्टेदीनेद
नैश्वसत्तम प्रस्यते परमो देवः स्वा
यं नारायणो हविः इतिवराहपुराणं
परमर्षिः पुं वेलादि ऋषिविशेषः
इति त्रिकाण्डशेषः अस्यव्युत् पत्ति
र्यथा ऋषिर्हिंसागतौ धातुर्विद्या
समन्तपः श्रुतेः एषसन्ति चयो य
स्मात् ब्रह्मणश्च ततस्त्वृषिः वि
वृति समकाले तु बुद्धाव्यक्तिम
षि स्वयम् ऋषते परमं यस्मात्
परमर्षि स्ततः स्मृतः गत्यर्थादृष
ते र्धातो र्नामानि वृत्तिकारणं यस्मा
देष स्वयं भूत स्तस्माच्च ऋषिताम
ता इति मात्स्ये १२० अध्यायः
परमस्वधर्म्मा नै त्रि परम स्वो
धर्म्मायस्य इति कर्म्मधारय पू
र्वपद बहुब्रीहौ ॥ सिद्धा॥
न्तकौमुदी ॥ ॥ ॥
परमहंसः पुं संन्यासिविशेषः
अस्य लक्षणं यथा जातरूप वेदो
निर्द्वन्द्वो निष्परिग्रह स्तत्त्व ब्रह्म ॥
मार्गे सम्यक् सम्पन्नः शुद्धमा
नसः प्राणसंधारणार्थं यथो
क्तकाले भैक्ष्यमाचरन् लाभा
लाभौ समौ कृत्वा शून्यागार दे
वगृह तृणकूट वल्मीक ॥

वृक्षमूल कुलालशाला ग्निहोत्र
नदी पुलिन गिरिकुहर कन्दर को
टर निकर स्थण्डिलेषु निकेत वासी
निष्प्रयत्नो निर्म्ममः शुक्लध्यान परा
यणः अध्यात्मनिष्ठः शुभाशुभक
र्म्मनिर्म्मूलनाय संन्यासेन देह त्या
गं करोति यः सएव परमहंसो ना
मेति जीवन्मुक्तिविवेकः ॥
परमाणुः पुं पृथिव्यादि भूतच
तुष्टयानां द्व्यणुकानामवयवः सच
नित्यः निरवयवः ततःसूक्ष्ममपि
नास्ति यथा नित्या नित्या चसा द्वे
धा नित्या स्या दणुलक्षणा अ
नित्यातु तदन्या स्यात् सैवावयव
योगिनी परिमाणत्व नायक ते
त् परिमाणान्न न कस्यापि कार
णं यथा पार्थिवाणुस्थ भिन्नानां
कारणत्व मुदाहृतं जलादिपरमा
णु रूपस्य नित्यत्वं पार्थिव परमा
णु रूपस्यानित्यत्वं यथा जला
दि परमाणौ तन्नित्य मन्यत् म
हेतुकम् इति भाषा परिच्छेदः
तैरेव परमाणुभि रम्बुपादाने
द्व्यणुक त्रसरेण्वादि क्रमेण ॥
स्थूल क्षिति जल तेजो मरुतः ।
सृजति परमेश्वरः यथा प्रा
यो जनं परमाणु कर्म्म तथाच
सर्गाद्य कालीनम् ॥

द्व्यणुकारम्भक परमाणु कर्म्म यत्न
जन्यं प्रयत्नवदात्म संयोग जन्यं वा॥
कर्म्मत्वादस्मदादि शरीर कर्म्मवदिति
कुसुमाञ्जलिः प्रलये इति स्थूलस्थूल
नाशान्तरे परमाणु क्रिया विभाग
पूर्व संयोगनाशादि क्रमेण द्व्यणुक
नाशात्तिष्ठन्ति परमाणव एवेति ॥
यथा दोधूयमाना स्तिष्ठन्ति प्रलये
परमाणवः इति प्राचीनकारिका॥
तस्य महत्त्वाभावादनीन्द्रियत्वं य
था महत्त्वं षड्विधे हेतु रिति भाषा
परिच्छेदः ॐ कालविशेषः यथा
सकालः परमाणुर्वै यो भुङ्क्ते परमा
णुतां सतो विशेष भुगयस्तु कालः
स परमो महान् ५ अणुर्द्वौ परमा
णू स्या त्रसरेणु स्त्रयः स्मृतः जाला
र्करश्म्यवगतः खमेवानुपतन्नगात्
९ इति श्रीभागवते ३ स्कन्धे ११
अध्यायः अस्यार्थः एतदेव प्रप
ञ्चयति सहेत्यादिना सतः प्रपञ्च
स्य परमाणुता परमान्त्यवस्था
यो भुङ्क्ते सकालः परमाणुः ता
सैवा विशेषम् साकल्यं यो भुङ्
क्ते स परममहान् अयमर्थः ग्रहे
र्क्ष तारा चक्रस्थ इत्यादिना यत्
सूर्य्य पर्य्यटनं वक्ष्यति तत्र सू
र्य्यो यावता परमाणु देशम
तिक्रामति तावान् कालः प

परमाणुः यावताच द्वादश राश्या
त्मकं सर्वं भुवनकोष मतिक्राम।
तिस परममहान् संवत् सरात्मकः
तस्यैवाद्यन्ता युग मन्वन्तरादि क्रमेण
द्विपरार्द्धान्तत्व मिति तथाच पंच
मे सूर्य्य गत्यैव कालादि विभागं
वक्ष्यति ५ इदानीं द्व्यणुकादि ल।
क्षण सर्वके मध्यम काला वस्था।
कथयति द्वौ परमाणू अणुः॥
स्यात् अयो ऽणव स्त्रसरेणुः स।
त्व मत्यत्र इत्याह जालार्कति गवा
क्ष प्रविष्टेषर्क रश्मि ष्ववगतः को।
ऽसो योतिलघुत्वेन खमेवानुपतन्न
गात् गतः नगामिति पाठे खमेवानु
पतन्नवगतः नतुगां पृथ्वीं ६ इति
श्रीधरस्वामी ॥ ॥
परमाणुर्वेगकः पुं विस्नुः इति।
शब्दमाला ॥ ॥
परमात्मा पुं परब्रह्म तत् पर्य्या।
यः आत्मा ज्योतिः २ चिदात्मा ३
यथा परमात्मा परब्रह्म निर्गुणः
प्रकृतेपरः कारणं कारणानाञ्च ॥
श्रीकृष्णो भगवान्स्वयं इति ब्रह्म
वैवर्त्ते प्रकृतिखण्ड २३ ॥ ॥
अध्यायः ॥ परमाद्वैतः पुं
विष्णुः यथा नमस्ते ज्ञान सङ्गा।
य नमस्ते ज्ञानदा यक नम।
स्ते परमा द्वैत नमस्ते पुरु ॥

षोत्तम इति गरुड पुराणे ॥
परमान्नं क्ली देवपित्रन्नत्वात् पर।
मश्रुत् कृष्टमन्नं परमान्ना मुत्कृष्टा
न्नं देवादेवामन्न मितिवा इतिभर।
तः तत् पर्य्यायः पायसः २ इ।
त्यमरः क्षीरिका ३ तस्य पाक प्र।
कारो यथा शुद्धेहि पक्वे दुग्धे तण्डु।
लांश्च स्थूलान् क्षिपेत् ते सिद्धाः
क्षीरिका ख्याता सासिता ज्य युता
त्तमा अस्य गुणाः क्षीरिका दुर्ज्ज
रा वल्या धातु पुष्टि प्रदा गुरु वि।
ष्टम्भिनी हरेत् पित्त रक्तपित्ताग्निमा
रुतान् इतिभावप्रकाशः ॥
परमायुः क्ली जीवितकालः ॥
यथा शतंवर्षाणि विंशत्या निशा
भिः पंचभिः सह परमायु विरंचे
ऽ नराणां करिणां मिह अश्वानां
त्रिंशद्वर्षाणां स्फूनो द्वादशवत्सराः
पंचविंशतिवर्षाणि खरस्य करा।
भस्यच चतुर्विंशति रश्वानां वृष।
स्य महिषस्य च (ऽश्ग सूकर वस्ता
दि महिषस्य च) अश्ग सूकर वस्ता।
दिपशूनां षड् दशाब्दिकाः इति ॥
शब्दमाला ॥ ॥
अथायुर्ज्ञानयन्त्रनम् ॥ अल्पात्मा।
दा ष्यः सर्वं विफलं कीर्त्तितंच
यत् तस्मादा नयनं तस्य स्फु दा।
र्घ्य मभिधी यते नीचान्तरस्थं।

दस्य भागस्तु गुणो भवेत् चेष्टा।
केन्द्रस्तु चेत् षड्भादधिके चक्र शो।
धिते नान्यथा तस्य भागादि चेष्टागुण
कउच्यते गुणोश्चेत् षष्टि ६० तोस्तने।
तहा द्याप्ते सखांनलः ३० एवं तुगत
णाश्चेष्टा गुणोयत्स्यात् तयोर्वधात्।
मूलेकलादिकं तत्स्या तुगणकस्फुट
उच्यते अथाश्रय गुणावसे तेजा।
दि समवर्गजे वर्गेतेजा दिके स्वर्हे
त्यात्त्रिंशत् ३० कला गुणः अधि
मित्र गृहे तत्र २५ मित्रे विंशतिशानां
तयः २१ ४५ समे पंचदश त्याज्याः
शात्रौ स्वत्र्यंशकोरगाः ८ २० पंचा
त्यर्वौ ५ तदैक्यं यत् तेज्योस्य गुणा
पुकप्तनः स्वर्त्तैवर्गात्मेस्त्वांशो
र्द्धंशोस्याद्यगुणः अधीष्टैस्तु।
गांशान स्वांशनो मित्रवेश्मनि॥
समेद्यांशो रिपोर्त्र्यांशो गुणांशास्त्
निशाधुने एवं स्यादा श्रयगुणा।
विशेषायः स उच्यते स्वत्र्यंशकः
स्वांशांशकोवा वर्गोत्तम गतोपि।
वा यदिस्यादपि मित्र र्क्षे तदा।
तत्रा श्रयगुणो गजनेत्रे समुद्रा।
न्ती २८ ३४ कलाद्यै मिश्रये तु
धः एवं मित्र गृहे तद्रूप त्रिं।
शद्भिमिश्रयेत् १९ २० शत्रुद्रे
क्काणषड् लिप्ता कनेत्रविकलासमन्वित्

६ २१ अधिशत्रु गृहे वाण त्र्यंशी ५
४५ लिप्ताधिकं त्वनेन अश्रयस्य गु।
णास्यास्य वयः स्फुटगुणास्मयः तत्का
ले कर्म्मयोग्यः स्यात् गुणा आयुर्विधोस्मृ
तः खेटानांच तनोर्भागाः खाभि ४०
लिप्ताः कलीकृताः पुनः सूर्य्यरसाः ६०
मस्ताः क्रमात् स्यादायुषः फलं जन्म
लग्ने ग्रहे योगा नेत्रनेचक्रार्द्धे तायदि
तत्कलास्या तदाहारो नाग षड्गा।
धिकेविधिः खखभूतत्या ९०० ख।
खांकेन ९०० गुणितं फलमायुषः
क्रमतः पापसौम्यानां हारात्म शो
धनं भवेत् खखभूरस्त्रन हारैश्च हारो।
हारहलेक्रमात् आयुः फलं त्र मूना
भे ध्नत्यामा शोधनेतथा आयुःफ
लं शोधनेन मेवं चक्रार्द्धे शोधनं
चक्रार्द्धे शोधनेत्वेक राशौ द्वादि ग्रहे
सति एकस्याधिक वीर्यस्य हानिरु
स्य प्रभासते आयुः फलेहतंस्वी
ये गुणौर्वीर्ये कलादिभिः षष्ट्या
प्ते ६० तत् पुनः सूर्य्य सहस्रा १२०००
प्ताः समादयः तनोरायुः फलंस
र्य्य सहस्रा १२००० प्ताः समाद।
यः चेल्लग्न वलवद्योन्या राशित्त
ल्याः समास्तथा द्वादशाहतभा।
गाश्चे दिनाद्यैश्चापि संयुताः ॥
एवं संध्यादि लग्नाना ॥

मेषगायुः प्रस्फुटं भवेत् ॥
सुज्ञानवित खेटस्य कला आयुः
पलं भवेत् तच्चेत् षड्भकलाम्
ने तदा तोद्विगुणाच्युतं अथवा
स्वनीचान्तरितः खेटः सषड्भः स ॥
कलीकृतः आयुःपलमिदं प्रोक्ते।
ज्ञेयं पैण्डादिकत्रये ॥ अंशोने ॥
शत्रुभस्यस्य विनार् मायुषःपलं
अस्तगस्य द्विभागोनं हित्वा शुक्र
शनैश्चरौ एकस्ययदि खेटस्य अं॥
शाहिहानि सम्भवः अपि केका
तदाहानिः कर्त्तव्यात्र विपश्चिता ॥
चक्रार्द्धे शोधनं कार्य्यं पूर्ववत्स।
ति सम्भवे एवमायुः पलं पैण्ड
जीवः प्रोक्तं निसर्गजं पैण्ड यथा
गते सोऽर्के भानोर्द्विघ्नांशावर्जितं ॥
चन्द्रस्य वेदभागाह्वं भृगोर्द्विघ्ना ॥
शा २० संयुतं ॥ कुजस्यैव युगा ४
योनं त्रुस्योंऽह्नतत् शरांशायुक् ॥
आयुः पलं निसर्गाख्यं रविकव्या
र्धयागतं दशांशेन दलं तस्य ॥
जीवस्यविंशद्व्यंशाकं दशांशोभु।
मि गुरुस्य विंशांशेन निशापतेः द
शांशं फणिभिर्भक्तं शनेरायुः पलं।
भवेत् जीवोक्तं सप्तभागोनं सर्वे
षां मायुषः पलम् आयुःपलस्य
लाभाष्ट दिग्भागेन १९८०० समाप्तं

इत्यमायुः पलं खाष्टशाम्रः १९८०
स्यात् समादिकं पैण्डैं सर्गजी
वोक्ते भवेदायुः खगामिनो अथ
वा रवेरायुः पलं आम्रं विनखेवा।
शंदिग्नादिकं पैण्डमायुर्भवेदिन्दो।
र्वानन्नं ५ द्वादशा १२ हुतं कुज यु।
वो युगे ४ नाम्नं बुधस्य पंचभिर्हृतं
कवेः शैल ७ हृतं विंशत्या २० म
शोरं ग्रेणाहृतं विधोरायुः पलं ॥
लब्धं खरैः स्याद्दिनादिकं निस
र्गे शशिपुत्रस्य राम ३ न्नं खयमो।
हृतं रविकव्यो गुणेनाम्नं कुजस्य।
खण्डेनाहृतं गुरोश्छिन्नं खचन्द्रा
१० म्नं शनेः स्वर्कां ६ शातो लितं
अथवा आयुः पलमिनादीनां।
खाब्धिपञ्चाग ७९४० भागयुक्
छिन्नं सप्तामायुः स्याद्दिनाद्यं।
जीव भाषितम् विरापि लग्नवि ॥
कला खख खार्क १२०० रघुनात
नोः तदंशकं सर्वत्रेय मायुः पै।
ण्डादिकत्रये अथ तत्र तनोश्च
पूर्ववदन्ति बहवो बुधाः केचिद्राशि
समं केचित्तस्यापि यो वली ॥
लग्नस्फुटस्य लिप्ताभिर्हृन्मदायुर्हृ
तारिणां प्रत्येकं चन्द्र लिप्ताभि २०
९००। भजेद्वर्षादिकं भवेत् अने
न हीनखखायुर्लग्नेपाप ग्रहे सति

हृष्टेन सौम्यखेटेन तस्यार्द्धेनतदा
विग्रुक व्याख्यानमुत पलस्येहृहृ
ज्ञातक भाषितं केचित् प्राऊ।
र्लग्नराशिं त्यक्त्वा लिप्तादिका क्रि
या अन्ये लग्नस्यपापस्य भावोत्थ
फलताडितं युताम्रं षष्ट्यामायुर्ध्य
त तत् षष्ट्याम्रं विशोधयेत् तत्रा।
पि लग्ने पापौ चेत् बलिष्ठस्य फलेन
तत् साम्ये शुष्टफलेनैव क्रियाका
र्य्या विचक्षणैः पापेपि लग्नेलग्ने
शो न कर्त्तव्या त्रिये क्रिया अंशा
युषि न कार्य्येवं हानिः प्रोक्तेः का।
र्य्यं चन लग्नस्य वीर्य्यादेशोत्स्य यो।
ऽत्र भानो र्वलाधिकात् निसर्गाये।
विधो वीर्य्यादायुः साध्यं विचक्ष
णैः त्रयश्च बलही नास्तुर्जीवो।
क्तं साधयेत्तदा लग्नेश लग्नभा।
न्वोश्चसर्वेन्द्वोः समवीर्य्ययोः त।
दायुषा यदेकार्द्धं तदुक्तं अथ
गादिभिः नात्रसाधनादायुः प।
यक्स्तन्य नगांशकैः साष्टस्तु ॥
र्य्यांशाकैः १२८ हीने सोऽर्के वर्षादि
कं भवेत् पथ्याशिनः सधर्म्मा ये
सत्क्षीलास्मानितेन्द्रियाः गुरुदेव
द्विजे भक्ता स्तेषा मेवायुरीरितं।
येपापा लब्ध कृपणा देवब्राह्म
णनिन्दकाः वन्य ऐर्वगमासक्ता
स्तेषां

स्त्रग्रकालज्ञः इति तोषण्यामा
युर्दायाध्यायः ॥ ॥
परमायुषः पुं आसनवृक्षः इति
शब्दचन्द्रिका ॥ परमार्थः ॥
पुं उत्कृष्टे वस्तु यथार्थः यथा
प्रपंचे यदिवर्त्तेत निवर्त्तेत नसंशयः
माया मात्र मिदं द्वैत मद्वैतं परमार्थ
तः इति माण्डूक्यवार्त्तिकं ॥
परमार्हतः पुं जैनराजर्षिविशेषः
॥ इति हेमचन्द्रः ॥ ॥
परमेष्ठः पुं काकः परेभ्योमस्त
रस्य इतित्रिकाण्डशेषः ॥
परमेश्वरः पुं शिवः इतिहलायुधः
विष्णुः यथा इदन्तु द्वादशश्लोकं
पत्रैवं केशवस्याहि द्वादशारं त।
याचक्रं यन्नाभि द्विभुजं तथा
त्रिव्यूहन्तेक मूर्त्तिश्च तथोक्तः प
रमेश्वरः इति वामने ५८ ॥
अध्यायः ॥ ॥
परमेष्ठिनी स्त्री ब्राह्मी वामनहा
टी इति भाषा इति राजनिर्घ।
ण्टः ॥ परमेष्ठिनः पंक्तिश्च ॥
परमेष्ठीन् पुं ब्रह्मा इत्यमरः
जिनः इति हेमचन्द्रः शाल।
ग्राम विशेषः यथा परमेष्ठी
च शुक्लाभः पद्मचक्रसमन्वितः
चित्राकृति तथा पृष्ठे सुषिरञ्चा

ति शुक्ले परमेष्ठी लोहिता
अष्टकमेकं तथा शुते विद्या॥
कृति स्तथा रवा शुचि रत्नाति।
शुक्ले इति ब्रह्मपुराणे परमे॥
ष्ठी च शुक्ला अष्टक पद्मसमन्वितः
सवर्णलस्तथा पीतः इष्टे च शुषिरे
फले इति पुराणसंग्रहः परमेष्ठी।
तरला अष्टक पद्मसमन्वितः॥
द्विधाकृत स्तथा इष्टे शुषिरश्चापि
वर्त्तुले पीतवर्णा भुजोवापि भुक्ति
मुक्ति वरप्रदः इति वैश्वानरसं॥
हिता॥ गुरुविशेषः॥ यथा
आदौ सर्वत्र देवेषि मन्त्रदः पर॥
मो गुरुः परापर गुरुस्त्वंहि पर।
मेष्ठी त्वंहं गुरुः इति बृहन्नील
तन्त्रे २ पटलः मन्त्रदाता गुरुः
प्रोक्तो मन्त्रस्तु परमो गुरुः॥
परापर गुरुस्त्वं हि परमेष्ठिगु
रुस्ततः इति तन्त्रान्तरम्॥
परम्परः पुं प्रपौत्रादिः मृग।
भेदः इति हेमचन्द्रः॥
प्रपौत्र तनयः इति मेदिनी॥
परम्परा स्त्री अन्वयः संतानः
वधः हिंसा इति हेमचन्द्रः॥
परिपाटी अनुक्रमः इति॥
शब्दरत्नावली॥ ॥ यथा
इमं विवस्वते योगं प्रोक्त॥

वानहमव्ययं विवस्वान् मनवे प्रा
ह मनुरिक्ष्वाकवे ऽब्रवीत् एवं॥
परम्परा प्राप्तं तथा राजर्षयो वि
दुः सकालेनेह महता योगोनष्टः
परंतप इति श्रीभगवद्गीतायां।
अध्यायः॥ ॥ ॥
परम्पराकं क्ली यज्ञार्थपशुहनने
तत्पर्यायः शमनं २ प्रोक्षणं ३
इत्यमरः वातने ४ वधः ५ इ
ति शब्दरत्नावली॥ ॥
परम्परीणः त्रि परम्पराप्राप्ते य।
था लक्ष्मीं परम्परीणां त्व पुत्र पौ।
त्रीणतां नय इति भट्टिः॥
परहः पुं केशराजः इति त्रि॥
काण्डशेषः॥ ॥
परलोकः पुं लोकान्तरे तत्र।
स्वर्गादि यथा समस्तानात्य भू
विष्ट पास्यैवे मत्यमेत्ययं लोके।
प्रयाति पश्चात्ते परलोके नत्तग।
तः इति नैषधः॥ ॥
परलोक गमः पुं मृत्युः इ।
ति हेमचन्द्रः॥ ॥
परवशः त्रि अस्ववशीभूतः॥
तत्पर्यायः परायत्तः २ परा।
धीनः ३ परच्छन्दः ४ परवा
न ५ इतिहेमचन्द्रः॥
परवाणिः पुं धर्माध्यक्षः तत्सरः

इति मेदिनी कार्त्तिकेयवाहनो म
यूरः इति शब्दमाला॥ ॥
परवान् त्रि परधीनः इत्यमरः
परव्रतः पुं धृतराष्ट्रः इति शब्द
रत्नावली॥ परशः क्ली॥
रत्नविशेषः यथा मुक्तामाणिक्य।
परश मणिरत्नाकरान्विते कृत्स्नशु
भ्रं हरिद्रक्त मणिराजि विराजितम्
इति ब्रह्मवैवर्त्ते श्रीजन्मखण्डे ४।
अध्यायः॥ ॥ परशव्यं॥
त्रि परशवे हितं तस्मै हिताद्युद।
त गवादेर्यत् इति संक्षिप्तसारप
रशुः पुं अस्त्रविशेषः टांगी इति।
भाषा तत्पर्यायः परशुः २ पर
श्वधः ३ पर्श्वधः ४ स्वधितिः ५
कुठारः ६ इति हेमचन्द्रः॥
परशुधरः पुं गणेशः इति हला
युधः॥ ॥ परशुरामः
पुं भगवतः षोडशावतारः॥
यथा अवतारे षोडशमे पश्यन्।
ब्रह्मद्रुहो नृपान् त्रिः सप्तकृत्वः
कुपितो निः क्षत्रामकरोन्महीम्
इति श्रीभागवते १ स्कन्धे ३
अध्यायः॥ ॥
तत्पर्यायः जामदग्न्यः २।
पर्शुरामः ३ परशुरामकः ४
भार्गवः ५ भृगुपतिः ६ भृगुस्ता

पतिः ७ इति शब्दरत्नावली अस्या
त पराक्रमादिकं यथा मार्कण्डेय उ
वाच अथ काले व्यतीते तु जमद।
ग्निर्महातपाः विदर्भ राजस्य सुतां
प्रयत्नेन जितां स्वयं भार्यार्थे प्रतिज।
ग्राह वेणुकां लक्षणान्वितां सा तस्मा।
त सुषुवे पुत्रान् चतुरो वेदसम्मतान्
रुषणकं सुषेणञ्च विश्वं विश्वावसुं।
तथा पञ्चमस्या स्वयंजज्ञे भगवान् म
धुसूदनः॥ कार्त्तवीर्य्यवधायाशु
शक्राद्यैः सकलैः सुरैः याचितः प।
ञ्चमः सो ऽभूत्तेषां रामाह्वयस्तयः
भारावतरणार्थाय जातः परशुना।
सह सहजः परशुस्तस्य तेजहानि।
करावन अयं निजपितामहाश्वक
भक्ति विपर्ययात्॥ ब्राह्मणः क्ष
त्रियाचारो रामोऽभूत्क्रूरकर्मकृत्
स वेदानखिलान् ज्ञात्वा धनुर्वेदं।
अ सर्वशः सम्भातात् कृतकृत्यो भू
हेद्विद्याविशारदः इति कालिका
पुराणे ८५ अध्यायः॥
अव शिष्टे पाप्मान रावणे ५। अ
ध्याये द्रष्टव्यम्॥ परश्वः॥
स व्य श्वः परदिने आगामिदि॥
नात् परदिने इत्यमरः॥
अस्य टीका परः श्वः प्राहे इश्वा
गतदिनात् पूर्वदिने पर्श्व इति॥

भाषा यथा परस्वश्च महाभाग
स्नाते गंगायहेगता अवतीर्णा
विकृष्टास्मि इहकागेनकेनचि।
न् इति मार्कण्डेयपुराणे श्री।
वीतिच्चरितम् ॥ ॥
परस्वथः पुं कुठारः इत्यमरः ॥
परसंज्ञकः पुं आत्मा इति शब्द
रत्नावली ॥ ॥
परस्वथः पुं परस्वथः कुठारः ॥
इत्यमरः टीकायांराययमुकुटः ॥
परस्मरे त्रि अन्योन्ये इतरेतरे य।
या वनानितोयानिचनेत्रकल्पैः
पुष्पैःसरोजैश्च निलीनभृंगैः य
रस्परं विस्मय वन्ति लक्ष्मीमा॥
लोकयांचक्रु रिवारवेण इति।
भट्टिद्वितीयसर्गः ॥ ॥
परस्मैपदं क्ली दशलकाराणां।
प्रत्येकं पूर्वनव विभक्तयः ॥
यथा लडादिषु पूर्वनव परस्मै
पदं परेनव आत्मनेपदं परि।
भाष्यन्ते इति संक्षिप्तसारं व्या।
करणं वोपदेवेनास्य संज्ञाकृ
ता यथा नवशः पसे त्रितोऽन्य।
ङिञ्जौचेत् इति मुग्धबोधव्याकर
णम् ॥ परस्त्रैत्रं क्ली पर।
पत्नी परशरीरम् परभूमिः
यथा हलायेदि प ॥

रस्तेत्रादायाति तेत्र रत्तकः ॥
इतिचन्द्रालोकः ॥ ॥
परा व्य विमोक्षः प्राधान्यम् ॥
प्रातिलोम्य ॥ धर्षणं आभिमु ॥
ख्य भृशार्थे विक्रमः गतिः व।
धः इतिमेदिनी ॥ उपस।
र्गविशेषः अस्यार्थः भंगः अ।
नादरः प्रत्यावृत्तिः न्यग्भावः ॥
इतिमुग्धबोधटीकायांदुर्गादासः
परा स्त्री वन्ध्याकर्कोटकी इति
राजनिर्घण्टः नाभिरूप मूलाधा।
रात् प्रथमोदितनाद स्वरूपवर्णाः
यथा मूलाधारात् प्रथम मुदि।
तोयस्तु भावः पराख्यः इत्यल
कारकौस्तुभे ९ किरणः ॥
पराकः पुं व्रतविशेषः खड्गः
इतिमेदिनी खड्गः रोगविशेषः
जन्तुविशेषः इतिविश्वः ॥
पराकव्रतमर्हमनुः यता त्म
नोऽप्रमत्तस्यद्वादशपाह मभोज।
नं पराकोनाम कृच्छ्रोऽयं सर्व।
पापापनोदनः पराके पञ्चधे
नवः पराकस्य प्राजापत्य पञ्च।
क तुल्यत्वात् यथा अंगिराः ष।
डभि वर्षैः कृच्छ्रचारी ब्रह्महात
विशुध्यति मासिमासि पराकेण
त्रिभि वर्षैर्द्विजोत्तम इति अत्रष।

डभि वर्षैः साशीति शत प्राजा
पत्यानि पूर्वमुक्तानि तथाप्रति
मास्येकैक पराकेण वर्षेद्वादश
पराकाःवर्षत्रये षट्त्रिंशत् प।
राकाः ततश्च षट्त्रिंशत परा।
काशीत्युत्तर प्राजापत्य शतयोः
प्रत्येकं ब्रह्मवध पापत्तयैकका
र्य्यकरत्वात् तुल्यत्वे षट्त्रिंशा।
त् पराकाशीत्युत्तर प्राजापत्यश
तयोः प्रत्येकंब्रह्मवध पापत्तयैक
कार्य्यकरत्वात् तुल्यत्वे षट्त्रिंशात
श्च पंचगुण मशीत्युत्तर शतंभवती
ति अतःप्राजापत्य पञ्चक तुल्यः
पराकः इतिप्रायश्चित्ततत्त्वं ॥
द्वादशाहोपवासेन पराकः सर्व
पापहा एकैकं वर्द्धयेत् पिण्डं
शुक्ले कृष्णेच ह्रासयेत् इति ग
रुडपुराणे प्रायश्चित्त प्रकरणं
पराक् चि त्रि पराञ्चति प्रति।
लोमगमनाश्रयः इत्यल्वधातो।
क्विप् प्रत्ययनिष्पन्नः ॥
पराक् पुष्पी स्त्री अपामार्गः।
इतिराजनिर्घण्टः ॥ पराक्रमः
पुं पराक्रम्यतेऽनेन तत्पर्य्यायः द्र
विणं २ तरः ३ सहः ४ बलं ५ शौर्य्यं
६ स्थाम ७ शुष्मं ८ शक्तिः ९ प्राणः १०
इत्यमरः महः ११ सूक्ष्म १२ सामर्थ्यं
१३ इति मेदिनी निरुक्ता ॥

तिः इतिः शब्दरत्नावली ॥
परागः पुं पुष्परेणुः तत्पर्य्या
यः सुमनोरजः २ कौसुमरेणुः
इत्यमरः पुष्परेणु ४ शब्दरत्ना।
वली धूलिः स्नानीयद्रव्य गिरि।
प्रभेदः विख्यातिः उपरागः चेर
ने इतिमेदिनी स्वच्छन्दगमने इ
तिशब्दरत्नावली ॥ परांगवः पुं
समुद्रः इतित्रिकाण्डशेषः ॥
पराङ्मुखः त्रि विमुखः तत्पर्य्या
यः परचीनः २ इत्यमरः ॥
पराचितः त्रि परपुष्टः परदास ॥
प्रतिपालितं तत्पर्य्यायः परि।
स्कन्दः २ परजातः ३ परैधितः
४ इत्यमरः परिस्कन्दः ५ इति।
भरतः ॥ पराचीनः त्रि।
पराङ्मुखः इत्यमरः पराजयः
पुं रणेभंगः इत्यमरः तत् ॥
पर्य्यायः भंगाः २ हारी ३
हारिः ४ पराभवः ५ इति ॥
रत्ना शब्दरत्नावली ॥
पराजितः त्रि कृतपराजयः हा।
रितः तत्पर्य्यायः ॥
पराभूतः २ विजितः ३ निर्जि।
तः ४ जितः ५ इतिशब्दरत्ना।
वली ॥ परांजः ॥

+इतिशब्दरत्नावली विक्रमः उद्योगः+

पुं तैलयन्त्रः फेनः छुरिका
दले इति शब्दरत्नावली ॥ परा
त् परः पुं श्रेष्ठादपि श्रेष्ठः सच ॥
श्रीकृष्णः यथा देवाः कालस्य ॥
कालोऽहं विधातुर्विधिरेव च । सं
हारकर्त्तुः संहर्त्ता पातुः पाता परा
त्परः इति ब्रह्मवैवर्त्ते श्रीकृष्ण
जन्मखण्डे ६ अध्यायः ॥
परात् प्रियः पुं तृणविशेषः उलु
इति भाषा इति शब्दचन्द्रिका ॥
परादनः पुं पारसीकघोटकः ।
इति त्रिकाण्डशेषः ॥ ॥
पराधीनः त्रि परवशः तत्पर्य्यायः
परतन्त्रः २ परवान् ३ नाथवान्
४ इत्यमरः अस्य जीवन्मृतत्वं य
था स्वाधीनवृत्तेः साफल्यं न परा
धीनवृत्तिता ये पराधीनक ॥
र्म्माणो जीवन्तो अपि च ते मृताः
इति गरुडपुराणे ११२ अध्यायः
परानसा स्त्री चिकित्सा इति
शब्दचन्द्रिका ॥ ॥
परान्नं क्ली अन्यस्वामिकभक्तं ।
पिष्टकादि परकर्त्तृक पाक
जन्यद्रव्यमात्रे परस्यान्नं तस्य त्या
ज्यत्वं यथा परान्नं परवासश्च नि
त्यं संयमरतस्त्यजेत् इति स्मृतिः
संयमदिने तस्य त्याज्यत्वं यथा
कांस्यं मांसं मसूरञ्च चणकं को
रदूषकं शाकं मधु परान्नञ्च त्यजे
दुपवसन् स्त्रियं ॥ पारणदिने त
स्य त्याज्यत्वं यथा अभ्यङ्गञ्च परान्नं
च तैलं निर्म्माल्यलङ्घने वल
सीचयने घृते पुनर्भोजनमेव च ॥
वस्त्रपीडं तथा स्नानं द्वादश्यां वर्ज
येद्बुधः ॥ तद्भोक्तृयागादेर्विफल
त्वं यथा परपाकेन तुष्टस्य द्विजा
स्य गृहमेधिनः इष्टं दत्तं तपोऽधी
तं यस्यान्नं तस्य तद्भवेत् ॥ तद्भु
क्त शुक्रात् पादने दोषो यथा य
स्यान्नेन तु भुक्तेन भार्य्यां समधि
गच्छति यस्यान्नं तस्य ते पुत्रा ।
अन्नाच्छुक्रः प्रवर्त्तते ॥ ब्राह्मणा
दिस्वामिकान्न भोजने दोषो ॥
यथा ब्राह्मणान्नेन दारिद्र्यं क्षत्रि
यान्नेन प्रेष्यता वैश्यान्नेन तु शू
द्रत्वं शूद्रान्ने नरकं व्रजेत् ॥
इति कादशीतत्त्वे ॥ परान्न ॥
भोजनेन तीर्थगमने फलना
शत्वं यथा षोडशांशं स लभते
यः परान्नेन गच्छति अर्द्धं तीर्थ
फलं तस्य यः प्रसङ्गेन गच्छति इ
ति प्रायश्चित्ततत्त्वं ॥ महागुरुनि
पाते तस्य त्याज्यत्वं यथा ॥ अ
मश्राद्धे परान्नञ्च गन्धमाल्यञ्च ।

मैथुनं वर्जयेद्गुरुपाते तु याव
त्पूर्णानवत्सरः इति शुद्धितत्त्वं ।
तद्भोक्तृमन्त्रसिद्धिहानि र्यथा
जिह्वा दग्धा परान्नेन करौ दग्धौ
प्रतिग्रहात् मनो दग्धं परस्त्रीभिः
कथं सिद्धिर्वरानने इति तन्त्रम्
तद्भोजने प्रतिप्रसवो यथा शर्वान्नं
मातुलान्नं वा श्वशुरान्नं तथैव च
पितुः पुत्रस्य चैवान्नं न परान्नमि ।
ति स्मृतिः इति कादशीतत्त्वे ॥
परान्नः त्रि परान्नोपजीवी तत्
पर्य्यायः परपिण्डादः २ इत्यम
रः पराप्य त्रि परैरप्य इति सि ।
द्धान्तकौमुदी ॥ ॥
परापरं क्ली परूषके इति भाव
प्रकाशः परमपरञ्च ॥
परापरगुरुः पुं गुरुविशेषः स
तु भगवती अस्य प्रमाणं परमे ।
ष्ठि पाह्ने द्रष्टव्यं ॥ ॥
पराभवः पुं तिरस्कारः विना ।
शः इति मेदिनी आद्यस्य पर्य्या
यः न्यक्कारः २ तिरस्क्रिया
३ परिभावः ४ विप्रकारः ५
परिभवः ६ अभिभवः ७ अ ।
त्याकारः ८ निकारः ९ इति
॥ हेमचन्द्रः ॥ ॥
पराभूतः त्रि पराजितः इत्यमरः
परामर्शः पुं युक्तिः विवेचनं त ।
त्पर्य्यायः वितर्कः २ ऊहनं ३
विमर्षणं ४ अध्याहारः ५ तर्कः
ऊहः ७ इति हेमचन्द्रः व्याप्तिवि ।
शिष्टपक्षधर्म्मताज्ञानं यथा व्या
प्यस्य पक्षधर्म्मताधीः परामर्श उच्यते
इति भाषापरिच्छेदः अस्यार्थः ॥
व्याप्तिविशिष्टस्य पक्षेण सह वैशि
ष्ट्यावगाहि ज्ञानमनुमितिजन
कं तद्व्याप्यः पक्ष इति ज्ञानं ॥
पक्षो व्याप्यवान् इति ज्ञानं वा इति
सिद्धान्तमुक्तावली सचानुमितौ
व्यापारः यथा व्यापारस्तु पराम
र्शः करणं व्याप्तिधीर्भवेत् इति ।
भाषापरिच्छेदः अस्यार्थः ॥
अनुमाया अनुमितौ व्याप्तिज्ञानं ।
कारणं परामर्शो व्यापारः तथा ।
हि येन पुरुषेण महानसादौ धू ।
मे वह्निव्याप्तिर्गृहीता पश्चाच्च स ।
एव पुरुषः क्वचित् पर्वतादौ अवि
च्छिन्नमूलां धूमरेखां पश्यति ॥
तदनन्तरं धूमो वह्निव्याप्य इत्येवं
रूपं व्याप्तिस्मरणं तस्य पुरुषस्य
भवति पश्चाच्च वह्निव्याप्य धूम ।
वान् पर्वत इति ज्ञानं भवति स ।
एव परामर्श इत्युच्यते इति सि
द्धान्तमुक्तावली ॥



पराम्रते स्त्री वर्षणं ॥ इ-
तित्रिकाण्डशेषः ॥
परामृष्टः त्रि सम्बद्धः सम्बन्धयु-
क्तः यथा क्लेश कर्म्मविपाका-
शयैरपरामृष्टः इति कुसुमाञ्ज-
लिकारिकाव्याख्याने रामभद्रः
कृतपरामर्शः विवेचितः इतिपरा-
मृशधातोः कर्म्मणिक्तप्रत्य-
येन सिद्धः परायणं त्रि आस-
ग वचनं इत्यमरः परं केवलम-
यन मासक्तिस्थानमिति परा-
यणं यथा यस्मिपरायणो य-
स्मा सक्तः इतिभरतः आश्रयः
तत्परं अभीष्टं इतिमेदिनी ॥
परायत्तं त्रि पराधीनं यथा ता-
आयत्त वशाधीन च्छन्दवन्तः पर-
तत्परे इतिहेमचन्द्रः ॥
परारि व्य पूर्वतरवत्सरः गत-
स्तृतीय वर्षः इत्यमर भरतौ प-
रशैत्रा त्रि ॥ परारित्नः ॥
त्रि पूर्वतरवत्सर सम्बन्धी ॥
परारिभव इत्यर्थे त्न प्रत्यय
निष्पन्नः इतिव्याकरणं ॥
परारुः पुं कारवेल्लः इति
त्रिकाण्डशेषः ॥ ॥
परारुकः पुं प्रस्तरः इति
त्रिकाण्डशेषः ॥ ॥

परार्द्धं स्त्री दशमध्यसंख्या ॥
लक्षलक्षकोटिः इदंवरमसं-
ख्या अष्टादशाङ्कपर्य्यन्तं इति
हेमचंद्रः ज्योतिषश्च ब्रह्मणश्च आ-
युषोऽर्द्धं यथा निजेनतस्मानेन
चायुर्वर्षशतंस्मृतं तत्पराख्यं त-
दर्द्धञ्च परार्द्धमभिधीयते इ-
ति कौर्म्मे ५ अध्यायः ॥
परार्द्ध्यः त्रि प्रधानः श्रेष्ठः इ-
त्यमरः परार्त्तं स्त्री परुषकं
इतिराजनिर्घण्टः ॥
परावरः पुं समवाय्यन्तर्गत स-
मवायुः स तु परिवह वायो-
रूर्द्ध्वस्थितः इतिसिद्धान्तशिरोम-
णिः परावित्तः पुं कुवेरः इति
शब्दमाला ॥ ॥
परावेदी स्त्री बृहती इतिकेचि-
त् पराशरः पुं व्यासपिता शा-
क्ति मुनिपुत्रः यथा सतं तु
जनयच्छक्ते रद्दश्यन्ती परा-
शरं काली पराशरात् ॥
जज्ञे कृष्णद्वैपायनं मुनिम् इ-
त्यग्निपुराणम् ॥ पराशा-
री नं पुं पाराशरी चतुर्थाश्र-
मी पराशरेण प्रोक्तं भिक्षु-
सूत्रं पाराशरम् त-
दधीते ऽस्याध्ययना ॥ ॥

येतिभ्वः रेनच पराशरीति
कृशाश्वादिभ्य इत्यमरटीकायां
भरतः ॥ पराश्रया स्त्री
वृन्दापरिजातलताविशेषः
परसाड़ा इति भाषा तत्पर्य्या-
यः वन्दा २ वृक्षादनी ३ वृक्षरु-
हा ४ जीवन्तिका ५ वशिनी ६
पुत्रिणी ७ वन्ध्या ८ परपुष्टा
९ इतिशब्दचन्द्रिका ॥
परासनं स्त्री मारणं वधः इ-
त्यमरः परासुः त्रि मृतः इत्यम-
रः परासुता स्त्री मृतत्वं निद्रा
परवशता इतिपुराणं ॥
परास्कन्दी नं पुं चौरः इत्यम-
रः परास्तं त्रि निरस्तं पराजि-
तं यथा कीर्तिरास्त वरमस्त-
पुनर्म्मास्थी कृतैनव परवागियं
रास्ता इतिनैषधे ५ सर्गः ॥
पराह्नः पुं परदिने यथा पूर्वाह्ने
तद्धियत्वेपि पराह्ने त्रिसन्ध्यव्या-
पिते पराह्न एव इति सावित्री
व्रतेतिथितत्त्वम् ॥ पराह्णः
पुं अपराह्णः विकालः परञ्च
तदहश्चेति कर्म्मधारयः परित्य
सर्वतोभावः वर्जनं व्याप्तिः शेषः
इत्येभरतः आख्याने भागः वी-
प्सा आ ॥

लिंगनं लक्षणं दोषाख्याने नि-
रसनं पूजा व्याप्तिः भूषणं इ-
तिमेदिनी उपरमः शोकः इ-
तिहेमचंद्रः सन्तोषभाषणं इ-
तिशब्दरत्नावली उपसर्गविशेषः
अस्यार्थः सर्वतोभावः प्रतिषे-
धः वीप्सा इत्यभावः चिह्नं भा-
गः त्यागः नियमः इति मुग्ध-
बोधटीकायां दुर्गादासः ॥
परिकथा स्त्री वाङ्मयभेदः य-
था अथ वाङ्मय भेदाः सम्भमुः
खण्डकथा कथा आख्यायिका
परिकथा कलापक विशेषके
इतित्रिकाण्डशेषः ॥
परिकम्पः पुं भयं कम्पः इ-
तिमेदिनी ॥ ॥
परिकरः पुं पर्य्यङ्कः परिवारः
इत्यमरः समारम्भः वृन्दः इति
शब्दरत्नावली प्रगाढगात्रिका
बन्धः विवेकः इतिविश्वः सह-
कारी यथा परिकरः सहकारी
यथा परिकरः सहकारी सञ्च-
व्याप्ति पक्षधर्म्मतादिः इतिसा-
माम निरुक्तौ जगदीशः परिक-
र्मि नं स्त्री कुङ्कुमादिनाशरीरशो-
भाधानरूप संस्कारः इतिभरतः
स्नानोद्वर्त्तनादि इति स्वामी ॥



आशीर संस्कार मात्रे इत्यन्ये त
त्पर्य्यायः अंगसंस्कारः २ ॥
इत्यमरः प्रतिकर्म्म २ इतिश
ब्दरत्नावली ॥ ॥
परिकर्म्मा न पुं परिचारकः से
वकः इतिरत्नमाला ॥
परिकर्म्मी न त्रि परिकर्म्मा इति
हेमचन्द्रः ॥ ॥
परिकांक्षितः त्रि तपस्वी इ
तिशब्दरत्नावली ॥ परिकू
टं क्ली पुरद्वारकूटकं तत्पर
र्य्यायः हस्तिनखः २ नगरद्वार
कूटकं २ इतिहेमचन्द्रः ॥
परिक्रमः पुं क्रीडार्थ पद्भ्यागम
ने तत्पर्य्यायः विहारः २ इत्य
मरः प्रदक्षिणं यथा वराहउ
वाच भूरण्डभद्रेमहाभागे पृथि
व्यांसर्वतोदिशं परिक्रम्य यथा
धानं प्रमाणगणितंशुभे भूम्याः
परिक्रमे सम्यक् प्रमाणं योजना
निच षष्टिकोटि सहस्राणि ष
ष्टिकोटिशतानिच तीर्थान्येता
निदेवाश्च तारकाश्च नभस्तले ग
णितानि समस्तानि वायुनाजग
दायुषा उत्तरेण लोमशोनेव नार
देनध्रुवेणच जाम्बवतासपुत्रेण
रावणेनहनूमता पौतैरनेकपार्श्वैः

सप्तसागरवनामही क्रमितावा
लिनाचैव वायुमण्डलरेखया
अंतराश्रमणेनैव सुग्रीवेणमहा
त्मना तथाचपूर्वदेवैन्द्रः पंचभिः
पाण्डुनन्दनैः योगसिद्धैस्तथाकै
श्चिन्मार्कण्डेयमुखैरपि क्रमि
तानक्रमिष्यति न पूर्वेनापरेजा
नाः अल्पसत्ववलोपेतैः प्राणि
भिश्चाल्पवुद्धिभिः मनसापिनश
क्यते गमनस्यचकाकथा सप्त
द्वीपे तुतीर्थानि भ्रमणाद्यत्फ
लंभवेत् प्राप्यते चाधिकं तस्मान्म
थुरायाः परिक्रमे मथुरां समनु
प्राप्य यस्तुकुर्य्यात् प्रदक्षिणं
प्रदक्षिणी कृता तेन सप्तद्वीपा
वसुन्धरा तस्मात् सर्वप्रयत्नेन
सर्वकामानभीप्सुभिः कर्तव्या
मथुराप्राप्य नरैःसम्यक्प्रदक्षि
णा इतिवराहपुराणं ॥ ॥
परिक्रमसहः पुं छागलः इ
तित्रिकाण्डशेषः ॥
परिक्रिया स्त्री परिखाजला
दिना वेष्टनं तत्पर्य्यायः परि
सर्प्पः २ इत्यमरः ॥
परिखा स्त्री राजधान्यादिवेष्टनखा
तं गडखाइ इतिभाषा इतिचय॥
स्याः प्रसिद्धिः इतिभरतः तत्

पर्य्यायः खेयं २ इत्यमरः ॥
तस्याःमानं यथा प्रस्थे च परिखा
माने शतहस्ते प्रशस्तके परितः
शिविराणांच गम्भीरे दशहस्त
के संकेत पूर्वकंचैव परिखा
द्वारमीप्सितं शत्रोरगम्यं मित्र
स्य गम्यमेव सुखेनच इतिब्र
ह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २
०२ अध्यायः ॥ परिख्यातः
त्रि विख्यातः परिसर्वतोभावेन
ख्यातःप्रथितः इतिपरि पूर्व
ख्याधातोः कर्म्मणिक्तप्रत्ययनि
ष्पन्नः ॥ परिगणितः त्रि स
र्वतोभावेनगणनायुक्तः यथा
परिगणितव्यतिरिक्तेषु संसर्ग
कृतविशेषो नादरणीयः परि
गणनानर्थक्यात् इति जीमूत
वाहनः ॥ परिगतः त्रि प्रा
प्तः विस्मृतः ज्ञातः चेष्टितः इ
तिमेदिनी ॥ गतः इतिहेमचं
द्रः वेष्टितः यथा अथ सव
ल्कउत्कूल कृपादिभिः परिग
तोज्ज्वलउद्धतवालधिः इतिभ
ट्टिकाव्ये द्वादशःसर्गः परिगृ
ह्या स्त्री नारी इतिशब्दचंद्रिका
परिग्रहः पुं प्रतिग्रहः सैमप
ह्याह्वागः पत्नी भार्य्या परिजनः

परिवारः आदाने स्वीकारः मू
लेकन्दः शापः शपथः इत्यम
रभरतौ राहु वक्रस्य भास्करः
इत्यजयः ॥ परियाहः पुं
यज्ञवेदिविशेषः इतिकेचित् ॥
परिघः पुं लोहवद्धलगुडः लो
हमयलगुडः लोहमुखलगुडः
तत्पर्य्यायः परिघातनः २ इत्य
मरः परिघातकः २ इतिशब्द
रत्नावली परिघातः परितोहन
नं इत्यमरभरतौ विष्कम्भादि स
प्तविंशति योगान्तर्गतऊनविंशति
योगः अर्गलः ॥ इतिमेदिनी ॥
मुद्गरः मूलः इत्यजयः कलसः
काचघटः पोष्ठरं सद्म इति शब्द
शब्दरत्नावली ॥ अथ परिघ
योगजातफलं उत्पत्ति काले प
रिघो यदिस्यान्नरस्तदा वंश कुठा
र कल्पः असत्यसाक्षी क्रमया
विहीनः स्वल्पाशुभोक्ता विजि
तारिपक्षः इतिकोष्ठीप्रदीपः
परिघातः पुं अस्त्रे हनने इति
॥ धरणिः ॥
परिघातनः पुं परिघास्त्रे ॥
इत्यमरः ॥ सर्वतोभावेन
हननेन क्ली परिघोषः पुं ॥



शाट्: मेचशाट्: ॥ अवा ॥
च्याः इतिमेदिनी ॥
परिचयः पुं समन्तात् चयने
विशेषेनज्ञाने चेना इति भा।
षा तत्पर्य्यायः संस्तवः २ इ।
त्यमरः प्रणय ३ इतिभरतः ॥
परिचरः पुं युद्ध कालेपरमहार
त् रथरक्तकः मज्जासांगतव्यव।
स्थापनकारी इतिकेचित् से।
नायाराज्ञो दण्डनायकः इत्यम
इतिभरतः तत्पर्य्यायः परि।
चिह्यः २ इत्यमरः सहायः ३
इतिरत्नमाला ॥ परिचर्य्या
स्त्री सेवा तत्पर्य्यायः ॥ वा
रिवस्या २ शुश्रूषा ३ उपासनं ४
इत्यमरः परिसर्य्या ५ उपासना
६ उपास्तिः ७ इति भरतः शुश्रू
षणा ८ इतिशब्दरत्नावली ॥
परिचाय्यः पुम् यज्ञाग्निः तत्।
पर्य्यायः समूह्यः २ उपचाय्यः
३ इत्यमरः परिचारकः त्रि से
वकः चाकर इति भाषा तत्
पर्य्यायः भृत्यः २ दासेरः ३
दासेयः ४ दासः ५ गोप्यकः
६ चेटकः ७ नियोज्यः ८ किंकरः
९ प्रेष्यः १० भुजिष्यः ११ इत्यमरः
किंगरः १२ चेटः १३ गोप्यः १४
पराचितः १५ परिच्छ।

न्दः १६ परिकर्म्मी १७ इ।
तिहेमचन्द्रः ॥
परिचार्य्यः त्रि सेव्यः परिच
र्य्यते ऽसौ इति परिपूर्वचरधा
तोः कर्म्मनय्यण ॥
परिचितः त्रि परिचयविशिष्टः
ज्ञातः यथा त्वत्कृते चिरपरि
चिता जन्मभूमीति उद्यामात्वि।
यस्त्रिभुवन जन त्राणहेतोर्क
र्मा ककिन्नत्पान्त्य भवति महतांचे
त् परस्योपकारो वाराणस्या म्
निरपि गतो दक्षिणाशां मनास्सः
इतिपदाङ्कदूतः ॥ परिचेयं
त्रि परिचययोग्य परिचयनी।
ये परिचेतव्यं इतिपरिपूर्वचिधा
तोः कर्म्मणि यप्रत्ययेन निष्प
ण्णम ॥ परिच्छदः ॥
पुं परिवारः इतिहेमचन्द्रः ॥
हस्त्यश्व रथ कम्बलादि यथा
परिच्छदे न्त्पार्हेर्खे परिबर्हो ऽ
व्ययाः परे इत्यस्यटीकायां भर
तः आच्छादनं यथा पयः
फेन निभाशय्या दान्तारुक्मप
रिच्छदा इतिश्रीभागवते ॥
परिच्छन्दः पुं परिच्छन्दः
इतिहलायुधः ॥ ॥ परि
च्छन्नः त्रि परिच्छन्दविशिष्टे

सर्वतोभावेनाच्छादितः संवृतः।
इतिपरिपूर्वच्छदधातोः कर्त्तरि।
कर्म्मणि च क्तप्रत्यय निष्पन्नः प
रिच्छिन्नः त्रि परिच्छेदविशिष्टः
अवधिमान् यथा परिच्छिन्नैः
वेत्तयि परिणाता विप्रतिगिरम्
व न विषयस्ते तत्त्वे वयमिह हियत्नेन
भवसि इति महिम्नास्तोत्रे सर्व
तोभावेनच्छेदविशिष्टस्य परि।
च्छेदः पुं ग्रन्थविच्छेदः यथा
सर्ववर्ग परिच्छेदोद्धाताध्यायां।
क संग्रहाः उच्छ्वासः परिवर्त्तश्च।
पटलः काण्डमस्त्रियां स्थानेप्र।
करणं सर्वाह्निकेच ग्रन्थ सन्धि।
यः इतित्रिकाण्डशेषः सीमा अ
वधिः यथा परिच्छेदातीतः सक
लावचनानामविषयः पुनर्जन्मम
स्मिन्ननुभव पथं योन गतवान् वि
वेकप्रध्वंसादुपचित महामोहग।
हनो विकारः कोप्यन्तर्जडयति
च तापंच कुरुते इतिमालतीमा।
माधवः परिजनः पुं परिवारः
पोष्यवर्गः यथा यदूदिंस्वबा।
न्ना वरद परमो च्चैरपि सती म
धश्चक्रे बाणः परिजन विधे।
य त्रिभुवनः इतिमहिम्नःस्तोत्रे
नियतसन्निधिवर्त्ती परिचारकः
यथा किरीटम् ॥ वे ॥

विले परिहर पुरः कैटभभिदः ॥
कठोरे कोटीरे स्खलसिजहि जम्भा
रिमुकुटं प्रणयेष्वेतेषु प्रसभमभि।
यातस्य भवने हरस्याभ्युत्थाने तव।
परिजनोक्तिर्विजयते इत्यानन्दल
हरीश्लोक व्याख्यायां गोपीरमणान
र्क पंचाननः परिजन्मा न पुं चन्द्रः
अग्निः इति सिद्धान्तकौमुद्यामुणा
दिवृत्तिः परिजवा पुं इन्द्रः अ॥
ग्निः इतिसेहितमसारमणादिवृत्तिः
परिजल्पितं क्ली दशांगविज्ञज ॥
स्यान्तर्गत द्वितीयजल्पणं यथा प्र
भोर्निर्दयता शास्यचापलाद्युपपाद
नात् स्वविचक्षणता व्यक्तिर्भक्त्यासात्
परिजल्पितं इत्युज्ज्वलनीलमणिः
परिडीनकं क्ली पतिगतिविशेषः
यथा डीनं प्रडीनं उड्डीनं संडीनं
परिडीनकं इति जटाधरः ॥
परिणतं त्रि पक्कं इत्यमरः ति
र्य्यंग्दन्तप्रहारगजः इति हेमचन्द्रः ॥
सर्वतोभावेन नतञ्च ॥ ॥
परिणयः पुम् विवाहः इत्य
मरः परिणामः पुं विकारः
प्रकृतेरन्यथाभावः यथा दुग्ध॥
स्य विकारः क्रोध रक्तता केचित्तु
प्रकृति ध्वंस जन्यविकारः यथा
काष्ठस्य विकारो भस्म ॥

रत् पिण्डस्य चटः इत्यमरः।
भरतो चरमः पोषः यथा।
परिणामसुखे गरीयसि व्य
थके ऽस्मिन्वचसि हतौजसा।
अनिवीर्य्यवतीव भेषजे वक्रस्सी
यसिद्धयपतेऽगुणः इति भारवौ।
द्वितीय सर्गः ॥ ॥
परिणामदर्शी त्रि चरमकालभे
त्तीयभ्याद्दर्शी विषयादेःशेषद्र
ष्टा इतिभारतम् ॥
परिणामशूलः पुम् रोगविशे।
षः तस्योत् पत्ति यथा स्वैर्निदा।
नैः प्रकुपितो वायुः सन्निरुद्धितेयः
दाकफपित्ते समाहृत्य शूलकारी
भवेद्वली तस्यलक्षणं यथा भु
क्ते जीर्य्यति यच्छूलं तदेव परि
णामजं तस्य लक्षणं मप्यतत्
समासे नाभिधीयते वातिकस्य।
तस्यलक्षणं यथा आत्माना।
टोपविन्मूत्र निवन्धारभिवेप।
नैः स्निग्धोष्णोपशमप्रायं वाति
कं तद्वदेद्भिषक् पैत्तिकस्यतस्य
लक्षणं यथा तृष्णादाहारतिस्वे
द कट्वम्ललवणात्तरं शूलंशी
त शामप्रायं पैत्तिकं लक्षयेद्भि।
षक् श्लेष्मिकस्य तस्यलक्षणं
यथा छर्द्दि हृल्लास सम्मोहस्व
ल्प ॥

रुग्दीर्घ सन्तति कटु तिक्तोपशा
न्तौ च तद्विज्ञेयं कफात्मकं ॥
त्रिदोषजस्य तस्य लक्षणं यथा
संसृष्ट लक्षणं बुधा द्विदोषं परि।
कल्पयेत् त्रिदोषज मसाध्यन्तुक्षी
णमांस बलानलं इतिमाधवक
रः तस्यौषधं यथा लौहचूर्णमस।
माशुकं त्रिफलाचूर्णमेववा म
धुनास्वादितं हन्द्र परिणामाख्य
शूलजित् इतिगरुडपुराणं ॥
परिणायः पुं शारीणांसमन्ता
नयने इत्यमरः परे वितोदीर्घवे।
परीणायश्च इतिभरतः ॥
परिणाहः पुं विस्तारः ओसार।
इति चौड़ा इतिच भाषा तत्पर्य्या
यः विशालता २ इत्यमरः ॥
परिणेता पुम भर्त्ता इति श।
ब्दरत्नावली ॥ ॥
परितः अ सर्वतः चतुर्द्दिगभि
व्याप्तौ इत्यमरः ॥
परितापः पुं दुःखं नरकान्तरम्
इतिमेदिनी शोकः इतिश
ब्दरत्नावली भयं कम्पः इ।
ति विश्वः असन्तोषः च ॥
परितुष्टः त्रि परितोषयु॥
क्तः संतुष्टः यथा यत् माप्य।
ते तयाभूप तयाचकुलनन्द।
न मत्तस्त्वत् प्राप्यतोसर्वं ॥

परितुष्टोदशा मितत् इति।
मार्कण्डेयपुराणम् ॥
परितोषः पुं सर्वतोभावेनतुष्टिः
सन्तोषः यथा त्वामुदरसाथ।
ममे शाकैरपि यदसिलक्ष्मपरितो
षं हृतहृदयं त्वयिकापिकवांछा
शातङ्गभेदं नपुनः इतिशान्तिशात
कम् ॥ परित्यागः पुम्।
सर्वतोभावेनवर्ज्जने तत् पर्य्या
यः छोरणं २ इतित्रिकाण्डशे।
षः शरीरप्रभवलिमस्य कार्य्य।
कार्य्यमजानतः उतपथ प्रतिप
न्नस्य परित्यागो विधीयते इति
मत्स्यसूक्तं परित्राणं क्ली मा
रणोपघातस्यनिवारणं तत्पर्य्या
यः पर्य्याप्तिः २ हस्तवारणं ३
इत्यमरः ॥ रक्षणं यथा प
रित्राणायसाधूनां विनाशाय।
चदुष्कृतां धर्म्मसंस्थापनार्थाय
संभवामि युगेयुगे इतिश्रीभग
वद्गीतायां ४ अध्यायः ॥
परिदानं क्ली परीवर्त्तः विनिम।
यः इत्यमरः ॥ ॥
परिदेवनं क्ली अनुशोचनोक्तिः
विलापः इत्यमरः ॥ ॥
परिदेवना स्त्री शोकनिमित्तो
विलापः यथा अव्यक्तादी।
निभूतानि

तानि व्यक्त मध्यानि भारत अ
व्यक्तनिधनान्येव तत्रकापरिदे
वना इतिश्रीभगवद्गीता द्वितीया
ध्याय श्लोक व्याख्याने श्रीधरस्वा
मी अपिच नमस्त बलवीर्य्यण।
अन्यथा पौरुषेनच अलभ्यंलभते
मर्त्य स्तत्रका परिदेवना अव्यक्ता
दीनिभूतानि व्यक्तमध्यानिशोन
क अव्यक्तनिधनान्येव तत्रकाप
रिदेवना अयाचितोमयालब्ध स्त
त्प्रेषितः पुनःकृतः यत्रागतस्तत्र
गत स्तत्रका परिदेवना यकहृदे
यदाराश्चौ नानापक्षिसमागमः
प्रभाते दशदिशो यान्ति तत्रकाप
रिदेवना एकसार्थप्रयातानां स
र्वेषांतत्रगामिनां यद्येकस्त्वरितो।
याति कातत्रपरिदेवना इति ग।
तिगरुडपुराणे ११ अध्यायः
परिधानं क्ली परिधेयवस्त्रं तत्
पर्य्यायः अन्तरीयं २ उपसंव्यानं
३ अधोंशुकं ४ इत्यमरः ॥
परिधायः पुं जनस्थाने परिच्छ।
दः नितम्बः पुम् जनस्थाने ॥
इतिमेदिनी ॥ ॥
परिधिः पुम् परिवेशः चन्द्र
सूर्य्य समीप मण्डलं यज्ञिय॥
तरुशाखा यज्ञियतरोः पला॥
शादे यैते पच्च वन्ध ॥

नार्थं या भगवा निखोयते न॥
सा इत्यमर भरतौ भूगोलादे।
वैष्टने यथा व्यासेननन्दायिह
ते विभक्ते खवाण सूर्य्यैः परि
धिस्त्र स्तम्भः इतिलीलावती प
रिधिस्थः पुं परिचरः इत्यमरः
युद्धकाले परमहारात् रक्षरत्तके
मजासामन्त व्यवस्था पनकारि।
णी तिकेचित् सेनायां राक्षोद
एडनायकः इत्यन्ये इतिभरतः
परिधेयं त्रि परिधानीयं परि।
धातव्यं परिधानोपयुक्त वस्त्रा।
दि यथा नत्र स्वभोग्यभयापि।
भाज्ञे परिधेयादौ स्मरते रहस्यार्थ
त्वापन्नः इतिविवादचिन्तामणिः
परिपणं क्लीं मूलधनं पुं जि॥
इति भाषा इत्यमरः ॥
परिपन्थकः पुं शत्रुः इतिहे॥
मचन्द्रः ॥ ॥
परिपन्थी न त्रि शत्रुः इत्यमरः
परिपाकः पुम परिपक्वता य
था इत्यद्भुते केवल वह्निपक्व।
मांसेन मत्स्यः परिपाक मेति।
इतिभावप्रकाशः नैपुण्य यथा
वीत्यतस्य विनये परिपाकं पा
कशासन पदं स्पृशतोपि इति
नैषध पञ्चम सर्गः ॥ ॥

परिपाकिनी स्त्री त्रिवृता इति
शब्दचन्द्रिका ॥ ॥
परिपाटिः स्त्री पारिपाट्यविशि
ष्टः परिभोगे भागेन पाटिः पाट
ने गतिर्यस्या। तत्पर्य्यायः आ।
नुपूर्वी २ आवृत् ३ अनुक्रमः ४
पर्य्यायः ५ इत्यमरः आनुपूर्व्यं
६ परिपाटी ७ इतिभरतः ॥
आनुपूर्वं ८ अनुपूर्वकं ९ इति
टीकान्तरम् ॥
परिपिष्टकं क्लीं सीसकं इति
राजनिर्घण्टः ॥ ॥
परिपुष्करा स्त्री गोडुम्बा राजगो
मक इति भाषा इतिशब्दचन्द्रि
का परिपूतं क्लीं अपास्ततुष।
धान्ये यथा परिपूतेषु धान्ये।
षु शाकमूल फलेषु च निरन्वये।
शते दण्डः स्यात्वये शतमं दमः
इति मनुः सर्वतोभावेन पवित्रे च
परिपूर्णता स्त्री परिपूर्णत्वे सम
र्णता तत् पर्य्यायः ॥ आभो
गः इत्यमरः ॥ ॥
परिपूर्णत्वं क्लीं परि पूर्णता स
म्पूर्णत्वं इतिजटाधरः ॥
परिपेलं क्लीं परिपेलवं केव॥
र्त्तीमुस्तकं इति शब्दमाला तन्त्रा।
न्तरे यथा परिपेलस्रवं वल्य ॥

तत् कुटन्नटसंज्ञकं जायते मुस्त
काकारं शैवाल कुलसंचये इ।
त्यमरटीकायां भरतः ॥
परिपेलवं क्लीं कैवर्त्तीमुस्तकं
इत्यमरः ॥ ॥ परिप्लवं
त्रि चंचलं इत्यमरः परिप्लुता
स्त्री मदिरा इतिहेमचन्द्रः ग्राम्य
धर्म्मे वेदनावती योनिः यथा।
परिप्लुतायां भवति ग्राम्यधर्म्मे
रुजाभृशं इतियोनिव्यापन्निदा
ने माधवकरः आप्लुतेत्रि ॥
परिबर्हः पुं परिच्छदः हस्त्य।
श्व वस्त्र कम्बलादि नृपार्हार्थः।
राजयोग्य द्रव्यं सितच्छत्रादि न
पार्हं सितच्छत्रादि अर्थो धन मि
ति केचित् इत्यमर भरतौ ॥
परिभवः पुं अनादरः इत्यमरः
परिभावः पुं परिभवः इत्यमरः
परिभाषणम् क्लीं सनिन्दउपा
लम्भः इत्यमरः उपालम्भो दु।
र्वादः निन्दया सह वर्त्तमानो य।
उपालम्भस्तत्र सनिन्दे परिभाषणं
उपालम्भो गुणाविष्करणेन स्त
ति इर्ष्योऽपिभवति यथा मह।
कुलस्य भरतः किमिदमुचितं भ
वति अत्रत्र संस्तुतौ न परिभा।
॥ षणं टीकान्तरे ॥

पिवे फलस्यानवाप्त्या गमनेयो।
ग्यमिति निन्दा ईर्ष्या महाकुल।
स्यानवकथं विप्रवधः इतिस्तुति
पूर्वश्च उपालम्भः इतिभरतः॥
नियमः इति मेदिनी आलापः।
इतिविश्वः ॥ परि भाषा स्त्री।
परिष्कृतभाषणं पदार्थ विवेच।
का व्याख्यानं युक्ति शक्ता वाक्।
इतिकाव्यप्रकाशटीकायां चण्डी
दासः तत्पर्य्यायः प्रज्ञप्तिः २
शैली ३ संकेतः ४ समयकारः
इतित्रिकाण्डशेषः ग्रन्थस्य से
तेप निर्वाहार्थ संकेतविशेषः ॥
यथा चपोदितेत्यादि इतिमुग्धबो
धटीकायां दुर्गादासः नखलु मा।
निहन्यते कृतश्चित् ॥ ॥
परिभाषेव गरीयसी यदेतिच मा।
घ षोडश सर्गः ॥ ॥
परिभूते त्रि अनादृते तत्पर्य्यायः
अवगणिते २ अवमते ३ अवज्ञा
ते ४ अवमानिते ५ इत्यमरः ॥
परिभ्रमः पुं सर्वतोभ्रमणं परि।
पूर्व भ्रमधातो र्भावे अल्प्रत्यय॥
निष्पन्नः ॥ परिमण्डलं ॥
त्रि वर्त्तुलं इतिहेमचन्द्रः परि।
मलः पुं विमर्द्दने कुंकुमा॥
दि मर्द्दनम् ॥

५

विमर्द्दोत्थ जन मनोहर गन्धः
सुरचनादि विमर्द्दोत्थ विलेपन ।
कुङ्कुमादि गन्धः इत्यमरभरतौ
सुरभि माल्य गन्धादि धारणेनो
त् पन्नो हृद्यागन्धः इतिस्वामी
तत्पर्य्यायः आमोदः २ गन्धः ३
सौरभ्यं ४ सौरभं ५ इतिराजनि-
र्घण्टः परिमल समूहः इति ॥
शब्दरत्नावली ॥ परिमाणं
क्ली परिमीयते ऽनेन परिमित
व्यवहारासाधारणकारणं इतिसि
द्धान्तमुक्तावली माप इतिभाषा त-
त्पर्य्याय मकारा यथा योतवे
कुडवं पाद्य मिति मानार्थकं मेयं
२ माने तुला कुलिप्रस्थे र्गुञ्जाः
पञ्चाद्य माषकः ते षोडशाक्षः क
र्षोऽस्त्री पलं कर्षचतुष्टयं सुवर्ण
विस्तो हेम्नोक्षे कुरुविस्तस्तत्प
ले तुला स्त्रियां पलशतं भारः ।
स्याद्विंशतिस्तुलाः आचितं दश ।
भाराः स्युः शाकटो भार आचितः
कार्षापणः कार्षिकश्च ताम्रिके ।
कार्षिकेपणः अस्त्रियामाढकद्रो-
णौ खारीवाहो निकुञ्चकः कुड
वः प्रस्थइत्याद्याः परिमाणार्थ
काः पृथक् इत्यमरः ॥
न्यायमते तद्यथा ॥ ॥

परिमाणं भवेन्मान व्यवस्थारस-
कारणं अणुदीर्घं महद्ध्रस्व मिति
तद्भेदईरितः अनित्ये तदनित्ये ॥
स्यान्नित्ये नित्य मुदाहृते संख्यातः
परिमानाच्च मचयादपिजायते ॥
अनित्ये द्व्यणुकादौ तु संख्याजन्य
मुदाहृते परिमाणं घटादौ तु प-
रिमाणज मुच्यते मचयः शि॥
थिल्याख्यो यः संयोगस्तेन जन्म
ते परिमानन्तूलकादौ नाशस्त्वा
श्रय नाशतः इति भाषा परिछेदः
परिमार्ज्यं त्रि परिमृज्य परिशो-
धनीयं परि पूर्व मृज धातोर्ण्यत्
प्रत्ययनिष्पन्नम् ॥
परिमार्ज्जनं क्ली खाद्यभेदः मधुम
स्तके यथा मधु तैलघृतैर्मध्ये वे
ष्टिताः समितास्थये मधुमस्तक-
मुद्दिष्टं तस्याख्या परिमार्ज्जनं ॥
इतिशब्दचन्द्रिका परिशोधनेच ।
परिमितं त्रि युक्तं इतित्रिकाण्डः ।
शेषः परिमाणविशिष्टे यथा ॥
द्रविणं परिमितमधिकव्ययिनेन
नमाकुली कुरुते क्षीणाचल ॥
मिवपीन स्तनजघनाथाः कुली
नाथाः इत्युद्भटः ॥ ॥
परिमृज्यम् त्रि परिमार्ज्यं ।
परिपूर्व ॥ ॥ ॥

मृजधातोः ल्यप प्रत्ययनिष्पन्ने ।
परिमेयं त्रि परिमाणविशिष्टे
परिमातव्ये परिमाणीये परि
पूर्व मापतोर्य प्रत्यय निष्पन्ने प-
रिमोषी न त्रि परिमोषणशीलः
चौरः परि पूर्व मुषधातोः कर्त्त-
रिणिन् प्रत्ययनिष्पन्नः ॥
परिरम्भः पुं आलिंगने इत्यमरः
परिवत्सरः पुं वत्सरः इतिज-
टाधरः वत्सर विशेषः यथा
शकाद्वात् पञ्चभिःशेषात् समा-
या दीप्तवत् स्वाः सम्पदी दानुप्
र्वाश्च तथाद्य पूर्वकामताः इति
मलमासतत्त्वे परि पूर्वे तथाद्य
न्तं पदानांच द्विज्ञातेमा : इति ।
विस्णुधर्म्मोत्तरम् ॥ ॥
परिवर्ज्जनं क्ली मारणं इत्यमरः
परित्यागः यथा गौष्यानदोषा
मद्युराङ्गनानां धूर्त्तस्यकुत्सस्य ।
हिंसीतिरेषा विपर्य्ययोयेन कृतः
स पित्रोस्तस्यापपत्नी परिवर्ज्ज
नं किं इत्युद्भटः ॥ परिवर्ज्ज
नीया यथा एकशय्यासने पं-
क्ति भाण्डपक्वान्नमिश्रणं ।
याजनाध्यापने योनि स्तथैव
सहभोजनं सहाध्यायस्तदशमः
सहयाजनमेवच एकादशसमुद्दिष्टा दो

षाः सांकर्य्य संगिनाः समीपे ॥
चाप्यवस्थानात् पापसंक्रमते नृ-
णां तस्मात्सर्वप्रयत्नेन सांकर्य्यं प
रिवर्ज्जयेत् इतिकौर्म्मे उपविभागे
अध्यायः यस्मिन्देशे न सम्मानो न
प्रीतिर्नच बान्धवाः नच विद्यागमः
कश्चित्तंदेशं परिवर्ज्जयेत् इतिचा
णाक्य ब्राह्मणं बालिशं तत्र मयो-
द्धारे विशंजडं शूद्रमत्तर संयुक्तं ह
रतः परिवर्ज्जयेत् कुभार्य्यांच कुमि
त्रंच कुराजानं कुसौहृदं कुबन्धुञ्च
कुदेशंच दूरतः परिवर्ज्जयेत् इति
गरुडपुराणे ११२ [?] अध्यायः ॥
परिवर्त्तः पुम् विनिमयः कूर्म्म
राजः अपवर्त्तने इतिमेदिनी यु
गान्तः इति हेमचन्द्रः ग्रन्थविच्छे
दः इतिजटाधरः मृत्युपुत्रस्य पुत्रः
सहस्सारसेन कलिकन्या निर्म्मा
ष्टि गर्भजालाष्ट पुत्रान्गतनीय
पुत्रः तस्यपुत्रयोः कर्म्मादि य-
था परिवर्त्तस्तौ होत निरूपवि-
कृतौ द्विजा गोवृहता द्विपरिखा
प्राकारभ्रा पि संश्रयौ ते र्व्विष्णः
परिवर्त्तनौ कृतः पादपादि-
षु कोष्टुके परिवर्त्तः स्यात्भ-
स्याम्मोदवासनः ॥

१५



न हृतम्भैव नैवाद्रिं न शाका
रे पयोनिधिम् परिखा न।
समाक्रामे दवत्ता गर्भधारिणी
इतिमार्कण्डेयपुराणम् ॥
परिवर्त्तनं क्ली परिवर्त्तः तत्पर्य्या
यः परिदाने २ विनिमयः ३ नैमे
यः ४ व्यतिहारः ५ परावर्त्तः ६
वैमेयः ७ विमयः ८ इतिहेमच
न्द्रः परिवसथः पुम् ग्रामः इ
तिहेमचन्द्रः ॥ ॥
परिवहः पुम् सप्तवाय्वन्तर्गतष
ष्ठवायुः सत्तस्तवह वायो रूपवि।
स्थितः इतिसिद्धान्तशिरोमणिः
परिवादः पुं अपवादः वीणाः
वादनवस्तु इतिमेदिनी ॥
परिवादकः त्रि परिवादकर्त्ता।
परि पूर्ववद धातोः कर्त्तरि ण॥
क प्रत्ययनिष्पन्नः परिवादिनी
स्त्री सप्ततन्त्रीयुक्तवीणा इत्यमरः
परिवादविशिष्टा च परिवादी न
त्रि परिवादकर्त्ता इति परि पूर्व
वदधातोः शीलार्थे कर्त्तरि णि।
न् प्रत्यय निष्पन्नः परिवादविशि
ष्टः इति परिवाद शब्दादस्त्यर्थे इ
न् प्रत्ययेन सिद्धः परिवापः पुं।
पर्य्युप्तिः वपनं जलस्थाने परि
च्छदः इतिमेदिनी ॥ ॥

परिपावनं क्ली मण्डने इति।
हेमचन्द्रः ॥ ॥
परिवापितं त्रि मुण्डितं इत्यम
रः परिवारः पुं परिजनः खड्ग
कोषः परिच्छदः इतिमेदिनी
परिवाहः पुं परीवाहः जलोच्छ्वा
सः इत्यमरटीकायां रमानाथः
परिविन्नः पुम् परिवित्तिः य।
स्या ज्येष्ठे निर्विशिष्टे कनी।
यान् निर्विशन् परिवेत्ता भवा
ति परिविन्नो ज्येष्ठः परिवेदनी।
या कन्या परिदायी दाता परिक।
र्त्ता याजकः तेसर्वे पतिताः इ।
त्युदाहृतत्त्वं ॥ परिवित्तिः ॥
पुं परिवेत्तृज्येष्ठः कृतविवाह॥
स्यानूढ ज्येष्ठभ्राता इत्यमरः
परिविन्दन पुम् परिवेदनक
र्त्ता यथा देशान्तरस्थ क्लीवैक।
वृषणान सहोदरान् वेश्याभिस
क्तपतित शूद्रतुल्यातिरोगिनः
जडमूकान्ध बधिर कुब्जवामन।
कुष्ठकान् अतिवृद्धान भार्य्या।
श्च वृषिसक्तान् न्नृपस्य च पन
वृद्धि प्रसक्तांश्चकामतः कारिण
लक्ष्या कलटोन्मत्तचौरांश्च परि।
विन्दन्न दुष्यति इत्युदाहृततत्त्वे छन्दो
गपरिशिष्टं परिविन्न क्ली सर्वतो

विस्रः विस्रंविस्रं परिजनमव्ययी
भाव समासिद्धर्गादासः ॥
परिहृंहितं त्रि सर्वतोभावेनदी
प्तिविशिष्टं सर्वतोभावेन करि
गर्जितं सर्वतोभावेन वृद्धिवि।
शिष्टं सर्वतोभावेन ध्वनिवि।
शिष्टं इति वृहिधातोः कर्म्म।
णिक्त प्रत्यय निष्पन्नम् ॥
परिवृढः त्रि अधिपः प्रभुः॥
इत्यमरः ॥ परिवृतः ॥
त्रि आवृतः वेष्टितः यथा ब
वहारान्नृपः पश्येत् सभ्यैःपरि
वृतोन्वहं इतिमिताक्षरा ॥
परिवृत्तिः पुं परिवित्तिः इति।
हड्डः परिवृंहितं त्रि सर्वतो।
भावेनवृद्धि विशिष्टं सर्वतोभावे
नोद्यनविशिष्टं इति वृहधातोः।
कर्म्मणिक्तप्रत्यय निष्पन्नम् ॥
परिवेत्ता पुम् अनूढेज्येष्ठे कृत।
विवाहानुजः इत्यमरः ॥
परिवेदनं क्ली विवाहः अगम्या।
धानं यथा क्लीवेदेशान्तरगते प
तितेभिक्षुकेपिवा योगशास्त्रा
भियुक्तेच नदोषः परिवेदने
इतिस्मृहाहृततत्त्वे शातातपः।
सर्वतो भावेन ज्ञानम् ॥
॥ सर्वतो भावेन ॥ ॥

विचारणं सर्वतोभावेन विद्य।
मानत्व सर्वतोभावेनलाभः ॥
इति तत्तदर्थक विद धातो रन
ट् प्रत्ययनिष्पन्नम् ॥ ॥
परिवेदिनी स्त्री परिवेत्तः स्त्री।
इतिहेमचन्द्रः ॥ ॥ परिवे
शः पुम् वेष्टनं परिधिः इतिमे
दिनी वातेन मण्डलीभूताः सू।
र्य्याचन्द्रमसोःकराः मालाभाव्यो
म्नि तन्तते परिवेशःप्रकीर्त्तितः
इति भरतधृतसाहसाङ्कः ॥
परिवेषः पुं परिवृत्तिः परिधिः
परिवेषणं इतिहेमचन्द्रः ॥ प
रिवेषणं क्ली वेष्टनं भोजनार्थं।
भोजनपात्रे अन्नादेर्दानं अथश्राद्धे
परिवेषणे मण्डःपाणि भ्याम्
पसंगृह्य स्वयमन्नस्य वर्द्धितं विप्रा
न्तिके पितरन्ध्यायन् शनकैरुप
निक्षिपेत् अन्नस्येतिव्रतीयार्थे ष
ष्ठी वर्द्धितं पूरितं पात्रमितिशेषः
उपनिक्षिपेत् परिवेषणार्थं त।
था च पाकस्थात्स्था श्राहृत्य प्रथ
मं भोजनपात्रेन देयं किंतस्था।
त्स्थादिकं पाणिभ्यां पात्र समीपे।
भूमौसंस्था प्यपश्चात् पाणि।
भ्यां पात्रान्तरितां भ्यां श्राद्धे प
॥ रिवेषयेत् उभाभ्यां ॥

मपिहस्ताभ्यां नाकृष्य परिवे-
षयेदिति मत्स्यपुराणात् यत्र
श्राद्धे परिवेषणन्तु दक्षिण पा-
णिना वामेन वा न गाननिधानादिति
मैथिलोक्तं तत्र एकेन पाणिना
दत्तं शूद्रादत्तं न भक्ष्येदित्यादि
पुराणीयेन एक पाणि दत्त शूद्र
दत्त भक्षण निषेधेन तन्मात्र पा-
रिवेषण स्यापिनिषिद्धत्वात् पा-
णिभ्यामपि पात्रात् विनिकृत्वा दे-
ये हस्तदत्ताश्च ये स्नेहा लवणं॥
व्यञ्जनानि च दातारं नोपतिष्ठन्ते
भोक्ता भुंक्ते च किल्बिषं तस्माद्दत्त
रितं देयं पर्णेनाथ त्वचेन वा।
मदयाम तहस्तेन नायसेन क-
दाचन इति विशिष्ट वचनेन साम-
न्यतो ऽभिधानात् पितृभक्तितरं॥
गिण्यां मप्येवम् मनुः गुणांश्च
सूप शाकाद्यान् पयो दधिघृतं म-
धु विन्यसेद्यत्नतः सम्यग् भूमा-
वेव समाहितः आमिषं पान॥
पात्रं च भोक्तुर्दक्षिणतो न्यसेत्।
भक्ष्यं भोज्यं च विविधं मूलानि च
फलानि च हृद्यानि चैव मांसा-
नि पानानि सुरभीणि च उपनीय
च तत्सर्वं शनकैः सुसमाहितः
परिवेषयेत् प्रयतो गुणान्।

सर्वान् प्रचोदयन् गुणान् उपक-
रणानि भूमावेव नतव्यञ्जनादि
पात्राणि अन्नादि पात्रोपरिनिक्षि-
पेत् इति श्राद्धतत्त्वम् ॥ परिवे-
ष्टितं त्रि सर्वतो भावेन वेष्टितं त-
त्पर्य्यायः परिक्षिप्तः २ वलयि-
तं ३ निवृतं ४ परिष्कृतं ५ परी-
तं ६ इति हेमचन्द्रः ॥ परि-
व्याधः पुं अम्बुवेतसः द्रुमोत्-
पलः इत्यमरः ॥ ॥
परिव्रज्या स्त्री तपस्या इति हेम-
चन्द्रः ॥ परिव्राट् } पुं
चतुर्थाश्रमी तत्परिव्राज् } प-
र्य्यायः भिक्षुः २ कर्म्मन्दी ३
पाराशरी ४ मस्करी ५ इत्यम-
रः ॥ तस्य लक्षणं यथा ॥
सर्वारम्भपरित्यागो भैक्ष्याशनं वृ-
क्षमूलता निष्परिग्रहता ऽद्रोह
समता सर्वजन्तुषु प्रियाप्रियप-
रिष्वंगे सुखदुःखाविकारिता ॥
सबाह्याभ्यन्तरं शौचं सुखदुःखा-
विकारिता सर्वेन्द्रिय समाहा-
रो धारणा ध्याननित्यता भाव-
संशुद्धिरित्येष परिव्राड्धर्म्म-
उच्यते इति गरुडपुराणं ॥
परिव्राजः पुं परिव्राट् इत्यमर
परिव्राजकः टीकायां रमानाथः

प्रतिचि-
नीयं स्वारा-
धितोपि+

परिव्राजिः स्त्री श्रावणी खुल-
कुडी इति भाषा इति राजनिर्घ-
ण्टः परिशंकनीयः त्रि सर्व-
तोभावेनशङ्काविषयः यथा
शास्त्रं सुचिन्तितमपि + नृपतिः प-
रिशंकनीयः अंके स्थितापि युव-
तिः परिरक्षणीया शास्त्रे नृपे च
युवतौ च कुतो वशित्वं इत्युद्भटः
परिशिष्टं क्ली परिशेषविशिष्टं
अवशिष्टार्थ बोधक शब्दः इ-
ति हेमचन्द्रः ॥ परिशुष्कं
क्ली मांसव्यञ्जनभेदः यथा
मांसं बहु घृतैर्भृष्टं सिक्तम्बुवा-
मुहुर्मुहुः जीवकाद्यैः समा-
युक्तं परिशुष्कं तदुच्यते इति श-
ब्दचन्द्रिका सर्वतो नीरसे त्रि प-
रिशोधः पुं परिशोधने सर्वतो-
भावेन शुद्धिः परिपूर्व शुध धातो-
रल् प्रत्यय निष्पन्नः परिशोषः
पुं सर्वतो भावेनशुष्कता यथा
मार्त्तण्ड परिशोषमेति सलिले
इत्यादि ज्योतिस्तत्त्वे परिश्रमः
पुं परिश्रान्तिः तत् पर्य्यायः
श्रमः २ क्लमः ३ क्लेशः ४
~~पर्य्यायः श्रमः~~ प्रयासः ५
आयासः ६ व्यायामः ७ ॥
इति हेमचन्द्रः ॥ ॥

परिश्रयः पुं सभा आश्रयः इति
मेदिनी ॥ परिश्रान्तः त्रि
सर्वतोभावेन श्रान्ति युक्तः परि
पूर्व श्रमधातोः कर्त्तरि क्त प्रत्यय-
निष्पन्नः ॥ परिश्रुतः त्रि सर्व-
तोभावेन श्रवणविशिष्टः परिपू-
र्वश्रु धातोः क्त प्रत्ययनिष्पन्नः ॥
परिश्लेषः पुं आश्लेषः परिपूर्व
श्लिष धातो भावे अल् प्रत्ययनि-
ष्पन्नः ॥ परिषत् द स्त्री ॥
सभा इत्यमरः परि षत्ते यथा
एकविंशतिसंख्याकै मीमांसा-
न्यायपारगैः वेदाङ्ग कुशलैश्चैव
परिषत्त्वं प्रकल्पयेत् इति प्राय-
श्चित्तविवेकः ॥ परिषदः पुं
पारिषदः अनुचरः इति भरतकृत
द्विरूपकोषः परिषद्यः पुं परि-
षद्वलः इति भरतद्विरूपकोषः
परिषद्वलः पुं सभासदः पारिषदः
इति शब्दरत्नावली ॥
परिष्कन्दः त्रि परिस्कन्दः प-
रपुष्टः इत्यमरटीकायां रमा-
नाथः परिष्कण्णः त्रि परिस्क-
न्दः इत्यमरः ॥ ॥
टीकायां रायमुकुटः परिष्का-
रः पुं अलंकारः इत्यमरः
संस्कारः शुद्धिः ॥

परिष्कृतः त्रि भूषितः अलं।
कृतः इत्यमरः वेष्टितः इति।
हेमचन्द्रः आहितसंस्कारः इ।
ति हेमचन्द्रः आहितसंस्कारः
इति वेदिशाहृटीकायांभरतः॥
परिष्कृतभूमिः स्त्री वेदिः परि॥
ष्कृता यज्ञार्थं पशुवन्धनाय यज्ञ
पात्रासादनाय चाहित संस्कारा
भूमिः इत्यमरभरतौ ॥ परि।
ष्टोमः पुं परिस्तोमः इत्यमरटी।
कायां स्वामी ॥ परिषङ्गः पुं
आलिंगने इत्यमरः परिरम्भः।
पुं परिषद्यः सभासदः सर्वतो
भावेन सभायां साधुः इत्यर्थे
यप्रत्ययः ॥ परिसरः पुं।
पर्य्यन्तभूः नदीनगर पर्व्वतादे
रुपान्त भूमिः इत्यमर भरतौ।
मृत्युः विधिः इतिमेदिनी ॥
परिसर्पः पुं परिक्रिया परि।
जनादिना वेष्टने समन्तात्।
सर्पणे इत्यमरभरतौ ॥
परिसर्य्या स्त्री परीसारः सर्व
तोगमने भूमौ सर्वतो भ्रमणे
इति सर्वस्वे भ्रमन्त सरणे इति
॥ केचित् इत्यमरभर
तौ ॥ परिस्कन्दः पुम् ॥
परपुष्टः परेण प्रति ॥

पालितः इत्यमरः ॥
परिस्कन्नः पुं परिस्कन्दः इ
त्यमर टीकायां वायसकूटः
परिस्तोमः पुं गजपृष्ठस्थचित्र
कम्बलः हाभिर पिठेर कुल
इति भाषा इत्यमरः ॥ ॥
परिस्पन्दः पुं कुसुमप्रकरादेः।
पत्रावल्या केशरचना इत्यमरः
परिकरः परिवारः इतिहेमचं।
द्रः सर्वतोभावेनस्पन्दनञ्च ॥
परिस्पन्दनं क्ली सर्वतोभावेन
कम्पने यथा कोपि परिस्प
न्दन साधन साध्यः यथा गम
नादिः कोप्यपरिःस्पन्दन सा।
धन साध्यः यथा अवस्था॥
नादिः इति गोष्ठीचन्द्रः ॥ परि
स्पन्दमानः त्रि सर्वतोभावेन ॥
कम्पमानः यथा अनवरत परि
स्पन्दमाना परिमित पवनादि।
परमाणु चेतन संयोग सन्ता।
नानः पानिव्यक्ती नामविरतेम
वोपरमात् इति सामान्यलक्ष
णायांशिरोमणिः ॥ ॥
परिस्यन्दः पुं परिस्पन्दः इ॥
त्यमरटीकायांभरतः ॥
परिस्रुत् स्त्री वरुणात्मजा म।
दिरा इत्यमरः ॥ परिस्रुतः
त्रि स्रवयुक्तः सर्वतो भावेन

स्रवितः इतिमेदिनी ॥ परि।
स्रुता स्त्री वारुणी मदिरा इ
तिमेदिनी ॥ परिहारः पुं।
अवज्ञा अनादरः इतिशाब्दर।
त्नावली ॥ ॥ परिहार्य्यः
पुं पारिहार्य्यः बलयः इति
भरत द्विरूपकोषः परिहर
णीये त्रि ॥ परिहासः।
पुं परीहासः यथा परिहासः
केलिशब्दः केलिर्द्रवनर्म्म॥
णी इति त्रिकाण्डशेषः ॥
परिक्षित् पुं अभिमन्युपुत्रः त
त्पर्य्यायः परीक्षित् २ पारीक्षि
तः ३ परिक्षितः ४ इतिशाब्दर
त्नावली परिक्षिप्ते त्रि परिखा
दिना वेष्टिते तत्पर्य्यायः निवृते
२ इत्यमरः सर्वतोभावेन क्षेप।
युक्तेच परीणायः पुं परिणा।
यः परिणायः शारीणां सम
न्तान्नयने इत्यमरटीकायांभ
रतः ॥ परीतं त्रि परिवे।
ष्टितम् इतिहेमचन्द्रः ॥
परीतत् त्रि सर्वतोभावेनवि।
स्तृते परि सर्व तनधातोः॥
क्विप्प्रत्ययनिष्पन्ने इतिमु।
ग्धवोधव्याकरणे परीभावः
पुं परिभावः अनादरः इत
मर टीकायांभरतः ॥

परीरं क्ली फलं इत्युणादिको
षः परीरम्भः पुं परिरम्भः आ
लिंगने इतिभरतद्विरूपकोषः
परीवर्त्तः पुं परिवर्त्तने तत्प।
र्य्यायः प्रतिदाने २ नैमेयः ३
नियमः ४ इत्यमरः परिवर्त्तः ५
नैमेयः ६ विनिमयः ७ परि
दाने ८ इतिशाब्दरत्नावली कूर्म्म
राजः इतिजटाधरः ॥ ॥
परीवादः पुं दोषोल्लासः तत्।
पर्य्यायः कुत्सा २ निन्दा ३ जु
गुप्सा ४ गर्हा ५ गर्हणं ६ निन्द
ने ७ कुत्सने ८ परिवादः ९ जु
गुप्सने १० आक्षेपः ११ अवर्णः १२
निर्वादः १३ अपक्रोशः १४ भर्त्स
ने १५ उपक्रोशः १६ अपवादः १७
अववादः १८ इतिशाब्दरत्नावली
वीणादिवादनम् येन काष्ठविशे
षादिना वीणादिर्वाद्यतेसः इ।
तिजटाधरः ॥ ॥ परीवारः
पुं खड्गकोष : जंगमः परिच्छ
दः इत्यमरः परिवारः परिजने
खड्गकोषे परिच्छदो इत्यनेकत्र।
दर्शनात् जंगमो जंगम विशेषः
परिजन इत्यर्थः खड्गकोषो ऽसि
वायकः मेयान् इतिव्यानः ॥
परिच्छन्दः शोभाजनक अपा।

करणं छत्रचामरादिः सम्पत्त
नादिश्च अथ परीवारः इति।
हीकायांभरतः ॥ परीवा
हः पुं जलोच्छ्वासः इत्यमरः
राजयोग्यवस्तु इतिमेदिनी ॥
परीष्टिः स्त्री अन्वेषणा इत्यम
रः परिचर्य्या प्राकाम्यं इति।
मेदिनी ॥ परीसारः
पुम् परिसर्य्या सर्व्वतो गम
ने इत्यमरः ॥ परीहारः।
पुं अवज्ञा इतिशब्दरत्नावली
परीहासः पुं परिहसने तत्
पर्य्यायः द्रवः २ केलिः ३ क्री
डा ४ लीला ५ नर्म्म ६ इत्यम
रः परिहासः ७ केलिमुखं ८
देवनं ९ इतित्रिकाण्डशेषः ॥
परीक्षकः त्रि निरूपकः त।
त्पर्य्यायः कारणिकः २ इत्य
मरः परीक्षते अवधारयति ॥
प्रमाणेन ॥ यथा वह्निना
परीक्षकः स्वर्णस्य स्वर्णकारः
कारणैर्हेतुभिश्चरति कारणि
कः इतिभरतः ॥ ॥
परीक्षणं क्ली परीक्षा राज्ञार्थम्म
कामार्थं तयैरमात्यादेर्भावतत्त्व
निरूपणं इतिभरतः यथा
भेदोपजापाउपधा धर्म्माद्यैर्यत्

परीक्षणं इत्यमरः सर्व्वतो।
भावेनदर्शनञ्च ॥ परीक्षा।
स्त्री दिव्यं अथदिव्यानि तत्र बृ
हस्पतिः धटो ग्निरुदकञ्चैव
विषंकोषश्च पंचमं षष्ठञ्च त।
ण्डुलाःप्रोक्तं सप्तमं तप्तमाषकं
अष्टमं कालमित्युक्तं नवमं धर्म्म
जैस्स्मृतं दिव्यान्येतानिसर्व्वाणि
निर्द्दिष्टानि स्वयंभुवा अथ कि
तद्दिव्यं तत्रमानुष प्रमाणानि
र्णायस्यापि निर्णायकं यत्तद्दि
व्य मितिलोक प्रसिद्धं पतद्यद्या
पिशब्द पथानामस्ति तथापि ॥
कालान्तर निर्णायकत्वेन तेषां
भेदात् अपिना मानुष प्रमाण
सत्त्वेपि यत्र वादीना मंगी॥
कारस्तत्रापि तद्भवति इतिसू
चितं अतएव लिखित साक्षि।
भुक्ति लक्षणं त्रिविध मानुष।
प्रमाणं भिन्नप्रमाणं यत्तद्दिव्यं
प्रमाणं तत्प्रमाणं न भावैक
गोचरं किंतु भावाभावविशे
षेण गोचरयतीति तत्र महा
भियोगेषु दिव्यमाह याज्ञव
ल्क्यः तुलाग्न्यापो विषंकोषो
दिव्यानीहविशुद्धये महाभि।
योगेष्वेतानि शीर्षकस्थेऽभियो
क्तरि विशुद्धये सन्दिग्धार्थस्य

सन्देहनिवृत्तये महाभियोगेषु
महापातकादि गुरुतराभियोगे।
षु शीर्षकस्थे इतिशीर्षकं प्रधानं
व्यवहारस्य चतुर्थपादो जय पराज
य लक्षणः तेनदण्डो लक्ष्यते तत्र
तिष्ठतीति शीर्षकस्थः तत्प्रयुक्त
दण्डभागीत्यर्थः महाभियोगान्
स्पष्टयति कालिका पुराणे पर
दाराभिशापेच चौर्य्यागम्याग।
मेषु च महापातकशस्तेषु साहि
त्वेन्यपसाहसे प्रतिपत्तौ विवादे
च पणस्यस्थापनेकृते नैत्रेवृष्या
पयेद्दिव्यं शिरःपूर्व्वं महीपतिः
परदाराभिशापेच बहवो यत्र।
वादिनः शिरोहीने भवेद्दिव्यमा
त्मनः शुद्धिकारणात् पितामहः
शिरःस्थायि विहीनानि दिव्यानि
परिवर्जयेत् चत्वारि तथटादीनि
कोषश्चैवाशिरास्स्मृतः महाभि
योगेतरेपि कोषमाहस्मृतिः को
षं मल्पेच दापयेत् याज्ञवल्क्य।
नाभियोक्तिवादिनः शिरोवर्त्ति।
ताभिधानादभियोज्यस्य दिव्य।
कर्त्तृत्व प्रतिपादितं व्यक्तमाह का
त्यायनः नकश्चिदभियोक्तारं दि।
व्येषु विनियोजयेत् अभियुक्ता।
यता तव्यम् दिव्यंदिव्य विशारदः।
॥ दैः मत्पर्थि स्त्री ॥

कारेणार्थिनोपि दिव्यमाह याज्ञव
ल्क्यः रुच्यावान्यतरः कुर्य्यादितरो।
वर्त्तयच्छिरः विनापि शीर्षकात्कु
र्य्यान्नृपद्रोहे थपातके इतरोऽभि
युक्तः शिरःशारीरदण्डमर्थदण्ड
स्वा वर्त्तयेत् स्वीकुर्य्यात् बृहस्पतिः
स्नेहात् क्रोधाल्लोभतो वा भेदमा
याति साक्षिणः विधिदृष्टस्य दिव्य
स्य नभेदो जायतेक्वचित् भेदःसा
त्स्वैपरीत्यं यत्तकात्यायनवचनं
क्रिया नवैदिकीप्रोक्ता विषमा
नेषु साक्षिषु लेख्येच सतिवादेषु
नस्याद्दिव्यं न साक्षिणः इति तत्तु।
णान्वित साक्षिसत्वे यथा व्यासः
मणि मन्त्रोषधि बलात् प्रदत्तं वावि
धानतः विसम्वदेद्दिव्यमपि नतु।
साक्षीगुणान्वितः अतएवनारदः
कृक्षिपणवसन्नाम्ह शपथेनेनम
र्हयेत् पीड्येत् निर्हारयेदितिया
वत् ॥ शपथानाहनारदः सत्य
वाहनशस्त्राणि गोवीजकनका
निच देवतापितृपादांश्च स्तानि।
सुकृतानिच स्पृशेच्छिरांसि पुत्रा।
णां दाराणां सुहृदास्तथा अभि
योगेषु सर्व्वेषु कोषपान मथापि
वा इत्येते शपथाः प्रोक्ता मनुना
स्वल्पकारणात् ॥

बृहस्पतिः। यथोक्तविधिना देयं। दिव्यं दिव्यविशारदैः। अयथोक्तप्रदत्तन्तु न शोधयति साधकम्॥ देशकालबलानि बहिर्वादिकृतानि च व्यभिचारमदात्वेवं कुर्व्वन्तीह न संशयः॥ बहिर्वादिकृतमभियोक्तारं विना कृते एतच्च शायिके आत्मशुद्धिपराणामभियोक्तारं विनापि दिव्यविधानात्। तथा च नारदः। राजभिः शङ्कितानाञ्च निर्द्दिष्टानाञ्च दस्युभिः। आत्मशुद्धिपराणाञ्च देयं दिव्यं शिरो विना॥

अथ दिव्यदेशाः। कात्यायनः। इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणां। नृपद्रोहे प्रवृत्तानां राजद्वारे प्रयोजयेत्। प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे। अतोऽन्येषु च कार्य्येषु सभामध्ये विदुर्बुधाः। इन्द्रस्थाने इन्द्रध्वजस्थाने॥ अथ दिव्यकालाः। पितामहः। चैत्रो मार्गशिराश्चैव वैशाखश्च तथैव हि। एते साधारणा मासा दिव्यानामविरोधिनः। घटः सर्व्वर्त्तुकः प्रोक्तो वाभेवाभि विवर्ज्जयेत्। अग्निः शिशिर हेमन्ते वर्षासु परिकीर्त्तितः। शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे॥ ॥

दैविषं कोषस्तु सर्व्वदा देयस्तथा स्यात् सार्व्वकालिकीति मिताक्षरायां। नारदः। न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनं। न प्रावृषि विषं दद्यात् प्रवाते न तुलां न्यसेत्। नाह्नः पूर्व्वाह्ने सर्व्वदिव्यानां प्रदानं परिकीर्त्तितं। नापराह्ने न सन्ध्यायां। न मध्याह्ने कदाचन॥ शीते हेमन्ते शिशिरे वर्षासु उष्णकाले ग्रीष्मे शारदेः वर्षासु विषविषेधश्चतुर्य्यवाति विक्त परः वर्षे चतुर्य्यवा॥ मात्रा इति वक्ष्यमाण नारदवचनात् त्वाङ्गलादीनाञ्च विशेषानभिधानात् सार्व्वकालिकत्वं॥ अत्र विषशानोषतो वर्षानिषेधात् वक्ष्यमाणवचने सिंहस्थ रवावेव परीक्षामात्र॥ निषेधाच्च दिव्यान्तरं सिंहे तदन्य वर्षास्वपि कुर्व्वीत अतोयाम्यायने। हरौ सुप्ते सर्व्व कर्म्माणि वर्ज्जयेदित्यस्य नविषयः ज्योतिषे सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा मलमासेन कर्त्तव्या परीक्षा जयकांक्षिणा रविशुद्धौ गुरौ चैव नष्टक्रे ऽष्टमगते पुनः सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः नाष्टम्यां न चतुर्द्दश्यां प्रायश्चित्त। परीक्षणे न परीक्षा विवादस्य॥

शनिभौमदिने तथा रविशुद्धौ। गुरौ चैव तत्र शस्यत इति शेषः। तथा च दीपिकायां नो शुक्रोऽस्तऽष्टमेऽर्के गुरुसहित रवौ जन्ममासेऽष्टमेन्दौ विष्टौ मासे मलाख्ये। कुजशनिदिवसे जन्मतारा सवाधनाडीनक्षत्र हीने गुरुरविरजनीनाथ ताराविशुद्धौ प्रातःकार्य्या परीक्षा हितकृच्चरगृहे योदये शस्तलग्ने॥ पितामहः। अत्यन्ते। दापयेद्दिव्यं राजा वाधिकृतोऽपि वा ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव च ब्राह्मणानां प्रकृतीनां च प्रत्यहे दिव्यं दापयेदिमन्वयः प्रकृतयस्तु स्वाम्यमात्यः सुहृत्॥ कोषो राष्ट्रदुर्ग बलानि च राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोपि चेति अमरसिंहोक्ताः॥

अथ दिव्यविशेषाधिकारिणः। नारदः। ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः। वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु। साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः। विषवर्ज्जं ब्राह्मणस्य सर्व्वेषान्तु तुलास्मृता। यत् पुनः। रनेन स व्रतानां भृशार्त्तानां व्याधितानां तपस्विनां स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्म्मस्त्वपे॥

क्षितः इति स्त्र्यादीनां दिव्यं निषिद्धं तत्कलेतर विषयक मिति शूलपाणिः। मिताक्षरायान्तु स्त्री पुंसयो विवादेन स्त्रीणां दिव्यमिति॥ रुच्या वान्यतरः कुर्य्यादिति विकल्पनिषेधार्थमेतदुक्तं भवति। अवष्टभ्याभियोगेषु स्त्र्यादीनामभियोक्तृत्वे अभियोज्यानामेव दिव्यं एतेषामभियोज्यत्वेपि अभियोक्तृणामेव दिव्यं परस्पराभियोगे तु विकल्प एव तत्रापि तुलैवेति नियम्यते तथा महापातकादिशंकाभियोगे तु स्त्र्यादीनां तुलैवा। यथा याज्ञवल्क्यः। तुला स्त्री बालवृद्धान्ध पंगु ब्राह्मण रोगिणां। अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा। स्त्रीमात्रे जाति वयोऽवस्था विशेषानादरेण बाल आषोडशावर्षाज्जाति विशेषानादरेण वृद्धोऽशीतिपारगः। एतच्च वचनं सर्व्वदिव्यसाधारणेषु मार्गशिरश्चैत्रवैशाखेषु स्त्र्यादीनां सर्व्व दिव्यसमस्थान विधाने नियमार्थकं तथाऽर्थवत् न च सर्व्वकाले स्त्रीणां तुलैवेति स्त्रीणान्तु न विषं प्रोक्तं न चापि सलिलं स्मृतम्। घटकोषादिभिस्तासां मनस्तत्त्वं विचारयेत्। इति विषसलिलव्यतिरिक्त॥

यद कोषादिभिः शुद्धि विधानात्
एवं बालादिष्वपि योजनीये त।
था ब्राह्मणादीना मपि न सार्व।
कालि कत्वत्वादि नियमः सर्वेषा
मेव वर्णानां कोषाच्छुद्धि विधीय
ते सर्वासे तानि सर्वेषां ब्राह्मणस्य
विषंविना इति पितामह स्मरणा
त् तस्मात् साधारणे काले बहूदि
व्य समवधाने तुलादि नियमार्थ
मेवेदं वचनं कालान्तरेतु तत्तत्
काल विहितं सर्वेषां तथाहि वर्षा
स्वग्निरेव सर्वेषां हेमन्त शिशिरयो
स्तु त्वविषादीनां त्रयाणां अग्निवि
षयो विकल्पः ब्राह्मणस्य तु अग्नि
रेव न कदाचिद्विषंये ब्राह्मणस्य
विषंविनेति निषेधात् ग्रीष्म।
शरदोस्तु सलिलमेव येषां कुष्ठा
दीनां तु विषविषेणाग्न्यादि निषेधः
कुष्ठिनां वर्जयेदग्निं सलिले श्वास
कासिनां पित्त श्लेष्मवतां नित्यं विष
न्तु परिवर्जयेदिति वचनात् तेषा म
ग्न्यादि कालेपि साधारणे तुलाख्य
व दिव्यं भवति यथा तोयमग्निर्वि
षंचैव दातव्यं बलिनां न्नृणा मि
ति स्मरणात् ॥ दुर्बलाना मपि।
सर्वथा विष निषेधात् तत्का
ला नतिक्रमेण जाति वयोऽ
वस्थाभिन्नानि दिव्यानि दे॥

यानि यत्रैव यस्य यानि विशेषस्मा
मास पञ्च दशेतर विहितानि ता
नि शब्द्य कल्पान्तरकल्प रूपाणि।
वेदितव्यानि यथा ब्राह्मणस्य
दोषशब्दः कोषस्तत्र कल्पः तुला
ग्नी आपत् कल्पो शूद्रस्य नारद वच
ने एवकारश्रुतेश्शब्द कल्पादित्वेन
तप्तमाषस्य तुलादित्वमिति एवं चा
त्रापि अयथोक्त प्रदत्तेन नशक्तेः
साध्यसाधने इति शाठकं वोध्यं
स्मृतिः अवष्टम्भाभियुक्तानां घटा
दीनि विनिर्दिशेत् तण्डुलांश्चैव कोष
श्च शंकास्वेव न संशयः अवष्टम्भा
ऽत्र निश्चयः शिरोवर्त्तितेति केचि
दितिव्यवहारदीपिका कात्यायनः
अस्पृश्याधमदासानां म्लेच्छानां
पापकारिणां प्रतिलोम प्रसूतानां
निश्चयो नतु राजनि तत्र प्रसिद्धानि
दिव्यानि समये तेषु निर्दिशेत् तत्र
प्रसिद्धानि दिव्यानि सर्पघटादीनि
तथा देश कालाविरोधे तु यथा
शक्तं प्रकल्पयेत् ॥ अनेन हारये
द्दिव्यं विधिरेष विपर्यये अनेनम
तिनिधिना हारयेत् कारयेत् वि
पर्यये अभियुक्तस्य सामर्थ्य॥
अतएव महापातकादीना मम
हारा दिव्यमाह ॥ सएव ॥
मातृ पितृ द्विज गुरु बाल॥

स्त्री राजघातिनां महापात।
कयुक्तानां नास्तिकानां विशेषः।
तः लिंगिनांप्रमदानांच मन्त्रयो
गक्रियावतां वर्णशंकर जाता
नां पापाभ्यास प्रवृत्तिनां एतेष
वाभियोगेषु निन्द्येष्वेव प्रयत्नतः
इत्याद्यभिधाय दिव्यप्रकल्पयेन्नैव
राजाधर्म्मपरायणः एतैरेवप्रयु।
क्तानां साधूनां दिव्यमर्हति का।
त्यायनः नलोहशिल्पिनामग्निं
सलिलं नाम्बुसेविनां तण्डुलैर्न
नियुञ्जीत ब्राह्मणं मुखरोगिण
नारदः क्लीवातुरान् सत्वहीनान्
परितापार्दितान्नरान् बालवृद्धा
तुरादींश्च परीक्षेत धटे सदा ना
र्त्तीनां तोयशुद्धिः स्यात्र विषे पि
त्तरोगिणां श्वित्रान्धकुनखादी
नां नाग्निकर्म्म विधीयते नम
ज्जने स्त्री बालयो धर्म्मशास्त्र।
विशारदैः निरुत्साहान् व्याधि
दुर्बलान् तोये निमज्जयेत्
नचापि हारयेदग्निं न विषेन।
विशोधयेत् यत्तस्यात्पेषु वि
वादेषु दिव्यानि परिवर्जयेदि।
ति पितामह वचने तल्लिखित
सामन्तादि सत्त्वे दिव्य निषेध।
कं यद्यपि अलेख्य साक्षिके दि
व्यं व्यवहारे विनिर्दिशे दिति
स्मृते विवादान्तरेऽपि ॥

लेख्यादि सत्त्वे दिव्यानादरस्तु॥
यापि ऋणादानादि विवादे सा
त्युपन्यासे कृते ऽपि प्रत्यर्थी यदि
दण्डांगी कारेण दिव्यमंगीकरो
ति तदा दिव्य मपि भवति साक्षि
णां दोष सम्भवाद्दिव्यस्य तु निर्दो
षत्वेन वस्तुतत्त्व विषयत्वात् उक्ते
लक्षणाञ्च धर्म्मस्य यथाह नारदः
तत्र सत्ये स्थितो धर्म्मो व्यवहार
स्तु साक्षिणि दैव साध्ये पौरुष
न्तु न लेख्यन्तु प्रयोजयेत् स्या
वर विवादे तु प्रत्यर्थिना दण्डां
गीकारेण दिव्यावलम्बने कृते
सामन्तादि दृष्टप्रमाण सद्भावेपि
दिव्यं ग्राह्यमिति विकल्पनिवा
रणायस्या वेदेष्वित्यादि पिता
मह वचनं नात्यंतिक दिव्यनि
वारकरणाय लिखिताद्यभावे
स्याद्वादेषु निर्णयाप्रसक्तेः ॥
अथ द्रव्यसंख्यया दिव्य विशेषाः
विष्णुः अथ समय क्रियाराजद्रो
ह साहसेषु यथा कामं निःक्षे
पण स्तेयेष्वर्थ प्रमाणाद्दिनिय
मयो दिव्यं राजद्रोहादिषु यथा
कामं राजेच्छानुरोधाद्दिव्यं निः
क्षेपादिषु तु धन प्रमाणानुसार
तस्यादिस्पर्धः बृहस्पतिः सं
ख्यारश्मि रजोमूला मनुना समु
दाहृता कार्षापणान्तासा दिव्येनि

योज्या विनये तथा विषंसहस्रे
ऽपहृते पादेनैव कृताशनः ॥
त्रिभागो नेत्रसलिले मर्द्धे देयो
घटःसदा चतुःशताभियोगेतु
दातव्यस्तप्तमाषकः त्रिशते तु
तुलादेयाः कोशश्चैव तदर्द्धे ॥
के शतेऽपहृते ऽपकृतेव दातव्यं
धर्म्मशोधनं गोचौरस्य प्रदात
व्यं सीसः कालमयन्ततः एषा
संख्या निकृष्टानां मध्यानां द्वि
गुणास्मृता चतुर्गुणोत्तमा ।
नाञ्च कल्पनीया परीक्षकैः ।
रश्मिरजः । जालान्तरगते भानौ
यत्सूक्ष्मं दृश्यते रजः प्रथमं तत्
प्रमाणानां त्रसरेणुं प्रचक्षते ।
इति मनूक्ते कार्षापणन्ताम्र
माना कार्षापणः पण इति
पर्य्याय दर्शनात् विनयेदेडे
पवञ्च सहस्र इत्यादौ पण इ
ति ज्ञेयं उपक्रमात् निकृष्टा
नां जातिकर्म्म गुणैःनासहस्रा
दर्वाङ्गिं न तुला न विषन्तथे
ति यात्तवल्क्य वचनं मध्य ॥
मोत्तम विषयत्वेन हरस्यापि व
चनैकवाक्यतात् विरुद्धम् सहस्रे
ऽपहृते दद्यात्तु हस्तार्द्धे तथाप
से अर्द्धस्यार्द्धे तु सलिले तथार्द्धे
तु विषमस्ते इति वचनं पञ्चास
परार्थे यात्तिर्यंतद्विषय मिति
पतत् सर्वं स्तेय

साहस विषये अपह्नवे तु का
त्यायनः दत्तस्यापह्नवो यत्र प्र
माणे तत्र कारयेत् स्तेय साह
सयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापये
त् सर्वद्रव्यप्रमाणन्तु ज्ञात्वा हेम
प्रकल्पयेत् हेमप्रमाणयुक्तन्तु
तदा दिव्यं प्रदापयेत् ज्ञात्वा सं
ख्यां सुवर्णानां शतनाशे विषं
स्मृतं अशीतेश्च विनाशेतु द
द्याच्चैव हुताशनं षष्ट्या नाशे जलं
देयं चत्वारिंशतिवै घटं वि
शत्या विनाशेतु कोषपानं वि
धीयते पञ्चाधिकस्य वा नाशे त
तोऽर्द्धार्द्धस्य तण्डुलाः ततोऽर्द्धार्द्ध
विनाशेतु स्पृशेत् पुत्रादिमस्त
कान् ततोऽर्द्धार्द्ध विनाशेतु ।
लौकिक्यश्च क्रियाः स्मृताः ॥
एवं विचारयन्नाजा धर्म्मार्थौ
प्नो नहीयते सुवर्णानां पञ्च
कृष्णलको माषस्ते सुवर्णास्तु
षोडश इत्युक्तपीति रक्तिका ।
परिमित हेम्नो माषे अपह्नवे
द्वादशाधिकस्य पञ्चाधिकस्य
वा विंशस्य नाशे कोषपान मिष
ष्टः तण्डुलाः पुनरस्य चौर्य्या
भिशंकाया मेव नतु साहसा
दौ चौर्य्ये च तण्डुला देया नान्य
त्रेति विनिश्चय इति पितामह ।
स्मृतेः तप्तमाषेतु महाचौर्य्या
भिश

कायां महाचौर्य्याभियुक्तानां ।
तप्तमाषो विधीयते इति स्मृतेः
व्यवहार मातृकायां समस्तसा
क्षिणां यत्र दिव्ये स्तमपि शोध
येत् प्राणान्तिक विवादेषु वि
द्यमानेषु साक्षिषु दिव्यमालम्ब
ते वादी न पृच्छेत्तत्र साक्षिणः ।
इति दिव्यतत्त्वे ॥ घटादि नववि
धपरीक्षा तत्तत् शब्दे द्रष्टव्या ।
परीक्षित्) पुं अभिमन्युपुत्रः ।
परीक्षितः) स तु पितुरनन्तरं
कलियुगस्यारम्भे राजचक्रवर्त्ती ।
आसीत् यथा अभिमन्योरुत्तरा
यां परिक्षीणेषु कुरुष्वश्वत्थाम
प्रयुक्त ब्रह्मास्त्रेण गर्भएव भस्मी
कृतो भगवतः सकलसुरासुरव
न्दितचरणयुगलस्यात्मेच्छया ।
कारणमानुषरूपधारिणोऽनु
भावात् पुनर्ज्जीवितमवाप्य परी
क्षिज्जन्मेयो ऽयं साम्प्रतमेव भूमे
ण्डले ख्यातिमायाति धर्म्मेण पा
लयति इति विष्णुपुराणे ४ ॥
अंशे २ अध्यायः ॥
याते कृष्णे चकारोऽथ सोऽभिषे
कं परीक्षितः प्रयास्यन्ति यदा
चैते पूर्वाषाढां महर्षयः त
दानन्दात् प्रभृत्येष कलिर्वृद्धिं ग
मिष्यति यस्मिन्कृष्णो दिवं यातः ।


स्तस्मिन्नेव तदाहनि प्रतिपन्नं क
लियुगं तस्य संख्यां निबोधमे इति
तत्रैव २४ अध्यायः ॥ ॥
परुः पुं समुद्रः स्वर्गलोकः ग्रन्थिः
पर्वतः इति संक्षिप्तसारोणादि
वृत्तिः ॥ परुः [स] क्ली ग्र
न्थिः इत्यमरः ॥ परुत् अव्य
वत्सरः इत्यमरः परुत्न त्रि प
रुद्भवः पूर्वाब्दभवः परुत् शब्दा
त् तनार्थेत्न प्रत्यय निष्पन्नः इति
व्याकरणम् ॥ परुद्वारः पुं
घोटकः इति शब्दमाला ॥
परुषं क्ली निष्ठुरवाक्यं इत्यमरः
नीलझिण्टी इति शब्दचन्द्रिका ॥
परुषं फले इति भावप्रकाशः ॥
परुषं त्रि कर्बुरः रूक्षः निष्ठुरो
क्तिः इति मेदिनी ॥ ॥
परुषोक्तिकः त्रि निष्ठुरवक्ता
इति जटाधरः ॥ ॥
परुषे क्ली फलवृक्षभेदः परु
षफल इति वंगभाषा करूसा
इति फल्सेह इति च हिन्दी भाषा
तत् पर्य्यायः ॥
परूषकं २ नागदलोपमं ३
इति रत्नमाला ॥ परुषं ४
अल्पास्थि ५ परापरम् इति भा
वप्रकाशः नीलवर्ण्ण ७ ॥ ॥
गिरिपीलु ॥

८ पारावते ९ नीलनगले १० प
रुः ११ अस्त्रगुणः अपक्वं कटु
त्वं कफार्त्ति वात नाशित्वंच तदा
म फलगुणाः पित्तदत्वं उष्णत्वञ्च
तत पक्वफल गुणाः मधुरत्वं रु
चि प्रदत्वं पित्तशोषघ्नत्वं तर्पण
त्वंच इति राजनिर्घण्टः ॥ परू
षकं कषायाम्लमामं पित्तकरं
लघु तत पक्वं मधुरं पाकेशी
तं विष्टम्भि बृंहणं हृद्यं तदपि
दाहास्र ज्वरक्षय समीरहृत्
इति भावप्रकाशः ॥ परूष
कं क्ली परूषं इतिराजनिर्घण्टः
परेतः त्रि मृतः इत्यमरः भूता
न्तरे पुम् इतिमेदिनी ॥
परेतराट् ज् पुम् प्रेतराजः य
मः इत्यमरः ॥ ॥
परेद्यवि अव्य परस्मिन्नहनि प
रदिनम् इतिमुग्धबोधव्या
करणम् ॥ यथा ॥
परेद्यव्यद्य पूर्वेद्युरन्येद्युश्चा
पिचिन्तयन् वृद्धिक्षयौ मु
नीन्द्राणां प्रियम्भावुकताम
गात् इतिभट्टिः ॥ ॥
परेद्युः ज् अव्य परदिने इतिमु
ग्धबोध व्याकरणम् ॥
परेपे त्रि परागता आपो यत्र

इति सिद्धान्तकौमुदी ॥
परेष्टुका स्त्री बहुसूतिः बहुप्र
सूता गौः इत्यमरः ॥ परै
धितः त्रि औदासीन्येनपर पुष्टः
परेण सम्वर्द्धितः तत्पर्य्यायः ॥
परचितः १ परिस्कन्दः २ परजा
तः ३ इत्यमरः कोकिले पुं इ
तिशब्दमाला ॥ परोपका
रः पुम् परेषामुपकृतिः अस्य
सम्वन्धि हिते यथा पद्मे भवतो
भाति शुद्धधर्म्म प्रदोविधिः परो
पकरणादन्यत् सर्वं मत्सस्तते
बुधैः परोपकारिभिर्देवा स्वशा
ण्ण ऋषिभिः पुरा अद्भिःप्रे ॥
तो पकारः स्यात् किन्नलब्धं ॥
मया पुनः दधीचिना पुरा ॥
गीतः श्लोकश्च श्रूयते भुवि सम
र्वधर्म्म मयः सारः सर्वधर्म्मे
ष्वसम्मतः परोपकारः ॥
कर्त्तव्यः प्राणैःकण्ठगतैर
पि परोपकारजं पुण्यं न तत्स
क्रतु शतैरपि इति पाद्मोत्तर
खण्डे २२ अध्यायः ॥
परोवरीणः त्रि श्रेष्ठाश्रेष्ठयुक्तः
परोऽश्वावरोऽश्वात्र भवन्ति अवर
स्योत्वे निपात्यते इतिसिद्धान्तकौ
मुदी परोष्णी स्त्री तैलपायि
का इत्यमरः ॥

परोक्षं क्ली अप्रत्यक्षं असाक्षा
त् यथा परोक्षे कार्य्यहन्तारं प्र
त्यक्षे प्रियवादिनं वर्जयेत्तादृशं मि
त्रं विषकुम्भं पयोमुखं इतिचा
णक्य तद्विशिष्टे त्रि ॥ परोक्षः
पुं तपस्वी इतिशब्दमाला ॥
पर्कटः स्त्री प्लक्षवृक्षः इत्यमरः
पर्कटी टीकायांभरतः ॥ ॥
पर्कटी न पुं वृक्षविशेषः पाग
ड इतिभाषा तत्पर्य्यायः प्लक्षः
२ जटी ३ इत्यमरः कमण्डलत
रुः ४ इतिरत्नमाला कपीतनः
५ तीरी ६ सुपार्श्वः ७ कमण्डलुः
८ शृंगी ९ प्ररोहः १० शाखी ११
गर्द्दभाण्डः १२ पीतनः १३ दृढप्र
रोहः १४ प्लक्षकः १५ प्लवङ्गः
१६ महावलः १७ अस्य गुणाः क
टुत्वं कषायत्वं शिशिरत्वं रक्तदोषमू
र्छा भ्रम प्रलाप नाशित्वंच विशे
षतो फल प्लक्षस्यैते गुणाः ॥
इति राजनिर्घण्टः ॥ ॥
पर्ज्जनी स्त्री दारुहरिद्रा इत्यमरः
पर्ज्जन्यः पुम् इन्द्रः शब्दायमा
नमेघः इत्यमरः मेघशब्दः इति
विश्वः अगर्ज्जन्नपिमेघः इति ॥
भरतः यथा यज्ञाद्भवति पर्ज्ज
न्यः ॥ ॥ ॥

पर्ज्जन्यादन्नसम्भवः इत्यादि श्री
भगवद्गीता ॥ ॥
पर्जन्या स्त्री दारुहरिद्रा इतिरा
जनिर्घण्टः ॥ पर्ण त्वक् हरि
त्या इतिकविकल्पद्रुमः ॥ ॥
पर्णं क्ली पत्रं इत्यमरः ताम्बूलं ॥
यथा अनिधाय मुखे पर्णं पूगं खा
दयतेनरः मतिभ्रंशो दरिद्रः स्याद
न्ते न स्मरते हरिम् इतिराजनिर्घ
ण्टः ॥ ताम्बूलधारिलक्षणम्
यथा अनाहार्य्या ऽन्तशोसश्च हृद
भक्तिश्च पार्थिवे ताम्बूलधारी भव
ति नारीवा पथ्य तद्गुणा इति मात्
स्ये १८९ अध्यायः ॥ पर्णः ।
पुं पलाशवृक्षः इत्यमरः पर्ण
कारः पुम् राजजीवी वारुइ इति
भाषा इतिकेचित् ॥ ॥
पर्णकृच्छ्रः स्त्री पत्रकृच्छ्रव्रतं य
था पर्णोदुम्बर राजीव विल्वपत्र
कुशोदकैः प्रत्येकं प्रत्यहाभ्यस्तैः
पर्णकृच्छ्र उदाहृतः ॥ इति
॥ गरुडपुराणम् ॥ ॥
पर्णखण्डः पुं वनस्पतिः इति
शब्दचन्द्रिका ताम्बूलकोषश्च ॥
पर्णचोरकः पुं चोरकनाम ॥
गन्धद्रव्यः इतिराजनिर्घण्टः ॥
पर्णघ्नत् स्त्रि पत्रध्वंसकर्त्ता ॥
इति पर्णोपपदात् ॥ ॥



ध्वन्सयातो कर्त्तरि क्विप ॥
प्रत्यय निष्पन्नः ॥
पर्णनरः पुं पित्रादि शवास्थ्य
लाभेदाहार्थं तत् प्रतिनिधीभू
त परपलाश पत्ररचितोर्णान
न्तु वेष्टित यव पिष्ट लिप्त नराका
र पुत्तलकः यथा आश्वलायन
गृह्य परिशिष्टे अस्थिनाशेपला
शवृन्तानां त्रीणि षष्टिशतानि
पुरुष प्रतिकृतिं कृत्वा अशी
त्यर्द्धन्तु शिरसि ग्रीवायां दशयो
जयेत् उरसि त्रिंशतं दद्यात् वि
शतिं जठरे तथा बाहुभ्यां च श
तं दद्यात् दद्यादंगुलिभिर्दश ॥
द्वादशार्द्धं वृषणयो रष्टार्द्धं शिश्न
एव च ऊरुभ्यान्तु शतं दद्यात् त्रिं॥
शतं जानुजंघयोः पादाङ्गुलीषु
च दशापतत्प्रेतस्य लक्षणं ऊ॥
र्णासूत्रेण संवेष्ट्य यव पिष्टेन ले
पयेत् आदिपुराणे तदलाभे प॥
लाशेभ्योः पत्रैः कार्य्यः पुमानपि
शते त्रिभिस्तथा षष्ट्या शरपत्रै
विधानतः ॥ तदलाभे अ
स्थ्यलाभे अत्र पलाशपत्र श
रपत्रयो स्तुल्यत्वेनो पादानादा
श्वलायन सूत्रेपि प्रतिकृतौ
शर पत्रस्यला ॥ ॥

भः अत्राचाराध्यायेप्यलाभे शरप
त्रैः पुत्तलकं कृत्वा शिरः प्रभृ
तिषु पलाश पत्राणि देयानि
ततो वेष्टनं ऊर्णासूत्रेण लेपनं य
वपिष्टेनेति अशौचाभ्यन्तर दाहे
शेषाहेन शुद्धिः तदूर्द्ध्वं पर्णनर
दाहे तु त्रिरात्रं एवं पर्णनरं दग्ध्वा
त्रिरात्र मशुचि र्भवेदित्यादि पुरा
णात् यत्तु पार्श्वः पुत्रा श्चेदुपल
भेरन् तदस्थीनि कदाचन तद
लाभे पलाशस्य सम्भवेहि पुनः
क्रिया हियस्मात्तदलाभे अस्थ्ना
मप्राप्तौ पलाशस्य तत्कृत पु
त्तलस्य दाह क्रिया पुनरपि सम्भ
वे अस्थि लाभे पुनरपि अस्थि दाह
क्रिया विहिता तस्माद्यदि पुनर
स्थीनि प्राप्यन्ते तदा पुनर्दाह
त्रिरात्राशौचे कर्त्तव्ये न पुनः पिण्डदा
ने वक्ष्यमाण युक्तेः विस्नुः श्रियते
तु गते पर्णनरं दहादनग्निकः ॥
त्रिपक्षात्प्रमरे राजन्नैव पर्णनरं द
हेत् तदूर्द्ध्वं मष्टमीमाप्य दर्शावापि
दर्शावापि विचक्षणः दहेदि ॥
ति शेषः अस्यार्थः ॥
अशौचाभ्यन्तरे यदि पर्णनर
दाहं न कुर्य्यात्तदा मरणादिनादपि
पि त्रिपक्षानन्तरं कार्य्य इति ह
रिदास तर्काचार्य्याः यादव ॥

प्रदेशेप्येवं व्यवहारोपि ईदृशः
एव पर्णनरं दहेन्मेव विनादर्शे
कदाचन अस्थ्ना मलाभेदर्शे तु
ततः पर्णनरंदहेदिति दीपक
लिकायां स्मृत्यन्तरवचनात् दर्शाप
र्णान्ते दाहः दर्शी मित्यत्राष्टमी
मिति क्वचित् पाठः अत्राष्टमीकृ
त्या पितृकर्म्माणि कृत्स्नयत्न ॥
स्य माशस्योक्ते : इतिशुद्धितत्वे
पर्णभेदिनी स्त्री प्रियङ्गुः इतिरा
जनिर्घण्टः ॥ पर्णभोजनः ॥
पुं छागल इति शब्दरत्नावली
पत्रभक्षके त्रि पत्रभक्षणे स्त्री
पर्णमाचालः पुं कर्म्मरंगहृतः
इति शब्दमाला ॥ ॥
पर्णमृगः पुं मृगगणविशेषः
यथा वनौका हृतमार्जार हृत
मर्कटिकादयः एते पर्णमृगाः
प्रोक्ताः सुश्रुताद्ये महर्षिभिः ॥
वनौकोवा नरः हृत मार्जारो हृ
त्तविडालः हृतमर्कटिका रुषी
इति लोके एतेषां मांस गुणाः
स्मृताः पर्णमृगा वृष्या श्चक्षु
ष्याः शोषिणे हिताः श्वासा
र्शीः कासशमनाः सृष्ट मूत्र
पुरीषकाः इतिभावप्रकाशः ॥
पर्णलता स्त्री नागवल्ली इति राज

॥ निर्घण्टः ॥ ॥
पर्णवल्ली स्त्री पलाशील
ता इतिराजनिर्घण्टः ॥
पर्णशाला स्त्री मुनीनां पत्ररचि
तगृहं तत्पर्य्यायः उटजं २ इत्यम
रः पर्णोटजं ३ इतिशब्दरत्नाव
ली पर्णवती शाला पर्ण प्र
धाना शालावा इतिभरतः ॥
पर्णास्तिः पुं पद्म रत्नादिकोषः
नलगृह नलहुंगी इति भाषा
इति सिद्धान्तकौमुद्या मुणादि
वृत्तिः श्राके आभरणक्रिया
इति संक्षिप्तसारोणादिवृत्तिः
पर्णाशनः पुं मेघः इति शब्द
मालापर्णासः पुं तुलसी इ
त्यमरः पर्णिनी स्त्री माषपर्णी
इति रत्नमाला ॥ ॥
पर्णी न पुं वृक्षः इतिहेमचन्द्रः
पर्णोटजं क्ली पर्णशाला ॥
इति शब्दरत्नावली ॥ ॥
पर्द् उ. अपानोत् सर्गे इति
कविकल्पद्रुमः ॥ पर्द्दः ॥
पुं केशसमूहः इत्युणादिको
षः अपानोत् सर्गश्च पर्द्दनम्
क्ली अपानोत्सर्गः पाद् इति
भाषा इति हेमचन्द्रः ॥ पर्पम्
क्ली नवतृणं गृहं इत्युणादिको

कोषः ॥ खेनराज शाकटं इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
पर्पटः पुं वृत्तविशेषः क्षेतपा-
पड़ा इति वंगभाषा दवनपाप-
ड़ इति हिन्दीभाषा तत् पर्य्या-
यः त्रिषष्टिः २ तिक्तः ३ इति
रत्नमाला चरकः ४ रेणुः ५
त्वक्सारिः ६ वरकः ७ अरकः ८
शीतः ९ शीतप्रियः १० पांशुः ११
कल्पाङ्गः १२ कर्म्मकण्टकः १३
कृशशाखः १४ प्रगन्धः १५ सु-
तिक्तः १६ रक्तपुष्पकः १७ पि-
त्तारिः १८ कटुपत्रः १९ वक्रः २०
अस्य गुणाः शीतलत्वं तिक्तत्वं
पित्तश्लेष्मज्वररक्तदाहारुचि
ग्लानिमदभ्रमनाशित्वञ्च इ-
ति राजनिर्घण्टः ॥ पर्पटो वर-
तिक्तश्च स्मृतः पर्पटकश्च सः ॥
कथितः पांशुपर्य्यायस्तथा क-
वच नामकः ॥ पर्पटो हन्ति पि-
त्तास्रभ्रमतृष्णाकफज्वरान् सं-
ग्राही शीतलस्तिक्तो दाहनुद्वा-
तलो लघुः इति भावप्रकाशः ॥
पिष्टकभेदः पापर इति भाषा त-
स्य गुणाः लघुत्वं रूक्षत्वंच इति रा-
जवल्लभः धूमसी रचिता दिव्यह
सिद्धा लवणे र्युताः जीरकस्वर्जि-
कास्याश्च तनवःपचवेल्लिताः पर्प-
टा ॥

न्ते सहोङ्गार भृष्टाः परम रोच-
काः दीपनाः पाचना रूक्षा गुरवः
किंचिदीरिताः मोद्गाश्च तद्गुणाः श्रे-
ष्ठा विशेषात् लघवो हिताः चण-
कस्य गुणैर्युक्ताः पर्पटाश्चणको-
द्भवाः स्नेहे भ्रष्टास्तु ते सर्वे भवेयु-
र्धर्म्मगुणोः इति भावप्रकाशः
पर्पटद्रुमः पुम् कुम्भीवृक्षः इति
राज निर्घण्टः ॥ ॥ पर्पटी
स्त्री सौराष्ट्रमृत्तिका इति रत्न-
माला पिष्टकभेदः इत्युणादि-
कोषः उत्तरदेशे भव सुगन्धिद्र-
व्यं पपरीति प्रसिद्धं पद्मावतीति
च तत्पर्य्यायः रञ्जनी २ कृष्णा ३
जतुका ४ जननी ५ जनी ६ ज-
तुकृष्णा ७ संस्पर्शा ८ जतुकृत्
चक्रवर्त्तिनी ९ अस्या गुणाः तुवर-
त्वं तिक्तत्वं शिशिरत्वं वर्ण्यत्वं ल-
घुत्वं विषव्रणकण्डूकफपित्तास्र-
कुष्ठ नाशित्वञ्च इति भावप्र ॥
काशः ॥ पर्परीकः पुं सू-
र्य्यः इत्युणादिकोषः ॥
वह्निः इति त्रिकाण्डशेषः ॥
जलाशयः ॥ इति संक्षिप्तसारो-
णादिवृत्तिः ॥ पर्पिकः ॥
पुं स्त्री खञ्जः पर्पेण गच्छ-
तीति सिद्धान्तकौमुदी ॥

सर्व गतो इति कविकल्पद्रुमः
पर्य्यंकः पुं खट्वा पालंग इति
भाषा इत्यमरः तत्पर्य्यायः ॥
पर्य्यस्तिका २ परिकरः ३ अव-
सक्थिका ४ इति हेमचन्द्रः ॥
पर्य्यकपादिका स्त्री कोलशि-
म्बी इति राजनिर्घण्टः ॥ ॥
पर्य्यंकबन्धनं क्ली वस्त्रादिना
पृष्ठजानुजङ्घाबन्धने फाँड्वा-
धा इति भाषा यथा पादप्रसा-
रणेऽस्थाये तथा पर्य्यंकबन्धन्न-
ने इत्ययमय गणनाथो हरिभ-
क्तिविलासः पर्य्यटनं क्ली सर्व-
तोभावेनाटने पुनःपुनर्गमने
भ्रमणम् तत्पर्य्यायः व्रज्या २
अटाट्या ३ इत्यमरः पर्य्यनुयो-
गः पुं जिज्ञासा इति हलायुधः
पर्य्यन्तः पुम् शेषसीमा इति
दुर्गादासः ॥ पर्य्यन्तभूः ॥
स्त्री नदी नगर पर्वतादेरुपा-
न्तभूमिः तत्पर्य्यायः परिस-
रः २ इत्यमरः ॥ ॥
पर्य्यन्तिका स्त्री गुणभ्रंशः इ-
ति हारावली ॥ ॥
पर्य्यण्यः पुम् इन्द्रः शाब्दा-
यमानमेघः मेघशब्दः ॥
इत्युणादिकोषः ॥

पर्य्ययः पुं क्रमोल्लङ्घने व्यतिक्रमः
शास्त्रतो लोकव्यवहाराच्च मार्य्यस्या-
र्थस्य परित्यागः तत् पर्य्यायः ॥
अतिपातः २ उपात्ययः ३ इत्यमरभ-
रतौ विपर्य्ययः ४ अभ्ययः ५ अ-
तिपतने ६ व्यत्ययः ७ अतिक्रमः ८
इति शब्दरत्नावली पर्य्ययनं क्ली ॥
अश्वसज्जा जिन् इति भाषा इति ॥
शब्दमाला पर्य्यवस्था स्त्री विरो-
धने इत्यमरः पर्य्यवस्थाता त्रि
पर्य्यवस्थाकर्त्ता विरोधी इति ह ॥
लायुधः पर्य्यवस्थाने क्ली विरो-
धः इति जटाधरः सर्वतोभावेना-
वस्थितिश्च पर्य्यस्तः त्रि पतितः
हतः इति मेदिनी ॥ ॥
पर्य्यस्तिका स्त्री खट्वा इति हेमच-
न्द्रः पर्य्याणं क्ली अश्वपल्ययनं जि-
न् इति भाषा इति हेमचन्द्रः ॥
पर्य्याप्तं क्ली यथेष्ट तृप्तिः शा-
क्तिः निवारणं इति मेदिनी ॥
प्राप्तौ त्रि पर्य्याप्तिः स्त्री परि-
त्राणम् मारणाद्य तस्य निवार-
णं इत्यमरभरतौ प्रकाशः ॥
प्राप्तिः इति शब्दरत्नावली ॥
स्वरूपसम्बन्धविशेषः सच ॥
सर्वेषामेव पदार्थानां विशिष्ट-
बुद्धि नियामकः पदार्थभेदेन ॥

नाना यथा पर्य्यामिस्थायमेकोघ
ट इमौ द्वौ इत्यादि प्रतीति सा।
त्विकः स्वरूपसम्बन्धविशेषः।
इतिदीधितिः समवायेन गुणे
गुणस्यासत्वेपि चत्वारो गुणा इ
त्यादि प्रतीत्या गुणादिषु संख्या।
दिमत्व नियामकोऽपिताहशसम्ब
न्धः इति सामान्याभावे जगदीशः
द्वितीयव्युत्पत्तिवादे गदाधर।
भट्टाचार्य्यश्च ॥ ॥
पर्य्यायः पुं पर्य्ययनं क्रमः तत्
पर्य्यायः आनुपूर्व्वी २ आवृत् ३
परिपाटी ४ अनुक्रमः ५ क्रम
ः आनुपूर्व्व्यं ६ आनुपूर्व्वं ७ आ।
नुपूर्व्वकं ८ परिपाटिः ९ इति
भरतादयः प्रकारः अवसरः ॥
इति मेदिनी निर्म्माणे द्रव्यधर्म्मः
इति हेमचन्द्रः क्रमेणैकार्थवा।
चकाः शब्दाः पर्य्यायाः इति।
विजयरक्षितः सम्पर्कविशेषः
येन सह यत् सम्पर्कः सम्बन्धः
स्तेन सह तत् पर्य्यायः यथा समा
ने कूलभावेच दानादान तथैव
च तयो र्द्वेश समानेहि पर्य्या
येचप्रचक्ष्यते इति ॥
कुलदीपिका पर्य्या
यशयने क्ली प्रहरिकादीनोक्र
मेणशयने तत्पर्य्यायः उप ॥
शायः २ विशायः ३ इत्यमरः।
भरतौ ॥ पर्य्यासः पुम्
पतने हनने इति पर्य्यन्ता।
शब्दार्थदर्शनात् ॥
पर्य्युदंचनं क्ली ऋणम् इत्यमरः
पर्य्युदस्तः त्रि सपर्य्युदासविशिष्टः
विध्यन्वयि भेदात्मक नञर्थ यु
क्तः यथा यद्यपि पर्य्युदस्त
आदिषु श्राद्धादि करणे विधेर
दासीन्यात्फलं नवाप्रत्यवाय इ
ति सिद्धान्तः इतिमलमासतत्वे ॥
पर्य्युदासः पुं परि सर्व्वतोभावेन
उदास्यते विधि यत्रसः इतिव्यु।
त्पत्तिः तस्यलक्षणं सामान्य ॥
शास्त्र प्राप्त निषेधस्यैव पर्य्युदा
सत्वे इतिश्राद्धविवेकः अपिच
प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽ
प्रधानता पर्य्युदासः सविज्ञेयो
यत्रोत्तर पदेन नञ्च इतिमल।
मासतत्वे अस्योदाहरणम् ॥
अमावस्यायां पितृभ्यो दद्यात् ॥
रात्रौश्राद्धं नकुर्वीत अत्रश्राद्ध
करणे रात्रेः सपर्य्युदासः ॥
पर्य्युषितम् त्रि व्युष्टे वासि इ
ति भाषा तस्याभक्ष्यनीयत्वं ॥
यथा भक्तं पर्य्युषितं नोच्छिष्टं ॥

वि
उदक्यास्पृष्टं संघुष्टं पर्य्या ॥
पर्य्यान्नंच वर्ज्जयेत् इतिगरुड
पुराणे यातयामंगतरसं पू
तिपर्य्युषितंचयत् उच्छिष्टम
पिचामेध्यं भोजनंतामसप्रियं
इति भगवद्गीता ॥ तस्य भ।
रस्यतु जाह्नवी पादोदके भगवतो
द्वादशाब्दफलप्रदे तन्नित्यतावः
गरुड पुराणे जले च येषां तुलसी
विमिश्रिते पादोदके चक्रशिला।
समुद्भवे नित्यं त्रिसन्ध्यं स्रवते न।
गात्रे त्वगन्तेषु धर्म्म वहिष्कृतानः
गः ॥ अथ श्रीचरणोदक पान
माहात्म्यं पाद्मे गौतमाम्बरीष स
म्वादे हरेः स्नानावशेषं यत्तु जलं य
त्सोदरे स्थिते अम्बरीष प्रणम्य॥
स्यैः पादपांशुः प्रदत्तो तत्रैव दे
वहूत विकुण्डल संवादे येपिब
न्ति नित्यं शालग्राम शिला जले
पंचगव्य सहस्रैस्तु सेवितैः किं
प्रयोजनं कोटितीर्थ सहस्रैस्तु।
सेवितैः किं प्रयोजनं नित्यं यदि पि
वेत् पुण्यं शालग्राम शिला जले ॥
शालग्राम शिलातोयं यः पिवेद्बिन्दु
मात्रकं मातुः स्तन्यं पुनर्नैव स पि
वेन्मुक्तिभाग् नरः विष्णु दहन्ति
नरकान् सर्वान् गर्भकारांश्च दा।
रुणं पीतं येन सदा नित्यं शा।
लग्राम शिला जलम् तत्रैव श्री
यम धूम्रकेतु सं ॥

वादे शालग्राम शिलातोये ॥
विन्दुमात्रे तु यः पिवेत् सर्वपापैः
प्रमुच्येत मुक्तिमार्गे कृतोद्यमः
तत्रैव पुलस्त्य भगीरथ संवादे ॥
पादोदकस्य माहात्म्यं भगीरथ।
ददामि ते पावनं सर्वतीर्थेभ्यो ह
त्याकोटिविनाशने ॥ धृते शिर
सि पीते च सर्वास्तुष्यन्ति देवताः
प्रायश्चित्तं तु पापानां कलौ पा।
दोदकं हरेः विष्णुचिभिःसारस्व
तेतोये समाहे मत्तनामिदं स्वयः
पुनाति गांगेयं दर्शनादेव यामु
नं पुनन्त्येतानि तोयानि स्नानद
र्शनकीर्त्तनैः पुनाति स्मरणादे
कलौ पादोदकं हरेः अर्च्चितैः ॥
कोटिभिर्लिंगै नित्यं यत् क्रियते।
फलं तत्फलं शतसाहस्रं पीतैः
पादोदकैर्हरेः अमुचिर्वाडवश्चा।
पि महापातक संयुतः स्पृष्ट्वा पा।
दोदकं विष्णोः सद्यः शुद्ध्यति मानवः
पापकोटि युतो यस्तु मृत्युःका।
ले शिरे मुखे देहे पादोदकं यस्य।
न प्रयाति यमालयम् नदानेन।
हविर्येषां स्वाध्यायो न सदार्च्च।
ने तेपि पादोदकं पीत्वा प्रयान्ति
परमां गतिम् विशाखा स्नात।
संयुक्ता वैशाखी किं करिष्यति
पिण्डारके महातीर्थे ॥

उज्जयिन्यां भगीरथ माघमासे
प्रयागे तु स्नाने वै किं करिष्यति
प्रयागे सततं तस्य तस्य यस्य पा
दोदके हरेः कार्त्तिके कार्त्तिकी।
योगे किं करिष्यति पुष्करे नित्य
न्तु पुष्करं तस्य यस्य पादोदकं हरेः
प्रबोध वासरे प्राप्ते मथुरायां वनः
स्य किं नित्यं च यामुने स्नाने यस्य
पादोदके हरेः काश्यां पुनरवाहि
न्या गंगायां तु मृतस्य किं यस्य।
पादोदके विष्णो मुखे चैवावति।
ष्ठते विष्णु हित्वा पादोदकं वि।
ष्णो येन्य तीर्थानि गच्छन्ति अ
नर्घ्य रत्नमुत्सृज्य लोष्टं वाञ्छन्ति
दुर्म्मतिः कुरुक्षेत्रसमो देशो विंदु
पादोदके मतः यत्रैव ज्ञातये पु।
ण्यं नित्यं भवति तद्गृहे गयापि
ण्ड समं पुण्यं पुत्राणामपि जाय
ते पादोदकेन देवस्य ये कुर्वन्ति पि
तृतर्पणं नास्ति तेषां भयं तस्य।
प्रेतजन्म न दारिद्र्यं न रोगस्य भयं
चैव नास्ति विद्वत्कृतं भयं ॥
तत्स्नानैव दोषाता श्वापदोस्य
भयं नहि गृहाः पीडां न कुर्व।
न्ति वैरा न शत्रु निशाचराः ॥
किं तस्य तीर्थ गमने देवर्षी ॥
शास्त्रदर्शने यस्य पादोदकं
मूर्द्ध्नि शालग्राम शि ॥
॥ ॥ ॥

लोद्भवं प्रीतो भवति मार्त्तण्डः
प्रीतो भवति केशवः ब्रह्मा भवति
सुप्रीतः प्रीतो भवति शंकरः पा
दोदकस्य माहात्म्यं यः पठेत् केश
वाग्रतः स याति परमं स्थानं यत्र दे
वो जनार्दनः ॥ ब्रह्माण्ड पुराणे ॥
श्रीब्रह्म नारद सम्वादे प्रायश्चित्ते य
दि प्राप्ते कृच्छ्रे वा तप्तमर्षणे सो।
पि पादोदकं पीत्वा शुद्धिं प्राप्नोति त
त्क्षणात् अशौचे नैव विधेत सूत
के मृतके पि च येषां पादके मूर्ध्नि।
प्राशने ये प्रकुर्वन्ते अन्तकाले पि य
स्येह दीयते पादयोर्जलं सोपि सङ्ग
तिं प्राप्नोति सदाचारैर्वहिष्कृतः अ
पेये पिवते यस्तु भुंक्ते यश्चाप्यभोज
नं अगम्यागमनाये वै पापचारा
श्च ये नराः ते पि पूज्या भवन्त्याशु।
सद्यः पादाम्बु सेवनात् किं च अ
विज्ञेय दत्ते स्यात् पानीये चापि पा
पितो भुक्त्वा पीत्वा विशुद्धः स्यात्
पीत्वा पादोदके हरेः तप्तकृच्छ्रा
त् पञ्च गव्यात् महा कृच्छ्रा ॥
दि शिष्यते चान्द्रायणात् पादः
कृच्छ्रात् पराका दपि सुव्रत ॥
काय शुद्धिर्भवेदाशु पीत्वा पादो
कं हरेः ॥ अगुरुं कुंकुमं चा।
पि कर्पूरं चानुलेपनम् ॥
विष्णु पादाम्बु संलग्नं तद्वे ॥

पावनपावने हरिपूतन्तु य
न्नोये विस्नुना प्रभविस्नुना त।
द्धेपाप हरेंपुत्र किंपुनः पाद।
योर्जले यतदर्थ्यं महेपुत्र शिर
सा विस्नुनत् परं धारयामि
पिवा स्य माहात्म्य विदितेम।
म प्रियत्वम ग्रजःपुत्र तदर्थं ग।
दितेमया रहस्येमे त्वनहंस्य न
वक्तव्यं कदाचन धारयत्व महा
मूर्द्धि माशानेकुरुनित्यशः जन्म
म्रत्युजराङुःखैः मोत्स्यास्यसि।
पुत्रक विस्नुधर्म्मान्तरे स्यः।
फलप्रदेपुण्ये सर्वपापविना।
शने सर्वमंगलमंगल्ये सर्वङुः।
खविनाशने ङुःस्वप्ननाशनेपु।
ण्ये विस्नुपादोदकेशुभे सर्वो।
पद्रव हन्तारे सर्वव्याधिविना।
शने सर्वात पातप्रशमने स।
र्वतापनिवारणे सर्वकल्याणस्
खदे सर्वकामफलप्रदे सर्व।
सिद्धि प्रदेपरे सर्वधर्म्मविव।
र्द्धनम् सर्वशत्रुप्रशमने सर्व
भोगप्रदायके सर्व तीर्थस्यफ।
लदे मूर्द्धिपादाम्बु धारणम्॥
प्रयागस्य प्रभासस्य पुष्करस्य
चसे वने द्रष्टदकस्य तीर्थस्य।
श्राद्धान्तो लभते फलं चक्रतीर्थे
फले याहक् ताहक पादाम्बुधा
रणात् सरस्वत्या गयायाञ्च।

गवा यत् प्राप्नुयात् फलं तत्।
फलं लभते श्रेष्ठं मूर्द्धि पादोद
धारणात् स्कान्दे पादोदकस्य
माहात्म्य देवोजानाति शंकरः
विस्नुपाद च्युता गंगा शिरसायेन
धारिता स्थानं नैवास्ति पापस्य।
देहिनो देहमध्यतः सवाह्याभ्य
न्तरं यस्य व्याप्तंपादोदकेनवै॥
पादोदं विस्नुनैवेद्य मुदरे यस्य
तिष्टति नाश्रये लभतेपापं स्व
यमेव विनश्यति महापापत्र
ह ग्रस्तो व्याधिरोग शतैरपि॥
हरेः पादोदकं पीत्वा मुच्यतेना
त्रसंशयः शिरसा तिष्टते येषां।
नित्यं पादोदकं दकं हरेः किंक
रिष्यन्तितेलोके तीर्थकोटिम।
नोरथैः अयमेव परोधर्म्म इ
दमेव परं तीर्थं विस्नुपादाम्बुय
त पिवेत् तत्रैव शिवोमा सम्वा।
दे विलयं योतिपापानि पीते
पादोदके हरेः किंपुनर्विस्नुपा
दोदं शालग्राम शिलाप्लुतं॥
विशेषेण हरेत्पापं ब्रह्महत्या
दिकं प्रिये पीते पादोदके वि
स्नो र्यदिमार्गो विमुच्यते हत्वा।
यमभटान् सर्वान् वैस्नवं लोक
माप्नुयात् तत्रैव शिव कार्त्ति।
केय सम्वादे शालग्राम शिला
माहात्म्ये छिन्नस्तेन महासेन॥

गर्भवासः सदारुणः पीतंये
न सदा विस्नोः शालग्राम शिला
जले येपिवन्ति नरानित्यं शा
लग्रामशिलाजलं पंचगव्यसह
स्रैस्तु प्राशितैः किंप्रयोजनं प्रा
यश्चित्ते सपुत पन्ने किंदानैःकि
मुपोषणैः चान्द्रायनैश्च तीर्थै
श्च पीत्वापादोदकं शुचिः हृह
न्नारदीये लव्धकोपाख्यानारम्भे
हरिपादोदकेयस्तु क्षणमात्रं।
च धारयेत् सस्नातः सर्वतीर्थे।
विस्नोः प्रियभरस्तथा अकाल।
म्रत्युशमने सर्वव्याधिविनाशने
सर्वङुःखोपशमने हरिपादोद।
केशुभे तत्रैवतङुपाख्यानान्ते।
हरिपादोदकस्पर्शात् लुव्धको।
वीतकल्मषः दिव्यंविमानमा
रुह्य मुनिमेनमथाब्रवीत् हरि
पादोदकंयस्मान् मयित्वेतिम
हामुने प्रापितोस्मि त्वयातस्मा
त् तद्विस्नोः परमं पदं हरिभ।
क्ति सधोदये पादे पूर्वे किल॥
स्पृष्ट्वा गंगाप्लुत् स्नातैमो तदा
विस्नोःसपस्तु तत्संगि पादोद
कप्यपीङ्यते तोपत्रयानलो।
घोस्नो नशाम्येत् सकलाव्धि॥
भिः क्रतेपयाम्य तिस्रोऽस्य
न श्रीमद्विस्नुपदोद्भुता अघाह्ला
भेघकवचम्

भवाग्नि स्तम्भनौषधं सर्वांगेः
सर्वथा धार्य्यं पापेशुचिसदःस
दा अमरत्वावहेनित्यं विस्नुपा।
दाम्बुयः पिवेत् सपिवत्यमृतं।
नित्यं मासेमासे तदेवताः माहा
त्म्य मियदित्यस्य योवक्ता सोपि
निर्भयः नत्वनर्थ्येमणो मूल्यंका।
लयत्र कलयत्रेव मस्मृते अमत्रा
पि सव्रह्मचारी सव्रती आश्रमी।
च सदाशुचिः विस्नुपादोदकंयस्
मुखेशिरसि विग्रहे जन्मप्रभृति
पापानां प्रायश्चित्तं यदीच्छति॥
शालग्रामशिलावारि पापहारि
निषेव्यतां अतएव तेजोऽविण।
पंचरात्रे श्रीब्रह्मोक्ते पीठ मणा।
लाउदके पृथगादाय पुत्रक सिं
चयेन्मूर्द्धि भक्तानां सर्वतीर्थम।
येहित दिति पादोदकस्यमाहात्म्य
विधाने सर्वशास्त्रतः लेखितेश
क्नुयात् कोटि सिन्धुर्मीनगणा य।
त्रपि विशेष तस्यपादोदं तुलसी
दलसे पुतं शंखे कृत्वा वैस्नवेभ्यो
दत्वाभागवत् पिवेत् स्वयं अथ
शंख कृतपादोदक माहात्म्यस्का
न्दे ब्रह्म नारद सम्वादे कृत्वापा।
दोदकं शंखे वैस्नवानां महात्म।
नां योदद्यात् तुलसीमिश्रं चान्द्रा
यणं शतंलभेत् रटीता कृत्स

पादाम्बुशंखेकृत्वात् वैष्णवः। योवहेत् शिरसानित्यं स मुनि स्तापसोत्तमः॥ पाद्मे देवहूत विकुण्डल संवादे शालग्रामशिला तोयं यदिशंखभृतं पिवेत् ह॥ त्याकोटिविनाशोत्त कुरुतेनात्र। संशयः॥ अगस्त्यसंहितायाञ्च शालग्रामशिलातोयं तुलसीदल। वासितं ये पिवन्ति पुनस्तेषां स्त। न्यपानेन विद्यते॥ श्रीविष्णोर्वैष्ण वानाञ्च पावनं चरणोदकं स वितीर्थ मयं पीत्वा कुर्य्यादाच मनेनहि॥ तदुक्तं स्कान्दे श्रीशि वेन विष्णोः पादोदकं पीत्वा। पश्चाद् शुचिशंकया आचाम तिच योमोहाद् ब्रह्महा स निगद्य ते॥ अपितु भगवान् पवित्रं भ गवत् पादौ पवित्रं भगवत् पा। दोदकं पवित्रं न तत्पाने आ। चमनीयं यथा हि सोम इति॥ सौपर्णेच विष्णुपादोदकस्य पी त्वा भक्तपादोदकं तथा य आ चामति संमोहात् ब्रह्महा सनि। गद्यते इति श्रीहरिभक्तिवि॥ लासः॥ पाद्यं क्ली पा॥ पाद्य वारि पादमक्षालनार्थज लम् इत्यमरः। तत् पात्र॥ लवणम्॥

यथा पादावनेजनजल ग्रहणं पात्रमष्टने लौहजे वासरे मतं। हैमंराजतमेववा ताम्रमचरा। णमपि वाथवेनं मतामिति इति वैखानसग्रन्थः षडङ्गुले मवि। स्तार मुत्सेधं चतुरङ्गुलं ऽष्टमे। कांगलं कुर्य्यात् आसिकोचतुरङ्गुलो दृष्टेपादसमायुक्ते चतुरङ्गुलमा नतः पाद्यपात्रमिति ख्यातं स र्वदेवमहाजने इति सिद्धान्त। शेखरः॥ पानं क्ली पीतिः द्रवद्रव्यस्य गलाधः॥ करणे भाजने रक्षणे इतिमे दिनी॥ पानः पुम्॥ शौण्डिकः इतिजटाधरः॥ निःश्वासः इतिहेमचन्द्रः॥ पानगोष्ठिका स्त्री यत्रसम्भा। य पीयते मद्यपानचक्रे तत् पर्य्यायः॥ आपाने २ इत्य॥ मरः॥ चक्रानुष्ठानं यथा पुष्पा। मारहस्य धृते चक्राकारेण पं क्त्याकारेण वाभिन्न भिन्नासने। स्वशक्ति युक्तः शेत् पुग्म युग्म। क्रमेण पद्मासनेनापविश्य॥ सामयिक ललाटे चन्दनं दत्वा। शिवशक्तिबुद्ध्या पुष्पंच दद्यात् ततोयदि गुरुस्तत्र तिष्ठति तदा दे। गन्धादिना तं पूजयित्वा तत् पात्रे।

पुष्पं दत्वा शुद्धिसहिते तस्मै स मर्प्य ग्राणमेत् गुरो रभावे वत्त। पात्रे जलेतियेत् ततः शक्तिपा त्रे शुद्धिसहिते शक्तै दत्वासाम। यिकेभ्यो ऽपिन्यष्टानुक्रमेण। वीरपात्रात् परामृतं शुद्धिसहिते दद्यात् ततः सामको ऽपिभक्त्या हस्तद्वयेन संगृह्य तत्पात्रं मू लमन्त्रमष्टधा जप्त्वा पूर्ववदान न्दे भैरवं भैरवींच सन्तर्प्य गुरू न् देवतांच सन्तर्पयेत् स्वस्वक। ल्पोक्तविधिना भूतशुद्धिं कुर्य्या। त् ततश्चक्रनायकस्तैः सहपात्र वन्दनं कुर्य्यात् यथा श्रीमद्भैरव। शेखर मविलसच्चन्द्रमृतनस्नावि ते तेत्राधीश्वर योगिनी सुरगणैः सिद्धैः समाराधिते आनन्दार्णव के महात्मक मिदं साक्षात्रिखण्डामृतं वन्दे श्रीप्रथमं कराम्बुज गतं पात्रं विशुद्धिप्रदे इत्यभिम। न्त्रवामहस्तेन पात्रमुत्तोल्य अमो मवन्दनं कृत्वा इक्कामीति गुरु। शक्तिसाधकेश्वराणामाज्ञां इक्की यात् तेनुयक्ष्वेति ब्रूयुः ततोमू। लाधारात् कुण्डलिनीम् इष्टदेव। ता स्वरूपां आजिह्वालो विभा व्य गुरुपादुकां स्मृत्वा शिवोऽहम् मिति विचिन्त्य हस्ताभ्यां पात्रं धृ त्वा मूलमुच्चारन् कुण्डलिनी शरवे

देवींतर्पयेत् पतङ्क मुदयाक रपद्मस्या कृत्वा मन्त्रत्रं स्मरेत्। गुरुपदे देवींवलां चिन्मयीं पश्या त् वारत्रये सदासवपूर्णे दीपे धृ। तैकज्वलैः पुष्पादिष्वभिमन्त्रिते च निविडे सन्मादक ध्वंसके ये। सचिन्त्य पिवन्ति यान्ति खलुतेभु। क्तिंच मुक्तिं परां तत्रान्तरेचसि। न्दूर तिलकं लाले पानौच मदिरा सवे कृत्वा पिवेद् गुरुंध्यायेल्ल। याद्देवींच चिन्मयीं ततः पात्रमाधा रोपरि संस्थाप्य पुनस्तेन क्रमेण परामृतं गृहीत्वा पात्रवन्दनं कुर्य्या त् यथा मद्येमीन रसावहे यदित यादत्तंच पेयादिभिः किंचिच्चं च लवर्क पंकजदृशा तस्मै समावेदि ते वामे स्वात्म विशुद्धि शुद्धि क। मले पाणौ विधायात्मके वन्दे। पात्रमहं द्वितीय मधुनानन्दैक। सम्वर्द्धने ततः पूर्ववत् पात्रे स्वी। कृत्य अमृत् पात्रवन्दनं कुर्य्यात् यथा सर्वास्वायकला कलाप कलिते कौतूहलद्योतने चन्द्रो। पेन्द्रमहेन्द्र शम्भु वरुण ब्रह्मा दिभिः सेविते ध्याते देवगणैः परं मुनिगणैर्मोक्षार्थिभिः स। वेदा वन्दे पात्रमहं तृतीय मधु। ना चात्मावबोध क्षमं तृतीय।

पञ्चाभिवन्दनं कृत्वा न्यत्पात्र-
वन्दनं कुर्य्यात् यथा हैमेमी
नरसावहे हरिहरब्रह्मादिभिः
सेविते मुद्रा मेघकन धर्म्मक ॥
स्मिनिरते स्तारा स्रुतिकाश्रये
आचार्य्याष्टक सिद्धि भैरव क
लाम्ना सेन संशोधिते पायात् ॥
पञ्चमकारतत्त्व सहिते पात्रे च-
तुर्थे नमः इति चतुर्थ पात्र वन्द-
नं कृत्वान्यत् पात्रवन्दनं कुर्य्या
यथा आधारे भुजगाधिराज-
वलये पात्रे मही मण्डलमये
सप्तसमुद्र वारिपिहिते चाष्टौ
च दिग्दन्तिनः सोऽहञ्चैव वि-
भावयन् प्रतिदिनं नारायणो रक्षि-
तोऽप्यादित्यप्रमुखैः सुरासुरग-
णैराज्ञा करैः किङ्करैः ॥ इति-
पञ्चमपात्रं स्वीकुर्य्यात् तथोया
वहुष्पादिकं नचलतितावत्
पानादिकं कार्य्यं अथास्यक्रमा-
नं यथा रुद्रयामले साधकेभ्य-
श्च शक्तिभ्यो दद्यात्रिर्मासचन्द्रा-
नं सामयिकैः समं कुर्य्याद्देवि
पाणादिभक्षणं अन्यत्रापि नि-
वि शेषाद्भक्तरूपेण पञ्चपाकारेण
वायथा शक्तिभक्तो वसेदापि ३
ग्मसुगमविधानतः शिव शक्ति
पियासर्व्वं चक्रमध्ये समर्पयेत् तत्रा

नेव च ततः शुष्कं समादाय गुरोः
पात्रे निवेदयेत् गुरुवेद निवे-
द्याद्य शक्तैर्दत्वा स्वयंहरेत् ॥
भावचूडामणौ च सान्नाय्यदि-
गुरुर्नस्यात्तदा तोये विसर्जयेत्
एतत्सर्वं कलौ तत्र परेदिव्य ॥
वीरमयो भावः कलौ नास्तिक-
दाचन इति कालीविलास वचना-
त् पानपात्रं क्ली मद्यपानपात्रं
मद्यपानस्य भाजनं तत्पर्य्यायः
चषकः १ सरकः २ अनुतर्ष-
णं ३ इत्यमरः ॥ द्वयं द्वयं मद्य
पानपात्रे शेषद्वयं मद्यपरिवे ॥
शनपात्रे इति भरतः चषकं ५
अनुतर्षः ६ पारी ७ पारीकं ८ ॥
इति शब्दरत्नावली ॥ अथ पा-
नपात्र परिमाणादि यथा कु-
लसारे नयनाग्नि वाणसंख्य क-
र्षस्त्र परमेश्वरि देवपात्रं प्रकर्त्त-
व्यं निस्तको कुलसाधने इत्येष्या-
पिकपात्रन्तु नकर्त्तव्यं च साध-
कैः कर्षलौकिक तोलक मिश्र-
ष्टैः तडके कुलोत्तमे गुञ्जा हा-
दश माषः स्यात्तदष्टौ कर्षउच्य-
ते अधोत्तररतन्त्रे अनुक्तो प्ररतो ॥
व्यला शङ्कामीति स्वयंवदेत् ॥
जयरत्न्यभ्य उक्तातो गुरुणा-
वा कुलेनकैः ॥ ॥

गृह्णीयाच्च स्वयं सिद्धो वहुपा-
ससनः सुधीः कुलार्णवे प-
कासने निविष्टा ये मञ्जीरं श्चैव
भाजने एकपात्रे पिवेद्द्रव्यं नेया-
न्ति नरकाधमे एकपात्र मितिस-
र्वे मिलित्वा नैकपात्रे पिवेत्ननु
प्रतिवारे द्रव्यपाने भिन्नभिन्नपा-
त्रे कार्य्यं आनन्दस्थान लक्षणा-
पत्तेः सम्प्रदाय विरोधाच्च ॥
पानवणिक् पुं शौण्डिकः
इति हेमचन्द्रः ॥ पानभा-
क्ली पानपात्रे तत्पर्य्यायः ॥
कंसः १ इत्यमरः काम्यते असौ
कंसः कमुकङ् स्थूहि नाम्नीति
सः दन्त्यान्तः सार्ध्येचेकांसेच
स्वर्णरजतादि निर्म्मिते पात्रमा-
त्रेऽपि कंसः कंसः स्यात्तैजसे-
द्रव्ये पानपात्रेऽपि कांस्यवदि-
ति शाश्वतः पात्रान्तरे पानपात्रे
कांस्ये कंसे चतैजसे इति भ ॥
सः पीयते पानं मद्यादि ॥
तस्य भाजनम् ॥ पानता-
जनं इति भरतः ॥
पानसं क्ली पनसतव मद्यम्
इति जटाधरः ॥
पनस सम्बन्धिनि त्रि ॥
पानात्ययः पुं मदात्ययरोगः
इति राजनिर्घण्टः ॥

पानिलं क्ली पानपात्रे इति श-
ब्दचन्द्रिका ॥ पानीयं क्ली
जलं इत्यमरः पातव्ये रक्षणीये च
त्रि ॥ जलदान विधि यथा यम
उवाच एतन्नेकथितं विप्र मम लो-
केऽत्र दुर्लभं पानीयं सततं तस्मा-
द्दातव्यं सुखमिच्छता अतोऽर्हे कार-
येत्कूपं वापीं वा वरुपल्वलं
वरुलोकाकुले देशे सर्वसत्वोप-
जीवितं इत्यग्निपुराणे ॥ तद्दा-
नान्तरे पात्स्यमज्ञो यथा पानी-
ये प्राणिनः प्राणाः पानीयं पा-
वनं महत् पानीयस्य प्रदानेन तृ-
प्तिर्भवति शाश्वती इति स्मृतिः ॥
तत्पर्य्यायः पानीयजीवन वा-
नामृत शुष्करामभः पाथोऽम्बुशा-
म्बर पयः सलिलोदकानि आपः
कवाकुण कवन्ध जलानि नीरं-
कीलाल वारि कमलानि विषा
गैसी च भुवने दहनारा निर्वाणो
यं सर्वतोमुखे वीरं वनरसं ॥
निम्नगं मेघप्रसवोरसः ॥
अस्य साधारण गुणाः पानीयं
मधुरं हिमं च रुचिदं तृप्सावि-
शोषा पहं मोह भ्रान्ति मपाक-
रोति कुरुते भुक्तान्न पक्तिं प-
रो निद्रालस्यनिरासनम् ॥
विषहरं आतार्त्तिसन्तर्पणं ॥

स्तगांधी वलवीर्य्य वृद्धिजन।
ने नष्टांग तुष्टिप्रदे ॥ सद्यो
वृष्यन्तु भूमिस्थं कलुषं दोष
दायकं चिरस्थितं लघुस्वच्छ
पथ्यन्त्वाडु सुखावहं ॥ देश
भूमि विशेष जलगुणाः जांते।
तान्म रुदस्वलवेव सलिलं वाता।
दिदोषप्रदं देशाज्जाड्य करंच।
दुर्ज्जरतरं दोषावहं प्रस्रवात् वा
तत्रंच शिलाशिरोत्थ ममलं प
थ्यलघु स्वादुकं श्रेष्ठं श्यामम्ट।
द् त्रिदोष शमनं सर्वमयघ्नंज।
लं इतिराजनिर्घण्टः ॥
पिच्छिलं क्रमिलं क्लिन्नं पर्ण।
शैवालकर्दमैः विवर्णं विरसं
सान्द्रं दुर्गन्धिनहितं जलं ॥
चन्द्रार्क करसंजुष्टं वायुनास्फा
लितमुरुः सर्वतो परिग्रहादि।
समं पौरन्दरेण तत् तस्मान्गु
ण वृद्धिष्ठं शैलप्रस्रवणोद्भवं
लेखनं दीपनं रूक्षं किंचिद्वात।
प्रकोपनं ॥ इति ॥
राजनिर्घण्टः वल्लभः
पानीयनकुलः पुं उद्रः उद्वि।
डाल इति भाषा यथा उद्रस्तु
जलमार्जारः पानीय नकुलो
वसी ॥ इति हेमचन्द्रः ॥
॥ ३३ ॥

पानीयपृष्ठजः पुं कुम्भी पाना
इति भाषा इतिरत्नमाला ॥
पानीयफलं स्त्री मखान्नं माखा
ना इति भाषा इतिभावप्रकाशः
पानीयमूलकं स्त्री सोमराजी ॥
इति शब्दचन्द्रिका ॥
पानीयवर्णिका स्त्री वालुका ॥
इतिराजनिर्घण्टः ॥
पानीय शालिका स्त्री जलाव।
स्थानगृहं पानिशाला इति ज
लछत्र इति भाषा तत्पर्य्यायः
प्रपा २ इत्यमरः तत् कर्तृफलं
यथा कूपाराम प्रपाकारी त।
था वृक्षादिरोपकः कन्याप्रदः
सेतुकारी स्वर्गमाप्नोत्यसंशयं
इत्युदाहृततत्वे यमः ॥ ॥
पानीयामलकं स्त्री प्राचीनाम
लकंपानि आमला इति भाषा ॥
अस्य गुणाः दोषत्रय ज्वर ना
शित्वं इतिभावप्रकाशः ॥
मुखशुद्धि मलवद्ध कारित्वं ॥
अम्लत्वं स्वादुत्वंच ॥ इति ॥
राजवल्लभः ॥ पानीयालुः
पुं कन्दविशेषः ॥ पनिया
लु इति हिन्दीभाषा तत्पर्य्या
यः जलालुः १ स्वपालुः २ वा
लुकः ३ अस्यगुणाः त्रिदोषना
शित्वं सन्तर्पणकारित्वंच इति ॥

राजनिर्घण्टः ॥ पानी।
यास्त्रा स्त्री वल्वजा इति रा।
जनिर्घण्टः ॥ पाथ्यः त्रि
पथिकः इत्यमरः पापं क्ली
अधर्म्म दुरदृष्ट तत्पर्य्यायः
पंकं १ पाप्मा २ पापं ३ किल्वि
षं ४ कल्मषं ५ कलुषं ६ वृ।
वृजिनं ७ एनः ८ अघं ९ अंहं
१० दुरितं ११ दुष्कृतं १२ इत्यम।
रः ॥ पातकं १३ मूलं १४ क
ल्कं १५ शल्यं १६ पापकं १७ इ
तिशब्दरत्नावली ॥ ॥
तद्दशविधं यथा प्राणाक्षिप
तनं स्तैन्यं परदारमथापिच।
त्रीणिपापानिकायेन सर्वतः
परिवर्ज्जयेत् असत्प्रलापंपारु
ष्यं पैशुन्यमनृतन्तथा चत्वा।
रिवाचाराजेन्द्र नजल्पेतनचि
न्तयेत् अनभिध्या परस्वेषु स।
र्वसत्वेषु सौहृदं कर्म्मणांफल
मस्तीति त्रिविधंमनसाचरेत्
इतिशान्तिपर्व्वणि दानधर्म्मः
स्तन्दकान्येतानि पातकशब्दे
लिखितानि ॥ पापस्योत्कर्ष
त्रयान्तु वर्द्धितं यथा नाधर्म्मः
श्चरितोराजन् सद्यःफलतिगौरि
व शनैरावर्त्तमानस्तु मूलामपि
निकृन्तति यदिनात्मनिपुत्रेषु
नचेत्पुत्रेषुनप्तृषु पापमाचरितं

कर्म्मत्रिवर्गमनुवर्त्तते फलमेवं
ध्रुवंपापे गुरुभुक्त मिवोदरे इ।
तिमात्स्ये २८ अध्यायः ॥
तीर्थस्य पापनाशकत्वे तत्र कृ
त पापस्य वज्रलेपत्वंच यथा अ
न्यत्रहिकृतंपापं तीर्थमासाद्यग
च्छति तीर्थेतयत् कृतं पापं वज्र
लेपोभविष्यति मथुरायांकृतं
पापं तत्रैवचविनश्यति यथाप
रीमहापुण्या यस्यांपापंनविद्य
ते इतिवाराहे मथुरामाहात्म्य
शेषपापलक्षणं यथा अतः
परंप्रवक्ष्यामि शेषपापस्यलक्ष
लक्षणं ऋणं देवर्षिभूतानां मनु
ष्याणांविशेषतः पितृणांच।
द्विजश्रेष्ठ सर्ववर्णेषुचैकतः ओ
कारादिनिवृत्तिश्च पापकार्य्यकृ
तिश्चया हत्यादिके महापापे।
त्वगम्या गमनेतथा वृतादिवि
क्रयेचौरं चाण्डालादिप्रतिगृहे
स्वदोष गोपनेपापे परदोष।
प्रकाशने ईर्षाविष्टे वाक्यदुष्टे
निष्ठुरत्वेषदुःस्वरम् ॥ दाकित्वे
तालवादित्वे नाम्नावाचाप्यधा
र्म्मजः तालवादित्वे नाम्नावाचा
प्यधर्म्मजः मारणाय मथाम्भि
के नरकावहमुच्यते यतः पापे।
स्तु संयुक्तः पच्यतेयदि शंकरः इ
तिवामने ५८ अध्यायः सोकर्थ्य

सामकपापानियथा एकशय्याश
नंपंक्तिर्भोज्यपक्वान्नमिश्रणं याजन
नाध्यापनेयोनि स्तथैवसहभोजनं।
सहाध्यायस्तुदशमः सहयाजनमे
वच एकादशसमुद्दिष्टा दोषाःसा
ङ्कर्य्यसंज्ञिताः समीपेवाप्यवस्था
नात् पापंसंक्रमतेनृणां तस्मात्सर्व्व
प्रयत्नेन सांकर्य्यंपरिवर्ज्जयेत् इ
तिकौर्म्मेउपविभागे १५ अध्यायः
आलापाद्गात्रसंस्पर्शात् संवासात्
सहभोजनात् आसनाच्छयनाद्या
नात् पापंसंक्रमतेनृणां आसनादे
कशय्याया भोजनात्पंक्तिसंकरात्
ततःसंक्रमतेपापं घटाद्घटइवो
दकं इतिगारुडेनीतिसारे ११२
अध्यायः ॥ राजादिकृतपापेन
राजादीनांपरस्परम् पापित्वं यथा
राजाराष्ट्रकृतात्पापात् पापभव
तिवैहरे तथैवराजतःपापेन तद्रा
ष्ट्रस्यास्तयेजनाः वर्णाश्रमादयः
सर्वे पापिनोनात्रसंशयः भार्य्या
हो दुष्कृतीस्वामी हननात्स्वा
मिनोऽबला तथा देशिकपा
पात् शिष्यः स्यात् पातकीस
दा ॥ शिष्याद्धि पापिनोनित्यं
गुरुर्भवति दुष्कृती पातकी
यजमानः ॥
॥ ॥ ॥ ॥

स्यात् पापिनोऽगत्तोयसः पुरो
रोहितस्तथापापी यजमानोह्यसौ
ध्रुवं ॥ अदत्तपुण्यपापभागि
त्वं यथा अदत्तानिचपुण्यानि पा
पानिचयथाप्रिये आर्य्यनिकर्म्म
णायेन तद्यथावच्छृणुष्व देवि।
ग्रामंगत्वानिस्व भोगभोजिकृता
दिषु कलौतुकेवलंकर्त्ता फलत्
कुत्राप पापयोः अकृतेपिच सं
सर्गे व्यवस्थेयमुदाहृता संसर्गा
त्पुण्यपापानि यथा यान्तिनिबो
धतत् एकत्रमैथुनाद्याना द्धैकपा
त्रस्थभोजनात् फलार्द्धमाप्नुयान्म
र्त्यो यथावत्पुण्यपापयोः स्प
र्शनाद्भाषणाद्वापि परस्यस्तवना
दपि दशांशंपुण्यपापानां नित्यं
प्राप्नोतिमानवः दर्शनश्रवणा
भ्याञ्च मनोध्यानात्तथैवच परस्य
पुण्यपापानां शतांशमाप्नुयान्न
रः परस्यनिन्दांपैशुन्यं धिक्कारंच
करोतियः तत्कृतं पातकंप्रा॥
प्य स्वपुण्यंप्रददातिसः सर्व
तः पुण्यकर्म्माणि सेवापरःकु
रुतेपरः पत्नीभृत्यैःऽप्यशिष्यो
वा सजातीयोऽपिमानवः त॥
स्य सेवा अनुरूपेण तस्मात्पुण्य
भागभवेत् एकपंक्ते स्थितोय
स्तु सेवयन् परिवेशयेत् तस्य
पापशतांशम् ॥

लभतेपरिवेशकः स्नानसन्ध्यादि
कंकुर्वन् संस्पृशेद्वा प्रभाषते सपु
ण्य कर्म्मषष्ठांशं दद्यात्तस्मै सुनि
श्चितं धर्म्मोद्देशेन योद्रव्यं परेयाच
यतेनरः तत् पुण्यं कर्म्मजंतस्य
यनं दत्वा भयात्फलं अपरस्यपरं
द्रव्यं पुण्यकर्म्मकरोतियः कर्म्मकृ
त् पापभोक्तात्र धनिनस्तद्भवेत्फलं
नापहृत्यपरस्वंयस्तु परस्माश्रियतेन
रः धनीतत् पुण्यमाप्नोति स्वय
नस्यात्तत्र्यपरः तुद्विदत्त्वनेमन्त्राच
यश्चोपकरणप्रदः वत्लकृत्त्वापिश
ष्ठांशं प्राप्नुयात् पुण्यपापयोः म
नाभ्यः पुण्यपापानां राजाषष्ठांश
मुद्धरेत् शिष्यात्गुरुः स्त्रियाभर्ता॥
पिताषुत्रात्तथैवच स्वपतेरपिपु
ण्यस्य भार्य्यार्द्धं समवाप्नुयात् पर
हस्तेनदानादि कुर्वतः पुण्यकर्म्म
णः विनाभृतकशिष्याभ्यां कर्त्ता
ष्ठं शमाहरेत् हन्तिदेहन्तिसंभोक्तः
पुण्यषष्ठांशमाहरेत आत्मनोवाप
रस्यापि यदिसेवांनकारयेत् श्रीकृ
ष्णउवाच इत्येवंदत्तान्यपिपुण्य
पापा ण्यपायान्तिनित्यं परस्परंचिमानि
श्रुणवब्रवाम्मिवितिहासमग्रं पु
राभवम् पुण्य ॥

मतिप्रियंच इतिपाद्मोत्तरखण्डे
२१ ॥ १५१ अध्यायः ॥
तत्र जन्तुप्रभृतीनां वधेपापं त
त् प्रायश्चित्तंच यथा वधेच तत्र
जन्तूनां हिंस्रकानांच परितः का
र्षापणं सपुत्रस्य प्रसुकालेप्रयु
च्यते अहिंसकानांतुद्वाणं वधेश
तगुणंध्रुवं प्रायश्चित्तंप्रसुकाले॥
कथितं पक्षयोनिना वधेविशिष्ट
जन्तूनां मत्स्यादीनांचकामतः त
तःशतगुणंपापं निश्चितंमनुरब्र
वीत् नराणां म्लेच्छजातीनां वधेश
तगुणंततः म्लेच्छानांच शतानांव
धत् पापं लभते वधे सत्शूद्रेकस्य
चवधे तत्पापंलभतेपुमान् सतशू
द्राणां शतानांच यत्पापंलभतेव
धे तत्पापं लभतेनूनं गोवधेने
वनिश्चितं गवांदशगुणंपापं ब्रा
ह्मणस्यवधे भवेत् विप्रहत्यासमंपा
पं स्त्रीवधे लभतेनरः ॥ पापि
दर्शनजन्यपापं यथा पापंयद्दर्श
नेनात कथयामिनिशामय दुः
स्वप्नं पापबीजंच केवलंविघ्नका
रणं गोघ्नंच ब्रह्मघ्नं वापिकृतघ्नं
कुटिलंतथा देवघ्नं पितृमातृघ्नं॥
पापंविश्वासघातिनं मिथ्यासा

स्य मरालानां पंचतिथ्याविवेचके ।
ग्रामयाजिनमेवेति देव विप्रध
हारिणम् अश्वत्थ घातिनं दृष्ट्वा ।
शिव विष्णु विनिन्दके अदीक्षि
तमना चारं सन्ध्याहीने विजन्म ।
या देवले वृषवाहे च शूद्राणां ।
सूपकारके शवदाही च शूद्राणां
शूद्रश्राद्धान्न भोजिने अवीरान्नि
मन्त्रासांच देवब्राह्मणनिन्दके ।
पतिभक्ति विहीनाच विष्णुभक्ति
विहीनके शूद्राणां विधवांचैव
चण्डाले व्यभिचारिणीं शश्वत् ।
कोपयुतं दृष्ट्वा भ्रूणघ्नं च जारजे
चौरं मिथ्यावादिनं च शरणागतघा
तिनं मांसापहारिणं चैव ब्राह्मणे ।
वृषलीपतिं ब्राह्मणी गामिनं शूद्रे ।
द्विजे वार्द्धुषिकं तथा अगम्या ।
गामिने दृष्टे चतुर्वर्णे नराधमे मा
तामपत्नी माताच श्वश्रूश्च भगिनी
सुता गुरुपत्नी पुत्रपत्नी सोदर
स्य प्रिया सती मातृष्वसा पितृष्व॥
सा भागिनेय प्रियातथा मातुला
मातुलानी नवोढा च पितृव्यस्त्री
वनसुता पितृमातृ मस्यैव चा
गम्याश्च दशास्मृताः कीर्त्तिताः ।
सामवेदे च परिपाल्याः सतो व्रजप
तान् दृष्ट्वा नमस्कृत्वा च ब्रह्मदर्शनात्
भैरवः तस्माद्देवादिमान्दृष्ट्वासर्वे

दृष्ट्वा हरिं स्मरेत् कामतो यदि पश्य ।
ति ततस्त्वा स्त्रे भवति वै तस्मात्स ।
न्तो न पश्यन्ति पापिनां नाव्रजेश्वर इ
ति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १
१८ अध्यायः ॥ पापकं क्ली पा
पं इतिशब्दरत्नावली पापकृत् त्रि
पापकर्त्ता यथा ख्यापनेनानुतापेन
तपसाध्ययनेनच पापकृन्मुच्यते
पापा द्दानेनच दमेनच इतिप्राय
श्चित्ततत्त्वं ॥ पापग्रहः पुं क्षीणच
न्द्रः कुजः राहुः शनिः एतैर्युक्तोबु
धः रविः यथा क्षीणेन्दुः कुजोरा
हुः शनिः केतुयुत इन्दुजः रविः पापाः
भवन्त्येते शुभाश्चान्ये प्रकीर्त्तिताः
इति ज्योतिः सारसंग्रहः ॥
पापघ्नः पुं तिलः इतिराजनिर्घंटः
पापनाशके त्रि इति मुग्धबो
धव्याकरणं ॥ ॥ पाप
चेलिका स्त्री पाठा शाकनादि
इति भाषा इतिरत्नमाला ॥
पापचेली स्त्री पाठा इत्यमरः ॥
पापनापितः पुं धूर्त्तनापितः इ
ति संक्षिप्तसारव्याकरणम् ॥
पापपतिः पुं उपपतिः इति ॥
त्रिकाण्डशेषः ॥ पापपुरुषः
पुं पापमयांगनरः यथा वाम
पार्श्वस्थितं पाप पुरुषं कज्जलं ।

प्रभं ब्रह्महत्या शिरस्कंच स्व
र्णस्तेय भुजद्वयं सुरापान हृ
दायुक्तं गुरुतल्प कटिद्वयं त
त्संसर्गि पदद्वंद्व मंगप्रत्यंगपात
कं उपपातकरोमाणं रक्तश्म
श्रु विलोचनं खड्गचर्मधरं कृ
ष्ण मेवं कुक्षौ विचिन्तयेत् इति
भूतशुद्धि प्रकरणे तन्त्रसारः
स्रष्टादौ पुरुषश्रेष्ठः संसारस
चराचरं सर्वेषां दमनार्थाय ।
सृष्टवान् पापपुरुषं द्विजाति
हत्यामस्तकं मदिरापानलोच ।
नं सुवर्णस्तेयवदनं गुरुतल्प
गतिश्रुतिं स्त्रीहत्यानासिकं चै ।
व गोहत्यादोषवाहकं न्या
सापहरणग्रीवं भ्रूणहत्यागलं
तथा परस्त्री गतिवृक्ककालं सु ।
हृल्लोकवधोदरं शरणापन्नहत्या
दि नाभिगर्त्तं कथाकटिं गुरुनि
न्दा सक्थिभागं कन्याविक्रयशे
फसं विश्वास वाक्यकथन पा ।
दं पितृवधांघ्रिकं उपपातक
रोमाणं महाकायं भयंकरम्
कृष्णवर्णं पिंगनेत्रं स्वाश्रया ।
नां दुःखदम् इतिपापप्रकियो
योगसारे ११ अध्यायः पापमुक्तः
त्रि पापान्मुक्तः निष्पापः ॥ इति

संक्षिप्तसार व्याकरणं सच यथा
यः समः सर्वभूतेषु जितात्मा शा
न्तमानसः स पापेभ्यो विमुच्येत ज्ञा
नवान् सचवेदवित् गुणागुणपरि
ज्ञाता शुद्धयस्तु तपसच ध्यानेनै
वसंमूढः स पापेभ्यः प्रमुच्यते ।
स्वदेहे परदेहे च साक्षिरूपेण नित्य
शः विचारज्ञो भवेद्यस्तु स मुच्येत ।
नसोऽप्यवं अहिंसः सर्वभूतेषु स ।
त्यक्रोध विवर्जितः शुभन्यासः स
दायश्च स पापेभ्यः प्रमुच्यते प्राणा
यामैश्च निर्दग्ध अधःसन्धारणानि
च व्यवस्थित मनायस्तु स पापेभ्यः
प्रमुच्यते निराशीः सर्वतस्तिष्ठे द्वि
षयेष्वन लोलुपः परीतात्मा त्यजे
त्प्राणान् सर्वपापात्प्रमुच्यते अहिं ।
धानो जितक्रोधः परद्रव्यविवर्जि ।
तः अनसूयश्च यो मर्त्यः स पापे ।
भ्यः प्रमुच्यते गुरुशुश्रूषयायुक्तो
हिंसाविरत एव यः तपश्च तः
शीलश्च स पापेभ्यः प्रमुच्यते ॥
अशस्तानि च यः कुर्य्यात् दशशा ।
स्त्राणि च यः कुर्य्यात् दशशस्त्रा ।
णि वर्जयेत् योऽभिगच्छति ।
तीर्थानि विशुद्धेनान्तरात्म ।
ना पापाद्धपरतो नित्यं स पा

पेभ्यः प्रमुच्यते उत्थाय ब्राह्मणेभ्यो ग
च्छेन्नरो भक्त्या समन्वितः अभिगम्य
प्रयत्नेन सपापेभ्यः प्रमुच्यते इति
वराहपुराणं पापरोगः पुं मसूर
रीरोगः इतिशब्दरत्नावली ॥
पापर्द्धिः स्त्री मृगया इतिहेमचं
द्रः पापले स्त्री परिमाणविशे
षः इतिसंक्षिप्तसारोणादिवृत्तिः ॥
पापग्राहके त्रि ॥
पापशमनी स्त्री शमीवृक्षः इ
तिराजनिर्घण्टः पातकनाशि॥
काच पापात्मा ने पुं पापी यथा ॥
पापात्मनो ह्यधोगतिं विस्तरेण व
दाम्यहं षडशीतिं सहस्राणि यो
जनानि दुरात्मनां प्रोक्तो मार्गस्सवि
स्तारः सर्वदुःखान्वितस्य च क्वचि
त् क्वचित् ज्वलद्वह्निः सन्तप्तः क
र्द्दमः क्वचित् क्वचित् क्वचित् द्वि
जश्रेष्ठ सन्तप्ते ताम्रवालुके क्व
चित् क्वचित्तीक्ष्णा शिलाः क्वचि
त्तप्त शिला तथा क्वचित् क्वचि
च्छस्त्र वृष्टिः क्वचिदंगारवर्षणं
क्वचिद्वह्निवृष्टिश्च क्वचित्पं
कवर्षणं वैसान्तु वर्षणं क्वापि
क्वचित् पाषाणवर्षणं ज्वलदा
ग्निरिव क्वापि सन्तप्तो वातिमा
रुतः गभीरः अन्धकूपाश्च ॥

स्तराट्टतप्तश्वाद्विन क्वापिकण्ठ
कद्रुमाश्च नाराचसदृकण्टकाः
पाषाणश्रेणयः क्वापि दुर्गा
ह्याः सपन्नगाः क्वचिद्वातायक्वा
राश्च क्वचित् शोणितकन्दराः
क्वचिद्वीरण वृक्षाश्च क्वचित्क्वा
शाः क्वचित् शराः क्वचित्क्वचि
त् शार्कराश्च लोष्टवश्च क्वचित्
क्वचित् क्वचिदस्थि राशयश्च दु
र्गन्धामांस राशयः क्वचित् कं
टक राशिश्च शैवालानि क्वचि
त् क्वचित् कीलकावलयः क्वा
पि क्वचिद्व्याघ्रा स्तथा शिवाः ख
ड्गिनः करिणः क्वापि क्वचिद्वृत्ता
भयंकराः एवं वक्र विधक्लेशे
छाया जल विवर्जिते तस्मिन्मा
र्गे द्विजश्रेष्ठ पापिनो यान्ति दुःखि
नः नग्ना विमुक्त केशाश्च प्रेता
कारभयंकराः गच्छन्ति पापिन
स्तत्र शुष्ककण्ठोष्ठ तालुकाः
इति क्रियायोगसारे २२ अध्या
यः ॥ पापी ने पुं पापयुक्तः य
था रुधिरोक्षिताः केचित् के
चित् कर्द्दमभूषिताः केचित् के
चित् केचित् कुशांगाश्च पथिग
च्छन्ति पापिनः क्रन्दतोऽथ यथा
केचित् अवहाम्याकुलेक्षणाः

शोचन्तः स्वानि कर्म्माणि केचिद्ग
च्छन्ति पापिनः कस्यचिच्चर्म्म पा
शस्य बन्धने पापिनो गले केकाले
कस्यचिद्धन्धः कस्यचिच्च भुजद्व
ये कस्यचित्रासिका रन्ध्रे निर्द्दये
र्यम किंकरैः अंकुशाग्रे विनि
क्षिप्य क्रोधेन कृष्यते द्विज ग्री
वास्वपि सप्ततकीर्णो पाशैर्दृढा
ष्टकरुषा आकृष्यते यमप्रेष्यैः ।
केषांचित् संचितेन सा शिक्य॥
स्थान् गुरुपाषाणान् वहन्तः क
र्णावन्धकैः अयोभारांश्च शिक्या
मे वर्जन्ति पथि पापिनः कोश्चि
द् गृहीत्वा केशेषु कांश्चित् क
र्णेषु पापिनः कांश्चित्पदेषु पा
देषु नयन्ति यमकिंकराः ग्रीवा
सु पापिनः कांश्चित् करमदृढ
लोहदण्डैः त्रिलिप्ततिष्ठायमप्रेष्या
नयन्ति यममन्दिरं यान्त्यधःशिर
सः केचि हर्द्धपादास्तथा परे ग
च्छन्ति वायुभिः केचि देकपादा
श्च केचन इत्येवं विकृताकारा
अनेराव विरविनः यमहते
स्ताड्यमानाः पापिनोपि च तत्प
थि इतिपाद्मे क्रियायोगसारे २२
अध्यायः ॥ पाप्मा ने पुं पापे इ
त्यमरः पाम ने स्त्री विचर्च्चिका
इत्यमरः पामघ्नः पुं गन्धकः
इतिजटाधरः ॥ पामघ्नी ॥

स्त्री कटुका इतिराजनिर्घण्टः ॥
पामनः त्रि पामरोगविशिष्टः त
तपर्य्यायः कच्छुरः २ इतिहेम
चन्द्रः पामरः त्रि खलः नीचः
इतिमेदिनी मूर्खः इतिहेमचन्द्रः
पामरोद्धारा स्त्री गडूची इतिशा
ब्दचन्द्रिका ॥ पामा ने स्त्री
कच्छुः पाचड़ा इति भाषा इत्य
मरः अस्या औषधं यथा हरिद्राह
रितालेच दुर्वागोमूत्रसैन्धवं अ
र्कलेपो हन्तिदद्रू पामानेव गवंत
था अपिच माहिषे नवनीतं च सिं
दूरं च मरीचकं पामाविलेपिता
नशेषत वकुलापि वृषध्वज अमच्च
मरीचे त्रिवृते कुष्ठे हरितालेमनः
शिला देवदारु हरिद्रे द्वे कुष्ठेमांसी
च चन्दने विशालाकरवीरं च अर्क
क्षीरं सकृत् पले पृथक् कार्षिको
भागो विषस्यार्द्ध पलं भवेत् प्रस्थ
कटुक तैलस्य गोमूत्रेषु गुणेपचे
त् मृत पात्रे लोहपात्रेवा पाने
स्थे हग्निना पचेत् पामाविचर्च्चि
का चैव दद्रुविस्फोटकानिच
अभ्यंगेन प्रणश्यन्ति कोमलं त्व
चनाय ते प्रसृतानामपि श्वित्रा
णि तैलेना नेन सत्वयेत् चिरो
त्थित मपि श्वित्रे विवर्णे तत्
तणाद्भवेत् ॥

इति गारुडे १९४ १९८ ॥
अध्यायः ॥
पामारिः पुं गन्धकः इतिहे
मचन्द्रः ॥ पायसः पुं ।
क्ली श्रीवासः दारु पिन् इति ॥
भाषा पयसा संस्कृतः परमा ।
न्नं इतिमरमेदिनीकरौ ॥ अस्य ॥
पाकप्रकारोगुणाश्च अतमतण्डु
लो धौतः परिभ्रष्टो घृतेनच ख
ण्डयुक्तेन् दुग्धेन पाचितः पाय ।
सोभवेत् पायसः कफकृद ॥
सो विष्टम्भी मधुरोगुरुः चे ।
द्रप्रमपायसो यथा भ्रष्टजीरच
तर्जात अन्द्रकौतः सुरोचनः ।
इतिराजवल्लभः ॥ पयोवि ॥
कारे त्रि यथा कम्पपक्कानि तै
लेन पायसंटपि शाकवः हिंगे
रेतानि भोज्यानिभूञ्जीरहृता
स्यपि इतिनिथितसेवराहपुरा ।
णं ॥ पायिकः पुं पदाति
कः इति शब्दरत्नावली ॥
पायुः पुं मलद्वारे सतगर्भस्य
स्य सप्तमि मासे भवति इतिस्
खबोधः तत्पर्य्यायः अपानं २
गुदं ३ च्युतिः ४ अधोमर्म्म ५ ।
शकृद्वारं ६ त्रिवलीकं ७ वलिः
८ इतिहेमचन्द्रः ॥ तस्य
ध्यानादि यथा ॥

अवाहृति रपानश्च पायुरध्यात्म
मुच्यते अधिभूतं विसर्गश्च मि
त्रस्तत्राधिदैवतं इति महाभार ।
ते आश्वमेधिकपर्व ॥
पाय्यं क्ली परिमाणे इत्यमरः ॥
पाने इतिसंक्षिप्त सारोणादिवृ ।
त्तिः जले निन्दनीये त्रि इति वि ।
श्वः ॥ पारन्तक कर्म्मसमा ।
सौ इतिकविकल्पद्रुमः ॥
पारं क्ली परतीरं नदीसंखना ।
न्तंतदभीरं इत्यमरः ॥
पारः पुं पारदः इत्यमरटीका ।
यां सारसुन्दरी प्रान्तभागे पुम्
क्ली इति मेदिनी ॥ पारकः
त्रि पूर्तिकारकः पालनका ।
रकः प्रीतिकारकः व्यायाम ।
कारकः परुर्थेषु इत्यातेः क
र्त्तरिणक प्रत्यय निष्पन्नः ॥
पारक ग पुं सुवर्णं इत्युणादि ।
कोशः पारक्यं क्ली परलोक
हितकर्म्म यथा पारेन ता ।
पमस्कं कुर्य्यात् संजय मात्म ।
वान् अर्द्धेनचात्मभरणं नित्य ।
नैमित्ति कतया पारक्यार्द्धेम ।
र्थस्य मूलभूतं विवर्द्धयेत् एव
माचरतः पुं सो ह्यर्थः साफ ।
ल्य मृच्छति इति मार्कण्डे ।
यपुराणम् ॥ ॥

पारगः त्रि पारगामी तत्प ।
र्य्यायः कर्मरीकः २ इतिश ।
ब्दमाला पारगतः पुं जिनः इ
तिहेमचन्द्रः पारगे त्रि ॥ पा
रजायिकः पुं पारदारिकः इ
ति महाभारते राजधर्म्मः पार
टीटः पुं प्रस्तरः इतित्रिकाण्डशे
षः ॥ पारणः पुं मेघः इति ।
शब्दमाला पारणं क्ली उपवा
सव्रतानन्तर दिवपारणा स्त्री ।
सकर्त्तव्य प्राथमिकभोजनं यथा
पारणं पावने पेसा सर्वपाप ।
प्रणाशने उपवासांगभूतंच फ
लदं शुद्धिकारणं सर्वेषेवोपवा
सेषु दिवापारणमिष्यते अन्य
था फलहानिःस्या द्रुतेधारण ।
पारणं नराज्ञो पारणंकुर्य्या द ।
तेवै रोहिणीव्रतात् निशायांपा
रणं कुर्य्याद्वर्जयित्वा महानिशां
प्रतीक्ष्य पारणंप्रातः कृत्वाविप्र ।
स्ताधेन सर्वेषा सम्मतं कुर्य्या ।
दन्यैवै रोहिणीव्रतं इतिब्रह्मवै ।
वर्त्ते श्रीकृष्णजन्मखण्डे ८ अ ।
ध्यायः ॥ अथ श्रीकृष्णजन्मा
ष्टमी व्रतपारण कालः अष्टम्या
मथ रोहिण्यां नकुर्य्यात् पार ।
॥ णंकचित् हन्यात् ॥

पुराकृतं कर्म्म उपवासार्जितं ॥
फलं तिथि ऋक्ष गुणं हन्ति नत्त ।
त्रेच चतुर्गुणं तस्मात्प्रयत्नतः
कुर्य्या तिथि भान्तेच पारणं अ ।
त्रोभय वियोगे पारणाभके यदा
स्याद् महत् निशात्परे यकसेव ।
वियोगस्तदेकतर वियोगेपि पा
रणं तथाच नारदीये तिथि न ॥
तत्रसंयोगे उपवासोयदा भवेत् ।
पारणान्तु नकर्त्तव्य यावन्नैकस्यसं
क्षयः संयोगिके व्रतेप्राप्ते यद्ये ॥
ष्येको विमुच्यते तत्रैव पारणं कु
र्य्या देवंवेदविदोविदुः यदेकस्मा
पिस्याद्धं महत् निशाभ्यन्तरे नवि ।
योगस्तदा तयो रवियोगेपि प्रात
रुत् सर्वांते पारणं निष्पन्नेवोत्स
वान्तेवा व्रतीकुर्वीत पारणं इत्युक्त
त्वात् महाष्टम्युपवास पारणं म ।
त्स्यमांसो पहारेण कर्त्तव्यं यथाश्र
ष्टम्या सप्तपाद्येव नवम्यामपरेह
नि मत्स्यमांसो पहारेण दधात्रै ।
वेद्यमुत्तमम् तेनैव विधिनान्न
स्वयंभुञ्जीत नान्यथा स्त्रियास्तु प ।
शुमांस भक्षण निन्दया नतेनपा
रणं किंतु मत्स्येन अष्टम्युपवा ।
स पारणं वरिवाराहे मांसनि ।
षेधः एवं मांसाशनत्याग ॥

कृत नियमेन नियोगादिष्वपि। मासे वर्ज्जनीये ॥ अथ श्रीरा। मनवमी व्रतपारणकालः नव मी चाष्टमी विद्धा त्याज्याविष्णु प रायणैः उपोषणं नवम्यां वै दश म्या मेवपारणं ॥ अथैकादशी व्रत पारण कालः मन्त्रं जपित्वा। हरये निवेद्यापोषणं व्रती द्वाद श्यां पारणं कुर्य्यात् हर्जयित्वा द्यु। पेरकी द्वादशीलंघने दोष माह नारदीये महा हानिकरी ह्येषा द्वा दशी लंघिता नृणां विष्णु धर्म्मा नरे द्वादश्याः प्रथमः पादो हरि। वासरसंज्ञितः तमतिक्रम्य कु। र्वीत पारणं विष्णुतत्परः ॥

अथ श्रवणा द्वादश्युपवास पार ण कालः तिथि नक्षत्रसंयोगे उ पवासो यदाभवेत् भावदेवनभा। स्वयं पारणैकस्य संलयः विशे षेण महीपाल श्रवणांवर्द्धतेयदि तिथि क्षयेण भोक्तव्यं द्वादशी। नैव लंघयेत् तिथिक्षयेण प। कादशी क्षयेण भोक्तव्यं द्वादश्या पारयेदिति स्थितिः ॥ अथ शिव। रात्र्यु पवास पारण कालः ज। यन्ती शिवरात्रिश्च कार्य्याभद्रजया न्विते कृतोपवासः तिथ्यन्ते तदा। कुर्य्यात्तु ॥

पारणं तिथ्यन्ते पारणन्तु जय। न्ती मात्र परं अत्र चतुर्द्दश्या मेव तत् ब्रह्माण्डोत्तरखण्डे तथाहि। तीर्थानि सन्तिवै पूजितानि तव। तीह भूताहे पारणे कृते ॥ पार। णदिने वर्ज्यानि यथा ब्रह्माण्ड पुराणे कांस्यमांसे सुरांक्षौद्रं लो भं वितथ भाषणं व्यायामञ्च व्य। वायञ्च दिवास्वप्नं तथाञ्जनं शिला पिष्टं मसूरांश्च द्वादश्यैतानिवैष्ण। वः द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते स्मृतिसमोषे कांस्येमांसे मसूरञ्च चणकं कोरदूषकं शा कं मधु परान्नञ्च त्यजेदुपवसन्स्त्रि यं अत्रोपवसन्निति तद्दिने भोज ना सम्भवात् सामीप्यात् पूर्व्वाप रयोर्ग्रहणं इति तिथ्यादितत्त्वं ॥

पारतः पुं पारदः इतिहेमचन्द्रः ॥

पारतन्त्र्यं स्त्री परतन्त्रता पराधी। नत्वे अन्यायत्तता यथा दोषा णां समवेतानां विकल्प उपा। शा कल्पना स्वातन्त्र्यपारतन्त्र्या ॥ भ्यां बाधेः साधारण्यादिशेत् ॥ इति माधवकरः ॥

पारत्रिकं त्रि पारलौकिकं परत्र भव मित्यर्थे इक प्रत्य। य निष्पन्नम् ॥

पारद पुं धातुविशेषः पारा। इति भाषा तत्पर्य्यायः रसरा जः १ रसनाथः २ महारसः ३ रसः ४ महातेजः ५ रसलोहः ६ रसोत्तमः ८ सूतराट् चपलः १० जैत्रः ११ शिववीजं १२ शि वः १३ अमृतं १४ रसेन्द्रः १५ लोकेशः १६ दुर्द्धरः १७ प्रभुः १८ रुद्रजः १९ हरतेजः २० र। सधातुः २१ अचिन्त्यजः २२ खे चरः २३ अमरः २४ देहदः २५ मृत्युनाशकः २६ सूतः २७। स्कन्दः २८ स्कन्दांशकः २९ देवः ३० दिव्यरसः ३१ रसाय नश्रेष्ठः ३२ यशोदः ३३ इति राजनिर्घण्टः ॥ सूतकः ३४ सिद्धधातुः ३५ पारतः ३६ इ तिशब्दरत्नावली हरवीजं ३७ र जस्वलः ३८ इतिहेमचन्द्रः ॥ शिववीर्य्यं ३९ शिवाह्वयः ४० इतिभावप्रकाशः ॥ अस्यगु। णाः क्रमिकुष्ठ नाशित्वं चक्षुष्य त्वं रसायनत्वञ्च इतिराजवल्लभः अस्य भस्मनः शिववीर्य्यं मासत्र। य अर्थ्यं तिष्ठति इतिपरिभाषा अपिच पारदः सकलरोगनाश। कः षड्रसो निखिल योगवाहकः पञ्चभूतमय एषकीर्त्तितो देहलोह वर सिद्धि कारकः मूर्च्छितो हर।

तें

तेज्याधीन् वद्धः खेचर सिद्धिदः सर्वे सिद्धि करोतीतो निरुत्थादे हसिद्धिदः विविधव्याधिभयोद य मरणजरा संकटेपि मर्त्यभ्यः पारं ददाति यस्मात्तस्मादयं पार दः कथितः इतिराजनिर्घण्टः तस्योत्पत्ति लक्षणे यथा शि वांगात् प्रच्युतं रेतः पतितं धर णीतले तद्देह सारजातत्वा च्छु क्लमच्छमभूत्तत् धातुभेदेन। विज्ञेयं शिववीर्य्यं चतुर्विधं ॥ श्वेतं रक्तं तथा पीतं कृष्णंतत्तु। भवेत् क्रमात् ब्राह्मणः क्षत्रि। योवैश्यः शूद्रश्च खलुजातितः श्वेतं शस्तं रुजांनाशे रक्तंकिलर सायने धातुवादे तत्पीतं खे। गतौ कृष्ण मेवच ॥ पारदः ष ड्रसः स्निग्ध स्त्रिदोषघ्नो रसाय नः योगवाही महावृष्यः सदा दृष्टि बलप्रदः सर्वामय हरः प्रो क्तो विशेषात् सर्वकुष्ठनुत् स्वा। स्थ्यो रसो भवेद्ब्रह्मा वद्धोज्ञेयो जना। र्द्दनः रंजितः क्रामितश्चापि सा क्षाद्देवो महेश्वरः मूर्च्छितो हरति रुजं बन्धनमनुभूयखे गतिं कुरु अजरी करोति हि मृतः कोऽन्यः क। रुणाकरः सूतात् रसाम्नते यस्य रोगस्पर्शो योग स्तेनैव सद्वयोजि।

तः रसेन्द्रो हरते रोगान् नरकुं-
जर वाजिनो ॥ तस्य दोषा य-
था मलं विषं वह्निं गिरित्वचा-
पलं नैसर्गिकं दोषमुशन्ति पार-
दे उपाधिजौ द्वौ त्रपुनागयोग-
जौ दोषौ रसेन्द्रे कथितौ मुनी-
श्वरैः मलेन मूर्च्छा मरणं विषे-
ण दाहोऽग्निना कष्टमवः शरीरे
देहस्य जाड्यं गिरिणा सदा स्यात्।
चाञ्चल्यतो वीर्य्यहतिश्च पुंसां
वङ्गेन कुष्ठं भुजगेन षण्ढो भवे-
दतो लोपविशोधनीयः। वह्नि
विषं मलंचेति भवन्ति दोषास्त्र-
योरसे पतेकुर्वन्ति सन्तापं मृति
मूर्च्छान्तरंण क्रमात् अन्येपि दो-
षाः कथिता भिषग्भिः पार-
देयदि तथा प्येते त्रयोदोषा ह-
रणीया विशेषतः संस्कारही-
नं खलु सूतराजं यः सेवते तस्य
करोति बाधां देहस्य नाशं विद-
धाति नूनं कष्टांश्च रोगान् जनये-
न्नराणां ॥ मारितस्य मूर्च्छित-
स्य तस्य गुणाः पारदः कृमि-
कुष्ठघ्नो जयदोषहृद्दृक्सरः म-
लहश्च महावीर्य्यो योगवाहीत-
दहरः स्रोतोजो वृष्यदोषहृष्या।
हृद्दिक् हात वर्द्धनः षण्डत्वनाश-
नः स्थूलः खेचरः सिद्धिदः परः पा-
रदः

सकलरोगहारसूतः षड्रसोनि-
खिलयोगवाहकः पञ्चभूतम-
यश्च कीर्त्तितस्तेन तद्गुणा ग-
णो विराजते ॥ अथ रसस्य शोध-
न विधिः तत्रस्वेदने नानाधान्यै-
र्यथा प्राप्तैस्तुषवर्जैर्जलान्वितैः
मृद्भाण्डे पूरिते वह्ने यावदम्लत्वमा-
प्नुयात् तन्मध्ये भृङ्गराजाम्लएरी।
विष्णुक्रान्ता पुनर्नवा मीनाक्षी।
चैव सर्पाक्षी सहदेवी शतावरी
त्रिफला गिरिकर्णीच हंसपा-
दी च चित्रकः समूलं कुट्टयित्वा
तु यथालाभं विनिःक्षिपेत् सू-
तस्य भागमध्येन धान्याम्लक-
मिदं स्मृतं स्वेदनादिषु सर्व्वत्र।
रसराजस्य योजयेत् विष्णुक्रान्ता
गिरिकर्णीच अपराजितैव श्वेत
नील पुष्पभेदात् अम्भोऽहि सार ॥
गाल्वा तदभावे प्रयोजयेत्
तदभावे धान्याम्लाभावे भूषणं
लवणं राजी रजनी त्रिफलाई-
कं महाबला नागबला मेघ-
नादः पुनर्नवा मेषशृङ्गी चि-
त्रकंच नवसारं समंसमं पत-
त्समं लब्धस्तेवा पूर्व्वोक्ते नैवपेष-
येत् मलिम्मलेन कल्केन वस्त्रमे
शतमात्रकं तन्मध्ये निःक्षिपेत्
सूतं बध्वा तत्र दिनं पचेत् दो-
लायन्त्रेऽ ॥

म्लसंयुक्ते जायते स्वेदितो रसः।
मेघनादः चवलाईशाकविशेषः
मेषशृङ्गी मेढाशृङ्गी तदलाभे।
कर्क्कटशृङ्गी ग्राह्या नवसारं नौसा-
दर अम्लञ्च मूलकानल सिन्धूत्थ
भूषणाई करालिकाः रसस्य षो-
डशांशेन द्रव्यं युञ्ज्यात् पृथक्पृथ-
क् द्रवोषधकमानेषु मितेमान-
मिदं बुधैः प्रदाहृतेषु चैतेषु स-
तं अत्यम्लकाञ्जिके स्वेदयेद्दिनमे-
कंच दोलायन्त्रेण बुद्धिमान् स्वे-
दाम्लिनो भवेत् सूतो मर्द्दनाच्च।
स्तु निर्म्मलः मूलके मवरुअन।
लश्चित्रकं भूषणं त्रिकटु राजि-
का राइ ॥ अथ मर्द्दने इष्टिका।
चूर्णं चूर्णाभ्यां माटी मर्द्दयेत् रसस्त-
तः दशभागैकेन सिन्धूत्थ राजिका
गृहधूमकैः अम्लञ्च कुमारिका
चित्रक रक्तसर्षपैः क्रमैःकषा-
यैः बृहती विनिक्षिप्तैः फलत्रि-
केण पिविमर्द्दितो रसो दिनत्रयं
सर्व्वमलैर्विमुच्यते ॥ अथ मूर्च्छ-
ने भूषणं त्रिफला वन्ध्याकर्कोटी
तुलाद्रयाविते: चित्रकोरिण ॥
निशाक्षार कन्याकनकद्रवैः
सूतं कुर्व्वतेन सूर्येण वारानसा-
माभि मर्द्दयेत् द्रव्यैः संमूर्च्छि-
तः सूतः सञ्जायते समाधि कुत्सका-
म् वन्ध्याकन्दं वाकस्थ समाकंद
लताहंय ॥

खोटी कर्दै आवजी कटैयां कुमा-
री कुमारी मेचका निम्न हरिद्रा ता-
दृः पवनारः कन्यांग साविका अ-
र्कः अर्कपत्ररसः कनकः धत्तूर-
द्रवः ॥ अथोर्द्ध्वपातने मयूरग्रीव
ताप्याभ्यां नष्टपिष्टीकृतस्य च या-
ते विद्याधरेकुर्य्यात् रसेन्द्रस्यार्द्ध्वपात-
नं सूतः स्यादूर्द्ध्वपातेन सर्व्वदोष-
विवर्ज्जितः मयूरग्रीवा तुतिया ता-
प्यः रूपमाखी नष्टपिष्टीकृतस्य
कुमारिका द्रव्ययोगे नतावन्मर्द्दने
कर्त्तव्यं यावत् पारदः दृष्टेन दृश्य-
ते इत्यर्थः विद्याधर यन्त्रे डमरुय-
न्त्रे ॥ अथाधः पातने त्रिफला ॥
शिग्रु शिखिभिर्लवणासुरि संयुतैः
नष्टपिष्टं रसं कृत्वा लेपयेदूर्द्ध्वभाज-
ने ततोदीप्तैरधःपात कुर्यात्स्य।
मकारयेत् यन्त्रेभूधर संज्ञेन ततः
सूतो विशुद्ध्यति स्वेदनादिक्रि ॥
यातिस्तु दोषयनोसौ यदाभवेत्
तदाकार्य्यांगिकुकृते प्रयोज्यः स-
र्व्वकर्म्मसु ॥ अथ शब्दधोष द्र।
शोधन विधिः रहकन्यारस-
नं त्रिफलाग्निं चित्रको विषं
हन्ति तस्मादेभिर्मिश्रो वारान्।
सम्मर्द्दयेत् सप्त ॥ अथ सर्व्वदो-
षहरः संक्षिप्तः शोधनविधिः
कुमारिका चित्रक रक्तसर्षपैः

कृतैः कषायैर्बृहती विमिश्रि।
तैः फलत्रिकेणापि विमर्दितो
रसोदिन त्रये सर्वमलैर्विमुच्यते
एवं कदर्थितः सूतः षण्डाभ
वतिनिश्चितं वह्निवधीकषाये
ण स्वेदितः सवलीभवेत् सर्पा
क्षी चिंचिकावन्ध्या भृंगाह्वैः स्वेदि
तोबली ततः सपावकद्रावैः स्वि
न्नः स्यादतिदीप्तिमान् सर्पाक्षी
नागफणी चिंचिका अग्निलीव
न्ध्याकर्कोटकी भृंगः भृंगराज
तः अह्निशस्ता पावकः चित्रकः
अथरसस्यमारणविधिः एमसा
र्द्धे रसेनैतौ गन्धकेनवसादवे या
मैकं मर्दयेदम्ले भागेकृत्वा समे।
समे काचकूप्यां विनिःक्षिप्य ता
म्रस्य द्व स्त्रपुद्वया विलिप्य परि
तोवर्के मुद्रां दत्वा विशोषयेत् अ
धः सच्छिद्र पिठरी मध्ये कूपीं नि
वेशयेत् पिठरी वालुका हैरं भृ
त्वा कूपिकागले निवेशयत्तु
स्या भट्ठी वह्निः कुर्यात् क्रमैः
प्राग्नैः तस्मादल्पऽधिकं किंचि
त् पावकं ज्वालयेत्क्रमात् ए
वं द्वादशाभिर्यामैः म्रियते वसुड
तमः स्फोटयेत् स्वांगशीतं ततः
मर्द्दितं गन्धकं त्यजेत् अधः संस्थ
मृतं सूतं शक्तीयावेत मात्रया य
था ॥

चिताग्निपानेन सर्वकर्मस्य यो
जयेत् ॥ अथान्यप्रकारः अ
पामार्गस्य बीजानां मूषायुग्मं प्र
कल्पयेत् तत्संपुटे क्षिपेत् सूतं
मलपुट्टस्य मिश्रितं मलपुंःका
ष्ठोडुम्बरिका द्रोणपुष्पी प्रसूना
नि विडंग मिरिमेदकः पतञ्चूर्णं
मधुमध्ये च दत्वा च द्वारमदीपयेत्
तद्वोल माषमेतस्य क मूषामूषा
संपुटे सुधीः अहोदत्वा प्रयोगाषाय
त्वा ततो गजपुटे पचेत् पकेनै
वपुटेनैव सूतकं भस्म जायते
तत्प्रयोज्यं यथास्थाने यथा
मात्रं यथाविधि ॥ अथान्यप्र
कारः काष्ठोदुम्बरिकाद्रवैः ॥
रसं किंचिद्विमर्द्दयेत् तद्द्रुग्ध
दुग्धद्रव्यैः अथ मूषायुग्मं प्रक
ल्पयेत् क्षिपात् तत्संपुटे सूतं तत्र
मुद्रां प्रदीपयेत् धृत्वा तद्वोलकं
मात्रेन रसमूषा संपुटे सुधीः ॥
पचेद्गजपुटे तेन सूतकं याति भ
स्मतां अन्यः प्रकारः नागवल्ली
रसैर्मृष्टः कर्कोटीकन्दगर्भितः
मृत्तमूषा संपुटे पक्कः सूतो या
ति च भस्मतां इतिभावप्रकाशः
अथ पारद शिवलिंग निर्माण
विधिः पारदे शिवनिर्माणे ना
नाविघ्नं यतः प्रिये अतएव महे
शानि शान्तिं ॥

स्वच्छपनं चरेत् पारदं शिववीजं
हि ताडनं नहि कारयेत् ताडना
द्धित नाशः स्यात्ताडनाद्धितहा
नता ताडनात् मन्त्रोगयुक्तं ते ताडा
नात्मरणं भवेत् द्वादशं पार्थिव
वं लिंग अपचा रौद्र षोडशैः पद्रा
दि स्वच्छ निर्माणं रवितं शुक्लमे
वंवा अरुचस्य यथायोग्यं युग्
मवस्त्रं निवेशयेत् भोगयोग्यम
दातव्यं मधुपर्कं कुलेश्वरि अ
लंकारं यथाशक्ति दद्यात्क
स्नानादेनतो पूजयेत् कृयत्नेन।
बिल्वपत्रेण याद्धृति ताडलोके
न विधिना अभिषेकेन्नाभुतं जयेत्
आदौ पंचाक्षरं मन्त्र मष्टोत्तरशतं।
जपेत् पूजांते अजपेत् पश्चात् अ
सादास्यमहामन्त्रं दक्षिणां समा
चरेत् हविष्याशी जितेन्द्रियः तो ह
लेचतथामत्स्य वर्जयेत् कदाचन।
अस्मिंस्तन्त्रे हविष्यान्नं तोहलं मीन
मुत्तमं होमयेत् परमेशानि दशां
शं वा शतांशकं होमस्य दक्षिणा
कार्या तदा विघ्नैर् न लिप्यते ततः
परस्मिन् दिवसे पारदं स्नानयेत्सु
धीः तस्योपरि जपेन्मन्त्रं सर्ववंच
नवात्मकं व्योमबीजं शिवाख्यं च
वर्णाद्यं विन्दुमस्तकं वाग्बीजं चेतु

युते त्रितयं अष्टकं प्रिये इमं मन्त्रं
महेशानि प्रजपेद्दो यथोपरि ॥
पारदे प्रजपेन्मन्त्रं अष्टोत्तरशतं य
दि तदैवौषधयोगेन बद्धो भवति
नान्यथा ततः परस्मिन् दिवसे स्पृ
शयेत् प्राणवल्लभे वरयेत् सर्वक
र्मारं यथोक्त विभवावपि स्ववर्णं
चमत्काकारं कर्णयुग्मे निवेशये
त् वत्सकोण युतं स्वर्णं ग्रीवायां
समनोहरं हस्तद्वये महेशानि द
द्यात्वलय युग्मकं वलयं शुक्लवा
रिंच अङ्गुरीयं तथैवच उर्म्मीदद्या
त् पीतवर्णं लोमवस्त्रं युगं शिवे
एवं कृत्वा महेशानि शिवरूपं वि
चिंतयेत् अथातः संप्रवक्ष्यामि ॥
विधानं शृणु पार्वति अग्नीरेचैव
संस्थाप्य छिण्टी पत्ररसेनच मण
वेन समालोड्य कुर्यात् कर्दमव
त् प्रिये निर्माणयोग्यं तद्दृष्ट्वा यदि
स्यात्सुसुन्दरि तदा निर्माय तल्लिं
गं पुनर्देहनं चरेत् रवपुष्पसंपु
ते वह्नेरंगारे च करीषके किंचि
द्देच प्रकर्तव्यं यतो दृढतरं भवेत्
इति मात्रिकाभेदतन्त्रे ८ पटलः
सगर राजकृत अकेशा [illegible]
ज्ञाति विशेषः अस्य विवरणं।
पञ्चवमाहे द्रष्टव्यं पारदाः।

कः पुं देशविशेषः ॥ इति शब्दरत्नावली ॥ स तु गड्डदेशैक भाग इति केचित् ॥

पारदारिकः पुं पारजायिकः परदाररतः परदारान् गच्छति इत्यर्थे ठिकण्प्रत्ययनिष्पन्नः इति सिद्धान्तकौमुदी यथा कामाङ्गनयद्विरदिं साधितेयत्र गौतम कलत्रकामिनः पारदारिक विलासमाहमन्देव दुर्मदं कैकिभिः किमिषु इति नैषधे १८ सर्गः तस्य दोषा यथा यः परस्त्रीषु निरतस्तस्य श्रीर्गतेयशः सच निंद्यः पापयुक्तः शापस्तस्य समासच इति ब्रह्मवैवर्त्ते गणेशखण्डे २९ अध्यायः ॥

पारदार्य्यं क्ली परदारगमनं यथा भृताद्ध्ययनादानं भृतकाध्यापनन्तथा पारदार्य्यं पारिवित्त्यं वार्धुष्यं लवणक्रिया इत्युपपातकगणे याज्ञवल्क्यः ॥

पारदेश्यः त्रि प्रोषितः पारदेशिकः पथिकः परदेशं गतः इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नः ॥

पारमार्थिकः त्रि परमार्थयुक्तः यथा गन्तागतिर्लोको नलोकः पारमार्थिकः इति पुराणं अंशो यथा त्रिवतः पंचसमाह नव द्वादश पञ्च च क्रमेण वटिकास्तेन लब्धं पुण्यं पारमार्थिके इति तिथ्यादितत्त्वम् ॥

पारम्पर्य्यं क्ली आम्नायः अनुक्रमः इति हेमचन्द्रः यथाच यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः तत्तेनावमन्येत धर्म्मस्तत्रैव तादृशः इति विवादभङ्गार्णवः परम्पराशब्दश्च ॥

पारम्पर्य्योपदेशः पुं उपदेशः परम्परा तत्पर्य्यायः ऐतिह्यं २ इतिह २ इत्यमरः परम्परैव पारम्पर्य्यं स्वार्थे ष्यञ् पारम्पर्य्येणोपदेशः पारम्पर्य्योपदेशः तत्र इतिह शब्दोऽव्ययः यथा इतिह इहैव कल्ये इह वटे यक्षः प्रतिवसतीति इति पर्व्वे रूपे इति गच्छति इतिह इत्यनुनादिति ञः इतिह शब्दात् स्वार्थे च ऐतिह्यं इति भरतः ॥

पारलौकिकः त्रि परलोकसम्बन्धी यथा दानपात्रमधमर्णमिहैकग्राहि कोटिगुणितं दिवि दायि साधुरेति सुकृतैर्यदि कर्त्तुं पारलौकिककुसीदमसीदत् इति नैषधपंचमसर्गः ॥

पारवतः पुं पारावतः इति द्विरूपकोषः ॥

पारशवः पुं शूद्रायां विप्रतनयः इत्यमरः स तु निषादजातिः यथा ब्राह्मणाद्वैश्यकन्यायां अम्बष्ठो नाम जायते निषादः शूद्रकन्यायां यः पारशव उच्यते शूद्रकन्यायां शूद्रायां निषादः पत्यन्तेय तः संज्ञान्तरेण पारशवश्चोच्यते तस्योपनयनसंस्कारनिषेधमाह स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः सजीवन्नेव शव तस्मः इति मनुः कुल्लूकभट्टो परस्त्रीतनयः शस्त्रे तल्लौहे इति मेदिनी परदारजाते त्रि ॥

पारशीकः पुं पारसीकः इत्यमरटीकायां रमानाथः ॥

पारश्वधः पुं परश्वधधारी पारश्वधिकः इति हेमचन्द्रः ॥

पारश्वधिकः पुं परश्वधहेतिकः कुठारधारी तत्पर्य्यायः पारश्वधः २ परश्वधायुधः ३ इति हेमचन्द्रः ॥

पारसिकः पुं पारसीकः ॥ इति शब्दरत्नावली ॥

पारसी स्त्री पारस्यभाषा पारस्यदेशभवविद्यादि तदारम्भदिने ॥ यथा ज्येष्ठाश्लेषामघा पूर्वा रेवती भरणी द्वये विशाखार्द्रा तेन आषाढ़ा शतभे पापवासरे लग्ने स्थिरे वर्ज्जचन्द्रे च पारसीमारवीं पठेत् इति गणपतिमुहूर्त्तः

पारसीकः पुं पारसीकदेशीय इव घोटकः तत्पर्य्यायः ॥ वानायुजः २ इति केचिदित्यमरटीकायां भरतः पारदनः ३ आवहृजः ४ इति त्रिकाण्डशेषः देशविशेषः तत्पर्य्यायः पारसिकः २ इति शब्दरत्नावली ॥ तद्देशभवे त्रि ॥

पारस्त्रैणेयः त्रि परस्त्रियाः सुतः ॥ इत्यमरः ॥

पारा स्त्री ॥ नदीविशेषः सा तु पारिपात्रपर्वतोद्भवा इति मेदिनी ॥

पारापतः पुं पारावतः इत्यमरटीकायां रमानाथः ॥

पारापारः पुं पारावारः इति ॥ द्विरूपकोषः ॥

पारायणं क्ली साकल्यवचनं इत्यमरः पारसमाप्तिं अयते गच्छति प्राप्नोति पारायणं नन्द्यादित्वात् ल्युः आविष्टलिङ्गत्वान्न लिङ्गेन सामानाधिकरण्येपि क्लीबमेव पारायणं यथा पातपारायणारम्भ पारायणं नामलङ्केति

ममैष्यतीति भक्तितः इतिभ
वतः ॥ श्रुत्वापाठः तत्र श्री
भागवतपाठक्रमो यथा श्री
पार्वत्युवाच स्कन्दे द्वादशभिः
श्लोकैः श्रीमद्भागवतेशभो शुक।
स्तत्श्रावयामास महाराजंपरी
क्षितं सप्ताहेनैभि भगवन् श्रु
तेतत्रतत्र तस्यानुक्रममिच्छा
मि श्रोतुंतत्फलमेवच सदा
शिवउवाच साफल्ये ह्येत्महाभा
गे लोकयत् प्रवक्ष्यामि पारा
यणं मितित्वाते सद्योमुक्तिप्र
दं नृणां शुकस्याक्लिक्रमेणैव।
पठेद्भागवतन्नरः श्रावयेद्वा
ऽप्ययाहापि तस्मानत्तंफलंभवे
त् कृतनित्यक्रियःप्रातःकुश
हस्तःकृतासनः देवद्विजगुरू
न्नत्वा ध्यात्वाविष्णुंसनातनं द्वैपा
यनंनमस्कृत्य शुकदेवंचभक्तितः
द्विरण्यात् वधंयावत् प्रथमेहनि
कीर्तयेत् चरितंभवतस्यापि द्वि
तीये ऽथ तृतीयके मत्स्यंवामन
तस्यापि यज्ञकूर्माःस्वयंहरिः
चतुर्थदिवसेचैव दशमेहरिज
न्मच पंचमेतु पठेद्विद्वान् रु
क्मिण्याहरणावधि षष्ठेवोद्ध
वसंवादं सप्तमेतु समापयेत् अ
ध्यायं प्राणविरमेणत्रमध्येकदाचन

कृतेविरामे मध्येतु अध्यायादिंपठे
त् पुनः पठेदर्थं बुध्यमानः श्राव
येद्वैष्णवोत्तमे श्रोतृ तथाऽस्त्रवो भू
त्वा शुश्रूषयाङ्कितसरः अध्यायेस
माप्तिमासैके तथाह्ययाचूद्ददितिरेणस
माप्तौचततोयेतु स्वाणिष्टंगोनिवेद
येत् कृष्णायवैसर्वं होमं सावतान्
भोजयेत्ततः पवंयः कुरुतेदेविपा
ठं भागवतस्यतु श्रवणं श्रावणं
वापि सद्भष्टांगतिमाप्नुयात् पतत्
पारायणंनाम सर्वकामफलप्रदे
पाठकालेतु त्रिदशा मुनयश्चतपो
धनाः पार्षदाश्च तथाविप्राःसा
न्निध्यं तत्रकुर्वते पतत्तेकथितंदे
वि पारायणविधानकं विस्मयी
ति करंपुण्यं किंभूयःश्रोतुमिच्छ
सि इतिपद्मे पातालखण्डे पाराय
णमाहात्म्ये ६ अध्यायः ॥
अपिच कुमाराऊचुः अथतेसंप्र
वक्ष्यामः सप्ताहश्रवणेविधिम्
महायैर्वसहायैश्च प्रायःसाध्यो
विधिःस्मृतः दैवज्ञंतुसमाहूय
मुहूर्तंपृच्छ्यत्नतः विवाहेयाह
शोवित्तं तादृशंपरिकल्पयेत् ॥
नभस्य आश्विनोर्ज्जौच मार्गशी
र्षः शुचिर्नभाः ॥ पते मा ॥
साःकथारंभे श्रोतृणां ॥

मोक्षसूचकाः मासानांनिर्णयो
यानि तानित्याज्यानिसर्वथा स
हायाश्च तपवात्र कर्तव्याःसोद्य
माश्चये देशेदेशे तथायेचवा
र्त्ता प्रेषणमयत्नतः भविष्यतिक
थाचात्र आगन्तव्यंकुटुम्बिभिः।
दूरे हरिकथाः केचिद् दूरेचाच्यु
तकीर्त्तनाः स्त्रियःशूद्रादयोयेच
तेषांबोधो यतोभवेत् देशेदेशे
विरक्ताये वैष्णवाःकीर्तनोत्सु
काः तेष्वेवपत्रं प्रेष्यंच तल्लेख
नमितीरितं सतांसमाजोभवि
ता सप्तरात्रंसुदुर्लभः अपूर्वर
सरूपैव कथाचात्रभविष्यति
श्रीभागवतपीयूष कथारस।
लम्पटाः तवत्तश्चतदाशीघ्र
मायातप्रेमतत्पराः नावकाशः
कदाचिद्वा दिनमात्रंतथापिवा स
र्वथागमनंकार्यं क्षणोऽत्रैवसुदु
र्लभः पवमाकारणंतेषां कर्त्त
व्यं विनयेनच आगन्तुकानांसर्वे
षां वासस्थानानिकल्पयेत् ती
र्थे चैववनेचापि गृहेवाश्रवणं
स्मृतं विशालावसुधायत्र क।
र्तव्यंतत्कथास्थलं शोधनंमा
र्जनंभूमे लेपनंधातुमण्डनं गृ
होपस्करमुद्धृत्य गृहकोणेनि
वेशयेत् अर्वाक् पंचाहतो ॥

यत्नादास्तीर्णानिमलेपयेत् क
र्त्तव्यं मण्डपंप्रोच्चै कदलीखण्डमण्डि
तं फलपुष्प दलैर्विष्वक् वितान
नेच विराजितं चतुर्दिक्षु ध्वजारो
पो बहुसम्पद्विराजितः ऊर्द्ध्वंस
प्तैवलोकाश्च कल्पनीयाःस्ववि
स्तरं तेषुविप्राविरक्ताश्च स्थाप
नीयाप्रबुध्यच पूर्वंतेषामास
नानि कर्त्तव्यानिकथोत्तरं वक्तु
श्चापि तथादिव्यं मासनंपरिक
ल्पयेत् उदङ्मुखोभवेद्वक्ता श्रो
ता वै प्राङ्मुखस्तदा प्राङ्मुखोऽ
पभवेद्वक्ता श्रोता चोदङ्मुख
स्तदा अथवापूर्वदिकज्ञेयाश
प्यूजकमध्यतः श्रोतृणामाग
मःप्रोक्तो देशकालादिकोविदैः
विरक्तोवैष्णवोविप्रो वेदशास्त्र।
विशुद्धिमान् दृष्टान्तकुशलोधीरो
वक्ताकार्योतिनिस्पृहः अनेक।
कर्मविभ्रान्ताः स्त्रैणाःपाषण्ड
वादिनः शुकशास्त्रकथोच्चारे।
त्याज्यास्तेयदिपण्डिताः वक्तुःपा
र्श्वसमर्थार्थं मन्यःस्थाप्यस्तथा
विधः पण्डितःसंशयच्छेत्ता ॥
लोकबोधनतत्परः वक्त्राक्षौरंप्र
कर्त्तव्यं दिनादर्वाक् व्रताप्तये अ
रुणोदयेऽसौनिर्वृत्य शौचंस्ना
नंसमाचरेत् मण्डलंच प्रकर्त्तव्यं
तत्रस्थाप्यो ॥

सूविस्तथा कुसुमैश्च प्रियमंत्रेण
चैवेत्यज्ञाविधिक्रमात् प्रदक्षिण
नमस्कारान् स्तोत्रैस्तुतिमाच
रेत् संसारसागरे मग्नं दीनं मां
करुणानिधे कर्मग्राहगृहीतांगं
मामुद्धर भवार्णवात् श्रीमद्भा
गवतस्यापि ततःपूजाप्रयत्नतः
कर्तव्याविधिनाप्रीत्या धूपदीप
समन्विता ततस्तु श्रीफलंधृत्वा
नमस्कारंसमाचरेत् स्तुतिःप्रस
न्नचित्तेन कर्तव्याकेवलंतदा श्री
मद्भागवतरूपेण त्वं प्रत्यक्षःकृष्ण
एव हि स्वीकृतोसिमयानाथ
मुक्त्यर्थं भवसागरे मनोरथोमदी
योयं सफलःसर्वथात्वया नि
र्विघ्नेनैव कर्तव्या दासोहंतवके
शव एवंदीनं वचःप्रोक्त्वा वक्तारं
चाथपूजयेत् संतुष्य वस्त्रभूषाभिः
स्तोत्रैस्तैश्च सत्कृतेत् शुकरूप
प्रबोधज्ञ सर्वशास्त्रविशारद
एतत् कथाप्रकाशेन मदज्ञा
नं विनाशय तदग्रे नियमःपश्चा
त् कर्तव्यःश्रेयसेमुदा सप्तरात्रं
यथाशक्त्या धारणीयः सम्वैः
हि वरणंच विप्राणांकथाभा
गनिवृत्तये कर्तव्यं नैहरेर्जप्यं द्वाद
शाक्षरविद्यया ब्राह्मणान्वैष्णवा
न्वान्यान् तथाकीर्तनकारिणः
नता ॥

संपूज्य दत्वार्थं स्वयमागममाविशे
त् लोकवित्तधनागारपुत्रचिंता
व्युदस्य यः कथाचित्तःशुद्धमतिः
स लभेत् फलमुत्तमं आसूर्योदय
मारभ्य सार्द्धत्रिप्रहरांतकं वाच
नीयाकथा सम्यक् धीर`` सुधी
मता कथाविरामः कर्तव्यो मध्या
न्हे घटिकाद्वयं तत्कथामनुकार्यं
वै कीर्तनं वैष्णवैस्तदा मलमूत्र
जयार्थं हि लघ्वाहारःसुखावहः ह
विष्यान्नेन कर्तव्योह्येकवारं कथा
र्थिना उपोष्य सप्तरात्रं वा शक्तिश्चे
त् श्रृणुयात्तदा घृतपानं पयःपानं
कृत्वा वा श्रृणुयात्सुखं फलाहारे
ण वा भाव्य मेकभक्तेन वा पुनः सु
खसाध्यं भवेद्यत्तु कर्तव्यं श्रावणे
यतत् भोजनन्तु वरं मन्ये कथाश्र
वणकारकं नोपवासो वरः प्रोक्तः
कथाविघ्नकरोयदि सप्ताहव्र
तिनां पुंसां नियमान्श्रृणु नारद
विष्णुदीक्षाविहीनानां नाधिका
रः कथाश्रवे ब्रह्मचर्यमधःस्व
प्नः पत्रावल्यां च भोजनं कथा
समाप्तौ भुक्तिं च कुर्यान्नित्यं क
थाव्रती द्विदलं मधु तैलं च गरि
ष्ठान्नं तथैव च भावदुष्टं पर्यु॥
षितं जह्यान्नित्यं कथाव्रती सुमं
कंचकलिंगं च दग्धमन्नं समुत्सृजेत्

कं निष्पावमामिषांश्च वर्ज
येत्कथाव्रती पलांडुं लशुनं
हिंगुं मूलकं गृंजनन्तथा नालि
कामूलकूष्मांडं नैवाद्याच्च क
थाव्रती देववैष्णवविप्राणां गुरु
गोव्रतिनां तथा स्त्रीराजमहतां नि
न्दां वर्जयेच्च कथाव्रती कामक्रो
धं मदं मानं मत्सरं लोभमेव च द
म्भमोहं तथा द्वेषं दूरयेच्च क
थाव्रती रजस्वलान्त्यजम्लेच्छ
पतित व्रात्यकैस्तथा द्विजद्वि
ड्वेदबाह्यैश्च न वदेयः कथाव्र
ती सत्यंशौचं दयां मौनं मार्जवं
विनयं तथा उदारं मानसं तद्व
त् कुर्यादेवं कथाव्रती दरिद्रश्च
क्षयी रोगी निर्भाग्यः पापकर्मवान्
अनपत्यो मोक्षकामः श्रृणुयात्
सप्तकथामिमां अपुष्पा काकवन्
ध्या च वन्ध्या याच मृतार्भका स्र
वद्गर्भा च या नारी तया श्राव्या प्र
यत्नतः एतेन विधिना दत्तं तद
क्षय तरं भवेत् अत्युत्तमादिना
सप्त कोटियज्ञफलप्रदा एवं हि
ताव्रतविधि उद्यापनमथाचरेत्
तज्जन्माष्टमीव्रतवत् कर्तव्यं फ
लकांक्षिभिः अकिंचनेषु भक्तेषु
प्रायो नोद्यापनाग्रहः श्रवणेनै
व पूतास्ते निष्कामा वैष्णवा य
तः एवं नगाह ॥

यत्तेस्मिन् समाप्ते श्रोतृभिस्तदा
पुस्तकस्य च वक्तुश्च पूजा कार्या
तिभक्तितः प्रसादतुलसीमाला
श्रोतृभ्यश्चाथ दीयतां मृदंगताल
ललितं कीर्तनं कीर्त्यतां ततः जय
शब्दो नमःशब्दः शंखशब्दश्च गीय
तां विप्रेभ्यो याचकेभ्यश्च वित्तम
न्नं च दीयतां विरक्तश्चेद्भवेत् श्रो
ता गीता वाच्या परेहनि गृहस्थ
श्चेत्तदा होमः कर्तव्यः कर्मशान्तये
प्रतिश्लोकं च जुहुयाद्विधिना दश
मस्य च पायसं दधिसर्पिश्च तिला
दिमधुसंयुतं अथवा हवनं कुर्या
द्गायत्र्या सुसमाहितः तन्मयत्वा
त् पुराणस्य परमस्य स्वतः होम
म्भाशक्तो बुधो होमस्य दद्यात्तत्फल
सिद्धये नानाछिद्रनिरोधार्थं सू
नताधिक्ययोस्तथा दोषयोःप्र
शमार्थञ्च पठेन्नामसहस्रकं ॥
तेन स्यात् सफलं सर्वं नास्त्यस्माद
धिकं यतः द्वादशब्राह्मणान् प
श्चात् भोजयेन्मधुपायसैः दद्या
त्सुवर्णं धेनुं च व्रतपूर्णत्वसिद्ध
ये शक्तौ पलत्रय मितं स्वर्णसिंह
विधाय च तत्रास्य पुस्तकं स्था
प्य लिखितं ललिताक्षरं संपूज्या
वाहनाद्यैस्तु उपचारैः सदक्षि ॥
णं वस्त्रभूषणगन्धाद्यैः ॥

हृजिताय यतात्मने आचा॥
र्य्याय सर्पीर्दत्वा शुक्रः स्माङ्गव
वेधनैः ॥ एवं कृते विधानेच ॥
सर्वपापनिवारणे फलदंस्मात्
पुराणन्तु श्रीमद्भागवतेशुभम्
धर्म्मार्थकाममोक्षाणां साधने
नात्रसंशयः इतितेकथितंसर्वं।
किंभूयःश्रोतुमिच्छसि ॥ श्रीम
द्भागवतेनैव भक्तिमुक्तिःप्रका
शिता इतिपाद्मोत्तरखण्डे श्री।
भागवतमहात्म्ये ६ अध्यायः
पारायणिकः पुं पाठकः छा
त्रः पारायण वर्त्तयतीत्यादिना
ठक् प्रत्ययनिष्पन्नः इतिसि।
द्धान्तकौमुदी पारावतः पुं प्र
स्तरः इतिशब्दरत्नावली ॥
पारावतः पुं पारावतिदेशेजा।
तः पक्षिविशेषः पायरा इति।
भाषा तत्पर्य्यायः छेदकण्ठः
२ कपोतः ३ रक्तलोचनः ४।
इतिअमरः पारापतः ५ कल
रवः ६ अरुणलोचनः ७
मदनकाकुरवः ८ कामी।
९ रक्तेक्षणः १० मदनमोहन
तस्तत्र संमन्त्रशान्तिमन्त्रकैः। इ
तिकालिकापुराणे ८६ अध्यायः
पिण्डीतकः पुं मदनद्रुमः इम
रः भगरः फनिक्तकः इति।
विश्वः पिण्डीभगरः पुं भगर।
विशेषः तत्पर्य्यायः कपव।
र्द्धनः २ इतित्रिकाण्डशेषः॥
पिण्डीतगरक पुं तगरं इति
राजनिर्घण्टः ॥ ॥
पिंडीतकः पुं महापिण्डीतकः
इतिराजनिर्घण्टः॥ पिण्डीपु
ष्पः पुं अशोकवृक्षः इतिराज
निर्घण्टः पिण्डीरः पुं दाडिमवृ
क्षः इति ॥

त्रिकाण्डशेषः हिण्डीरः इत्य।
मरटीकायांरायमुकुटः नीरः।
से त्रि इतिहारावली॥
पिण्डीशूरः पुं स्वगेहमात्रेवस।
तृप्तद्वेषी तत्पर्य्यायः गेहेन
र्द्दी २ गेहेशूरः ३ इतिहेमचन्द्रः
पिण्डोलिः स्त्री भुक्तसमुत्क्रितः
इतिहेमचन्द्रः॥ पिण्या॥
स्त्री ज्योतिष्मती पण्यते स्तूयते
रोगहन्तृत्वात् पण्या पणाङ्कात्
वह्लौतास्तौ मूर्द्धण्यान्तःतथा
नीयया इतियःनिपातनादत्।
र्द्धत् पर्णोपति पवति स्वामी इ।
त्यमरभरतौ॥ पिण्याकः
पुं क्ली तिलकल्कः हिंगु वा
क्लीकं सिह्लकः इतिमेदिनी।
आयस्य भक्षणेदोषा यथा पि
ण्याकं भक्षयित्वा तथैवमाशु
परस्पृति तस्यैवेष्णस्नेक्षणि।
प्रायश्चित्तं स्वेशोधने उल्कोदश
वर्षाणि कृच्छ्रपत्तसमाह्वयः
जायतेमानवस्तत्र मम्मकर्म्मः
परायणः इतिवाराहपुराणं
पितरौ पुं जनक जनयित्र्यौ।
माताच पिताचेति विग्रहे द्वि।
कस्मादेकशेषेपि तरावितिशे
वः इतिभरतः तत्पर्य्यायः॥
मातापि॥

तरौ २ मातरपितरौ ३ तातजन॥
यित्र्यौ ४ इत्यमरः तयोरभक्त्या।
पालने दोषायथा पितृमातृगु।
हेष्वापि भक्तिहीनेनपालयेत्वा
चाचताड्येन्नित्यंस्वामिनंकुत्स्ताच
या साकृततन्तीतिविख्याता पापि।
नो तास्तेनरः वह्निकुण्डेमहा।
घोरे सच साचपतातिच तत्रवसे
वसन्त्येव यावच्चन्द्रदिवाकरौ ततौ
भवेन्नलौकाच जन्मसप्त ततः।
शुचिः इतिब्रह्मवैवर्त्ते प्रकृति।
खण्डे ४६ अध्यायः॥
पिता[४२] पुं पाति रक्षत्यपत्यं यः ॥
वाप इति भाषा तत्पर्य्यायः
तातः २ जनकः ३ इत्यमरः प्र
सविता ४ वप्ता ५ जनयिता ६ गु
रुः ७ जन्मदः ८ जन्मः ९ जनिता
इतिशब्दरत्नावली बीजी ११ वप्तः
इतिहेमचन्द्रः॥ तस्यमाहात्म्यं त
दर्जणेव यथा मात्तः धन्याश्च सर्वे।
भ्यः सर्वेषां जनकोभवेत् अहोया।
समप्रसादेन सर्वान् पश्यतिमान
वः जनको जन्मदाताच रक्षणा
च्च पितान्तरं तातोविस्तीर्णः।
करणात् कलया स प्रजापतिः
इतिब्रह्मवैवर्त्ते गणपतिखण्डे
४४ अध्यायः॥ स्वच गुरुः प्र
या उपाध्यायः॥

१०
१२



पिता ज्येष्ठो भ्राता चैव महीपतिः
मातुलः श्वशुरस्त्राता मातामह
पितामहौ । बन्धुर्ज्येष्ठः पितृव्यश्च
पुंस्येते गुरवः स्मृताः ॥ इति कौर्म्मे
उपरिभागे ११ अध्यायः ॥
सोऽपि महागुरुः यथा महागुरुः
नाहविल्लः त्रयः पुरुषस्यातिगुरवो
भवन्ति माता पिता आचार्य्यश्चेति इ
ति शुद्धितत्त्वम् ॥ कामासक्तस्य
पितुर्व्वचनमग्राह्यं यथा पितुर्व्व
चो हि माकार्षीः कामव्यासक्त
चेतसः आत्मानं चाभिषिञ्चस्व
तदर्थं त्वमिहागतः इत्यानन्दे
श्रीरामं प्रति कौशल्यावाक्यं ॥
तस्य पुत्रकृतधर्म्माधर्म्मभागि
त्वं यथा यः पिता स तु पुत्रोऽय
मिति वैदिकी श्रुतिः निगद्य
ते पुराणेन तां शृणुष्व यथातथ्यं
मग्रोष्य सुमहाभागो यः शताहता
त्वमताभुवि श्रेयोह्युपपद्यते सु
तश्रेष्ठा नयास्तुताः तद्विपाकः
पद्यते तथान्येते चलाहताः
तेभ्यः स्माते स्वर्गो इति श्रीहिभ्यः
पि यथा तथा एवं पुत्रैः कृतो
धर्म्म स्तथाधर्म्मश्च भूयते ॥
पितास्ते लिप्यते तेन माचते सः
शाणेकृष्यः नधर्म्मिणां नराः
न्त्वे वीजनाशो ॥ ॥

भवेदिह सर्व्वथा शंसन्ते लोके ।
वीजात् पुनः समुत्थयं श्रयोऽन ।
ये पापनाशनहृषदानाध्यायः ॥
तस्मिन् जीवति वाह्यास्ति लकल्ले
षेवो यथा नवाह्यालिके कृ
ष्णात् यस्य जीवन् पिता स्थितः ॥
तथाज्येष्ठः सोदरश्च यस्य जीव
ति स तथा इति हृदर्ग्म पुरा
णं ॥ उत्पादक पितृपेत्तया
मन्त्रदातृ पितुर्गुरुतरत्वं यथा
उत्पादकब्रह्मदात्रोर्गरीयान्
ब्रह्मदः पिता तस्मान्मन्येत सतते
पितुरप्यधिके गुरुं इति तन्त्रसारः
पञ्चपितरो यथा अन्नदाता भय
त्राता यस्य कन्या विवाहिता ज
नयिता चोपनेता पञ्चैते पितरः
स्मृताः ॥ इति चाणक्यं ॥
सप्तपितरो यथा कन्यादाताऽन्न
दाता च ज्ञानदाताऽभयप्रदः ज
न्मदो मन्त्रदो ज्येष्ठभ्राता च पितरः
स्मृताः इति ब्रह्मवैवर्त्ते श्रीकृ
ष्णजन्मखण्डे ३५ अध्यायः
एकत्रिंशत् पितृगणा यथा
विश्वो विश्वभुगाराध्यो धर्म्मो
धन्यः शुभाननः भूतिदो भूति
कृद्भूतिः पितृणां ये गणा नव
कल्याणः कल्यदः कल्यतरः
कल्यतराश्रयः कल्यताहेतुरनघ

स्विष्टि मे तेगणाः स्मृताः वरोव
रेण्यो वरदो भूतिदः पुष्टिदस्त
था विश्वपाता तथा धाता स
प्तैते च गणाः स्मृताः महान्म
हात्मा महितो महिमावान्महा
वलः गणाः पञ्चतथैवैते पितृ
णां पापनाशनाः सुखदो धनद
श्चान्यो धर्म्मदोऽन्यश्च भूतिदः पि
तृणां कथ्यते चैतत् तथा गणाचत
ष्टये एकत्रिंशत् पितृगणा यै
र्व्याप्तमखिलं जगत् तेमेऽनुतृ
प्तास्तुष्यन्तु यच्छन्तु सदा हितं
इति गारुडे पितृस्तोत्रे ८९ अ
ध्यायः ॥ पितामहः पुंः पु
त्रा पितृपिता वोमरदादा इति
भाषा इत्यमरः ॥ प्रोषस्य पा
र्थायः ॥ आर्यकः २ इति
शब्दमाला ॥ पितामही स्त्री पि
तामहपत्नी ठाकुरमा इति भाषा
इति जटाधरः ॥ पौत्रैः पिताम
हधनविभागकरणे पितामहो
मातृवद्भागोदेयः यथा अस्
ताश्च पितुः पत्न्यः समानांशाः
प्रकीर्त्तिताः पितामह्यश्च सर्व्वाः
स्ता मातृतुल्याः प्रकीर्त्तिताः
इति दायभागे व्यासः ॥ पितृ
केति पितृसम्बन्धि यथा पै
त्रेव पितृकन्यापि पितृस्व

पितृगाने इति शब्दमाला ॥
पितृकाननं क्ली श्मशाने इति
जटाधरः ॥ पितृगृहं क्ली
श्मशाने इति हेमचन्द्रः पितृ
वेश्म च ॥ पितृतर्पणं क्ली पि
तृतीर्थं तर्ज्जन्यङ्गुष्ठयोर्मध्यं ।
इति शब्दचन्द्रिका निवापः इति
हेमचन्द्रः तिलः इति राजनिर्घ
ण्टः पितृतीर्थेन पितृद्देश्यक
जलदाने तस्याङ्गुष्ठाने तर्पण
प्राहे इष्टव्ये पितॄणां तृप्तिमा
त्रं च ॥ पितृतिथिः स्त्री अ
मावास्या यथा अमावास्यादिने
वोत्त तस्याकृशाति लोदकैः ।
तर्पिता मासमेकं तु पितरो यान्ति
तं नान्यथा इति वाराहे पितृस
मस्थितिवर्णने ॥ पितृतीर्थं क्ली
गया इति जटाधरः २२ पितृ
वल्लभ तीर्थानि मत्स्यपुराणे ॥
श्राद्धकल्पे २२ अध्याये द्रष्ट
व्यानि तर्ज्जन्यङ्गुष्ठयोर्मध्यं ॥ इत्य
मरः अन्तराङ्गुष्ठ देशिन्योः पि
तॄणां तीर्थमुत्तमं इति कौर्म्मे उ
परिभागे ११ अध्यायः ॥
पितृदानं क्ली पितृद्देशेना
न्नवस्त्रादिदाने पितृपदं मः
नोमलक्षणं तेन माज्ञादेर्यपि
महराम् ॥ ततमध्यायः ॥

निवापः २ इत्यमरः ॥ नि
वपने ३ पितृदानके ४ इतिश
ब्दरत्नावली मृतस्तूद्दिश्य या
दानं निवापः स प्रकीर्त्तितः
इति भरतः ॥ पितृदानके
स्त्री पितृद्देश्यकदाने इति
शब्दरत्नावली ॥ पितृ
पतिः पुं यमः इत्यमरः पि
तृपिता पुं पितामहः इत्यम
रः पितृप्रसूः स्त्री सन्ध्या
इत्यमरः ॥ पितामही च
पितृप्रियः पुं भृङ्गराजः ।
॥ इति राजनिर्घण्टः ॥
पितृभोजनः पुं माषः इति रा
जनिर्घण्टः ॥ पितॄणां भत्त
ले स्त्री पितृभ्राता पुं पितृ
व्यः इत्यमरः पितृयज्ञः पुं ॥
तर्पणं यथा अध्यापनं ब्रह्म
यज्ञः पितृयज्ञस्तु तर्पणं होमो
दैवो बलिर्भौतो नृयज्ञोऽति
थिपूजनं इति मनुः पितृलो
कः पुं पितॄणां भुवनं यथा
मार्कण्डेय उवाच सर्व्वेषामे
व देवानां साध्यानाञ्च महात्म
नः तस्माद्दत्वा सखप्रभुः सो
पि सप्तासृजज्जीन् मापकेतिते
लोका स्वहातेपरमेष्ठिनः आत्मा
त्मानमेवाथ यज्ञन इतिश्रुतिः ते
षां वै ब्रह्मजातानां महावैकारिका
कर्म्मणा ॥

अपध्यानाभिचारेण महात्मेषा
कृतोयतः प्रकृष्टज्ञानिनः स
र्व्वे भविष्यद्यतसेवायः पवे
वामास्ततस्तेऽपि ब्रह्मणात्मस
मुद्भवाः सद्योवेश्प कतान् ।
पुत्रानुत पायविदिवं प्रजग्मु
तस्तेषु प्रयातेषु त्रिदिवं ब्रह्म
वादिषु ततपुत्राः श्राद्धदानेन
तर्पयामासुरञ्जसा तेच वैमा
निकाः सर्व्वे ब्रह्मणः सप्तमान
सा ततपितृध्यानमन्त्रोक्ते प्र
प्रसुतो व्यवस्थिताः गौरमुखद
वाच येचतेपितरोब्रह्मन् स्वर्गा
कालसमासते क्रियमोवे पि
तृगणा स्तस्मिन् लोके व्यवस्थि
ता मार्कण्डेय उवाच प्रवर्त्तते वर
केचि द्देवानां सोमवर्द्धनाः ।
तेमरीच्यादयः सप्त स्वर्गे तेपि
तरः स्मृताः चत्वारो मूर्त्तिमन्तो
वै त्रयस्तेषाममूर्त्तयः तेषां लो
कनिसर्गञ्च कीर्त्तयिष्यामि तच्छृ
णु प्रभावञ्च महर्षे त्वं विस्तरे
ण निबोधमे धर्म्ममूर्त्ति धरा
स्तेषां त्रयो ये परमा गणाः ॥
तेषां नामानि लोकांश्च कीर्त्तयि
ष्यामि तच्छृणु लोकाः सनातनका
माख्य यत्र तिष्ठन्ति भास्वराः आमूर्त्तय
पितृगणा स्ते वै पुत्राः प्रजापतेः

विराजस्य प्रजाः श्रेष्ठास्ते वैराजा
इति स्मृताः देवानां पितरस्ते
हितान् यजन्तीह देवताः एतेवै
लोकविभ्रष्टा लोकान् प्राप्य स
नातनान् पुनर्युग शतान्तेषु
जायन्ते ब्रह्मवादिनः तेप्राप्यतां
स्मृतिं भूयः सिद्धियोगमनुत्त
मं विप्रयोग गतिं शुद्धां पुनरावृ
त्तिदुर्लभाः एतेस्मिन् पितरः श्रा
द्धे योगिनां योगवर्द्धनाः आप्या
यितास्तु ते पूर्वं योपियोगबले
रताः तस्मात् श्राद्धानि देयानि
योगिभ्यो योगसत्तमैः एषवै
प्रथमः सर्गः सोमपानामनुत्त
मः एतेतप्रकृतनवो वर्त्तते ।
द्विजसत्तमाः भूर्लोकवासिना
यास्या भुवर्लोकनिवासिनः स्व
र्गलोकामरीच्याद्या स्तेषां यास्ता
मरुद्गणाः कन्यावासिकसंज्ञास्ते
षामपि जनेस्थिताः सनकाद्या
स्ततस्तेषां वैराजास्तपसि स्थि
ताः तेषां सप्तगताः श्रेष्ठा इत्ये
षा पितृसन्ततिः सप्तधा सप्त लो
केषु मादिमन्वन्तरक्रिया अनेषां व
सवः साध्या रुद्रादित्याश्विनाविति
अयुतः सर्व्ववर्णानां साधारण्येन
संस्थिताः अवपत्त्वतलेपन्नास्
तिसमविभागगणाः तेषां कस्यांत
सं

जाता महती पितृसन्ततिः आग्नि
ष्वात्ताश्च मारीचा वैराजा बर्हिष
दिताः सुकाला नाम पितरो व
शिष्ठस्य प्रजापतेः तेपि याज्या
स्त्रिभिर्वर्णैः शूद्रेण पृथक्कृतम्
वर्णत्रयाणां तु ज्ञातेः शूद्रः सर्व्वा
न् पितॄन् यजेत् नततस्य पृथक्
सन्ति पितरः शूद्रजातयः शूद्रा
चेतनकाब्रह्मन्न नदृष्यते पितृष्वा
पि विशेषं दृश्यात्तु पुराणानां च
दर्शनात् एवं ऋषिस्तेनैः श्राद्धे ॥
ज्ञानाधानकसम्भवात् स्वयंपृ
ष्पास्तनिर्लेप्या पुत्राणां ब्रह्म
णातनः परेनिर्वाणमापन्ना स्ते
पि ज्ञानिनएव वै वैश्यादीनां का
श्यपाद्यावर्णानां वसवादयः श्रा
विशेषेण विज्ञेया गन्धर्वाद्या अपि
ध्रुवे एवतेपैतृकः सर्ग उद्देशेन
महाभुजे कथितो नात्र एवास्य व
र्षकोट्यापि दृश्यते इति वाराहे
श्राद्धकल्पः ॥ अपि च पितॄणाम्
भवेराजन् कथ्यमाने निबोध मे दु
र्व्वंशना पतिर्ब्रह्मा सिसृक्षुर्विविधाः
प्रजाः यत्काय मानसः सर्व्वा तत्काजा
मनसो बहिः कृत्वा परमकं ब्रह्म
ध्यायन्नेवपुनर्ध्येकः तस्माज्जनि त
दा सोमं तपसा परमाद्धिनः तस्मा
ज्ञानिपितृदेहस्य धूम्रवर्णाकृतविषः

पिवाम इतिभाष्यतः स्वसोम
मितोमकृत ऊर्द्धं मिथतोवै ग्र।
यः संख्यास्तपस्विनः तानद्रष्टास
हस्राव्रह्मा तिर्य्यक्संख्यांस्तदा।
न्मखान् भवतःपितरःसेत सर्वे
षां गृहमेधिनो ऊर्द्धवक्त्रास्त्रयेन
त्र तेनान्दीमुखसेस्तिताः इत्य।
क्त्वा ततस्तावह्मा तेषांपश्यात्कमा
करोत दक्षिणायनसंज्ञन्तु पितृ
णान्तुपितामहः तस्मीससर्ज
भूतानि तमूचुःपितरस्तत् । ह्र
सिंतोदेहिभगवन् यथा विदाम
हे स्वके अत्रावाव अमावास्यादि
नेवोक्त तसांऊशान्तिलोदकैः ।
अपितामातुषैस्त्रसिं परांगच्छत
नामयथा तिला देयास्तथैतस्मात
योषा पितृभक्तितः परमेतस्य
सेतषाः परंपच्छतमाविरे इति
वाराहे पितृसर्गस्थितिवर्णने ॥
पितृश्राद्धविशेषे देवताविशेषाः।
पितृगणाश्च यथा क्रतुर्दक्षोव
सुःसत्यः कामःकालस्तथाधुनिः
रोचकश्चाद्रवाश्चैव तथाकामः
पुरूरवाः विश्वेदेवा भवन्त्येते ।
दशसर्वत्र पूजिताः विश्वदेवौ ।
क्रतुदक्षौसर्वास्विष्टिषु विश्रुतौ
नित्यं नान्दीमुखश्राद्धे वसुस
त्यौच ॥

पैतृकौ नवान्नालम्भनेदेवौ ॥
कामकालौसदैवहि अपिकर्मा
गतेस्थौ श्राद्धेवधूनिरोचकौ
पुरूरवामाद्रवाख्य विश्वदेवौ।
चपर्वणि सुताश्चावर्हिषदो।
ऽग्निष्वात्तास्तथैवच आज्यपा।
श्चोपहूतश्च क्रव्यादाश्चसुका।
लिनः एतेपितृगणाःसप्त ये।
गणाःकेचिदेवहि इत्यग्निपुरा
णे ॥ अग्निष्वात्तादेकृत पत्नि
येषा ततोनिशोत्थितस्थिपके विका।
ववाननः जित्वाऽरपितस्तान।
तोसन्ध्यांकामरूपिणी ततश।
रीरान्तवर्म्माभा यत्रपपातहि।
तोतमः अग्निष्वात्ता वर्हिषदो जा
ताःपितृगणास्ततः भिन्नाजननि
ताःसर्वे फलगजीवलोचनाः नि
तान्तसेयताःगुणाः तेसारविश्
त्वापवे सहस्राणां चतःषष्टि रे
स्वांताःप्रकीर्तिताः षडशीतिस
हस्राणि तथावर्हिषदो द्विजाः इ
तिकालिकापुराणे २ अध्यायः
तेषांतर्पणविधि र्यथा अपस।
व्यंततःकृत्वा सव्यंजानुचभूतले
अग्निष्वात्तास्तथासोम्यान् हवि।
ष्मत स्तथोष्मपान् सुकालिनो
वर्हिषद स्तथाचैवाज्यपानपु
नः तर्पयेत्तपितृन्भक्त्या ॥

सतिलोदकचन्दनैः दर्भपाणिस्तु
विधिवत् प्रेतोस्तास्तर्पयेत्ततः पि
त्रादीनामगोत्रेण तथा मातामहा
नपि सन्तर्प्य विधिवद्भक्त्या इमंम
न्त्रमुदीरयेत् ये बान्धवा बान्धवा।
वा येऽन्य जन्मनि बान्धवाः तेतृप्ति
मखिलांयान्तु यश्चास्मत्तोभिवाञ्छ।
ति इति मत्स्यस्नानविधौ ८४ अ।
ध्यायः ॥ पितृवनं क्ली श्मशा।
ने इत्यमरः ॥ पितृवनेचरः पुं।
शिवः इतिकेचित् पितृवन्धुः पुं
पितामहभगिनीपुत्रः पितामही ।
भगिनी पुत्रः पितृमातुलपुत्रः इ
त्युद्वाहतत्वे ॥ पितृवसतिः स्त्री श
वदाहनस्थाने श्मशाने इत्यमरटी
कायांरमानाथः पितृवान्धवः ।
पुं पितृवन्धुः यथा पितुः पितुः
स्वसुःपुत्राः पितुर्मातुः स्वसुःसुताः
पितुर्मातुलपुत्राश्च विज्ञेयाःपितृ।
बान्धवाः इत्युद्वाहतत्वे ॥
पितृव्यः पुं पितृभ्राता इत्यमरः
अपिच पितृव्यो जनक भ्राता ॥
ज्येष्ठभ्राता ऽग्रजोपदि पितुःक
निष्ट भ्राताततु खुल्लताताऽभि।
धीयते इतिशब्दरत्नावली ॥
पितृष्वसा स्त्री पितृभगि
नी पिसी ॥

इति भाषा यथा मातृष्वसा मातु
लानी पितृव्य स्त्री पितृष्वसा श्व।
श्रूःपूर्वजपत्नीच मातृतुल्याः प्र।
कीर्तिताः इतिदायभागः ॥
पितृष्वस्रीयः त्रि पितृष्वसुरपत्ये।
पितृभागिनेयः इति मुग्धबोधव्या
करणम् ॥ पितृसन्निभः
पुं पितृतुल्यः तत्पर्य्यायः मनो।
जवः २ मनोजवसः ३ इत्यमर।
भरतौ ॥ पितृसूः स्त्री सन्ध्या इ
तिशब्दमाला पित्तं क्ली शरीरस्थ
धातुविशेषः तत्पर्य्यायः मायुः २
इत्यमरः पलज्वलः २ इतिशब्दर
त्नावली ॥ तेजः ४ तिक्तधा।
तुः ५ उष्मा ६ अग्निः ७ अनलः
८ अस्यगुणाः पित्तञ्च तिक्ताश्
रसंच सारकंतथा द्रवंतीक्ष्णमिदं
मध्ये वर्षवर्षान्तकाले भ्रशं मद्विश
त्रं मध्यन्दिनेतथुदितेचकुप्यति इ
तिराजनिर्घण्टः ॥ अपिच स
र्वं पित्तमपस्मार कुष्ठदुष्टव्रणाप
हं चक्षुष्यं कटुती क्ष्णमुष्मा
दं क्रिमिनाशनम् ॥ इतिराजव
ल्लभः ॥ पित्तस्यस्वरूपमाह
पित्तं उष्णं द्रवंपीतं नीलंसत्वगु।
णोत्तरं सरं कटु लघुस्निग्धं ती
क्ष्णामम्लन्तुपाकतः पीतंनिशा

मे नीले सामे पक्के पित्ते वातवन्मा
म स्थानकर्म्मभेदैः पञ्चविधं ॥
तेषां पित्तानां नामान्याह पाच
के रञ्जके चापि साधके लोचके
तथा भ्राजके चेति पित्तस्य ना
मानि स्थानभेदतः ॥ अथ पाच
कादीनां स्थानान्याह आमाशये
यकृत्प्लीह्नोः हृदये लोचनद्वये
त्वचि सर्व्वशरीरेषु पित्तं निवसति
क्रमात् ॥ अथ तेषां कर्म्माण्या
ह पाचके पचते भुक्तं शोषाग्नि
बलवर्द्धनं रसमूत्रपुरीषाणि नि
रेचयति नित्यशः पाचकं पित्तमा
म पक्वाशय मध्यस्थं षड्विधमा
हारं भोज्यं भक्ष्यं चर्व्यं लेह्यं चूष्यं
पेयं पचते दोषरसमूत्रपुरीषा
णि पृथक् करोति च तदन्या
शयस्थं मेदात्म शार्करसरञ्जन
हृदयस्थं कफ तमोपनोदनं रूप
ग्रहणं प्रभाप्रकाशत्वाभ्यंगलेपा
दि पाचनाद्यग्निकर्म्मणा ॥ शे
षाणां पित्तस्थानानां मत्वाहं कः
रोति शेषाण्यपि पित्तस्थानानि
यकृत्प्लीहादीनि भागेन गता
नत्र तत्र रसरञ्जनादिकर्म्मभिरुप
करोतीत्यर्थः कथं भूतं पाचकं ॥
पित्तं शोषाग्निबलवर्द्धनं शोषा
ग्नयः पृथिव्याद्यिमहा ॥

भूतगताः यत्उक्तं चरके नाभौ
माप्याग्नेय वायव्याः पञ्चोष्माण
स्नाभसा इति उष्माणोऽग्नयः य
तउक्तं वाग्भटे दोषधातुमलादीनां
मुष्मेत्यात्रेयशासन मिति दोष
धातुमलाधीनां उष्मैवाग्निमित्य
र्थः रसादिधातुगताश्च सप्तैषां
बलवर्द्धने यथा गृहस्थापितानि
रत्नानि स्वधोत वहद्भास्वराणि
तान्यपि दीपस्यालिखा हरप्रका
शकानि भवति तथा आमाशय
स्थ पाचकाग्नि तेजसा सर्व्वे अग्न
यो बलवन्तो भवन्ति तथा च वाग्भ
टः अन्नस्य पक्ता सर्व्वेषां पक्तृणा
मधिको मतः तन्मूलास्ते हि तद्वृ
द्धि क्षयवृद्धिक्षयात्मका इति त
नुपित्तादन्यो ऽग्निराहो स्वित् पित्त
मेवाग्निरिति सन्देहः ॥ उच्यते पि
त्ततीक्ष्णादि गुणादाहारपाचन र
ञ्जन दर्शनादि कर्म्मणश्चानवलू
पित्तव्यतिरेकेनान्यो ऽग्निः तस्माद
ग्निरूपस्यैव पित्तस्य स्थानभेदात् ॥
पाचकरञ्जकसाधकालोचकभ्रा
जकसंज्ञाः तथा च वाग्भटे पाच
कं तिलमानेस्यात् कार्श्याभास्य
दोषणां अग्रहास विकृते पित्तपा
कोपशर्श्यनैः लभतु विप्रभामेधा
धीशौर्य्य तनुमार्द्दवैः पित्ते ॥

पञ्चात्मकं तच्च पक्वामाशयम
ध्यगं पञ्चभूतात्मकत्वेपि यत्तैज
स गुणोदयात् त्यक्तद्रवत्वं पाका
दिकर्म्मणानलशब्दितं पच
त्यन्नं विभजते सारकिट्टौ पृथ
क् तथा तत्रस्थमेव पित्तानां शे
षाणामप्यनुग्रहं करोति मलदा
नेन पाचकं नाम तत्स्मृतं तनुय
दि पित्तादन्योऽग्निस्तदा कथं तृ
ते पित्तस्य शमनं मन्दे दीपनमि
ति तथा मन्दाः पित्तं कर्व्वन्ति न
व ते ऽग्निदीप्तिकरा इति तथा
पित्ताधिका मीदृशा ऽग्निदीप्त्य
धिकं यस्मात् तथा समदोषः
समाग्निश्चेत्समपि वक्तृं मनुजा
ते तथा द्रवस्निग्धमधोगं च पि
त्तं वक्तिरन्तो मयेति अत्रोच्यते
पित्तमग्नेः सततापिधाने तथा
वोक्ते तज्ज्ञान्तरे अग्निर्भिन्नगणो
शुक्लः पित्तं भिन्नगुणोऽस्तथा द्रवे
स्निग्धमधोगं च पित्तं वक्तिरन्तो
न्यथा तस्मात्तेजोमयं पित्तं पि
त्तोष्मायः स शक्तिमान् स सञ्चरति
कृतित्वः सर्व्वतोपनीभुत्वैः स
कायाग्निः सकायोष्मा सपक्ता
स च जीवने भवन्ति भगतिविन्द्यैव
देहे कायाग्निरुच्यते अमस्य वाम
पार्श्वश्रितनाभेः किञ्चित्समस्य

मण्डले तन्मध्ये मण्डले ॥
सौर्य्यं तन्मध्येऽग्निः ध्रुव स्थितः ज्वा
युमात्र सच्छन्नः काचकोषस्य दी
पवत् तथा चमफकोषे द्रवते
जः समुदायात्मकस्य पित्तस्य ते
जोभागोऽग्नि रिति तेन पित्तमप्य
ग्नि वन्मन्ते अग्नितप्तापो गो
लकवत् परमार्थतस्तु अग्निः पि
त्तादन्य एवेति सिद्धान्तः अतएवाह
रसप्रदीपे जाठरो भगवानग्नि री
श्वरोऽन्नस्य पाचकः सौक्ष्म्याद्रसाना
ददानो विवेक्तुं नैव शक्यते नाभे
मध्ये शरीरस्य विशेषात्सोम म
ण्डले सोम मण्डलमध्यस्थे वि
द्यात्सूर्य्यस्य मण्डले प्रदीप वन्न
मन्दस्था स्थितोमध्येकृशानवः ॥
सूर्य्यादीनि यथा दिवि तेजांस्येकं
गभस्तिभिः विशोषयति सर्व्वा
णि पल्वलानि सरांसि च तद्वच्छ
रीरिणां भुक्तं तत्तेजोनाभिमा
श्रितः मयूखैः पचते क्षिप्रं नाना
व्यञ्जनसंस्कृते स्थूलकायेषु स
त्वेषु यवमात्रप्रमाणतः ह्रस्वका
येषु सत्वेषु तिलमात्रप्रमाणतः
कृमिकीट पतङ्गेषु बालमात्रोऽव
तिष्ठते इति अतः प्रकृतमनुसरति
रञ्जकं नाम यत् पित्तं तद्रसं शोणितां
नयेत् यत्साधकसंज्ञं तत् कुर्य्या
द्बुद्धिधृतिस्मृतिम् धृतिमेधा ॥



पद्मालोचक संज्ञे तद्रूपग्रहण।
कारणे भ्राजके कान्तिकारिस्मा
लेपाभ्यंगादिपाचके ॥ पित्त।
प्रकृतिको यथा पित्तप्रकृतिम
को यादृक् तादृशोऽधुनिगद्य
ते अकालपलितो गौरः क्रोधी
स्वेदी च बुद्धिमान् बहुभुक् ता
म्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति
प्रणमकेशः त्वमीक्ष्णो बक्र।
वीर्य्यो महाबलः पित्तवह्निर्वि
ह्निर्जेवा तदस्मात् पित्तोद्रिक्त
स्तीव्रतरसा बुभुक्षुः गौरोष्णो
गताम्रहस्तांघ्रि रक्तः शूरो मा
नी पिंगकेशोऽल्पलोमा ॥ पि
त्तप्रकृतिक स्नगा यथा व्याघ्र।
ऋक्षकपिमार्जार यक्षोलूकाश्च।
पैत्तिकाः ॥ पित्तस्योपशमहे
तु माहतिक्तस्वादु कषायशीत
पवन च्छायानिशावीजनज्योत्स्ना।
त् स्नातृहर्म्य यन्त्रवारिजलद स्त्री
गात्र संस्पर्शनं सर्पिः क्षीरविरे
क सेक रुधिरस्राव प्रदेहादिकं
पानाहार विहारभेषजमिदं पि
त्तप्रशान्ति नयेत् ॥ अथ पित्त।
प्रकोपकारणानि कट्वम्लोष्णवि
दाहि तीक्ष्ण लवण क्रोधोपवा।
सात पस्त्रीसम्भोग तृषा क्षुधा।
भिहतनव्यायाममद्यादिभिः भुक्ते
ऽजीर्य्यति

भोजनेव शरदि ग्रीष्मे तथा प्राणि
नो मध्याह्ने च तथार्द्धरात्रसमये
पित्तप्रकोपो भवेत् इति भावप्र
काशः ॥ स तु ज्वरजनकमन्द्
ग्ने जनकः मन्दाग्निस्तस्य जन।
को मंदाग्ने जनकास्तृषः पित्त।
श्लेष्मसमीरणाश्च प्राणिनाङ्गुरु
दायकाः इतिव्रतचैवकेतृत्व।
(वैद्यक) १९ अध्यायः ॥
पित्तघ्नी स्त्री गुडूची इति शाहवे
द्रिका ॥ पित्तज्वरः पुं पैत्तिक
ज्वरः यथा विशेषतः कोमल।
नारिकेलं निहन्ति पित्तज्वर मूत्र
दोषान् इति राजनिर्घण्टः ॥ अ
स्य लक्षणं ज्वरशब्दे द्रष्टव्यं ॥
अथ पित्तज्वरचिकित्सा आमा।
शयस्था हत्वाग्निं सामोमार्गान् ॥
पिधायन् विदधाति ज्वरं दोष
स्तस्माल्लंघनमाचरेत् इति च।
नात् सामाम तो ज्वरिमात्रस्य ॥
यावद्दोषोपदर्शने लंघनाभिधा।
ने पित्तज्वरिणां लंघनविधाने।
विशेषमाह मस्करः पैत्तिकेद
शरात्रेण ज्वरे युञ्जीत भेषज ॥
मिति दशरात्रेण लंघनवतात्यती
तेनेत्यर्थः किंतद्भेषजं तदाह।
तिक्ता मुस्तापर्पटैः पाठा कट्फ
लाम्भांस्तहोदकं पक्वमस्य ॥

कैरंपाते पाचने पैत्तिके ज्वरे ति
क्तादिक्काथः पर्पटो वासकस्ति
क्ता कैराता धन्वयासकः प्रियङ्ग
श्च कृतात्क्वाथ एवशर्करयायुतः
पिपासादाहपित्तास्त्र युक्ते पित्तज्वरं
हरेत् पर्पटादिक्काथः द्राक्षा हरी
तकी मुस्ता कटुका कृतमालकः।
पर्पटश्च कृतः क्वाथ एष पित्तज्व
रापहः मुखशोषप्रलापार्त्तदाह।
मूर्च्छाभ्रमप्रणुत् पिपासारक्त।
पित्तानां शमनो भेदनो मतः द्राक्षा
दिक्काथः पटोलमवधन्याकेमधु
कैमधुसंयुते हन्ति पित्तज्वरं दाहं त।
ष्णां चातिप्रमाथिनी पटोलादिक्का
थः गुडूच्यामलकीयुक्तः केव।
लोवापिपर्पटः पित्तज्वरं हरेत्तृष्णा
दाहशोषभ्रमान्वितं गुडूच्यादि।
क्वाथः एकः पर्पटकः श्रेष्ठः पि
त्तज्वरविनाशनः किं पुनर्यदि।
युज्यते चन्दनोशीरवालकैः क्षी
रेरचन्दनोशीरघन पर्पटस्य ॥
पित्तम् दद्यात्सशी तलंवारि त
इच्छर्दि ज्वरदाहतृष्ण क्षीरादि
क्वाथः भूनिम्बातिविषा लोध्र
मुस्तकेन्द्र यवाम्रताः वालकैः
धान्यकैः विल्वैः कषायोमादि।
कान्वितः विट्भेदश्वासकासो
स्य रक्तपित्तज्वरं हरेत् ॥

भूनिम्बादिक्काथः द्राक्षा चन्दन प
द्मानि मुस्तातिक्ताम्रतापिच धात्री।
वालस्त्रशीरच लोध्रेन्द्रयवपर्पटाः
पद्मकं प्रियंगुश्च यावासोवासक।
स्तथा मधुके कुलके वापि किराता।
धान्यकं तथा एषां क्वाथो निहन्त्येव ज्व
रं पित्तसमुत्थितं तृष्णादाहप्रलापं च र
क्तपित्तं भ्रमं क्लमं मूर्च्छां छर्दिं तथा शू
लं मुखशोषमरोचकं कासं श्वासं च
हृल्लासं नाशयेन्नात्र संशयः महा।
द्राक्षादिक्काथः ससितो निशि पर्युषि
तः प्रातर्धान्याकतण्डुलक्काथः पीतः श
मयम विदाहतृष्णादाहं ज्वरं पैत्ते धान्याक।
क्काथः अम्रतायाहिमः प्रातः ससितः
पैत्तिकज्वरं वासायाश्च तथाकास र
क्तपित्तज्वरान्जयेत् अम्रतावासा।
क्काथो गुडूचीभूनिम्बश्च वालेवीर।
णम्रलकं लघुमुस्त चिह्नहाची द्राक्षा
वासा च पर्पटः पवी क्काथो हरेत्येव।
ज्वरं पित्तकृतं द्रुतं सोपद्रवमपि प्रा।
न निपीतो मधुना सह गुडूच्या ॥
दिक्काथः पलाशस्यवरध्यावोनि।
म्बस्य मरुपल्लवैः अम्लपिष्टैः प्रले।
पोयं हन्याद्दाहयुतं ज्वरम् उत्तानसुप्त
स्य गभीर ध्यामकांस्य दिपात्रेनिहि
ते च नाभौ शीताम्बुधारा व कृता।
पतंती निहन्ति दाहं त्वरितं ज्वरं च।

पक्वदाडिमबीजैर्वा धानाकल्के
नच क्वचित् पथ्या तैलघृतदौ।
ग्धे लिहन्दाह ज्वरापहा कासाङ्
कू पित्तवीसर्प श्वासान् हन्तिच॥
सीनापि तैलघृत दोग्धे विपत्र न
स शुद्धयः तेन केवलेन दोग्धेणा
पि लिह्यात् कांजिकाद्रे पटेनावगु
ण्ठने दाहनाशने श्रयगोत्तत्रसुवि
न शीतलीकृतवाससा ह्लादाम।
लककल्केन कवलोऽवहितोमतः
इतिकवलः ॥ अथाम्रमाहदा
ह वर्म्यादिते ताम्रे निवङ्गे रसया
न्विते शर्करा मधुसंयुक्ते पाय।
येलाजतर्पणं ॥ लाजतर्पणं ॥
लाजशक्तुरसतर्पणं लाजतर्पणं
समर्पणास्वरूप मुक्तं सामान्यज्व
रचिकित् सायां शुद्धप्रदेशोदेनोदे
यः सितयायैतिकेज्वरे दृग्धैश्च।
आम्रसंकाशे शशांककरशीतले
मलयोदकसंसिक्ते स्थानत् पित्त
ज्वरीनरः हारावलीचन्दन शीत
लानां स्तनान्य श्यामाम्बर भूषिता
नां नितम्बिनीनां सपयो घनानां
मालिंगनेचाशु हरन्तिदाहम् ॥
आक्रादेचास्य वितार लास्य स्त्री।
रमयेत् पुनः हितच भो ॥
॥ ॥ ॥

जयेदन्नं प्राप्नोति सुरते महत् वा
पः कमलहासिन्यो जलयन्त्रग्र
हाः शुभाः नार्य्यश्चन्दनदिग्धांगेण
दाहदैन्य हरामताः इतिपित्तज्व
रचिकित्सा ॥ इतिभावप्रकाशः
पित्तश्लेष्मज्वरनाशकौषधं य॥
था गुडूची पद्मकारिष्ट धन्याके
रक्तचंदने पित्तश्लेष्मज्वरच्छर्दि
दाह तृष्णाघ्नमग्निकृत् इतिग
रुडे १९८ अध्यायः ॥
पित्तद्रावी न पुं मधुरजम्बीरः
इति राजनिर्घण्टः ॥
पित्तरक्तं क्ली रोगविशेषः तत्
पर्य्यायः रक्तपित्तं २ पित्तासृक् ३
पित्तशोणितं ४ इतिराजनिर्घण्टः
अस्यविवरणं रक्तपित्त शब्देद्र
ष्टव्यं ॥ पित्तलं क्ली धातुवि
शेषः पित्तल इतिभाषा तत्प
र्य्यायः आरकूटं २ रीतिः ३ प
तिकावेरं ४ द्रव्यदारु ५ इति
जटाधरः रीती ६ इतिशब्दर
त्नावली ॥ मिश्रं ७ इतिरत्न
माला आरः ८ राजरीतिः ९
ब्रह्मरीतिः १० कपिला ११ पिंग
ला १२ इतिभावप्रकाशः ॥
स्वच्छवर्णः १३ सिंहलं १४ पिं
गलकं १५ पीतलकं १६ लोहितकं

१७ पिंगललोहं १८ पीतकं १९।
रीतिकापुष्पकलशगुणाः तिक्तत्वं।
शीतलत्वं रसे लवणत्वं शोध
नत्वं पाण्डुवातकृमि प्लीहपित्त
नाशित्वंच शुक्लास्निग्धा मृदुःशां
ता सुरंगासूत्रपत्रिनी हेमोपमा
शुभास्वच्छा ताम्ररीतिःप्रकी।
र्त्तिता इतिराजनिर्घण्टः ॥
रीतिरप्युपधातुः स्यात्ताम्रस्य
सदस्यच पित्तलस्य गुणाज्ञेया स
योनिसदृशा जनैः संयोगस्यप्र
भावेण तस्यान्योपिगुणाःस्मृताः
रीतिकापुष्पकलंकृते तिक्तचलव
णरसे शोधनेपाण्डुरोगघ्ने कृ।
मिघ्नेनातिलेखने इतिभावप्रका।
शः भूर्जपत्रे इतिशब्दमाला ॥
पित्तभक्ते त्रि इतिमेदिनी ॥ पित्त
ला स्त्री तोयपिप्पली इतिमेदिनी
पित्तारिः पुं पर्प्पटः लाक्षा वर्ब्ब
रे इतिराजनिर्घण्टः ॥
पित्तं क्ली मधु इतिराजनिर्घण्टः
पित्सतीर्थं तत्र तर्जन्यंगुष्ठान्तः
इतिहेमचन्द्रः पित्सम्बन्धिनि
त्रि यथा ज्येष्ठएव तु गृह्णीयात्।
पित्र्यं धनमशेषतः शेषास्तमुप।
जीवेयु र्यथैवपितरंतथा इति॥

दायभागः ॥ पित्र्यः पुं॥
ज्येष्ठभ्राता इतिहेमचन्द्रः
माषः इतिराजनिर्घण्टः ॥
पित्र्या स्त्री मघानक्षत्रं इतिहेम।
चन्द्रः ॥ पौर्णमासी इतिशब्द
माला ॥ पित्सन् त्रि पुं पक्षी।
इत्यमरः प्रतिपत्रे पतनेच्छौ।
च त्रि इतिविश्वः ॥ पित्
सले क्ली पन्थाः इत्युणादिको
षः पिधानं क्ली छदने इत्यमरः
उदंचने इतिहेमचन्द्रः ॥ पि
नद्धः त्रि परिहितवस्त्रादि तत्प
र्य्यायः ॥ आमुक्तः २ प्रतिमुक्तः ३
अपिनद्धः ४ इत्यमरः ॥
पिनाकः पुं क्ली शिवधनुः तत्
पर्य्यायः आजगवं २ स्थूलं इत्यम
रः स्थूलमपि पांशुवर्षमिति केचि
त् इतिभरतः ॥ पांशुवर्षणं इति
मेदिनी ॥ पिनाकी न पुं शिवः
इत्यमरः पिप्पसं क्ली हिंगु इ
तिजटाधरः ॥ पिपतिषत् पुं
त्रि पतनेच्छुः विहंगमे पुं इति
मेदिनी ॥ पिपति ॥
पुः पुं पक्षी इतिराजनिर्घण्टः
पिपासा स्त्री पानेच्छा तत्प॥
र्य्यायः ॥ तृष्णा २ तर्षः ३ ॥

उपलासिका ४ तट् ५ तृषा
६ उदन्या ७ इति हेमचन्द्रः ।
पिपासितः त्रि पिपासायुक्तः ।
तृषितः इति हलायुधः ॥
पिपासुः त्रि पानेच्छुः तत्प ॥
र्य्यायः तृषितः २ तृष्णक् ३ इ
ति हेमचन्द्रः ॥ पिपीतकः
पुं ब्राह्मणविशेषः अस्य प्रमा
णं पिपीतकी शब्दे द्रष्टव्यं ॥
पिपीतकी स्त्री वैशाखशुक्ल
द्वादशी तत्र कर्त्तव्यव्रतं यथा ।
शतानीक उवाच जलदानस्य मा
हात्म्यं यत्त्वया परिकीर्त्तितं तदहं
श्रोतुमिच्छामि पिपीतकीकथा
शुभा । पुरा केन कृतं चैतत् केन चै
तत्प्रकाशितं कथं पिपीतकी ना
म विधानं चैव कीदृशं तत्सर्व्वं ब्रू
हि देवर्षे यदि श्रेयो मयि प्रभो ना
रद उवाच शृणु राजन् प्रवक्ष्यामि
द्वादशीं तां पिपीतकीं यो हृता यम
लोकाद्वै प्राप्यते वै स्वर्व्वं पदं पिपी
तक इति ख्यातो ब्राह्मणः संशि
तव्रतः तपः स्वाध्यायनिरतः स
र्व्वभूतहिते रतः शान्तो दान्तः
क्षमायुक्तो बलिहोमपरायणः
निवसन् निर्ज्जनेऽरण्ये बहून् ॥
॥ कालान् ॥

द्विजोत्तमः चिरं कृत्वा तपोऽरण्ये
कालेमृत्युमुपेयिवान् ततः का
लेन कियता यमदूतैर्महाबलैः
नीयमानः स विप्रेन्द्रो यमलोके
भयावहे ददर्श बहुशस्तत्र नरा
न्निरयसंस्थितान् असिपत्रादिके
केषु कुम्भीपाकेषु संस्थितान्
कृतान्निशांस्तान् दृष्ट्वा विषादमा
गमद्द्विजः तृतः पिपासाकुलो
भूत्वा प्रेतराजवशंगतः बहून्व
स्त्राहतान् कुम्भान् ददर्शेति मनो
हरान् प्रदेशानीप्सितांस्तत्र प्रासादे
रुपशोभितान् गीतवाद्यादिनृत्यै
श्च सेव्यमानः समन्ततः कचित्
प्रदेशमागांश्च किंकरैर्यमशासनैः
नीयमानोऽस्ततः प्रेतान् बध्यमा
नान्स्वकर्म्मभिः शोकसन्तापसंयु
क्तान् तृषया परिपीडितः सेपश्य
मानो राजेन्द्र ययाचे किंकरान् ज
लं बहुशो याच्यमानैश्च किंकरैरभि
ताडितः संनीयमानो ददर्श बहु
प्रांशुं द्रुमोत्तमे सच्छायं शीतले
रम्यं महान्तं पिप्पलद्रुमं तत्रैव स
जलान् कुम्भान् मालग्रीवान् स
शोभितान् ददर्श वस्त्राहृतम
न् सवासितान् सुशीतलान् बहु
निवहवस्तत्र किंकराः शस्त्रपा

णयः तोयदर्शनमात्रेण साक्षा
द्ब्राह्मणोऽभवत् विनयावनतो
भूत्वा ययाचे किंकरान् जलं ब्राह्म
ण उवाच यमदूता महात्मानस्तो
यं मे दीयतामिति अप्राप्य तोये ।
प्राणानां विनाशो जायते ध्रुवं त
स्मात्तोयप्रदानेन प्राणान्रक्षत मेऽ
धुना श्रुत्वा विप्रस्य तद्वाक्यं तम
चुर्यमकिंकराः न कृतं कर्म्म तद्धि
म येन तोयं च लभ्यते प्रार्थयामः
पुनस्तोये यमदूतैः स ताडितः अ
र्त्तवचनं श्रुत्वा यमः प्रोवाच तं
द्विजं ब्रूहि त्वं विप्र मा रोदीः का ते
पीडास्ति चेतसि पुनर्ययाचे स तोयं
तृषाव्याकुलचेतनः श्रुत्वा विप्र
स्य तद्वाक्यं तत उवाच स धर्म्मराट् ।
त्वया तत्र कृतं कर्म्म येन वै लभ्य
ते जलं ब्राह्मण उवाच त्वयि प्रसन्ने
दिक्पाल न तोयं दुर्लभं मम त ॥
स्मात्तोयप्रदानेन प्राणरक्षां कुरु
प्रभो इत्येवं बहुविधैर्वाक्यैर्यमः
प्रीतोऽभवत्तदा यम उवाच वरं व
रय विप्रेन्द्र यत्ते मनसि वर्त्तते ते
ब्राह्मण उवाच यदि तुष्टोऽसि मे
देव येन प्राप्तोऽस्मि तज्जलम् ।
तत् कुरुष्व धर्म्मराज सर्व्वमा
ख्यस्व प्रभो ॥ शौ ॥

यम उवाच वैशाखे तु द्विज विप्र कुरु
गत्वा निजालये विधानेन शृणु वि
प्रेन्द्र द्वादशी या दृश्यते भवेत् वैशा
खे शुक्लपक्षस्य द्वादशी वैशाखी ति
थिः तस्यां सुशीतलजलैः स्नापये
त् केशवं प्रभो पूजयेद्गन्धपुष्पाद्यैः धू
पदीपैर्विधानतः नैवेद्यैर्विविधैश्चै
व ताम्बूलैरवासकैः जप्त्वा तु वैश्
वेमन्त्रं दण्डवत्प्रणमेत्ततः दद्याद्द्वि
जेभ्यो विधिवत् कुम्भांस्तोयसम
न्वितान् प्रथमे द्वे च तत्र कुम्भान् दा
या ल्लवणसंयुतान् मालाभिर्वेष्टि
तग्रीवान् सुशीतलजलान्वितान्
शुक्लवस्त्राहृतमुखान् यवीतसं
युतान् पञ्चरत्नसमायुक्तान् ।
सभोज्यदत्तनान्वितान् द्वितीये द्वौ
घटान्दद्यात् हविःशार्करसंयुतान् तृ
तीये द्वादश घटान् तिलमोदकसंयु
तान् चतुर्थे षोडश घटान् उत्पलाङ्
कसंयुतान् दद्यात्संपदे वेशं ॥
द्विजातिभ्यः प्रयत्नतः दक्षिणां श
क्तितो दद्यात् भोज्यं चैव विशेषतः
व्रतं कृत्वापि संगच्छेन्म कृत्वापि तृषा
न्वितः ततो द्विजो गृहं गत्वा चका
र द्वादशीव्रतम् अन्ते जगाम स्व
र्लोकं वैशाखे यदुत्तमम् पिपी
तकीति नाम्नातो विख्याता वैश ।

वीतनिष्ठैः नरोयः कुरुतेभक्त्या। नारीवाभक्तिसंयुता इहवुत्राढि संपन्ना धनधान्यसमन्विता इति भविष्यपुराणे पिप्पलीव्रतकथासमाप्ता ॥ पिपीलकः पुं पीलकः उड्यापिंपीडा इति भाषा इतिहेमचन्द्रः ॥

पिपीलिका स्त्री हीनाङ्गी क्षुद्रे। पिंपीडा इति भाषा इतिहेमचन्द्रः ॥ तत्पर्य्यायः पिपीलिकः २ पिपीलः ३ पीलकः ४ इतिशब्दरत्नावली ॥ पिपीली ५ पिपिली ६ स्त्रीसंज्ञा ७ इतिराजनिर्घण्टः हीरा ८ इतित्रिकाण्डशेषः ॥ पिपीली स्त्री पिपीलिका इतिराजनिर्घण्टः ॥

पिप्पटा स्त्री खाद्यद्रव्यविशेषः तत्पर्य्यायः ॥ गुडशर्करा २ इति त्रिकाण्डशेषः ॥ पिप्पलं क्ली जलम् वस्त्रच्छेदभेदः ॥ इति मेदिनी ॥ पिप्पलः पुं अश्वत्थवृक्षः निरंशुकः पक्षिभेदः इतिमेदिनी ॥ अश्वत्थस्वरूपं यथा नारद उवाच अनायासेन यन्मर्त्यः सर्वान्कामानवाप्नुयात् सर्वदेवात्मकेचैव तन्मे ब्रूहि पितामह ब्रह्मोवाच ॥

शुद्धेसर्वात्मकेवृक्षे मद तिष्ठति। कृत्वा नित्यं नराणांसर्वकामदं पूजयेत् परयाभक्त्या सर्वसिद्धिप्रदोभवेत् ॥ अश्वत्थं पूजयेद्विप्र। सर्वसिद्धिविधायकं ॥ अश्वत्थदक्षिणे रुद्रः पश्चिमे विष्णुरेवच ब्रह्मा चोत्तरतस्तस्य इन्द्रादिदेवताः स्कन्धेस्कन्धे च पत्रेषु ब्राह्मणाश्च वयःस्मृताः तस्यमूले सर्ववेदाः अग्रेतस्य द्रुमाश्रिता नदीनदाः सागरायाः सर्वस्मिन्दिशिसंस्थिताः लोकधर्म्मान्समाश्रित्य तस्मात्तंसेवयेन्नरः पुराणस्मृतिमन्त्रेभ्यः सारभूतसंचिते निष्ठा। प्रतिष्ठितंतस्य गच्छंस्सेवयेन्नरः वेत्तीये फलितश्चैव शीतलश्चवनस्पते त्वामाराधनरोहणात् देहि काधिष्ठितंमले अश्वत्थ यस्मात् त विहृतराज नरायणस्तिष्ठति सा र्वकाले अतःश्रुतिस्त्वं सततं। तरूणां विशेषतो विघ्नविनाश। नोसि तीरेरमतनेचैव यथा। श्रीहासुपासते सपेन तेनवृतेन्नू आशीर्मयि निषेवत ॥ एकादशोसिरुद्राणां वसूनांवा अष्ट। मस्तथा नारायणोसि देवा ॥ नो हुताणा मसि ॥

पिप्पलः अग्निगर्भस्त्वमश्वत्थदेवगर्भः प्रजापतिः हरिर्विष्णुश्चैव श्रीगर्भा यज्ञगर्भनमोऽस्तुते अरातेवा गिरस्थाय परापरनमोऽस्तुते निर्वीतेत्वभिवर्षन्त स्वस्तिनेत्वनमोऽस्तुते ॥ अक्षिस्पन्दे भुजस्पन्दे दुःस्वप्ने दुर्निरीक्षिते शत्रूणांच समुत्थाने अश्वत्थ शमयाशुमे यस्त्वाहुस्त्रु। च्यते रोगैः सर्वपापैः प्रमुच्यते समाश्रित्यवर्द्धतु त्वमश्वत्थेन। मामहे अश्वत्थस्त्वं महाभाग सर्वदा प्रियदर्शन दिव्यान्नभोजनेदेहि शत्रूणांच पराजयं आयुः प्रजां धनंधान्यं सौभाग्यं सर्वदाशुभे। देहिदेवमहावृक्ष त्वामहंशरणं गतः ये अश्वत्थ देवमूलस्त्वं ऋषिभिः प्रोच्यते सदा ब्रह्महागुरुहा चैव दरिद्रो व्याधिपीडितः आवृत्य सदशलक्षेत शुद्धःपापात्तिगोभवेत् ॥ ब्रह्मचारी हविष्याशी अधःशायी जितेन्द्रियः पापापहन्तामत्यस्तु व्रतमेतत्समाचरेत्। एकहस्ते द्विहस्तेवा कुर्य्याद्गोमयलेपनं अश्वत्थस्थालितेयत्र स्तेस्त्वापनमाचरेत् धनायुःश्रतैर्हृदो नरकान्तारयेत् पितॄन् ॥ अश्वत्थमूलमासाद्य शाकेनान्नेन केन वा पक्वंवा भोजयेद्विप्रंकोटिकोटि फलंभवेत् ॥ अश्वत्थमूलमासाद्य तपोहोमः सुराच्चनं अक्षयंमुनिशार्दूल ब्रह्मणो वचनंयथा ॥ एवंसमर्च्चितोऽश्वत्थः सर्वसौख्यप्रदोभवेत् यत्नाद्धं छेदितोऽश्वत्थः सर्वारोग्यप्रदोभवेत् ॥ अश्वत्थः पूजितोयेन। पूजिताः सर्वदेवताः अश्वत्थश्छेदितोयेन छेदिताः सर्वदेवताः अतःशुद्धः समन्वेषी अश्वत्थादेवमयो गुरुः ससेव्यः पूजनीयश्च ऋणत्रयविनाशकः भार्गवकवारे भौमेच मध्याह्ने निशिसन्ध्ययोः अश्वत्थदर्शनंकार्य्यं कुलत्रयभयात्मभिः ॥ अश्वत्थस्यजले यस्य छायातिष्ठति तत्र। वित् तत्प्रयागसमंतीर्थं तत्र। सन्निहितोहरिः तस्मात्कार्त्तिक मासेतु सर्वात्मविधिनाशने अश्वत्थसेवयेद्विद्वान् संप्रदत्तिणमादिशेत् पापापहतमर्त्यानां पापनाशोभवेद्ध्रुवं सकामोलभते कामं निष्कामोमोक्षमाप्नुयात् यःपठेत् शृणुयाद्वापि अश्वत्थस्यसमीपतः सर्वान्कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् इतिपाद्मोत्तरखण्डे ॥ १२९

अध्यायः ॥ ऋषय ऊचुः
कथं त्वयाश्वत्थवटौ गोब्राह्मण
समौ कृतौ सर्वेभ्योऽपि तरुभ्यस्तौ
कथं वृक्षौ नमस्कृतौ सूत उवा
च अश्वत्थरूपी भगवान् विष्णु
रेव न संशयः रुद्ररूपी वटस्तद्व
त्पलाशो ब्रह्मरूपधृक् दर्शन
स्पर्शसेवासु ते वै पापहराः स्मृ
ताः दुःखापद्व्याधिदुष्टानां वि
नाशकारिणो ध्रुवं ऋषय ऊचुः
कथं वृक्षत्वमापन्ना ब्रह्मविष्णुम
हेश्वराः एतत्कथय सर्वज्ञ सं
शयोऽत्र महान् हि नः सूत उवा
च पार्वतीशिवयोर्देवैः सुरतं
कुर्वतोः किल अग्निं ब्राह्मणवे
शेन प्रेष्य विघ्नः कृतः पुरा ततः
सा पार्वती क्रुद्धा शशाप त्रिदि
वौकसः रोषेः सकम्पवपुषा
कम्पमाना तदा रुषा पार्वत्यु
वाच कृमिकीटादयोऽप्येते जान
न्ति सुरतेः सुखं तस्मात्मम सुख
भ्रंशात् यूयं वृक्षत्वमाप्स्यथ सू
त उवाच एवं सा पार्वती देवी अ
शपत् क्रुद्धमानसा तस्माद्वृक्षत्व
मापन्ना ब्रह्मविष्णुमहेश्वराः त
स्मादिमौ विष्णुमहेश्वरावुभौ बभू
वतुर्वा पिवटौ मुनीश्वराः सोऽपि
स्तयं वाकिंदिने विनैव न स्पृश्य
ता मर्कजवारे योगात् ॥

ऋषय ऊचुः अस्पृश्यत्वं कथं
यातः सर्वेषामपि तरुः स्वयं सूत सर्व
त्वं च कथं मामस्पृश्यो येषां निवास
रे सूत उवाच समुद्रमथनाद्या
नि रत्नान्याप्तुः सुरोत्तमाः श्रेष्ठं
च कौस्तुभं तेषु विष्णवे प्रददुः सु
राः यावदङ्गीचकारैषो लक्ष्मीमा
यीर्थमात्मनः तावद्विज्ञापयामा
स लक्ष्मीस्तं वै कृपानिधिं लक्ष्मीरुवा
च असंस्कृत्य कथं ज्येष्ठां कनिष्ठा
परिणीयते तस्मात्वमग्रजामेताम
लक्ष्मीमथ सूदन विवाहोद्वहं मा
पश्चादेष धर्मः सनातनः तस्माद
स्मद्व्यतिक्रामं न कुर्यां मधुसूदन
सूत उवाच इति तद्वचनं श्रुत्वा स
विष्णुर्लोकभावनः उद्दालकाय
मुनये सुदीर्घतपसे तदा आप्तवा
क्यात्प्रेरितेन नामलक्ष्मीं ददौ किल
स्थूलोष्ठी शुष्कवदना विरूपा वि
कृताननं रक्तदारुकनयना रूक्ष
पिङ्गशिरोरुहा स च निर्विष्णुवा
क्यात्तामङ्गीकृत्य स्वमाश्रमम् ॥
वेदध्वनि समायुक्तमानयामास ध
र्मवित् होमधूम समन्वाढ्यं वे
दघोषेन नादितं आश्रमं तं विलो
क्याथ अथि तामाब्रवीदिदं ज्येष्ठा
नागेनहि योग्या सोऽत्र दृष्टो उवे
दध्वनियुतो मम नात्रागमि

ष्येतो ब्रह्मन्नयस्वान्यत्र मां ध्रुवं
उद्दालक उवाच कथं नायासि किं
वात्र वर्त्तते त्वमतेनव योग्यपाच र
सतिः का भवेत्तद्वदस्व मां ज्येष्ठो
वाच वेदध्वनिर्भवेद्यस्मिन्नतिथी
नां च पूजनं यज्ञदानादिकं यत्र नैव
तत्र वसाम्यहं परस्परानुरागेन दा
म्पत्ये यत्र विद्यते पितृदेवार्च्चनं यत्र
तत्रनैव वसाम्यहं दानशौचेन वि
द्यते परद्रव्यापहारिणः परदारर
ता यत्र तत्रस्थाने रतिर्म्मम वृद्धस
ज्जनविप्राणां यत्रस्याद्यमाननं नि
त्यं भाषणां यत्र तत्रसम्यग्वसाम्य
हं सूत उवाच इति तद्वचनं श्रुत्वा
विषण्णवदनोऽभवत् उद्दालकस्ततो
वाक्यं नामलक्ष्मीमुवाच ह उद्दाल
क उवाच अश्वत्थवृक्षमूलेऽस्मिन्न्य
लक्ष्मि त्वमतिष्ठ आश्रमस्थान
मालोक्य यावदायाम्यहं पुनः सूत
उवाच ॥ इति तां तत्र संस्थाप्य ज
गामोद्दालको मुनिः प्रतीक्षन्ती वि
रं तत्र तदा तेन द्रष्टा सा तदा करो
दकरुणं भर्तृत्यागेन दुःखिता ।
तत्तस्याः क्रन्दितं लक्ष्मी वैकुण्ठ
भवनेऽशृणोत् ॥ तदा विज्ञाप
यामास ॥ नमो भगवते वासुदे
वाय नमो नमः

विष्णुमुद्विग्नमानसा लक्ष्मीरुवाच ।
स्वामिन् मद्भगिनी ज्येष्ठा स्वामित्यागे
न दुःखिता तामाश्वासयितुं याहि
कृपालो यद्यहं प्रिया सूत उवाच
लक्ष्म्या सह ततो विष्णुस्तत्रागात् ।
कृपयान्वितः आश्वासयन्नलक्ष्मीं ता
मिदं वाक्यमथाब्रवीत् विष्णुरुवा
च अश्वत्थवृक्षमासाद्य सदाऽल
क्ष्मि स्थिराभव ममांशः सम्भवोऽस्यैष
आवासस्ते मया कृतः मन्दवारे स
दात्वं वै लक्ष्मीरत्रागमिष्यति अस्य
स्पर्शोऽभवेत्तस्मात् मन्दवारं विना ।
किल मत्यहं मर्द्दयिष्यति तां ज्येष्ठा
शठधर्मिणः तेषिये श्रीःकनिष्ठा
ते सदातिष्ठत्वनामया इति पाद्मो
त्तरखण्डे १६। १६१ अध्यायः ॥
पिप्पलकं क्ली स्तनवृन्ते सीवनसूत्रे
इति मेदिनी ॥ पिप्पलिः ॥
स्त्री पिप्पली इति शब्दरत्नावली
पिप्पली स्त्री वृक्षविशेषः ॥
पिँपल इति भाषा तत्पर्यायः
कृष्णा २ उपकुल्या ३ वैदेही ४ मा
गधी ५ चपला ६ कणा ७ उष
णा ८ शौण्डी ९ कोला १० इत्य
मरः ऊषणा ११ पिप्पलिः १२ इति
भरतः कोकला १३ कटुबीजा १४
कोरङ्गी १५ तिक्ततण्डुला १६ ॥

चपला १७ दन्तफला १८ मगधो
द्भवा १९ अस्या गुणाः ज्वरनाशि
त्वं वृष्यत्वं स्निग्धत्वं उष्णत्वं कटु
त्वं तिक्तत्वं दीपनत्वं मारुतश्वा
सकासश्लेष्म क्षयापहत्वञ्च इति
राजनिर्घण्टः ॥ स्वादुपाकत्वं र
सायनत्वं लघुत्वं पित्तलत्वं रेचन
त्वं कुष्ठ प्रमेह गुल्मार्शः प्लीह शू
लाम नाशित्वञ्च आर्द्रायास्तस्या गु
णाः कफ प्रदत्वं स्निग्धत्वं शीत
लत्वं मधुरत्वं गुरुत्वं पित्तप्रशम
नत्वञ्च राजवल्लभे तु कफापह
त्वं मधुयुक्ताया स्तस्या गुणाः ।
मेदः कफश्वास कास ज्वरहर
त्वं वृष्यत्वं मेधाग्नि वर्द्धनत्वञ्च
गुड पिप्पली गुणाः जीर्णज्वरे ।
अग्निमान्द्ये च शस्तत्वं कासाजी
र्णारुचिश्वासहृत् पाण्डुकृमि ना
शित्वञ्च द्विगुणात् पिप्पली चूर्णा
द्गुडोऽत्र भिषजां मतः ॥ इति
भावप्रकाशः ॥ ॥
पिप्पलीका स्त्री अश्वत्थीवृक्षः
इति राजनिर्घण्टः ॥ पिप्प
लीमूलं क्ली स्वनामख्यातमूलं ।
पिपुलमूल इति भाषा तत्पर्य्या
यः ॥ ग्रन्थिकं २ चटिकाशिरः
३ इत्यमरः षड्ग्रन्थि ४ ॥

इति रत्नमाला ॥ मूलं ५ कोल
मूलं ६ कटुग्रन्थि ७ कटुमूलं ८
कटुषणं ९ सर्वग्रन्थि १० पत्राढ्य
११ विरूपं १२ शोषसम्भवं १३ सु
गन्धि १४ ग्रन्थिलं १५ इति राजनि
र्घण्टः ॥ उषणं १६ अस्य गुणाः
दीपनत्वं कटुत्वं पाचनत्वं लघुत्वं
रूक्षत्वं पित्तकरत्वं भेदकत्वं क
फ वातोदरानाह प्लीह गुल्म कृ
मि श्वासक्षया पहत्वञ्च इति भा
वप्रकाशः ॥ ॥ उष्णत्वं रोच
नत्वं इति राजनिर्घण्टः ॥
पिप्पिका स्त्री दन्तमले इति हेम
चन्द्रः ॥ पिप्लुः पुं जडुलः
इत्यमरः पियालः पुं वृक्षविशे
षः ॥ अस्यैव बीजे चिरौञ्जीति ख्या
ते तत्पर्य्यायः ॥ राजादनं २ स
न्नकद्रुः ३ धनुष्पटः ४ इत्यमरः
राजातनं ५ राजातनः ६ पियालः
७ सन्नः ८ कद्रुः ९ धनुः १०
पटः ११ इति तट्टीका ॥
कुसन्नकः १२ धन्वपटः १३ पिपा
लकः १४ इति शब्दरत्नावली ॥
खरस्कन्धः १५ चारः १६ बहुलव
ल्कलः १७ तापसेष्टः १८ तस्य
गुणाः पित्तकफास्र नाशित्वम्
इति भावप्रकाशः ॥

अस्य फल गुणाः मधुरत्वं स्निग्ध
त्वं बृंहणत्वं वातपित्तनाशित्वञ्च इ
ति राजवल्लभः ॥ गुरुत्वं सरत्वं दा
ह ज्वर तृषापहत्वञ्च तन्मज्जगु
णाः मधुरत्वं वृष्यत्वं पित्तानिला
पहत्वं हृद्यत्वं अतिदुर्जरत्वं स्निग्
धत्वं विष्टम्भित्वं आमवर्द्धनत्वञ्च इ
ति भावप्रकाशः ॥
पिल क्षेपे प्रेरणे इति कवि
कल्पद्रुमः ॥ ॥
पिलुकः पुं पीलुवृक्षः इति
शब्दरत्नावली ॥ पिलुपर्णी
स्त्री मोरटा इति रत्नमाला ॥
पिलुः पुं क्लेदयुक्तचक्षुः तद्युक्ते
त्रि इत्यमरः ॥ पिल्लका स्त्री
हस्तिनी इति शब्दमाला ॥ पिव
इ सेचने इति कविकल्पद्रुमः ॥
पिश प श अवयवे इति कविक
ल्पद्रुमः ॥ पिशङ्गः पुं पिङ्ग
लवर्णः तद्वति त्रि इत्यमरः ॥
पिशाचः पुं देवयोनिविशेषः
पिचाश इति भाषा इत्यमरः ॥
तस्य लोको यथा अन्तरीक्ष चा
रायेच भूत प्रेत पिशाचकाः ।
वर्जयि ॥ ॥

त्वारुद्रगणान्ते तत्रैव चरन्तिहि
नोर्द्ध विक्रमणे शक्तिस्तेषां संभ
वपापतो अत ऊर्द्धं हि विप्रेन्द्रा
स्तस्माद्ये कृतैनसः नेत सूर्य्यादधः
सर्वे विहरन्त्यूर्द्ध वर्जिताः इति ॥
पाद्मे स्वर्गखण्डे १५ अध्यायः ॥
प्रेतः यथा अशौचान्ते द्वितीये
ह्नि यस्य नोत्सृजते वृषः ॥
पिशाचत्वं भवेत्तस्य दत्तैः श्रा
द्धशतैरपि इति शुद्धितत्त्वं ॥
पिशाचकी न् पुं कुवेरः इति हे
मचन्द्रः ॥ पिशाचद्रुः पुं
शाखोट वृक्षः इति त्रिका
ण्डशेषः ॥ पिशाचवृक्षः
पुं शाखोटवृक्षः ॥ इति रत्नमा
ला पिशाचसभं क्ली पिशाचा
नां सभा इति नपुंसकलिङ्गसंग्र
ह टीकायां भरतः ॥
पिशाची स्त्री पिशाचिका स्त्री ।
पिशाची इति शब्दमाला ॥ गा
न्धमांसी इति राजनिर्घण्टः ॥
पिशितं क्ली मांसं इत्यमरः ॥
पिशिता स्त्री जटामांसी इति मे
दिनी ॥ पिशिताशी न् ॥
पुं शृगालः मांसभक्षकः इ
ति हेमचन्द्रः ॥

पिशी स्त्री जटामांसी इति ॥ राजनिर्घण्टः ॥ ॥ पिशुने क्ली कुङ्कुमम् इत्यमरः ॥ पिशुनः त्रि कपिवक्त्रः नारदः काकः सूचके क्रूरेव त्रि इति मेदिनी ॥ पिशुना ॥ स्त्री पृक्का पिडिंशाक इति भाषा इति मेदिनी ॥ पिष ऌ औ ॠ चूर्णने इति कविकल्पद्रुमः ॥ पिष्टं क्ली शीशके इति रत्नमाला ॥ पिष्टकः यथा अन्नाद्दष्टगुणं पिष्टं पिष्टाद्दष्टगुणं पयः पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतं घृतादष्टगुणं तैलं मर्द्दनान्न च भक्षणात् अस्य गुणाः पिष्टं प्राणकरं रूक्षं विदाहि गुरु दुर्ज्जरं ॥ शालिपिष्टमयाभक्ष्याः कफपित्तविनाशनाः ॥ वैदला गुरवो भक्ष्या विष्टम्भिनष्ट मारुताः ॥ सगुडाः सतिलाश्चैव सक्षीर नारिकेरकाः भक्ष्यावस्या शर्कराश्च गुरवो बृंहणापरम् ॥ सस्नेहाः स्नेहसिक्ताश्च भक्ष्या गोधूमसम्भवाः गुरवस्तर्पणा हृद्या बलोपचय वर्द्धनाः ॥ समिता ॥ समितोत्तीर्ण नारिकेलघृतादिभि ॥ अवगाह्य घृते पक्वा घृतपूरोऽयमुच्यते ॥ घृतपूरो गुरुर्वृष्यः कफकृद्गुरुमांसदः रक्तपित्तहरो रुच्यः स्वादुः पित्तहरोऽग्निदः ॥ गोधूमचूर्णसमिता समिता मफ उच्यते खौरेल्लामरिचादिभिः घृतेपक्वा लिपेन खेरेङ सेयावो वृंहणो गुरुः ॥ समिता वेष्टितामध्ये मफदत्वा घृते पक्वा मफमल्लक उद्दिष्ट नद्वृष्यो गुरुद्धेरम् ॥ इति राजवल्लभः ॥ पर्पट शस्कुली फेणकवट लड्डुकानां गुणा लवन शाहेदृष्टव्याः चूर्णीकृते त्रि ॥ पिष्टकम् ॥ क्ली तिलचूर्णं इति राजनिर्घण्टः ॥ पिष्टकः पुं पिष्टानो नण्डुला हीनो विकारः पिठा इति भाषा तत्पर्य्यायः ॥ पूपः १ अपूपः २ इत्यमरः आपूपः ४ पिष्टः ५ इति शब्दरत्नावली ॥ अस्य गुणाः पिष्टशब्दे द्रष्टव्याः नेत्ररोगविशेषः ॥ इति मेदिनी तस्य लक्षणम् ॥ श्लेष्मा मारुतकोपेन शुक्ले पिष्टसमप्रभं पिष्टवत् पिष्टकं विद्धि मलाकारशसविभम् इति माधवकरः ॥ पिष्टपे ॥ क्ली ॥

पुं भुवने इत्यमररत्नकोषौ पिष्टपचने क्ली पिष्टपाकपात्रे तेलानी इति ख्याते इति शब्दभूतिः तत्पर्य्यायः ॥ ऋजीषं २ इत्यमरः ऋबीषं ३ इति स्वामी पिष्टपाकभृत् ४ इति हेमचन्द्रः ॥ पिष्टपाकभृत् क्ली पिष्टकपाकपात्रे इति हेमचन्द्रः ॥ पाष्टपाकभृत् क्ली पिष्टकपाकपात्रं इति हेमचन्द्रः ॥ पिष्टपूरः पुं वटकः इति भूरिप्रयोगः पिष्टक विशेषः तत्पर्य्यायः ॥ घृतपूरः २ घृतवरः ३ वार्त्तिकः ४ इति हेमचन्द्रः ॥ पिष्टवर्त्तिः पुं मुद्गमसूरादिपिष्टे तत्पर्य्यायः चनसिः २ इति हेमचन्द्रः ॥ पिष्टसौरभं क्ली चन्दने इति हारावली ॥ पिष्टातः पुं पटवासचूर्णं इति भरतः वस्त्रादिवासनार्थ पक्वीकृत गन्धद्रव्यचूर्णं इति सारसुन्दरी हुकुका इति भानुदीक्षितः आवीर इति ख्यातः इति रमानाथ नीलकण्ठ तत्पर्य्यायः पटवासकः २ इत्यमरः धूलिगुच्छकः ३ इति त्रिकाण्डशेषः ॥ पिष्टिकं क्ली तण्डुलोद्भवमतीरं इति राजनिर्घण्टः ॥ पिष्टिका स्त्री पिष्टदिदलः पिठी इति हिन्दी भाषा यथा दालिः सेस्यापिता नोये ततोपहृत केब्बुका शिलायां साधसे पिष्टा पिष्टिका कथिता बुधैः इति भावप्रकाशः ॥ पिष्टोडी स्त्री श्वेताम्लिः इति राजनिर्घण्टः ॥ पिस ऊ गतौ इति कविकल्पद्रुमः पिस इ कि लिपि दीप्तौ इति कविकल्पद्रुमः ॥ पिस कं निकेतन हिंसा बलदानेषु गत्याञ्च इति कविकल्पद्रुमः ॥ पिहिते ॥ त्रि आच्छादिते तत्पर्य्यायः सेवीते २ कद्धे ३ आहूते ४ संवृते ५ छन्ने ६ स्थगिते ७ अपवारिते ८ अन्तर्हिते ९ तिरोधाने १० इति हेमचन्द्रः ॥ पी ङ. य पाने इति कविकल्पद्रुमः ॥ पीठे त्रि उपवेशनाधारः ॥ पिढी चौकी इत्यादि भाषा इत्यमरः ॥ तत्पर्य्यायः ॥ आसनम् उपासने ३ पीठी विष्टरः ५ इति शब्दरत्नावली ॥ व्रतिनामासने तत्कुशासनादि तत्पर्य्यायः विष्टरः २ इति त्रिकोण्डशेषः ॥ वृषी ४ इति हेम ॥

चन्द्रः ॥ अथपीठोद्देशः ॥
यात पाषाण काष्ठेश्च पीठ स्त्रि
विधउच्यते धातवश्च शिलाश्चैव
काष्ठानि विविधानि च तदत्रैव प्र
वक्ष्यामि यथैषाउपयुज्यते ॥ अ
र्धमाने हस्तद्वयस्तु दैर्घ्येण तदर्द्ध
परिणाहतः तदर्द्धेनोन्नतः पीठः
सुखइत्यभिधीयते हस्तद्वयद्वया
धिक्यात् पंचपीठा भवंति हि सु
खेनयः शुभः सिद्धिः सम्पद्वेतिय
थाक्रमं धनभोगसुखैश्वर्यश्चवो
त्क्षितार्थप्रदायकः समदीर्घसुखा
वाप्तिर्विषमे विषमापदः आया
मपरिणाहाभ्यां हस्तद्वयमितो हि
यः अर्द्धहस्तोन्नतः पीठो जारको
नामविश्रुतः दैर्घ्यान्नतिपरीणा
हे अर्द्धहस्तमितो हि यः राजपीठ
इतिज्ञेयः सकलार्थप्रसाधकः
अत्राभिषेकमिच्छन्ति क्षितिपस्य
पुराविदः दैर्घ्यान्नतिपरीणाहैः ष
ड्हस्तमितो हि यः राज्ञो विजयप्रसा
दार्थं कीलिपीठाभिधानकः ॥
दैर्घ्यान्नतिपरीणाहे वह्निहस्तमितो
हियः श्रेगपीठो यं नाम्ना भवेत्
पंचसुखप्रदः कालेको राजपीठः
स्या ज्जयोवा राजतः सुखः राज्ञामेवो
पयोक्तव्या सर्वत्र ध्यातवोग ॥

त्रं राजपीठेच विराट्स्याज्जये सर्वा
महीं जयेत् जारको जारयेच्छत्रू
न् सुखे सुखमवाप्नुयात् राजतः की
र्तिजननो धनवृद्धिकरः परः ॥
ताम्रः प्रतापजननो विपत्तत्र य
कारकः लोहस्तूच्चाटने सार्वः ॥
सर्वकर्मसुयुज्यते त्रपुसीसकरे
गाद्याः शत्रुक्षयफलप्रदाः इति
धातुपीठाः ॥ अथ शिलापी
ठाः राजपीठो वज्रपाषाणेर्वे नाम
सहस्रपते पद्मरागो दिनेशस्य चा
न्द्रकान्तो विधोरपि राहोर्मारकतः
पीठः शनेर्नीलमणोर्भवः गोमेदक
स्तु सौम्यस्य स्फाटिकस्तु वृहस्पतेः
शुक्रस्य वैदूर्य्य भवः प्रावालो मंग
लस्य हि इत्युपुराणवाक्यं ॥
योयस्यहि दशाज्ञातः पीठस्तस्य
हितन्मयः स्फाटिकस्तु महीशा
णां सर्वेषामेव युज्यते अभिषेके
चयात्रायां मन्त्रवेजयकर्माणि ।
अथ स्कान्दोपपन्नदितः संग्रामे पीठरू
पाते गरुडोद्गारर्निते वृषास्तुत्प
त्रिवसेत् शुद्धरत्नमये पीठे भजते
वनगर्जिते सामान्यः प्राप्तुतः पीठो
विलासाय महीभुजां यथामानेऽग्र
ताम्रापि विज्ञेया धातुपीठवत् ।
अथ काष्ठपीठाः तद्यथा ॥

मानेऽष्टर्वेव देव सम्पत्ति शुलवृद्ध
यै गाम्भारी जनितो जयः जारको
रोगनाशाय सुखः शत्रुविनाशनः
सिद्धिः सर्वार्थसंसिद्ध्यै विजयाय च
वैरिणां शुभः स्यादभिषेके च सम्प
द्वैरि निवारणः पालाशो राजकः
पीठः सुखसम्पत्तिकारकः जयः
स्यादभिषेके च शुभः शत्रुविनाश
नः सुखो रोग विनाशाय सिद्धिः
सर्वार्थदायिका सम्पदुच्चाटनवि
धौ विज्ञेये पीतचन्दनो चान्दनस्तु
सुखः पीठो अभिषेके महीभुजां
जयः स्याद्रोगनाशाय शुभः सौख्य
मयच्छति जारको यहत्तुस्पर्धी अ
न्येतरतिउष्करः यत्ततो निर्म्मि
तास्तेन साम्राज्यफलदायकाः का
लेयको यावकोहि भूभुजामभिषे
चने पीठान गरुकादीना मन्येचन्द
नवत्क्षिः वाकुलस्तु शुभः पीठो भू
भुजामभिषेचने जयो रोगविना
शाय सुखसम्पत्तिकारकः सिद्धिः
सिद्धि प्रदा सम्पत् संग्रामे विजय प्र
दः जारको नराणां यस्मादितिभो
जस्य सम्मते एवं सुगन्धि कुसुमाः
सफला येच पादपाः ॥ ॥
वाकुलेन समः कार्य्यं पर्वे पीठ
स्य निर्णयः ॥ येतुस्फ काष्ठा

वृत्तास्तु मरवो लघवोऽथवा गम्भा
री सदृशाः पीठ स्तेषां कार्य्यस्तथा
गुणाः फलिनस्त्वससारश्च वक्रसार
श्चयेनगाः तेषां पानसवत्पीठस्तु
थैवगुणमावहेत् ॥ अथनिषेधः
विज्ञेयो निन्दितः पीठो लोहोत्थः स
र्वथा तन्ने शिलोत्थः शार्करो वर्ज्यः
कर्करश्च विशेषतः काष्ठेष्वपि च
पीठेषु नासारानाभिसारिणः न ॥
याद्धि आम्रजम्बु कदम्बानामास्वे
वेशानाशने भोजस्याहगुरुः पीठो गो
रवाय लघु लाघव कारकः पराण्
रस्तनाग्रस्थि नोन्नि ग्रन्थिश्च नागुरु
नीसमाकृतिः पीठः स्यान्न सुखवं ॥
पत्ते नाभिदीर्घोनवामनः येचामे
पीठसदृशा दृश्याः शिल्पि विनि ॥
र्म्मिताः गुणान्देषाश्चमानेच तेषांधी
ठकस्यादिशेत् विचार्य ध्यानेन विधि
ना यः शुद्धपीठमाचरेत् तस्य लक्ष्मी
र्गृहे वेश्मं कदाचिन्न विमुंचति ॥
अज्ञानादथवा मोहाद् योऽन्यथा पीठ
माचरेत् एतानि तस्य नश्यन्ति ल ॥
क्ष्मी राज्यबलं कुलं इति शुद्धिकस्यत
रो पीठोद्देशः ॥ कृत युगे दक्ष॥
क्रतौ शिवनिन्दां श्रुत्वा भार्य्या ॥
स्वकवत्याः सम्मोशरीरं शिवसि॥
यता भ्रमति शिवे विस्नुनाचक्रेण

च्छिन्नमानस्य प्रत्यवा यत्र यत्र प-
तितास्तु एव देशा एकपञ्चाशन्म-
हापीठा अभवन् इति पौराणि-
कीवार्ता ॥ तेषां निरूपणं यथा
ईश्वर उवाच। मातः परात्परे देवि स-
र्वज्ञानमयीश्वरि। कथ्यतां मे सर्व-
पीठे शक्तिभैरवदेवता। देव्युवाच।
शृणु वत्स प्रवक्ष्यामि दयालो भ-
क्तवत्सल। याभिर्विना न सिध्यन्ति
जपसाधनसत्क्रियाः। पञ्चाश-
देक पीठानि एवं भैरवदेवताः। अ-
ङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च।
ममान्यवपुषो देव हिताय त्वयि क-
थ्यते। ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो
भीमलोचनः। कोट्टरी सा महामा-
या त्रिगुणा या दिगम्बरी ॥१ शर्करारे
त्रिनेत्रं मे देवी महिषमर्दिनी। क्रोधी-
शो भैरवस्तत्र सर्वसिद्धिप्रदायकः ॥
२ सुगन्धायां नासिका मे देवस्त्र्यम्बक-
भैरवः। सुन्दरी सा महादेवी सुनन्दा
तत्र देवता ॥३ काश्मीरे कण्ठदेशं
च त्रिसन्ध्येश्वरभैरवः। महामा-
या भगवती गुणातीता वरप्रदा ॥४
ज्वालामुख्यां महाजिह्वा देव उन्म-
त्तभैरवः ॥ अम्बिका सिद्धिदा ना-
म्नी ॥५ स्तनं जालन्धरे मम ॥
भीषणो ॥

भैरवस्तत्र देवी त्रिपुरमालिनी ॥६ हा-
र्दपीठे वैद्यनाथे वैद्यनाथस्तु भैरवः।
देवता जयदुर्गाख्या ॥७ नेपाले जा-
नुनी मम कपाली भैरवः श्रीमान्
महामाया च देवता ॥८ मानसे द-
क्षहस्तो मे देवी दाक्षायणी हर। अमरो
भैरवस्तत्र सर्वसिद्धिप्रदायकः ॥९
उत्कले नाभिदेशश्च विरजाक्षेत्र-
मुच्यते। विमला सा महादेवी जग-
न्नाथस्तु भैरवः ॥१० गण्डक्यां गण्ड-
पातश्च तत्र सिद्धिर्न संशयः ॥ तत्र
सा गण्डकी चण्डी चक्रपाणिस्तु भैर-
वः ॥११ बहुलायां वामबाहुर्बहुला-
ख्या च देवता। भीरुको भैरवो देवः स-
र्वसिद्धिप्रदायकः ॥१२ उज्जयिन्यां
कूर्परं च माङ्गल्यः कपिलाम्बरः। भैर-
वः सिद्धिदः साक्षाद्देवी मङ्गलचण्डि-
का ॥१३ चट्टले दक्षबाहुर्मे भैरवश्चन्द्र-
शेखरः। व्यक्तरूपा भगवती भवानी
तत्र देवता। विशेषतः कलियुगे वसा-
मि चन्द्रशेखरे ॥१४ त्रिपुरायां दक्ष-
पादो देवता त्रिपुरा मता। भैरवस्त्रि-
पुरेशश्च सर्वाभीष्टफलप्रदः ॥१५
त्रिस्रोतायां वामपादो भ्रामरी भै-
रवोऽम्बरः ॥१६ योनिपीठं कामगि-
रौ कामाख्या तत्र देवता। यत्रा-
स्ते त्रिगुणातीता रक्तपाषाण ॥

रूपिणी यत्रास्ते माधवः साक्षा-
दुमानन्दोऽथ भैरवः। सर्वदा वि-
हरेद्देवी तत्र मुक्तिर्न संशयः। तत्र।
श्रीभैरवी देवी तत्र तत्र देवता
प्रचण्डचण्डिका तत्र मातङ्गी त्रि-
पुराम्बिका। बगला कमला तत्र।
भुवनेशी सधूमिनी एतानि वरपी-
ठानि शंसन्ति वरभैरव एवं ता दे-
वताः सर्वा एवं तेदशभैरवाः ॥१७
सर्वत्र विरला चाहं कामरूपे गृहे
गृहे। गौरीशिखरमारुह्य पुनर्ज-
न्म न विद्यते ॥१८ करतोयां समा-
साद्य यावत् शिखरवासिनीम्
शतयोजनविस्तीर्णं त्रिकोणं सर्व-
सिद्धिदं। देवा मरणमिच्छन्ति किं
पुनर्मानवादयः। भूतधात्री महा-
माया भैरवः क्षीरखण्डकः। युगा-
द्यायां महादेव दक्षाङ्गुष्ठपदो मम
नकुलीशः कालिपीठे दक्षपादाङ्गु-
लीषु च सर्वसिद्धिकरी देवी का-
लिका तत्र देवता ॥२० अङ्गुलीषु।
च हस्तस्य प्रयागे ललिता भवः।
जयन्त्यां वामजङ्घा च जयन्ती क्रम-
दीश्वरः ॥२१ भुवनेशी सिद्धिरूपा
किरीटस्था किरीटतः। देवता वि-
मला नाम्नी संवर्त्तो भैरवस्तथा
२२ वाराणस्यां विशालाक्षी ॥

देवता कालभैरवः। मणिकर्णी-
ति विख्याता कुण्डले च मम श्रुतेः ॥२३
कन्याश्रमे च पृष्ठं मे निमिषो भैरव-
स्तथा। सर्वाणी देवता तत्र ॥२४ कुरु-
क्षेत्रे च गुल्फतः स्थाणुर्नाम्ना च सा-
वित्री देवता ॥२५ मणिवेदके मणि-
बन्धे च गायत्री सर्वानन्दस्तु भैरवः
श्रीशैले च मम ग्रीवा महालक्ष्मी-
स्तु देवता भैरवः शम्बरानन्दो दे-
शे देशे व्यवस्थितः ॥२७ काञ्ची दे-
शे च कङ्कालो भैरवो रुरुनामकः।
देवता देवगर्भाख्या ॥२८ नितम्बः
कालमाधवे भैरवश्चासिताङ्गश्च
देवी काली च सिद्धिदा। दृष्ट्वा दृष्ट्वा
महादेव मन्त्रसिद्धिमवाप्नुयात्
कुम्भवारे भूततिथौ निशार्द्धे यस्तु
साधकः। नत्वा प्रदक्षिणीकृत्य म-
न्त्रसिद्धिमवाप्नुयात् ॥२९ शोणा ॥
ख्यो भद्रसेनस्तु नर्मदाख्या नित-
म्बकः ॥३० रामगिरौ स्तनान्यं च।
शिवानी चण्डभैरवः ॥३१ वृन्दाव-
ने केशजाले उमा नाम्नी च देवता
भूतेशो भैरवस्तत्र सर्वसिद्धिप्र-
दायकः ॥३२ संहाराख्य ऊर्द्ध्वदन्ते
देवी नारायणी शुचौ। अधोदन्ते।
महारुद्रो वाराही पञ्चसागरे ॥३३
करतोयातटे तल्पं वामेशो ॥

२६

मनभैरवः अपर्णादेवतातत्र ।
प्रलम्बपाकरोद्भवा ३४ श्रीपर्व्वे
ते दक्षतल्पं तत्रश्रीसुन्दरीपरा ।
सर्व्वसिद्धिकरीसर्व्वा सुन्दरान
न्दभैरवः ३५ कपालिनीभीम ।
रूपा वामगुल्फोविभाषके ३६
उदरंच प्रभासेमे चन्द्रभागायश ।
स्विनी वक्रतुण्डोभैरव ३७ ऊर्द्ध्वो ।
ष्ठोभैरवपर्व्वते अवन्तीचमहादे
वी लम्बकर्णस्तुभैरवः ३८ चि
बुकेभ्रामरीदेवी विकृताक्षोज
नस्थले ३९ गण्डेगोदावरीती
रे विश्वेशी विश्वमातृका दण्डपा
णिर्भैरवस्तु वामगण्डेतुराकिनी
अमायीभैरवोवत्स सर्व्वशैलात्म
कोपरि ४० रत्नावल्यांदक्षस्कन्धः
कुमारीभैरवःशिवः ४१ मिथिला
यामुमादेवी वामस्कन्धोमहोद ।
रः ४२ नलहाट्यांनलापातो यो
गेशोभैरवस्तथा तत्रसाकालि ।
कादेवी सर्व्वसिद्धिप्रदायिका ४३
कर्णाटेचैवकर्णौमे अभीरुर्णा ।
मभैरवः देवताजयदुर्गाख्या ।
नानाभोग प्रदायिनी ४४ वक्रे ।
श्वरेमनःपातं वक्रनाथस्तुभैरवः
नदीपापहरातत्र देवीमहिष ।
मर्द्दिनी ४५ यशोरे ॥

पाणिपद्मेच देवताय शोरेश्वरी ।
चण्डश्चभैरवोयत्र तत्रसिद्धिम ।
वाप्नुयात् ४६ अट्टहासे चोष्ठपा
तो देवीसाफुल्लरास्मृताः विश्वे
शोभैरवस्तत्र सर्व्वाभीष्टप्रदायकः
हारपातोनन्दिपुरे भैरवोनन्दिके
श्वरः नन्दिनीसामहादेवी तत्र ।
सिद्धिर्न्नसंशयः ४८ लङ्कायांनू
पुरंचैव भैरवोराक्षसेश्वरः इन्द्रा
क्षीदेवताजत्र इन्द्रेणोपासिता
पुरा ४९ विराटदेशमध्येतु पादा
ङ्गुलिनिपातने भैरवोऽमृताख्यश्च
देवीतत्राम्बिकास्मृता ५० मागधे ।
दक्षजङ्घामे व्योमकेशस्तुभैरवः
सर्व्वानन्दकरीदेवी सर्व्वकामफ
लप्रदा ५१ एतास्तेकथिताःपुत्र
पीठनाथाधिदेवताः तेत्राधीशं ।
विनादेवं यजेत्पीठदेवताम्
भैरवैर्ह्रियतेसर्व्वं जपस्तादिसा ।
धनं अज्ञाताभैरवं पीठं पीठश
क्तिंचशोकर माणनाद्यनसिद्ध्ये ।
न कल्पकोटिजपादिभिः नदे
ये परशिष्येभ्यो निन्दकायदुरा
त्मने ॥ पाठाय वंचकायेदम्
दत्त्वामृत्युमवाप्नुयात् दद्यात् ॥
शान्ताय शिष्याय नैष्ठिकाय
शुचौ प्रिये साधकाय कुली ॥

नाय मन्त्री मन्त्रार्थसिद्धये इति ।
तन्त्रचूडामणौ शिवपार्व्वती संवादे
एकपञ्चाशद्विद्योत् ॥ पञ्चो पीठ
निर्णयः समाप्तः ॥ अन्यानिपी ।
ठादीनि कालीशब्दे ८५ । ९
अध्याये ॥ द्रष्टव्यानि ॥ पीठ ।
मासस्तुमासशब्दे द्रष्टव्यः पीठ
देवताः पूजनेन्यासक्रमेणैव पी
ठकेलिः पुं पीठमर्द्दनायकः य
था षिड्गोबलीकः षड्भक्तः का
मकेलिर्विदूषकः पीठकेलिः ॥
पीठमर्द्दो भवेत्छिद्रोविटः इ ।
ति त्रिकाण्डशेषः ॥ ॥
पीठमर्द्दः पुं नायकविशेषः त
स्य लक्षणम् कुपित स्त्री प्रसाद
कः उदाहरणम् यथा कोपंको
पविधिः प्रयच्छ करुणागर्भे व
चोजायतो पीयूषद्रवदीर्घिका ।
परिमलै रामोदिता मेदिनी आ ।
लो वास्तहृदयाल लोचन मिद ।
म् व्यावतयन्ती कुरुषेसे क्षण
सि तस्य स्वन्दि तपोहृनदानि ।
वन्दामहे ॥ नर्म्मसचिवोप्यय ।
मेव ॥ इतिरसमंजरी ॥ पीठ
सर्पी न् त्रि खञ्जः तत्पर्य्यायः
पंगुः २ इतिहारावली ॥
पीठी स्त्री ॥ ॥

आसने पीँडी इतिभाषा इतिश
ब्दरत्नावली ॥ पीड ऋ वधे
गाहे विलोडने इतिकविकल्प ।
द्रुमः ॥ पीडनम् क्ली ॥ श
स्यादिसम्पन्नदेशस्य परचक्रेण
पीडनम् शत्रुकृतगाढप्रहारः इ ।
ति केचित् पदाक्रमणम् इति ।
केचित् इतिभरतः तत्पर्य्यायः
अवमर्द्दः २ इत्यमरः दुःखेन य
था भरणे पोष्यवर्गस्य प्रशस्तं स्व
र्गसाधनं नरकं पीडनेचास्य तस्मा
द्यत्नेन तं भरेत् इति दायभागधृत
मनुवचने मर्द्दने दिपन चापन ।
इत्यादि भाषा यथा गर्भोऽभिघा
त विषमाशन पीडनाद्यैः पक्व
द्रुमादिवफलं पतति क्षणेन इति
माधवकरः ॥ पीडा स्त्री ॥
पीडनं तत्पर्य्यायः ॥ बाधा २
व्यथा ३ दुःखम् ४ आमानस्यम् ५
प्रसूतिजम् ६ कष्टं ७ कृच्छ्रं ८
आभीलं ९ इत्यमरः आबाधा १०
इतिहलायुधः ॥ आमानस्यं ११
इति रायमुकुटः ॥ एषा पीडा
दीनां मध्ये विशेष्य गामिनो ये ॥
दुःख कष्ट कृच्छ्राभीलास्ते त्रि
लिङ्गाः सा आध्यात्मिकाधिभौ
तिकाधिदैविक तापत्रयभेदेन

त्रिविधा आध्यात्मिकोपि द्विवि
धः यथा आध्यात्मिका द्विभेदेय
ज्ञाता तापत्रयं बुधः उत्पन्नज्ञान
वैराग्यः आमोमात्यन्तिकं लयम्
आध्यात्मिकोवै द्विविधः शारी
रो मानसस्तथा शारीरो बहुभिः
भेदैर्भिद्यते श्रूयतांवसः शिरो
रोगप्रतिश्याय ज्वरशूल भगन्द
रैः गुल्मार्श श्वयथु श्वास छर्द्या
दिभिरनेकधा तथाक्षि रोगाती
सारकुष्ठाङ्गामय संज्ञकैः भि।
भिद्यते देहजस्तापे मानसंश्रोतुम
र्हसि अंगामयो वातजेनाह्वयादिः
१ काम क्रोध भयद्वेष लोभमो
हविषादजः शोकासूयावमाने
र्ष्या मात्सर्य्यादि भय जनया मा
नसोपि द्विजश्रेष्ठ तापोभवतिनै
कधा २ इत्येव मादिभिर्भेदै
स्तापो ह्याध्यात्मिकःस्मृतः॥
मृग पक्षिमनुष्याद्यैः पिशाचोर
गराक्षसैः सरीसृपाद्यैश्चनराणाम्
जन्यते चाधिभौतिकः॥ शीतो
ष्ण वातवर्षाम्बुवैद्यु तादि समु
द्भवः तापोद्विज वरश्रेष्ठ क॥
थ्यते चाधिदैविकः गर्भ जन्म
॥ जरा ज्ञान मृत्यु नारकजम्
तथा ॥ ॥

दुःखम् सहस्रशो भेदैर्भिद्यते मु
निसत्तम इति विष्णुपुराणे ६ अं
शे ५ अध्यायः॥ कृपा शिरो
माला सबलद्रः इतिमेदिनी॥
पीडिते त्रि स्त्रीरणकवर्णे यन्त्रिते
वाधितम् इतिमेदिनी मर्द्दितम्॥
इतिहेमचन्द्रः इतप्रत्ययान्तः
पीडा पर्य्यायोप्यत्र ॥ पीतम्
क्ली पाने इतिमेदिनी ॥
हरितालम् इतिराजनिर्घण्टः
पीतः पुं वर्णविशेषः हलदिया
इति भाषा तत्पर्य्यायः॥ गौरः
२ हरिद्राभः ३ इत्यमरः कुसुम्भः
अंकोटः शाखोटः पुष्परागः इ
तिराजनिर्घण्टः ॥ पीतवा
चकानि यथा पीतानि ब्रह्म १ नी
वे २ द्रु ३ गरुडे ४ सरट ५ गन्ध
टाः ६ गौरी ७ द्वापर ८ गोमूत्र
मध ९ वीरवसा ११ रजः १२ ह
रिद्रा १३ रोचना १४ रीति १५ गन्ध
के १६ दीप १७ चम्पके १८ किं
जल्क १९ वल्कके २० शालि २१
हरिताल २२ मनःशिला २३
कर्णिकारे २४ चक्रवाक २५ वा
नरौ २६ शारिकाण्डे २७ केश
वोष्णक २८ मण्डूक २९ सरग ३०
कनकाह्वयः ३१॥ पीतश्वेत॥

वाचकानि यथा पीत श्वेतो गौर
१ द्विजराज २ कपर्द्द ३ शम्भु ४ ह
रि ५ तार्क्ष्याः ६ हेमरोमा ७ ष्टा
पद ८ महारजत ९ चन्द्र १० कल
धौताः ११ अस्यार्थः गौरः श्वेत
पीतयोः द्विजराजो गरुडचन्द्र
योः कपर्द्दः शम्भुजटाजूट कप
र्द्दयोः शम्भुर्ब्रह्म त्रिलोचनयोः ह
रिः पिङ्गलसिंहयोः तार्क्ष्यो गरुडः
पत्तेऽश्वे ऽश्ववाः हैमरोमः हेम्नाः
यहैमः पत्ते हमस्यापे अष्टापदम्
सुवर्ण शरभयोः महारजतम् सु
वर्ण रूप्ययोः चन्द्रः स्वर्णशशाङ्क
योः कलधौतम् हेम रूप्ययोः सुशो
भिता रक्कूट श्रीः स्वर्णरोम सम
शुतिः ह्हनोपलसत् कान्तिर्गांगे यद्ध
वि पेशलः अस्यार्थः नारकूटोरू
ष्पसम्भूतः पत्ते आरकूटोरीतिः सु
शोभनमणिः कनकेच गोपति
तार्क्ष्यकान्तिः रविगरुडच्छविः
पतेगोपतिरिन्द्रः तस्यतार्क्ष्यस्तुरंगः
वामदेव गिरिर्मेनोत्तमेरुः कैला
सश्च ॥ पीत श्याम वाचकानि
यथा पीतश्यामौ कुसाम्बर १
मधुजित् २ धामनेतारः ३ विद्यु
त् कान्त ४ धान्तद्वेषि ५ हरि ६
स्वर्णवर्णछायाः ७ अस्यार्थः ॥

कृसाम्बरे विष्णुवस्त्रे हर्य्याकाशयोः
मधुजित् मधुतस्य विष्णोः धान्त
नेता सूर्य्य तमस्तत्पयोः विद्युत्
कान्तः मेघ तडिन्मनोज्ञयोः धान्त
द्वेषी सूर्य्यान्धकार तत्पयोः हरिः
कपि कृष्णयोः स्वर्णवर्णछायः
सुवर्ण सुन्दरसमुद्रतत्संभवयोः
इतिकविकल्पलता ॥ पीते
त्रि पीतवर्णयुक्ते इतिमेदिनी ॥
कृतपानम् यथा हालाहलमपि पी
ते बकशो भिक्षापिभक्षिता भवता॥
भवता अनयो रवगतवसयोः किं
यत्नरम् वदयोगिन् इत्युद्भटः ॥
पीतके क्ली हरितालम् इत्यमरः
कुंकुमम् इति जटाधरः अगुरु प
द्मकाष्टे रीतिः माक्षिके इतिराज
निर्घण्टः ॥ नन्दीवृक्षः पीत
शालः इतिरत्नमाला [illegible]
कप्रभेदः हरिद्रः किंकिरातहृदः
इतिराजनिर्घण्टः ॥ पीतकद
ली स्त्री स्वर्णकदली इति राजनि
र्घण्टः ॥ पीतकद्रुमः
पुं हरिद्रहक्षः इतिराजनिर्घण्टः
पीतकन्दम् क्ली गर्जरम् ॥ इ
तिराजनिर्घण्टः ॥
पीत करवीरकः पुम् पीतव

पीतकरवीर पुष्पवृक्षः तत्पर्य्या
यः पीतप्रसवः २ सुगन्धिकु
सुमः ३ अस्यगुणाः सामान्यक
रवीर गुणतुल्याः ॥ इतिराज
निर्घण्टः ॥ पीतकावेरं क्ली
कुंकुमम् पित्तलं इतिमेदिनी ॥
पीतकाष्ठम् क्ली पीतचन्दनम्
इतिराजनिर्घण्टः ॥
पीतकीला स्त्री आवर्त्तकीलता
इति राजनिर्घण्टः ॥
पीतघोषा स्त्री पीतपुष्पघोषाल
ता इति रत्नमाला अस्याः प
र्य्यायः ॥ घोषकशब्दे द्रष्टव्यः ॥
पीत चन्दनं क्ली पीतवर्णचन्दनं
तत्तद्द्राविड देशे प्रसिद्धे कलम्बक
इतिख्याते तत्पर्य्यायः पीत
गन्धम् २ कालेयम् ३ पीतकं ४
माधवप्रियं ५ कालेयकं ६ पीत
काष्ठं ७ वर्व्वरं ८ इतिराजनिर्घ
ण्टः कालीयकं ९ कालीयं १० पी
ताभं ११ हरिचन्दनं १२ हरिप्रियं १३
कालसारं १४ कालानुसार्य्यकं १५
अस्यगुणाः १६ रक्तचन्दनगुणता
स्यगुणत्वम् व्यंगनाशित्वंच इति
भावप्रकाशः शीतलत्वं तिक्तत्वम् कु
ष्ठश्लेष्मकण्डू विचर्च्चिका दद्रुक्रिमि
नाशित्वं कान्तिकरत्वंच इति ॥
राजनिर्घण्टः ॥ ॥
पीतचम्पकः पुं प्रदीपः इतिज
टाधरः पीतवर्ण चम्पक पुष्प वृ
क्षश्च पीततण्डुलः पुं कंकुनी इ
तिराजनिर्घण्टः ॥
पीततुण्डः पुं कारण्डवपक्षी त
त्पर्य्यायः चंचुसूचिः २ सुगृहः
३ इतित्रिकाण्डशेषः ॥
पीतता स्त्री हरिद्रावर्णता पीतत्वम्
पीतशब्दात् भावार्थे त प्रत्ययनि
ष्पन्ना इतिव्याकरणम् ॥
पीततैला स्त्री ज्योतिष्मतीलता
इतिजटाधरः महाज्योतिष्मती
इति राजनिर्घण्टः ॥
पीतदारु क्ली देवदारु इत्यमरः
सरलः इतिरत्नमाला हरिद्रुः इ
तिराजनिर्घण्टः ॥
पीतदुग्धा स्त्री धेनुष्या ऋणबन्ध
कैः संस्थिता गौः इतिहेमचन्द्रः
पीतं दुग्धं यस्याः यया वा ॥
पीतद्रुः पुं सरलवृक्षः दारुह
रिद्रा ॥ इत्यमरः ॥
पीतनम् क्ली कुंकुमं हरिता
ले पीतदारु इत्यमरमेदिन्यौ ॥
पीतनः पुं प्लक्षः इति राज ॥

निर्घण्टः आम्रातकः इतिमे
दिनी पीतनकः पुं आम्रातकः
इतिराजनिर्घण्टः ॥ पीतप
र्णी स्त्री वृश्चिकाली बिछिटि इति
भाषा इतिशब्दचन्द्रिका ॥
पीतपादा स्त्री शारिकापक्षी इति
हेमचन्द्रः ॥ पीतचरणयुक्ते
त्रि पीतपुष्पं क्ली आकल्यवृक्षः
इतिराजनिर्घण्टः हरिद्राभंगस्त
मेच पीतपुष्पः पुं कर्णिकारवृ
क्षः इतिशब्दचन्द्रिका चम्पकवृ
क्षः इतिराजनिर्घण्टः ॥
पीतपिण्डी पिण्डीतकभेदः इ
तिरत्नमाला पीतपुष्पा स्त्री इ
न्द्रवारुणी झिण्टीविशेषः आ
ढकी इतिराजनिर्घण्टः ॥
पीतपुष्पी स्त्री शंखपुष्पी सहदेवी
महाकोषातकी त्रपुषी इतिराज
निर्घण्टः ॥ ॥
पीतफलः पुं शाखोटवृक्षः इ
तित्रिकाण्डशेषः ॥ कर्म्मा
रवृक्षः इतिराजनिर्घण्टः ॥
पीतफलकः पुं शाखोटवृक्षः इ
तिभावप्रकाशः ॥ पीतवा
लुका स्त्री हरिद्रा इतित्रिकाण्ड
शेषः पीतवर्णसिकताच ॥
पीतभृंगराजः पुं पीतवर्णभृंगरा
जः पीतकेशुरिया इति भाषा त
त्पर्य्यायः स्वर्णभृंगारः २ हरिप्रि
यः ३ देवप्रियः ४ वन्दनीयः ५ पा
वनः ६ अस्यगुणाः तिक्तत्वं उष्णत्वं च
क्षुष्यत्वं केशरंजनत्वं कफामशोफ
नाशित्वं तत्रनीलोरसायनः इ
तिराजनिर्घण्टः ॥ पीतमणिः
पुं पुष्परागः इतिराजनिर्घण्टः ॥
पीतमाक्षिकम् क्ली माक्षिकं इति
राजनिर्घण्टः ॥ पीतमुद्गः
पुं मुद्गविशेषः सोनामुग इति ॥
भाषा तत्पर्य्यायः वसुः २ खण्डी
रः ३ प्रवेलः ४ यशाः ५ शारदः
६ इतिहेमचन्द्रः ॥ पीतमू
लकं क्ली गर्जरं इतिराजनिर्घ
ण्टः ॥ पीतयूथी स्त्री स्वर्णयूथी
इतिराजनिर्घण्टः ॥
पीतरक्तं क्ली पुष्परागमणिः इ
तिराजनिर्घण्टः ॥ पीतरागं
क्ली किंजल्कं सिक्थकम् इति
राजनिर्घण्टः ॥ पीतवर्णो ये
नइति त्रि ॥ पीतरोहिणी ॥
स्त्री काश्मरी इतिभावप्रकाशः ॥
पीतलः पुं पीतवर्णः तद्युक्ते
त्रि इतिहेमचन्द्रः ॥

पीतलकं क्ली पित्तलम् इति राजनिर्घण्टः ॥
पीतलोहम् क्ली पित्तलभेदः इतिहेमचन्द्रः ॥
पीतवासाः [स्] पुं श्रीकृष्णः इतिहलायुधः पीतवस्त्रयुक्ते त्रि
पीतवीजा स्त्री मेथिका इतिराजनिर्घण्टः ॥ पीतवर्णवीजयुक्ते त्रि पीतवृक्षः पुं श्योनाकप्रभेदः सरलवृक्षः इतिराजनिर्घण्टः ॥ पीतशालः पुम् असनवृक्षः इति शब्दचन्द्रिका ॥ पीतसारम् क्ली पीतवर्णचन्दनम् । पुम् हरिचन्दनम् इतिशब्दचन्द्रिका पीतसारः पुं मलयजः गोमेदकमणिः इतिमेदिनी अङ्कोटवृक्षः इतिजटाधरः तुरुष्कः बीजकः इतिराजनिर्घण्टः ॥
पीतसारकः पुं निम्बवृक्षः अङ्कोटवृक्षः इतिराजनिर्घण्टः ॥
पीतसारि क्ली स्रोतोञ्जनम् इतिशब्दचन्द्रिका ॥ पीतसालकः पुं पीतवर्णसालवृक्षः पियासाल इति भाषा तत्पर्यायः सर्जकः २ असनः ३ बन्धूकः ४ पुष्पप्रियकः ५ जीवकः ६ इत्यमरः ॥ अस्य पर्यायान्तरम् गुणाश्च असन शब्दे द्रष्टव्याः ॥
पीतस्फटिकः पुं पुष्परागमणिः इतिराजनिर्घण्टः ॥
पीता स्त्री हरिद्रा इत्यमरः दारुहरिद्रा महाज्योतिष्मती ॥ कपिलशिंशपा प्रियङ्गुः गोरोचना इतिराजनिर्घण्टः ॥ अतिविषा इतिशब्दचन्द्रिका ॥
पीताङ्गः पुं श्योनाकप्रभेदः इतिराजनिर्घण्टः ॥
पीताब्धिः पुं अगस्त्यमुनिः इतिहेमचन्द्रः ॥ पीताम्बरः पुं विष्णुः इत्यमरः शैलूषः इतिमेदिनी पीतवस्त्रयुक्ते त्रि हरिद्राजवसने क्ली पीताश्मा [न्] पुं पुष्परागमणिः इतिराजनिर्घण्टः ॥
पीतिः पुं घोटकः इत्यमरः ॥
पीति स्त्री पानम् इतिमेदिनी ॥ शुण्डा इतिशब्दचन्द्रिका ॥
पीतिका स्त्री हरिद्रा इतिरत्नमाला दारुहरिद्रा इतिराजनिर्घण्टः स्वर्णयूथी इतिजटाधरः ॥
पीती [न्] पुं पीतिः घोटकः इत्यमरटीकायां रायमुकुटः ॥

पीतुः पुं सूर्य्यः अग्निः इत्युणादिकोषः यूथपतिः इतिसंक्षिप्तसारोणादिवृत्तिः ॥ पीथम् ॥ क्ली जले इतिहेमचन्द्रः ॥ घृते इत्युणादिकोषः ॥ सूर्य्यः अग्निः कालः इतित्रिकाण्डशेषः
पीथिः पुं पीतिः घोटकः इत्यमरटीकायां स्वामी ॥
पीनः त्रि स्थूलः इत्यमरः पीनसः पुं नासिकारोगविशेषः । पीनास इतिभाषा तत्पर्यायः प्रतिश्यायः २ इत्यमरः अपीनसः ३ प्रतिश्या ४ इतिभरतः । नासिकामयः ५ इतिशब्दरत्नावली ॥ तस्य निदानं यथा आनह्यते यस्य विशुष्यते च प्रक्लिद्यते धूप्यति चैव नासा नवेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं व्यवस्येत् खलु पीनसेन तंचानिल श्लेष्मभवम् विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गम् इतिमाधवकरः ॥ ॥ आमपीनस लक्षणं यथा शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः । क्षामः ष्ठीवति चाभीक्ष्णं आमपीनसलक्षणं ॥ पक्वपीनसलक्षणं यथा आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति स्वरवर्णविशुद्धिश्च पक्वपीनस लक्षणं ॥ तस्यौषधानि यथा सर्वेषु सर्वकाले पीनसरोगेषु जातमात्रेषु मरिचं । गुडेन दध्ना भुञ्जीत नरः सुखं लभते १ कटुफलं पौष्करं शृङ्गी व्योषं यासश्च कारवी एषां चूर्णं कषायं वा दद्यादार्द्रकजैरसैः पीनसे स्वरभेदे च नासास्रावे हलीमके सन्निपाते कफे वाते कासे श्वासे च शस्यते २ व्योषचित्रकतालीश तिन्तिडीकाम्लवेतसं सचव्याजाजि तत्सांशा मेला । त्वक्पत्र पादिकं व्योषादिकमिदं चूर्णं पुराणगुडमिश्रितम् पीनसश्वासकासघ्नं रुचिस्वरकरं परम् ३ इति भावप्रकाशः ॥ पिप्पली त्रिफला चूर्णम् मधुसैन्धव संयुतं सर्वरोगज्वरश्वासशोषपीनसकृद्भवेत् इति गारुडे १८२ अध्यायः ॥
पीनसा स्त्री कर्कटी इतिराजनिर्घण्टः
पीनसी [न्] त्रि पीनसरोगी पीनसशब्दादस्त्यर्थे इन् प्रत्यय निष्पन्नः ॥
पीनोध्नी स्त्री पीवरस्तनी गौः इत्यमरः ॥ पीपरिः पुं ॥ फलसत्तः इतिराजनिर्घण्टः ॥
पीय पाने तोषे धातुरयम् ॥ इतिकविकल्पद्रुमः ॥

पीथः पुं कालः रविः सूर्यः।
इतिमेदिनी ॥ काकः इति सं
क्षिप्तसारोणादिवृत्तिः ॥ पी
यूषं क्ली अमृते इत्यमरः ॥ दुग्ध
म् इतिराजनिर्घण्टः ॥
पीयूषः पुं क्ली अभिनवपयः न
वप्रसूताया गोःसप्तदिनात्मकक्षी
राद्युग्धम् इत्यमरभरतौ ॥ अथपी
यूषपेयूषे नवंसप्तदिनावधि इ
तिशब्दार्णवः ॥ आसप्तरात्रमभेव
क्षीरं पेयूषउच्यते इतिहारावली ॥
पीयूषमहाः पुं चन्द्रः इतिशब्द
रत्नावली ॥ पीयूषरु
चिः पुम् चन्द्रः इतिहलायुधः ॥ अ
मृतमियख ॥ पील
रोधे इतिकविकल्पद्रुमः ॥ पीलकः
पुम् पिपीलिका इतिहेमचन्द्रः ॥
पीलुः पुम् प्रसूनम् परमाणुः
मतंगजः अस्थिखण्डम् ताल ॥
काण्डः इति मेदिनी ॥
वाणः कृमिः इति धरणिः ॥
कोंकणादि देशे प्रसिद्धः फ
ल वृक्ष विशेषः ॥
पील इति भाषा तत्पर्यायः
गुडफलः २ ॥ ॥
ओंनमः शिवाय

स्रंसी ३ इत्यमरः शीतसहः ४
धानी ५ विरेचनः ६ फलशाखी ७
श्यामः ८ करभवल्लभः ९ अ
स्य फलगुणाः श्लेष्मवायुगुल्म
नाशित्वं पित्तदत्वं भेदकत्वं यत्ता
ड तिक्तं तत्तु नात्यर्थं त्रिदोषहर
त्वेच इतिराजनिर्घण्टः ॥
पीलनी स्त्री मूर्वा इतिरत्नमाला ॥
पीलुपत्रः पुम् मोरटालता ॥
इतिराजनिर्घण्टः ॥
पीलुपर्णी स्त्री मूर्वा बिम्बिका।
ओषधिभेदः इतिमेदिनी ॥ पीव
स्थौल्ये इतिकविकल्पद्रुमः ॥
पीवन् त्रि स्थूले इत्यमरः ॥ पी
वरः त्रि उपचितावयवः मोटा।
इति भाषा तत्पर्यायः पीनः १
२ पीवा ३ स्थूलः ४ इत्यमरः
पीवरस्तनी स्त्री पीनोध्नी इत्य
मरः स्थूलस्तन युक्तानारीच ॥
पीवान् पुम् बलवान् वायुः इ
तिसंक्षिप्तसारोणादिवृत्तिः ॥
स्थूलः इत्यमरः ॥
पीवा स्त्री उदकम् इतिसंक्षि
प्तसारोणादिवृत्तिः ॥
पीवरा स्त्री अश्वगन्धा शताव
री इतिराजनिर्घण्टः स्थूलाच

पीवरी स्त्री शातमूली इतिरत्न
माला शालपर्णी इतिभावप्र
काशः तरुणी गौः इतिसंक्षिप्त
सारोणादिवृत्तिः ॥ पुंलिंग
क्ली पुंचिह्ने शिश्नः शब्दवाच।
कतायां पुं इतिजुमरः ॥ पुंदू
षः पुं गन्धमूषिकः छुंछा इति
भाषा इतिशब्दमाला ॥ पुंगवश्च
पुंश्चलः पुं व्यभिचारी यथा ल
लाटोपस्तृता लिखिता रेखा ॥ स्व
शतवर्षिणां नृपतेस्याद्वितस्य ॥
भिक्षुः पंचनवत्यष्टमेरेवेण
पुनर्भवति विधिशाभिश्च पुंश्चलाः
इतिगारुडे ९९ अध्यायः ॥
पुंश्चली स्त्री असती इत्यमरः ॥
अस्या अमरोक्तपर्य्यायाः कुलटा।
शब्देरित्विता तदतिरिक्तपर्य्या
या यथा धृष्टा १ दुष्टा २ धर्षिता
३ इतिशब्दरत्नावली लंका ४
निशाचरी ५ अपारता ६ इतिज
टाधरः तस्याश्चविरोधादि यथा
अहोका वेदभुवने दुर्ज्ञेयं पुंश्चली
मनः पुंश्चलीयोहि विषलतो विपि
नाश्वविज्ञेवितः वह्निकृतश्रयशान्ता
यमेसमात्स्वज्ञलेनच वोक्षितेन्धनः
नेमारण्यविनश्यतिशतशतेन सदा
स्वकर्मसाध्यासा ॥

केवा तस्याः प्रियोऽप्रियः दैवेक
र्म्मणि पैत्रेच पुत्रेवस्त्र्यानमर्हति
दारुणंपुंश्चली चित्ते सदाशृंगार
कर्म्मणि प्राणाधिके रतिज्ञेसा
अमृतद्रष्टा हि पुंश्चलीरत्नप्रदे
रसवित्ते विषद्रष्टा हि पश्यति।
सर्वेषां स्थलमस्त्येव पुंश्चलीनां
नकुत्रचित् दारुणां पुंश्चलीजाति
नरजातिभ्यएवच निष्कृतिःक
र्म्मभोगान्ते सर्वेषामस्ति निश्चितं
नपुंश्चलीनां विप्रेन्द्र यावच्चन्द्र
दिवाकरौ अन्यासांकामिनीनां
चकीटदेहान्तेच पादया सानास्ति
पुंश्चलीनान्तु कान्तेदेहेतपाणामनं
रभिन्ने त्रुतने भाग्यं विषतुसंपूर्णा
तन्ने कान्ते दृष्टा दिनस्यैव सौपार्य
नावलीलया ॥ दृष्टियोग्यानि
पापानि पुंश्चलीशेषभारते तिष्ठ
न्ति तान्योन्यतरः पापिष्ठः सन्ति
केवन ॥ पुंश्चलीपरिपक्वान्नं
सर्वपातकमिश्रितं दैवेकर्म्मणि
पैत्रेच देयंनच यथाजले अन्नं ॥
विप्रायपोमूढे पुंश्चलीनावनिश्चि
ते दत्वा पितृभ्योदेवेभ्यो भुक्तावा
नरकेवशेनृ याज्ञवर्षकालसूत्रे प
चसेवसुदारुणे घोरान्धकारे कृ
मय स्त ॥

पति दक्षिणा पाणो रंगुष्ठानामि
काभ्यां वसनवद्धो येषित वदशु
द्भाम् गृहीत्वा गर्भवत्या दक्षि॰
णनासा विवरे शृंगारसे निः॰
क्षिपति मन्त्रा पतिर्जपेषि वेत्त्रु॰
प् छन्दो ऽग्नीन्द्र बृहस्पतयोदेवा॰
ता न्यग्रोध शृंगारसस्यदाने विनि
योगः ॥ ओं पुमानग्निः पुमानि
न्द्रः पुमान् देवो बृहस्पतिः पु॰
मांसं पुत्रम् विन्दस्वत पुमानन्
जायतां ततो महाबाहुरिति हो॰
मं कृत्वा तत्सौ मादेशप्रमाणं॰
कृताके समिध मंग्नौ कृत्वा प्रक्षा
ते कर्म्मसमाप्य उदीच्य शाट्या॰
यन होमादि वामदेव्य गानान्तेक
र्म्म कृत्वा कर्म्मकारयित्र ब्राह्म
णाय दक्षिणां दद्या दिति पुंसव
ने इतिदशकर्म्मपद्धतौ भवदेव
भट्टः ॥ अथ पुंसवनोक्तवा॰
राः रवि मंगल बृहस्पतयः न
क्षत्राणि पूर्वाषाढोत्तराषाढा पू॰
र्वभाद्रपदुत्तर भाद्रपद पुष्यपुनर्व
सु मूलार्द्रा रेवतीहस्ता श्रवणमृ
गशिरसः तिथयः नन्दा भद्राः
लग्नानि कुम्भसिंह धनुर्मीन मिथु॰
नानि स्त्रिया अन्ध्यादि शुद्धौ दशायोग॰
भंग विधिभद्रा अहस्पर्शादीन प
रित्यज्य गर्भधारणा द्वितीयपि तृती

पमासे ॥
कर्तव्ये इतिस्मार्तिषे ॥
पुंस्त्व क्ली शुक्रम् इतिहेमच॰
न्द्रः शुक्रपत्वञ्च ॥
पुंस्त्वविग्रहः पुं मन्म्रणं इति॰
राजनिर्घण्टः ॥
पुक्कशः पुम् चण्डालः इत्यम
रः पुक्कषः पुं चण्डालः इ॰
त्यमरटीकायां भरतः ॥
पुक्कसः पुं चण्डालः अधमे
त्रि इतिमेदिनी शब्दरत्नावल्या
पुक्कसी स्त्री कालिका नीली॰
इतिमेदिनी शब्दरत्नावल्यौ ॥
पुंखः पुं काण्डमूले शरफल इ॰
तिख्याते इत्यमरः ॥
पुंगः पुम् क्ली समूहः इति
शब्दचन्द्रिका ॥
पुंगलः पुं आत्मा इतिभूरिप्र॰
योगः ॥ पुंगवः पुं वृषः उ॰
षधभेदः उत्तरपदस्थः श्रेष्ठवा॰
चकः इतिमेदिनी ऋषभोष
धम् महोक्षः इतिराजनिर्घण्टः
पुच्छ प्रसादे इत्यमरटीकायां ॥
रायमुकुट धृतधातुः ॥
पुच्छः पुं क्ली लाङ्गूले इत्यमरः
पश्चाद्भागे पुं इतिमेदिनी ॥
लोमवल्लाङ्गूले कलापे च क्ली॰
इत्युणादिकोषः ॥

पुच्छटि स्त्री अङ्गुलिमोटने अ॰
गुल मट्काने इति भाषा इति
त्रिकाण्डशेषः ॥
पुच्छदा स्त्री लक्ष्मणाकन्दः
इति राजनिर्घण्टः ॥
पुच्छी पुं अर्कवृक्षः इतिराज
निर्घण्टः कुक्कुटः इतिशब्द
चन्द्रिका ॥ लाङ्गलयुक्ते
त्रि पुञ्जः पुं समूहः राशिः
इत्यमरः पुट क चूर्णे भा॰
सि इतिकविकल्पद्रुमः ॥
पुट शि श्लेषे इतिकविकल्पद्रु
मः ॥ पुटं क्ली जातीफले इ॰
तिराजनिर्घण्टः ॥ उपर्य्यधो॰
भावा पत्र संपुटकमृदा लिप्ता॰
त्रहयदृषौषधपाकपात्रे धातवा
दि सारेणापुटकान् पुत्र प्रकाश
नाह दसमदीपे लोहादे रचनभ्या
व स्वर्णवेन गुणात्यना सलि॰
ले तरणं चापि ततसिद्धिः पुटाना
द्भवेत् गम्भीरे विस्तरे कुण्डे हि
स्ते चतुरस्रके वनोपल सहा॰
स्रेण हरिते पुटनौषधम् को॰
ष्ठेकद्वे प्रयत्नेन गोविष्ठौ परि॰॥
धारयेत् ॥ वनोपलसह॰
स्रार्द्धं कोष्ठिको परितः क्षि॰
पेत् ॥

वह्निविनिः क्षिपेन्नत्र महापुट ॥
मितिस्मृतं १ कोष्ठे मूषा गोविष्ठा
गोरठा महा पुटः सपादहस्तमाने
न कुण्डे निम्ने तथायते वनोप॰
ल सहस्रेण शर्णामध्ये विधारयेत्
पुटन द्रव्यसंपुक्ता कोष्ठिकोपरि॰
तोयुवे अर्द्धानि करण्डानि प्र॰
क्षेपयेत् विनिःक्षिपेत् एतद्गज॰
पुटं प्रोक्तं ख्यातं सर्वपुटोत्तमं ह
स्तमात्रविंशत्यङ्गुल प्रमाणः स
सपादः तेन त्रिंशदंगुल प्रमाणे
नेत्यर्थः ॥ अतएवोक्तं साधार
णे नरांगुला त्रिंशदंगुलको गजः
इतिगजपुटे २ अरत्नि मात्रके॰
कुण्डे पुटम् वाराहमुच्यते ३ वित
स्ति मात्रके ख्याते कथितं कौकु
कुटम् पुटम् ४ अरत्निस्तु निष्क॰
निष्ठेन मुष्टिना इत्यमरः निस्तन
कनिष्ठया मुष्टेः पलत्तितोहस्तो
ऽरत्निरित्यर्थः षोडशांगुलके ॥
ख्याते कस्यचित् कौकुकुटं पुटं ॥
पतपुटे दीयते ख्याते श्यष्टसेरको॰
र्वनोपलैः कपोतपुट मेतत्त क
थितं पुटपण्डितैः ५ गोष्ठान्त॰
र्गोखुर क्षुन्नं शुष्कचूर्णितगोमये
गोवरं तत समाख्यातं वरिष्ठेरस
साधने हृद्द्राण्ड स्थितेर्येन्त्र ॥

गोवैर्दीपयेत्पुटे तज्ज्ञोवर पुटेषो
क्ते भिषग्भिः स्वतभस्मकृत् ६ हृ
हज्जारेऽ तथैः पूर्णे मध्येमूषा वि
धारयेत् निशाग्निमुद्दयेज्जारऽं ते।
ज्जारऽपुटमुच्यते ७ ॥ इति भाव
प्रकाशः ॥ पुटः पुं स्त्री
अश्वखुरः इतिशब्दरत्नावली
पुटः त्रि आच्छादने पत्रादिरचि
तः शुष्मायाधारः यथा उग्या।
पयः पत्रपुटे मदीये इति रा
घुः मिलिःसंश्लेषः इति भरतः
इत्यमरटीकायां भरतः ॥
पुटकं स्त्री पद्मम् इतिशब्दर
त्नावली ॥ स्वार्थे क प्रत्यये।
पुट शब्दार्थोऽप्यत्र ॥ पुट।
कन्दः पुं कोलकन्दः इति रा
जनिर्घण्टः ॥ पुटकिनी ॥
स्त्री पद्मिनी पद्मप्रकदेशः पा
द्मसमूहः पद्मलता च इति।
हेमचन्द्रः ॥ पुटग्री
वः पुम् गर्गरी ताम्रकुम्भः
इति मेदिनी ॥ ॥
पुटपाकः पुम् पुटान्तर्गतौ
षध पचनम् ॥ अथ पुटपा
कविधिः पुटपकस्य कल्कस्य।
स्वरसो गृह्यते यतः ; अतस्तु पु
टपाकानां युक्तिरत्रोच्यते ॥

ते मया पुटपाकस्य पाकोऽयं ले
पस्याङ्गार वर्णता लेपंच द्व्यङ्गुले स्थू
ले कुर्य्याद्वाङ्गुलिमात्रकम् काश्म
री वटजम्ब्वादि पत्रैर्वेष्टनमुत्तमम् ॥
पलमात्रो रसो ग्राह्यः कर्षमात्रं म
धु क्षिपेत् कल्कचूर्णद्रवाद्या।
श्च देयाः कोलमिता बुधैः ॥
अपिच देविल्वे स्निग्धमांसस्य।
परं द्वयपलमने द्रवस्य कुडवो
न्माने सर्वमेकत्र पेषयेत् तदेक
देशमालोड्य पत्रैः स्वपरिवेष्टि
ते पुटपाक विधानेन तत्पक्का
तद्रसं बुधः तर्पणोक्तेन विधिना
यथावदवचारयेत् दृष्टिमध्ये।
निषेच्यो ७ निमग्नलानशायिनः
स्नेहनो लेखनश्चैव रोपणश्चेति स।
त्रिधा हितः स्निग्धो विरूक्षस्य।
स्निग्धस्य तु लेखनः दृष्टे वला।
र्थे मितरः पित्तास्रग्व्रण वातनु।
त् इतरो रोपणः स्नेहमांस वसा
मज्ज मेदः स्वाद्वौ षधैः कृतः स्ने।
हनः पुटपाकः स्या द्धार्य्यो द्वे वा
कशतेनतु सः वाक्शते लेखिकाश
ने जाङ्गलानां यकृन्मांसैर्लेखनद्र
व्यैस्तथा कृमलोह रजस्ताम्र श
ख विद्रुम सिन्धूत्थैः समुद्रफेनका
सीस स्रोतोजदधिमस्तुभिः लेखना
वाक ॥

ह्यते तस्य परं धारणमिष्यते ॥
स्नेह्य जाङ्गल मध्वाज्य तिक्तकद्रव्य
भावितः लेखनात् त्रिगुणो धार्य्यः
पुटपाकस्तु रोपणः तिक्तकटु ॥
क्वाथाद्य निम्बामृता वृष पटोल
निदिग्धिकाभिः स्यात् पंच तिक्त
क इतिप्रथितो गणोऽयं आचरे।
तर्पणोक्तान्तु क्रियो व्यापति र।
र्शने व्यापत्ति दर्शने मिथ्या कृत
पुटपाक जनित व्याधि दर्शने ते।
जांस्यनिलमाकाशमादर्शं भास्व
राणि च नेक्षेत तर्पिते नेत्रे यश्च वा
पुटपाकवान् इतिभावप्रकाशः
पुटभेदः पुं नदीवक्रे पत्ता ॥
आतोद्ये इतिमेदिनी ॥ पुट
भेदनम् स्त्री नगरम् इत्यमरः
पुटालुः पुं कोलकन्दः इति।
राजनिर्घण्टः ॥ पुटिका।
स्त्री एला इतिहारावली ॥
पुटितं स्त्री हस्तपुटे पाटिते स्यू।
ते त्रि इतिमेदिनी आघातप्रमा
वादि पुक्रमस्नादौ पुटमामेव त्रि
पुटी स्त्री कौपीने इतिजटाधरः
आच्छादनम् पत्रादि वचितः ७॥
शुष्ठ्याधारः इत्यमरभरतौ ॥
पुटोजटम् स्त्री श्वेतच्छत्रम् ॥
इति ॥ ॥

त्रिकाण्डशेषः ॥
पुटोदकः पुम् नारिकेलः इति
हारावली ॥
पुड क तौच्छे इतिकविकल्पद्रुमः
पुड ऋ मर्द्दे इतिकविकल्पद्रुमः
पुण श धर्मे इतिकविकल्पद्रुमः
पुण्ड्रः पुं तिलकः इतिजटाधरः
पुण्डरी पुं हस्तिनाम अब्याणीव च
त्वच्यः स्वरविरपः शालपर्णीव
भेदेन। पत्रः पुण्डरिया इतिख्यातः
तत्पर्य्यायः पौण्डरीकं २ पुण्डरी
कं ३ पुण्डरीयकं ४ प्रपौण्डरी ५
वत्स्यं ६ पौण्डर्य्यं ७ तालपुष्प।
कं ८ सालपुष्पं ९ दृष्टिकृत् १०
स्थलपद्मं ११ मालकं १२ केचित्।
सर्वदशाकम्। पद्मकाष्ठे प्रचलते
इतिशब्दरत्नावली ॥
पुण्डरीकं स्त्री शुक्लपद्मम् तत्
पर्य्यायः सिताम्भोजम् २
इत्यमरः शतपत्रम् ३ महापद्मं ४
सिताम्बुजं ५ इतिरत्नमाला ॥
अस्य पर्य्यायान्तरं पुण्डरीकश्वेतपद्म
शब्दे द्रष्टव्याः पद्ममात्रे इतिभरत।
धृतवाडिः श्वेतच्छत्रे भेषज भे
दः इतिमेदिनी ॥ पुण्डरीकः
पुम् अग्निकोणस्थदिग्गजः
आम्रः इत्यमरः कोषकारभेदः ॥

इतिमेदिनी सहकारः गणाथ
रः राजिलसर्पः ॥ गजज्वरः ॥
इतिहेमचन्द्रः दमनकवृक्षः
इतिराजनिर्घण्टः ॥ कमण्डलुः
श्वेतवर्णः इत्यनेकार्थकोषः ॥
कुष्ठभेदः तस्यलक्षणं सश्वेतं
रक्तपर्य्यन्तं पुण्डरीकदलोपमम्
सोत्सेधंच सरागंच पुण्डरीकंप्र
चक्षते इतिमाधवकरः ॥
पुण्डरीकाक्षं क्ली पुण्डर्य्य इ
ति शब्दचन्द्रिका ॥ पुण्डरी
काक्षः पुम् विष्णुः इत्यमरः ॥
तस्यस्मरणे बाह्याभ्यन्तर शुचित्वं
यथा अपवित्रः पवित्रोवा सर्वा
वस्थांगतोपिवा यःस्मरेत्पुण्ड
रीकाक्षं सबाह्याभ्यंतरः शुचिः
इतिवामने ३३ अध्यायः ॥
पुण्डरीयकं क्ली स्थलपद्मम् इ
तिशब्दमाला प्रपौण्डरीके इति
राजनिर्घण्टः ॥ पुण्डर्य्य ॥
क्ली प्रपौण्डरीकं इत्यमरः
देहक्लिन्नो मनुष्याणांच चक्षु
ष्टद्वहिते शालपर्णी पत्रतस्य
त्रे पुण्डरिया इति ख्याते प्रकृष्टे
पौण्डरीक मितिदारु हरणात् प्र
पौण्डरीकेच सुपंचालादित्वाद
सपदस्यादौ वृद्धिः पुण्डर्य्यमिति।

ण्डयति दोषान् पुण्डर्य्यं पुडि मर्द्दे
नात् इति अर्थः पौण्डर्य्यमिति पा
ठे स्वार्थेच वृद्धिः पुण्डरीकादिरय
त्र स्थलपद्म साधुपुष्पे दृष्टिकृत् पु
ण्डरीयके इतिरभसः इत्यमरटी
कायां भरतः ॥ पुण्ड्रः पुम् ॥
इक्षुभेदः पुंड्रि आँख इति भाषा
इत्यमरः देशविशेषः ॥
अतिमुक्तकः चित्रे कृमिः पु
ण्डरीके देशविशेषे पुम् भूम्नि
इतिमेदिनी तिलकवृक्षः इतिहे
मचन्द्रः कृमिसत्वः इतिराज
निर्घण्टः ॥ पुण्ड्रकः पुं मा
धवीलता इत्यमरः तिलकवृक्षः
इक्षुभेदः पुंड्रि आँख इति भाषा
तत्पर्य्यायः ॥ रसालः २ इक्षु
राटी ३ योनिः ४ इक्षुयोनिः ५
रसाली ६ रसदालिका ७ करं
कशालिः ८ अस्यगुणाः मधु
रत्वं शीतलत्वं कठिकाबिलम्
स्रुतं पित्तदाहहरत्वम् वृष्य
त्वं तेजो बल विवर्द्धनत्वंच इ
ति राजनिर्घण्टः ॥
पुण्ड्रकेलिः पुम् हस्ती इति ॥
शब्दमाला ॥ पुण्यम् क्ली
शुभादृष्टे तत्पर्य्यायः ॥
धर्म्मं २ श्रेयः ३ सुकृतं ४ वृषः ५

इत्यमरः पुण्यतारवोद्भुमशाक
स्य पतितस्यनिन्दा यथा पण्डिते
नाभिकिमेन समर्थेन चदेहिनो
यत्पुण्यं भारशुद्धोद्भुमशाकः पा
रलौकिकं इत्यग्निपुराणे ॥ आ
त्मकृत पुण्यकथन निषेधो यथा
इष्टं दत्त मधीतंवा विनश्यत्यनुकी
र्त्तनात् श्लाघानुशोचनाभ्यांच भ
ग्नतेजोविभिद्यते तस्मादात्मकृ
तं पुण्यं वृथानपरिकीर्त्तयेत् इ
ति शुद्धितत्त्वे देवलः ॥ अदन्त पु
ण्यभागित्वे पापशब्देद्रष्टव्यम् ।
शोभनकर्म्मपावने सुन्दरे त्रि इ
तिहेमचन्द्रः ॥ सुगन्धि इति
जटाधरः पुण्यकं क्ली व्रतं तत्तु
उपवासादि शास्त्रे पुण्यत्वेन प
वित्रभाजनकत्वेन यद्दोपि तत्तुप
वासादि तदेवव्रतं नतदः कोपिनि
यमः आदिनानक्तं भोजनादारत्त
वर्णादि परिग्रहः इत्यमरभरतौ
पुण्यकव्रतं क्ली पतिसौभाग्यप
स्य श्रीकृष्णतत्पुत्रस्यच जनकः
स्त्री कर्त्तव्य नियमविशेषः तस्यविधि
र्यथा महादेवउवाच ॥ हरेरा
राधनं कृत्वा व्रतंकुरु वरानने
व्रतमेवं पुण्यकंनाम वर्षमे
कम् करिष्यसि ॥ ॥

देवि शुद्धेच कालेत्र परंनियम
पूर्वकं माघ शुक्लत्रयोदश्यां व्र
तारम्भः शुभः प्रिये पात्रे सुनिर्म्म
लेकृत्वा शिरःसंस्कारपूर्वकं उपो
ष्यपूर्वदिवसे वहेमत्साल्य यत्नतः
धौतेच वाससी धृत्वा उपविश्यासने
शुचौ आचम्य तिलकंकृत्वा निर्वाप्य
आह्निकं गुरुः वटस्या रोपणं कृत्वा
स्वस्तिवाचनपूर्वकं पुरोहितस्यव
रणं गुरुः कृत्वा प्रयत्नतः संकल्प
वेदविहितं व्रतमेतत् समाचरेत्त ब्र
तेद्रव्याणि नियमानि चोपहाराणि षो
डशा देयानि नित्यं देवेभ्यो कृत्वाप्य
रमात्मने आसने स्वागतंपाद्य म
र्घ्यमाचमनीयकं मधुपर्कंस्नान
नीयं वस्त्राण्याभरणानिच सुगन्
धि पुष्पंधूपश्च दीपनैवेद्य वन्दने
यज्ञसूत्रंच ताम्बूले कर्पूरादि सुवा
सितं इत्यामेतानि पूजाया अंगरू
पाणि सुन्दरि देव किंचिद्धीनेने
वाङ्गहानिः प्रजायते अंगहीनेच
यत्कर्म्म चांगहीनो यथा नरः अंग
हीनेचकार्य्येच फलहानिःप्रजायते
अष्टोत्तरशतं पुष्पं पाविनातस्य
विल्वं देयं प्रति दिनं उत्तमं स्वा
त्मनो रूपदेहतत्वे सेवनेचा पक
पुष्पाणां लक्षम् तत्वमीप्सिते ॥

प्रदेयं हरयेभक्त्या वक्त्रसौन्द
र्य्यहेतवे नीलोत्पलानां ल
क्षं च देयं कृष्णाय भक्तितः ब्रते
गृहीतं देवेशि चक्षुषां रूपहेत
वे हिमालयोद्भवं लक्षं रुचिरं
श्वेतचामरं प्रदद्यात्केशवायैव ।
केशसौन्दर्य्यहेतवे अमूल्यरत्नर
चितं दर्पणानां सहस्रकं देयं
नारायणायैव नाभिसौन्दर्य्यहे
तवे अमूल्यरत्नरचितं शुद्धका
ञ्चनसहस्रकं प्रदेयं गोपिकेशा
य नासिकारूपहेतवे बन्धूकपु
ष्पलक्षं च देयं राधेश्वराय च स्वसौ
भाग्यवर्द्धनायैव वक्त्रसौन्दर्य्यहेतवे ।
मुक्ताफलानां लक्षं च दन्तसौन्दर्य्य
हेतवे देयं गोलोकनाथाय श्रील
ज्ञेभक्तिपूर्वकं रक्तगैरुकलक्षं च
गण्डसौन्दर्य्यहेतवे महेश्वराय द
त्वं ब्रते शैलेन्द्र कन्यके रत्नपाश
कलक्षं च देयं ब्रजेश्वराय च जङ्घा
यः स्थलरूपाय प्राणेशाभक्तितः
नोद्भवं कर्णभूषणलक्षं च रत्नसा
रविनिर्म्मितं देयं सर्वेश्वरायैव क
र्णसौन्दर्य्यहेतवे माध्वीक कल
सानां च लक्षं रत्नविनिर्म्मितम्
देयं विश्वेश्वरायैव स्वरसौन्द
र्य्यहेतवे सुधापूर्णं च ॥

कुम्भानां सहस्रं रत्ननिर्म्मितं ॥
देयं कृष्णाय देवेशि वाक्यसौन्द
र्य्यहेतवे रत्नप्रदीपलक्षं च गोप
वेशविधायिने देयं किशोरवेशा
य दृष्टिसौन्दर्य्यहेतवे पुष्परक्त
सुमाकारं रत्नपात्रसहस्रकं ॥
देयं गोरक्षकायैव गलसौन्दर्य्य
हेतवे सद्रत्न साररचितं पद्मना
लसहस्रकं देयं त्रिलोकपालाय
बाहुसौन्दर्य्यहेतवे लक्षं च रक्तप
द्मानां करसौन्दर्य्यहेतवे देयं गो
पाङ्गनेशाय नारायणि हरिव्रते अ
ङ्गुरीयकलक्षं च रत्नसार विनिर्म्मि
तं अङ्गुलीनां च रूपार्थं देयं देवेश्व
राय च मणीन्द्र सारलक्षं च श्वेत
वर्णमनोहरं देयं मुनीन्द्रनाथाय
नखसौन्दर्य्यहेतवे सद्रत्नसारहा
राणां लक्षं छायातिमनोहरम् देयं
मदनमोहाय वक्षःसौन्दर्य्यहेतवे
स्वपक्क श्रीफलानां च लक्षं च ।
सुमनोहरं देयं सिद्धेन्द्रनाथाय
स्तनसौन्दर्य्यहेतवे सद्रत्न वर्त्तु
लाकारं लक्षपात्रं मनोहरं देयं
पद्मालयेशाय देहस्वरूपहेत
वे सद्रत्नसाररचितं नाभी ॥
नाल सहस्रकम् प्रदेयं पद्म
नाभाय नाभिसौन्दर्य्यहेतवे ॥

सद्रत्न साररचितं रथचक्र सहस्र
कं नितम्बसौन्दर्य्यार्थं च प्रदेयं च
कृष्णाय सुवर्ण रत्नकुम्भानां ल
क्षं च सुमनोहरं प्रदेयं श्रीनिवासा
य श्रोणि सौन्दर्य्यहेतवे शतपत्र
सहस्राणां लक्षमम्लानमक्षतम् ।
प्रदेयं पद्मनेत्राय पादसौन्दर्य्यहेत
वे सुवर्णरचितानां च खञ्जनानां स
हस्रकं गतिसौन्दर्य्यहेतवे देयं
लक्ष्मीश्वराय च राजहंससहस्रं
च गजेन्द्राणां सहस्रकं सुवर्णाढ्यं
प्रलक्षं च देयं नारायणाय च विचि
त्ररत्नमालेन सद्गुणसौन्दर्य्यहेतवे
मालतीनां च कुसुम मल्लिकालक्ष
मीश्वरि देयं वृन्दावनेशाय हास्य
सौन्दर्य्य हेतवे आमूल्य रत्नलक्षं
च देयं नारायणायैव स्नाने ब्रत पूर्णा
र्थं शीलसौन्दर्य्यहेतवे शुद्धस्फटिक
संकाशं मणीन्द्र सारलक्षकम् देयं
मुनीन्द्रनाथाय मनःसौन्दर्य्य हेत
वे प्रवाल सारसंकाशं माणिक्यसार
सहस्रकं देयं कृष्णाय भक्त्या च प्रि
यान् रागहृदये माणिक्य सारल
क्षं च देयं कृष्णाय यत्नतः ॥ ज
न्मनः कोटिपर्य्यन्तं स्वामि सौ
भाग्यहेतवे ॥ कृष्ण एवं ना ॥
रिकेलम्च जम्बीरम् श्री ॥

फलं तथा फलान्येतानि देयानि ह
रये पुत्रहेतवे रत्नेन्द्रसारलक्षं च ।
देयं कृष्णाय यत्नतः असंख्यजन्म
पर्य्यन्तं स्वात्मनो धनवृद्धये वाद्यं
नानाप्रकारं च कांस्यतालादिकं प
रं ब्रतेसम्पत्ति वृद्ध्यर्थं श्रीहरिश्राव
येद्भुती पायसं पिष्टकं सर्पिः शर्क
राक्तं मनोहरम् प्रदेयं हरयेभक्त्या
स्वात्मनो भोगवृद्धये सुगन्धि पु
ष्पमाल्यानां लक्षमक्षतमीप्सितं
प्रदेयं हरयेभक्त्या हरिभक्तिविवृद्ध
ये नैवेद्यानि प्रदेयानि स्वाहूनि म
धुराणि च श्रीकृष्णप्रीतिप्राप्त्यर्थं
दुर्गे नानाविधानि च नानाविधा
नि शुष्काणि तुलसीसंयुतानि च
श्रीकृष्णप्रीतये भक्त्या ब्रतेदेयानि
सुब्रते ब्राह्मणानां सहस्रं च प्रयत्ने
भोजयेद्भुती स्वात्मनः शास्त्रवृद्ध्यर्थं
ब्रतेजन्मनि जन्मनि पुष्पाञ्जलिश
तं देयं निःस्वर्णं च शतं प्रणाम
शतकं देवि कर्त्तव्यं भक्तिवृद्धये
षण्मासांश्च हविष्यान्नं मासान् पं
च फलादिकम् हविः पतेजलेप
ते ब्रते पते च सुब्रते रत्न प्रदीप
पञ्चशतकम् वर्त्तिम् दद्याद्दिवानि
शं राधे ऊर्ध्वाशनम् कृत्वा नि ॥
शे जागरणम् ब्रते स्मरणम् ॥

कीर्त्तने केलिमेरणे गद्यभाषणे सेकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च मैथुनं विविधं त्यक्त्वा व्रते क्रीडाविहीनये ज्ञान। हरिस्मरणे स्मरहरिस्मितभोजने लोभ मोह कामक्रोध भया शोक विवादकं कलहं च परि॥ त्यजेद् व्रतेवन्ध विहितये संपूर्णे च व्रतेदेवि प्रतिष्ठा तदनन्तरं त्रिशतं च षष्ट्यधिकं उत्कृष्टे वस्त्रसंयुते सभोज्ये सोपवीते च सोपहारे मनोहरे त्रिशतं च षष्ट्यधिकं सहस्रं विप्रभोजनम् त्रिशतं च षष्ट्यधिकं सहस्रं स्वर्णानामेव च देयाव्रतसमाप्तौ च। दक्षिणाविधिपूर्व्विका अन्यासमा। प्तिदिवसे कथयिष्यामि दक्षिणां एतद्व्रतफलं देवि हरिभक्ति र्हरौ भवेत् हरितुल्यो भवेत्पु॥ त्रो विख्यातो भुवनत्रये सोदर्थः स्वामिसौभाग्य मैश्वर्य्यं विपुलं धनं सर्व्ववाञ्छितसिद्धीनां वीजं जन्मनि जन्मनि इत्येवं कथितं देवि। व्रतं कृष्णमहेश्वरि पुत्रस्ते भवि। तासाक्षी सत्कार विश्रुतम् इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३ ४ ॥ अध्यायः ॥

पुण्यकृत् त्रि पुण्यकर्म्मा धार्म्मिकः यथा पुण्यकृच्चाटकार ते किंकरस्तरनेपुकः इति भट्टिः ॥
पुण्यगन्धः पुं चम्पकः इति त्रिकाण्डशेषः ॥ पुण्यजनः पुं राक्षसः इत्यमरः ॥ यक्षः सज्जनः इति मेदिनी ॥
पुण्यजनेश्वरः पुं कुवेरः इत्यमरः ॥ पुण्यभ्रणी स्त्री श्वेतजीरी इति राजनिर्घण्टः ॥
पुण्यदर्शनः पुं चाषपक्षी इति राजनिर्घण्टः ॥
पुण्यफलः पुं वनभेदः तत्पर्य्यायः लक्ष्मारामः २ इति शब्दमाला धर्म्मजन्यफले क्ली ॥
पुण्यभाक् त् त्रि पुण्यविशिष्टः यथा क्रीडावतो विनीता लव्रुस्मरतः पुण्यभाजः प्राणास्तु इति पंचशायकः ॥ पुण्यभूः स्त्री आर्य्यावर्त्तदेशः यथा आर्य्यावर्त्तो जन्मभूमिं जिनचक्राद्धचक्रिणां पुण्यभूराचार्य्यवेदीमध्यं विन्ध्यहिमालयोः इति हेमचन्द्रः ॥
पुण्यभूमिः स्त्री आर्य्यावर्त्तदेशः इत्यमरः सत्त विन्ध्यहिमालयावधि मध्यदेशः यथा आसमुद्रात्तु पूर्व्वस्मादासमुद्रात्तु पश्चिमात् ॥

तयो रेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः इति भरत धृत मनुः पुत्रः इति शब्दरत्नावली ॥
पुण्यवान् त् त्रि पुण्ययुक्तः तत्पर्य्यायः ॥ सुकृती १ धन्यः २ इत्यमरः सुकृत् ३ पुण्यकृत् ४ इति जटाधरः ॥ धर्म्मवान् ६ श्रेयस्वान् ७ वृषवान् ८ एते पुण्यपर्य्यायक शब्दोत्तर वत प्रत्ययेन निष्पन्नाः ॥ पुण्यश्लोकः पुं विष्णुः इति श्रीभागवते युधिष्ठिरः इति महाभारते नलराजः इति त्रिकाण्डशेषः पुण्यचरित्रे त्रि ॥ पुण्यश्लोका स्त्री द्रौपदी इति शब्दमाला सीता यथा पुण्यश्लोको नलोराजा पुण्यश्लोको युधिष्ठिरः पुण्यश्लोका च वैदेही पुण्यश्लोको व वैदेही पुण्यश्लोको जनार्द्दनः इति पुराणम् ॥ पुण्या स्त्री तुलसी इति शब्दमाला ॥
पुण्यजनिकाव ॥
पुण्यात्मा त्रि पुण्यस्वभावः तस्य गत्यादि यथा स्वर्गलोकात्र पुण्यविभवद्वक्ष्यामि यदयाप्नोतिमि ध्याते पुण्यात्मनां यापितानां च पश्या नेस्वखङ्गःखरं अयोध्याद्वीमि पश्याने स्वर्ग्गे पुण्यवतामहं प्रणवहि जशार्दूल प्रणवन्तो भीति वर्ज्जे ॥ ने मस्तौ विष्णुकैर्वहो दिव्यवर्स्मैः समाहृतः भान्ति पुण्यात्मानो येथाः सर्व्वोपद्रववर्ज्जितः क्वचिन्नृत्यवैकन्यामिर्गीयते गानमुत्तमं क्वचिन्मंजुभाषीरानि रमसेभिश्चनृत्यते क्वचिद्वीणाक्वणने नानावाद्यं मनोहरं क्वचित्कुसुम वृष्टिश्च क्वचिद्वायुः सुशीतलः क्वचित् पुष्पाशीतलोयाः क्वचित् भक्ष्यालिकाः क्वचिद्देवाश्च गन्धर्व्वाः पठन्त्यत्व मुत्तमं क्वचित् क्वचिद्वीर्वैकाश्च कलपम्म सुशोभिताः पुरुच्छायाः पादपाः क्वापि पुष्पितावेलताद्यः समन्ततः सर्व्वसम्पन्ने पथि गच्छन्ति मानवाः पुण्यात्मानो हि जन्मोत्थ हास्यरसमवाप्य च केचिल्लवंगमाल्यफा नानालंकारभूषिताः इहपुण्य धवलच्छत्रे गच्छन्त्याहममन्तिकाः केचिद्यान्ति गजारूढाः रथारूढाश्च केचन यानारूढाजनाः केचित् सचिन यममन्दिरम् केचिद्देवांगनाहस्त मल्लावामरवायुभिः गच्छन्ति वीजितामर्त्याः स्तूयमानाः सुरर्षिभिः केचिद्दिव्याम्बरधराः सुचन्दनविभूषिताः भुंजनोयाति लोहूदे पुण्यात्मानो यमालये भिरागात्र विश्वा केचि ज्वालयन्तो दिशो दश अत्र नियमसमानागारे वल

द्रुगृहनिवासिनः केचिद्वृषायसे। दिव्ये भुंजतोयानिसत्तमाः सुधापानेमत्तर्लवन्तः पश्चिगच्छतिकेच न केचिद्दुग्धं पिवतश्च केचिदि क्षुरसंतथा केचित्तक्रं पिवतश्च गच्छतियममन्दिरं केचिद्दधीनि खादन्तः केचिन्नानाफलानि च केचिन्मधुपिवतश्च पुण्यवन्तोव्रजन्तिवै तानागतांस्ततोदृष्ट्वा नरान्धर्मपरायणान् भास्करिः प्रीतिमासाद्य स्वयंनागतोभवेत् चतुर्बाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः शांखचक्रगदापद्म धारीगरुडवाहनः स्वर्णयज्ञोपवीतीच स्मेरवक्त्रवदनः किरीटीकुण्डलीचैव वनमालाविभूषितः विष्णुरूपमहात्मानंस्त्वगत्याधायमकिंकरः सर्वैर्नारायणाकारा वभूवुर्मेघरोक्षयः ततःस्वयंधर्मराजस्तान्सर्वान्मनुजोत्तमान् परमां प्रीतिमासाद्य पिवत्रमनयेदिन दिव्यैर्वस्त्रैः फलैश्चैव तेषां पूजयेत्तान्नराणां भोगनेकारयित्वात मानुवावाद्यभास्करिः यमदुवाच एवं सर्वेमहात्मानोनमस्कृत्याभिवन्दः निजपुण्यप्रभावेन गच्छन्तापरमंपदं संसारे जन्मसमाप्य पुण्यवः कृत ॥

तेनवः समेपितासमेभ्राता समेबन्धुः समेसुहृत् इत्युक्तावत्स्मरणेन तेसर्वेद्विजसत्तम दिव्यंवर्षसहस्राकल्प नारायणपुरेययुः इतिपाद्मोत्तरखण्डेक्रियायोगसारे २२ अध्यायः ॥

पुण्याहं क्ली पुण्यदिनं इत्यमरः ॥ पुण्याहवाचनं क्ली देवादिकर्म्मादौ मंगलार्थं पुण्याहमितिशब्दस्य वारत्रयकथनं। यथा पुण्याहवाचनंदैवे ब्राह्मणस्य विधीयते एतदेव निरोङ्कारं कुर्यात्क्षत्रियवैश्ययोः सोङ्कारंब्राह्मणोब्रूयात् निरोंकारंमहीपते उपांशु च तथा वैश्ये शूद्रेस्वस्तिमथोच्चयेत् इत्याह्निकतत्त्वेयमः ॥ पुत्तिका स्त्री मधुमक्षिकाविशेषः ॥ तत्पर्य्यायः पत्तिका २ इत्यमरः ॥ पुत्रः पुं लग्नात् पंचमस्थानं यथा पुत्रस्थेऽर्केन रवौ सौ प्रथमसुत हन्तःशिर शैलपुत्र इत्यादि ज्योतिस्तत्त्वे ॥ पुंसन्तानः पुन्नामनरकत्राता पुत्र इति वेदः इतिच भाषा। तत्पर्य्यायः ॥ आत्मजः २ तनयः ३ सूनुः ४ सुतः ५ इत्यमरः तनुजः ६ अपत्यं ७

दायादः ८ कुलधारकः ९ नन्दनः १० आत्मजन्मा ११ द्वितीयः १२ प्रसूतिः १३ सूनुः १४ इति शब्दरत्नावली ॥ अस्य व्युत्पत्तिर्यथा पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा इति पाद्मे स्वर्गखण्डे २ ॥ अध्याये ॥ स च द्वादशविधः यथा औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥ तेषां लक्षणानि यथा स्वे क्षेत्रे संस्कृतायां तु स्वयमुत्पादयेद्धि यं तमौरसं विजानीयात् पुत्रं प्राथमकल्पिकं १ यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः २ माता पिता वा दद्यातां यमद्भिः पुत्रमापदि सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ३ सदृशं तु प्रकुर्य्याद्यं गुणदोषविचक्षणं पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ४ उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ५ मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते ६ पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवं ७ या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती वोढुः स गर्भो भवति सहोढ इति चोच्यते ८ क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ९ या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते १० मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः ११ यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत् सुतं स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः १२ क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः इति मानवे ९ अध्यायः ॥ चतुर्विधः पुत्रो यथा यमनोवाच ऋणसम्बन्धिनः ॥ केचित् केचिन्न्यासापहारकाः रिपवश्च प्रियाश्चेति स्वकर्म्मवशवर्त्तिनः ॥

ऽभेदे मातृभिर्जायन्ते पुत्रामित्राः।
स्त्रियस्तथा भार्य्यापिता च माता
च भ्रातृस्वजन बान्धवाः स्नेहस्ने
नहि जायन्ते सम्बन्धेन महीतले मा
तापहार भावेन यस्य यस्य कृते भु
वि न्यासस्वामी भवेत्पुत्रो गुणवा
न्रूपवान्भुवि येन वापकृते मासे
नस्य गेहेन संशयः न्यासापहर
णात्दुःखे संदत्वा दारुणं गतः न्या
सस्वामी सपुत्रोभून्न्यासापहारक
स्य च गुणवान् रूपवांश्चैव सर्वल
क्षणसंयुतः भक्तिं च दर्शयेत्तस्य
पुत्रोभूत्वा दिने दिने प्रियवाक्यं य
थोवापि बहुस्नेहं प्रदर्शयेत् स्तोये
हर्षसमुद्राच्छ प्रीतिमुत्पाद्य चा
वलं भक्त्यात पोषणात्तेन तदा
दायपुनर्ग्रहेत् यथा तेन प्रदत्तं
न्यासापहरणात् पुरा दुःखमेव
महत् कृत्वा दारुणं प्राणनाशने।
तादृशं तस्य दद्यात् सपुत्रोभूत्वाम
हागुणैः स्वल्पायुषस्तथाभूत्वा
मरणं याति तेन तथा दुःखं ददातु
यथान्यैवं मत्कृतमेव पुनः पुनः
मदीय पुत्र पुत्रेति प्रलापं हि क
रोति सः तदा हास्यं करोत्य
व कः स पुत्रो हि कस्य च प्र
ने नापि ॥

कृतेन्यासे मदीये परिवारितः ॥
द्रव्यापहारोपि पिता पूर्वमस्येव
तस्य च पिशाचवे मायादत्तस्यैव
हि दुरात्मनः द्रव्यापहरणेनापि
मम प्राणा गताः किल दुःखेन म
हता चैव यथाहं पीडितः पुरा त
था दुःखं प्रदत्वाहं द्रव्यमुद्गृह्य प्राक्त
मे भोगेन सर्वमादाय विराहिता
स्तेस्याप्यवत् गतोस्मि सत्यं हे बाध
कस्मादहं स्वतं ईदृशः नवै सोपि
पिता पूर्वं मयैव न च कस्य चित्
पिशाचत्वं मयादत्त स्येव च दुरात्म
नः पवप्रकाप्रयात्यैव तेन हस्य पु
नः पुनः प्रयात्यनेन – गेन दुःख
दत्वा सुदारुणं एवं न्यासस्य स
म्बन्धात् पुत्राः किं न भवन्ति वै सं
सारे दुःखबहुला हर्षेपनेयत्र तत्र
हि १ ऋणसम्बन्धिनः पुत्रान् प्र
वक्ष्यामि तवाग्रतः ऋणं यस्य गृही
त्वा यः प्रयाति मरणे किल ऋण
दाता सुतो भूत्वा भ्राता वाथ पि
ता प्रियः मित्ररूपेण वर्त्तेत सर्व
ईव्यः सदैव सः ऋणेनैव प्रपश्ये
त सकृद्वै निष्ठुराकृतिः जल्प
ते निष्ठुरं वाक्यम् सदैव स्वजनेषु
च निसंसिद्ध समस्तानि भोगा
न् भुंजीत निःस्पृहः सुत क॥
स्मि रतो ॥

नित्यं चैव कर्म्माणि नित्यशः।
गृहाद्वस्त्वेव ताडनं वार्य्यमाणः
प्रकुप्यति पितरं मातरं चैव क्रू
रस्तेनैव दिने दिने श्रावकस्यास्य क
र्म्मैव बहुनिष्ठुर जल्पकः बंधुं
पित्रैव सुहृदं च कृत्वा स्वेन तिष्ठ
ति जातकर्म्मादिभिर्वास्य द्रा
व्यं गृहस्थान् दारुणः पुनर्विवा
हसंयोगात् नानाभेदैरनेकधा ए
वं सन्तीयते द्रव्यं नैवमेतद् ददा
त्यपि गृहक्षेत्रादिकं सर्वं ममैव
हि न संशयः पितरं मातरं चैव
वदत्येवं दिने दिने सदौर्भाग्य
लेश्यैव कथयाने स दारुणः
मृते तु तस्मिन् पितरि तथा मा
तरि निष्ठुरे निष्ठो निष्ठुरणेश्च
व जायते नात्र संशयः श्राद्धका
र्य्याणि दानानि न करोति कस्य
चन एवंविधास्तथाः पुत्रा भवन्
ति च महीतले २ विप्र पुत्रं प्रव
क्ष्यामि तवाग्रे द्विज पुंगव बोध
वयसि संप्राप्ते विप्रवद् तेन सदा
पितरं मातरं चैव क्रीडमानो हि ता
डयेत् ताडयित्वा प्रयात्येव मद्
यै स पुनः पुनः पुनरायाति तेन
च पितरं मातरं पुनः सक्रोधो
वर्त्तते नित्यं दैव कर्म्माणि सर्वदा
पितरं मारयित्वा तु मात ॥

रं च पुनः पुनः प्रयात्येवं सदुःखा।
त्प्राप्नुवन्नेव भावतः ३ अथा
नः संप्रवक्ष्यामि यस्माल्लभ्यो भवे
त्प्रियः जातमात्रः प्रियं कुर्य्याद्धा
ल्येनहर्षं क्रीडनैः वयः प्राप्यापि
ये कुर्य्या न्मातापित्रोरनन्तरं भ
क्त्या संतोषयेन्नित्यं तावुभौ परि
पालयेत् स्नेहेन वचसा चैव प्रियस
म्भाषणेन च मृतो गृहं समाज्ञाय ॥
स्नेहेन रुदते पुनः श्राद्धकर्म्माणि
सर्वाणि पिण्डदानादिकां क्रियां।
करोत्येवं सदुःखोत्ते लभ्यो यात्रो।
प्रयच्छति ऋणत्रयान्वितः स्नेहा
द्धानिर्व्यापयति निश्चितः यस्मा
ल्लभ्यं भवेत्तस्मात् प्रयच्छति तस्मै
शायः पुत्रोभूत्वा महाप्रान्ते
न विधिना किल ४ उदासीनं प्र
वक्ष्यामि तवाग्रे प्रियसाम्प्रतं उ
दासीनेन भावेन सदैव परिवर्त्तते
ददाति नैव गृह्णाति न कुप्यति
न भ्रष्यति नैवोपयाति संत्यज्य
उदासीनो हि तेन तवाग्रे कथि
तं सर्वं पुत्राणां गतिरीदृशी य
था पुत्रास्तथा भार्य्या पिता मा
ता च बान्धवाः भृत्या स्वामी स
मारूढाः पशवस्तुरगास्त
था गजा महिष्या दासदास्यः ऋण
सम्बन्धिनस्तमी ॥

सपुत्र लक्षणं यथा वशिष्ठ
उवाच पुत्रस्य लक्षणं शृणु न
वाग्रे प्रवदाम्यहं शृणुष्व सकोपा
स्यात्मा सत्यधर्मरतः सदा बुद्धि
मान् ज्ञानसंपन्नस्तपस्वी वाग्विदांव
रः सर्वकर्मसु सन्धीरो वेदाध्य
यनतत्परः सर्वशास्त्रप्रवक्ता च
देवब्राह्मणपूजकः याजकः स
र्वयज्ञानां दाता त्यागी प्रियंवदः वि
ष्णुध्यानपरो नित्यं शान्तो दान्तः सु
कृतः सदा पितृमातृपरो नित्यं
सर्वस्वजनवत्सलः कुलस्य ताव
कादिजान् कुलस्य परितोषकः
एवं गुणैः समायुक्तः सुपुत्रः सुख
दायकः ॥ पुत्रस्य जंगमतीर्थत्वे
यथा सर्वतीर्थाद्धि वरं तीर्थं पुत्रती
र्थं सुदारुणं यद्देहेनात्मवेदेषी
सर्वधर्मविवर्जितः पुत्रनाम्न
तीर्थेन पवित्रो भागवतं पदे
सत्पुत्रं परमं तीर्थं माध्यं चैते
पूर्वजाः पिता पितृऋणमुक्तः स्या
ज्जाते पुत्रे महात्मनि ॥ वैष्णव
पुत्रस्य ॥ पूर्वपुरुषद्वारत्वे य
था वैष्णवो यदि पुत्रः स्यात् स
तारयति पूर्वजान् पितृन्वपत
तावेषा स्तावपन्ति पावनाः
कुपुत्र जनने पितृणां नरक
गमने यथा तथाप्यदिकुपुत्रः

स्नानेन मज्जन्ति पूर्वजाः सच्छो
रे नरके दीनाः शापतिव कुपुत्र
कः यथा जले कुसत्वेनेव मज्ज
ति मूढधीस्तथा पिता कुपुत्र
ण नरस्य कुनिमज्जति तातमा
त्रे कुले जन्मो संघोरे ते पितामहाः
किमेषोऽधान येदस्मान्नदर्वाव
स्तवोऽभवन् इति पाद्मे भूमिखण्डे
११॥१२॥१८॥२२ अध्यायः ॥
सप्तविध पुत्रा यथा ब्रह्मोवाच
और्षश्चैव क्षेत्रजः पालकस्तथा
विद्यामन्त्रसुतानां च गृहीताः
सप्तमः सुतः इति ब्रह्मवैवर्ते श्रीकृ
ष्णजन्मखण्डे ५६ अध्यायः ॥
पुत्रमुखदर्शने पुण्यं यथा पा
र्वत्युवाच अहमागत्य प्राणेशा न
स्ते फलदायकं कस्मै कस्मै
ध्यामस्तेषे तपस्यागमसन्दिरे
श्रीकृष्ण पुत्र पुलेपम पुण्यवीन
महात्मवे अश्वमेध नरकत्राणका
रणं भवतारणम् स्नाने च सर्व
तीर्थेषु सर्वयज्ञेषु दक्षिणा पु
त्रमुखदर्शनेस्यास्य कलां नार्ह
न्ति षोडशीं सर्वदानेन यत्पु
ण्यं यत्पृथिव्याः प्रदक्षिणा पुत्र
दर्शनपुण्यस्य कलां नार्हन्ति षोड
शीं सर्वैस्तपोभिर्धन्यत्र पुण्यं यद्दे
वानशनैर्व्रतैः सत्पुत्रोद्भवपुण्य
स्य कलां ॥

नार्हन्ति षोडशीं यद्विप्रभोजनैः
पुण्यं यद्देवसुरसेवनैः सत्पुत्र
प्राप्त पुण्यस्य कलां नार्हन्ति षोड
शीं इति ब्रह्मवैवर्ते गणपतिखं
डे ९ अध्यायः ॥ पुत्रोत्सव
विधिर्यथा परं पुत्रोत्सवं नन्द
श्चकार परमादरात् ददौ यशो
दा गोपीभ्यो ब्राह्मणेभ्यो ददौ मु
दा धनानि नानावस्तूनि तैला
सिन्दूरमेव च अपिच नन्दः सचे
लः स्नात्वा च धृत्वा धौते च वास
सी पादप्रक्षालनं विप्रान् सत्कार
ऋषिमानसः ब्राह्मणान् भोजया
मास कारयामास मंगलं वाद्या
नि वादयामास वन्दिभ्यश्च ददौ
धनं ततो नन्दश्च सानन्दं ब्राह्म
णेभ्यो ददौ धनं रत्नानि प्रवा
लानि हीरकानि च सादरं तिलानां
पर्वतान् सप्त सुवर्णं कोटिवेष्टने
रौप्यधान्याचले वस्त्रं गोसहस्रं
मनोहरं दधि दुग्धं शर्कराचन
वनीतं घृतं मधु निशामेलड्डु
कौघं च साधुनिर्मोदकानि च
भूमिं च सर्वशस्याढ्यां वायुवे
गांस्तुरंगमान् तांबूलानि च तैलानि
दत्वा कुशेश्वोऽभवत् ॥
पुत्रप्रशंसा यथा धनंजया
म्बराल्लवा ततः सर्वपुत्रस्नेह

कं न भवितं यत्पुत्रेणात्र दृश्यते ।
निष्फलं भुवि शास्त्रकूपा पिका वा
पी शतवापी समं सरः सरःशता
धिको यज्ञः पुत्रो यज्ञ शताद्वरः
तेषां शतेनाक्षयं पुण्यं जन्मान्तरे
स्वल्पमदं स्वल्पमदोऽपि सत्पुत्रः
प्राणेभ्योऽपि सुनिश्चितं पुत्रादपि
परो बन्धुर्न भूतो न भविष्यति
पुत्रोत्पत्तिपराजये आनन्दपुलक
यथा नन्दः सपुलकोऽहसत्
भार्याभ्यां साश्रुलोचनः आनन्दप्र
कामभर्ता पुत्रिभिः पराजिताः
इति ब्रह्मवैवर्ते श्रीकृष्णखण्डे ९
२१ अध्यायः ॥ बहवः पुत्राः
काम्याः यथा एष्टव्या बहवः पु
त्रा यद्येकोऽपि गयां व्रजेत् यजेद्वा
अश्वमेधेन नीलं वा वृषमुत्सृजेत्
मातापित्रोः सत्कारे कनिष्ठपुत्र
स्यापि राज्यभागित्वे यथा ययाति
रुवाच पुत्रोपत्वानुवर्तेत मया
जा पृथिवीपतिः भवन्तः प्रति
जानन्तु पुरुणा मे विशिष्यते
मत्कृतं यदकर्तुः यः पुत्रो गुणसंप
न्नो मातापित्रोर्हितः सदा सर्व
सोऽहति कल्याणं कनीयानपि
सत्तमः इति मात्स्ये २२ ३४
अध्यायः ॥ सत्पुत्रोत ॥
पतिमात्रेण पुत्रनाम नर ॥

९६



कन्यायां स्वर्गगमनेच यथा सा
नपुत्रेण मुनिश्रेष्ठाः सत्तपत्रेन
दुर्म्मतिः उत्तमाद्विद्यात्स्वर्गं
पुन्नामनरकाद्गुतं इत्यग्निपुराणं
अपिच सत्पुत्रेणचजातेन वेणो
पि त्रिदिवंययौ पुन्नामनरकात्त्रा
तः सतेनस्वमहात्मना इतिवि
ष्णुपुराणं ॥ विद्यादिरहितस्य पु
त्रस्य निन्दा यथा तयागवाकिं ।
क्रियते यानदोग्ध्रीन गर्भिणी ।
कोऽर्थःपुत्रेणजातेन योनविद्वा
न्नधार्म्मिकः एकेनापिसुपुत्रेण
विद्यायुक्तेनधीमता कुलंपुरुष
सिंहेन चन्द्रेणगगनं यथा एके
नापिसुवृक्षेण पुष्पितेनसुगन्धि
ना वनं सुवासितं सर्व्वंसुपुत्रेण
कुलं यथा एकोहि गुणवान्
पुत्रो निर्गुणेन शतेनकिं चन्द्रोह
न्ति तमोह्येको नचज्योतिःसह
स्रशः लालयेत् पंचवर्षाणि दश
वर्षाणिताडयेत् प्राप्तेतुषोडशेव
र्षे पुत्रे मित्रवदाचरेत् ॥ जाय
मानो हरेद्दारान् वर्द्धमानोहरेद्ध
नं म्रियमाणो हरेत्प्राणान् ना
स्तिपुत्र समो रिपुः ॥ पौर्व्येन
पसिदानेवा यस्यनप्रथितंयशः
विद्यायां नचलाभेवा मातुरु
च्चार एवसः इतिस्त्री ॥

गारुडे ११४ ११५ अध्यायः ॥
सचमध्यमोत्तमाधमभेदेन त्रिविध
यथा यद्रूपात्ते वक्षाःपित्राधनेवी
र्य्यमथापिवा तत्तद्रूपयतेयस्तु
सुतरोमध्यमःस्मृतः तद्वीर्य्याभ्या
धिकंयस्तु पुनरप्यात्मशक्तितः नि
ष्पादइतितं प्राज्ञा वदन्तिनरसत्तमे
यःपित्रा समुपात्तानि धनवीर्य्यय
शांसिच सुनतोन्यतिप्राज्ञास्तमा
हुःपुरुषाधमं इतिमार्कण्डेय
पुराणं ॥ अपिच उत्तमश्चिन्तितं
कुर्य्यात् प्रोक्तकारीचमध्यमः अ
धमोऽश्रद्धयाकुर्य्यादकर्त्तोच्चरितं
पितुः इतिमहाभारतम् ॥
पुत्रकः पुं पुत्रः शरभः धूर्त्तः
शैलविशेषः वृक्षभेदः इतिमे
दिनी ॥ पतंगकः अल्पकस्मान्
वितन्वनः इतिशब्दरत्नावली ॥
पुत्रकन्दा स्त्री लक्ष्मणाकन्दः ॥
इतिराजनिर्घण्टः ॥ ॥
पुत्रका स्त्री पुत्रिका इतिशब्द
रत्नावली ॥ पुत्रजीवः
पुं वृक्षविशेषः जियापूता इ
ति भाषा तत्पर्य्यायः ॥
स्त्रीपदापदः २ इति त्रिका
ण्डशेषः ॥
कुमारजीवः ३ पुत्रंजीवकः
४ इतिरत्नमाला ॥

पवित्रः ५ गर्भदः ६ सुतजी
वकः अस्य गुणाः हिमत्वं हृ
द्यत्वं श्लेष्म गर्भजीवदात्वं चक्षु
ष्यत्वं पित्तशमनत्वं दाहतृष्णा
निवारणत्वंच इतिराजनिर्घण्टः
गुरुत्वं वातकारित्वं सृष्टमूत्रमल
त्वं स्वादुत्वं पटुत्वं कटुत्वं इतिभा
वप्रकाशः ॥ पुत्रंजीवकः
पुं पुत्रजीवकवृक्षः इति
रत्नमाला ॥ पुत्रस्यजीवके
त्रि पुत्रदा स्त्री बन्ध्याकर्कोट
की लक्ष्मणाकन्दः ॥ गर्भदा
त्री वृषः इतिराजनिर्घण्टः ॥
पुत्रदात्री स्त्री मालवे प्रसिद्धा
लता विशेषः तत्पर्य्यायः
वातारिः २ भ्रमरी ३ श्वेतपु ॥
ष्पिका ४ वृत्तपत्रा ५ अभिगन्
धालुः ६ वेश्यीनामा ७ सवल्ल
री ८ अस्या गुणाः वातकटूष्ण
कफनाशित्वं सुरभित्वं सर्वदा
पथ्यत्वं बन्ध्यादोषनाशित्वंच
इतिराजनिर्घण्टः ॥
पुत्रप्रदा स्त्री तविका इति
राज निर्घण्टः ॥
पुत्रभद्रा स्त्री वृहज्जीवन्ती इति
राजनिर्घण्टः ॥
पुत्रश्रेणी स्त्री अजश्रेणी इ
तिराजनिर्घण्टः ॥

पुत्रश्रेणी स्त्री मूषिकपर्णी इ
तिरत्नमाला ॥ ॥
पुत्रसूः स्त्री पुत्रजनिका यथा ।
पुत्रसूः पुण्यभूमिः स्याद्वनसूः ।
पुत्रिकाप्रसूः इतिशब्दरत्नावली
पुत्रान्नादः त्रि पुत्रान्नभोजी तत्प
र्य्यायः कुटीचकः २ इतित्रिका
ण्डशेषः ॥ पुत्रिका स्त्री
कन्या तत्पर्य्यायः ॥ आत्म
जा २ दुहिता ३ पुत्री ४ तनुजा
५ सुता ६ अपत्यं ७ पुत्रका ८
स्वजा ९ अनया १० नन्दिनी ११
इतिशब्दरत्नावली ॥ पुत्त ॥
लिका यावत्तूलकः ॥ इतिमेदि
नी ॥ पुत्रिकापुत्रः पुं पुत्रि
कायाःसुतःसच औरससमः ॥
यथाह वशिष्ठः अभ्रातृकाम्प्रदा
स्यामि तुभ्यंकन्यामलंकृता अ॥
स्यां योजायतेपुत्रः समेपुत्रो भवे ।
दिति अथवा पुत्रिकैवसुतः पु
त्रिकासुतः सोप्यौरससमप्
वपि एवयवानामसत्वान्का
वयवाना वाकृत्स्नाद्वा यथाह ।
वशिष्ठः द्वितीयः पुत्रिकैवेति ।
द्वितीयः पुत्रः कन्यैवेत्यर्थः ॥
इति मिताक्षरा ॥ पुत्रिका
प्रसूः स्त्री पुत्रिकाजननी त
त्पर्य्यायः धनसूः २ इतिश

शब्दरत्नावली ॥ पुत्रिका
सुतः । अस्य पुत्रिकायाः पुत्रः
पुत्रिकैव पुत्रः अस्य प्रमाणेन पु
त्रिकापुत्र शब्दद्वयम् ॥
पुत्रिणी स्त्री पुत्रवती सर्वासा
मेकपत्नीनामेकाचेत् पुत्रिणी
भवेत् सर्वास्तास्तेन पुत्रेण प्राह पुत्र
वतीर्मनुः इति दायभागधृतमनु
वचनम् ॥ पुत्री [१] अस्य पु
त्रयुक्तः पुत्रशब्दादस्त्यर्थे इन्
प्रत्ययनिष्पन्नः ॥ यथा ज्येष्ठे
न जातमात्रेण पुत्री भवति मानवः
पितॄणामनृणश्चैव स तस्मात् सर्व
मर्हति इति मनुः ॥ पुत्री स्त्री
सुता इति हलायुधः ॥ अस्याः
पर्य्यायाः पुत्रिका शब्दे द्रष्टव्याः
वृत्तविशेषः इति शब्दचन्द्रिका
पुत्रीय त्रि पुत्र पुत्रसम्बन्धि पु
त्रस्येदमित्यर्थे ईयप्रत्यय निष्प
न्नम् इति व्याकरणम् ॥
पुत्रेष्टिः स्त्री पुत्रनिमित्तकया
गः पुत्रेष्टिका विशेषः इति जटा
धरः यथा गृहीत्वा पञ्चवर्षी
यं पुत्रेष्टिं प्रथमेव वेत् इति स्मृतिः
पुत्रौ अस्य पुत्र दुहितरौ द्विवच
नान्तो नयं इत्यमरः ॥
॥ ॥ ॥

पुत्रं त्रि पुत्रीयं पुत्रनिमित्तमे
योगः पुत्रनिमित्तो नृपातोवा इ
ति पाणिनिः ॥ पुथ य हिंसे
इति कविकल्पद्रुमः ॥ पु
थ इ क्रमेण बधक्लेशयोः
इति कविकल्पद्रुमः ॥
पुद्गलः पुं आत्मा देहः इति श
ब्दरत्नावली ॥ यथा स्थूला
मध्यास्तथा सूक्ष्माः सूक्ष्मात्
सूक्ष्मतराश्च ये देहभेदा भवान्
सर्वे येके वित् पुद्गलाख्याः इ
ति विष्णुपुराणे ५ अंशे २० अध्या
यः ॥ पूर्य्यन्ते गलन्ति चेति पुद्ग
लाः बुद्ध्यापत्यभाजो ये नवया
बालदाख्या देहभेदाः यथाक्रः
इत्यगादनादेहे पुद्गलाः पर
माणव इति इति मट्टीकायां श्री
धरस्वामी ॥ पुद्गलः त्रि सुन्द
राकारः इति शब्दरत्नावली ॥
रूपादिमद्द्रव्ये इति हेमचन्द्रः ॥
पुनः [१] अ अप्रथमभेदः अव
धारणे इत्यमरः अधिकारः
अन्तरम् इति मेदिनी ॥
पुनःपुनः [१] अ वारंवारं तत्प
र्य्यायः अक्रः २ शश्वत् ३ अ
भीक्ष्णं ४ असकृत् ५ इत्यम
रः वारवा ॥

रेण ६ पौनःपुन्यं ७ प्रति
तर्णं ८ इति शब्दरत्नावली
पुनःपुना स्त्री नदीविशेषः
पुनपुना इति भाषा यथा ॥
कीकटेषु गया पुण्या पुण्यं राज
गृहं वनं च्यवनस्याश्रमः पुण्यो
नदी पुण्या पुनःपुना इति वा
युपुराणे गया माहात्म्यम् ॥
पुनःसंस्कारः पुं द्वितीयवा
रोपनयनादि संस्कारः य
था पुनर्वैद्योक्तको विप्रः पुनः
संस्कारमर्हति इति ज्योतिस्तत्त्वे
पुनरागमनं क्ली द्वितीयवा
रागमने फिरेआसा इति भा
षा यथा सम्वत्सरस्यनीते
न पुनरागमनाय च इति दुर्गो
त्सवपद्धतिः पुनरुक्तं क्ली
पुनर्वारकथने यथा आपा
ततोयदर्थस्य पौनरुक्त्येवभा
सनं पुनरुक्तवदाभासः सभि
न्नाकारशब्दगः इति साहित्य
दर्पणः ॥ पुनरुक्तज
न्मा [१] पुं ब्राह्मणः इति त्रि
काण्डशेषः ॥ पुनर्नवः
पुं नखः इति हेमचन्द्रः पुन
र्नवा स्त्री शाकविशेषः तत्
पर्य्यायः शोथघ्नी २ वर्षाभूः ३
प्रावृषायणी ४ कठिल्लकः ५ पृ

अरुणाः श्वेतायाः पर्य्यायः
दृश्चीरा २ विशाटिका ३ इति
रत्नमाला विशाखः ४ कठि
ल्लः ५ शशिवाटिका ६ पृथ्वी ७
सितवर्षाभूः ८ घनपत्रः ९ क
ठिल्लकः १० अस्या गुणाः उष्णत्वं
तिक्तत्वं कफकासहृद्रोग शू
लास्त्र पाण्डुशोफानिलनाशि
त्वं च इति राजनिर्घण्टः ॥
भेदकत्वं रसायनत्वं आमदनाम
अभोदरनाशित्वं च इति राजवल्ल
भः पुनर्नवाश्वेतमूला शोथघ्नी
दीर्घपत्रिका कटुः कषायानुर्व्या
ग्रीः पाण्डुघ्नी दीपनी परा शोफा
निलगरश्लेष्म हृत् ब्रध्नोदरप्र
णुत् ॥ पुनर्नवापरारक्ता र
क्तपुष्पा शिलाटिका शोथघ्नी
क्षुद्रवर्षाभूर्वर्षकेतुः कठिल्ल
कः पुनर्नवारुणा तिक्ता कटुपा
का हिमा लघुः वातला ग्राहिणी
श्लेष्म पित्तरक्तविनाशिनी ॥
इति भावप्रकाशः ॥ पुन
र्भवः पुं नखः इत्यमरः रक्त
पुनर्नवा इति राजनिर्घण्टः ॥
पुनर्वारजाते त्रि ॥ पुनर्भवी [१]
पुं आत्मा इति हेमचन्द्रः पुनर्भूः स्त्री
द्विरूढा तत्पर्य्यायः दिधिषूः २ इ
त्यमरः अक्षतयोनिक्षतयोनिर्वा पु
नरूढा इत्यमरावम ॥

स्वभूता प्रथमस्य पुनर्भवती ॥
ति क्लिपिपुनर्भूः पिष्यतेनि
न्दितत्वपाशाह्यते दिधिषूः पिषः
शाङ्गे नाम्नीति ऊः निपातनात् द्वितं
इति तट्टीकायां भरतः ॥ सा त्रि
विधा यथा परपूर्वास्त्रियस्त्वन्याः
सप्त प्रोक्ता यथाक्रमं पुनर्भूस्त्रि
विधा तासां स्वैरिणी तु चतुर्विधा
कन्यैवाक्षतयोनिर्या पाणिग्रह
णदूषिता पुनर्भूः प्रथमा प्रो
क्ता पुनः संस्कारकर्मणा दे
शधर्मानवेक्ष्य स्त्री गुरुभिर्या प्र
दीयते उत्पन्नसाहसान्यस्मै सा
द्वितीया प्रकीर्त्तिता उत्पन्नसा
हसा उत्पन्नव्यभिचारा असत्
सु देवरेषु स्त्री बान्धवैर्या प्रदी
यते सवर्णाय सपिण्डाय सा तृ
तीया प्रकीर्त्तिता इति मिताक्षरा
पुनर्वार जाते त्रि ॥ ॥
पुनर्वसुः पुं विष्णुः शिवः का
त्यायनमुनिः लोकभेदः धनार
म्भः इति शब्दरत्नावली ॥
नक्षत्रविशेषः स च यत्ताराकृति
पञ्चतारात्मकः यथा मघव
र्क्षेति श्रावस्तनाकृता वस्वासम
वसानुभे गताः लिप्तिकाः सप्त
विंपञ्च तारकेऽप्यत्र पावक
मिता यदोदयात् इति कालिदास
कृत्वा द्विलग्ननिरूपणं तस्या
धिष्ठात्री देवता अदितिः इति
जातकः तज्जातफलं यथा प्रभु
तमित्रः कृतशास्त्रयत्नः सत्व
कामी वरभूषणाढ्यः दाताश्
तापी वहृथापि पक्षी पुनर्वसौ
यस्य भवेत्प्रसूतिः इति कोष्ठी
प्रदीपः ॥ पुनर्वसुः पुं अ
श्विन्यादिसप्तविंशति नक्षत्रा
न्तर्गत सप्तम नक्षत्रं तत्पर्य्या
यः यामकौ २ आदित्यौ ३ इति
हेमचन्द्रः द्विवचनान्तोऽयं
पुन्नागः पुं स्वनामख्यातवृहत्
पुष्पवृक्षविशेषः तत्पर्य्यायः
पुरुषः २ तुङ्गः ३ केशरः ४ दे
ववल्लभः ५ इत्यमरः कुम्भी
कः ६ रक्तकेशरः ७ इति रत्न
माला पुन्नामा ८ पाटलद्रुमः
रक्तपुष्पः १० रक्तरेणुः ११ अ
रुणः १२ अस्य पुष्पगुणाः म
धुरत्वं शीतत्वं सुगन्धित्वं पि
त्तनाशित्वं भूतविद्रावणत्वम्
देवताप्रसादनत्वं च इति राज
निर्घण्टः ॥ कषायत्वं कफर
क्तनाशित्वं च इति राजवल्लभः ॥
सितोत्पलः जातीफलः नरश्रेष्ठः
पाण्डुनागः इति मेदिनी पुन्नाः
श्वेतकमलः इति राजपुस्तकाडः नि
र्घण्टः ॥

पुन्नामनरकः पुं पुत् इति नाम
कनरकविशेषः तत्र षोडशवि
धपापैः पतति यथा ब्रह्मोवा
च परदाराभिगमने पापानां चो
पसेवने पारुष्ये सर्वभूतानां प्रथ
मे नरके स्मृते फलस्तेयमहापा
पे फलार्हस्य च पातनः पाचनङ्
त्वजातीनां द्वितीये परिकीर्त्तिते
वर्ज्यादाने तथा द्विष्ट मवध्यव
धबन्धने विवादिनमहैश्वर्ये तृ
तीये नरके स्मृते भयदे सर्वसत्त्वा
नां नरभूति विनाशने भ्रंशने नि
जधर्माणां चतुर्थे नरके स्मृते ।
मारणे मित्रकौटिल्ये मिथ्याभि
शापने च यत् मिष्टैकाशनमित्र
कं पञ्चमं च विपाचनं प्ररोहाणां
फलकरे यमने योगनाशनम् ।
यानमुख्यस्य हरणे षष्ठं शक्रेन्द्रपा
चनं राजभागस्य हरणं राजजायानि
षेवने राज्ञो त्वहितकारित्वे सप्तमे
नरके स्मृते लब्धत्वे लोलुपत्वे च
लब्धधर्म्मार्थनाशने नानाकर्म्म
करे प्रोक्तं मष्टमे नरके स्मृते ब्रह्म
स्वहरणे चैव ब्राह्मणानां विनि
न्दने विरोधे ब्राह्मणैर्भ्याको
नवमो नरकस्त्वयम् शिशाचा
॥ द विनाशश्च ॥
मित्रद्वेषे शिशोर्वधे शास्त्रस्तेये यथा
स्मृतौ दशमे परिकीर्त्तिते षा
डुण्यनिधने चौरे षाड्गुण्यप्रतिषे
धने एकादशम मेवोक्तं नरके सा
द्भिरुत्तमः सद्भिरुक्ते सदाचैव मन्त्रा
चार मस्तक्रिया संस्कारपापहा
नव मि द्वादशमे स्मृते हानिध
र्म्मार्थकामानामपवर्गस्य हार
णे हर्षाहतेभ्य मतिदेवयोर्दशम
श्रुष्णे समले पर्म्महीने च यद
र्थ्ये यच्च दोषजे चतुर्दशकमेवो
क्तं नरके सद्भिर्गर्हिते अज्ञाने चा
प्यनिष्टत्वे मशोच मशुभावहे गा
र्वितत्वे च दशकमसत्यवचनानि
च आलस्ये वैषोडशक मात्रोशे
च विशेषतः सर्वस्य चात्मतायिनि
मगारेष्वग्निदायने इच्छा च परा
दारेषु नरकाय निगद्यते ईर्ष्याभा
वप्रसङ्गेषु ओद्धत्ये विगर्हिते पैते
स्तु पापैः पुरुषः पुन्नामनरके पतेत्
पुन्नामनरके घोरे विनाशो प्राहुस
र्वतः पतत्सात्कारणात् साध्य
स्तत्सुतः पुत्त्रो निगद्यते ॥ इति वा
मने ५८ अध्यायः ॥
पुष्कलः पुं उदरस्थवायुः
इति भूरिप्रयोगः ॥
पुष्फुसः पुं पद्मबीजाधारः

तत्पर्य्यायः ॥ वीजकोषः २ ॥
वराटकः ३ वामपार्श्वस्थमलाशा
यः फोफ्फुसा इति फलवरा इति
च भाषा तत्पर्य्यायः ॥ क्लोमः
२ इति शब्दचन्द्रिका ॥ रक्तफेन
जः ३ इति हेमचन्द्रः तिलकम् ४
क्लोम ५ इत्यमरः क्लोमं ६ इति
भरतः फुप्फुसोऽपिपाठः ॥
पुमान् पुं मनुष्यजातिपुरुषः
तत्पर्य्यायः पञ्चजनः २ पु
रुषः ३ पूरुषः ४ ना ५ इत्यमरः
मनुष्यजातिः इति केचिदिति भ
रतः पुंलिङ्गमात्रञ्च ॥
पुरः श्र अग्रगन्ता इति कविक
ल्पद्रुमः ॥ पुरःसरः
त्रि अग्रगामी इत्यमरः अस्य
पर्य्यायाः ॥ अग्रेसरशब्दे द्रष्ट
व्याः ॥ पुरं क्ली गेहः देहः पाट
लिपुत्रः पुष्पादीनोदलाहृतिः इ
तिमेदिनी ॥ नागरमुस्ता इति
रत्नमाला ॥ चर्म्म
इति शब्दरत्नावली ॥
गृहोपरिगृहम् इति विश्वः ॥
पुरं क्ली स्त्री हट्टादिविशिष्ट
स्थानम् ॥ इति श्रीधरस्वामी
बहुग्रामीय व्यवहारस्थानम्
इति भरतटीकायाम् ॥

रत्नः तत्पर्य्यायः पूः २ पुरी ३
नगरं ४ पत्तनं ५ स्थानीयं ६ कर्व
के ७ पटं ८ निगमः ९ पुटभेदनं
इति शब्दरत्नावली ॥ तस्य ल
क्षणादि यथा मत्स्ये उवाच रा
जा सहायसंयुक्तः प्रभूतयवसेन्ध
ने रम्यमानतसामन्ते मध्यमं दे
शमावसेत् वैश्यशूद्रजनप्राय
मनाहार्य्यं तथापरैः किञ्चिद्ब्रा
ह्मणसंयुक्तं बहुकर्म्मकरं तथा
अदेवमातृकं रम्यं भक्तरक्तजना
न्वितं करैरपीडितञ्चापि बहुपुष्प
फलं तथा ॥ अगम्यं परचक्राणां
तद्वासगृहमापदि समञ्च सुखसं
वाहं गन्तं प्रियमथाश्रितं ॥
सरीसृपविहीनञ्च व्याघ्रतस्करव
र्ज्जितं एवंविधं यथालाभं राजावि
षयमावसेत् ॥ तत्र दुर्गं नृपः कुर्य्या
त् षण्णामेकतमं बुधः धनुर्द्दुर्गं म
हीदुर्गं नरदुर्गं तथैव च वार्क्षञ्चैवा
म्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव सर्व्वे
षामेव दुर्गाणां गिरिदुर्गं प्रशस्यते
दुर्गञ्च परिखोपेतं वप्राट्टालक
संयुतं शतघ्नीयन्त्रमुख्यैश्च शतश
श्च समावृतं गोपुरं सकपाटञ्च
तत्र स्यात् सुमनोहरं सपताकं गजा
रूढो येन राजा विशेत् पुरं ॥ चत

स्रश्च तथा कार्य्या वीथयः स
र्व्वतोशुभाः एकस्मिंस्तत्र वीथ्यग्रे
देववेश्म भवेद्दृढं द्वितीये चापि
वीथ्यग्रे राजवेश्म विधीयते धर्म्मा
धिकरणं कार्य्यं वीथ्यग्रे च तृतीय
के चतुर्थे चैव वीथ्यग्रे गोपुरञ्च
विधीयते ॥ आयतं चतुरस्रं वा वृ
त्तं वा कारयेत् पुरं मुक्तिहीनं त्रि
कोणञ्च यवमध्यं तथैव च अर्द्ध
चन्द्रप्रकारञ्च वज्राकारञ्च कार
येत् अर्द्धचन्द्रं प्रशंसन्ति नदीतीरे
पुतं हि तत् अन्यत्र तन्न कर्त्तव्यं प्रय
त्नेन विजानता ॥ राज्ञा कोषगृहं
कार्य्यं दक्षिणे राजवेश्मनः तस्या
पि दक्षिणे भागे गजस्थानं विधी
यते गजानां प्राङ्मुखी शाला क
र्त्तव्या वा उदङ्मुखी आग्नेये च तथा
भागे आयुधागारमिष्यते महानसं
च धर्म्मज्ञ कर्म्मशालास्तथा पराः
गृहं पुरोधसः कार्य्यं वामतो राज
वेश्मनः मन्त्रिवेदविदाञ्चैव चि
कित्साकर्त्तुरेव च तत्रैव च तथा
भागे कोष्ठागारं विधीयते गवां
स्थानं तथैवात्र तुरगाणां तथैव
च उत्तराभिमुखा श्रेणी तुरगाणां
विधीयते दक्षिणाभिमुखा वाथ प
रित्याज्यास्तु गर्हिताः तुरगास्तु
याधार्य्याः प्रदीपैः सार्व ॥

रात्रिकैः कुक्कुटान् वानरांश्चैव म
र्कटांश्च नराधिप धारयेदश्वशालायां
सवत्सां धेनुमेव च अजाश्च धार्य्या य
त्नेन तुरगाणां हितैषिणा गोग
जाश्वादिशालासु तत्पुरीषस्य नि
र्गमः अस्तंगते न कर्त्तव्यो देवदेवे दि
वाकरे ॥ तत्र तत्र यथास्थानं
राजा विज्ञाय सारथिं दद्यादाव
सथस्थानं सर्व्वेषामनुपूर्व्वशः
योधानां शिल्पिनाञ्चैव सर्व्वेषाम
विशेषतः दद्यादावसथान् दुर्गे म
न्त्रकालविदो शुभान् गोवैद्यान
श्ववैद्यांश्च गजवैद्यांस्तथैव च आ
हरेत भृशं राजा दुर्गे परबलार्द्दितः
कुशीलवानां विप्राणां दुर्गे स्था
नं विधीयते न बहूनामतो दुर्गे
विना कार्य्यं तथा भवेत् सर्व्वनि
ष्ठं कार्य्यं विना दुर्गं महीपते उ
र्गोपत्ताः प्रकर्त्तव्या नानाप्रहरणा
न्विताः सहस्रघातिनो राजं स्तैस्तु
रक्षा विधीयते ॥ दुर्गद्वाराणि गु
प्तानि कार्य्याण्यपि च भूभुजा सं
चयश्चात्र सर्व्वेषामायुधानां विधी
यते धनुषां क्षेपणीयानां तोम
राणाञ्च भार्गव शराणामथ खड्गा
नां कवचानां तथैव च लगुडा
नाञ्च कुन्तानां परिघैः सहपाथि
व अश्मनाञ्च प्रभूतानां ॥

सृङ्गाणां तथैव च त्रिशूला॥
नां पट्टिशानां कुणपानां च।
पार्थिव शास्त्राणां च मुशलानां।
शक्तीनां च नरोत्तम परश्वधा॥
नां च क्रकचानां धर्मणां चर्म्मभिः
सह कुद्दालवज्रवेत्राणां पिट।
कानां तथैव च हेमकानां च दृ
त्राणां मेगास्य च सेचयः सर्व्वे
षां शिल्पभाण्डानां संचयश्चा
त्र इष्यते ॥ वादित्राणां च सर्व्वे।
षां मौषधीनां तथैव च परमा
नां प्रभूतानां भिन्दनस्य च सेच।
यः गुडानां सर्व्वतैलानां गोरसा
नां तथैव च वसानां मद्यमज्जानां
स्नायूनामस्थिभिः सह गोचर्म्म
पटहानां च धान्यानां सर्व्वतस्त।
था तथैव पर्प्पटानां च यवगोधू।
मयोरपि रत्नानां सर्व्ववस्त्राणां लो
हानां चाप्यशेषतः कलायमुद्गमा
षाणां चणकानां तिलैः सह तथा
धान्य सर्व्वशस्यानां पांशुगोमय।
योरपि शणसर्ज्जरसंभूर्ज म
तलात्वाश्वदंष्ट्रकाणं राजा संचिनु
याद्दुर्गे वृक्षाम्रदधिकिंबन ॥ अ
म्लाम्लाषीविषाः कार्य्या वाल
ल सिंहादयस्तथा मृगाश्च पक्षिणश्चै
व विष्णुद्योपरस्य स्थानानि व
विष्णुहानां मृगपालिनं पृथक् पृथक्
कर्त्तव्यानि महाभाग यत्नेन पृथ्वी
तिला ऽक्तानि वाप्युक्तानि वा
जद्रव्याण्यशेषतः संग्राह्याणि
रेकुर्य्याज्जनानां हितकाम्यया॥
जीवकर्षभकाकोली आमलकाः
पत्रूषकं शालपर्णी पृश्निपर्णी
मुद्गपर्णी तथैव च माषपर्णी च
मेदे द्वे शारिवे द्वे बलात्रयं वीरा
सती वृश्चीवा बृहती कण्टकारि॥
का शृङ्गी शृङ्गाटकी द्रोणी व
र्षाभूर्दर्भरास्त्रा का मधुपर्णी विदा
र्यौ द्वे महाद्रवा महातपा धन्व।
नाश्च ह्रदेवाह्वा कटुके रेणुकं विष
पर्णाशनाकम्ह्लीका फलश्रेष्ठ
रथहिका शुक्रातिशुक्रकाश्मर्य्य
वृक्षाभिक्षुरवीरणाः॥ इक्षवि
त्रविकारोऽश्म पाणिनाधाश्मम।
नम सिंहीच सहदेवे च विश्वदेवा।
वृषकं मधूकं पुष्पकं साला शा।
लपुष्पा मधूलिका शतावरी मधू।
के च पियालं तालमेव च खर्जू।
रमाकन्दफलाभ्यां दारदार्जु।
शीर्षिका राजसर्षप धन्याक म
घपोकातपोनकटा कालशा।
कं पद्मबीजं गोवल्ली मधुवल्लिका
शीतपाकी कुलिंगाक्षी काकजि
काक पत्रिका इर्वारुत्रपुषो वाभौ
गुञ्जा रुक्मनन्दे वे कशेरुकाक्वका
शमीरी विम्बशालुक केशरे॥ शुक
धान्यानि सर्व्वाणि॥

ग्रामीधान्यानि यानि च तीरंतो
द्रं तथाम्लकं मज्जतैलं वसाघृते
निकोचाभिषुकास्फोटे वातासा
मारुमालकं एवमादीनि चाम्ला।
नि विज्ञेयो मधुरो गणः राजा सं
चिनुयात्सर्व्वं प्रयत्नेन विशेषतः
दाडिमाम्रातकाम्रा च तिन्तिडीका
म्लवेतसं भव्यंककर्कन्धूलकुचं क
रमर्द्दकवृषकं बीजपूरककां।
रण्डं मालतीराजबंधुकं कोटक
हृपर्णानि द्वयोरम्लिकयोरपि पा
रेवतं नागरकं प्राचीनारुकमेव च
प्राचीनारुकमेव च कपित्थाम
लकीचुक्रं फलं दन्तशठस्य च ज।
म्बीरं नवनीतं च सौवीरकं तुषोद
कं सुरासवं च मद्यानि मण्डतक्र।
दधीनि च शुक्तानि चैव सर्व्वाणि
ज्ञेयान्यम्लगणे द्विजाः एवमादी
नि सर्व्वाणि राजा संचिनुयात्पुरे
सैन्धवोद्भिद पाटेय वाकुसासमुद्र
रोमकं कृष्णसौवर्च्चलविडं वाल
केयं यवाकृये ऊषक्षारं कालभस्म
विज्ञेयो लवणो गणः एवमादी
नि सर्व्वाणि राजा संचिनुयात्पुरे॥
पिप्पली पिप्पलीमूलं चव्यचित्रकना
गरं कुवेरकं समरिचं शिग्रुभ क
लाभसर्षपाः कुष्ठाजमोदा किणि
ही हिङ्गु ॥ ॥
मूलकधान्यकं कारवी कुंचिका
जाज्यः सुमुखः कालमालिका।
फणिज्झकोऽथ लशुनं भूस्तृणं
सुरसस्तथा कायस्था च वयःस्था
च हरितालं मनःशिला मूत्रता च
रुदन्ती च रोहिषं कुङ्कुमं तथा वचा
परण्डकाण्डीरशल्लकी हस्तिमार्ग
था सर्व्वपित्तानि सर्व्वाणि प्रायो
हरितकानि च संग्रहाणि च मूला
नि षष्टिकाविविधानि च फलानि।
चैव च तथा सूक्ष्मैलाहिंगुपत्रिका
एवमादीनि चाम्लानि गणः कटुक
संज्ञकः राजा संचिनुयाद्दुर्गे प्रयत्न
तेनन्यपोत्तम ॥ रक्तचन्दनह्रीबेर
कृतमालकदारवः हरिद्रामल।
कोशीरं रक्तमालकवल्कलं दूर्वा
पटोलकटुका दन्तिवकपत्रकवृक्ष
गः किराततिक्तकं निम्बं विषाद्वा
निर्विषा तथा तालीशपत्रं तगरं।
सप्तपर्णविकंकताः काकोदुम्ब
कोदीव्य सषव्यः किनिहीतथा
षड्ग्रन्थारोहिणी मांसीपर्पटम
दयन्तिका रसाञ्जनं भृङ्गराजं पत
ङ्गी परिपेलवं उष्यशीरकलाकामा
श्यामाकं गन्धनाकुली चतुष्पर्णी
व्याघ्रनखं मधूकावनस्थला रम्भा
चैवक्षुद्राषष्ठी तालस्फोता हरे।
णुका वेत्राग्रं वेतसस्तुम्बी वि

षाणीलोहमंननं मालतीकर।
तिकाख्या विषोगीजिह्निकातथा
पर्य्यन्तेच शष्कुलीच गणिकास्त्रिकक
संज्ञकः एवमादीनिचान्यानि रा
जांसविनुयात्पुरे ॥ अभयामल
केचोभे तथैवच बिभीतकं प्रियं
गुधातकीपुष्पं मोचलोभार्ज्जना
सनाः अनाम्राम्रीपुरानेगा शेफाली
कंकउम्लंतथा भूर्जपत्रं शिलो
द्भेदं पाटलापत्रलोमकं समंगा
त्रि हृताम्रलं कार्पासोगैरिकाञ
नं विक्रमंसमस्त्रिष्टं कुम्भी।
काकमुद्गोत्पलं मक्रोथोदुम्ब।
राश्वत्थ किंशुकाःशिंशपाशमी।
पियालपिलुकाशाल शिरीषप
मकंतथा विल्वाग्निमन्थः स्तत
अ शपामाकपवकोद्रवं तथा।
दनकारीरंच धान्यकंप्रियंकौत
था शाकोदाशोकवदराः कद
म्बखदिराह्वयं एवांपत्राणिसारा।
णि मूलानिकसुमानिच एवमा
दीनिचान्यानि कषायाद्रावगणा
मतः मयत्नेनन्पश्रेष्ठ राजास्ते
विनुयात्पुरे कीटाश्वसारांगेपे
ण्या अंगनाघातथैवच वानभूमा
ष्मुमार्गाणि हृषणानितथैवच धा
र्य्याणिपार्थिवैर्दुर्गे तानिवृक्षाणि
भावन विषाणान्यारणकाधे मप
त्नेनमही ॥

भुजाविवि शाश्च गदाधार्य्या विष
मशमनास्तथा रक्षोभूतपिशा
चघ्नाः पापघ्नाः पुष्टिवर्द्धनाः क
लाविदश्चपुरुषाः पुरेधार्य्याप्र।
यत्नतः भीतान्प्रमत्तान्कुपिता
न् तथैवचविमानितान् कुर्य्या
न्नृपापशीलांश्च नराजावासयेत
पुरे यज्ञाश्वधाट्टालचयोपपन्नं स
मग्रधान्यौषधिसंप्रयुक्तं वणिग्
जनैश्चाधिवृतं मावसेत्तदुर्गंसुशुभ्रं।
नृपतिःसदैव इतिमात्स्येराजध
र्म्मेदुर्गसम्पत्तिर्नाम २१९ ॥ अ
ध्यायः ॥ पुरे वर्ज्जनीयानि ॥
यथा पुरेहृष्टमतोलीच परिखा
तोरणध्वजाः प्रासादाधमपाश।
म वापैवेश्या सतीवरी इतिक।
विकल्पलता ॥ अविशिष्टं नग
रं शब्देद्रष्टव्यम् ॥

पुरः पुम् गुग्गुलुः इत्यमरः ॥
पीठकिणटी इतिशब्दचन्द्रिका।
पुरः व्य अग्रतः इत्यमरः प्रा
च्यांदिशि प्रथमेकाले पुरार्थ्या।
गतीते इतितट्टीकायांभरतः
पुरंजनः पुं जीवः यथा पुरुषं
पुरंजनं विद्यात् यद्व्यनक्त्यात्मनः
पुरं एकद्वित्रिचतुष्पादं बहुपा
दमपादकं इतिश्रीभागवते ॥

४ स्कन्धे २९ अध्यायः ॥
पुरंजनी स्त्री बुद्धिः यथा न विद
मवयं सम्यक् कर्त्तारं पुरुषर्षभ
आत्मनश्चपरस्यापि गोत्रंनामवय
स्कृतं रजन्नन्दीयाःसर्व्वेतेमामा
कुश्चपुरंजनी ॥ बुद्धिंतु प्रमदा।
विद्यान्ममाहमितियत्कृतं याम
पिहायदेहेस्मिन् प्रमान्भुंक्तेदि
भिर्गुणान् इतिश्रीभागवते ४
स्कन्धे २५ २९ अध्यायः ॥
पुरंजयः पुं सूर्य्यवंशीयराजा।
विशेषः तत्पर्य्यायः ॥
काकुत्स्थः २ इतित्रिकाण्डशेषः
पुरंजयकर्म्मवि त्रि पुरटम् क्ली
सुवर्णं यथा हविः पुरट सुन्दर
द्युति कदम्ब सन्दीपितःसदाक
दयकन्दरे स्फुरतुवः शचीनन्दः
इतिविदग्धमाधवः ॥
पुरणः पुं समुद्रः इत्युणादिकोषः
पुरतः व्य अग्रतः इत्यमरः ॥
पुरतटी स्त्री हट्टी क्षुद्रहट्टः इ
तिहारावली ॥
पुरद्वारं क्ली नगरद्वारं तत्पर्य्या
यः ॥ गोपुरम् २ इत्यमरः ॥
पुरद्विट् पुं शिवः इतिजटाध।
रः पुरन्ध्रम् क्ली वक्रिकम् इ
तिशब्दचंद्रिका ॥

पुरन्दरः पुं इन्द्रः इत्यमरः चौरः
यथा समोसमीनाय दि पाकशा
ला समोसमीनाद्य येनवःसुः ॥
पुरन्दरस्याविषयं यदिस्यात् पुरन्द
रस्यापि पुरमनयाचे इत्युद्भटः
पुरन्दरा स्त्री गंगा इतिहारावली
पुरन्ध्रिः स्त्री पतिपुत्रद्विजादि
मत्पुरन्ध्री ती इतिभरतः तत्प
र्य्यायः ॥ कुटुम्बिनी २ इत्यमरः
स्त्रीमात्रे इतिराजनिर्घण्टः ॥
परश्छदः पुम् तृणविशेषः उलु
इति भाषा तत्पर्य्यायः ॥ दर्भः
२ शष्पः ३ सोमपत्रः ४ परात्मि
यः ५ इतिशब्दचन्द्रिका ॥
उलपः ६ इतिमेदिनी ॥
पुरस्कारः पुम् पुरस्क्रिया अ
भिषाशः अभिग्रहणम् अग्रकर
णं पूजनम् स्वीकारः सेकः इ
तिपुरस्कृत शब्दार्थदर्शनात् ॥
पुरस्कृतः ॥ त्रि अभिशस्तः
अभिग्रस्तः अग्रकृतः पूजितः
इतिमेदिनी स्वीकृतः सिक्तः
इति हेमचन्द्रः ॥ ॥
पुरस्तात् व्य प्राच्यांदिशि यथा
पुरस्तात् सूर्य्य उदेति प्रथमेका
ले यथा पुरस्तात् भुङ्क्ते पुरा
र्थेअतीते यथा ॥

पुरस्तात्प्राग्ग्रे ऽभूत् अग्रतः अग्रे दे-
शे यथा पुरे स्त्रादायाति इत्यमरम-
तेः पुराणं प्रबन्धः वाक्यरचना
पुराण आदिः यथा पुराविदः चिरंचिरतने
पुराण मित्यर्थान्तरं अतीते भूते
चिरातीत मित्येके यथा इतिहा-
सः पुरावृत्त मितिकेचित् निक-
टः सन्निहितः आगामिके अना-
गते निकटागामिकः भविष्यदा-
सत्तिः इतिकेचित् इत्यमर ॥
भरतौ ॥ भीरुः इतिशब्दरत्ना-
वली ॥ पुरा स्त्री सर्वदिक् ॥
सुगन्धिद्रव्यविशेषः तत्पर्या-
यः गन्धवती २ दिव्या ३
गन्धाढ्या ४ गन्धमादिनी ५ सु-
रभिः ७ भूरिगन्धा ८ कुटी ९
गन्धकुटी १० अस्यागुणाः तिक्त-
त्वं कटुत्वं शीतत्वं कषायत्वं कफ
पित्तश्वासास्त्रविषदाहार्त्ति भ्रा-
मकुष्ठा तृषा नाशित्वंच ॥ इ-
तिराजनिर्घण्टः ॥
पुराकृतम् त्रि प्रारब्धकर्म्म
पूर्वकालकृत पुण्यपादि यथा
अकाले दर्शनं विभो हन्ति पु-
ण्यं पुराकृतम् ॥
ॐ ॥ इतिस्मृतिः ॥
पुराणम् क्ली व्यासादिमुनिप्रणी-
त ॥

वेदार्थवर्णित पंचलक्षणान्वित
शास्त्रं तत्पर्य्यायः ॥ पंचलक्षण
इत्यमरः पंचलक्षणानि यथा स-
र्गः १ प्रतिसर्गः २ वंशः ३ मन्व-
न्तरं ४ वंशानुचरितं ५ महापुरा-
णस्य दशलक्षणानि यथा सर्गः
विसर्गः २ वृत्तिः ३ रक्षा ४ अन्तरं
५ वंशः ६ वंशानुचरितं ७ सं-
स्था ८ हेतुः ९ अपाश्रयः १०
अष्टादशमहापुराणानि ते-
षां श्लोक संख्यानिच यथा ब्रा-
ह्मं दशसहस्रं १ पाद्मं पंचपंचा-
शत् सहस्रं २ वैष्णवं त्रयोविं-
शतिसहस्रं ३ शैवं चतुर्विंशति
सहस्रं ४ भागवतं अष्टादशस-
हस्रं ५ नारदीयं पंचविंशतिस-
हस्रं ६ मार्काण्डेयं नवसहस्रं
आग्नेयं चतुःशताधिक पंचद-
शसहस्रम् ८ भविष्यं पंचश-
ताधिकचतुर्दशसहस्रं ९ ब्रह्मवै-
वर्त्तं अष्टादशसहस्रं १० लैङ्गं एकाद-
शसहस्रं ११ वाराहं चतुर्विंशति
सहस्रं १२ स्कान्दं शताधिकैकाशी-
तिसहस्रं १३ वामनं दशसहस्रं १४
कौर्म्मं सप्तदशसहस्रं १५ मात्स्यं च-
तुर्दशसहस्रं १६ गारुडं ऊनविंशति
सहस्रं १७ ब्रह्माण्डं द्वादशसहस्रं १८
समुदायेनचतुर्लक्ष श्लोकाः ३।
तिश्रीभागवतीयद्वादशस्कन्धः ॥

अपिच सूत उवाच विस्तरानि-
पुराणानि चेतिहासश्च शौनक ।
संहिताः पंचरात्राणि कथयामि
यथागमम् ॥ सर्गश्च प्रतिसर्गश्च
वंशो मन्वन्तराणि च वंशानुचरि-
तं विप्र पुराणं पंचलक्षणं तदु-
पपुराणानां लक्षणंच विदुर्बुधाः
महतांच पुराणानां लक्षणं क-
थयामि ते ॥ सृष्टिश्चापि विसृष्टि-
श्च स्थितिस्तेषांच पालनं कर्म्म-
णां वासनावार्त्ता मनूनांच क्रमेण
च वर्णनं प्रलयानांच मोक्षस्य च
निरूपणं उत्कीर्त्तनं हरेरेव देवा-
नांच पृथक् पृथक् दशाधिकं ल-
क्षणंच महतां परिकीर्त्तितं संख्या-
नांच पुराणानां निबोध कथयामि
ते ॥ ब्रह्मपुराणंच सहस्राणां
दशैव च पंचोनषष्टिसाहस्रं पाद्म-
मेव प्रकीर्त्तितं त्रयोविंशतिसाह-
स्रं वैष्णवं च विदुर्बुधाः चतुर्विंश-
तिसाहस्रं शैवमेव निरूपितं ग्रन्-
थाः ष्टादशसाहस्रं श्रीमद्भागव-
तं विदुः पंचविंशतिसाहस्रं ना-
रदीयं प्रकीर्त्तितम् मार्कण्डं नव
साहस्रं पुराणं पण्डिता विदुः ।
चतुःशताधिकं पंच दशसाह-
स्रमेव च ॥ सप्तमं निपुराणं च ।
हविर्यं परिकीर्त्तितम् ॥ चतु-

र्दश सहस्राणि पंचपंचशताधि-
कं पुराणमपरं चैव भविष्यं परि-
कीर्त्तितं अष्टादश सहस्रंच ब्रह्म-
वैवर्त्तमीप्सितम् सर्वेषांच पुराणा-
नां सारमेव विदुर्बुधाः एकाद-
शसहस्रंच परं लिङ्गपुराणकं चतु-
र्विंशति साहस्रं वाराहं परिकीर्त्ति-
तं एकाशीतिसहस्रंच परमेकश-
ताधिकं परं स्कन्दपुराणंच सङ्क्षे-
प निरूपितं वामनं दशसाहस्रं कौ-
र्म्मं सप्तदशैव तु मात्स्यं चतुर्दशं प्रो-
क्तं पुराणं पण्डितैस्तथा ऊनविं-
शतिसाहस्रं गारुडं परिकीर्त्तितं प-
रं द्वादशसाहस्रं ब्रह्माण्डं परिकी-
र्त्तितं एवं पुराणसंख्याने चतुर्ल-
क्षमुदाहृतं अष्टादश पुराणाना-
मेवमेव विदुर्बुधाः एवं चोपपु-
राणानां अष्टादश प्रकीर्त्तिताः ॥
इतिहासो भारतंच वाल्मीकि काव्य-
मेवच पंचकं पंचरात्राणां कृष्णमा-
हात्म्यपूर्वकम् वाशिष्ठं नारदीयंच
कापिलं गौतमीयकं परं सनत्कु-
मारीयं पंचरात्रंच पंचकम् पंच-
म्यः संहितानांच कृष्णभक्तिसम-
न्विताः ब्रह्मणश्च शिवस्यापि प्र-
ह्लादस्य तथैव च गौतमस्य कुमा-
रस्य संहिताः परिकीर्त्तिताः ॥
इतिते कथितं सर्वं क्रमेण च

पृथक्पृथक् अस्यैवं विष्णुलेशा
ख्यं ममापि च यथागमं इति ब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखण्डे १३२
अध्यायः ॥ पद्मपुराणमनेन ।
निस्तारायत्नलोकानां स्वयं नारा
यणः प्रभुः व्यासरूपेण कृतवा
न् पुराणानि महीतले यच्छ्र
वणाद्येषां नृणां पापक्षयो भवेत्
धर्म्माधर्म्मपरिज्ञाने सदाचार
प्रवर्त्तने गतिश्च परमा तद्वृ
क्तिर्भगवति प्रभो तानि मे कथ
यिष्यामि सप्रमाणानि भूतले ॥
पुराणसंख्यां तत्त्वमाह पुराण
निचन्द्रलेखेऽपि तानि धरणी
तले तथा महाभारतं च तत्
संख्याप्रकीर्त्तितम् पञ्चलक्षमि
दं राजन् कथितं ब्रह्मकेवलम्
वेदः पञ्चमनामैव लोकनिस्ता
रकः परः तत्र पद्मपुराणं च प्र
थमं सम्प्रणीतवान् ततोऽन्यानि पु
राणानि कृत्वाष्टादशकं क्रमात्
अष्टादशं भागवतं सारमाकृष्य
सर्वतः कृतवान् भगवान् व्या
सः शुकं चाध्यापयत् तद्वत्ते इ
ति पातालखण्डे ९१ अध्यायः
आख्यानादिभिः सह व्यासः पु
राणं चक्रे यथा आख्यानैश्चाप्यु
पाख्यानैः गाथाभिः कल्पशु
द्धिभिः ॥

पुराणसंहितां चक्रे पुराणार्थवि
शारदः प्रख्यातो व्यासशिष्योऽभू
त् सूतो वै लोमहर्षणः पुराणसं
हितां तस्मै ददौ व्यासो महामुनिः
अस्य टीका यथा आख्यानादिभिः
सह पुराणं चक्रे व्यास इत्यन्वयः
तत्र च स्वयं दृष्टार्थकथनं प्राहु
राख्यानकं बुधाः श्रुतस्यार्थस्य
कथनं उपाख्यानं प्रचक्षते गा
थास्तु पितृपृथ्वीप्रभृतिगीतयः
कल्पशुद्धिः श्राद्धकल्पादिनिर्णय
सुमतिश्चाग्निवर्च्चाश्च मित्रायुः
शांशपायनः अकृतव्रणोऽथ
सावर्णिः षट् शिष्यास्तस्य चा
भवन् टीका सुमत्यादयस्तस्य
महर्षणस्य षट् शिष्यास्तत्कृ
ताः षट् संहिता जगृहुः काश्य
पः संहिताकर्त्ता सावर्णिः शांश
पायनः लोमहर्षणिका चान्या
तिसृणां मूलसंहिता टीका अ
कृतव्रण एव काश्यपः काश्यपो
ऽकृतव्रण इति वाक्ये लोमह
र्षणिकाख्यान्या लोमहर्षणेन पु
नः संक्षेपेण प्रोक्ता ॥ चतुष्टयेना
प्येतेन संहितानामिदं मुने टीका
एतासां काश्यपादिकृतानां सं
हितानां मध्ये चतुष्टयेनापि मूल
भूतेन तत्सारोद्धारात्मकं इदं ।
श्रीविष्णु ॥

पुराणं मुने मैत्रेय मया कृतमि
ति शेषः ॥ आद्यं सर्वपुराणानां ।
पुराणं ब्राह्ममुच्यते अष्टादश पुरा
णानि पुराणज्ञाः प्रचक्षते इति वि
ष्णुपुराणे ३ अंशे ६ अध्यायः ॥
तेषां नामोच्चारणादि माहात्म्यं ।
यथा अष्टादशपुराणानां नाम
धेयानि यः पठेत् त्रिसन्ध्यं जपन्नि
त्यं सोऽश्वमेधफलं लभेत् इति
मार्कण्डेयपुराणं ॥ ॥ ताम
सपुराणानि यथा मात्स्यं कौर्म्मं ।
तथा लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयं च षडेतानि तामसानि नि
बोधत सात्त्विकपुराणानि यथा
वैष्णवं नारदीयं च तथा भागव
तं शुभं गारुडं च तथा पाद्मं वारा
हं शुभदर्शने सात्त्विकानि पुरा
णानि विज्ञेयानि शुभानि वै ।
राजसपुराणानि यथा ब्रह्मा
ण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च
भविष्यं वामनं ब्राह्मं राजसानि
निबोधत ॥ सात्त्विका मोक्षदाः
प्रोक्ता राजसाः स्वर्गदाः शुभाः
तथैव तामसा देवि निरयप्राप्ति
हेतवः इति पाद्मोत्तरखण्डे ।
४२ अध्यायः ॥ अष्टादशो
पपुराणानि यथा आद्यं सन
त्कुमारोक्तं नारसिंहमथापरं

तृतीयं स्कन्दमुद्दिष्टं कुमारेण तु ।
भाषितं चतुर्थं शिवधर्म्माख्यं सा
क्षान्नन्दीशभाषितं दुर्व्वाससोक्त
माश्चर्य्यं नारदोक्तमतः परं का
पिलं वामनं चैव तथैवोशनसेरि
तं ब्रह्माण्डं वारुणं चाथ कालि
काह्वयमेव च माहेश्वरं तथा ॥
शाम्बं सौरं सर्वार्थसञ्चयं परा
शरोक्तमपरं मारीचं भार्गवाह्व
यं इति गारुडे २२० अध्यायः
कौर्म्मोक्तान्येतानि उपपुराण
शब्दे द्रष्टव्यानि ॥ पुराणपा
ठक्रमस्तु पारायणशब्दे पाठ
शब्दे च द्रष्टव्यः ॥

पुराणः पुं [illegible]ः पुरातने ।
त्रि कार्षापणे पुं स्त्री इति श
ब्दरत्नावली ॥ पुराणगः
पुं ब्रह्मा इति हेमचन्द्रः ॥
पुराणगायके त्रि ॥
पुराणपुरुषः पुं विष्णुः इति
हेमचन्द्रः ॥
पुरातनः त्रि पूर्वकालभवः
पुराणा इति भाषा तत्पर्य्या ।
यः पुराणः २ प्रतनः ३ प्र
त्नः ४ चिरन्तनः ५ इत्यमरः
चिरत्नः ६ इति जटाधरः ॥
पुराध्यक्षः त्रि नगराधिकृतः
अन्तः पुराध्यक्ष लक्षणं ॥

यथा हृहः ऊलोद्धतः शाकः।
पितृ पैतामहः शुचिः एतामतः
पुराध्यक्षो विनीतश्च तथैवाध्यक्षे।
इतिशुक्रिकल्पतरुः पुरारिः।
पुं शिवः इतित्रिकाण्डशेषः
पुरर्द्धिविल्वः पुं खेटः इतिहे
मचन्द्रः ॥ पुरा वसुः पुरु
भीष्मः इतित्रिकाण्डशेषः
पुरहूते स्त्री हर्म्यमानिबन्ध
ने नतपर्य्यायः ॥ इतिहासः
र इत्यमरः हर्म्यवितनम् इ
इतिस्वामी पुरस्विनी स्त्री स।
हदेवीलता इतिराजनिर्घण्टः
पुरसूदन२ पुं शिवः इति।
हेमचन्द्रः ॥ पुरिः स्त्री
पुरी इत्यमरभरटीकायामभर
तः नदी इति सिद्धान्तकौमु।
द्यामुणादिवृत्तिः ॥
पुरी स्त्री नगरी इत्यमरः ॥
अस्यालक्षणादि ॥
पुरशाहे नगरशाहे चलिति
तम् दशनामा सन्न्यासीनो
उपाधिविशेषः ॥ यथा
ज्ञान रत्नेन सम्पूर्णः पू ॥
रीतत्व पदयस्थितिः ॥
इति राजनिर्घण्टः ॥
तत् पर्यायः इति
मेदिनी ॥ ॥

परब्रह्मरतोनित्यं पुरानामासउच्य
ते इतिहरवल्लभकरदिग्विजयः ॥
पुरीतत् पुं स्त्री अन्त्र आन्त इति।
ख्याते अन्तति बध्नाति कालस्वा।
दि अन्त्रम प्रतिबन्धे नाम्नीति।
णः पुरिःशरीरं तनोति पुरीतत्
क्विप वनतनाद्यनिमामिति ॥
लोपे स्वसमनिति तत् निपातना
दिकारस्य दीर्घः अन्त्र सार चर्य्या।
त स्त्री वते पुरीतदस्त्रिया मि।
ति वाचस्पतिः इत्यमरभरतौ
पुरीमोहः पुं धुस्तूरः इति।
शब्दमाला ॥ पुरीषं क्ली ॥
विष्ठा इत्यमरः ॥ तदुत्सर्ग।
विधि यथा अह्नि ब्रह्मउत्थाय
रात्रिवासं परित्यजेत् परिधाया।
परं वस्त्रं शावनस्थानतोन्वहम्
अंशात् क्रिहस्तान् मत्वा स दिशाव।
स्पततो द्विजः कुश कुसुमम्।
नि कृत्वा खनित्वानैर्ऋतो दि।
शम् खनित्र खननैनैव द्वार ॥
शिरोवस्यपोमरु गृहीत्वोदकपा
त्रंच मितंगच्छेद्दतुः यातं ग्रामा
ह्वादशारविक्षेप मात्रामतुनिदे।
रेतो भैत्रमावसपकंकर्त्तं नग
राद्बत्तन्तगुणाः नविशस्याप।
नेगर्त्तम् तथा कृत्वा गभी
रकम् कृत्वावद्धिः खनित्रे।

ण कृष्णे एच्छायतनस्तं शुष्कैः
काष्ठैरयत्तीयै भूगर्त्तमवशीति
तः सम्वीतोगोवेणुदलैः पत्रै
र्न्नयभाजनैः छत्रं खनित्रेसं।
स्थाप्य वारिपात्र प्रधानैः तनोहि
नस्तूपविशो वस्त्रेणाच्छघमस्त।
के यज्ञोपवीते कर्णेघ्न्य कृत्वामे
नीचदत्तिणे आगतोद्विजमग्नि
नो पश्यन् संतेव भास्कर गृहे
समीरणे सर्व देवतामूर्त्तिमेव।
व मानरपितरंवेद सर्वगुरुज।
नस्त्रिये उदे शरवेत्रिसन्ध्यासु दिव
सेवयदानिशि दत्तिणाशुखे उत्त
सर्गं कुर्य्यान्मूत्रपुरीषयोः हृ।
वीकृत द्विजः कुर्य्यात् पश्चिमा
भिमुखोऽथवा अपराह्णे पूर्व।
मुखो मूत्रगृष्यविसर्ज्जने मध्या
ह्नेऽप्ययतः कुर्य्या यतवाउतमः।
मुखः दत्तिणाभिमुखोरात्रौ द्विजो
भैत्रमयतनतः निशायामन्या।
कारेत छायायामादिवसेतथा।
पथेव्रह्मसमुखोभूत्वा मैत्रं कुर्य्या
त् द्विजोभयात् दिग्भ्रमाच्चमनो
दुःखे द्विजस्त्रेष्म विसर्ज्जने मो
हाद्धायेप्युवः कुर्य्याद्यथवाक्
प्रयतोद्विजः सम्प्रासीत्रत्रवा।
रीच दानमस्थोगृहीद्विजः ॥
शालाप्यायीच वेदानां सर्वय
तेषूदीरितः शनिश्चसर्वधर्म्म

ह्योदानःशातउदारथीः मदो।
नरमुखःकुर्य्या हैस्ववोनामप
वच मातश्चमैत्रंसायाह्ने दत्ति।
णाभिमुखोनिशि योगिनाञ्च य।
थाह्नीणां सुराहीनामयंक्रमः ॥
नदेवायतनेहृत्त मूलेचनजलेन
दे ननदीकूपमार्गेषु नवापी।
गोष्ठभस्मसु नचितागिन्यमशा
नेषुनोषरेनद्विजालये नाम्भः।
समीपेनमण्डे नाकाशे नचभूमा।
हले नसश्वेनकाम्येव नतीर्थेन
द्विजालये नयत्नहृतमूलेषु नोप
हारेचतथैव नशास्त्रेनेनखा।
ले पुष्पोद्यानेनचत्वरे सोपान।
नकोननगनश्च नरथ्यासेव्याभू।
तले नवैसवालयेगोत्रे नस्।
र्याभिमुखस्तथा नफालकृष्टके
दारे नतिष्ठन्कदाचन नगच्छ
न्नच वल्मीके नचपर्वतमस्तके
नजलेन दिशोभागानाकाशमव
लोकयन् न गोव्रजेनदीतीरे।
निम्नस्थानेनगोमये यत्नभूमौ।
नहष्टेनपविद्धीकृतस्थले द्विजोन
देहच्छायायां शकृन्मूत्रविसर्ज्ज
ने कुर्य्यायतेष्टकाकूटे नवस।
शालिगर्त्तके उद्धृतास्वाम्रत्तिका
स्वा मिश्यनाउदयत्नुतः शोभो
नसर्गनतः कुर्य्यात् शौचं मूत्र।

पुरीषयोः ॥ शुष्ककाष्ठेन लो
ष्टेना यज्ञीयेन तृणेन वा समा
च्छाद्य शकृत् तिष्ठेत् शिश्नं चैव वि
शेषतः विमृज्य वामहस्तेन शि
श्नमुपविश्य शिरो वेष्टितनासामु
खः सन्ध्यां दिवोदङ्मुखः सदा ।
हृतगन्धिजलैर्दुष्टे सफेने च स
बुद्बुदे तीर्थोदके सलवणे पाथोव
र्णान्तरे तथा समुद्रगानदीवारः
माशङ्के च सकर्द्दमे यवनाम्भ ।
स्रोताम्भः समुद्रगणगोदकम्
धाम्नतेष्वसमसलिले सकीटं च प
रित्यजेत् मानवो देवखाताम्भः
सकले शौचकर्म्मणि ॥ मृदः
सकीटास्तीर्थानां देवायतनगो
ष्ठयोः नदोदपिनदीदेवखातती
रस्थमृत्तिकाः महीतलोद्भवाः
क्षेत्रकज्यपोः सिकताश्रयाः श्मेन
ला धूलिमृदो वल्मीकस्य च कर्द्द
माः ऊषराश्च रथोत्खाता मृत्ति
का भवनस्य च भस्मस्य तुलसीधा
त्री मूलादीनां च या मृदः श्मशा
नभूमेः शैलस्य तथापुतस्याल
स्य च शौचावविष्टमार्गस्य श्मश
तु खाताश्च मृत्तिकाः यत्स्थानस
विप्राणां साधूनामालयस्य च मृ
त्तिकावर्ज्जयेदेता देवपैशौचकर्म्म
णि पवित्रस्थानतो ग्राह्या हादे ।
ईषाग्रस्थोमृदः द्विजैः सकले ।
शौचार्थे शर्करादिविवर्जिताः
प्रथमे लिङ्गिनेवः शौचे कुर्य्यान्मृ
द्विरतः परः पुनर्जलैः पुरीषस्य
यथा गन्धक्षयो भवेत् मृत्तिका
प्रथमा शौचे तदर्द्धप्रसृतिसम्मि
ता द्विप्रसृतिमात्रा तु द्विती
यासम्मिता तथा तृतीया मृत्ति
का शौचे सार्द्धप्रसृतिमृत्तिका चत
र्थ्याद्याक्रमादेव अर्द्धप्रसृतिवर्द्धिता
यया मृत्तिकया शुध्येत् त्रिपर्वशौ ।
चकारिणः अर्द्धप्रसृतिमात्रा ।
सा मुनिभिः परिकीर्त्तिता गुदेद
द्यान्मृदस्तिस्त्रः पञ्च वा सम्भवात ।
था मृदमेकां तथा वामे तिस्रो ।
वा मृत्तिकाद्वयं सव्यवामकरे दद्या
न्मृदस्त्रिशाच्चतुर्द्दश तिस्रो वाह
स्तयोः सप्त च तद्देशच शोऽज्ञया पा
णयोरेकां मृदं दद्यात् वृद्धा तिस्रश्च मृ
त्तिकाः हस्तद्वयनखेष्वेका तिस
श्च षड् मृदस्तथा मैथुने रेतःस
खलने मूत्रोत्सर्गे च मृद्द्वयं दा
यात् लिङ्गस्थपिण्डेनैका तिस्रो वा
मकरे मृदः हस्तेषु मृद्द्वयं भवेत् ।
तिस्रो वा शुद्धितत्परः पदैकैके ।
द्विजस्तिस्रो महीस्थं शौचमाचरे
त् ॥ गृहिणो द्विगुणं शौचं वा
नप्रस्थब्रह्मचारिणाम् गृहस्था
नप्रस्थानां शौचं त्रिगुणमेव च

सन्न्यासिनो वैखानसां शौचं सेवं
चतुर्गुणं ॥ हस्तपादादिपात्रेत
मृद्भिरद्भिश्च गोमयैः दिवा यद्वि
हितं शौचं निशायामर्द्धकं भवेत्
एतदर्द्धमशौचे तु मानके मृतके
पि च चौरादिव्यापिमार्गे शौचम
स्यार्द्धमाचरेत् योषितामेतदर्द्धं ।
तु शूद्रादीनां च नारद व्याधिभि ।
श्चार्त्तरोगार्त्तेरार्त्तो यदि यथाब
लं शौचं कुर्य्यात् तत्कृते यत्र तत् ।
स्मात् शोधयेज्जलैः वेदस्मृतिपुरा
णानि धर्म्मशास्त्राणि नैमित्तिके मै
त्रादिकर्म्मयः कुर्य्यात् विहाय मन्द ।
धीर्द्विजः मतिमज्ञानमायुश्च प्र
ज्ञां हन्ति यशः श्रियं बलमावा ।
रहीनस्य सदा तस्यापवित्रता ॥
स्नातकाश्च द्विजा भूपा वैश्यशूद्रा
स्तजाः स्त्रियः कुर्वन्ति शौचं यत्नेन
यावच्चेतः पवित्रता येषां कुल ।
समनने तथा नामसञ्जल्पने ॥
सदैवस्मरणं भागवतानां साधु ।
सेवकं भक्तिप्रधौतमनसां गोवि ।
न्दार्पितकर्म्मणां वाह्यान्तःकल्म ।
षितानां शुचितानहर्निशं ॥
मृद्दोमयजलैः शौचमनेकैः ।
कुरुते यदि मनो पवित्रताय ।
स कदाचिन्नैव शुध्यति गो ॥
विन्ददासता नास्ति यस्य लोकस्य ।
जन्मनि सोऽपि देहाशुचिः कृत्वा शौ
चं मैत्रादिकर्म्मसु शतधा यदि दे ।
वर्षं शौचं कुर्य्यात् सहस्रधा मृद्वा
रि गोमयैर्लोको भावदुष्टो न शुध्य
ति सदाविलापवित्रत मकार्याभ
वियानवः तस्मात्स्नात्रमैत्रादि ॥
शौचेनैव शुध्यति पर्वताकार ।
कूटैश्च गोविट्सर्वनदीजलैः ॥
शौचं कृत्वा न शुध्येत दुष्टचित्तोभ
वेद्यदि इति पाद्मोत्तरखण्डे ९९
अध्यायः ॥ पुरीषणः पुम्
पुरीषे इति त्रिकाण्डशेषः ॥
पुरीषमः पुम् माषः इति त्रि
काण्डशेषः ॥
पुरुः पुं देवलोकः नृपभेदः त
वययातेः कनिष्ठ पुत्रः परागः
इति मेदिनी ॥ दैत्यः इत्युणा
दिकोषः नदीभेदे त्रि इति शब्द
रत्नावली ॥ प्रचुरे त्रि इत्यम
रः ॥ पुरुकुत्सवः पुं इन्द्र
विष्णुविशेषः ॥ यथा इन्द्रो वि
पश्चिद्देवानां तद्विपुः पुरुकुत्स
सवः नवाम्बरस्तिरूपेण भगवा
न्मधुसूदनः ॥ इति गारु
डे ८० अध्यायः ॥
पुरुदंशकः पुम् हंसः इति

त्रिकाण्डशेषः ॥ ॥
पुरुदंशा स पुं इंद्रः इतिजटा।
धरः पुरुषः पुं पिपर्त्तिपूरय।
तिबलेयः पुर्षुशेतेय इतिवा त
त्पर्य्यायः पुरुषः २ ना ३ नरः ४
पंचजनः ५ पुमान् ६ अर्थाश्रयः ७
अधिकारी ८ कर्म्मार्हः ९ जनः १०
अर्थवान् ११ इतिराजनिर्घण्टः ॥
मनुष्यः १२ मानवः १३ मर्त्यः १४।
मानुषः १५ मनुः १६ इतिशब्दर
त्नावली ॥ रसिकराजः १७
तनकामधामा १८ मदनधाम ॥
कोकः १९ मन्मथशायकलक्ष्यः
२० इतिकविकल्पलता ॥ स
चतुर्विधः यथा शशोमृगोऽथ
वृषाश्वो नृणांजातिचतुष्टयम्
शशादीनांलक्षणं यथा मृदुव
चनसुशीलः कोमलांगः सुके
शः सकलगुणनिधानः सत्यवादी
शशोऽयं १ बहुलिमफरवाणी
दीर्घनेत्रोऽतिभीरुश्चपलमतिसु
देहः शीघ्रवेगोमृगोऽयं २ वा
रुणा बहुबन्धः शीघ्रकामो
नताङ्गः सकलरुचिरदेहः स
त्यवादी वृषोऽयं ३ उदरकठि
कृशः स्थूलकरपदाधरोष्ठो द
शनवदननासाश्रोत्र दीर्घोऽतिवा
जी ४ इतिरतिमंजरी ॥

तस्यपञ्चलक्षणम् यथा ॥
पात्रेत्यागीगुणेरागी भोगीपरिज
नैःसह शास्त्रे बोद्धा रणेयोद्धा।
पुरुषःपंचलक्षणः इतिशाबी।
नाः जितेंद्रियस्यपुरुषत्वं यथा स्त्री
श्रीयौवनमदं कर्ष्यात् सत्वलीला
स्योज्झितः तन्मित्रे यत्रविश्वासः
पुरुषःसजितेंद्रियः इतिगारुडे
९९ अध्यायः ॥ कृष्णभक्त पुरु
षस्य गोविन्द पदाश्रयत्वं यथा
स्त्रियावापुरुषोवापि स्यातनायी
नपुंसकः भक्त्यागणनीयश्चे।
गोविंद पदमाश्रयेत् इतिपाद्मो
त्तरखण्डे ९९ अध्यायः ॥
पुरुषाणां मध्ये उत्तमो यथा ॥
गृहाणामपिसर्वेषां मृज्याःपंच
विशेषितः तेषामाद्यास्त्रयः श्रे
ष्ठा स्तेषांमातास्मृजिता घोभाव
यतियास्मृते येनविद्योपदिश्यते
ज्येष्ठभ्राताचभर्ताच पंचैतेगुरु
वःस्मृताः इतिकौर्मेउपरिभागे ॥
अध्यायः ॥ आत्मा ॥
इत्यमरः सांख्यतत्वज्ञः पुन्ना
ग पादपः इतिमेदिनी ॥
विष्णुः इतिशब्दरत्नावली उ
णी यथा महानितिचयोगेषु प्र
धानस्यैवकथ्यते त्रिगुणाव्यक्ति
विक्ता ॥

सा पुरुषश्चेतिचोच्यते इतिदे
वीपुराणे ४५ अध्यायः ॥ त
स्यपंचविंशतितत्वात्मकत्वं जड
त्वंच यथा एभिःसम्पादितेभुंक्ते
पुरुषःपंचविंशकः ईश्वरेच्छा
वशःसोपि जडात्माकथ्यतेबुधैः
इतिमात्स्ये तत्वकथनावसरे ३
अध्यायः ॥ मेष मिथुनसिंह
तुला धनुःकुम्भराशयः यथा
क्रूरोऽथसौम्यः पुरुषोऽगना
च ओजोऽथयुग्मंविषमःसम।
श्च चरस्थिरद्व्यात्मकनामधेया।
मेषादयोऽमीक्रमशःप्रदिष्टा।
पुरुषग्रहायथा भौमार्कजीवाः
पुरुषाः क्लीवौ सौम्यजभानुजौ
स्त्रीखेटौ भार्गवचन्द्रौ होक्तत् पति
तानुपाद्यते ॥ पुरुषाणि तत्रा
णि यथा हस्तामूलश्रवणपुनर्वसु
मृगशिरस्तथा पुष्यःगभीधानादि
कार्येषु पुन्नामायेगणाःशुभदः
इतिज्योतिस्तत्वम् ॥
पुरुषकं क्ली घोटकानामूर्द्ध
स्थितिः सीखपाँओ इतिहिन्दी
भाषा इतित्रिकाण्डशेषः ॥
पुरुषकारः पुं पुरुषस्यकृतिः
पौरुषं चेष्टा यथा मनुरुवाच
दैवेपुरुषकारेच किंज्यायस्ते।

ब्रवीहिमे अत्रमेसंशयोदेव च्छे
त्तमर्हस्यशेषतः मत्स्यउवाच
स्वमेवकर्म्मदैवाख्यं विद्धिदेहान्त
रार्जितं तस्मात्पौरुषमेवेह श्रे
ष्ठमाहुर्मनीषिणः प्रतिकूलंत
थादैवं पौरुषेणविहन्यते मंग
लाचारयुक्तानां नित्यमुत्थानशा
लिनां येषांपूर्वकृतंकर्म सात्वि
कं मनुजोत्तम पौरुषेणविनाते
षां केषांचिद्दृश्यतेफलं कर्म्म
णाप्राप्यतेलोके राजसस्यतथा
फलं कृच्छ्रेणकर्म्मणाविद्धि।
तामसस्यतथाफलं पौरुषेणा
प्यतेराजन् मार्गितव्यंफलंनरैः
दैवमेवविजानन्ति नराःपौरुष
वर्जिताः तस्मात्त्रिकालसंयुक्तं।
दैवंतुसफलंभवेत् पौरुषंदैवसं
म्पत्त्या कालेफलतिपार्थिव दैवंपु
रुषकारश्च कालश्चमनुजोत्तम त्र
यमेतन्मनुष्यस्य पिण्डितंस्यात् ॥
फलावहं कृषेर्वृष्टिसमायोगाद्दृ
श्यन्ते फलसिद्धयः तास्तुकालेप्र
दृश्यन्ते नैवाकाले कथंचन त
स्मात्सदैवकर्त्तव्यं सधर्म्मंपौरु
षंनृभिः एवंतेप्राप्नुवन्तीह परेला
कफलेफलं लालसाःप्राप्नुवन्ति।
था नचदैवपरायणाः तस्मात्सर्व

प्रयत्नेन पौरुषेयत्नमाचरेत् ।
त्यक्कालमानदैवपरान् मनुष्यानु
द्यानयुक्तान्पुरुषान् हि लक्ष्मीः
अन्विष्य यत्नाद्वृणुते नृपेन्द्र तस्मा
त् सदोत्थानवता हि भाव्यं इति
मात्स्ये दैवपुरुषकारको नाम ।
२१५ अध्यायः ॥ पुरुषत्रा व्य
पुरुषे पुरुषौ पुरुषान् पुरुषे ॥
पुरुषयोः पुरुषेषु देवादेर्द्वीयो
भ्यानिति सूत्रेण त्राच् प्रत्ययनि
ष्पन्नं देवादिस्तु देवमनुष्य पुरुष
मर्त्य बहु इत्यादि इतिमुग्धबो
धटीकायां दुर्गादासः ॥
पुरुषत्वं क्ली पुरुषस्य भावः पु
रुष इतिरसाधारण धर्मः पु
रुष शब्दात् भावार्थे त्वप्रत्यय॥
निष्पन्नं पुं स्त्रीत्व पुरुषदघ्नः त्रि
पुरुषपरिमाणः पुरुषशब्दा
त् परिमाणार्थे दघ्नट् प्रत्ययनि
ष्पन्नः इतिव्याकरणम् ॥
पुरुषदन्तिका स्त्री मेदा इति
राजनिर्घण्टः ॥
पुरुषद्वयसः त्रि पुरुषपरिमा
णः पुरुषशब्दात् परिमाणार्थे
द्वयसट् प्रत्ययनिष्पन्नः इतिव्या
करणे पुरुषद्वेषी न त्रि पुरुषद्वेष
शीलः पुरुषशब्दोपपदाद्द्विष धातो
र्णिन् ॥

प्रत्ययनिष्पन्नः इतिव्याकरणे
पुरुषपुण्डरीकः पुं पुरुषव्या
घ्रः नरश्रेष्ठः इत्यमरः जिनरा
नविशेषः ॥ इतिहेमचन्द्रः ॥
पुरुषमात्रे त्रि पुरुषपरिमाणे
पुरुष शब्दात् परिमाणार्थे मात्रट्
प्रत्ययनिष्पन्नं इतिव्याकरणम्
पुरुषकुञ्जरः) पुं पुरुषश्रेष्ठः
पुरुषनागः } यथा स्यु रुत्तरपदे
पुरुषपुङ्गवः व्याघ्रपुङ्गवर्षभं
ज पुरुषर्षभः) राः सिंह शार्दूलना
पुरुषव्याघ्रः } गाद्याः पुंसि श्रेष्ठा
पुरुषशार्दूलः र्थवाचकाः इत्य
मरः पुरुषसिंहः पुं पुरुषश्रेष्ठ
इत्यमरः जिनराजविशेषः त
त्पर्यायः ॥ शौरिः २ इतिहेम
चन्द्रः पुरुषाद्यः पुम् निकृष्टनरः
यथा नाथे श्रीपुरुषोत्तमे त्रिजग
ता मेकाधिपे चेतसा सेव्येस्वस्य
पदस्य सन्ततिरह्ये नारायणे तिष्ठ
ति यत्र कंचित् पुरुषाधमम
कतिपय ग्रामेश मल्पार्थदम्
मेवार्थेन्नगयामहे नर मेहा मू
ढा वराकावयम् इति शा॥
न्तिशतकम् ॥
पुरुषार्थः पुम् पुरुषस्य
प्रयोजनम् ॥

स च चतुर्विधः यथा धर्मार्थ
काममोक्षाश्च पुरुषार्थाउदाहृ
ताः इत्यग्निपुराणं ॥ गोस्वामि
मते भक्तिः पंचम पुरुषार्थः ॥
पुरुषास्थिमाली न पुं शिवः इ
तिहेमचन्द्रः ॥ पुरुषोत्तमः
पुं विष्णुः इत्यमरः अर्हद्वि
शेषः तत्पर्यायः सोमप्रभः
२ इतिहेमचन्द्रः ॥ पुरुषा
णांमध्ये उत्तमः यथा विशेष
समभावस्य पुरुषस्यानघस्य च
अरिमित्रेष्युदासीने मनोयस्य स
मं व्रजेत् समोधर्मः समः स्वर्गः
समोहि परमंतपः यस्यैवंमा
नसंनित्यं सनरः पुरुषोत्तमः
इतिधर्मपुराणं ॥ पुरुहे ।
त्रि प्रचुरं इत्यमरः पुरुरु त्रि
प्रचुरे इत्यमरटीकायांस्वामी
पुरुहूतः पुं इन्द्रः इत्यमरः
पुरूरवाः न पुं बुधस्यपुत्रः
स च चन्द्रवंशीयादिराजः
तत्पर्यायः बौधः २ ऐलः ३
उर्वशीरमणः ४ इतिहेमचन्द्रः
यथा ततो बुधाच्चमेधापादि
डा रूपाश्रिता सतीबुधेनात्तर
मासाद्य मेथुनायोप मन्त्रि
ता सोम पुत्राद्बुधात्पुरजन् ॥

तस्यां जज्ञे पुरूरवाः जनयित्वात
तस्मात्ते वनःसपुत्रनागगता इत्य
ग्निपुराणं ॥ अपिच इलोदरे च ध
र्मिष्ठं बुधःपुत्रमजीजनत् अश्वमे
धशतं साग्र मकरोद्यः स्वतेजसा
पुरूरवा इतिख्यातः ॥ सर्व
लोकनमस्कृतः हिमवच्छिखरे
रम्ये आराध्यस जनार्दनम् लोके
श्वर्यमगाद्राजा सप्तद्वीपपति
स्तदा केशिप्रभृतयो दैत्या स्तस्य
भृत्यतयागताः उर्वशीयस्यप॥
त्नीत्व मगात् सद्रूपमोहिता सप्त
द्वीपावसुमती सशैलवनकान
ना धर्मेण पालिता तेन सर्व
लोकहितैषिणा चामरग्राहिणी
कीर्तिः स्वयमेवेकागवाहिका वि
ष्णुप्रसादाद्देवेन्द्रो ददावर्द्धासनं त
दा धर्मार्थकामान्धर्मेण सम
मेवाभ्यपालयेत् धर्मार्थकामा
स्तद्दृष्टुं माजग्मुः कौतुकात् पु
रा इतिमात्स्ये २४ अध्यायः ॥
विश्वदेवः इतिजटाधरः पार्व
णश्राद्धदेवः यथा पुरूरवामा
द्रवाश्च पार्वणे समुदाहृतो इति
श्राद्धतत्वे बृहस्पतिः ॥
पुरोगः त्रि अग्रगामी इत्यमरः
प्रधानः इतिहेमचन्द्रः ॥



पुरोगतिः पुम् कुक्कुरः इतिश
[illegible] अग्रगे त्रि पुरोगमः
त्रि अग्रगामी इत्यमरः ॥ पुरो
गामी त्रि अग्रगामी तत्पर्य्यायः
पुरोगः १ अग्रेसरः २ प्रष्ठः ३ अ
ग्रतःसरः ४ पुरःसरः ५ पुरोग
मः ६ इत्यमरः ॥ ॥ पुरो
टिः पुं पत्रफेकारः स्यभाटि इ
ति भाषा इतित्रिकाण्डशेषः
पुरोडाः[स] पुं हविः इतिमुग्धबो
धव्याकरणम् ॥
पुरोडाशः पुं हविर्भेदः सक्तुय
वचूर्णनिर्म्मित रोटिकाविशेषः
पिष्टकचमसी कृतशेषः इतिमे
दिनी सोमरसः इतिहेमचन्द्रः
पुरोडाशीय त्रि पुरोडाशीयं ह
विर्य्याग्य पुरोडाशीयहितं ।
यथा आमिक्षीयं दधिपिक्षीरं पुरो
डाशीयं तण्डोषधम् हविर्हैयंगवी
नं च नाप्नुपयुञ्जन्ति राक्षसाः ॥
इति भट्टिः ॥ पुरोद्भवा
स्त्री महामेदा इतिरत्नमाला
पुरोधाः[स] पु पुरोहितः इत्यम
रः पुरोभागी [न] त्रि दोषमात्र
दर्शी ॥ इत्यमरः अग्रभागी
च पुरोहितः पुं पुरोदृष्टादृष्ट
फलेषु कर्म्मसधीयते ॥

आशैष्यनेय तत्पर्य्यायः ॥ पु
रोधाः २ इत्यमरः ॥ धर्म्मक
र्म्मादिकारकः ३ इतिशब्दरत्ना
वली तस्यलक्षणं यथा वेदवे
दाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्वादवचोयुक्त एव राजपु
रोहितः इतिचाणक्यः ॥ तस्यव
र्ज्जनीयलक्षणम् यथा कानेयो
गमशुद्धे वानभिज्ञमजितेन्द्रियं
नकुर्य्याद्याचितेवापि नृपः कर्य्या
त्पुरोहितम् इतिकालिकापु
राणम् ॥ पुरोहिते वर्णनीया
नि यथा पुरोहितो हितोवेद
स्मृतिज्ञः सत्यवाक्शुचिः ब्रह्म
ण्यो विमलाचारः प्रतिकर्त्तापदा
मृत्नः इतिकविकल्पलता ॥
सर्व्व हर्म्मे हर्णी करतो इति
कविकल्पद्रुमः ॥
पुल शा महत्त्वे इतिकविकल्पद्रुम
पुलत महत्त्वे इतिकविकल्प
द्रुमः पुलक उच्छ्रितौ इति
कविकल्पद्रुमः ॥ पुलः पुं
पुलकः विपुले त्रि इतिमेदि
नी ॥ पुलकम् क्ली कङ्कु
ष्ठं तच्च पर्व्वतीय मृत्तिकाविशे
षः इतिराजनिर्घण्टः ॥ पुल
कः पुं रोमाञ्चः तत्पर्य्यायः

रोमोद्भेदः २ त्वक्पुष्पं ३ तनू
रुहः ४ इतित्रिकाण्डशेषः ॥
शरीरान्तर्बहिर्भव कीटः इति
हेमचन्द्रः ॥ प्रस्तर विशेषः
तस्यपरीक्षा यथा पुलोपभ पा
र्वतवरेषु च निम्नगासु स्थाना
न्तरेषु च तथोत्तरदेशजातान् ।
संस्थापिताश्च नखरान्भुजगेः प्र
काशेसंसृज्य दानवपतिं प्रथि
तेषु देशो दाशार्णवागदवमे
कलकालगाद्रौ गङ्गागतेदौ
हु मृणालवर्णाः गन्धर्व्व ॥
ह्निकदली सहशावभासा पा
तेषु शाल्ला:पुलकाः प्रसूताः
गोत्राभ्रमरांगार्कविचित्रभङ्गा
भ्रूदेकपेताः परमाः पवित्राः
मंगल्ययुक्ता बहुभक्तिचित्रा वृ
द्धिप्रदास्ते पुलका भवन्ति काक
श्वारासभसृगालवृकोग्ररूपैः गृध्रैः
समांसरुधिरार्द्रमुखैरुपेताः ।
मृत्युप्रदास्ते विबुधा परिवर्ज्ज
नीयाः मूल्यं पलस्यकथितञ्च
शतानि पंच इतिगारुडे ७७ ॥
अध्यायः ॥ मणिदोषविशे
षः हरिताले गजान्नपिण्डे ग
र्व्वविशेषः इतिमेदिनी अस्त्रा
णी गन्धर्व्वः इतिहेमचन्द्रः ॥
पुलकी [न] पुं धारणकदम्बः इति
राजनिर्घण्टः ॥

पुलस्तिः पुं पुलस्त्यमुनिः इत्यु
णादिकोषः ॥ पुलस्त्यः पुं
सप्तर्षीणां मध्ये ऋषिविशेषः
इतिशब्दरत्नावली सब्रह्मणः
कर्णाभ्यां जातः तस्यभार्य्याहवि
र्भूः कर्द्दमकन्यातस्यपुत्रः अगस्त्यः
विश्रवाश्च इतिश्रीभागवतम् ॥
पुलहः पुं सप्तर्षीणांमध्ये ऋषि
विशेषः इतिशब्दरत्नावली ॥
सच ब्रह्मणोनाभितो जातः तस्य
भार्य्याकर्द्दममुनिकन्या गतिः त
स्यपुत्राः कर्म्मश्रेष्ठः वरीयान् स
हिष्णुश्च इतिश्रीभागवते ॥
पुलाकः पुम् तुच्छधान्ये आग
ड्डा इतिख्याते संक्षेपः अस्रावे
भक्तसिक्थके भक्तपुलिका ।
इसमरभरतौ क्षिप्रे यथा पुलाक
कारी इतिस्वामी पुलाकी [न] पुं
वृक्षः इतिहेमचन्द्रः पुलायि
तम् क्ली अश्वगतिः तत्पर्
य्यायः ॥ विक्रान्तिः २ इ॥
तित्रिकाण्डशेषः ॥
पुलिनम् क्ली तोयोत्थितत
टम् चर इतिचड़ा इतिचभाषा
इत्यमरः ॥ जलादचिरोत्थितं
तटम् इतिभरतः तत्तल्लक्षण॥
तोयपुलकद्वीपे इतिसुभूतिः

क्रमेणोत्थिते तटे इति स्वामी।
जलमध्यस्थस्योत्थितम् तटे इति
पञ्जिका। द्वीपम् इति त्रिकाण्ड
शेषः ॥ पुलिन्दः ॥ पुं,
चण्डालभेदः। स च म्लेच्छशब्दवा
च्यः इत्यमरभरतौ ॥ अस्योत्प
त्तिर्यथा पुलस्त्य उवाच पवेग।
तेषु त्रैलोक्यं दानवेषु पुरन्दरः।
जगाम ब्रह्मसदने सह देवैः शा
चीपतिः तत्रापश्यत् स देवेशो।
ब्रह्माणं कमलोद्भवं ऋषिभिः
सार्द्धमासीनं पितरं स्वं च कश्यप
पं ततो ननाम शिरसा शक्रः सु
रगणैः सह ब्रह्माणं कश्यपं।
चैव तांश्च सर्वांस्तपोधनान् प्रो
वाचेन्द्रः सुरैः सार्द्धं देवनाथोऽपि
नामहम् पितामह कृते राज्यं वः
लिना बलिना मम ब्रह्मा प्रोवाच।
शक्रैतत् भुज्यते स्वकृतं फलम्
शक्रः पप्रच्छ भो ब्रूहि किं मया
दुष्कृतं कृतम् कश्यपोऽप्याह दे
वेश भ्रूणहत्या कृता त्वया दि
त्सदनायया गर्भः कृतो वै बहु।
धा बलात् पितरं प्राह देवेन्द्रः।
मातुर्दोषेण सो विभो कर्तने ॥
प्राप्तवान् गर्भो यदशौचा हि साऽभ
वत् ततोऽब्रवीत् कश्यपस्तं मातु

र्दोषे सदा सतो गतस्ततो विनि
हतो दोषोऽपि कुलिशेन भोः ॥
तच्छ्रुत्वा कश्यपवचः प्राह शक्रः
पितामहम् विनाशे पाप्मनो ब्रू
हि प्रायश्चित्तं विभो मम ब्रह्मा।
प्रोवाच तं देवं वशिष्ठः कश्यप
स्तथा हितं सर्वस्य जगतः श
क्रस्यापि विशेषतः शङ्खचक्र
गदापाणिं माधवं पुरुषोत्तमः
तं प्रपद्यस्व शरणं स ते श्रेयो वि
धास्यति सहस्राक्षोऽपि वचनं
गुरूणामनिशाम्य वै प्रोवाच।
स्वल्पकालेन कस्मिन् प्राप्यो व
हृदयः नासौ चतुर्देवतामर्त्ये स्व
ल्पकाले बहूदयः इत्येवमुक्तः
सुरराडिति विना मरीचिपुत्रेण
च कश्यपेन तथैव मित्रावरु
णात्मजेन वेगात् महीपृष्ठमवा।
प्यतस्मिन् कालेन वस्यातवतः सु
कन्यस्तथा हिमाद्रेरपि दक्षिण
स्यां कृपास्थलात् सर्वे पवि
त्रतो वसोद्भवात् पश्चिमतो व
नेष्वा यत्राथ चक्रे भगवान्।
सुपादि वीस्ताश्रम मत्रक तत्रस्व
मूर्तिः ख्यातिं जगाम याघगदाध
रेति महाश्च सन्दर्य पितः कुठारः
यस्मिन् हि जेन्द्राः श्रुतिशास्त्रसंपु
नाः समानमाया नि पितामहेन

महत् पित्रा न यत्र च से मह्
म भक्त्या त्वनन्येन हि चेतसे।
व फलं महामेध्य मावस्यामा।
नवा लभन्मनन्तो भगवत् प्र।
सादात् महानदी यत्र सवर्षि।
कन्या वालाम्पदेशा हिमशैल
मेत्य चक्रे जगत्पापविनष्ट
मर्गं सन्दर्शनप्राशनमज्जने।
न तत्र शक्रः समभ्येत्य महा
नद्यास्तटेद्रुते आराधनाय दे
वस्य कृत्वाश्रममवस्थितः ॥
प्रातःस्नायी त्वधःशायी ए।
कभक्तिर्हियाचिता तपस्तेपे
सहस्राक्षः स्तवन्देवं गदा।
धरं तस्यैवं तप्यतः सम्यक्
जितसर्वेन्द्रियस्य च कामक्रो
धविहीनस्य मासाः सप्त तत्स
र्वेगतः ततो गदाधरः प्रीतो।
वासवं प्राह नारद गच्छ प्रीतो
ऽस्मि भवतो शक्र पापोऽसि।
साम्प्रतं निजराज्यं च देवेश।
प्राप्स्यसि त्वचिरादिव षितिष्या
मि यथा शक्र मा विश्रेयो यथा
तव इत्येवमुक्तोऽथ गदाधरेण
विसर्जितः स्नात्वा मनोहरायां
स्नातस्य देवस्य ततः शरस्तात् संभे
पुरुषाननुशासनस्य प्रोवाच ता
न् भीषणकर्मकारान् नाम्ना।
पुलिन्दा मम पापसम्भवाः ॥

वमधमेवोत्तरमद्रिमुख्ययोर्हिमाद्रि
कालञ्जरयोः पुलिन्दाः इत्येव
मुक्त्वा सुरराट् पुलिन्दान् विमु।
क्तपापः स्वरक्षिहृष्टचेताः सेहञ्ज्य।
मानोऽनुजगाम चाश्रमे मातु।
स्तस्याथ मनिवासमाये इति वा
मने २६ अध्यायः ॥ पुलो।
मजा स्त्री शची इत्यमरः ॥
पुलोमजित् पुं इन्द्रः इति केचि
त् पुलोमद्विट् पुं इन्द्रः इति
हेमचन्द्रः ॥
पुलोमभित् पुं इन्द्रः इति भूरि
प्रयोगः ॥ पुलोमा न् पुं।
असुरविशेषः स इन्द्रस्य श्वशुरः
इति पुलोमजा शब्दटीकायां।
भरतः ॥ पुलोमारिः पुं इन्द्रः
इति त्रिकाण्डशेषः ॥
पुष प ओ ई अप्रैतो पोषणे ॥
इति कविकल्पद्रुमः ॥
पुष ग पुष्टौ इति कविकल्पद्रु
मः पुष क पुष्टौ इति कविकल्प
द्रुमः पुषा स्त्री लाङ्गलिकी
वृक्षः इति शब्दचन्द्रिका ॥
पुषितं त्रि पुष्टं कृतपोषणम्।
इति मृगादि इत्यमरः ॥ पुष्करं
क्ली हस्तिशुण्डाग्रं वाद्यभाण्ड।
मुखं जलं व्योम खड्गफलम् ॥
पद्मं तीर्थभेदः ॥



कुष्ठौषधं इत्यमरः स्वर्गकोषः ॥
इति तट्टीकायां भरतेशः का-
ण्डः द्वीपभेदः इति मेदिनी पुष्टे
इति नानार्थरत्नमाला ॥
पुष्करतीर्थन्तु मत्स्यपुष्टे ब्रह्मणा
कृते अर्फनाख्यानमेवाख्ये देशे स्थि-
ते तस्य नामान्तरं कूपतीर्थं २ मु-
खदर्शनम् ३ तत्र ज्येष्ठपुष्करमध्य-
मपुष्करकनिष्ठपुष्करनाम्ना त्र-
योहृदाः तस्यपरिमाणं शतयो-
जनमण्डले इति पद्मपुराणम् ॥
पुष्करः पुं रोगविशेषः नागवि-
शेषः सारसपक्षी नृपभेदः स-
नलराजभ्राता वरुणपुत्रः इति
मेदिमेदिनी ॥ सप्तद्वीपानां-
मध्ये द्वीपविशेषः पर्वतविशे-
षः इति शब्दरत्नावली ॥
पुष्करद्वीपवर्णनं यथा सूतउ-
वाच शाकद्वीपस्यविस्ताराद्द्विगु-
णेनसमन्ततः क्षीरार्णवं समावृ-
त्य द्वीपः पुष्करसंज्ञितः एकए-
वात्र विप्रेन्द्राः पर्वतो मानसोत्त-
रः योजनानां सहस्राणि चोर्द्ध्वं
पञ्चाशदुच्छ्रितः तावदेव च
विस्तीर्णः सर्वतः परिमण्डलः
सप्तद्वीपो यस्मादं मानसोत्त-
रसंज्ञितः ॥ एकएव महासा-
नुः सन्निवेशाद्द्विधा ॥

कृतः तस्मिन्द्वीपे स्मृतौ तौ देशौ पु-
ण्यौ जनपदौ शुभौ अपरौ मानसो-
त्तरस्याथ पर्वतस्यानुमण्डलौ महा-
वीतं स्मृतं वर्षं धातकीखण्डमेव
च स्वादूदकेनोदधिना पुष्करः
परिभावितः तस्मिन्द्वीपे महा-
वृक्षो न्यग्रोधोऽमरपूजितः ॥
तस्मिन्निवसति ब्रह्मा विश्वात्मा
विश्वभावनः तत्रैव मुनिशार्द्दू-
लाः शिवनारायणालयम् व-
सत्यत्र महादेवो हरार्द्धो हरिर-
व्ययः संपूज्यमानो ब्रह्माद्यैः कु-
माराद्यैश्च योगिभिः गन्धर्वैः कि-
न्नरैर्यक्षै रीश्वरः कृष्णपिङ्गलैः
स्वस्थास्तत्र प्रजाः सर्वा ब्राह्म-
णाः शकवर्चसः निरामयाः
विशोकाश्च रागद्वेषविवर्जिताः
सत्यानृते न तत्रास्तां नोत्तमाधम-
मध्यमाः न वर्णाश्रमधर्माश्च
न नद्यो न च पर्वताः परेण पुष्क-
रस्याथ समावृत्य स्थितो महान्
स्वादूदकः समुद्रस्तु समन्ताद्द्विज-
सत्तमाः परेण तस्य महती दृश्य-
ते लोकसंस्थितिः इति कौर्मे
४७ अध्यायः पुष्करद्वीपस्य
राजा तस्य रवः यथा लोकेश्व-
रः सोपरभिरुतीन्द्रै र्दैवैः सहेन्द्रे
रवयलचारी द्वीपप्रभेश्वरपज-
नेहपते ॥

उवास राजा सत्तपुष्करस्थः ।
तेनैव नाम्ना सत्तपुष्करोऽपि स-
दोद्यते देवगणैः समिद्धैः तेनैव
यानेन तथाम्बुगेन वभूव नांना
तमथाख्ययन्ति इत्यग्निपुराणं
ब्रह्मकृततीर्थविशेषः तस्य ना-
मान्तरं कूपतीर्थं २ मुखदर्शनं ३
तत्र ज्येष्ठपुष्कर मध्यमपुष्कर
कनिष्ठपुष्करनामकास्त्रयो हृ-
दाः तस्यपरिमाणं शतयोजन-
मण्डले इति पद्मपुराणं ॥
मेघनायकविशेषः तत्प-
रिज्ञानं यथा त्रिपुरे शाकवर्षे
तु वह्निभिः शोषिते क्रमात् भ्रा-
वर्तविद्युत्सम्बर्त पुष्करद्रोणसं-
ज्ञके इति ज्योतिस्तत्त्वं ॥ तस्य
फलं पुष्करे पुष्कर वा विशस्यद्दी-
नाव स्वन्यदा विश्वोपहतालोकाः
पुष्करे जलदायिपे इति ज्योतिषं
क्रूरवार भद्रातिथि भमपादनक्ष-
त्रघटिताशुभजनक योगविशे-
षः यथा पुनर्वसूत्तराषाढाकृ-
त्तिकोत्तरफल्गुनी पूर्वभाद्रवि-
शाखाश्च रविभौमशनैश्चराः द्वि-
तीया सप्तमी चैव द्वादशी तिथि-
रेव च एतेषामेकदा योगे भवती-
ति त्रिपुष्करः जातेन जातनाशो-
गे मृते भवति पुष्करः त्रिगुणफल-
दो

दैवो नष्टे कृते मृते तथा प्रथमे मा-
सि वर्षे वा कुटुम्बमपि पीडयेत्
देवोऽपि यदि वा रक्षेत् तस्य पुत्रो
न जीवति ॥ अतस्तद्दोषशान्त्यर्थं
होमयेद्युतत्रयः प्रशान्तश्च सु-
वर्णादि दानं कुर्याद्यथाविधि स-
मर्थश्चेद् ब्राह्मणे स्थितो क मधु-
त होमादिकं कुर्यात् वाक्यं यथा
श्रीविष्णुः ॐ तत् सदद्यामुकेमा-
स्यमुकपक्षेऽमुकतिथौ अमुक-
गोत्रः श्रीअमुकदेवशर्म्मा अमुक-
गोत्रस्य प्रेतस्यामुक देवशर्म्मण-
स्त्रिपुष्करयोगकालीनमरणज-
न्यदोष शमनकामः इदं काञ्चनं
श्रीविष्णुदैवतं यथा सम्भव गो-
त्रनाम्ने ब्राह्मणायाहं ददे तत्रोद-
क्षिणां दद्यात् अन्यत्र सुजाहोम-
कर्म्मणी कविष्ये इति विशेषः
एतत् सर्वमशौचेऽपि कर्त्तव्यं य-
था दक्षः सूत्यकाले तिदं सर्वं सू-
तकं परिकीर्त्तितम् आपद्यतस्य
सर्वस्य सूतकेपि न सूतकं इ-
ति शुद्धिकारिका ॥ अपिच
पुनर्वसूत्तराषाढा कृत्तिकोत्तर-
फल्गुनी पूर्वभाद्रविशाखा च ।
एतेतेषु त्रिपुष्करः द्वितीया स-
प्तमी चैव द्वादशी तिथिरेव च श-
निभौमौ रविश्चैव वारश्चैते त्रिपु-

ष्कराः एते त्रिंशच्छुक्रा ज्ञेयास्तथा
द्वादशमासिके द्विमासे च तथा
मासे पञ्चमासे च चतुर्थके षोड॥
शे मासि संप्राप्ते कुर्य्यात्पीडयेद्ध्रुवं
श्वं तेषु यातेष्वेव शुक्रो हन्ति
नान्यथा तद्दोषशमनार्थं तु हो
मयेद्दशशतं तु यः तिलव्रीहियवा
श्चैव कृत्वाज्येन समन्नन्तथा तीरे
णैव तथाचार्य्यो जकुर्य्याच्छक्ति
भावतः चरुं च श्रपयेत्तत्र मा
ते कुर्य्याद्वलिन्तथा वैकैका
दुम्बराश्वत्थैः प्रत्येकाष्टोत्तरं
शतं एकैकं त्रिविंशपुत्रे दर्भे
न परिवेष्टितं यमाय वैकैकतेन
धर्म्माय योडुम्बरेण च अर्च्चयेत्तथिः
त्रयमाय जकुर्य्यात्क्रमशस्त॥
था तद्दत्तहुततिलांश्चैव तथा
समिधमेव च एकीकृत्य समे
सर्वं चरुमाश्रित्य होमयेत् य
वव्रीहितिलैर्युक्तं तण्डुलैश्च
येत्वहं दधिमध्वाज्यसंयुक्तं होमः
सहस्रसंख्यया वैकोकोडुम्बराश्व
त्थै होमयेद्विधिपूर्वकं यमस्य
स्मिविंशगुप्ते शुक्रपूजनतथा ति
थिवारं तथास्तं पूजयित्वा तु हो
मयेत् पञ्चवर्णेन चूर्णेन कुर्य्याद्वि
पद्ममण्डलं यमस्य मित्रगुप्ते
स्थापयेत्क्रमशस्ततः तिलमह
रिते पात्रे॥

लौहे वक्रस्य वा समावेष्टयित्वा
यमे तत्र स्थापयेल्लौह निर्म्मिते
हुते महारिते पात्रे कांस्यपात्रे।
निरंजने रौप्याकृति शुक्रवस्त्र
वेष्टितेन तत्र पूजयेत् गुडमहारिते
पात्रे ताम्रपात्रे च मत्रिणे स्वर्णा
कृति रक्तवस्त्र वेष्टितेन तत्र पूज
येत् क्षीरमहारिते पात्रे मृन्मय।
पात्रे च शुक्रे कृष्णाकृति कृष्ण
वस्त्र वेष्टितेन तत्र पूजयेत् सर्वाण
तस्मर्ड्वा अथवा शक्तिभाव
ता प्रतिमाश्च समाः सर्वाः क्र।
मात्तत्र नियोजिताः व्रीहीयवैस्त
थाधान्ये क्रमात्पात्रत्रयन्ततः
नूतने चक्रमात्पीठे स्थापयेद्वि
धिपूर्वकं मण्डलस्य चतुर्दिक्षु
चतुःकुम्भांश्च स्थापयेत् दधिगु
डक्षीरपूर्णान् प्रत्येकस्य समन्ततः
ततः अथवा तन्मलदेशस्य च
त पल्लवांस्तथा पीतवस्त्रेण।
संयुक्तं कुर्य्यात्तुर्हचतुष्टये चन्द्रा
तपं तदुपरि विचित्रे परिकल्पिते
कुम्भानां च चतुःपार्श्वे यवतिलै
र्युक्तं तण्डुलान् स्थापयेद्बुधः क्रमा
त्तत्र स्नाकाले द्विजोत्तमाः मंड
लस्य तथा पूर्वे वाक्पोत्तरस्यर्पये।
तत्ता देवान्गणेशादीन् महेशी
श्च समर्चयेत् कृत्वा यथाक्रमं त।
त्र बलिं॥

दद्याद्विजेभ्यः पयोघृतेनक्षी
रेण स्नापयित्वा यथाक्रमं स्वेन
स्वेनैव मन्त्रेण पूजयित्वा च होम।
येत् एवंविधिप्रकारेण यः शान्ति
न्न होमयेत् शुक्रारिष्टदोषस्तु
च तस्य नान्यथा भवेत् सम्वत्सरेण
थापूर्णे षोडशमासिकेन तथा ष
ण्मासाभ्यन्तरेणास्य स्वतहानिर्वि
निर्दिशेत् अथवा स्वामिनं हन्ति
द्वितीये भ्रातरं तथा तृतीये सर्व।
हानिः स्यात् सतवित्तविनाशने
प्रेतारिष्टविनाशाय यमादीन्।
येन होमयेत् सर्वाणि तस्य नश्य
न्ति गोमहिषादीनि सर्वतः एवं
विधिकृते होमे यः कर्म्म सम्भो।
भवेत् होमं कृत्वा यथाशक्त्या ये
नु मेकां प्रदापयेत् अस्मिन्कृते न
सन्देहः प्रेतारिष्टेन पीडयेत् न वि
घ्नाय जमानस्य न चारिष्टं प्रजाय
ते एतद्धोमे विनिर्दिष्टं पत्नी यो
न करोति यः तस्य तिष्यमस्य।
एतिर्मासेश्च वैशाखे स्ततोभ्राता
था जाया पतिः श्वशुरएव च मा।
ता पितास्वसा वापि पितृव्याभ
गिनीपतिः ज्येष्ठभ्राता पतिश्चा
पि स्वामी चापतिमेव च एकैके
वर्षसंपूर्णे कुर्य्यात्पीडयेद्ध्रुवम्
षोडशे॥

मासि संपूर्णे वान्धवान् परिपीडयेत्
त् वान्धवानामभावे च वालहा।
हा न जीवति त्रिशुक्रे तथा दोष
यः शान्तिं न होमयेत् देवता यदि।
वारेतेन तस्य पुत्रो न जीवति या।
नकिं विहानमुत्सृज्य शुक्रो भवति
मानवः तस्य तिष्यमस्य यदि।
होमं न कारयेत् तस्मात् विधिप्र॥
कारेण शुक्रारिष्टशान्तये यमेश
स्मिं चित्रगुप्ते पूजयित्वा च होमयेत्
मण्डले च टमारोप्य पूजयित्वा य।
थाक्रमं विधिपूर्वं तथा कृत्वा सो।
तेदद्याद्वलिं बुधः प्रभाते च तथा
रात्रौ श्रेष्ठो चान्तदिने तथा श्राद्धा।
र्थ्यश्च प्रकुर्वीत सप्तमयेच्च चरुन्ततः
विभक्तत्रियपयोर्द्वयोः पिष्टैर्वैष्णवस्य
निर्म्मितं शूद्रस्य गोमयेनापि प्रति
मां दापयेत्ततः दत्वा मधुघृताक्तं च
चरुं पश्चाच्च दापयेत् ततो विप्रः प्र
योतस्यात्ततो होमं समापयेत्
संकल्पविधिना पूर्वं वस्त्रयुग्मेन
यत्नतः आचार्य्यं हरणयानं च पा।
श्वाहटिकं मेव च इति वराहसंहि
तोक्त शुक्रशान्तिप्रमाणम्॥
शुक्रकणिका स्त्री स्थलपद्मि
नी इति शुक्रनना डी॥ अति।
राजनिर्घण्टः॥ शुक्रमूलं॥

स्त्री पुष्करदेशप्रसिद्धौषधिविशेषः अस्य स्थाने कुष्ठं योजयन्ति तत्पर्य्यायः मूलं २ पुष्करम् ३ पद्मपत्रकं ४ पुष्करिणी ५ वीरं ६ पौष्करम् ७ पुष्कराह्वयं ८ काश्मीरं ९ ब्रह्मतीर्थं १० श्वासारिः। ११ मूलपुष्करम् १२ पुष्करजटा १३ पुष्करशिफा १४ अस्य गुणाः कटुत्वं तिक्तत्वं उष्णत्वं कफवातज्वरश्वासारोचककासशोफपाण्डुनाशित्वञ्च इति राजनिर्घण्टः विशेषात् पार्श्वशूलनुत् इति भावप्रकाशः॥

पुष्करमूलकम् क्ली कुष्ठवृक्षस्य मूलम् इति त्रिकाण्डशेषः॥

पुष्करशिफा स्त्री पुष्करमूले। इति राजनिर्घण्टः॥

पुष्करस्रजौ पुं अश्विनीकुमारौ द्विवचनान्तोऽयं इति शब्दरत्नावली॥ ॥

पुष्कराह्वः पुं सारसपक्षी। इत्यमरः॥

पुष्कराह्वयम् क्ली पुष्करमूलम् इति राजनिर्घण्टः॥

पुष्करावर्त्तः पुं मेघः यथा पुष्करावर्त्तनिमग्नोऽहं मायाविज्ञानसागरे त्राहि मां देवदेवेश त्वत्तो नान्योऽस्ति रक्षिता इति तिथ्यादितत्त्वम्॥

पुष्करिणी॥ स्त्री स्थलपद्मिनी पुष्करमूलम् इति राजनिर्घण्टः॥ हस्तिनी सरोजिनी जलाशयः इति मेदिनी शतधनुःपरिमितसमचतुरस्रजलाधारः पुकुर इति पोखरि इति च भाषा तत्पर्य्यायः॥ खातं २ इत्यमरः जलकूपी ३ इति जटाधरः पौष्करिणी ४॥ इति शब्दरत्नावली॥ मात्र त्रिएणात्रयता कार्य्या यथा॥ कूपवापी पुष्करिण्यादीर्घिका द्रोणएव च तडागः सरसी चैव। सागरश्चाष्टमो मतः महिर्जलाशयः कार्य्या यत्नायाम्योत्तरायनः इति कृत्यतत्त्वे वायुपुराणे तस्या लक्षणं यथा पुष्करिणी तडागादौ वशिष्ठसंहिता चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुष्करः। शतधन्वन्तरं चैव तावत्पुष्करिणी मता पञ्चत्पञ्चगुणैः प्रोक्तस्तडाग इति निश्चयः तेन चतुर्द्दश विंशति हस्तान्न्यूनता यावतः शतहस्तान् नाभ्यन्तरेण पुष्करिणी पुनर्जलाशयाधार परं तत्र पञ्चविंशं शतेन धनुर्भिः पुष्करिणी इति॥

न्यवर्द्धमान एतौ वशिष्ठः तत्करणे वास्तुयोगः कर्त्तव्यः महाकपिलपञ्चरात्रे जलाधारश्चार्थञ्च यजेद्वास्तुविशेषतः। अलाधादितिपर्य्यन्ताः पञ्चाशत्त्रयसंयुताः सर्व्वेषां किल वास्तूनां नायकाः परिकीर्त्तिताः असंपूज्य हि तान् सर्व्वान् प्रासादादीन कारयेत् अनिष्टानिर्विनाशः स्यादुभयोर्धर्म्मिणोः अलाधादितिपर्य्यन्ता इति कल्पतरुदेवीपुराणोक्तैशादि कल्पपदव्यवच्छिद्यते धर्म्मधर्म्मिणोस्तडागादि तत्कर्त्रोः आरम्भदिने तत्करणेऽन्त्सर्व्वादिने प्यादौ तत्करणं यथा प्रासादभवनोद्यान आरम्भे परिवर्त्तने पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये वास्तूपशमनं कृत्वा ततः सूत्रेण वेष्टयेत् वास्तुप्राकारकं। वीणा सूत्रवाहारो भविष्यति इति मत्स्यपुराणे पुरवेश्मप्रवेशेषु। तडागस्थानेषु ऐशानकवचने प्रासाद धर्म्मातिदेशात् अत्र वाप्यादि प्रतिष्ठा दिनेपि वास्तुयागकरणं॥ तदारम्भनक्षत्रादि दीपिकायां पुष्यामित्रकरोत्तरत्नवरुण ब्रह्माम्बुपित्र्यैन्द्रसुभैः शस्ते। कैः शुभयोगवारतिथिषु कूपेषु वीर्य्येषु च॥

पुष्येन्द्रो जलराशिगे दशमगेऽप्युक्ते शुभांशोदये आरम्भः सलिलाशयस्य शुभदो जीवेन्दुपुत्रोदये पुष्या रोध्या हस्तोत्तरात्रय धनिष्ठाशतभिषा रोहिणी पूर्व्वाषाढा मघा मृगशिरोभिर्भैः मात्स्यचन्द्रादिसबले लब्धालग्ने शुभमितीरितम् सम्माकूर्म्मापादिकर्त्तव्य मङ्गत्रय विवर्ज्जयेत् अश्विनीरोहिणीमूलमुत्तरात्रयमैन्द्रवं स्वातीहस्तानुराधाच गृहारम्भप्रशस्यते वज्रव्याघातशूले च व्यतीपातातिगण्डयोः विष्कम्भगण्डपरिघ वर्ज्जयो। गेहकारयेत् आदित्यभौमवर्ज्जं तु सर्व्ववाराः शुभावहाः प्रासादेष्वेवमेवस्यात् कूपवापीषु चैव हि ज्योतिषे ज्योतिषेत्युक्तो ज्येष्ठगोबल्लि। वासे इत्यभिधाय प्रतिष्ठारम्भणे देवकूपादे वर्ज्जयन्ति हि उत्सर्ग फलमाह कपिलपञ्चरात्रे संत्ते पात्र प्रवक्ष्यामि जलदानफलं शृणु पुष्करिण्यादिदानेन विष्णुः। प्रीणाति विश्वसृक्॥ जलाशयकरणार्थभूमिदानफलमाह चित्रगुप्तः जलाशयार्थं योदद्यात् वारुणं लोकमाप्नुयात् भूमिमिति शेषः॥ तत्प्रतिष्ठाकालमाह मत्स्यपुराणम्॥

शृणु राजन्महाबाहो तडागा
दिषु यो विधिः चैत्रे वा फाल्गु
णे वापि ज्यैष्ठे वा माधवे तथा मा
घे वा सर्वदेवानां प्रतिष्ठा शुभदा
भवेत् प्राप्य पक्षं शुभं शुक्लं अती
ते चोत्तरायणे पुण्येऽह्नि विप्रक
थिते कृत्वा ब्राह्मणवाचनं अ
तीते ग्रहणे तथा च प्रतिष्ठा समु
ये माघे वा फाल्गुणे वापि चै
त्रे वैशाखयोरपि ज्यैष्ठाषाढ
कयोर्वापि ग्रहणे चोत्तरायणे ब्रा
ह्मणवाचने पुण्याह स्वस्तिक
दिवाचने । पंचमी च द्वितीया च
तृतीया सप्तमी तथा दशमी पौ
र्णमासी च तथा श्रेष्ठा त्रयोद
शी आसु प्रतिष्ठा विधिवत् कृ
ता वक्षः फला भवेत् आषाढे
द्वे तथा मूल उत्तरा त्रयमेव च
ज्येष्ठा श्रवण रोहिण्यः पूर्वभाद्र
पदा तथा हस्ताश्विनी रेवती च
पुष्यो मृगशिरस्तथा अनुराधा
तथा स्वाती प्रतिष्ठादिषु श
स्यते । बुधो बृहस्पतिः शुक्रः त्र
य एते शुभावहाः एतन्निरीक्षिते
लग्ने नक्षत्रे च प्रशस्यते ग्रहता
राबले लग्नाः ग्रहणोक्तविधाय
च निमित्ते सकले ज्ञात्वा वर्जे
येत्वाङ्गुकादिकं शुभम् ॥

योगे शुभग्रहे क्रूरग्रह विवर्जि
ते लग्ने अस्ते च कुर्वीत प्रतिष्ठा
दिकमुत्तमं । अयने विषुवे तद्व
त् षडशीतिमुखे तथा एतेषु स्था
पनं कार्यं विधिदृष्टेन कर्मणा
भविष्ये प्रतिपच्च द्वितीया च तृती
पंचमी तथा दशमी त्रयोदशी चै
व पौर्णमासी च कीर्त्तिता सोमो
बृहस्पतिश्चैव शुक्रश्चैव तथा बु
धः एते सौम्यग्रहाः प्रोक्ताः प्रति
ष्ठायागकर्मणि । प्रतिष्ठादिका
दे व्यवहारसमुच्चयः कृत्यपद्मे
च पंचम्यां सप्तम्यां चैव शस्यते ।
दीपिकायां उत्तरात्रिशक्रभगदेव
तवासवेषु सौम्यानिलेशमघ
रोहिणि मूलहस्ते पौष्णानुराध
हरिभ पुनर्वसौ च कार्याभिषे
कतरुभूतपतिप्रतिष्ठा वास्तवेष्म
निष्ठा ईशार्द्रा आर्द्रश्याचैव सौ
भाग्यमिति प्रतिष्ठासारसमुच्चया
त् वापीप्रादीनां प्रतिष्ठाभिधा
नात् शूद्रस्याधिकारमाह जा
तुकर्णः वापीकूपतडागादि दे
वतायतनादि च अन्नप्रदानमारा
मः पूर्तमित्यभिधीयते अग्नि
होत्रं तपः सत्यं वेदानामनुपाल
नम् आतिथ्यं वैश्वदेवश्च इष्ट
मित्यभिधीयते ॥

ग्रहोपरागे ग्रहणे पूर्त्तमित्यभि
धीयते इष्टापूर्त्ते द्विजातीनां ध
र्म्मः सामान्य उच्यते अधिकारी
भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके
वैदिके वेदाध्ययनसाध्ये अग्नि
होत्रादाविति रत्नाकरः एवं
स्त्रीणामपि पूर्त्ताधिकारः यथा
नारीमनुपूर्त्तौ बृहस्पतिः पित्र
र्थं कृते द्विज्ञान भर्तुः स्वस्ती
यमात्मलात् एवयेत्कब्र
स्त्रीभ्यो वृद्धानाथानिर्धीतिवः
अस्य पूर्त्तत्वात् वृद्धिश्राद्धमप्या
दौ कर्त्तव्यं यथा गोभिलः वृद्धिः
पूर्त्तेषु युग्मानाशयेत् प्रदति
ण उपचारः यवैस्तिलार्थ इ
ति ॥ हयशीर्षपंचरात्रे वापी
कूपतडागानां पश्चिमे यागम
ण्डपे कुर्य्याद्यथाक्रमेणैव क
न्यसे मध्यमुत्तमम् कन्यसे दश
हस्तं तु कूपे प्रान्ते तथा नव द्वि
षट्कं कारयेद्राजा शक्करि ॥
ऐन्या वन्त्वहृषा द्विषड्हृते कुर्वीत
तडागे मण्डपं शुभं कम्मसेकनी
योस्त ॥ सेकसविधिमाह भ
विष्ये गृहीत्वा उम्बरं पात्रं वारिपू
र्णान्विते दर्भत्रयसाग्रमूलके
लक्षणसमन्वित जलाशयांश
मरूपे सेकसंपूर्त्तं दिग्भ्रावेःसा
धारणोवोत्तरास्य यथास्थानि ॥

क्षिपेत् ॥
पयःमत्स्यशाणौ माण्डूकप्रव
णोद्देशे तडागस्य समीपतः चतु
र्हस्ता शुभा वेदी चतुरस्रा चतुर्मु
खी कारयेदित्यर्थः तथा सर्वतः
सत्वर्णाःस्युः पताकाध्वजसंयु
ताः समवर्णा वस्त्रमाणा लोक
पालवर्णाः अश्वत्थोदुम्बरप्लक्ष
वटशाखाकृतानि च मण्डपस्य
प्रतिदिशं द्वाराण्येतानि कारये
त् तथा कुलशीलसमापन्नः
स्थापकः स्याद्विजोत्तमः स्थाप
क आचार्य इति रत्नाकरः ॥
सौवर्णौ कूर्म्ममकरौ राजतौ मत्
स्यडुण्डुभौ ताम्रौ कुलीरमण्डूकौ वा
यसः शिशुमारकः एवमासाद्य
तान्सर्वानादावेव विशाम्पते
शुक्लमाल्याम्बरधरः शुक्लगन्ध
विलेपनः सर्वौषध्युदकस्नानं
स्नापितो वेदपुंगवैः यजमानः
सपत्नीकः पुत्रपौत्रसमन्वितः
पश्चिमं द्वारमाश्रित्य प्रविशेद्याग
मण्डपं ततो मंगलशब्देन भेरी
णां निःस्वनेन च रजसा मण्डले
कुर्य्यात् पंचवर्णेन तत्त्ववित् षो
डशारं ततश्चक्रं पद्मगर्भं चतुर्मु
खं चतुरस्रं च परितो वृत्तं मध्ये
सुशोभनं वेद्याश्च परितः कुर्या
ग्रहान्लोकपतींस्तथा विन्यसेन्म
न्त्रतः सर्वान् ॥

प्रतिदिक्षु विवर्त्तनाः कृसरादी
न्स्थापयेन्मध्ये वारुणमंत्रमा
श्रितः कृसरादीन् कृम्मादीन्
ब्रह्मानेच शिवे विष्णुं तत्रैवस्था
पयेद्बुधः विनायकं तु विन्यस्य
कुम्भान्समीपकोणतथा इजयेदि
निशेषः तथा नवग्रहमखे कृ
त्वा ततः कर्म्मसमारभेत् अथ
यथाफलदं ज्ञेयं न काम्यं नाय
तेक वित् । ग्रहस्नानमण्डलं
शान्तिदीपिकायां वर्त्तुलो भास्
करः कार्य्यासार्द्धचन्द्रो निशा
करः अंगारकस्त्रिकोणस्तु बुध
श्चापाकृतिस्तथा पद्माकृतिर्गु
रुः कार्य्यश्चतुष्कोणस्तु भार्गवः
खड्गाकृतिः सर्पाकृति स्तथाके
तुः कार्य्या मण्डलपूजने मत्स्य
पुराणे देवतानां ततः स्थापना
विंग्राणिर्द्दश्याधिका सूर्य्यः ॥
सोमस्तथायाम्ये बुधजीवसिता
केजाः राहुः केतुरिति मोक्षान
ह्यालोकहिरेखतः मध्यतुभा ॥
स्करं विद्या ल्लोहितं दक्षिणेन तु
उत्तरेण गुरुं विद्याद्बुधं पूर्व्वोत्तरे
तथा पूर्व्वेण भार्गवं विद्यात् सो
मं दक्षिणपूर्व्वके पश्चिमेन शनिं
विद्या द्राहुं पश्चिमदक्षिणे पश्चि
मोत्तरतः केतुं स्थापयेत् शुक्लत

एड्वेलैः ॥ भास्करस्येश्वरं विद्या
दुमां च शशिनस्तथा स्कन्दमं
गारकस्यापि बुधस्यापि तथाहू
रिं ब्रह्माणं च गुरोर्व्विद्यात् शुक्र
स्यापि प्रजापतिं शनैश्चरस्य तु
यमं राहोः कालं तथैव च केतोः
र्वै चित्रगुप्तं च सर्वेषामधिदेव
ताः । अग्निरापः क्षितिर्विष्णु
रिन्द्र ऐन्द्री च देवताः प्रजापति
श्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः
विनायकं तथा दुर्गां वायुमाका
शमेव च आवाहयेद्व्याहृतिभि ॥
स्तथैवाश्विकुमारकौ संस्मरेद्रक्त
मादित्यमंगारकसमन्वितं सो
मशुक्रौ तथा श्वेतौ बुधजीवौ
च पिंगलौ मन्दराहू तथा कृष्णौ
धूम्रं केतुगणं विदुः ग्रहवर्णा
नि देयानि वासांसि कुसुमानि
च धूपामोदोऽत्र सुरभि रुपरि
ष्टाद्वितानकं शोभनं स्थापयेत्त
माल्यैः फलसञ्चयसमन्वितं
गुडौदनं रवेः कुर्य्यात् सोमाय घृ
तपायसं संयावकं कुजे दद्यात्
क्षीरान्नं सोमसूनवे दध्योदनं
च जीवाय शुक्राय च घृतौदनं
शनैश्चराय कृशरं माजमांसं
च राहवे चित्रौदनं तु केतुभ्यः ॥
सर्वैर्भक्षैः समर्च्चयेत् ॥

स्कन्दपुराणे जन्मभूर्गोत्रमेते
षां वर्णस्थानमुखानि च योऽज्ञा
त्वा कुरुते शान्तिं ग्रहास्तेनावमा
निताः उत्पन्नोऽर्कः कलिंगेषु
यमुनायां च चन्द्रमाः अंगारक
स्त्ववन्त्यां तु मगधे तु हिमांशुजः
सैन्धवेषु गुरुर्ज्जातः शुक्रो भोज
कटे तथा शनैश्चरस्तु सौराष्ट्रे
राहुर्व्वै राटिकापुरे अन्तर्व्वेद्यां त
था केतु रित्येता ग्रहभूमयः ।
आदित्यः काश्यपो गोत्र आत्रेय
श्चन्द्रमा भवेत् भारद्वाजो भवेद्भौ
म स्तथात्रेयश्च सोमजः सुरे
ज्योऽङ्गिरसगोत्रः शुक्रो वै भार्गव
स्तथा शनिः काश्यपएवायं रा
हुः पैठीनसिस्तथा केतवो जै
मिनेयाश्च ग्रहा लोकहितेरताः ।
कात्यायनः तद्गोत्रजाती ग्रहा
णामेव यः कुरुते नरः तत्तत्फ
लमाप्नोति न सत्याधिदेवताः
चक्रे तेन च संस्कारो न च यत्तफ
लं लभेत् ब्राह्मणो भार्गवाचार्य्यो
त्रिवियावके लोहितो वैश्यपालो
मधुपीचैव शेषान् शूद्रान् विनि
र्द्दिशेत् ॥ शान्तिदीपिकायां श
क्राकीं मासुरवो स्थायी नाशा ।
काकीव दक्षिणा उत्तरास्यो गुरु
बुधौ

पश्चिमास्यास्तथाऽपरे । अग्नि
प्रणयनानन्तरं ग्रहावाहनमाह
वैशम्पायनः अग्निप्रणयनं कृ
त्वा पश्चाद्ग्रहावाहयेत् सुधीः मध्ये तु
भास्करं विद्याल्लोहितं दक्षिणेन
तु यद्यपि ग्रहादीनां बहवः शास्त्रा
वाचकाः सन्ति शाखोपहितश्चार्था
ऽर्थोपहितः शाखावादे वताऽभ
यथापि शाखानियमात् अविनि
गमकः स्यात् तथापि बहुषु द
ष्टत्वात् सूर्य्यादि शाखेन ग्रहाणां ।
देवतात्वेन सूर्य्य सोमकुजबुधबृ
हस्पति शुक्रशनैश्चरराहु केतुपदे
देवतात्वे अधिदेवतानां तत्स्थान्य
कोमाहास्कन्द विष्णु ब्रह्मेन्द्र यमका
लचित्रगुप्तानामेभिरेव पदैः त
थाप्रत्यधिदेवतानां च अग्न्यप्पृ
थिवी विष्णिन्द्रइन्द्राणी प्रजापति ।
ब्रह्मणामेभिरेव पदैः तथा विना
यकदुर्गा वायाकाशाश्विनामेभि
रेव इति कृत्यप्रदीपः ॥ शान्ति
दीपिकोक्तध्यानानि प्रयोगवस
ते लोकपालमंत्रानाह भविष्ये ॥
प्रासमन्त्रानदेवदेप लोकपालान्
मकानिह इन्द्रमग्रसमादौ मः
सर्वदेवाधिपो महान् वज्रहस्तो ।
महासत्त्व स्तस्मै नित्यं नमोनमः ।
आग्नेयः शुक्लो ॥

वक्रः सर्वदेवमयोव्ययः धू-
मकेतुर्वनाथष्च तस्मैनित्यंन-
मोनमः यमश्चोत्पलवर्णाभः
किरीटीदण्डधृक्सदा धर्मसा-
क्षी विशुद्धात्मा तस्मैनित्यंन-
मोनमः निर्ऋतिस्तुमानवक्रू-
रः सर्वरक्षोधिपोमहान् खड्ग-
हस्तोमहासत्व स्तस्मैनित्यंन-
मोनमः वरुणोधवलोजिष्णुः
पुरुषोनिम्नगाधिपः पाशह-
स्तोमहाबाहु स्तस्मैनित्यंनमो
नमः वायुश्चसर्ववर्णः यः सर्व
गन्धवहः शुभः पुरुषोध्वजह-
स्तश्च तस्मैनित्यंनमोनमः गौ-
रोयस्तुमानवसोम्यः सर्वौषा-
धिसमन्वितः नक्षत्राधिपतिः
सोम स्तस्मैनित्यंनमोनमः
ईशानः पुरुषः शुक्लः सर्व-
विद्याधिपोमहान् शूलहस्तो-
विरूपाक्ष स्तस्मैनित्यंनमोनमः
पद्मयोनिश्चतुर्मूर्त्ति र्हंसवाहः पि-
तामहः यज्ञाध्यक्षश्चतुर्वक्त्र स्त-
स्मैनित्यंनमोनमः योसावनन्तरू-
पेण ब्रह्माण्डं सचराचरं पुष्प-
हारवेत्मूर्द्ध्नि तस्मैनित्यंनमोनमः
ऐंकारपूर्वकाश्चैते न्यासेबलिनिवे-
दने मन्त्राः स्युः सर्वकार्याणां वृद्धि-
हृद्धिफलप्रदाः इत्यष्टौपि-
वरांश्च यथावाकामतः कु ॥

र्य्यात् सूक्ष्मरत्नादिनिर्म्मिते।
द्विभुजे हंसपृष्ठस्थे दक्षिणेनाभ-
यप्रदे वामेनेनागपाशञ्च धार-
यन्तं सुभोगिने मौलिनेवामहा-
भाग कारयेद्यादसांपतिं वामे।
तु कारयेद्दक्षिणे शङ्करंस्तु-
मं नागेन्द्रीभिर्यादोभिः समु-
द्रैःपरिवारितं कृत्वैवंवरुणदे-
वं प्रतिष्ठाविधिमाचरेत् पुष्क-
रे नतपत्रे तथा मकरवदने।
मिलित्वानेवत्पाने वरुणामजे
हावस्तु नेत्रेव षष्ठाविंशतवी-
नेन वर्तहंसापुनेनच अर्द्धेनु
विंशकेन मणिवाहीपितेनच
नेनउपैवौ इतिमन्त्रः प्रतिमाया
स्थितिं कृत्वा प्राणवेणि निवेश-
येत् पूजयेद्गन्धपुष्पाद्यैः सा-
निध्यं पाशमुद्रया स्थितिमाण
प्रतिष्ठान्ते रोपयेत् स्तम्भोत्त-
पुष्पहिम्मा निरोधमुद्रां दर्शये।
त् दानकस्तत्कृत्वा कारयेद्
स्वरूपविधिं। अथापोर-
रुण विधिं वापीकूप तडागयु-
ते वात्वासामः पुष्पनिधि।
करणे शुभे नक्षत्रे प्रतीच्यां दिश-
मास्थाय प्राकृप्रवणेडदक् प्रव-
णे उदकसमीपे अग्निमुपसमा।
धाय वारुणंचरुंश्रपयित्वा श्री
न्भागानकृत्वा ॥

वतस् आज्याहुती र्जुहुयात् स।
मुद्रज्येष्ठा इतिसूक्तंच ततोहवि-
षा अष्टभिर्जुहुयात् तत्वायामि
ब्राह्मणावन्दमानः इतिपंचव-
रुणः देववरुणस्य विद्याविशिष्टे इ-
मं मेवरुणस्त्वन्नोवरुणेति चखिष्टि
कृतेच नवमेनव वैप्राणः प्राण
इवआपस्तस्मादापोनवभिर्जुहो-
ति ॥ तामनाहतेभृमवतारयेत्
अवतार्य मार्जालाभनुमेडयेत्
इदंपवित्रंसलिलं पवित्रं करुष
पुष्टः पुष्पमन्त्रः सहस्रनिर्म भारय
न्ती सर्वतीर्थाधिषिक्तं लोकालोकं
तरतीप्यनेच इत्यनेनपुच्छायेय
जमानः स्वयंतम आचार्याणा।
रथः इतरेभ्य आपोऽस्मान्मातः
रः शुन्धयन्त्विति येषामयं दिशि।
उत्थापयेत् सयवसा भगवती हम्
या इतिहिंकृतंवेत् तदाहिंकृतेव ॥
तीर्थवतमती वस्त्राभिर्निमयेत्।
तांमवेल कण्ठाकनकशृंगी हे
ममज्ञोरूपमुखी कांस्यपदोहा
विसाय साममगायद्यात् इतरो।
वा यथा शक्तिदक्षिणावद्या इ।
ति तत उत्सर्गकुर्यात्। देव।
पितृ मनुष्याः प्रीयन्तां इत्याह श्री
नकः यजमानो ब्राह्मणान्भोज-
यित्वा स्वस्तिवाचयेदिति अस्यार्थः
निष्प्रादी ॥

नोशुभंते सर्ववचनेभ्योक्तेये पृथ
पवविधिर्गोभि लपारस्करगृह्यो।
क्तकर्म्माव्यूहाभ्यन्तामनुष्ठीयते य
ज्ञान्माते स्वधारो वापीकेसम विहो
धिव विहङ्गिस्तवस्तुहेत्य अग्निहोत्रा
दिकर्म्मवित् ॥ इतिवह्नेदोगपरि
शिष्टात् ततश्च अग्निमुपसमाधा
येति स्वस्वगृह्योक्तविधिना अग्निसं
स्थाप्य वारुणं वरुणदेवताकंच
रुं निष्पाद्य आज्यभागान्ते कृत्वा।
इतिवह्वृचोगेनवपरं सत्त्वविरूपा
सततपानां कुशाशिकां समाप्यम।
हाव्याहृतीःकृत्वा अकृत्तंकर्म्मऽ।
र्य्यात् ततश्चप्रमतः पिंजक्रिश्रम।
श्र इत्यादिपुरुषसूक्ते ध्यात्वा श्र
मे सेवरुणत्वामासीति नामकु
र्य्यात् प्रतिष्ठायां रोहितश्च वास्तु
याग्रेप्रजापतिः जलाशयप्रतिष्ठा
यां वरुणः समुद्राश्चतः इतिस्त
नेः तत अवाहु इतरितामसमित
प्रत्येकानलं महाव्याहृतिहोमं।
कृत्वा समुद्रा ज्येष्ठा इत्यादिमन्त्रैः
भिर्म्मत्रैश्चतस्र आहुतीर्जुहुयात्
ओंतच्छायामीति ओंतरदित्वं नः ॥
मिति ओंशुनः शेफोह्यीति ओंअ
वतेहेलो वरुण इति गेरउनम
मितिपंचभिः ओंतन्नो ओंइति।
ढाभ्यां ओं इमंवरुण इत्येकेन

प्रवंस्थानत्रयोक्तैर्वह्नूचोक्तैः ।
प्रत्येकमष्टभिर्मन्त्रैः श्लोकं चतुरव
न्ते भृगुगोत्रो भार्गव प्रवरश्च प्र
चाववंशे स्त्रुचा जुहुयात् अग्नये ।
स्विष्टिकृतेव ततः कुशण्डिकोक्त
विधिना शेषं समापयेत् नववे ।
माणा इति नवाहुतिरिति ॥
मार्जनान्त इति यजमानाभिषे
कः तद्विधानन्तु मत्स्यपुराणे
गजाश्वरथ्यावल्मीक संगमात्
हृद गोकुलात् मृदमादाय कुम्भे
षु प्रतिपेत्त्ववानथा गोरोचनां
चलिहार्थान् गन्धान् गुग्गुलमेव
च स्नपनेतस्य कर्तव्यं पंचभङ्ग
समन्वितं पृथक् कर्ममहामन्त्रै दे
वेकृत्वा विधानतः पंचभंगाश्च
शान्तिक पौष्टिक कल्पनकृताः
अश्वत्थोदुम्बर प्लक्ष वटचूतस्य
पल्लवाः महामन्त्रैः स्नानहानमभि
षिंचन्ति भ्यादिभिः यत्नत्पथ्य
न्ते कूपे पिकापिले येषां स्नाः
स्नापयेदूपं लोमानंपंचकरं
लवे स्नपवृत्तेतिमन्त्रेण संधारा
नेत्रशोभनं पूजयित्वा तदन्ता
दौ स्नातो यष्टिमचालयेत् मा
लेसव्रतलि मात्रोद्भूपः स्नान् ।
ततो विरुत्त विनिर्मितः यत्नमा
नसमागेनवा संस्थाप्याभ्यति
भिक्त्वा तीर्ह हेतां श्मश्यादिः

ततोयेत् सचेल कर्णा कांस्या
शुक्लविशेषण पक्कां जलाशये
वभ्रामयेत् तथा हयशीर्षपंच
रात्रे गां सवत्सां समानीय सुशी
लां चपयस्विनीं कांस्यापदोहां
वणदादि वस्त्रभूषणा परिशोभितां
स्वर्णशृङ्गी रौप्यखुरी ताम्रपृष्ठी
सुभूषाभिता लाङ्गलमुपलिप्तहस्तो
ऽसौ यजमानः सबान्धवः श
नैः सन्तारयित्वा तामाचार्याय
निवेदयेत् कांस्यापदोहां कांस्य
क्रोडामितियावत् कापिले अजा
लेजल मुत्थाप्य यजमानः सभा
र्यकः तेरेहे मास्त्रुवो भूत्वा ह
नगो लांगूल लांगूलिः इदं सलिलं
पवित्रं इति मन्त्रेण अवतार्य मा
ण मनुसंत्रयेत् ततः मास्त्रुवः
सन्नवतारयेत् सा च गोः पश्चिमा
नोऽवतार्या ततः कुलसमीपङ्ग
त्वा तर्पयेत् यथा कापिले पुनः
पुत्रोद्धारकेनाथ सलिलेन कुशाग्रे
ण भुग्ने नैवापसव्येन पितृतीर्थे
न तर्पयेत् गताश्चाप्यागमिष्यन्ति
पेऽकेसमवान्यवाः तेसर्वे तृ
प्तिमायान्तु मयादत्तजलेन वै तेतो
शंवाभिमन्त्रेण संवेष्टावत्से
पुंसा आचार्येणान्वारब्धोऽम्भी
ष्ठा पापोऽस्मान् मातरः ॥

श्रुपयन्त्विति मन्त्रेण ये शान्या
मुत्थापयेत् स च वत्सा भगवती ह्न
या इति जुहुयात् सा यदि हिंकारं
करोति तदा हिंकृण्वती त्यादि जपे
त् ततः कृकशिशेषणसुक्तो येरमाच
र्याय सामगायद्यात् ततो यथा
शक्ति दक्षिणां च दद्यात् यत्नतपथ्य
न्ते नकूपे च्यवक्रिते ऽसम्भवात् ॥
ततः उत्सर्गं कुर्यात् अत्र विशेषम
ह रत्नाकरः पूतमत्स्यपुराणम्
फलामाचिन्तमनसा विविधानि
शुभानि च प्रदद्यात् सर्वभूतेभ्यो ज
लपूर्णं जलाशयं कापिलं च ततः
स्तत् पश्चिमे भीरं गत्वा पूर्वानम
स्त्रितः ज्ञेलोनसर्गं प्रकुर्वीत सर्व
महार्घकं ऋवे सर्वसत्त्वार्थकं स
र्व भूतप्रयोजनकं सर्वभूतेभ्य उत्
सृजेदित्यर्थः देव पितृ मनुष्याः प्री
यन्तामिति पाठ इति शेषः उत्
सृज्य यजमानो ब्राह्मणान् स्वस्ति
वा चयेत् इति दत्तिणादिभिरिति शे
षः यत्नत पर्यन्ते कूपेपि ॥ जला
शयोत्सर्गश्च सर्वभूतोद्देश्यकत्वे
न अयकृष्टचेतनोद्देश्यकत्वेऽपि
त्यागत्वमपि ततश्च कीटादेर्भेद
मिति स्वीकारायोग्यत्वेन देदमेयो
द्देश्य गत स्वत्वाजनकत्यागरूपत्वा

द स्य यागत्वे अत एव जलाशयोत्
सर्गमुपक्रम्य मत्स्यपुराणेऽपि ॥ प्रा
प्नोति तद्यागबलेन भूय इति यागत्वे
नाभिहितं ततश्च तज्जलेषु स्वत्व
री करणेन नद्यादिवत् साधारणीकृ
ते अत एव सामान्ये सर्वभूतेभ्यो मया
दत्तमिदं जलं रमन्तु सर्वभूतानि स्ना
नपानावगाहनैः इति मन्त्रलिंगेन
उपादाने विनाकस्यापि न स्वत्वमि
ति ततश्चास्य यागवत्त्वात् प्रतिप
त्तेरभावात् साधारणा जनस्य परि
ग्रहमात्रेण गोतमोक्तेन स्वामित्व
ऋते यजमानस्यापि तथा तेन स्वा
मित्वात् तत्र स्नानादावदोष इति
तत्त्वं यथा गौतमः स्वामी रिक्थक्रय
संविभाग परिग्रहाधिगमेषु ब्रा
ह्मणस्याधिकं लब्धं क्षत्रियस्य वि
जितं निर्विष्टं वैश्यशूद्रयो रिति प
रिग्रहोऽनन्यपूर्वस्य जलतृणका
ष्ठादेः स्वीकार इति मितात्तरा अ
रण्याधिकारे अकृष्टमहापल्लवः
दायादेष्वितोऽमुष्या वामद्यापरि
गृहीतमिति अपरिगृहीतमस्वा
स्वीकृतमस्वामिकमितियावत्
निर्विष्टं वेतन लब्धम् निर्वेशो भृ
तिभोगयो रित्यमरकोषत्रिकाण्ड
शेषयोः ॥ हयशीर्षे ॥

पुष्प स्त्री पुष्पतिविकसतियः ।
फल इति भाषा ततर्ध्यायः ॥
मल्लं २ कुसुमे २ सुमनसः ४ ।
इसमरः स्तने ५ मस्तवः ६ सुमनः ७
इति शाह्वरत्नावली ॥ स्वहस्तपु-
ष्पचयनफले यथा उपहार्ध्या-
णि पुष्पाणि मम कर्मपरायणाः
ये मामुपानयेद्भूमे मम कर्मप-
रोस्थितः पुष्पाणि तेऽयावन्ति ।
मम मूर्द्धनिधारयेत् स्वकृतापु-
ष्पलेकर्म्म मम लोकाय गच्छ-
ति ॥ अकर्म्मण्यपुष्पदाने दो-
षो यथा वराह उवाच अकर्म्म-
ण्येन पुष्पेण यो मामर्च्चयते भु-
वि पातनं तस्य वक्ष्यामि तच्छृ-
णुत्वं वसुन्धरे नाहं तत्प्रतिगृ-
ह्णामि न च ते वै मम प्रियाः मू-
र्द्धं भागवतेहे मम विप्रियका-
रिणः पततिनरके घोरे रौरवे
तदनन्तरं अज्ञातस्य च दोषेण
दुःखान्यनुभवन्ति च वानरो दश
वर्षाणि मार्जारस्त्रयो मूषकः
पंच वर्षाणि बलीवर्द्दस्त्वष्टादश
छागश्चैवाष्टवर्षाणि मासं वैग्रा-
म कुक्कुटः त्रीणिवर्षाणि म-
हिषो भवत्येवन संशयः एत-
ते कथितं भद्रे पुष्पं येन वोद्व
ने अकर्म्मण्य विधानादि पुष्पे

येन दहति वै इति वराहपुराणं ॥
देवीप्रिय पुष्पाणि यथा पुष्पाणि
देव्याविस्वयाः प्रियाणि शृणु संप्रति
वकुलैश्चैव मन्दारैः कुन्दपुष्पैः कु-
रण्टकैः करवीरार्कपुष्पैश्च शाल्म-
लैश्चापराजितैः दमनैः सिन्धुवा-
रैश्च सुरभीमरुवकैस्तथा लता-
भिर्विल्वपत्रैश्च दूर्वांकोमैश्च कोम-
लैः मञ्जरीभिः कुशानाञ्च विल्वप-
त्रैः सुशोभनैः पूजयेद्देहसर्वां देवी
कामाख्यां त्रिपुरां तथा अन्याश्च
याः शिवाशीत्ये जायते पुष्पजातयः
ताइमाः शृणु कीर्त्तिते मया वेता-
लभैरव मालतीमल्लिकाजाती यू-
थिकामाधवीलता पाटलाकर-
वीरश्च नवालर्कोविका तथा कु-
ब्जकं भगरश्चैव कर्णिकारः खोरोच-
नः चम्पकाम्रातकौ वाणो वर्बरा-
मल्लिका तथा अशोको लोध्रतिल-
कौ अटरूषशिरीषकौ शमीपुष्पं
वर्द्रोणञ्च पद्मोत्पलवकारुणाः से-
नारुणं त्रिसन्ध्या च पलाशः खदिर-
स्तथा वनमालाः खसेवन्ती कुसु-
दोः खकदम्बकः वक्रकोकनदं
चैव भण्डिलो गिरिकर्णिका ना-
गकेशरपुन्नागौ केतकीजलिका
तथा दोहदावीजहरश्च नमेरुः ॥
शालमेवच वरूषीच एडविन्ध्यश्च ॥

कुण्टी पंच विधा तथा एवमा-
द्युकुसुमैः पूजयेत वरदां शिवां
वर्ज्जनीय पुष्प यथा पुष्पं च कृमि-
सम्भिन्नं विशीर्णं भग्नसंहतं स-
केशं मूषिकाधूतं यत्नेन परिवर्ज्ज-
येत् याचितः परकीयं च तथा प-
र्युषितं च यत् अन्त्यस्पृष्टपदास्पृ-
ष्टं यत्नेन परिवर्ज्जयेत् इति का-
लिकापुराणे ६८ ५४ अध्यायः
केशव पूजने प्रशस्तपुष्पाणि य-
था मालती मल्लिका चैव यूथि-
का चातिमुक्तकः पाटला करवी-
रं च जया सेवन्तिरेव च कुब्जकस्त-
गरश्चैव कर्णिकारः कुरण्ट-
कः चम्पकस्तगरः कुन्दो वाणा
वर्बरमल्लिका अशोकस्तिलक-
श्चम्पा तथा चैवाटरूषकः अमी
पुष्पप्रकारास्तु शस्ताः केशवपूज-
ने पूजने केतकीपत्रं पुष्पं च पुष्प-
भृंगारकस्य च तुलस्यामलकी
चैव सयस्तहिकरहरैः पमाम
स्व समस्तानि रक्तनीले तथा त-
पत्रे सितोत्पले च कुसुम्भ रवि
नातिसदानप नातिपुष्पाणि दे-
याति विस्नवे प्रभविस्नवे इत्य अ-
पुराणे ॥ अपि च नालीशनाका
सुमनाकुन्द वकुपटं तथा वाण-
व पंकजाशोक

करवीरं च यूथिका पारिभद्रं
पाटला च वकुलं गिरिशालिनी
तिलकं वनजं चैव पीनकं तगर-
न्त्वपि एतानि हि प्रशस्तानि कुसु-
मान्यच्युतार्चने सुरभीनि तथा-
न्यानि वर्जयित्वा तु केतकीं येषा-
मपि हि पुष्पाणि प्रशस्तान्यच्यु-
तार्चने पत्राण्यपि तेषां स्युः प्र-
शस्तानि महामते वीरुधानां प्रधा-
नेन वर्हिषां चार्च्चयेत्तथा नानारू-
पैश्चाम्बुभवैः कमलेन्दीवरादि-
भिः प्रवालैः शुचिभिः शुद्धैर्जल-
प्रक्षालितैर्वले वनस्पतीनामर्च्च-
त तथा हर्वाय पल्लवैः इति वा-
मने ९२ अध्यायः ॥ विशेष पु-
ष्पविशेषदानस्य फलं यथा आग-
मभवेः पुष्पैरच्छिद्रैः कीटवर्जितैः
तथाः पर्युषितैस्त्यक्त्वा कार्त्तिके वि-
ष्णुमर्च्चयेत् । वर्णानां हि यथा विप्र
स्तीर्थानां जाह्नवी यथा देवानां च
यथा विष्णुः पुष्पाणां मालती त-
था मालती मालया देवं योर्च्चयेत्क-
रुध्वजम् जन्मदुःखजरारोगैः
कर्म्मभिर्मुक्तिमाप्नुयात् ॥
मालतीमालया येन पूजितः का-
र्त्तिके हरिः पापलक्षायुतं तस्य व
त्सरेणापि प्रमार्जति मालती पुष्प

मालाभिः कार्त्तिके पुष्पमण्डपं
विष्णोर्गृहे कृतं येन तेयान्निमः
वंसागतिं ॥ जातिपुष्पैर्विरचि
तां मालां यः संप्रयच्छति वि
ष्णवे विधिवद्भक्त्या तस्य पुण्यफ
लं शृणु कल्पकोटिसहस्राणि
कल्पकोटिशतानि च वसेद्विष्णु
पुरे श्रीमान् विष्णुतुल्यपराक्रमः
यः स्वर्णकेतकीपुष्पैः पूजये।
द्गरुडध्वजं सप्तकोटिशतं याव
त्तस्य स्यात्सदने हरिः दामोदरं
पूजयेद्यः कुसुमैः केतकोद्भवैः
सर्वेषां विष्णुनिलये देवेन सह मो
दते ॥ मल्लिकाकुसुमैर्देवं यो
ऽर्चयेत्त्रिदशेश्वरं कार्त्तिके परया
भक्त्या दहेत्पापं त्रिधार्जितं ॥
सुगन्धैर्मल्लिकापुष्पैः रच्युतं ॥
योऽर्चयेन्मानवे समर्दयापविमु।
क्तो विष्णुलोके महीयते वैदय।
स्मणकेनाथ संप्राप्ते मथमाध
वे योऽर्चयेत्सर्वनिर्दिष्टं लभ
ते वै सर्वपदं ॥ यः पुनः पाट॥
लापुष्पै रर्चयेद्गरुडध्वजं पु ॥
ण्यात्मा यत्स्थानं संप्रयाति हरे
र्मुने अगस्त्यपुष्पैर्देवेशं येऽर्चये।
ति जनार्दनं देवेर्दर्शनात्तेषां नर
काग्निः प्रणश्यति नरकं करोति
विप्रेन्द्र ॥

तपसा भाषितो हरिः यत्करो॥
ति हृषीकेशं मुनिपुष्पैरलंकृत
विहाय सर्वपुष्पाणि मुनिपुष्पे।
ण केशवं कार्त्तिके योऽर्चयेन्न।
रो वाजिमेधफलं लभेत् मुनि
पुष्पकृतां मालां यः प्रयच्छति ज।
नार्दने शाकोपिनैः संभवत्स
कमेलानि भावेन ददात्यभीपि
तान्कामान् हृत्वा चित्तानि
यथा कार्त्तिके मुनिपुष्पेण हृ
षीकेशं गरुडध्वजं गवामयुतद
नेन यत्फलं कार्त्तिके मुने मु।
निपुष्पेण चैकेन कार्त्तिके।
तत्फलं स्मरेत् ॥ योऽर्चयत्तिस
ताम्रं करवीरैः सिताःसितैः
तेनावर्षशतं यावत् मधुर्वि।
निकेशवः दकुलाशोककु।
सुमैर्ये ऽर्चयन्ति जगत्पतिं नि:
शाकालेभवत्तीर यावच्चन्द्रदि
वाकरौ ॥ अशोककुसुमैर्भ
क्त्या शोकभयापहं पूजयित्वा ह
रिं याति पदं विष्णोः सनातनम्
शुभपत्रैः सितैर्वा तु कुसुमैः
पंकजोद्भवैः अपोज्जनसम्भ
वी नरो याति हरेः पदं ॥ अभ्यर्च्य
केतक्यैः पुष्पैः केशवं ज्ञानाश
नं मत्र्याति भवनं विष्णो र्वन्दितं त्रि
दशैरपि सुरत्नकपुष्पश्च पूजये
द्यो ॥

जगत्पतिं सपुण्यवान्नरो याति
तद्विष्णोः परमं पदं ॥ कार्त्तिके यो
ऽर्चयेद्विष्णुं तुलसीबिल्वपंकजैः।
त्रिदशैरपि पूज्यः स नरः शक्रोऽयमः।
किंकरैः माधवे योऽर्चयेद्विष्णुं तु:
लसीबिल्वपंकजैः त्रिदशैरपि
ज्यः स वक्रः शक्रेयानं किंकरैः।
माधवे योऽर्चयेद्विष्णुं सपुष्पैर्लि
लकोद्भवैः स तपापो निरातंकः
स विष्णोर्याति तत्पदं स मितपु।
ष्पकुशादीनि श्रोत्रियः स्वयमा
हरेत् शूद्रोपनीतैः कुरवैः पूजो।
ऽर्चितं ब्रजत्यधः तस्माद्विप्रोपु।
नित्रेष्ट शिष्याणां स्वयमेव द्या पु
ष्पादीनि समाहृत्य पूजयेत्तप
दमेश्वरं ॥ विष्णोर्हर्षाय मध्ये ऽपुष्पैः।
तुलाकाशकुशोद्भवैः तुलसी
बिल्वपत्रैश्च पूजयेद्देवताः पितॄ
नर्चयेत्तनगैः सूर्यं धूर्लपुष्पाणि
केशवं देवीं लक्ष्मीं चपुष्पैश्च शंक
रं नागकेसरैः ॥ कालविशेषे
तस्य पर्युषितत्वं यथा प्रहरं ति
ष्ठेज्जाती प्रहरार्द्धं तु मल्लिका।
त्रियामं मुनिपुष्पं च करवीरमहः
निशं आम्रमंजरी बिल्वपत्रदा।
नफलं यथा मन्मेरु सहकारस्य
ये प्रयच्छन्ति वैसवाः कार्त्तिके सफला

स्तेषां गोकोटिफलभागिनः का।
र्त्तिके योऽर्चयेद्भक्त्या बिल्वपत्रेण के
शवं दशायुतायुतफलं केशवस्त
स्यैव सः बिल्वपत्रेण ये कुसुम कार्त्ति
के कलिमर्हने पूजयन्ति महाभक्त्या
शक्तिस्तेषां करे स्थिता नागकेशर।
पुष्पैर्यः पूजयेद्गरुडध्वजं स याति
वैष्णवस्थानं यत्र गत्वा न शोचते ॥
कदम्बकुसुमैर्योवै पूजयेन्मध।
सूदनं जन्मार्जितानि पापानि स्का
लितेनैव न भवेत् तथा केतकेपुष्प
मालती कुसुमैस्तथा तोषमाया।
ति देवेशः कदम्बकुसुमैर्यथा है
माकदम्बपुष्पाणि तोषमायाति
माधवः किंपुनः पूजितो देवः स
र्वकामप्रदो हरिः ॥ हरिकिंशुक
पुष्पैर्यः पूजयेत्त्रिदशाधिपं तेकंठ
रमते शाश्वतं विष्णुना सह वैष्णवः
वर्षाकाले च देवेशं कुसुमैश्चन्दना
दिभिः योऽर्चयेत्परमं विष्णुं संसारे
न पुनर्विशेत् ॥ कुन्दपुष्पैश्च विष्णुं
वै योऽर्चयेद्गरुडध्वजम् ॥ कोटि
जन्मार्जितं पापं तत्क्षणादेव न।
श्यति ॥ शमीपुष्पैश्च देवेशं पूज
येद्दत्तरद्विषम् यमलपथेयदि।
मर्त्यं नयाति ड्कैतिनवः ॥ २१
तिपाञ्जोनबदवरोऽ २२१ ॥

अध्यायः ॥ लक्ष्मीतत्त्वप्रि।
यपुष्पाणि नारदीय सम्मसह।
स्रोनामलती बकुलाशोकशेफा।
लि नवमालिकाः अम्लानभग
न्तकोरठ मल्लिका मधुपिण्डिकाः
यूथिमष्टापदं कुन्द कदम्बं मधु।
पिंगलं पाटला चम्पकं कुम्भं ल
वंगमतिमुक्तकं केतकं कुरवकं।
बिल्वं कल्हारकरकं द्विजे पंचविं
शतिपुष्पाणि लक्ष्मीतत्त्वप्रिया
णि मे ॥ केशवार्च्चनेनिषिद्धपुष्पा
णि विष्णुधर्मान्तरे उन्मत्तीमग।
स्त्यानि कुटमानि न दापयेत् अम्ला
यतनजातानि कण्टकीनि तथै
व रक्तानियानि धर्म्मात्त चैमच।
तोड्कवापिच श्मशानजातानि या
नि यानि चाकालजानिच तथा।
कुटजं शाल्मलीपुष्पं शिरीषंच।
जनार्द्दने निवेदितं भयरोग निः
स्वत्वं च प्रयच्छति बन्धुजीवक।
पुष्पाणि रक्तान्यपिच दापयेत्
अर्कक कर्कुसुम दानात्रैहीभो।
गमाप्नुयात् ॥ पराकेपिनहल।
स्य पुष्पग्रहणे दोषः अगस्त्यः।
पराकेपिनवृक्षेभ्यः पुष्पाण्यपानी
यपोह्येयेत् अविज्ञाप्यचतस्येव।
निष्फलं तत्समर्जितं पतहिजे।

तत्परम् द्विजस्त्वेणैयः पुष्पाणि
सर्वतःस्ववदाहरेत् इतियाज्ञव।
ल्क्यात् देवाधर्थन्तु कुसुमम।
स्तेयं मनुरब्रवीत् इतिवचनात्
गोःस्पर्थ्य त्वामेथासिवीत्वन
स्पतीनां पुष्पाणि स्ववदाददीत।
फलानि चापरिवृहितानि इति।
गौतमवचनाच्च ॥ द्विजेनवस्तु
हरेणापि तृणं वा यदिवाकाष्ठं
पुष्पंवायदिवाफलं अप्रयच्छन्
निगृह्णानो हस्तच्छेदनमर्हति
इतिस्तते ॥ देवोपरिधृतमस्त
कोपरिधृतं अधोवस्त्रधृतंम्रन्त
जलतालितंच पुष्पं दुष्टमिति
हरिभक्ति नामकेयस्य अभिवा
याभिवादक करस्थपुष्पमोत्।
त्यात् कर्म्मणंप इतिकेचित् ॥
याचितादिपुष्पदाणस्य निष्फ।
लत्वं याचितेनिष्फलं पुष्पंक्रय।
क्रीतंच निष्फलमितिवदंति ॥
वामहस्तचिताद्दि पुष्पस्यादेय।
त्वं यथा न पुष्प च्छेदनेकार्य्यदे
वार्थ्यं वामहस्ततः नदधात्।
निदेवेभ्यः संस्थाप्यवामहस्ततः
समित् पुष्पादीनां स्वयमाहर।
णीयत्वं हारीत शातातपौ समि
त् पुष्पकुशादीनि ब्राह्मणःस्व
यमाहरेत् मूढाणीतैः क्रयक्रीतैः

कर्म्मकुर्वन् पतत्यधः ॥ कूर्म्मेप्य
तिमसवमाह बलपुराणे पुष्पैर्
येर्म्मने वैधैर्वीरकर्मक्रियाकृतैःवी
रकर्म्मो वीरवत् पात्कापृमेनवि
क्रेतरुपन्यस्त मूल्येनक्रयः ॥
पुष्पदानप्रकारोज्ञानमालायां
पुष्पंवायदिपत्रं फलंनेष्टमधेनपुल
पुष्पांजलिविधिर्हिता यथोत्पन्नेन
यार्मणं ॥ मध्याह्नस्नानानन्तरं पु
ष्पचयनस्य दोषो यथा स्नाने कृ
तान्तये केचित् पुष्पोरक्तानिवैद्वि
जाः देवतास्तन्नरक्षन्ति भस्मीभव
तिदारुवत् पतत्रद्वितीयस्नाना।
भिप्राये इतिरत्नाकरः ॥ व्यक्ते
मत्स्यसूक्ते स्नात्वामध्याह्नसम।
येनछिंद्यात्कुसुमंनरः तत्पुष्प
सांस्वनेदेवि रौरवेपरिपच्यते ॥ पु
ष्पाभावेदेयानि यथा विष्णुधर्म्मोत्त
रेपुष्पाभावेपिदेयानि पत्राणिचज
नार्द्दने पत्राभावे जलेदद्यात्तेनपु।
ण्यमवाप्नुते पुष्पदानमाहात्म्य।
यथा नरत्नैर्नसुवर्णेन नवित्तेनव
भूरिणा तथाप्रसादमायाति ॥
यथा पुष्पैर्जनार्द्दनः ॥ देव।
ता विशेषे वर्ज्जनीय पुष्पं यथा
शाला नपः शिवे विवर्ज्जयेत् ॥
कुन्दपुन्नग ॥ ॥

नंचहरेत्वया देवीनामर्कमन्दा ॥
रौ सर्व्यमसमभगवंतयथा ॥ पुष्पवि
शेषाणांकालिकपर्युषितत्वंभवि
भविष्योप्पुराणे सितरक्तानिकुसु
दाम्रतपत्रानिच पक्षंपर्युषिता।
शोका कार्य्यपंचदिनोत्तरम् पुष्पवि
शेषस्यापर्युषितत्वं यथा तुलस्या
गस्त्यबिल्वानां नचपर्युषितात्मता
योगिनीतन्त्रे बिल्वपत्रंचमाघंचतु
मालामलकीदलं कल्हारंतुलसी
चैव पद्मंचशतपुष्पकं पतत्पर्यु
षितंनस्यात् यच्चामतकलिकात्म
कं कलिकात्मकं मस्फुटनयोग्य
इमेकादशीतत्त्वम् ॥ गाचैचभट्ट
मते पुष्पविशेषाणां कालिकप
र्युषितत्वं यथा बिल्वापामार्ग्गजा।
तीतु लसिशमिपाताकेतकीभृंगरा
वी मन्दाम्भोजाद्दिदर्भापुनितिल।
भगवत्बकलकल्हारमल्ली चम्पाषा
शाति कुम्भीदमनमरुवकाबिल्व
तोहानिशाक्ता शिवरात् योकार्य्यरी
षेणतिथिनिथि वसुभूसूयमा भूय
पदे अस्पार्थः शातशातावरीम
न्दःमन्दारः अहिर्नागकेशरः
शुनिरगस्त्यः अष्टारातिःकरवीरः
कुम्भी पाटला बिल्वमारभ्य अहि
पर्य्यन्तेगणपितावदर्भमारभ्य हूनसि

शादादि गणयेत् पतद्दिनोत्तरंप
र्युषितानीत्यर्थः इति पदार्थाद
र्शः । पुष्पकीर्तायो वर्णनीयानि
यथा पुष्पचयने १ पुष्पापीड २
पिनार्थिता २ माला ३ गोत्रस्खलने
ष्या ४ वक्रोक्तिः ५ संभ्रमाश्लेषः
६ इतिकविकल्पलता ॥
पुष्पं क्ली स्त्रीरजः विकाशः इ
तिमेदिनी धनदस्यविमानम् ।
नेत्ररोगविशेषः ॥ फुली इ
ति भाषा इतिहेमचंद्रः अस्यौ
षधम् यथा हरीतकीवचाकुष्ठं
पिप्पलीमरिचानिच विभीतक
स्यमज्जाच शंखनाभिर्मनःशिला
सर्वमेततसमं कृत्वा छागीक्षीरे
णपेषयेत् नाशयेतिमिरंकण्डु
पटलान्यर्बुदानिच अधिकानिच
मांसानि यश्चरात्रौनपश्यति अपि
द्विवार्षिकं पुष्पं मासेनैकेनसा
धयेत् वर्तिश्चन्द्रोदयानाम नृणां
दृष्टिप्रसादनी इतिचक्रपाणिद
त्तः ॥ पुष्पकम् क्ली रीतिपुष्पं
धनदस्यविमाने नेत्ररोगः २॥
त्वक्कंकणम् रसाञ्जनम् लोहः
कांस्ये मृदंगारशकटी इतिमे
दिनी कासीसे इतिहेमचन्द्रः
पुष्पकरण्डकं क्ली उज्जयन्याशिव

शिवोद्याने यथा महाकालस्योज्ज
यनीविशालावन्तिका द्यानस्पद
यानके तेयं नाम्ना पुष्पकरण्डके
इतिशब्दमाला ॥
पुष्पकरण्डिनी स्त्री उज्जयिनी य
था उज्जयिनी स्याद्विशाला ऽवन्ती
पुष्पकरण्डिनी इतिहेमचन्द्रः
पुष्पकासीसं क्ली कासीसभेदः
तत्पर्यायः कंसकं २ नेत्रौषधं
३ इतिहेमचन्द्रः वत्सकं ४ मा
लीमसं ५ कंसं ६ विषदम् ७ नील
मृत्तिका ८ अस्यगुणाः तिक्तत्वम्
शीतत्वं नेत्रामयापहत्वं लेपेन
पामाकुष्ठादिनाना त्वग्दोषघ्नं॥
शिवंच इतिराजनिर्घण्टः ॥
पुष्पकीटः पुं भ्रमरः इतित्रि
काण्डशेषः । कुसुमकृमिमात्रेच
पुष्पकेतनः पुं कामदेव इति
हेमचन्द्रः ॥ पुष्पकेतुः ॥
पुं कुसुमाञ्जनम् इत्यमरः ॥
पुष्पघातकः पुम् ॥ वेणुः ।
इतिशब्दमाला ॥
पुष्पचापः पुम् कामदेवः इ
तिहेमचन्द्रः ॥
पुष्पचामरः पुम् दमनकवृक्षः
इतित्रिकाण्डशेषः ॥
केतकवृक्षः ॥ ॥

इति शब्दमाला ॥ पुष्पदः
पुं वृक्षः इतिहेमचन्द्रः ॥
पुष्पदन्तवि त्रि पुष्पदन्तः पुम्
वायुकोणस्थदिग्गजः ॥ इत्यमरः
विद्याधरविशेषः ॥ इति
मेदिनी ॥ जिनभेदः ॥
इतिहेमचंद्रः नागभेदः ॥
इतिधरणिः ॥ पुष्पदन्तकः
पुं गन्धर्वविशेषः ॥ स्वचमंहि
म्नः स्तवकर्ता इतिशब्दरत्नावली
पुष्पद्रवः पुं पुष्परसः तत्पर्या
यः पुष्पसारः २ पुष्पस्वेदः ३ पु
ष्पजः ४ पुष्पनिर्यासकः ५ पु
ष्पाम्बुजः ६ अस्यगुणाः सुरभि
त्वं शीतत्वं कषायत्वम् गौल्यत्वम्
दाहभ्रमार्तिवमि मोहहरत्वम् ।
पत्तृष्णार्ति पित्तकफदोष विनाशि
त्वं नाशित्वं सरत्वं सन्तर्पणत्वंच
इति राजनिर्घण्टः ॥ ॥
पुष्पधन्वा न् पुं कामदेवः इत्यम
रः पुष्पलिट् पुं भ्रमरः इति
शब्दचन्द्रिका ॥ पुष्पन्धयः
पुं भ्रमरः इतिराजनिर्घण्टः ॥
पुष्परसपानकर्तरि त्रि पुष्पशा
ब्दोपदे धातोःकर्तरि खश्प्र॥
त्ययनिष्पन्नत्वात् इति मुग्धबो
धव्याकरणम् ॥ ॥

पुष्पपथः पुं योनिः इतित्रि
काण्डशेषः ॥ पुष्पपुरम्
क्ली पाटलिपुत्रनगरम् ॥
इतिभूरिप्रयोगः पुष्पफ
लः पुं कपित्थः इत्यमरः ॥
कुष्माण्डः इतिशब्दमाला ॥
पुष्पमासः पुं वसन्तः इति
राजनिर्घण्टः ॥
पुष्परक्तः पुं सूर्यमणिवृक्षः
इतिशब्दचन्द्रिका ॥ पुष्प
रसः पुं मकरन्दः इत्यमरः
पुष्परसाह्वयं क्ली मधु इति
राजनिर्घण्टः ॥
पुष्परागः पुं मणिविशेषः
पुखराज इतिभाषा तत्पर्या
यः मंजुमणिः २ वाचस्पतिव
ल्लभः ३ इतिभावप्रकाशः ॥
पीतः ४ पीतस्फटिकः ५ पीतर
क्तः ६ पीताश्म ७ गुरुरत्नं ८ पी
तमणिः ९ पुष्पराजः १० अस्यगु
णाः अम्लत्वं शीतत्वम् वातना
शित्वं दीपनत्वंच ॥ तस्यधार
णगुणः आयुःश्रीप्रज्ञाकारित्वं
तस्यलक्षणम् यथा स्वच्छायपी
तगुरुगात्र सुरंगपृष्ठं स्निग्धंच
निर्मल मतीव सुवृत्तशीतं यःपु
ष्परागसकलं कलयेदमुष्य पु
ष्णाति कीर्त्ति ॥

मतिशोध्मि सुखाड दर्थान् ॥
तस्य कुलत्वंण यथा कुसुमवि।
न्हे किते कृतेचवले मलिने।
लवु विकाश्यपार्कवागारं पुष्प
रागेसदोषकं तस्यपरीतालव
णे यथा दृष्टोविकाशयेत् पु।
ष्परागमधिकमात्मीये नवल
पुष्परागो जामातया परीतकेः
रुकः इतिराजनिर्घण्टः ॥
तस्मात्पत्यादि यथा स्तउवा
व पतितायाहिमाद्रेर्दि वचस्त
स्मस्वदिषः प्रादुर्भवन्तितास।
तु पुष्परागामहाशमाः आपी।
तपाण्डुरुचिरः पाषाणः पुष्परा।
ग संज्ञस्तुकोरुण्टक नामासा
तु स एव यदि लोहितापीतः आ
लोहितस्तुपीतः स्वच्छः काषा
यकः स एवोक्तः आनीलशुक्लव
र्णः स्निग्धः सोमालकः स्वतौः
स्वम लोहितोयः सएवकलप
द्मरागसंज्ञः स्यात् अपिचेन्नील
संज्ञः सएव कथितःसुनीलः।
सन् स्वर्णंवैदूर्यमणोरिव महि।
ते हासाव लभ्याव विरा धारणक
लेव नहत् किंत सीगांहनमरो।
भवति इति गारुडे ७५ अध्यायः
पकारान्तं बाण पुष्पसमः का।
मास्त्वक्षुभाव सा विकरणः पुरे

पनदः पुष्पः पुष्परागमणिर्भृतः
दैत्यधातुसमुद्भूतः पुष्परागमणि
र्द्विधा पद्मरागाकरेकश्चित् कश्चि
न्मार्त्योपलाकरे ईषत् पीतच्छवि।
च्छाया स्वच्छकान्तमनोहरम् पुष्प
रागमिति प्रोक्तं रंगसोमममहीभुजा
ब्रह्मादिजातिभेदेन तद्धि ज्ञेयं चतुर्वि
धं छायाचतुर्विधा तस्य सिता पीता।
सितासिता इति युक्तिकल्पतरुः
पुष्परेणुः पुं परागः इति शब्दरत्ना
वली ॥ पुष्परोचनः पुं नागकेश
रः इति त्रिकाण्डशेषः ॥
पुष्पलावः पुम् मालकारः इति।
जटाधरः ॥ पुष्प लावी ॥
पुं मालाकारः इति हेमचन्द्रः ॥
पुष्पलिट् पुं भ्रमरः इत्यमरः।
पुष्पवती स्त्री रजस्वला इत्यमरः
पुष्पविशिष्टे त्रि ॥
पुष्पवन्तौ पुं एकयोक्त्या चन्द्रसू॥
र्यौ इत्यमरः ॥
एकयाऽक्त्या अपृथग्वचनेन चा।
न्द्रार्कौ पुष्पवन्त् शब्दवाच्यौ ॥
नतु पुष्पवानिन्दुः सूर्योवेत्य॥
भिधीयते मांजे एक योक्त्ये॥
ति भिन्न प्रयोगेनैवेत्यर्थः ॥
अतएव ॥ ॥
इतिराजनिर्घण्टः ॥

द्विकत्वात् सदाद्विवचनमिम
ष्टः पुष्पं विकाशस्त्वयोगाद्वतः
पुष्पवन्तौ शाद्वौः दन्तौरुक्तौःपि
रविशशिनौ पुष्पवन्तावाविति
नाममाला इतितट्टीकायांभरतः
पुष्पवाटी स्त्री पुष्पोद्यानेकुल
वागान इतिभाषा यथा वाटी।
पुष्पाहृतावासौ तत्र रामः श।
सैरिका इतिहेमचन्द्रः ॥
पुष्पवाहनः पुम् पुष्करराजः
यथा राजा पथोक्तेच पुनरकरोत्
पुष्पवाहनः विभूतिं द्वादशीकृ
ता सुगतः परमांगतिं इत्यग्नि
पुराणे ॥ पुष्पशकटी स्त्री आ।
काशवाणी यथा दिव्योक्तिः पु।
ष्पशकटी देवप्रश्नउपश्रुतिः इ
ति त्रिकाण्डशेषः पुष्पशरः पुं
कन्दर्पः कुसुमेषुदर्शनात् ॥
पुष्पशरासनः पुम् कन्दर्पः
पुष्पधन्वदर्शनात् ॥ ॥
पुष्पशून्यः पुं उडुम्बरः इतिरा।
जनिर्घण्टः कुसुमरहिते त्रि।
पुष्पसमयः पुम् वसन्तः इत्यम
रः पुष्पसारः पुं पुष्पद्रवः इ
तिराजनिर्घण्टः ॥
पुष्पसौरभा स्त्री कलिकारीवृ
तः इतिराजनिर्घण्टः ॥

पुष्पस्वेदः पुं पुष्पद्रवः इतिरा
जनिर्घण्टः ॥ पुष्पहासा
स्त्री रजस्वला इति शब्दरत्ना
वली ॥ पुष्पहीना स्त्री उडु
म्बरवृक्षः इतिशब्दचन्द्रिका॥
निष्फला ॥ रजःशून्या ॥ इति
हेमचन्द्रः ॥ पुष्पा स्त्री
कर्णपुरी भागलपुर इति भा
षा तत्पर्यायः ॥ चम्पा १
मालिनी २ इति त्रिकाण्डशेषः
पुष्पाजीवः पुं मालकारः इ॥
ति हेमचन्द्रः ॥ पुष्पाजीवी
न् पुम् मालाकारः ॥ इतिज
टाधरः ॥ पुष्पाञ्जनम् ॥
क्ली अञ्जनभेदः तत्पर्यायः
पुष्पकेतु १ कौसुम्भम् २ कुसु।
माञ्जनम् ३ रीतिकम् ४ रीतिपु
ष्पं ५ पौष्पकं ६ तस्यगुणाः हि
मत्वे पित्तहिक्का स्वदाह वि
षका सर्तिसर्वनेत्रामय ना।
शित्वंच इतिराजनिर्घण्टः ॥
पुष्पाञ्जलिः पुम् कुसुमाञ्जलिः
प्रसूनाञ्जलिः यथा पंचपुष्पा
ञ्जलीन्दत्वा परिवारान्समर्चयेत्
इतितत्त्वसारधृतभट्टः ॥
पुष्पावचायी न् पुं मालाकारः
इतिहेमचन्द्रः ॥

पुष्पासवं क्ली मधु इति राजनि
र्घण्टः ॥ पुष्पास्त्रः पुं कन्दर्पः
इति शब्दरत्नावली ॥
पुष्पाह्वा स्त्री शतपुष्पा इति
राजनिर्घण्टः ॥
पुष्पिका स्त्री दन्तमले इति हा
रावली । लिङ्गमलम् इति हेम
चन्द्रः । अध्यायान्ते तत्प्रतिपा
दितोक्तिः । पुष्पितः त्रि जात
पुष्पः पुष्पविशिष्टः कुसुमि
तः यथा एकेनापि सुवृक्षेण
पुष्पितेन सुगन्धिना वासितं तद्
वनं सर्वं सुपुत्रेण कुलं यथा ॥
इति चाणक्यः ॥ पुष्पिता
ग्रा स्त्री छन्दोविशेषः तस्य ल
क्षणम् अयुजि नयुगरेफतो
यकारयुजि च नजौ जरगाश्च पु
ष्पिताग्रा उदाहरणं करकिस
लय शोभया विभाती कुचफल
भारविनम्रदेहयष्टिः स्मितरु
चिरविलास पुष्पिताग्रा वनभु
वि युवती हरेर्मुदेऽभूत् इति
छन्दोमञ्जरी ॥ पुष्पेषुः पुं
कामदेवः इति हेमचन्द्रः ॥
पुष्यः पुं अश्विन्यादिसप्तविंशति
नक्षत्रान्तर्गताष्टम नक्षत्रं तच्च वा
णाकारैकतारात्मकं इति ज्यो
तिषं तत्पर्य्यायः । सिध्यः २

तिष्यः ३ इत्यमरः पुष्यः ४ इति
भरतः ॥ तस्य स्वरूपं यथा
बालपीठ कठिनी रजः समेमध्य
माश्रित विहायसे गुरौ मौलिका
न् इषतन्नावलोचनेऽलोचनादि
क्रमिताः गताः कलाः २५२ इति
कालिदासकृत रात्रिलग्ननिरूप
णम् तज्जातस्य फलम् प्रसन्न
चः पितृमातृभक्तः स्वधर्मयुक्तो
ऽभिनयाभियुक्तः भवेन्मनुष्यः
खलु पुष्यजन्मा सन्मानवानीकर
करवाहनाढ्यः इति कोष्ठीप्रदीपः
तन्नक्षत्रे गंगास्नान फलं यथा
संक्रान्तिषु व्यतीपाते ग्रहणे च
न्द्रसूर्ययोः पुष्ये स्नात्वा तु जाह्न
व्यां कुलकोटीः समुद्धरेत् इति ब्र
ह्माण्डपुराणं ॥ पौषमासः क
लियुगः इति मेदिनी ॥
पुष्परथः पुं यत्र चक्रयाने यु
द्धार्थं न भवति किन्तु यात्रोत्सवा
र्थोऽस्ति तत्पर्य्यायः चक्रयानं
२ इत्यमरः ॥ पुष्पलकः पुं
गन्धमृगः लूपनकः कीलः
इति मेदिनी ॥ पुष्यस्नानं
क्ली पुष्याभिषेकः तस्य विधिर्य
था मार्कण्डेय उवाच शृणु राजन् प्रवक्ष्या
मि पुष्यस्नानविधिक्रमम् ॥

येन विज्ञातमात्रेण विज्ञानमुप
तिष्ठते पौषे पुष्यगते चन्द्रे ।
पुष्यस्नानं नृपश्चरेत् सौभाग्यक
ल्याणकरं दुर्भिक्षमरकापहं वि
प्रादिकृष्टकरणे व्यतीपाते च वै
धृतौ वज्रे शूले हर्षणादौ योगेषु
दिनलभ्यते तृतीयायुक्त पुष्यहे
व्यविसौ विकृजेहनि तदा समस्तदो
षाणां तत्स्नाने हानिकारकम् ।
ग्रहदोषाश्च नायन्ते यदि राज्येपृ
थेतयः तदा पुष्यसमाचेन्न कुर्यात्स्ना
नात्ते पितत् इयन्त्र ब्रह्मणा शान्ति
हहित्राय रवेषु शक्रार्थं सर्वदेवा
नां शान्त्यर्थं च जगत्पते ॥ तुषके
शास्थिवल्मीक कीटदंशादिवर्जि
ते शर्कराकृमिभस्मादि दोषेण
परिवर्जिते ~~शर्कराकृमिभस्मादिदो~~
~~षेणपरिवर्जिते~~ काकोलूककङ्क
कैश्च काकोलैर्गृध्रश्येनकैः वर्जिते
कण्टकिवनबिभीतकविवर्जिते
पिशृश्मशानकाम्याव जलौकाद्यै
र्विवर्जिते सुस्थाने चम्पकाशोकव
कुलादिविभूषिते हंसकारण्डवा
कीर्णे सरसी रेखावाम्बुचो पुष्यस्ना
नाय नृपति गत्वा यात् स्थानमुत्त
मं ततः पुरोहितो राजा नानावादि
त्रनिःस्वनैः प्रदोषसमये गच्छेत्तत
स्था ॥

ने हर्षवासरे तस्य स्थाने प्यकोट्ठे
ष्ठा दिशिस्थिता पुरोहितः सुगा
न्धचन्दनैः पात्रैः कर्पूरापिवासि
तैः गोरोचनाभिः सिद्धार्थैः रक्तनी
लफलादिभिः गन्धद्वारेत्यादिभि
स्तु मन्त्रैः सर्वापि वासिकैः अधि
वासयेत्तत्स्थाने पूजयेत्तत्र देवताः
गणेशं केशवं शाक्रं ब्रह्माणं चा
पि शंकरं उमया सहितं देवं सर्वा
श्च गणदेवताः मातृश्च पूजयेत्तत्र
नृपतिः सपुरोहितः मंगलान्सक
लान् कृत्वा नानानैवेद्यसंचयं सद
धात्रपायसंस्वाद्य फलमोदकया
वकैः अधिवास्य ततस्थानं हवी
सिद्धार्थकादिभिः तस्मात्स्थानात
भूतानि सादयेत् प्रमीरयन् अप
सर्पन्तु ते भूता ये भूता भूमिपालकाः
भूतानामविरोधेन स्नानमेतत्क
रोम्यहं ततः करोत्प्रतिक्रामन्त्रे
णानेन पार्थिवः आवाहयेदिमा
न्देवान् पुष्यस्नान पुष्याभिषेकतः
आगच्छन्तु सुराः सर्वे येऽत्र स्नानाभि
लाषिणः दिशोऽभिपालकाः सर्वे
ये चान्ये यज्ञभागिनः ततः पुष्पा
ञ्जलिं दत्वा पुनर्मन्त्रं पठेदिमम्
अद्यतिष्ठन्तु विबुधाः स्थानमा
साद्य मामकम् ॥ श्वः पूजा ॥

प्राप्य ग्रानारे दत्वा शान्तिं महीभु
जे सत्रतोन्नृपतीरात्रिं नयेत्तस्य पु
रोहितः स्वप्नेशुभाशुभंविद्यात्स्व
पत्तस्यपुरोहितः ॥ कृत्वा पूजा
न्तुदेवानां रात्रावस्थाने नृपः स्वपेत्
शुभाशुभफलंस्वप्ने तेषुंदोयन्त
समन्ते दुःस्वप्नदर्शनेचैतस्मात्तदि
पुष्याभिषेचने होमंचतुःशतं ॥
कुर्य्याद्दृष्यान्वापि गवांशतम् गो
वाजि कुंजराणांच प्रासादस्यगि
रेस्तथो: आरोहणंशुभकंचैत्तास्य
श्रीवृद्धिकारकं दधिदेवसुवर्णा
नां भुजंगस्यचदर्शने वीनाहवात
नफल पुष्पच्छत्रविलेपने पि
तोश्वच्छत्रशार्दूलानां पद्मस्यच
हृदांतथा लाभःस्यपुरःशास्त्रोर
लंकारस्यभूष्टतः दर्शनेचोपरा
गस्य निग्रहेनात्यवन्धनम् मोस
स्यभोजनेनचैव पर्वतस्यविवर्त्तने
नाभिस्यचोतत्नृपाणि स्तेनमात्रे
रोदने अगम्यागमने कूपपंक
गमीवतीर्णाना पर्वतस्यतथानः
द्याः प्रोतारःशत्रुकर्त्तनम् स्वप्न
श्मशानेचैव याने हविर्मये ॥
देवः भोजने पायसस्यापि मनु
ष्यारोहणं तथा कल्याण स
र्व सौभाग्य ॥ ॥

राज्यशत्रुतयोस्तथा पतेत्वमाश्व
कुर्वन्ति नृपस्यनृपसत्तम रविरोष्ट्
महिषाणान्तु आरोहोराज्यनाश
कः नृत्यगीतेतथाहास्य पापस्या
पशुभप्रदः रक्तवस्त्रपरीधाने र
क्तमाल्यानुलेपनम् रक्तो हृतोस्ति
पंचैव कामयन्नरमाम्नयात् हृ
यानेप्रवेशश्च दक्षिणाशागतिस्त
था पंके निमज्जनेस्नाने भार्य्याद्
त्रविनाशने नाभोयसम्भवेनस्वप्ने
नत्वन्नमतिस्तेपस्यच आदायगर्भना
डीनांकेशानोद्यातिविद्दुते सत्रनाम्ना
संप्राप्य महाकल्याणमाप्नुयात्
दीर्घविंशतिहस्तन्तु हस्तषोडशवि
स्तृतं कुर्य्यात्लक्षणोपेतं यज्ञमण्ड
लमुत्तमे ततोःपरेःक्रिस्ववाके मा
र्त्तणपूजनेनचैव कुम्भस्यंनावसा
थांतो वृद्धिश्राद्धेनचैवच चन्दनाग
रुकस्तूरी धूपकर्पूरचूर्णकैः सम्
च्यमण्डलस्थाने तस्मिन्होमम
वेनमः अश्वानां कुम्भडिम्भवेलि
खेन्मन्त्रदृपंचतुथः मन्त्रविन्मण्डल
लश्च सवैःकमलसम्भवैः कौ
वेरैवा तालिकाख्यं मध्यमेमंड
लेलिखेत् चतुर्हस्तप्रमाणान्तं
मण्डलं विलिखेत्ततः ॥ हस्त
प्रमाणोपमन्तु मण्डलस्यप्रकी ॥

रजो

र्त्तितम् द्वारणिमार्द्धहस्तानि क
र्णिकाकेशरोज्वले सितंरक्तंच
पीतंच कृष्णहरितमेवच शालि
चूर्णैस्तुकौसुम्भैः हरिद्रैहरिद्रज
वैः कुर्य्यात्तथांजनेश्चूर्णैः राजाम
ण्डलहस्तये पद्मात्ततःसमारभ्य
मालापश्चिमगामिनी पश्चिमद्वार
मध्येन यानहस्तांविनिर्द्दिशेत् प्र
त्येकद्वारमध्येतु पद्मंचैवाष्टपत्र
कं कुर्य्यान्मण्डलभागेन चूर्णैरे
वपृथक्पृथक् चूर्णैस्तुमण्डले
कृत्वा सत्त्राणपुत्तस्थापनतः उत्ता
नसूत्रंमध्यमे मण्डलेपूजयेत्ततः
भवनायनमइति ततोहस्तंविद्या
जयेत् सद्याबलमहस्तस्तु रजः
पातंसमारभेत् मध्यमानामिका अं
गुष्ठे रूपविज्ञायद्येच्छया अथाङ्
गुलिकृता पात्येनपुविचक्ष
णः समेरवोत्क्लया विछिन्ना
पुंजवर्जिता अंगुष्ठपर्वनेपुण्यात्
समा कार्य्याविजानता सेसक्तेवि
षमंस्थूलं विच्छिन्नेकृशाहतम्
पर्यन्तमर्पितेकस्त्र मालिखेतक
ल्पवन सेसक्तेकलहंविद्यात् द्वे
रेखे तविग्रहं अतिस्थूले भवेद्या
धिर्विनिम्पीडा विमिश्रिते वित
ष्णुभिं भयमाप्नोति शत्रुपक्षा
तत ॥ ॥

सेशयः कृशाणे चार्थहानिःस्या
च्छिन्नायांमरणंध्रुवं वियोगोवा
भवेत्तस्य इष्टद्रव्य सुतस्यवा अप्र
विदितालिवेपस्तु मण्डलेतय
थेच्छया सर्वदोषानवाप्नोति ये
दोषाःपूर्वभाषिताः ॥ सितसर्षप
पूर्वाह्ना रेखाःकार्य्याःप्रमाण
तः विमलेविजयेभद्रे विमानेशु
भदेशिवे वर्द्धमानंचदेवेच वत्ता
श्यकामदायुकम् रुचकेस्वस्ति
काख्यच द्वादशैतेतमण्डलाः यथा स्थानं यथा
पत्तंयोजनीया विचक्षणैः मध्य
रेमध्यमानेन पीठपार्श्वस्वरासरैः
पीठपथावर्णाध्याय निर्मिताविः
स्वकर्मना कर्त्ताकर्त्ताततदेवाना
मसिता तेपृथक्पृथक् यतः हो
त्वालकलशा स्तनलेपविकीर्त्तिताः
नवैवकलशाःप्रोक्तानामतस्तान्
वोधत गोहाद्यगोहामस्तो मधू
रेवस्मतथापरः मनोहरावसिभद्र
श्च विरूपस्तुशोषकः इन्द्रिय ॥
श्चात्र विजयो नवमःपरिकीर्त्ति
तः तेषामेवक्रमाद्रूप नवनामा
नियावित् शृणुनामपुराणेपवशा
सिद्धानिर्सदेवरि सितीन्द्रःप्रथमः
प्रोक्तो द्वितीयोजलसम्भवः य
वनागनी ततोद्योत्त यजमानस्ततः
परः उ ॥

कोषसम्भवनामात षट्ःसपरि। कीर्तितः सोमस्तसप्तमःसोकश्चा दिक्पोस्ततथाष्टमः क्षितयोनामः कलसो घोसोनवमउच्यते सतपः चतुरवःप्रोक्तो महादेवस्वरूपधृक वटस्यपंचवक्त्रेषु पंचवक्त्रः स्वय स्तथा यथाकाष्टास्थितःसम्यक वामदेवादिनामतः मंडलसवः पर्मान्तः पंचवक्त्रं चटेमसेत दि तीन्दृष्टर्वतोम्यस्य पश्चिमेजलस भवम् वायव्येवायवेम्यसप्राग्ने। ये स्तम्भिसंभवम् नैर्ऋत्यसायजमा नन्तु पेशाम्प्रकोषसम्भवे सोः मण्डलरतोम्यस्य सोदक्षिणतोम सेत ॥ मसेस्वकलसांश्चैव तेषुः चैतान्विचिन्तयेत कलसानेतु देवब्रह्मा श्रीवायोशकेरःस्थितः मूलेतस्थितो विस्तु मध्येमातः गणाःस्थिताः दिक्पालादेवताः सर्वा देवयतिदिशादश ऊर्ध्वेत सागराःसम समद्वीपाश्चसंस्थिताः नक्षत्राणि ग्रहाःसर्वे तथैवऊ। लपर्वताः गंगाद्याःसरितःसः र्वा वेदाश्चत्वारएवच कलसेषु। स्थिताः सर्वे तेषुतानपिचिन्तयेत ॥ रत्नानि सर्ववीजानि पु ष्पा णिच फला ॥

निच वज्रमौक्तिक वैदूर्य महाप द्मेन्द्रस्फाटिकैः सर्वधामसमयेवि ले मागधोद्भवंतथा वीजपूरक जम्बीर काश्मीरा म्रातदाडिमान् यवंशालिचनीवारं गोधूमंसित सर्षपम् कुंकुमागुरुकस्तूरी मधु नं रोचनंतथा चन्दनंचतथामांसी मेलाकुष्टंतथैवच कर्पूरंपत्रवंड च जले निर्यासकाम्बुदे शैलेयं बदरंजाती पत्रपुष्पंतथैवच का लशाकं तथाष्टकका देवीदूर्वाक मेवच वचाधात्री समंजिष्ठा तकुः कंमंगलाष्टकम् हरिद्रोमोदनिको भद्रा शतमूली प्रोक्ता वदीम् पाः र्णानां सर्वलोकहा सहदेवागजा कया हरिणकाघासिता पाठा शंखा पिरसिकान्तो व्याघ्रकंगजदंतं च शतपुष्पा पुनर्नवा आली देवी शिवोक्ता सर्वसन्धानिकान्तथा समालम्भश्यभानेतान् कलसेषुनि धापयेत कलसस्ययथादेश विधि शम्भुगदाधरम् यथाक्रमेषु। यित्वा शम्भुंशक्तानयातेन प्रा। सादेनतमन्त्रेण शम्भुमन्त्रेणशा। करम् प्रथमं पूजयेन्मध्ये ना। नानैवेद्यवेदनैः दिकपालानां घटेष्वेव दिकपालानपिपूजयेः

त् पूर्ववदिष्ट्यापितेषु ग्रहाः णांकलसेषुच नवग्रहानपू जयेत मातृर्मातृचटेषुच सर्वे देवाघटेपूज्या वटकेषोष्टध कर्षक तथैवनत्रसर्वाक्ताः सदामुख्यानमान्दप भक्ष्यैभो। ज्यैश्चयथैश्च पुष्पैर्नानाविधैः फलैः यावकैःपायसेश्चापि। यथा सम्भवयोनितैः पुष्पा। स्तानापनृपतिः पूजयेतसक लानसुरान् दक्षिणेमण्डलस्य घ कुण्डेनिर्म्मायपायसैः सः मिद्भिःशालिसिद्धार्थैर्हुतैर्देवा तानैस्तथा केवलैश्च तथैवाज्यैः पूजयेतसकलानसुरान् होमा नेनोपयेहृदै नृपःसार्द्धपरोहि तं होमान्तेमण्डलोदीच्यां वेदि॥ कायांसपट्टकं रोचनाख्यमले। कारान् तथासर्वाभियोजयेत हस्तान्तलमंगष्ट हिदंशाउः लथावधि हृतंवाचनरसेवा प। मकत्रिकसेदितं स्वस्तथानृपमः मध्येत मांसलिकविनायकैः श्रीः श्रीहस्तोवराहोहा स्वामीदेवी॥ पुभालिता रत्नैःसर्वैरलंकारैः प हेकार्यविहितलकं हस्तविस्तारपु क्तायं कर्मकमहदेशोलं स्नानार्थं सार्द्धहस्तन्तु पट्टहंमासनान्वितं श याचतगुणादीयां धत्त॥

मानन्तुपीठकम् गजसिंहकृता टोपं हेमरत्नविभूषितं सिंहासं सार्द्धविस्तारा हृष्टासनमथापि। वा व्याघ्रचित्रकपट्टैर्वा उपधा। नानिकारयेत प्रम्भैर्वा निर्मितेश्च र्मि मसूतुलकपूरितान् शाखादे व्याह्विस्तीर्णा चतुर्हस्तासले। त्तणा विनस्तिपिकमिच्छति न पत्रगुरुवियया सार्द्धचन्द्रसमे कृत्या दासनेचतुरस्रकम् उप धानानिशय्यायाः कर्णादिमूल देशतः षोडशैवात्रकार्याणि। वर्णचित्रकृतानिच यानेसिंहासने पट्टे शय्यायकवलादिके राज्ञो न्नूतनयोगेपत हेयाउलरतोम्यस त् तेषांतपश्चिमेस्थाणी रत्नौघनि चितेवरे पर्य्यंकेयतदावीय नि। र्मितेमहदाल्परे अर्द्धाच्छादनसं। युक्ते चर्म्माहम्माचनत्पम् वृषभ स्यनथार्णाया: सिंहव्याघ्रेलयाः। पि पादपीठेरत्नयुते पादावारोप्य पार्थिवः तस्मिन्पर्य्यंकपट्टेस्थे चर्मवस्त्रवचलहये नानालंकार भूषाढ्ये नृपतिरत्नमालिनम् ॥ स्नापयेद्वाह्मणैःसार्द्धं राजानंसद्व संगते सप्तौनकं वलंकृत्य रत्नवस्त्रा वयोभितय कलसैर्वलिपूर्णकैः॥ शान्तिपूर्णैश्च स्नापयेत ॥

अष्टौ षोडश विंशाष्टशतमष्टापि
कं च वा कलसानां समाख्याता ।
अधिकस्यान्तरोत्तरम् जयकल्याण
देह्यस्मिन् मंगलोस्थैर्यप्रशान्तये । वै
स्रवैश्रवदिक्पालैर्ग्रहमन्त्रैश्च ॥
मातृकैः आज्येनैनः समुद्दिष्टमा
ज्ये पापहरं परम् आज्येन तु रणा
माहारं माज्येलोकाः प्रतिष्ठिताः
भौमान्तरीक्षे दिव्यं वा यत्तेकल
षमागतम् सर्वं तदाज्यसेकस्य ॥
नाशात् प्रणाशमुपगच्छति ततो
ऽपनीय गजाज्ञात् कम्बलं वस्त्र
मेव च कलसैः स्नापयेन्नृपं पुष्य
स्नानार्थपूरितैः ॥ यत्तिम्मन्त्रैर्नर
श्रेष्ठ तत्तत्स्नानार्थसाधकैः स्ना
त्वामभिषिंचन्तु ये च सिद्धाः पु
रातनाः ब्रह्मविष्णुमहेशाश्च सा
ध्याश्च समरुद्गणाः आदित्या व
सवो रुद्रा अश्विनेयौ भिषग्वरौ
अदितिर्देवमाता च स्वाहा ल
क्ष्मीः सरस्वती कीर्तिर्लक्ष्मीर्धृतिः
श्रीश्च सिनीवाली कुहूस्तथा ॥
दितिश्च सुरसा चैव विनता कद्रु
रेव च देवपत्न्यश्च याः प्रोक्ता दे
वमातर एव च सर्वास्त्वामभिषिं
चन्तु सर्वे चाप्सरसांगणाः नक्ष
त्राणि मुहूर्ताश्च पक्षाहोरात्रसं
धयः संवत्सरो दिवा रात्रिः क
लाकाष्ठाः क्षणा लवाः

सर्वे त्वामभिषिंचन्तु कालस्याव
यवाश्च ये वैमानिकाः सुरगणा
मनवः सागरैः सह सरितश्च म
हानागा यक्षाः किंपुरुषास्तथा
वैखानसा महाभागा द्विजा वै
हायसास्तथा सप्तर्षयः सदारा
श्च ध्रुवस्थानानि यानि तु मरी
चिरत्रिः पुलहः पुलस्त्यो भृगु।
रंगिराः क्रतुः सनत्कुमार।
श्च सनकोऽथ सनन्दकः सना
तनश्च दक्षश्च जैगीषव्योऽथ नन्द
नः एकतश्च द्वितश्चैव त्रितो गा
लवाः कश्यपौ दुर्वासा दुर्वि।
नीतश्च कण्वः कात्यायनस्तथा
मार्कण्डेयो दीर्घतपाः शुनःशे
फो विदूरथः और्वः संवर्तक।
श्चैव च्यवनोऽत्रिः पराशरः द्वैपा
यनो यवक्रीतो देवरातः सहा।
नुजः एते चान्ये च बहवो देवव्र
तपरायणाः सशिष्यास्ते अभि
षिंचन्तु सदारास्तपोधनाः ॥
पर्वतास्तरवो नद्यः पुण्यान्याय
तनानि च प्रजापतिर्दितिश्चैव गा
वो विश्वस्य मातरः वाहनानि च।
दिव्यानि सर्वे लोकाश्चराचराः।
अग्नयः पितरस्तारा जीमूताः खं।
दिशो जलं एते चान्ये च बहवः पु
ण्यसंकीर्तनाः शुभाः तोयैस्त्वामभि
षिंचन्तु सर्वोत्पातनिवर्हणैः इत्ये
वमुभ ॥

दैवत्यै मन्त्रैर्दिव्यैस्तथापरैः शैवै
र्नारायणै रौद्रै र्ब्रह्मशक्रसमुद्भवैः
आपोहिष्ठादिरण्यैयानि भस्मवेति।
सरेति च मानस्तोकेति मन्त्रेण गा।
न्धद्वारेत्यनेन च सर्वमंगल्यमंगा।
ल्यैः श्रीश्चतेग्रहयोगिभिः इत्ये
वं स्नानमासाद्य गात्रमाहस्पकंब
लैः सर्वमंगलमन्त्रेण वस्त्रकार्पा
सकं धियात् आचम्य च ततो देवा
न् गुरून् विप्रांश्च पूजयेत् धजंच्छत्रं
चामरं च वण्टामस्थान् गजोत्त।
धा मंत्रेण साधारयेत् ततो गच्छे
दुताशनम् तत्र गत्वा वह्निमध्येव
न्हि श्रीवीत्यपार्थिवः अनिमि।
त्त निमित्तानि लक्षयेत्तत्रविन्नुतिः
दैवज्ञं कुम्भकामाम्य वह्निपौर।
जनैर्वृतः वादित्रघोषैस्तु मूलेस्त
याक्षौर्यस्त्रिकैः शुभैः कृत्वा शेषे
पुनः शान्ति माशीर्वाद्य च वै द्विजा
न् हर्षणं विधायाविधिवद्दक्षिणां
कनकाएसुन धान्यानि गाश्च वा
सांसि दत्वा कुर्याद्विसर्जनम् ॥
ततः शेषजलैः सर्वा नमात्यादीन्।
पुरोहितः सेचयेत्तत्रसंगमश्च वे
लेचापि सतापूरकम् एवं कृत्वा न
पः पश्चात् त्रिरात्रं संयतो भवेत् ॥
मोसमे पुनर्हीनश्च कुर्या ॥

न मंगल्यसेवनम् पुष्यनक्षत्रयुक्ता
न तु नोपायदि लभ्यते तस्याः पूजा
सदादेवी चण्डिका शंकरेणाह पं।
चालिका विवाहाद्यैः शिशूनां कौ
तुकैस्तथा वैवाहिकेन विधिना।
मोदयेच्चण्डिकां शिवां चतुष्पथेषु
वेषु देवदेवीगृहेषु च पताकाभि
रलंकुर्यात् देवं कुर्वन्न सीदति एवं।
कृत्वा शान्तियागं तथा पुष्याभिषेच
ने च तरंगैः समं राजा भार्याभिस्त
नयैः सह राज्यमण्डलसंयुक्तः पर
त्रेह न सीदति नातः परतरो यज्ञो।
नातः परतरोत्सवः नातः परत।
रा शान्ति र्नातः परतरं शिवम् ॥
अनेनैव विधानेन नृपतेरभिषे।
चनम् युवराज्याभिषेकं च कुर्या।
द्राज्ञः पुरोहितः नृपाभिषेककरण
माद्वैयदिसमाचरेत् अनेनैव विधा
नेन स्थिरः स्यान्नृपतिस्तदा ओं
अयं यज्ञः समुद्दिष्टः शक्रार्थं ॥
ब्रह्मणा पुरा एवं यज्ञे नृपोदृष्टा
परत्रेह न सीदति इति कालि।
कापुराणे पुष्याभिषेकः ८९ ॥
अध्यायः ॥
पुष्या स्त्री पुष्यनक्षत्रम् इति॥
शब्दरत्नावली ॥ पुष्प क ॥
ब्रवपे अनोदरे आहरे इतिकवि

कल्पद्रुमः ॥ पुस्तं क्ली
लेप्यादि शिल्पकर्म्म आदिना।
काष्ठपुत्तलिका खनित्रखन
नादि कर्म्मपुस्तने इतिसन्नत्या
द्यः ॥ मृदा वा दारुणा वाथ वस्त्रे
णाप्यथ चर्म्मणा लोहरत्नैः कृतं
वापि पुस्तमित्यभिधीयते इत्यमर
टीकायां भरतः ॥ पुस्तकम् इति
मेदिनी स्त्रियाम् पुस्ती इत्यपि
भवति ॥ पुस्तकम् क्ली
स्त्री पुस्तम् प्रति इति भाषा ॥
तस्य परिमाणम् यथा मानेव
द्ये पुस्तकस्य शृणु देवि समास
तः मानेनापि फलं विद्यादमाने
श्रीर्हता भवेत् हस्तमात्रं मुष्टिमा
त्रं मावाकद्वादशाङ्गुलम् दशा
ङ्गुले तथाष्टौ च ततो हीनं न कारये
त् ॥ तस्य वेष्टनं यथा वेष्टनं मुष्टि
हस्तं वाकमात्रे विस्तृतकम् समा
भागे महेशानि हस्तार्द्धे तु पत्रक
कम् अष्टांगस्य परित्यज्य मध्ये वे
ष्टनं कारयेत् आदेशाद्धी भवेद्ध॥
मो वंशले वा समाचरेत् ॥
पुस्तकस्य च आधन्ते यन्त्रवे॥
ष्टं विकल्पयेत् ॥ आर्यादा ॥
निर्भवे दास यनानोवा ल्पयो भवे
त् द्रव्यसम्भवे भवेत् पीडा वन्त्र
न ॥

शुभदं भवेत् चतुष्कोणो विस्तव॥
स्त्रिकोणो मरणं भवेत् पुस्तक
करणपत्रे यथा भूर्जेवा तेजपत्रे
वा तालेवा ताडिपत्रके अगुरुणा
पिदेवेशि पुस्तकं कारयेत् प्रिये
सम्भवे स्वर्णपत्रेव ताम्रपत्रेच शे
करि अन्यवृक्षत्वचि देवि तथा के
तकिपत्रके मार्त्तण्डपत्रे रौप्ये वा व
टपत्रे वरानने अन्यपत्रे वसुदे
लिखित्वा यः समभ्यसेत् स दु
र्गति मवाप्नोति धनहानिर्भवेद्ध्रु
वम् ॥ पुस्तकवेदलिखन निषे
धो यथा वेदस्य लिखनं कृत्वा यः
पठेद्ब्रह्महा भवेत् पुस्तकं वा गृहे
स्थाप्य वज्रपातो भवेद्ध्रुवम् ॥
युगभेदे पुस्तकादि तस्यदेवा य
था सत्येऽस्त्वे स्थितः शम्भुः शू
लपाणि स्त्रिलोचनः प्रजापतिर्द्वा
परेच त्रेतायां सूर्य्य एव च कृतेष
मे पिनाकीच कलौ लिप्यस्त वेहरिः
तल्लेखक पूजाफलम् यथा श्रा
द्धे च समासेच लेखकं प्रति
पूजयेत् हविर्वे गन्धपुष्पाद्यै र्व
स्त्रेश्च सुमनोहरैः यावदक्षरसं
ख्याने प्रतिपत्रेच सुन्दरि ॥ ता
वद्युगसहस्राणि ब्रह्मलोके वसेच्च
चिरम् वेतन ग्रहणे लेखकस्य।

दोषो यथा वेतने यस्तु गृह्णीया
त् लिखित्वा पुस्तकं सत् यावद
क्षरसंख्यानं तावद्व नरके वसेत्
भूमौ पुस्तकलेखन स्थापन नि
षेधो यथा न भूमौ विलिखेद्ध
र्म्मं मन्त्रं न पुस्तकं लिखेत् न पुस्त
पुस्तकं स्थाप्य न पुस्तमाहरेत् तत
तत् भूकम्पः ग्रहणे चैव पुस्तदेवा
य पुस्तकं भूमौ तिष्ठति देवेशि।
जन्मजन्म समूर्खता तदा भवति
देवेशि तस्मात्तत् परिवर्ज्जयेत्
इति योगिनी तन्त्रे तृतीयभागे
सप्तम पटलः तस्य दानफले य
था विप्राय पुस्तकं दत्वा धर्म्म
शास्त्रस्य च द्विजपुराणस्य च यो
दद्यात् सदेवत्वम वाप्नुयात् शा
स्त्रदृष्टा जगत् सर्वं सम्भूतं च
शुभाशुभम् तस्मात् शास्त्रं प्रयत्
तेन दद्याद्विप्राय कार्त्तिके वेदवि
द्याचयोर्दद्यात् स्वर्गकल्पत्रये वसे
त् आत्मविद्याच योर्दद्या तस्य सं
ख्यानविद्यते श्रीतिकस्य दाना
नि श्रीतिकस्य फलानि च शास्त्रे
कामदुगाधेनुः पृथिवी चैव शा
श्वती इति पाद्मोत्तरखण्डे १२० ॥
अध्यायः वेदशास्त्रादि दानफले
यथा वेदार्थ यज्ञशास्त्राणि ध
र्म्मशास्त्राणि चैवहि ॥

मूल्येन लेखयित्वा यो दद्याद्याति
स वैदिकं इतिहासपुराणानि लि
खित्वा यः प्रयच्छति ब्रह्मदानसमं
पुण्यं प्राप्नोति द्विगुणीकृतं इति
गारुडे २१५ अध्यायः ॥
भागवत दान विधानन्तु पाराय
णप्रसङ्गे द्रष्टव्यम् ॥
पुस्तकर्म्मा त्रि लेप्यादिशिल्पक
र्म्मकर्त्ता इति हलायुधः ॥
पू ड ॥
पू डय शोषे इति कविकल्पद्रुमः
पू अ गि ॥
पूगम् क्ली गुवाकफले इत्यम
रटीकायां रायमुकुटः ॥
पूगः पुं गुवाकः सम्भूहः इत्यम
रः छन्दः भावः क्रमुकः इति
हः इति शब्दरत्नावली ॥
पूगपात्रम् क्ली पूगपीठे पिक॥
दानी इति भाषा तत्पर्य्यायः फरु
वकम् २ इति हारावली ॥
पीठपीठम् क्ली पूगपात्रे तत्प
र्य्यायः करकोलः २ पतद्ग्रहः
३ इति त्रिकाण्डशेषः ॥
पूगपुष्पिका स्त्री विवाहसम्बन्धि
पुष्पताम्बूलम् तत्पर्य्यायः उद्गा
लिः २ इति त्रिकाण्डशेषः ॥
पूगफलं क्ली गुवाकफले तत्प

र्य्यायः शूर्पं २ विककनी ३ वि
कका ४ विककणी ५ सोंचकं ६ ऽ
हेगं ७ क्रमुकफलम् ८ इति राज
निर्घण्टः ॥ पूगपोटः पुम् हिन्ता
लवृत्तः इति त्रिकाण्डशेषः ॥
पूजक पूजे इति कविकल्पद्रुमः
पूजकः त्रि पूजाकर्त्ता यथा येत्रैव
भावस्तु विष्णुभक्तेति साचीनितौ
वेदविदो वदन्ति तथापरः पूजक
पूज्ययोरन्तरागमन्ताः प्रवद ॥
न्तितान्त इति तिथ्यादितत्त्वम् ।
पूजनम् क्ली पूजा अर्च्चनं यथा
क्रोडेन नच कर्त्तव्यो लोभेन न वयान
व मतः पूजने विधानेन यदीच्छेत्
परमां गतिं इति वराहपुराणम् ।
पूजनी स्त्री चटका इति भरतः
पूजा स्त्री पूजनं तत्पर्य्यायः न
मस्या १ अपचितिः २ सपर्य्या ३ ।
अर्च्चा ४ अर्हणा ५ इत्यमरः नतिः
६ इति शब्दरत्नावली तस्याः सामा
न्यानुष्ठानं यथा आदौ बाह्यादिक
न्यासः करशुद्धिस्ततः परम् आत्म
लिव्यापकन्यासो हृदादिन्यास एव
च तालत्रयं च दिग्बन्धः प्राणाया
मस्ततः परं ध्यानं पूजा जपश्चैव स
र्व्वतन्त्रेष्वयं विधिः इति तन्त्रसारोक्ता
मतः ॥ शाक्तविषये चतुः ॥

षष्टिरुपचारा यथा आसनारोप
णम् १ सुगन्धितैलाभ्यंगः २ म
ज्जनशालाप्रवेशनम् ३ मज्जनम
णिपीठोपवेशनम् ४ दिव्यस्ना
नीयं ५ उद्वर्त्तनं ६ उष्णोदकस्नानं
कनककलशस्थित सकलतीर्थ्या
भिषेकः ८ धौतवस्त्रपरिमार्ज्जनं
९ अरुणदुकूल परिधानम् १०
अरुणदुकूलोत्तरीयम् ११ आले
प मण्डप प्रवेशनं १२ आलेपम
णिपीठोपवेशनं १३ चन्दनागुरुकुं
कुम कर्पूरकस्तूरी रोचनादिव्यग
न्धसर्व्वाङ्गानुलेपनम् १४ केशभार
स्य कालागुरुधूपमल्लिका माल
तीजाती … शाक शतपत्र ।
पूगकुहरी पुन्नागकल्हार यूथी
सर्व्वर्त्तुकुसुममालाभूषणम् १५
भूषणमण्डप प्रवेशनम् १६ भू
षणमणिपीठोपवेशनं १७ नवम
णिमुकुटं १८ चन्द्रशकलं १९ सीम
न्तसिन्दूरम् २० तिलकरत्नं २१ का
लाञ्जनं २२ कर्णपालीयुगलं २३
नासाभरणं २४ अधरयावकः २५
ग्रथनभूषणं २६ कनकचित्रपदकं
महापदकं २८ मुक्तावलिः २९ एका
वलिः ३० देवच्छन्दकः ३१ केयूरयुग
लचतुष्टयं ३२ वलयावलिः ३३ ऊर्म्मि
कावलिः ३४ काञ्चीदाम ३५ कटि।

सूत्रं ३६ सौभाग्याभरणं ३७ पाद
कटकं ३८ रत्ननूपुरं ३९ पादाङ्गुरी
यकं ४० एककरे पाशः ४१ अन्यक
रेऽङ्कुशः ४२ इतरकरे पुण्ड्रेक्षुचा
पः ४३ अपरकरे पुष्पबाणाः ४४
श्रीमन्माणिक्यपादुका ४५ स्वस
मानवेशाभिरावरणदेवताभिः स
ह सिंहासनारोहणं ४६ कामेश्वर
पर्य्यङ्कोपवेशनम् ४७ अमृतासनच
षकं ४८ आचमनीयं ४९ कर्पूरवी
टिका ५० आनन्दोल्लासविलासहासं
५१ मङ्गलारात्रिकं ५२ श्वेतच्छत्रं ५३
चामरयुगलम् ५४ दर्पणः ५५ ता
लवृन्तं ५६ गन्धः ५७ पुष्पं ५८ धूपः
५९ दीपः ६० नैवेद्यं ६१ पुनराचमनी
यं ६२ ताम्बूलः ६३ वन्दनं च ६४ इ
ति तन्त्रसारे सिद्धयामलः ॥ षट्त्रिं
शदुपचारा यथा आसनाभ्यञ्जने
तद्वदुद्वर्त्तननिरूक्षणे सम्मार्जनेऽभ
षेकादि स्नपनावाहने तथा पाद्या
र्घ्याचमनीयं च वस्त्रयज्ञोपवीतके
अलङ्कारो गन्धपुष्पं धूपदीपान्न
मेव च ताम्बूलादिकनैवेद्यं पुष्प
मालानथैव च अनुलेपनं च शय्या
च चामरव्यजने तथा आदर्शादर्श
नं चैव नमस्कारोऽपवर्त्तनम् गी
तवाद्ये च गानानि [illegible] ॥

स्तुति होम प्रदक्षिणे दन्तकाष्ठप्रदा
नं च ततो देवविसर्ज्जनं उपचारास्त्विमे
ज्ञेयाः षट्त्रिंशत्सुरपूजने इत्ये
कादशीतत्त्वम् ॥ अष्टादशोपचारा
यथा आसनं स्वागतं पाद्यमर्घ्यमा
चमनीयकं स्नानं वस्त्रोपवीतं च भू
षणानि च सर्व्वशः गन्धं पुष्पं तथा
धूपं दीपमन्नं च दर्शनम् माल्यानु
लेपनं चैव नमस्कारविसर्ज्जने अष्टा
दशोपचारैस्तु मन्त्री पूजां समाचरेत्
अथ षोडशोपचाराः पाद्यमर्घ्यं त
थाचामं स्नानं वसनभूषणे गन्धपु
ष्प धूप दीप नैवेद्याचमनं ततः
ताम्बूलमर्च्चनास्तोत्रं तर्पणं च नम
स्क्रिया प्रयोजयेत् प्रपूजायामुप
चारांस्तु षोडश ॥ अथ दशोपचा
राः पाद्यमर्घ्यं तथाचाममधुपर्का
चमनं तथा गन्धादयो नैवेद्या
न्ता उपचारा दश क्रमात् ॥ अथ पं
चोपचाराः गन्धादयो नैवेद्यान्ताः
पूजाः पञ्चोपचारिकाः इति तन्त्र
सारः ॥ अशक्तादेः पूजानिषेध.
माह अप्रवृत्तिर्न महामायां पूजयेत्
कदाचन अवपन्नाप्सरे मन्त्रे सो
भिमक्तिपुतो नरः दन्तरके सम
न पत्रैः स्मरणं च न विद्यते सर्व्वेषा
मेव मन्त्राणां स्मरणात्तरकं व्रजेत्

जान्हुं ततमेजाते नित्यकर्म्म।
नचाचरेत् नैमित्तिकंच तद्यथः।
स्वदक्कोनचाचरेत् लोभकेच।
समुत्पन्ने दारकर्म्मणिमैथुने धू
मोद्गारेतथावान्तो नित्यकर्म्माणि
संत्यजेत् दुग्धेभुक्तेतजीर्णेच नैवे
भुक्ताचकिंचन कर्म्मकुर्य्यान्नरः
रोनिसे सूतकेमृतकेतथा या
त्रेधुष्येचतान्मूले भेषजलेतुक॥
स्थितम् कणादिपिप्पलेतच।
फलंभुक्तानचाचरेत् जलस्यापि
नरश्रेष्ठ भोजनाद्भेषजादृते नि
त्यक्रियानिवर्त्तेत सूतेनैमित्तिकैः
सदा जलौकाश्चूटपादेच कृमि
गण्डूपदादिके कामाद्भ्रमनस॥
स्पर्शे नित्यकर्म्माणिसंत्यजेत् वि
शेषतः शिवापूजा प्रमीतपितृको
नरः यावद्दत्तसपर्य्यन्तं मनसा
पिनचाचरेत् महागुरुनिपातेतु
काम्यंकिंचिन्नचाचरेत् आर्त्तिन्यं
व्रतयत्रेच आद्देवयुतेचयेत् ग
हमातिथ्यविप्रंच प्रकृत्येवयथा
णिना नकुर्य्यान्नित्यकर्म्माणि
देवतःपातेचभैरव आसनेचार्चये
पात्रेच भाजनमासादयेन्नचेत्॥
ऊषरे कृमिसंयुक्ते स्थानेदृषदि।
नार्च्चयेत् नीचेरासाय ततस्थाने
भुवि:प्रयत

मानसः अर्च्चयेच्चण्डिकां देवींदे
वमस्मेच भैरव॥ द्विभागेतुकौ
वेरी दिक्शिवाप्रीतिकारिणी त
स्मातन्मुखमासीनः पूजयेच्चण्डि
कांसदा॥ पूजास्थानानि यथा लिं
गस्थापूजयेद्देवीं पुस्तकस्थानथैव
च स्थण्डिलस्थामहामायां पादुके
प्रतिमासुच चित्रेचत्रिशिखेखड्गे
जलस्थावापिपूजयेत् पंचाशदेग्
लेखड्गे त्रिशिखेच त्रिशूलके शि
लायांपर्वतस्याग्रे गंगाया मपित
तसमा आर्य्यावर्त्तमध्यदेशे तथाप
वर्तगह्वरे: देवींसंपूजयेन्नित्यं भा
क्तिश्रद्धासमन्वितः वाराणस्याम
दापूजा सम्पूर्णफलदायिनी ततः
स्तद्द्विगुणाप्रोक्ता पुरुषोत्तमसन
निधौ ततोपिद्विगुणाप्रोक्ता द्वार
वत्यांविशेषतः सर्वक्षेत्रेषुतीर्थेषु
पूजाद्वारवतीसमा विन्ध्यपादतः॥
णाप्रोक्ता गंगायामपिततसमा
आर्य्यावर्त्तमध्यदेशे ब्रह्मावर्त्ततथै
वच विन्ध्यवत्फलदापूजा प्रया
गेपुष्करेतथा ततश्चतुर्गुणाप्रोक्ते
करतोया नदीजले तस्माच्चतु
र्गुणा फला निन्दिकुण्डेच भैरव॥
ततश्चतु र्गुणाप्रोक्ता तत्पीठेश्व
रसन्नि ॥

धौ तत्रसिद्धेश्वरी योनौ ततोपि
द्विगुणास्मृता ततश्चतुर्गुणाप्रो
क्ता लौहित्यनदपायसि ततस
माकामरूपेतु सर्वत्रैवजलेष्वपि
सर्वश्रेष्ठो यथा विष्णु लक्ष्मीःसर्वो
त्तमा यथा देवीपूजातथाशस्ताका
मरूपेसुरालये देवीक्षेत्रंकामरूपे
विद्यतेन्यत्रतत्समं अन्यत्रविरलादे
वी कामरूपेगृहेगृहे ततःशतगु
णंप्रोक्तं नीलकूटस्यमस्तके ततो
पिद्विगुणंप्रोक्तं हेरुकेशिवलिंगके
ततोपिद्विगुप्रोक्ता शैलपुत्र्यादियो
निषु ततःशतगुणःप्रोक्तं कामा
ख्यायोनिमण्डले इतिकालिका
पुराणे ५४ ५० अध्यायः॥
पूजासनानि तत्फलानिच यथा
उपविश्यासनेरम्ये कुशाजिनकु
शोत्तरे रंकवेकम्बलेवापि काशा
दौवाव्रचर्म्मणि नकुर्य्याद्दर्भेनेवि
मेः शिवेकाष्ठस्नादिषु काष्ठास
नेहृयापूजा पाषाणेरोगसम्भवः
भूम्यासने गतिर्नास्ति वस्त्रासने
दरिद्रता॥ कुशासने ज्ञानवृद्धिः
कम्बले सिद्धिरुत्तमा कृष्णाजिने
धनीवृद्धी मोक्षःस्याद्व्याघ्रचर्म्म
णि॥ मन्त्रयोगेसकुलीन भोगा
र्थे सर्व॥ इति भक्तं

मासने इतिपाद्मोत्तरखण्डे ७४ ॥
अध्यायः॥ पूजाधिकारिता प्र
योजकदेवषट्क पूजा यथा गणे
शंचदिनेशंच वह्निंविष्णुंशिवंशिवां
संपूज्यदेवषट्कंच सोधिकारीच
पूजने॥ गणेशंविघ्ननाशाय निष्पा
पायदिवाकरम् वह्निंशुद्ध्यायविष्णुं
च मुक्तयेपूजयेन्नरः शिवंज्ञाना
यज्ञानेशं शिवांचहृद्विहृदये संप
ज्यतानलभेत्प्राज्ञो विपरीतमतो
न्यथा इतिब्रह्मवैवर्त्तेप्रकृतिखंडे
८ अध्यायः॥ द्वादशमासे वि
सुपूजाविधिर्यथा मत्स्ये कार्त्ति॥
केमासि नारीषष्ठ्यांसमर्च्चयेत् र
थारूढण्डदीपेच नियतात्माहृढ
व्रतः ब्राह्मणान्भोजयित्वाथ सह
सायुज्यमाप्नुयात् मार्गशीर्षेनवा
न्नेन वकषष्ठ्यांमहेशकम् समर्च्य
भोजयेद्विप्रान् वैकुण्ठपदमाप्नु
यात् धनुष्युष्णसितेदेवेशं मासमेकं
निरन्तरम् अर्च्चयेत्पुष्पासैश्च क
रवीरैः सितासितैः धूपैर्दीपैश्च
नैवेद्यै यथा शक्त्यानिवेदयेत्
समाप्ते भोजयेद्विप्रान् महाभा
गवतोत्तमान् अश्वमेधसहस्रस्य
फलमाप्नोत्यसंशयः तपोमास्य
दिते भानौ स्नात्वानद्यांविशेषतः

अर्च्चयेन्माधवीपुष्पै रक्तपद्मै
श्च भानवे पायसं विविधं दिव्यं
भक्त्या तत्र निवेदयेत् मासान्ते वै
ष्णवान् विप्रान् भोजयेत् शक्ति
तो द्विजः तपस्ये च तथा देवि मा
धवैः कुसुमैः शुभैः स्नात्वा सम्पूज
येद्विष्णुं मासमेकं निरन्तरम् शर्क
रान्वितं नित्यमपूपांश्च निवेदये
त् वैष्णवान् भोजयेद्भक्त्या मा
सान्ते शुभदर्शने मधुमासि तथा
नित्यं वकुलैश्चम्पकैरपि पूजये
ज्जगन्नाथं गुडान्नं च निवेदये
त् मासान्ते वैष्णवान् विप्रान् भोज
येत् सुसमाहितः सहस्रवार्षिके
पूजाफलं नित्यमवाप्नुयात् माध
वे पूजयेद्विष्णुं शतपत्रैर्महोत्प
लैः पूजयित्वा विधानेन दध्यन्नं
फलसंयुतम् गुडोदकं च भक्त्या वै
तस्मिन् देवि निवेदयेत् लक्ष्म्या
युक्तो जगन्नाथः प्रीतो भवति पा
र्वति ज्येष्ठे तु पङ्कजकमलैः पाट
लैः कुन्दोत्पलैः अर्च्चयित्वा हृ
षीकेशं मल्लिकाफलैर्युतं निवे
दयित्वा भक्त्या वै गवां कोटिप्रदो
भवेत् वैष्णवान् भोजयेन्नित्यं
मासान्ते भक्तिसंयुतः ब्राह्मणांश्च
शिवे सर्वं फलमानन्त्यमश्नुते आषा
ढे देव ॥

नाथीशं लक्ष्मीभर्त्तारमच्युतं श्री
पुष्पैरर्च्चयेन्नित्यं पायसान्नं निवेद
येत् मासान्ते भोजयेद्विप्रान् महाभा
गवतोत्तमान् षष्टिवर्षसहस्रस्य पू
जायाः संशयः नभोमासे च
येद्विष्णुं पुन्नागैः केतकीदलैः अर्च्च
यित्वाच्युतं भक्त्या न भूयो जन्मभा
ग्भवेत् दद्याद्धि पिष्टकान् भक्त्या श
र्कराघृतमिश्रितान् ब्राह्मणान् भो
जयित्वा तु सर्वमानन्त्यमश्नुते नभ
स्यमर्च्चयेदीशं कुन्दैः कुरुवकैरपि
क्षीरान्नं गुडमिश्रान्नं भक्त्या तत्र निवे
दयेत् गवां कोटिप्रदानस्य समहं।
स्समवाप्नुयात् इषे नीलोत्पलैर्मा
सि पूजयेन्मधुसूदनं भक्त्या नि
वेदयेत्तस्मिन् क्षीरमाज्यविमिश्रि
तम् कन्याकोटिसहस्राणि कन्या
कोटिशतानि च वैष्णवलोकमाप्नो
ति मुदितः स्वजनैर्युतः ऊर्ज्जमासे
त्वयं देवि कोमलैस्तुलसीदलैः।
पूजयित्वाच्युतं भक्त्या तत्साधु
समवाप्नुयात् इति पद्मोत्तरख
ण्डे ७५ अध्यायः द्वादशमा
सादौ दुर्गास्नानादि देवीपुराणे।
द्रष्टव्यम् ॥ । अथ देवस्नानवि
धिः स्नातः स्नानासामग्र्या आर्द्र
वाससा कृतगात्रमार्जनादि ॥

र्द्दरसमीपं गत्वा आसने उदङ्मु
खो वा प्रक्षालितपादः शुचिर्द्विवा
साः कुशहस्तः स्वाचान्तः सर्वत्र।
वीरासनोपविष्टः प्राङ्मुखोऽथवा
उदङ्मुख एव मौनी ध्यानपराय
णः कामरागभयद्वेषक्रोधमा
त्सर्य्यलोभरहितस्वस्थमनाः
सुमना वा शुचौ समुपविष्टो निष्ठ
शब्दगन्धरहिते देशे दक्षिणपार्श्वे
नैवेद्याद्युपकरणानि च वाम
पार्श्वे जलं घृतेनाथ धूपदीपौ ताम्रादि
पात्रे च यथा सन्निवेशं पाद्यार्घ्या
चमनीयपात्रे जलादिपूर्णमग्रतः
स्थापयित्वा यथालाभं यज्ञोपवी
त वस्त्रालंकरणादि संस्थाप्य ॐ
अपसर्पन्तु ते भूता ये भूता भूमि
पालकाः भूतानामविरोधेन पूजा
कर्म्म करोम्यहं इत्यस्त्राज्ञाप्य अस्त्राय
फडिति तर्ज्जन्यङ्गुष्ठयोग ध्वनिच्छो
टिकया दशदिग्बन्धनं कुर्यात्।
नादेवो देवमर्च्चयेदित्यनुरोधात्।
सर्वदेवार्च्चनेषु भूतशुद्धिमाहुरा
गमिकाः सा यथा सोऽहमिति मन्त्रे
ण जीवात्मानं नाभितो हृदिस्थप
रमात्मनि संयोज्य ततः पृथिवीज
ले जलं तेजसि तेजो वायौ तं वा
युमाकाशे प्रवेशयेत् दक्षिणाङ्गुष्ठे
न दक्षिणनासापुटं धृत्वा यामि।

ति वायुबीजेन षोडशवारजप्तेन।
वाय्वाकर्षणरूप पूरक संज्ञया वा
युचिन्तनरूपया वायव्याधारणया
देहं शोषयित्वा ततो नासापुटाव
रुद्धनासिकाभ्यां धृत्वा रमिति व
ह्निबीजेन चतुःषष्टिवारजप्तेन स्त
म्भनरूपकुम्भक संज्ञया अग्नि॥
चिन्तनरूपया आग्नेय्या धारणया देहं
दाहयित्वा लमिति इन्दुबीजेन द्वात्रिं
शद्वारजप्तेन दक्षिणनासापुटेन
वायुनिःसारणरूपया रेचकसं
ज्ञया ऐन्द्रध्यानरूपया ऐन्द्र्याधा
रणया स्थिरीकृत्य वमिति वरुण
बीजेन चतुःषष्टिवारजप्तेन जला
धिपध्यानरूपया जलाधिप धार
णया चन्द्रमण्डलादमृतं स्राव
यित्वा तेनाप्लाव्यमानं सर्वांगं
संचिन्तयेत् पुनर्नवीभूतं चिन्तयि
त्वा वाय्वादिभूतानि व्योमादिभ्यो
व्युत्क्रमेण बहिः कृत्वा हंस इति
मन्त्रेण परमात्मनो जीवं नाभिप
द्मे न्यसेत् ॥ ततऋष्यादिन्यासः
गोपाल मन्त्रस्य नारदाय ऋषये।
नमः शिरसि गायत्री छन्दसे नमो
मुखे श्रीकृष्णाय देवाय नमो हृदि
एवमन्यत्राऽऽहनीयम् । ततः प्रा
णायामः तन्मूलमन्त्रेण षोडश
वारजप्तेन अङ्गुष्ठेन दक्षिणनासा



पुटे धृत्वा वामनासया वायुं पूर
येत् अंगुष्ठानामिकाभ्यां नासापु
टे धृत्वा चतुःषष्टिवारजपेन वायुं
कुम्भयेत् वामनासा मनासिक
या धृत्वा दक्षिण नासया द्वात्रिं
शद्वारजपेन वायुं रेचयेत् पुनर्दक्षि
ण नासया पूरयेत् उभाभ्यां कुम्भ
येत् वामनासया रेचयेत् पुनर्वा
मयापूरयेत् उभाभ्यां कुम्भयेत्
वामनासया रेचयेत् पुनर्वामया
पूरयेत् उभाभ्यां कुम्भयेत् दक्षि
णयारेचयेदिति ॥ ततोवाममा
तृकान्यासः न्यासशब्देद्रष्टव्यः अ
नेकदेवपूजने तु भूतशुद्धिमातृ
कान्यासयो रविशेषात् सकृदेवा
नुष्ठानं ॥ ततः करन्यासः यथा
गोपाले ॐ क्लां अंगुष्ठाभ्यां नमः अं
गुष्ठयोः ॐ क्लीं तर्जनीभ्यां स्वाहा।
तर्जन्योः ॐ क्लूं मध्यमाभ्यां वषट्
मध्यमयोः ॐ क्लैं अनामिकाभ्यां
हुं अनामिकयोः ॐ क्लौं कनिष्ठा
भ्यां वौषट् कनिष्ठयोः ॐ क्लः
करतलपृष्ठाभ्यां फट् करतलपृ
ष्ठयोः एवमस्त्रान्तैः ॥ ततो
ऽंगन्यासः ॐ क्लां हृदयाय नमः हृ
दये हस्ततलेन ॐ क्लीं शिरसे स्वाहा
अंगुष्ठाग्रलिभिः शिरसि ॐ क्लूं शि
खायै वषट् अधोमुखांगुलिमुष्टिना
शिखायां ॐ क्लैं कवचाय हूं व्यस्त

करतलाभ्यां आशिरः पादपर्यन्त
रूपसर्वांगे ॐ क्लौं नेत्राभ्यां वौष
ट् तर्जनीमध्यमाभ्यां नेत्रयोः ॐ
क्लः अस्त्राय फट् ऊर्ध्वाधस्तात्
ये छोटिकाभि र्दशदिग्बन्धनेच
कुर्यात् एवमन्यत्रापूजनीये आ
गमोक्तादि पूजनेतु भूतशुद्ध्यादि
नियमः अन्यत्रतु नियमः ॥ ततो
ऽर्घस्थापने वामतोर्घ्यपाद्याद्या
चमनीय पात्राणि संस्थाप्य अर्घ्य
पात्रे जलगन्धपुष्पैः संपूर्णं तद्दे
वता मूलमन्त्रं सर्वदेवतासाधारण
प्रणवं वा अष्टधा जपित्वा धेनु
मुद्रया अमृतीकृत्य तदुदकं पात्रा
न्तरे किंचित् कृत्वा तेनोदकेनात्मा
नं पूजोपकरणं चाभ्युक्षयेत् प्रण
वादि तत्तद्देवता चतुर्थ्यन्त नाम्ना न
मोऽन्तेन मूलमन्त्रेण वा आत्मानं ग
न्धादिभिरभ्यर्च्य तद्रूपं ध्यात्वा तत
स्ताम्रपात्रे चन्दनादि रचिताष्टद
लपद्मे सम्बोधनान्त देवता नाम्ना
इहागच्छ मावाहनस्थापयित्वा
प्रणवेन चतुर्थ्यन्त नाम्ना आसनम्
दत्वा सम्बोधनान्त नाम्ना स्वागतं ते
इनिष्टेन दीतितत्त्वमूलमन्त्र मुद्रा
र्घं प्रणवादि चतुर्थ्यन्त नाम्ना नमो
ऽन्तेन दद्यादिति विशेषः एवंपा
द्यार्घ्याचमनीयादीनि दद्यात् पा
द्यौ ॥

योः योर्घ्यापर्यन्तनियमः ततो
घृतमधुदधिमेलकपलमितेकां
स्यपात्रस्थं पिहितंच मधुपर्कं पु
नराचमनीयंच दद्यात् ततो लो ॥
किक षष्ट्यधिकशतत्रय तोल ॥
कात्मूने वैदिकाष्टोत्तर शतपलाम्रू
न जलेन तदभावे षष्टिरक्तिक मा
सद्वयाधिक त्रयोदश तोलकरू
पवैदिकपल चतुष्टया मूनज
लेन इदं स्नानीयं एवं दुग्धादिना
पि घृतादि स्नानेतु गन्धद्रव्यं चू
र्णीक विचूर्णं मुष्णोदकेन ताल।
नेचांगे ततः पुनराचमनीयं वा।
सती पुनराचमनीयं दद्यात् प्र
त्येकमलंकारं यज्ञोपवीतं गन्ध
पुष्पं धूपम् दीपं नैवेद्यम् पुनराच
मनीयं ताम्बूलं दत्वा मूलमन्त्रम्
यथाशक्ति जप्त्वा समर्प्य त्रिः प्रद
क्षिणीकृत्य अष्टांगप्रणिपातेन
पंचांगप्रणिपातेन वा शिरसि
करद्वयसंयोगेन च प्रणम्य स्तु
त्वा प्रणवादि सम्बोधनान्त नाम्ना
त्मस्वेति विसर्जयेत् यत्र यत्र प
त्राद्रव्यासंभवस्तत्रदर्भम् जलं
देयं प्रतिष्ठित स्थिरतरप्रतिमायां
ततदावाहन विसर्जनेन स्तः एवे।
पात्रयामेजलेवा सर्वदेवपूजनेपि
यथालाभं पाद्यादिषोडशोपचारैः
गन्धपुष्पधूप ॥

दीपनैवेद्यैः पंचोपचारैः गन्धपु
ष्पाभ्यां वा केवलेन पुष्पेण केव
लेनाक्षतेन केवलेन जलेनमान
सि केनवा पूजयेत् तत्र सामान्यदेव
ता धूपः शावरादायो सगुग्गुल्वगुरु
शीरं शर्करामधुचन्दनैः धूपयो
दाज्यसंमिश्रैर्नीचैर्देवाय देशिकः
पतैर्मिलितैर्यथा लाभंवा इति
सर्वदेवतासाधारणो विधिः ॥
ततः प्रथमं सूर्य्यपूजा ॐ सूर्य्या
यनमः इतिपूजयेत् तत्र गन्धाः
चन्दनागुरुकर्पूरं वीरणमूलपद्म
काष्ठ रक्तचन्दनानि पुष्पाणि म।
ल्लिकामालती करवीर चम्पक।
पाटला वंगलभगर पीतकिंटी
कुन्दनवमल्लिका अशोकपद्मग
स्त जवा पुष्पाणि विहितानि तु।
लसी कुसततुलसी दूर्वा विल्वप
त्राणि राजितार्कोची एकदलतग
र मुकुलानि निषिद्धानि धूपाश्च।
गुग्गुल्वगुरुदेवदारु विल्वानि
दीपस्तु घृतेन तैलेनवा नैवेद्यानि
विविध भक्ष्याणि ॥ अथ गणेशपू
जा तत्रावाहने ॐ भूर्भुवस्वर्गणे।
श इहागच्छ इति दूर्वा पुष्पादौतै
रावाह्य ॐ गणेशाय नम इत्यनेनपू
जयेत् तत्र तुलसी निषिद्धा रक्तचन्द
ने रक्तपुष्पादिकं विहितम् देव।

तांतरमसिद्धं अन्यंमकुलादिकं।
नदेयम् ॥ अथदुर्गा पूजा ॐभूः
र्भुवः स्वर्दुर्गे इहागच्छ इति पुष्पा
सने शवाह्य ॐदुर्गायै नमइत्यने
न पूजयेत् तत्रगन्धाः चन्दनागुरु
कर्पूर कुंकुमानि पुष्पाणि मल्लि
कोत्पल पुन्नाग शमी चम्पकाशो
क कर्णिकार करवीर तुलसी ॥
विल्वपत्रादीनि विहितानि मुकुला
र्क मन्दार पुष्पाणि निषिद्धानि
धूपाः कृष्णागुरु सहित घृत मेद्ध
षात गुग्गुल विल्वामृतमानि ॥
वीरणामूल चन्दनेऽपि दीपस्तद्घृ
तेन तैलेनवा नैवेद्यानि आम्रना
रिकेलखर्जूर कदली वीजपूर्वा
दीनि क्वथितं विद्धं फलं निषिद्धं।
पक्वपक्क कदलीफलमपि विहि।
तं ॥ अथशिवपूजा उदङ्मुखः ॐ
नमः शिवायनमः इतिमंत्रेण पू
जयेत् तत्रगन्धः अगुरुचन्दने।
पुष्पाणिच अर्ककरवीरजाती।
वकुलपाटला श्वेतमन्दारनाग।
केशर चम्पक धुस्तूर विल्वामल
क तुलसी पत्राणि विहितानि के।
तकी माधवी पुष्पकुन्दयूथी मदन्ति
का शिरीष सर्ज बन्धूक मुकुलमा
त्राणि निषिद्धानि धूपस्तु घृत गुग्गु
लविल्वफलानि उशीरागुरुचंदनानिव

दीपस्तु घृतेनतैलेन सार्षपादिना
वा नैवेद्यानि गुडखण्ड घृतपक्क।
मातुलुंगफलादीनि ॥ अथपा
र्थिवशिवलिंगपूजाविधिः ॐहराय
नम इतिमृदाहरणम् ॐमहेश्वरा।
यनम इतिघट्टनं ॐशूलपाणेइह
सुप्रतिष्ठितो भवइति प्रतिष्ठा आ।
चारात् ध्यायेन्नित्यंमहेशमित्यादिना ॥
शास्त्रोक्तंध्यायेत पिनाकधृक इ।
हागच्छ इत्यावाहनं ॐपशुपत।
येनम इतिस्नपनं पतत् पाद्यं ॐन
मः शिवायनमः इति पाद्यादिभिः
संपूज्यवामावर्तेन वेद्यां प्राच्यादिषु
ॐसर्वायक्षितिमूर्तयेनमः ॐभ।
वायजलमूर्तयेनमः ॐरुद्रायअ।
ग्निमूर्तयेनमः ॐउग्राय वायुमूर्तये।
नमः ॐभीमायआकाशमूर्तयेन
मः ॐपशुपतयेयजमानमूर्तयेनम
ॐमहादेवायसोममूर्तयेनमः ॐई
शानायसूर्यमूर्तयेनमः इत्यष्टमू।
र्तीः पुष्पैः पूजयेत् ततोमुखवाद्यं
कृत्वा तमसेति संहार मुद्रया वि।
सर्जयेत् ह्रीं ॐहरस्व नमः शिवा
येति मन्त्रेण पूजयेत् ॥ अथ वि
ष्णुपूजा शालग्रामे पात्रे पूजयेन्नि।
त्यं त्रिभाग जलेनापूर्य वसि।
ति धेनुमुद्रया अमृती कृत्य ॐ।
विष्णवेनम इत्यष्टधाजपित्वा

तेनोदकेनात्मानं पूजोपकरणं
चाभ्युक्षेत् दीक्षितस्तु तन्मत्रेण पु।
ष्पाद्य तमात्मानंपूजयेत् अंगावर
णंच पूजयेत् शालग्रामे मणौ प्र
तिमाघटदलपमजलादिषु तत्रशा
लग्रामे आवाहन विसर्जने न स्तः।
ध्येयः सदेत्यादिना ध्यात्वा ॐभ
गवन् विष्णो इहागच्छ मायतन
पुष्पैरावाह्य इदमासनं ॐश्रीवि।
ष्णवेनमः ॐविष्णो स्वागतमिति इ
च्छेत् पततपाद्यं ॐविष्णवेनमः
मामगल्प इदमर्घ्यं ॐविष्णवे नमः
इतिवदेत् नदितस्तु पद्योऽर्घ्य इ।
तिविशेषः तत्रद्रव्यानिलत पु।
ष्पाक्षतसिद्धार्थचन्दन तोयानि।
यथा लाभं वा अर्घ्यपाद्ययोस्तु
योर्वापर्थ्यान नियमः आचमनी।
ये लवङ्गजातीकक्कोल जले केवलेवा
प्रक्षाल्यजले घृतमधु इत्यात्मको
मधुपर्कः तदभावे केवलेवा मधु
पूर्ववदिदमाचमनीयं इदंस्नानी
यं तत्रलौकिकमधुपर्कशान्त्र
य तोलकाप्लुतंजलं पुनराचम
नीयं इदंवस्त्रं पुनराचमनीयं इद
माभरणं पुनराचमनीयं गंधस्तु
श्रीखण्डक कालिया गन्धमुद्रया
तत्रचन्दनागुरुकर्पूर कुंकुमवीर
णमूल पद्मकाष्ठ शिल्हक रक्तच
न्दन क ॥

स्तूरिका जातीफलानि घृष्टानिप
तच्चूर्णानि वा पतद्गाहाकृष्टरसो वा
पुष्पाणिच तर्ज्जन्यंगुष्ठयोग पुष्प।
मुद्रया तत्रमल्लिकामालतीजाती
केतकाशोक चम्पकनागकेशर व।
कुलपद्मोत्पल तुलसीविल्वकर
वीर पारिभद्रपाटला श्वेता पराजि।
ता वकुदलतगर श्वेतजवा रक्तापी
कषाणपुष्पभूमिचम्पकशेफाली
नवमालिका यूथिकाकदम्बकुन्द
लवंगमाधवीपुष्प वकबन्धूककुरु
रुवक विल्वपुष्पवकुवारककह्ला
रद्रोणपलाश पुष्पाणिविहितानि।
नि नरसिंहेतरावतारे केतकी नि
षिद्धा पर्युषितमच्छिद्राम्रोदित।
स्वयंपतितोपहत मध्याह्नस्नानो
त्तर त्रुटित पद्मचम्पकेतर कलिका
तुलसीतर शुष्कपत्रपरिहितपुष्प।
विहितेतर रक्तपुष्पंचेमहृतोद्भव।
श्मशानजातकुरज शाल्मलीशि।
रीषपुष्पाणिनिषिद्धानि आलए।
तरस्वकोद्भवानि च विहितपत्राणि
तुलसी विल्वशमी भृंगराज तमा।
लामलककेतकी पत्राणि पद्मकं।
दोत् पलानिपंचदिनात् परतः प।
र्युषितानि तुलस्यगस्त्यविल्वानि क
दापिनपर्युषितानि पुष्पस्थानेच
देवस्यवामे पुरतोवा ॥

तर्ज्जन्यङ्गुष्ठयोगरूपधूपमुद्रया वा
मूलेनैव घण्टां वादयन् सव्यभूमौ
न देयः । धूपश्च जटामांसीमहिषा-
ख्यगुग्गुलकर्पूरागुरुसिह्लकदे-
वदारुजातीफलशर्करोक्तमिश्रि-
त गुग्गुल्वादयः दीपस्थानं देव-
स्य दक्षिणतः पुरतो वा मध्यमाङ्गु-
ष्ठयोगरूपदीपमुद्रया घृतदीपः
घृतेन तैलेन वा भूमौ न देयः नै-
वेद्यस्थानञ्च देवपृष्ठेतरदेशः ।
अनामिकाङ्गुष्ठयोगरूपनैवेद्य-
मुद्रया पतननैवेद्यं तत्र कदली
पनसजम्बूलवलीकरमर्द्दकादि
विःसंस्कृततिलमाषमुद्गयव ।
गोधूमव्रीहिशाल्यन्नं विहितं निषि-
द्धं तु अजामहिषीक्षीरदधिघृतं ।
पञ्चनखवराहमत्स्यमृगछागा-
दीनां मांसं सहिरण्यादकस्पर्शनाम-
क्ष्यचाण्डालदृष्टविडालाद्युच्छि-
ष्टक्लेदाक्तपर्य्युषितेतरभक्ष्यं ख-
ण्डादीनि यवक्षीरविका-
राश्च नपर्य्युषिताः ततः पुनराच-
मनीयं ताम्बूलञ्च दत्त्वा अष्टोत्तर-
सहस्रं शतं दश वा उपवीयकेन ।
हृदेशस्थितनिर्व्याणभूत-
दक्षिणकरः यथाशक्ति मूलमन्त्रं
जपित्वा गुह्यातिगुह्यगोप्ता त्वं गृ-
हाणास्मत्कृतं जपं सिद्धिर्भवतु मे
देव त्वत्प्रसादात्त्वयि ॥

स्थिते अर्घ्योदकेन देवहस्ते जलं
दद्यात् ततोऽर्घ्यशङ्खं गृहीत्वा त्रिः
प्रदक्षिणीकृत्य ध्येयं सदा परिभा-
व्यमभीष्टदोहं तीर्थास्पदं शिववि-
रिञ्चिनुतं शरण्यं भृत्यार्तिहं प्र-
णतपालभवाब्धिपोतं वन्दे महापु-
रुष ते चरणारविन्दम् त्यक्त्वा सुदु-
स्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मि-
ष्ठ आर्यवचसा यदगादरण्यम्
मायामृगं दयितयेप्सितमन्वधा-
वद्वन्दे महापुरुष ते चरणारवि-
न्दम् इति स्तुत्वा ओं प्रसीद भगव-
न्निति दण्डवत् प्रणमेत् ओं यत्
किञ्चित् क्रियते देव मया सुकृत-
दुष्कृतम् तत्सर्वं त्वयि सन्न्यस्तं त्व-
त्प्रयुक्तः करोम्यहम् इत्यनेन ।
सर्वं समर्पयेत् मन्त्रहीनं क्रियाही-
नं भक्तिहीनं जनार्दन यत् पूजि-
तं मया देव परिपूर्णं तदस्तु मे इ-
ति प्रार्थयेत् ॥ ततः संहारमुद्रया
निर्म्माल्यपुष्पमादाय भूमौ मा-
नेन विसर्जनमन्त्रे ओं भगवन् वि-
ष्णो क्षमस्वेति विसर्जयेत् तदस
ते निर्माल्यपुष्पमादाय ओं तिष्ठ
देव परे स्थाने स्वस्थाने परमेश्वर
यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे
हृदि इति मन्त्रेण देवं हृदि स्थाप-
येत् तत ओं विष्वक्सेनाय नम
इति गन्धपु ॥

पुष्पं नैवेद्याग्रे दद्यात् ततो विष्व-
क्सेनाय तन्निर्माल्यं अनुलेपनं नैवे-
द्यं च किञ्चिद्दत्त्वा शिरसि निर्माल्यं
धार्य्यं सर्वाङ्गेष्वनुलेपनं कृत्वा य-
था काले पादोदकं नैवेद्यं चोप-
भुञ्जीत तत्र पादोदकग्रहणे मन्त्रः
ओं कृष्ण कृष्ण महाबाहो भक्तानामा-
र्त्तिनाशन सर्वपापप्रशमनं पादो-
दकं प्रयच्छ मे ततस्तत् पाना-
दौ परोदिने इष्टदेवतानामश्रुत्वाख्
यं त्रि कृत्वार्घ्यपादोदकं पीत्वात ।
ऽदोषप्रकालमृत्युप्रशमनं सर्वव्या-
धिविनाशनं विष्णोः पादोदकं पुण्यं
शिरसा धारयाम्यहं ॥ इति शिर-
सि धारयेत् ॥ नैवेद्यभक्षणे मन्त्रः
ओं उच्छिष्टभोजिनस्तस्य वयमुच्छि-
ष्टकोटिनः येन लीलावराहेण हिर-
ण्याक्षो निपातितः इत्युच्चार्य्य भक्ष-
येत् । यथा लाभं दशोपचारेण वा
पूजयेत् तत्र दशोपचाराः अर्घ्य-
पाद्याचमनीयमधुपर्काचमनग-
न्धपुष्पधूपदीपनैवेद्यानि पञ्चो-
पचाराः गन्धपुष्पधूपदीपनैवेद्या-
नि गन्धपुष्पाभ्याम् वा केवलपुष्पे-
ण केवलजलेन वा पूजयेत् ततो
ऽग्निब्रह्मसरस्वतीलक्ष्मीणां पूजनं
इत्याह्निकप्रयोगः ॥ ॥

गतत्वम् ॥ तन्त्रोक्तसामान्यपूजा
कलावतीशारदादृष्टव्या पूजार्हः त्रि
पूजायाम् यः मान्यः इति शब्दरत्
नावली ॥ पूजितः त्रि प्राप्तपू-
जः अर्चितः तत्पर्य्यायः अञ्चि-
तः २ इत्यमरः पूजितव्यः त्रि पू-
जनीयः पूज धातोः कर्म्मणि तव्य
प्रत्ययनिष्पन्नः ॥ पूजिलः पुम्
देवता इति संक्षिप्तसारोणादिवृत्तिः
पूज्ये त्रि इत्युणादिकोषः ॥
पूज्यः पुं श्वशुरः पूजनीये त्रि त-
त्पर्य्यायः ॥ प्रतीक्ष्यः २ इत्यमरः
अहं हि पूर्वो वयसा भवद्भ्यस्तेनाभि-
वादं भवतां न युक्तम् यो विद्यया तप-
सा जन्मना वा वृद्धः स पूज्यो भवति ।
द्विजानां अष्टक उवाच अवादीश्चेद्वय-
सास्मि प्रवृद्ध इति वै राजन्नाभ्यधिकः
कथञ्चित् यो वै विद्वांस्तपसा संवृद्धः
स एव पूज्यो भवति द्विजानां इति
मात्स्ये ३८ अध्यायः ॥
पूण क संघाते राशीकरणे इ॥
ति कविकल्पद्रुमः ॥
पूतम् क्ली अपनीततुषधान्यम् वा
ओसानधान इति भाषा तत्पर्य्या॥
यः बहुलीकृतम् २ इत्यमरः ॥
पूतः त्रि तुलादिनाशुद्धः तत्पर्य्या
यः पवित्रः २ प्रयतः ३ ॥

शुद्धः यथा दधिगोमयादि सा
मान्यं पवित्रम् स्वभावपवित्रं
वा इति भरतः। तत्पर्य्यायः प
वित्रं २ मेध्यम् ३ इत्यमरः। वस्त्र
पूतं न्यसेत् पादं वस्त्रपूतं जलं पि
बेत् सत्यपूतं वदेद्वाक्यं बुद्धिपू
तं विचिन्तयेत् इति मार्कण्डेयपु
राणे सत्यं इति जटाधरः॥
पूतः पुं शङ्खः श्वेतकुशः वि
कङ्कतवृक्षः इति राजनिर्घण्टः॥
पूतक्रतायी स्त्री इन्द्रपत्नी शच
ी इति जटाधरः॥
पूतक्रतुः पुं इन्द्रः इति जटा
धरः॥ पूतगन्धः पुम् वर्व्वरः इ
ति राजनिर्घण्टः॥
पूततृणः पुम् श्वेतकुशः इ॥
ति राजनिर्घण्टः॥
पूतद्रुः पुम् पलाशवृक्षः इ
ति राजनिर्घण्टः॥ पूतधान्यं
क्ली तिलः इति राजनिर्घण्टः॥
पूतना स्त्री हरीतकी इत्यमरः।
सिन्धुदेशजा स्वल्पत्वक वृहद
स्थिहरीतकी लेपने प्रशस्ता।
इति राजवल्लभः॥
गन्धमांसी इति राजनिर्घण्टः।
दानवीभेदः सा च कंसभगि
नी जिघांसया॥

स्तनकालकूटदानात् श्रीकृष्णे
न हता। रोगभेदः इति मेदिनी॥
स च ग्रहिपूतना नाम बालरोगः
तस्य निदानं यथा पञ्चवर्णा महा
पक्षो वालैर्द्वेषिद्वयोद्भवः शरवा
भ्यां हृदयं यो वा हृदयाद्वा दशे
नेत् स तु रोगे च कथिते अजगल्ल
हि पूतने स तु रोगोक्ते यथा श
कृत्स्रस्तसमायुक्ते श्रोत्रे च पा
ने शिरो भवेत् छिद्रे वास्ना॥
घ्रमाने वा कण्ठे रक्तकफोद्ग
वा कण्ठयनान्ते तत्र स्फोटः
स्रावसञ्जायते पक्वीभूते व्रणो
ऽन्ते विघ्नारहितपूतनम् इति मा
धवकरः॥ बालमातृकावि
शेषः यथा तृतीये दिवसे मा
से वर्षे वा गृह्णाति पूतना नाम
मातृका तया गृहीतमात्रेण प्र
थमं भवति ज्वरः गात्रमुद्वेजय
ति लसं न गृह्णाति रोदिति बभाति
क्रन्दति ऊर्द्धं निरीक्षते बलिं तस्य
प्रवक्ष्यामि येन सम्पद्यते शुभम्
नद्युभयतटमृत्तिकां गृहीत्वा॥
गन्धम् ताम्बूलम् रक्तपुष्पम्
रक्तचन्दनम् रक्तसप्तध्वजाः सप्त
प्रदीपाः सप्तस्वस्तिकाः मत्॥
समांसमत्स्याः पञ्चभक्तं च॥

दक्षिणस्यां दिशि मध्याह्ने चत
ष्पथे बलिर्दातव्यः शिवनिर्म्मा
ल्य गुग्गुलु सर्षप निम्बपत्रमेष
शृङ्गैर्दिनत्रये धूपयेत् ॐ नाराय
णाय नमः हन हन मुञ्च मुञ्च ॐ फ
ट् स्वाहा स्वाहा चतुर्थे दिवसे ब्रा
ह्मणं भोजयेत् ततः सम्पद्यते शु
भं इति चक्रपाणिदत्तः॥
पूतनारिः पुं श्रीकृष्णः इति श
ब्दरत्नावली॥ पूतना॥
पूतनासूदनः पुं श्रीकृष्णः इति त्रि
काण्डशेषः॥ पूतनाहा पुं
श्रीकृष्णः इति हेमचन्द्रः॥
पूतफलः पुम् पनसः इति
राजनिर्घण्टः॥ पूता स्त्री॥
दूर्वा इति राजनिर्घण्टः॥
पूतात्मा पुं पवित्रस्वभावः॥
शुद्धदेहः यथा शास्त्रोपिलवना
नेन स्नात्वा सप्तावगाहने पूतात्
मानी कृजः श्रीमोललक्ष्मी द्रोणादि
मुक्तवान्॥ इति शास्त्रपुराणे॥
पूर्णपल्लवः पुति क्ली रोहिषतृ
णं इति राजनिर्घण्टः॥ पूतिः
स्त्री पवित्रता दुर्गन्धः इत्यमरः।
टीकायां रायमुकुटः॥ खट्टा
शा सक्तः खोटाशी इति भाषा
॥ तस्याः॥ ॥

नुलेपनगुणः परमालक्ष्मी रक्ता
ज्वरनाशित्वं इति राजवल्लभः॥
पूतिकं क्ली विष्ठा इति राजनिर्घ
ण्टः॥ पूतिकः पुं पूतिकरञ्जवृ
क्षः इत्यमरः॥ ॥
पूतिकरजः पुं पूतिकरञ्जवृ
क्षः इत्यमरः॥ पूतिकर
ञ्जः पुं करञ्जविशेषः नाटाकर
ञ्ज इति भाषा कटकरेञ्ज इति
हिन्दी भाषा तत्पर्य्यायः॥ प्रकी
र्य्यः २ पूतिकरजः ३ पूतीकरज
पूतिकः ५ पूतीकः ६ कलिका
रकः ७ कलिमालिकः ८ कल
हनाशनः ९ इत्यमरभरतौ प्र
कीर्णः १० रजनीपुष्पः ११ सुम
नाः १२ पूतिकर्णिकः १३ कैडर्य्यः
कलिमारः १५ अस्य गुणाः क
टुत्वं तिक्तत्वं उष्णत्वं विषवातिक
ण्डूविचर्च्चिका कुष्ठस्पर्शत्वग्दोष
नाशित्वंच इति राजनिर्घण्टः॥
पूतिकर्णकः पुं कर्णरोगभेदः
तस्य लक्षणं कर्णविद्रधि पाका
द्वा जायते चाम्बुपूरणात् पूयं स्र
वति वा पूति स ज्ञेयः पूतिकर्णि
कः इति माधवकरः शेषं च य
था निर्गुण्डीस्वरसतैले सिन्धुधू
मरजो गुडः पूरणात् पूतिकर्णा
स्य शामनो मधु॥



संस्रुतः अथवा वरुणाईकपि
त्थाम्र जम्बूपल्लव साधिते पूति
कर्णापहं तैलं जातीपत्ररसेन
वा इति चक्रपाणिदत्तः ॥
पूतिका स्त्री मार्जारी इति राज
निर्घण्टः ॥ लताशाकविशेषः
पुं इ इति भाषा इत्यमरटीका ।
यांस्वतः अस्याः पर्याय उपो
दकी शाके द्रष्टव्या ॥
पर्यायान्तरे दोषाश्च यथा पू
तिकाब्रह्मयाभिका यदपि कु
सुम्भम् नालिकाशाकं हेमाक
पोतिकीं तथा भक्षयन् पतितः
स्यात् अपि वेदान्तगो द्विजः इ
त्यप्रानसासामान्यतोऽभिहिते
अत्र नालिकाश्वेतकलम्बीति ।
कल्पतरुः पूतिका च द्वाद ॥
षणामपिक दोषाय मूढविष
यिकाबा इति निश्चितत्वम् ॥
पूतिकामुखः पुं शम्बुकः इ
ति शब्दमाला ॥ पूतिका
ष्ठं क्लो देवदारु सरलद्रुमः इ
त्यमरः पवित्रदारु च ॥ पू
तिकाष्ठकं क्लो सरलद्रुमः इ
ति शब्दचन्द्रिका ॥ पूतिगं
धं क्लो रंगम् इति राजनिर्घण्टः
पूतिगन्धः पुं गन्धकः इङ्गुदी
वृक्षः इति राजनिर्घण्टः दुर्गन्धे त्रि

पूतिगन्धिः त्रि दुर्गन्धः इत्यमरः ।
पूतिर्विट् पूतिरिव गन्धोऽस्य ।
इति रायमुकुटः ॥
पूतिगन्धिकः त्रि दुर्गन्धः इ
ति हेमचन्द्रः ॥ पूतिगन्धि
का स्त्री वाकुची इति राजनिर्घ
ण्टः ॥ पूतितैला स्त्री ज्योति
ष्मतीलता फटकी इति भाषा
इति रत्नमाला ॥ पूतिनस्यः
पुं नासारोगभेदः तल्लक्ष
णं दोषैर्विदग्धैर्गलतालुमूले
संमूर्च्छितो यस्य समीरणस्तु
निरेति पूतिर्मुखनासिकाभ्यां
पूतिनस्यं प्रवदन्ति रोगं इति
माधवकरः ॥ औषधं यथा
व्याघ्री दन्ती वचा शिग्रु सुरसा
व्योषसम्भवैः साधितं लावणैः
तैलं पूतिनासागदं जयेत् अथ
वा त्रिकटु विडङ्गकसैन्धव बृ
हती फलशिग्रु सुरस दन्तीभिः
तैलं गोमूत्रसिद्धं नस्यं स्यात्
पूतिनस्यस्य इति चक्रपाणिद
त्तः पूतिपत्रः पुम् श्योना ॥
कभेदः इति राजनिर्घण्टः
पूतिपुष्पिका स्त्री मातुलुङ्ग ।
मुखरलेवु इति मोडावा इति
च भाषा इति रत्नमाला ॥

पूतिफला स्त्री सोमराजी इति
रत्नमाला ॥ पूतिफली स्त्री ॥
सोमराजी इत्यमरः पूतिमयू
रिका स्त्री अजगन्धा इति राज
निर्घण्टः ॥ पूतिमेदः पुम्
अरिमेदः इति राजनिर्घण्टः ॥
पूतिवातः पुं बिल्ववृक्षः इति र
त्नमाला दुर्गन्धवायुश्च ॥
पूतिवृक्षः पुं श्योनाकः इति
रत्नमाला ॥ पवित्रदुर्गन्धोत्तर
च पूतिशारिजा स्त्री खट्टाशी ।
इति त्रिकाण्डशेषः ॥
पूतीकः पुं पूतिकरञ्जः इत्य
मरटीकायां भरतः गन्धमा
र्जारः इति राजनिर्घण्टः ॥
पूतीकरञ्जः पुम् पूतिकरञ्जः
नाटा इति भाषा इति रत्नमाला
पूतीका स्त्री पूतिका इति भ
रभरतः ॥ पूत्याण्डः पुम् गन्ध
कीटः गंदीपोका इति भाषा ।
गन्धमेदः यस्य नाभौ मृगना
भि र्जायते इति मेदिनी ॥
पूनः त्रि नष्टः इति मुग्धबोधव्या
करणम् पूपः पुम् पिष्टकः
इत्यमरः ॥ पूपला स्त्री ॥
पोलिका इति हेमचन्द्रः ॥

पूपाली स्त्री पोली इति त्रिकाण्ड
शेषः ॥ पूपाष्टका स्त्री अ
ग्रहायणी पूर्णिमायाः परतः कृ
ष्णाष्टमी तत्र नित्यं श्राद्धम् पूपाग
कं कर्त्तव्यं यथा गोभिलः अष्ट
का योऽन्मात्रहायण्यास्तमिस्राष्ट
मी ब्रह्मणाः पिण्डदानाय मृते
सु रष्टकास्त्रिस्तु पव च कृष्णपक्षे ।
वसिष्ठादि सर्वाचैन्द्रीविभाव्यते श्रा
जापत्याद्वितीयास्यात् त्वतीयावै
श्वदेविकी आद्यापूपैः सदाकार्या
मांसैरन्या भवेत्तथा ॥ शाकैः का
र्य्यात्तृतीयासा देषद्रव्यगतो विधिः
इति निर्धिनत्वम् पूपिका स्त्री ॥
पूलिका इति हेमचन्द्रः ॥ पूय
ई ऊ दुर्गन्धे शीर्णत्वे भेदने इति ।
कविकल्पद्रुमः ॥ पूयम् ॥
क्लो पक्वव्रणादिसम्भव घनीभू
तश्वेतवर्णविकृतरक्तं पूज इति
भाषा तत्पर्य्यायः तलजं २ म
लजं ३ दूषनं ४ प्रसितं इति शब्द
चन्द्रिका पूयवर्द्धनद्रव्याणि यथा
नवधान्यमाष तिलकलाय कुल
त्थ निष्पाव हरितक शाकाम्ल
वण कटुक गुड पिष्टविकृति वल्लूर
शुष्कशाकाजा विकानूपौदकमा
सवसा शीतोदक कृशरा पायसद
धि दुग्ध तक्र ॥

प्रभृतीन् परिहरेत् तक्रादीनेव।
धान्यादि यूषं वर्गउदाहृतः दोष
संजननोऽपि विज्ञेयः वृषवर्द्धनः
इति सुश्रुतः ॥ वृषणम् क्ली।
वृषम् इति शब्दचन्द्रिका ॥ वृ
षदंशः पुं नासारोगभेदः तल्ल
क्षणं दोषे विदग्धे त्वथवापि जन्
तो ललाटदेशेऽभिहतस्य तैस्तैः
नासास्रवेत् पूयमसृग्विमिश्रं तं
पूयरक्तं प्रवदन्ति रोगं इति माधव
करः ॥ वृषारिः पुं निम्बवृक्षः।
इति शब्दचन्द्रिका ॥ वृषाल।
सः पुं सन्धिगतरोगभेदः तस्य।
लक्षणं यथा पक्वः शोफः सन्धि।
जः संस्रवेद्यः सान्द्रं पूयं वृतिवृ
षालसः सः इति सुश्रुतः ॥ वृ
ई ऊ प वृत्तौ आप्यायने ॥ इति
कविकल्पद्रुमः ॥ वृ ऊ क ॥
मौ आप्यायने इति कविकल्पद्रु।
मः ॥ वृषम् क्ली दारुहरिद्रा इ।
ति राजनिर्घण्टः ॥ ॥
वृः पुं जलसमूहः व्रणसे ॥
वृहिः स्तोत्रविशेषः इति मेदि
नी ॥ वृक्कः पुं बीजपूरः।
इति राजनिर्घण्टः ॥
वृक्कावाकः इति लीलावती।
षोडशाचत्र वृत्वाव ॥

संख्यक प्रणवबीजान्तर जपेत्तै।
क नासाग्र करणक प्राणाया।
मांगवायुस्मरणं यथा मूलमन्त्र।
स्य बीजस्य प्रणवस्य वा षोडशवार
जपेन्वामनासापुटे वायुपूरकं कु।
र्यादिति तन्त्रसारः ॥ प्रेतदेहनिषा
दकाशौचकालदेयदशपिण्ड य
था वृक्केण तु पिण्डेन देहोति।
ष्ठायते यतः कृतस्य करणाया।
गात् पुनर्नीवर्धयेत् क्रियो इति
वायुपुराणं ॥ अत्र पूगः वस्त्र
थांवप्रयुञ्जीत प्रेतपिण्डे दशाहि।
के भाषैते तच्छुवैपिण्ड यत्तदत
स्य पूरकः अत्र भाषणे निषेधो प
तत् पिण्डयत्तदतस्य पूरकमि
त्येता वन्मात्रकृतेः शिरः पूर।
कमित्यादि विशेषेले खे प्रमा॥
णंनास्ति इति स्मार्तभट्टाचार्याः
प्रेतपिण्डेस्तथादत्तै देहमाप्नोति
भार्गवेति विसृष्टमानेवेदेह स्म
तेर्देह पूरकमिति प्रयोगापत्ते॥
श्च तस्मादनिकट भट्टायुक्तः के
बल पूरकप्रयोग एवयुक्तइति
शूलपाणिः भर्त्तः पिण्डप्रदाने त
साध्वी स्त्री चेद्रजस्वला वर्त्तसा।
ष्टाशुनः स्नाता सैवदद्यात् पूरकं
इति शुद्धितत्त्वम् पूरणकर्तरि ॥

त्रि इति शब्दरत्नावली ॥ वृर
णं क्ली पिण्डप्रभेदः इति मेदिनी
वृषिः जटन्ते इति शब्दमाला ॥
ग्रेकाले गणने इति शुभंकरः वा
पतन्त्रः इति हेमचन्द्रः ॥
वृषणः पुं विसर्जने इति धरणिः
सेतुः इति हारावली ॥ समुद्रः
इति सेतु प्रसारोणादिवृत्तिः ॥
वृषके त्रि इति मेदिनी ॥ वृर।
णी स्त्री शाल्मलिवृक्षः इत्यम
रः पूर्ण्यतेऽनया पूरणी यथा पं
चानां पूरणी पंचमी ॥ वृषाम्लम्
क्ली वृक्षाम्लं इति राजनिर्घण्टः।
वृषिका स्त्री पिष्टकभेदः पूरी इ
ति कचूरी इति च भाषा यथा॥
माषाणां पिष्टिकां कृत्वा लवणा।
र्द्रक हिङ्गुभिः तथा पिष्टिकया।
पूर्णा सुमिताकृत पोलिका तत।
स्तैले विपक्वासा पूरिका कथिता।
बुधैः अस्या गुणाः कफ्या स्वादी ग
रुः स्निग्धा वानपित्तास्रदूषिका।
चक्षुस्तेजोहरी चोष्णा पाकेवात।
विनाशिनी तथैव वृत्तधक्कामि।
वत्सधारक पित्तहृत् इति भा
वप्रकाशः ॥ वृषितं त्रि कृतपू
रणं तत्पर्य्यायः पूर्णं २ इत्यम
रः गुणितञ्च पूरुषः पुं पुरुषः
उभात् इत्य ॥

मरः ॥ अथ शुभलक्षणम् पं
चदीर्घं चतुर्ह्रस्वं पंचसूक्ष्मं षडुन्न
तं सप्तरक्तं त्रिगम्भीरं त्रिविशालं
प्रशस्यते वाहू नेत्रद्वयं कुक्षिर्द्वौ
तु नासातथैवच स्तनयोरन्तरं चैव
पंचदीर्घं प्रशस्यते ग्रीवा पृष्ठं कर्णौ ह्र
स्वं च ह्रस्वे जंघे सुपूजिते च ता।
वियस्य ह्रस्वानि पूजां प्राप्नोति।
नित्यशः सूक्ष्माण्यङ्गुलिपर्वाणि
दन्तकेशनखत्वचः पंचसूक्ष्मानि
येषां हि तेन रादीर्घजीविनः नासा
नेत्रे च दन्ताश्च ललाटं च शिरस्त।
था हृदयं चैव विज्ञेय मुन्नतं षड्।
प्रशस्यते पाणि पादतलौ रक्तौ।
नेत्रान्तरनखानि च तालु कोऽध
रजिह्वाच सप्तरक्तं प्रशस्यते स्वरो
बुद्धिश्च नाभिश्च त्रिगम्भीरं प्रदाहृतं
उरः शिरो ललाटं च त्रिविस्तीर्णं।
प्रशस्यते ॥ कटिर्विशाला वक्षःस्त्र
भागी विशाल हस्ता नरस्त्रेग वः स्या
त् उरो विशालो धनधान्य भागी।
शिरो विशालं नरपूजितः स्यात्
तत्पर्श्विजति रक्तान्त नार्थं कन
कपिङ्गलं दीर्घवाहुं नवेस मंत्र्यं
तमांसोपविनाशकं कदाचिद्दृश्य
शेम्बर्णः कदाचिल्लोमशः सखी
कदाचिन्निन्दिलोऽवशी कदाचि

चंचला सती नेत्रेस्वेस्तेन सौभाग्यं
दन्तस्वेस्तेनभोजनं हस्तस्वेस्तेनचैश्व
र्य्यं पादस्वेस्तेनवाहनं प्रकर्म्मका
ठिनौ हस्तौ पादावध्वनिकौ मतौ
यस्य पाणितलौ वक्रौ तस्य राज्यं वि
निर्द्दिशेत् दीर्घलिंगेन दारिद्र्यं स्थू
ललिंगे निर्धनः कृशलिंगेन सौ॥
भाग्यं ह्रस्वलिंगेन भूपतिः रेखा।
भिर्वक्राभिर्द्दुःखं स्वल्पाभिर्धनहीः
नता रक्ताभिः श्रियमाप्नोति कृष्णा
भिर्लोकपूजितः॥ अंगुष्ठोदरम
ध्येतु यवो यस्य विराजितः उत्तमे।
भोजनं तस्य शतं जीवति मानवः अ
कुशं कुलिशं छत्रं यस्य पाणितले
भवेत् ऐश्वर्य्यं च विनिर्द्दिष्ट मशी
त्यायुर्भवेद्ध्रुवं धनुर्यस्य भवेत्पा
णौ पंकजं वा खलोरत्नं तस्यैश्व।
र्य्यं च राज्यं च अशीत्यायुर्भवेद्ध्रुवम्
कनिष्ठातर्जनीं यावत् रेखा भवे।
ति चायता विंशत्यष्टाधिकशतं ना
रा जीवन्तु नामयाः कनिष्ठामध्य।
मां यावत् रेखा भवति चायता।
शतं हि वा रुवाशीति नरो जीवे
त्स संशयः कनिष्ठानामिकायां।
चेत् रेखा भवति चायता षष्टिं
पंचाशद्वा नरा जीवन्त्यसं
शयः रेखयाभिहते॥

रेखा स्वल्पायुष्म भवेन्नरः कनिष्ठा।
यां स्थिता रेखा संख्या यावति कास्त
ता भावनी पुरुषाणान्तु नारी भवति
निश्चितं करमध्यगता रेखा ऊर्ध्वा।
ऊर्द्ध्वं भवेद्यदि नृपो वान्नपतस्तो वा
चिरायुर्नोऽर्थवान् भवेत् मतस्यप्र
च्छप्रकीर्णेन विद्याविनसमन्वितः
पितामहस्य वा किंचित् धनं च लभते
ध्रुवं मध्यमायां यदि यवा दृश्यन्ते।
ऽत्र शोभनाः तदान्यसंचितं वित्तं
प्राप्नोत्यत्र हि केयवे यस्याथ चक्रमं
गुष्ठे यवाहर्द्धं च दृश्यते तदा वैपा
मरादीना मर्जितं धनमाप्नुयात् तर्ज
न्यामव चक्रं च मित्रद्वारा धनं भवेत्
तेनैव विपरीतन्तु व्ययो भवति नि
श्चितं मध्यमायां स्थिते चक्रे देव
द्वारा धनं लभेत् तेनैव विपरीतन्तु॥
व्ययो भवति निश्चितं अनामायां भ
वेत् चक्रं सर्वद्वारा भवेद्धनं तेनैव।
विपरीतन्तु व्ययो भवति निश्चितं
कनिष्ठायां भवेच्चक्रं वाणिज्येन ध।
नं भवेत् तेनैव विपरीतन्तु व्य।
यो भवति निश्चितम्॥ ललाटे॥
दृश्यते यस्य चक्ररेखा त्रयं
अशीत्यायुः समाप्नोति पंचरे
खा शतं समाः॥
नमः शिवाय नमः॥

यस्यानतं ललाटं च ताम्रका।
न्तिं च दृश्यते रेखा हीनश्च कस्त
स्य सर्वोन्नतो महीं भ्रमेत्॥ या
स्य जिह्वा भवेद्दीर्घा नासाग्रे लेढि
सर्वदा भोगी भवति निर्वाणः इ
ष्टो भ्रमति सर्वदा दन्ताश्च विरला
यस्य नीचवन्नीचकर्म्मकृत् भग
र्भादल्परः सत्यं वेदान्तपारगो भ।
वेत्॥ प्रकारान्तरं दन्ताश्च विरला
यस्य गण्डकूपापि जायते पर
स्त्री रमणो नित्यं परवित्तेन वित्त।
वान् दीर्घलिंगे च सौभाग्यं स्थू॥
ललिंगेन्रूपो भवेत् वक्रास्यक
ठिनैर्लिंगे : प्रमाणान्न निर्गतः
सदा वमते सदादास्यं लिंधः।
नो भवति ध्रुवं कृशालिंगेन स्थू
लेन च रक्तवर्णेन भूपतिः वक्र
स्त्री रमणो नित्यं नारीणां व्रत।
भो भवेत् कृशलिंगेन वक्रेन ल
भते चोत्तमां गतो राज्यं सर्वं
च दिव्यागणाः कन्याकायाः प
ति भवेत् यस्य पादतले पद्मं
वक्रं वाप्यथतोरणं अंकुशं कुले
शं वापि नराणां भवति ध्रुवं कृश
निर्लोमशा येसु केकराला: कुरे
लकाः कानराबानसिकाश्च ते दे
रिद्रा न संशयः कपिलामलिना
गाश्च कृषाश्चैव हस्तनखाः कृशाति

दीर्घा मन्नकास्ते दरिद्रा न संशयः
विवर्के षमश्मश्रूमाये निर्लोमहृद
यश्चये ते धनी नैव सन्देहः समुद्र
वचनं यथा सूचीमुखाभग्नदृष्टाः
कृसदन्ताः कुचेलकाः वक्रनासा
वक्रनासा स्तेनबाहुष्टमानसाः द
यालवश्च दातारो रूपवन्तो जितें।
द्रियाः परोपकारिणश्चैव ते उ
त्तमा मानवाः स्मृताः इति सामुद्र
के पुरुषलक्षणं॥ दानवीरद
यावीर युद्धवीर सत्यवीर संज्ञक
पुरुषलक्षणन्तु पुरुषपरीक्षा।
यां द्रष्टव्यम्॥ ॥
पूर्णः त्रि पूरितः सकलः इ।
त्यमरः शाकः इति मेदिनी स्त्री
यस्ये खड्गावदन्यः इति गर्भस्य
रभट्टाचार्य्यः॥ पूर्णकः पु
स्वर्णचूडपत्नी इति मेदिनी॥
पूर्णकुम्भः पु जलपूरितघटः
तत्पर्य्यायः भद्रकुम्भः २ इ।
त्यमरः पूर्णकलसादिश्च इति
भरतः पूर्णकोष्ठा स्त्री नागर
मुस्ता इति राजनिर्घण्टः॥
पूर्णपात्रं क्ली वस्त्रपूर्णपात्रं
वर्द्धापकः इति मेदिनी उत्सव
कालहर्षात् हरीत वस्त्रालंकारा
दि तत्पर्य्यायः पूर्णालकः
२ यथा॥

हर्षं उत्सवकाले यदलंकारांशुकादिकं आकृष्य गृह्यते पूर्णपात्रे पूर्णानकं च तत् इति जटाधरः ॥ होमकर्म्मणि ब्रह्मदक्षिणा यथा गोभिलेनापि दर्शादियागमभिधाय पूर्णपात्रो दक्षिणा ब्रह्मणे दद्यादित्युक्तं वान्तः। वेपि शंकां छान्दसे तस्य प्रमाणं तु गृह्यसंग्रहे यज्ञपार्श्वपरिशिष्टयोः । अष्टमुष्टिर्भवेत्कुंचिः कुंचयोऽष्टौ च पुष्कलं पुष्कलानि च चत्वारि पूर्णपात्रो विधीयते ॥ अत्र षट्पंचाशदधिकशतद्वयमुष्टिमितं पूर्णपात्रं असम्भवे तच्छन्दोगपरिशिष्टं यावता कर्म्मफलं तद्धि पूर्णेन जायते नावरार्द्धं मतः कुर्यात् पूर्णपात्रमिति स्थितिः इति संस्कारतत्त्वम् ॥ पूर्णमा स्त्री पूर्णिमा इत्यमरटीकायां भरतः ॥

पूर्णमासः पुं पौर्णमासयागः इति जटाधरः ॥

पूर्णमासी स्त्री पूर्णिमा इति शब्दमाला ॥

पूर्णबीजः पुं बीजपूरः इति राजनिर्घण्टः ॥ पूर्णा ॥ स्त्री पंचमी दशमी पूर्णिमा ॥ अमावास्या यथा नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् तत्र स्त्री संसर्गनिषेधो यथा पूर्णास्वपि योषित् परिवर्ज्जनीया इति तिथितत्त्वं गुरौ पूर्णा च संयुक्ता सिद्धियोगाः प्रकीर्त्तिताः इति ज्योतिःसारसंग्रहः ॥ पूर्णानकम् क्ली वाद्यभाण्डम् तत्पर्य्यायः पूर्णपात्रं २ इति त्रिकाण्डशेषः पूर्णानकमपि पाठः ॥ पूर्णावतारः पुं नृसिंहः रामः यथा पूर्णो नृसिंहो रामश्च श्वेतद्वीपविराड्विभुः परिपूर्णतमः कृष्णो वैकुण्ठे गोलके स्वयं वैकुण्ठे कमलाकान्तो रूपभेदश्चतुर्भुजः गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयं तस्यैव तेजो नित्यं च विभांकुर्वन्ति योगिनः भक्ताः पादाम्बुजं तेजः कुतस्तेजस्विना विना इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ... अध्यायः ॥ पूर्णिका स्त्री नासाच्छिन्नी नामक पक्षी इति त्रिकाण्डशेषः ॥

पूर्णिमा स्त्री पंचदशीतिथिः पूर्णताम् पूर्णिः पूर्णिं मिमीते ड आप् तत्पर्य्यायः पौर्णमासी २ निशाकरे कलाहीने सा अनुमतिः पूर्णे ॥

निशाकरे सा राका ४ इत्यमरः पित्र्या ५ चान्द्री ६ पूर्णमासी ७ अनन्ता ८ चन्द्रमाता ९ निरंजना १० इति वाचस्पतिः पूर्णमा ११ इति हड्डचन्द्रः ॥ ज्योत्स्नी १२ इन्दुमती १३ सिता १४ इति राजनिर्घण्टः ॥ सा द्विविधा यथा राका चानुमती चैव द्विविधा पूर्णिमा मता पूर्वादिनकलाहीने पौर्णमास्यां निशाकरे पूर्णिमानुमती ज्ञेया पश्चात्समितभास्करे यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः युगपत् सोमराजानदा तु मतिपूर्णिमा राकामामनुमन्यन्ते देवताः पितृभिः सह रञ्जनाच्चैव चन्द्रस्य राकेति कवयो विदुर् इति देवीपुराणं ॥ सा चन्द्रस्य तिथिः यथा तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीं तिथिं प्रभुः तस्यां पोषयेद्राजं समर्थं प्रतिपादयेत् स चाम्नाहारसम्भवे तस्य ज्ञानं प्रयच्छति कान्तिं पुष्टिं च राजेन्द्र धनं धान्यं च केवलं इति वराहपुराणे सोमोत्पत्तिरहस्यं ॥ तत्स्नानफलं कन्दर्प तत्सप्तमीप्रियस्य ॥ न्यायाम वित्तः सततं सहर्षः सुधीबली शास्त्रविचारदक्षः स्यात् पूर्णिमाजन्मनि यस्य जन्तोः इति कोष्ठीप्रदीपः ॥ सा चतुर्द्दशी युक्ता ग्राह्या युग्मात् यमः पत्ताने प्रातसि स्नायाल्लेन नायाति मत्स्यविस्तुः हव्येतसहितो यस्या द्विविचन्द्र बृहस्पती पौर्णमासीतु महती ज्ञेया सम्वत्सरेतु सा तस्यां स्नानोपवासाभ्यां मत्स्यं परिकीर्त्तितम् सहितो मासः संज्ञा विशेष निमित्त कृत्तिकादि नक्षत्रगतो महाकार्त्तिक्यादिदर्शनात् तथा च राजमार्त्तण्डे मास संज्ञे यदा रुक्ते चन्द्रः संपूर्णमण्डलः शुक्लयाम्याति संयोगं सा तिथिर्महती स्मृता स्कान्दमात्स्ययोः पौर्णमासीषु चैताहि मासर्क्षसहिता सच पत्तासां स्नानदानाभ्यां फलं दशगुणं स्मृतं ॥ वैशाखीमधिकृत्य यमः गौरान् वा यदि वा कृष्णान् तिलान् क्षौद्रेण संयुतान् प्रीयतां धर्म्मराजेति पितृन् देवांश्च तर्पयेत् ॥ यावज्जीव कृतं पापं तत्क्षणादेव नश्यति ॥ ब्रह्माण्डे तच निर्दिष्टं स्वर्गलोके न संशयः ब्रह्मपुराणे महाज्यैष्ठ्यादयः प्रपूर्वत शुक्लपक्षः शुक्लपक्षमम् ॥

विष्णुलोकमवाप्नोति सोऽत्र गङ्गा-
स्नुमज्जनात् ॥ पैन्द्रे गुरुः शशी चै-
व प्राजापत्ये रविस्तथा पूर्णिमा
गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता
अनुराधास्य गुरावपि पैन्द्रे भवेद्य-
दा जीव स्तत्पञ्चदशाके रविः पू-
र्णिमा शक्रचन्द्रेण महाज्यैष्ठी प्रकी-
र्त्तिता अनुराधास्य चन्द्रेऽपि बाह्यभू-
तिः ऐन्द्रे तत्र रवौ भवेत् गुरुचन्द्रौ
यदा स्थितौ पूर्णिमा ज्यैष्ठमास-
स्य महाज्यैष्ठी प्रकीर्त्तिता राजमा-
र्त्तण्ड ज्यैष्ठे सम्वत्सरे चैव ज्यैष्ठे
मासस्य पूर्णिमा ज्येष्ठाभेन समायु-
क्ता महाज्यैष्ठी प्रकीर्त्तिता ज्यैष्ठः
सम्वत्सरश्च ज्येष्ठामूलोपगे जी-
वे वर्षं स्यात् शक्रदेवतम् इति विष्णु-
धर्म्मोत्तरे कौमारः सम्वत्सरो-
ऽत्र वत्सरो बोध्यः न तु संवत्सरादि-
पञ्चकान्तर्गत वर्षविशेषः ज्यैष्ठ
इति विशेषणस्यावैयर्थ्यापत्तेः ॥
सैवतत्सरे यदि स्यात् तिथिपाठः का-
ल्पनिकः अपि च मलमासतत्त्वे-
ऽनुसन्धेयः ॥ विष्णुधर्म्मोत्तरे ब्रह्म-
पुराणयोः ॥ मासि ज्यैष्ठे तु संप्रा-
प्ते नक्षत्रे शक्रदैवते पौर्णमा-
स्यां तदा स्नानं सर्वपापं हरेद्द्विजाः
तस्मिन् काले नये ॥ ॥

मर्त्याः प्रयान्ति पुरुषोत्तमं बल-
भद्रं सुभद्रां च ते यान्ति पदमव्ययम्
स्कन्दपुराणे ज्यैष्ठ्यामहं यदावती-
र्णस्तत् कृष्णजन्मवासरं तस्यां मे
स्नपनं कार्य्यं महास्नानविधानतः
ज्यैष्ठ्यां प्रातःस्नानकाले ब्रह्मणा स-
हितं च मां रामं सुभद्रां संस्नाप्य मम
लोकमवाप्नुयात् ॥ विष्णुधर्म्मो-
त्तरे पौर्णमासी तथा माघी श्राव-
णी च नवोत्तम पौष्पयामतीता-
यां तथा कृष्णात्रयोदशी पतोह्व
आह्नकालान्वे निस्तानात्मजा-
पतिः तत्र पूर्वदिने संगवलाभे प-
हिप्रलाभे वा परदिने संगवलाभे
पूर्वदिने श्राद्धं कृष्णपक्षस्य पूर्वा-
के श्राद्धं कुर्य्याद्धि चतराः कृष्णप-
क्षापराह्णे तु रौहिणान्तं न लङ्घयेत्
इति वायुपुराणवचनात् उभयदि-
ने संगवलाभे परदिने शुक्लपक्षे
तिथिर्ग्राह्या यस्यामभ्युदितो रविः
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमि-
तो रविः इति विष्णुधर्म्मोत्तरात् ॥
एवमन्यत्र तीर्थ्यायामपि ॥ आ-
षाढकार्त्तिकमाघे पौर्णमासीषु
दानमावश्यकं तथा वायोद्धा ॥
काष्ठेऽभरतशयने आषाढा ॥
कार्त्तिके माघी तिथयः पुण्या-

स्सम्भवाः अन्नदानवतो यान्तु या-
स्यार्य्याऽनुमतो गतः अन्नदानव-
तोदानरहितस्येतास्ति यथो यात-
आर्य्यः श्रीरामचन्द्रोगतो यस्यात्र
मत इत्यन्वयः उत्तरवाक्ये यच्छब्दा-
त्र तच्छब्दोऽपेक्षा ॥ अथ कोजागर-
कृत्यं कल्पतरौ ब्रह्मपुराणे आश्वयु-
ज्यां पौर्णमास्यां निकुम्भो वा लङ्का-
णिवात् आयाति सेनया सार्द्धं कृत्वा
युद्धं सुदारुणं तस्मात्तत्र नरैर्भा-
गैः स्वगेहस्य समीपतः शोधित-
व्याः प्रयत्नेन भूषितव्याश्च भूषणैः
पुष्पाद्यैः फलमूलान्न सर्षपप्रकरै-
स्तथा वेश्मानि भूषितव्यानि ना-
नावर्णैर्विशेषतः स्नातैस्तैलि-
मैश्च नैर्भोज्यं सबान्धवैः दिवा-
तत्र न भोक्तव्यं मनुष्यैश्च विवेकि-
भिः स्त्री बालवृद्धमूर्खैश्च भोक्त-
व्यं पूजितैः स्तवैः पूजितैः ततो रात्रिवि-
शेषतो नक्तीया तेन पूजितस्सौरि-
न्यैः इन्द्राश्च सफलैस्तत्रैस्तथा
हारैरभिनयैः हारोपानेश्च दीप-
स्तु संपूज्योऽहमवाहनः यतात-
तमूतोयेते स्वर्गलोकस्मृतार्पितः
संपूजितव्यः शौनकः पयसा पा-
यसेन च रुद्रः सभार्य्यः स्कन्द-
श्च तदा नन्दीश्वरो मुनिः ॥

गोमद्भिः सुरभिः पूज्या छागवह्नि-
हुताशनः उरभ्रवह्निर्वरुणो गज-
वह्निर्विनायकः पूज्यः साश्वैश्चरेव-
न्तो यथाविभवविस्तरैः ततः पूज्या-
निकुम्भोऽपि समाषैस्तिलतण्डुलैः
सुगन्धिभिर्धूपैस्ते ः कृष्णाद्यैश्च
भूतिभिः ब्राह्मणान् भोजयित्वा तु भो-
क्तव्यं मांसवर्ज्जितं वह्निपार्श्वगतैर्ने-
या हृष्टाक्रीडाः पृथग्विधाः तु-
तश्च द्वारोद्भिमिति हव्यवाहनपूर्णि-
न्तु सभार्य्यरुद्रस्कन्दनन्दीश्वरमु-
नयः सर्वे देवपूज्याः द्वारोद्भिमिति ।
शाह्नोत्र बहुवचनान्तः नन्दीश्वर-
मुनिरेकः गोमन्तः सुरभिः छागव-
ह्निहुताशनः मेषवन्तो वरुणः हस्ति-
मन्तो विनायकः अश्ववन्तो रेवन्तः
सर्वैरेव निकुम्भः पूज्यः महालिङ्गे
लिङ्गपुराणे आश्विने पौर्णमास्यां तु
चरेज्जागरणं निशि कौमुदी सा स-
माख्याता कार्य्या लोकविभूतये
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरा-
वतस्थितं सुगन्धिर्निशि सद्वेशो ॥
अक्षैर्जागरणं चरेत् तथा निशीथे
वरदा लक्ष्मीः कोजागर्त्तीति भाषि-
णी तस्मै वित्तं प्रयच्छामि अक्षैः ॥
क्रीडां करोति यः नारिकेलैश्च
चिपिटकैः पितॄन्देवान् समर्च्चये ॥

येन् वंफस्य मीणयेन्नेन स्वयंन
दशनोभवेत् अत्र निशीति निशी
थ इतिवाभिधानाद्रात्रिकृत्यमि
दं ततःप्रदोषव्यापिनी ग्राह्येति।
थि नक्तव्रतेसदा प्रदोषास्तमया
दूर्ध्वं घटिकाद्वयमिष्यते इति।
सम्वत्सरप्रदीपधृतवत्सवचना
त् यद्दिने प्रदोष निशीथोभयव्या
पिनी पौर्णमासी तद्दिने कोजाग
र कृत्यं उभयव्याप्त्यभावात् यदा
तु पूर्वदिने निशीथव्याप्तिः पर
दिने प्रदोषव्याप्तिस्तदा परेद्युस्त
त् कृत्यं प्रधानकृत्याकालव्याप्त्य
नुरोधात् यदा पूर्वेद्युर्निशीथव्या
प्तिः परेद्युर्नप्रदोषव्याप्तिस्तदा॥
सततं पूर्वेद्युस्तत्कृत्यं अहःस्व
तिथयः पुण्याः कर्मानुष्ठानतो।
दिवा नक्तादिव्रतयोगेन रात्रियो
गो विशिष्यते इतिवचनात्॥
वर्जयेदिन्द्रपूजायां मत्स्यस्नेहमहा।
लक्ष्म्यास्तु तुलसीं किंकिंकावनं।
तथा लक्ष्मीध्यानमादित्यपुराणे
पाशाक्षमालिकांभोज सृणिभि।
र्याम्यसौम्ययोः पद्मासनस्थांध्या
येच्च श्रियंत्रैलोक्यमातरं गौरवर्णां
सुरूपांच सर्वालंकारभूषितां॥
रौक्मपद्म व्यग्रकरां वरदां॥

दक्षिणेनतु पाशेति दक्षिणेपाशा
क्षमालाभ्यां वामे पद्मांकुशाभ्यां
भूषितां वामकरे हेमपद्मं दक्षिण
करे वरं दधतीमर्थः ततःपाद्या
दिभिः संपूज्य ॐनमस्तेसर्वदेवा।
नां वरदासि हरिप्रिये यागतिस्त्वत्
प्रपन्नानां सामेभूयात्त्वदर्चनात्
इत्यनेन पुष्पांजलित्रयं दत्वा प्रण
मेत् इन्द्रध्यानमादित्यपुराणे॥
चतुर्दंतगजारूढो वज्रपाणिः पुर
न्दरः शचीपतिश्च ध्यातव्यो नाना
भरणभूषितः पाद्यादिभिः संपूज्य
ॐविविधैरावतस्थाय शश्वतकुलि
शपाणये पौलोम्यालिंगितांगाय।
सहस्राक्षायतेनमः इतिपुष्पांज
लित्रयं दत्वा प्रणमेत् ततःकुबेरः
संपूज्यः॥ इतिकल्पद्रुमः॥ ते।
पाद्यादिभिः संपूज्य ॐधनदाय।
नमस्तुभ्यं निधिपद्माधिपायच भ।
वन्तु त्वत्प्रसादान्मे धनधान्यादि।
संपदः इतिप्रणामेत् अत्रप्रदोषस
र्वेषां पूजेति कल्पतरुप्रभृतयः नव
निकुम्भपर्यालानां पूर्वोक्तपवस।
जने निरपवादमितिवाच्य दिवा॥
तत्रनभोक्तव्यं इत्युपक्रम्य कृष्णा।
ख्य सफलैः पत्रैर्विनाहिना विधि।
च्छद्मा मभिधाय भोक्तव्यं॥

मित्यभिधानात् राज्ञावेवपूजाभो
जने अवगम्यते अतएवाशाकाना
मेवभोक्तव्यं पूजितैःसर्वैर्दिमने
न विशिष्यदिवापूजा भोजनेवि।
हिते॥ योगिनीतन्त्रे विरिंचेस्तु।
गृहेष्टकं वा घण्टालक्ष्मीर्गृहेवस
जेत् सर्ववाद्यमयीघण्टा वाद्यभा
वेतुयापयेत्॥ लक्ष्मीवाक्यम्प्र।
कीर्णभाण्डामनवेक्षकारिणी
सदाचभर्तुःप्रतिकूलवादिनीम्
परस्यवेश्माभिरतामलज्जा मेवंवि
धांस्त्रीं परिवर्जयामि मार्कण्डेयः
शिवः सत्यश्चधरणीसुपूजितो व
राशनासेवनमल्पभोजनं अनग्न
शायित्वमपर्वमैथुनं चिरप्रणष्टां
श्रियमानयन्तिषट् मानुषाश्चिर
हे यत्र अहोरात्रेचतिष्ठति तत्राल
दिमितवायासा लक्ष्म्यास्तेषांचवत्स।
सा लक्ष्मीदात्रादिकेयत्र यत्नाकर्षेन
घासनम् हरिवंशीयत्रकोःश्रीः।
स्थितानत्र यत्रश्रीस्तत्रसन्नतिः
सन्नति ह्रीस्तथाश्रीश्च नित्यंकृष्णे
महात्मनि मत्स्यपुराणे स्थिरोहि
यो हि पुरुषः स्थिरश्रीरेवजायते र
क्षिते नैवशक्नोति चपलश्चपलां
श्रियम् तथाश्चवत्सपरुषयोगव।
तो श्रीर ॥ ॥

पाप्माभवेत् सदा ब्रह्मभ्रातस्साहि।
तादेवा ममस्युःपुनरस्तुपिम्
कृत्स्नैःकौमुद्यां नारिकेलोदकंपी
त्वा अक्षैर्जागरणंनिशि तस्मैवि
त्तं प्रयच्छामि कोजागर्तिमहीत।
ले॥ अक्षक्रीडायां व्यासयुधिष्ठि
र संवादः प्रचरति तत्क्रीडाच।
तुरंगशाहे द्रष्टव्या॥ वैसवाम्
तेस्कन्दपुराणे पौष्यान्तसमती
तायां यावद्भवति पूर्णिमा माघ
मासस्यदेवेन्द्र पूजाविस्मार्दिधी।
यते इतिपौर्णमास्यन्तमासमुप।
क्रम्यपितृणां देवतानांच मूल
कंनैवदापयेत् दद्यान्नरकमाप्नो
ति भुंजीतब्राह्मणोयदि ब्राह्मणो
मूलकंभुक्त्वा चरेच्चान्द्रायणव्रतं
अन्यथानरकंयाति तस्मादित्यूद्
पवच वरंभक्षनमत्स्यंच पिवेद्वागर्हि
तेचयत् वर्जनीयंप्रयत्नेन मूलकं
मदिरासमं॥ फाल्गुनेदोलया।
आमाह तीर्थविशामणिर्ब्रह्मपु।
राणे नरोदोलागतंदृष्ट्वा गोविंदं।
पुरुषोत्तमम् फाल्गुन्यांसंयतोभू
त्वा गोविंदस्यपुरंव्रजेत् स्कन्दपुरा
णीयपुरुषोत्तममाहात्म्येकृतत्रि।
शाध्यायोफाल्गुन्यांक्रीडनेकृष्णा
त् दोलायाममभूमिप इतितिथि।

तत्त्वम् ॥ तस्याः पर्व्वतं पर्व्व ॥
शाद्दरूपम् ॥ पूर्त्तं क्ली
पालने इति शब्दरत्नावली
खातादि कर्म्म इत्यमरः ॥
आदिना देवकुलादि तल्लक्षं य
कूपः सभा वापी देवताय
तनानि च आरामश्च विशेषेण
पूर्त्तकर्म्म विनिर्द्दिशेत् इति
भरतः तत्करणफलं यथा
पूर्त्ते द्विजातीनां प्रथमे धर्म्म
साधनम् इष्टेन लभते स्वर्गं ।
पूर्त्ते मोक्षं च विन्दति वापीकूप
तडागानि देवतायतनानि च
पतितान्युद्धरेद्यस्तु स पूर्त्तफ
लमश्नुते इति वराहपुराणं ॥
वापीत्यादीनां पूर्त्तसंज्ञाभिधाना
त् शूद्रस्याधिकारमाह जातू
कर्ण्यः वापीकूपतडागादि दे
वतायतनानि च अन्नप्रदानमारा
माः पूर्त्तमित्यभिधीयते गृहोप
रागे यद्दानं पूर्त्तमित्यभिधीय
ते इष्टापूर्त्ते द्विजातीनां धर्म्मः
सामान्य उच्यते अधिकारी भवे
त् शूद्रः पूर्त्तधर्म्मे न वैदिके वै
दिके वेदाध्ययनसाध्ये अग्निहोत्रा
दाविति रत्नाकरः एवं स्त्रीणामपि
पूर्त्ताधिकारः यथा नारी सत्यहेतो
बृहस्पतिः पितृव्य गुरु

दौहित्रान् भर्त्तुः स्वस्त्रीयमातुला
न् पूजयेत् कव्यपूर्त्ताभ्यां वृद्धा
नाथातिथीन् स्त्रियः इति जला
शयतत्त्वम् ॥ पूर्त्तिः
त्रि पूरितः छन्नः इति विश्वः पू
र्त्तिः स्त्री पूरणं पृथातो भावे क्तिः
इति व्याकरणम् ॥
पूर्व्व क निमन्त्रणे निवासयोः
इति कविकल्पद्रुमः ॥
पूर्व्व निकेतने निमन्त्रणे नि
वासे वा इति कविकल्पद्रुमः
अन्तस्थवान्तोऽयम् ॥
पूर्व्वः त्रि प्रथमः आदिः आदि
—पकालाः इत्यमरः समग्रम्
इति तट्टीकायां स्वामी अग्रः
इति हलायुधः ॥
पूर्व्वगङ्गा स्त्री नर्म्मदानदी इ
ति हेमचन्द्रः ॥ पूर्व्वजः
पुम् ज्येष्ठभ्राता इत्यमरः ॥ पू
र्व्वजाः पुं दिव्यपितृगणाः तत्
पर्य्यायः पितरः २ वेदगोल
स्थाः ३ स्वलप्राज्ञाः ४ स्वधाभुज
५ कव्यवालादयः ६ बहुवचना
न्तोऽयं इति त्रिकाण्डशेषः ॥
पूर्व्वजा स्त्री अग्रजा ज्येष्ठाभगिनी ।
पर्व्वज इत्यमरदर्शनात् ॥
पूर्व्वजिनः पुं अतीतजिनविशेषः

तत्पर्य्यायः मञ्जुश्रीः २ ज्ञान
दर्पणः ३ मञ्जुभद्रः ४ मञ्जुघो
षः ५ कुमारः ६ अष्टारचक्रवान्
७ स्थिरचक्रः ८ वज्रधरः ९ प्र
ज्ञाकायः १० आदिराट् ११ नीलोत्
पली १२ महाराजः १३ नीलः १४
शार्द्दूलवाहनः १५ धियाम्पतिः
१६ खड्गी १७ दण्डी १८ विभूषणः
१९ बालव्रतः २० पञ्चचीरः २१ सिं
हकेलिः २२ शिखाधरः २३ वा
गीश्वरः २४ इति त्रिकाण्डशेषः
पूर्व्वदिक् स्त्री प्राचीदिक् यस्मि
न् दिशि सूर्य्य उदेति तदधिपतिरि
न्द्रः तस्याः पर्य्यायादिः पूर्व्वाशा
॥ शब्दे द्रष्टव्यः ॥ पूर्व्वदिक्
पतिः पुं इन्द्रः इति हेमचन्द्रः
पूर्व्वदेवः पुं असुरः इत्यमरः ।
पूर्व्वदेशः पुं प्राचीदिगवस्थित
जनपदः तत्पर्य्यायः वर्म्मतिः
२ इति त्रिकाण्डशेषः यथा प्रा
च्यां मागध शोणौ च वारेन्द्री गौ
डराढकाः वर्द्धमानतमोलिप्त
प्राग्ज्योतिषोदयाद्रयः इति
ज्योतिस्तत्त्वम् ॥ ॥
पूर्व्वपदं क्ली परपदप्राग्वर्त्ति
विभक्त्यन्तप्रकृतिः यथा पूर्व्वप
दात् संज्ञायामगः इति सुप
द्मव्याकरणम् ॥

पूर्व्वपर्व्वतः पुं उदयाचलः इत्यम
रः ॥ पूर्व्वपक्षः पुं शुक्लपक्षः इ
त्यमरः शास्त्रीयप्रश्नः सिद्धान्तविरु
द्धाकोटिः तत्पर्य्यायः चोद्यं २ इति
त्रिकाण्डशेषः ॥ देश्यं २ फक्कि
का ४ इति शब्दरत्नावली ॥
पूर्व्वपक्षपादः पुं चतुष्पाद्व्यवहारा
न्तर्गतः प्रथमः पादः तस्य संज्ञान्तरं
भाषा २ प्रतिज्ञा ३ पक्षः ४ इति मि
ताक्षरा तत्र बृहस्पतिः पूर्व्वपक्षः स्मृ
तः पादो द्विपादश्चोत्तरः स्मृतः क्रिया
पादस्तथा चान्यश्चतुर्थो निर्णयः स्मृ
तः मिथ्याकोचचतुष्पात् स्यात् प्रत्य
वस्कन्देन तथा प्राङ्न्यायेन च स विज्ञे
यो द्विपात् संप्रतिपत्तिषु यद्यपि
सम्प्रतिपत्तावपि निर्णयोऽस्ति त
तथाप्युत्तरवादिनैव भाषार्थस्याङ्गी
कृतत्वेन क्रियासाध्यो न भवतीति ।
द्विपाद्भोक्ता ॥ अथ भाषापादः
अत्र भाषास्वरूपमाहतुः कात्या
यनबृहस्पती प्रतिज्ञादोषनिर्मुक्तं
साध्यं सत्कारणान्वितम् निश्चितं
लोकसिद्धं च पक्षं पक्षविदो विदुः
स्वल्पाक्षरः प्रभूतार्थो निःसन्दि
ग्धो निराकुलः विरोधि कारणै ॥
र्मुक्तो विरोधिप्रतिषेधकः यदा
त्वेवंविधः पक्षः कल्पितः पूर्व्ववा
दिना दद्यात्तत् ॥

पक्षसम्बद्धं प्रतिवादीतदोत्तरम् ।
प्रतिज्ञा साध्याभिधायिकावाक् ।
तस्यादोषैः परस्परम् विरुद्धार्थप
दादिभि स्त्यक्तं साध्यसाधनार्हाभि
मतार्थपक्षं विदुः अन्यथा प्रति
ज्ञा दोषेण साध्यदोषः स्यात् अत
एवोक्तं वचनस्यप्रतिज्ञात्वं तदर्थ ।
सच पक्षतत्ता प्रसंकरेणावक्तव्ये
व्यवहारेषुवादिभिः वक्तव्यपक्ष
प्रतिज्ञे पूर्ववाक्येनारदेनापि सारस्व
व्यवहारेण प्रतिज्ञासमुदाहृता
तद्धानेनहीयतेवादी तरंस्तामुत्तरो
भवेत् उत्तरो विजयी यद्यप्यत्र ।
साध्यंज्ञाप्यं तद्विशिष्टधर्म्मीपक्षः ।
इतिभेदः तथाप्यत्रवाक्प्रमाणे
हि धर्म्मविशेष विशिष्टस्य पक्षत
या धर्म्मिणोऽधमर्णादेरेवसाध्य
त्वात् साध्यपक्षयोरभेदाभिधानं ।
अतएवउपसंहारे च पक्षं विद्युःप
क्ष इतिमितात्त्वरायाम् भाषा प्रति
ज्ञा पक्ष इतिनार्थान्तरमित्युक्तम् ।
भाषार्थमुक्ता भाषा स्वरूपम ।
पंचमाह स्वस्मृत्यन्तर इतिनि ।
राकुलः पौर्वापर्य्यविपर्य्ययः ॥
सादि शून्यः अत्रयुक्ते च व्याव
हारेच प्रवृत्तेयत्न ॥ ॥
ॐपक्षं ॥ विद्युः ॥ पक्ष ॥ इति ॥
कविकं ॥ स्प ॥ द्रमः ॥ ऽ ॥

कर्म्मणि यानिपश्यन्त्युदासी
नाः कर्त्तातानिनपश्यति इति
शब्दसंग्रह वचनाद्उदासीनेभ्यो
ज्ञात्वा शोधयेत् तच्छोधनमाह
बृहस्पतिः न्यूनाधिकं पूर्वपक्षं ।
तावद्वादी विशोधयेत् नदद्यात् ।
उत्तरंयावत् प्रत्यर्थीसन्यसन्
निधौ तल्लिखनप्रकारमाहव्या ।
सः पाण्डुलेख्येन फलके भूमौ ।
वाप्रथमं लिखेत् ऊनाधिकंत
संशोध्य पश्चात्पत्रेनिवेशयेत्
फलकं काष्ठादि पट्टकं काष्ठाथ
नः पूर्वपक्षंस्वभावोक्तं प्राड्वि ।
वाकोऽथलेखयेत् पाण्डुलेख्ये ।
न फलके ततः पत्रेऽभिलेखयेत्
शोधयेत् पूर्वपक्षन्तु यावन्नोत्त
रदर्शनं उत्तरेणावरुद्धस्य निवृ
त्तिः शोधनेभवेत् । अन्यदुक्तं ।
लिखित्वैवतु दर्ष्टि प्रत्यर्थिनो वे
चः चौरवद्धासयेत्तंतु धार्म्मि
कः पृथिवीपतिः स्वभावोक्त ।
मकुडिमम् पतञ्च स्वरविशे ।
षादिना सुज्ञेयम् अतएवया
ज्ञवल्क्यः छलंनिरस्यभूतेन
व्यवहारान्नयेन्नृपः भूतमप्य ।
नुपन्यस्तं हीयते व्यवहारतः
भूतंतत्त्वार्थसम्बद्धं यदाहना
रदः भूतम् तत्त्वार्थम्

सम्बद्धं प्रमाणाभिरितंछले किं ।
तत्साज्ञाविशेषेण स्वधर्म्ममभिर
तता मनुष्यचित्तं वैविद्यात् परी
त्यामायक्सायुना सर्वेष्वर्थविवा ।
देषु वाक्छलेनावसीदति पशु ।
स्त्री भूम्यृणादाने शास्योप्यर्थात्र ।
हीयते सर्वेष्वर्थविवादेषुप्रमा
दाभिधानेपि नावसीदति अत्रोदा
हरणं पशुस्त्रीत्यादि अर्थविवा
द ग्रहणान्नमस्कृत विवादेषुप्र
मादाभिधाने प्रकृतार्थहीयत इति
गम्यते यथाह मनेनप्रिवासिपादे
नताडित इत्यभिधाय केवलेह
स्तेनताडित इतिवदन् नकेवलं ।
दण्ड्यः पराजीयते च तथाच त्वे
शान्तमह्ये ऋणं धारयसि मत्त ऋ ।
णेन गृहीत तावद्दुनकत्वादित्यादि
भाषा प्राकृतं यतच्च संस्कृत देशभा
षाद्य नवरेण यथा बोधं वक्तव्यं ले ।
ख्ये वाम्नूर्खानामपि वादि प्रतिवादि
त्वदर्शनात् अतएवाध्यापनेपि न
षोक्तं विसयर्म्मात्तरे ॥ संस्कृतैःप्रा
कृतैर्वाक्यैर्यः शिष्यमनुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत्सगु
रुः स्मृतः इतिव्यवहारतत्त्वम्
पूर्वफल्गुनी स्त्री अश्विन्यादिसप्त
विंशति नक्षत्रान्तर्गतैकादश नक्षत्रे

तत्र खट्वाकृति तारकाद्वयात्मके
तस्याधिष्ठात्री देवता भगः इतिमु
हूर्त्तचिन्तामणिः अपिच दक्षिणे ।
तरगते हितारके योनिभेमिलति
मल्लिका परिकीर्त्तितः स्फुटसरोरुहा
ननेनिःसृता २९८ गजस्यातिलि ।
मिकाः दम् ४ २८ इतिकालि ।
दासकृत रात्रिलग्नानिरूपणं ॥
तत्रजातफले शूरस्त्यागी साहसीभू
मिभर्त्ता कोपाक्रान्तःसाच्छिरालोऽ
तिदक्षः धूर्त्तःक्रूरोऽन्यनवालापिकः
प्राक्फल्गुन्यः स्त्रीजन्मकालेचया ।
स्य इतिकोष्ठीप्रदीपः ॥
पूर्वफल्गुनीभवः पुं बृहस्पतिः
इति शब्दमाला ॥ पूर्वभद्रपदः
पुम् अश्विन्यादि सप्तपूर्वभद्रपदाः
स्त्री विंशाति नक्षत्रा पूर्वभाद्रपदाः
स्त्री तर्गतपंचविंशतिनक्षत्रे तत् ।
पर्य्यायः ॥ प्रोष्ठपदाः २ इत्यमरः
हे पूर्वभाद्रयदोत्तर भाद्रपदास्तु प्रो
ष्ठे गोः भद्रंश्रेगोः तस्येवपादश्चात्मा ।
नास्तथा ग्रहपतिर्द्विभद्रपादानुग ।
तोराज्येत्याश्चर्यमंजरीश्लेषाद्भद्र ।
पदाशब्दो ह्रस्वादिः भाद्रपदाश
ब्दो दीर्घादिरपीति केचित् दीर्घा
दिपाठः सामादिक इतिमुकुटाद
यः पूर्वं प्रोष्ठ

पदे द्वे उत्तरेत्त भद्रपदे द्वे समुदा
यश्चासां चतसः सख्ये इति बहुव
चनम् कदापूर्वे प्रोष्ठपदे कदा
उत्तरे प्रोष्ठपदे इति तारकयो
र्द्वित्वात् द्विवचनम् फल्गुणीप्रो
ष्ठपदाशाढ़ा द्वित्वे बहुत्वे च भद्र
पदाद्वेपीति केचित् भद्रपदेन
युक्तः काल इति प्रयोगात् पुं
लिंगोपि भद्रपद इति केचित्
इति तट्टीकायां भरतः ॥ ता
स्तु दलितोत्तरवर्त्ति खट्वाकृति
तारकाद्वयात्मिकाः ताराकृति
ताराद्वय रूपा वा तदधिदेवता
अजपदः आसां जन्मफलम् इ
तिज्योतिषे अपि च भावमूर्त्ति
भूतिकोपरि स्थिते पूर्वभाद्रप
दे तेहि तारके लिप्तिकाः करिक
रात्रि २२८ सेसिता निःसरन्ति
वृषभोदयात् प्रियेदम् १४८ इति॥
कालिदासकृतरात्रिलग्ननिरूपणे
तत्र जातफलं ॥ जितेन्द्रियः सर्वक
लासदक्षो जितारिपक्षः खलतस्य
नित्यं भवेन्महीयान् सुतरामपूर्वा
पूर्वोदया भाद्रपदा प्रसूतौ इति को
ष्ठीप्रदीपः ॥ पूर्वयक्षः पुं जिन
विशेषः तत्पर्य्यायः मणिभद्रः २
जम्भलः ३ जलेन्द्रः ४ इति त्रि
काण्डशेषः पूर्वरंगः पुं नाट्या
पक्रमः इति हेमचन्द्रः तत्प
र्य्यायः प्राक्संगीते २ उत्थाप
का ३ इति जटाधरः ॥
पूर्वरागः पुं नायकनायिकयो
र्दशाविशेषः यथा श्रवणाद्द
र्शनाद्वापि मिथः संरूढरागयोः
दशाविशेषो योऽप्राप्तौ पूर्व
रागः स उच्यते इति साहित्यद
र्पणं पूर्वरात्रः पुं रात्रेः पूर्वभा
गः इति मुग्धबोधव्याकरणं ॥
पूर्वलक्षणं क्ली पूर्वलक्षणं वैद्य
के भाविव्याधिबोधक चिह्नं य
था प्राग्रूपं येन लक्ष्यते उत्प
त्सुरामयो दोषविशेषेणान
धिष्ठितः लिंगमव्यक्तमल्पत्वाद्व्या
धीनां यद्यथायथम् द्विविधं हि
पूर्वरूपं भवति सामान्यं विशिष्टं च सा
मान्यं येन दोषदूष्यसंमूर्छनावस्था
जनितेन भावि ज्वरादि व्याधिमात्रं
प्रतीयते न तु वातादि जनितत्वादि
विशेषः यथा श्रमोऽरतिर्विवर्णत्व
मिति तथा बालगुरुवाक्यप्रद्वेषादि
सामान्याभिप्रायेणैव तन्त्रान्तरम्
यथा व्यायेजी ॥

तिर्द्विभूषा च पूर्वरूपेण लक्ष्यते
भावः त्रिमात्मकत्वेच लक्ष्यते
लक्षणेन तु इति तथाह पराशरः
पूर्वरूपेनामयेन भावि व्याधिवि
शेषो लक्ष्यते न तु दोषविशेष इ
ति विशिष्टं यथा उरःस्तनादौ लि
गान्येव वातादि जान्यव्यक्तानि य
दुक्तं तत्रैव अव्यक्तं लक्षणं तेषां
पूर्वरूपमिति स्मृतमिति तथाह
सुश्रुतः सामान्यतो विशेषात्तु जृ
म्भात्यर्थं समीरणात् पित्तान्नयन
योर्दाहः कफाच्चान्नाभिनन्दन मि
ति हारीतेप्युक्तं इति पूर्वरूप म
ष्टानां ज्वराणां आद्यान्तो विशे
षात्तु जृम्भांगमर्दभूयिष्ठे हृदयो
द्वेगि वातजमिति प्राग्रूपं येन
लक्ष्यते इत्यस्यार्थमाह रक्षितः
येन श्रमादिना उत्पित्सुः साम
ग्री साकस्मादुत्पादेव्यामयो रोगः
दोष विशेषेण वातादि जन्यासा
धारणवेपथ्वादिना अनधिष्ठि
तो ऽसम्बद्धो लक्ष्यते ज्ञायते तत्
प्राग्रूपमिति लिंगमव्यक्तमल्प
त्वादित्यस्यार्थमाह स एव प्राग्रू
पमित्यनेन पूर्वोक्तेन सम्बन्धः लि
गं लक्षणं अव्यक्तं नाप्यभिव्यक्तं
तत्र हेतुरल्पत्वात् तन्नावरणादित्यो
गात्
व्यक्तत्वमित्यर्थः यथा यथं यस्य व्या
धेर्यद्रूपं तदेवाव्यक्तं तस्य पूर्वमि
त्यर्थः अन्यत्तु पूर्वरूपलक्षणमा
हुः स्थानसंश्रयिनः क्रुद्धा भावि
व्याधिप्रबोधकं दोषाः कुर्वन्ति यल्लि
गं पूर्वरूपं तदुच्यते इति संक्षेपतस्तु
लक्षणम् भाविव्याधिबोधकमेव
लिंगं पूर्वरूपं इति माधवकरम् ॥
छिनयशस्तिलो पूर्ववादः पुम् व्य
वहारे राजादिसमीपे प्रागावेदनम्
यथा पूर्ववादस्यावित्यज्य योन्यमा
लम्बते पुनः पदसंक्रमणाज्ज्ञेयो
हीनवादी स वै नरः इति मिताक्ष
रा पूर्ववादी पुं प्रागभियोक्ता प्रथम
विवादी यथा श्राद्धं न्यायकारणो
क्तौ तु प्रत्यर्थी निर्दिशेत् क्रियां मि
थ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न साभ
वेत् इति मिताक्षरा पूर्वशैलः पुम्
उदयपर्वतः इति जटाधरः ॥
पूर्वसरः त्रि अग्रगामी यथा द्वि
षन् वनेचराग्र्याणां त्वमादाय च
लेवने अग्रेसरो जन्यानां माभूत्
पूर्वसरो मम इति भट्टिः ॥
पूर्वसारः त्रि पूर्वसरः पूर्वदेशो
सरतीति कर्त्तरि षन् प्रत्ययः इ
ति व्याकरणम् ॥
पूर्वा स्त्री पूर्वदिक् तत्पर्य्या

यः ॥ प्राची २ पूर्वा ३ माघोनी ४
ऐन्द्री ५ माघवती ६ तद्दिग्भववायु-
गुणाः पूर्वस्त्वमधुरो वातः स्नि-
ग्धः कटुरसान्वितः गुरुर्विदाहशम-
नो वातदः पित्तनाशनः इतिराज-
निर्घण्टः ॥ अपिच प्राग्वातो
मधुरः क्षारो वह्निमान्द्यकरो गुरुः
वैवर्ण्यरोगरक्तानि करोत्यप्रशोष
पीषच भग्नोत्पिष्टक्षतायेषु वा-
गक्षयपूयदाहकृत् सन्निपातज्व-
रश्वास व्रणदोषार्शोविषक्रिमी-
न् कोपयेदामवातंच व्रणसंघात-
कारणं इतिराजवल्लभः ॥
तद्दिगधिपतयः मेषसिंहधनूरा-
शयः यथा प्रागादि ककुतोनाथा
यथासंख्यंप्रदक्षिणं मेषाद्याराशयो
योज्ञेया स्त्रिरावृत्तिपरिभ्रमात् इ-
तिज्योतिस्तत्त्वम् ॥ पूर्वाः
पुम् पूर्वजाः पूर्वपुरुषाः बहुव-
चनान्तोऽयं इत्यमरः पूर्वाद्रिः।
पुं उदयाचलः तत्पर्य्यायः ॥
दिनमूर्द्धा २ इतित्रिकाण्डशेषः
पूर्वाषाढा स्त्री अश्विन्यादि सप्त-
विंशतिनक्षत्रान्तर्गतविंशन-
क्षत्रम् सा सूर्पाकृति चतुस्तारा-
त्मिका ॥

गजदन्ताकृति द्वितारात्मिका वा
अस्या अधिष्ठात्री देवता तोयं इति
ज्योतिषं अपिच सूर्प मूर्त्तिनिशि-
रोभगे चतुस्तारके ककिनोऽरुवा-
हिते अन्मतादरत्तवाणि नियताः
खिवराम्बरशशांक लिपिकाः दे-
धर्षं इतिकालिदासकृतरात्रिलग्न-
निरूपणं ॥ तत्रजातफलं भूयो-
भूयः स्तूयमानास्तु वक्ता भक्तो देवे-
बन्धुमान्यो नितान्तः पूर्वाषाढा
जन्मकाले यदिस्यादाषाढः स्या-
द्वैरिवर्गे नितान्तं इतिकोष्ठीप्रदीप
पूर्वाह्णः पुं त्रिधाविभक्तदिनप्र-
थमभागः स च त्रिंशद्दण्डदिनप-
माने सूर्य्योदयावधि दशदण्डका-
लः यथा पूर्वाह्णे वै देवानां म-
ध्यन्दिनम् मनुष्याणामपराह्णः
पितॄणां इतिश्रुतिः ॥ अपिच
त्रिधा विभक्तदिन भागाभिप्रा-
येण तु लोकाक्तिः पूर्वाह्णे मध्य-
मे वापि यदि पर्वसमाप्यते म-
होपवासः पूर्वेद्युः स्वदहर्य्यागा-
ईष्यते अपराह्णेऽथवारात्रौ य-
दि पर्वसमाप्यते उपोष्यतस्मिन्
नहनि श्वो भूते योग इष्यते उपो-
ष्येति नहोरात्राभोजन परम्

किंव कृते अग्न्याधाने देवा य-
जमानस्य समीपमुपवसन्तीति
उपवासशब्दे नाग्न्याधानमुच्यते
सूर्य्योदयावधिप्रहरद्वयम् द्विधावि-
भक्ता दिनपूर्वभागः यथा पूर्वाह्णो-
पराह्ण रूपद्विधा विभक्त दिनस्या-
वधित्वेना वत्तेनमाह स्कन्दपुरा-
णे आवर्त्तनात्तु पूर्वाह्णो ह्यपराह्ण-
स्ततः परः आवर्त्तनात्तु वासरस्य
छाया परिवर्त्तनात् प्रागिति शे-
षः अतएवोक्तं अश्वत्थं वन्द्येन्नि-
त्यं पूर्वाह्णे प्रहरद्वये अतऊर्द्ध्वं नवा-
न्देत अश्वत्थंतु कदाचन इति
मलमासतत्त्वम् ॥ पूर्वाह्णे त-
नः त्रि पूर्वाह्णे भवः इति सिद्धा-
न्तकौमुदी ॥ पूर्वेद्युः अ व्य
पूर्वदिनम् इत्यमरः प्रातःकालः
धर्म्मवासरः इति मेदिनी ॥
पूल कि संहतौ राशीकरणे इ-
ति कविकल्पद्रुमः ॥ पूष वृ-
द्धौ इतिकविकल्पद्रुमः पूषः
पुं ब्रह्मदारुवृक्षः तूत इति भा-
षा इत्यमरः ॥ पूषकः
पुं ब्रह्मदारुवृक्षः पलाश पि-
पल इति हिन्दी भाषा इतिरा-
जनिर्घण्टः अस्य पर्य्याय गुणाः

तूलशब्दे द्रष्टव्याः ॥ पूषभा-
षा स्त्री इन्द्रनगरी तत्पर्य्यायः
अमरावती २ इतिशब्दरत्नावली ॥
पूषसुहृत् पुं शिवः इतिहेमचन्द्रः
पूषा पुं सूर्य्यः इत्यमरः ॥
पृ ण प्रीतौ इतिकविकल्पद्रुमः
पृ लि पालने इतिकविकल्पद्रु-
मः पृ श ङ व्यायामे इतिकवि-
कल्पद्रुमः पृ क पूर्त्तौ पालने इ-
तिकविकल्पद्रुमः ॥
पृक्का स्त्री शाकविशेषः पिं-
ड़िं इति भाषा तत्पर्य्यायः मरु-
न्माला २ पिशुना ३ देवी ४ ल-
ता ५ लघुः ६ समुद्रान्ता ७ वधूः
८ कोटिवर्षा ९ लङ्कायिका १०
इत्यमरः मरुत् ११ माला १२ स्पृ-
क्का १३ कोटी १४ वर्षा १५ लङ्का-
यिका १६ वर्षालङ्कायिका १७ इति
तट्टीकायां भरतः ब्राह्मकः १८ चो-
रकः १९ चण्डः २० इतिरत्नमाला
अस्या गुणाः पाके मधुरत्वम् कषा-
यत्वम् पित्तकफनाशित्वंच इति
राजवल्लभः ॥
पृक्तं क्ली धनम् इतिहेमचन्द्रः
संपर्कयुक्ते त्रि पृक्तिः स्त्री ॥
सम्पर्कः स्पर्शः तत्पर्य्यायः ॥

स्पृष्टिः २ इत्यमरः पृच ई।
ल ङ. सम्पर्के इतिकविकल्प
द्रुमः ॥ पृच ईध सम्पर्के इ।
तिकविकल्पद्रुमः ॥ पृच कि
संयमने सम्पर्के इतिकविकल्प
द्रुमः ॥ पृच्छा स्त्री प्रश्नः इत्यमरः
पृज ल ई ङ. संपर्के इतिकविक
ल्पद्रुमः ॥ पृड श हर्षे इतिक।
विकल्पद्रुमः । पृण श तृप्ति
त्प्रीकरणे इतिकविकल्पद्रुमः
पृतना स्त्री सेना सेनाभेदः इति
मेदिनी वाहिनीत्रयम् अत्रगजा
श्चिचत्वारिंशदधिकशतद्वयं २४२
रथाश्च चत्वारिंशदधिक शत
द्वयम् २४३ अश्वा ऊनत्रिंशद
धिक सप्तशतम् ७२९ पदाति।
काः पंचदशाधिक शतद्वया।
धिक सहस्रं १२ १५ समुदायेन
त्रिंशदधिक चतुः शताधिक ॥
सहस्र द्वयम् २४३० इत्य मर।
भरतौ ॥ ॥

सार

पृतनाषाट् पुं इन्द्रः इतित्रिकाण्ड
शेषः ॥ पृथ क प्रक्षेपे इतिक।
विकल्पद्रुमः पृथक् अव्यये तत्
पर्यायः विना २ अन्तरेण ३ ऋ
ते ४ ॥

हिरुक् ५ नाना ६ वर्जनम् ७
इत्यमरः ॥ पृथक्त्वम् क्ली।
चतुर्विंशति गुणान्तर्गतसप्तम।
गुणः तस्य लक्षणं पृथक् प्रत्यया
साधारण कारणत्वं यथा संख्याव
त् पृथक्त्वस्मात् अपृथक्प्रत्यय कार
णं अन्योन्याभाववतोनाम्य चरितार्थत्व।
मुच्यते अस्मात्पृथगियेनेति प्र॥
तीतिर्हि विलक्षणा इतिभाषप।
रिच्छेदः पृथक्त्वं निरूपयति
संख्यावदिति पृथक् प्रत्ययासा।
धारणकारणं पृथक् त्वम् तत्।
नित्यतादिकं संख्यावत् यथाहि
नित्येषु एकत्वं नित्यं अनित्ये अनि
त्ये आश्रय द्वितीयत्वेन वोत्पा।
द्यते आश्रय नाशात्वश्यतितथा
एकपृथक्त्वमपिद्वित्वादिवत्
द्विपृथक्त्वादिकमपीत्यर्थः इ।
तिसिद्धान्तमुक्तावली ॥ पृथक्
त्वचा स्त्री मूर्वा इतिरत्नमाला पृथ
कपर्णी स्त्री लताकृतविशेषः ॥
चाऊल्या इति भाषा तत्पर्यायः पृ।
श्निपर्णी २ चित्रपर्णी ३ अंघ्रिवल्लि।
का ४ इत्यमरः ॥ पृथक्क्षेत्राः
पुं एकस्माज्जातानावर्णास्त्रीजालपुत्राः
इतिमिताक्षरा ॥ पृथगात्मता
स्त्री विवेकः इत्यमरः ॥

पृथगात्मिका स्त्री व्यक्तिः य॥
था जातिर्जातेव सामान्ये व्यक्तिस्तु
पृथगात्मिका इतिजनुर्जननजं।
न्मानीत्यादि श्लोकोत्तरं क्वचिदम
रकोषपाठः ॥ पृथग्जनः
पुं मूर्खः नीचः इत्यमरः पापी इ
तिशब्दरत्नावली ॥ भिन्नलोक
श्च ॥ पृथग्विधः त्रि नानारू
पः इत्यमरः पृथग्बीजः पुं।
भल्लातकः इतिराजनिर्घण्टः
पृथवी स्त्री पृथिवी यथा पृथ्वी।
वी पृथिवी पृथ्वी धरा सर्वसहा
रसा इतिभरतधृतवाचस्पतिः
पृथा स्त्री कुन्ती इतिजटाधरः ॥
पृथाजः पुं अर्जुनवृक्षः इति।
राजनिर्घण्टः ॥ कुन्तीपुत्रश्च ॥
पृथापतिः पुं पाण्डुराजः इति।
त्रिकाण्डशेषः ॥ पृथिका
स्त्री शतपदी इतिशब्दमाला ॥
पृथिविः स्त्री पृथिवी इतिसंक्षि
प्तसारोणादिवृत्तिः ॥
पृथिवी स्त्री पृथ्यतेविस्तारं या।
ति इवट् निपातनात्षिः तत्पर्या
यः ॥ भूः २ भूमिः ३ अचला ४
अनन्ता ५ रसा ६ विश्वम्भरा ७
स्थिरा ८ धरा ९ धरित्री ॥

१० धरणी ११ क्षोणी १२ ज्या १३
काश्यपी १४ क्षितिः १५ सर्वसहा १६
वसुमती १७ वसुधा १८ उर्वी १९
वसुन्धरा २० गोत्रा २१ गः २२ पृ।
थ्वी २३ क्ष्मा २४ अवनिः २५ मेदिनी
२६ मही २७ इत्यमरः भूर् २८ भू
मी २९ धरणिः ३० क्षोणिः ३१ क्षो
णी ३२ क्षौणिः ३३ क्षमा ३४ अ
वनी ३५ महिः ३६ रत्नगर्भा ३७
सागराम्बरा ३८ अब्धिमेखला ३९
भूतधात्री ४० रत्नावती ४१ देहि
नी ४२ पारा ४३ विपुला ४४ म॥
ध्यमलोकवर्त्मा ४५ इतिभरतः
धरणीधरा ४६ धारणी ४७ म।
हाकान्ता ४८ जगद्वहा ४९ गन्धव
ती ५० खण्डनी ५१ गिरिकर्णिका ५२
धारयित्री ५३ धात्री ५४ सागरमे।
खला ५५ सहा ५६ अचलकीला
५७ गौः ५८ अब्धिद्वीपा ५९ क्षि
रा ६० इडा ६१ इडिका ६२ इला ६३
इलिका ६४ इतिशब्दरत्नावली
उदधिवस्त्रा ६५ इरा ६६ आदिना
६७ ईला ६८ वरा ६९ उर्वरा ७० आद्या ७१
जगती ७२ पृश्निः ७३ भुवनमाता ७४
निश्चला ७५ बीजप्रसूः ७६ श्यामा ७७
क्रोडकान्ता ७८ इतिराजनिर्घण्टः
खगवती ७९ अदितिः ८० इतिजटा



यः ॥ न्यायमते अस्या धर्म्मा रूप-
द्रवत्व प्रत्यक्षयोगित्वे इये गुर्वी रस
युक्ता च अस्या द्रवत्वं नैमित्तिकं अ-
स्या गुणाः स्पर्शः १ संख्या २ परिमि-
तिः ३ पृथक्त्वम् ४ संयोगः ५ विभा-
गः ६ परत्वे ७ अपरत्वम् ८ वेगः ९ गुरु-
त्वे १० गुरुत्वे ११ रूपे १२ रसः १३ ग-
न्धः १४ इये गन्धकारणं नानारूप-
वती षड्रसयुक्ता गन्धस्तु द्विविधः
सौरभं असौरभं तस्याः स्पर्शः ।
अनुष्णाशीतपाकजः सा द्विविधा
नित्या अनित्या च परमाणुरूपा ।
नित्या सावयवा अनित्या सा त्रिवि-
धा देहेन्द्रिय विषयरूपा देहरूपा ।
योनिजादिः इन्द्रियात्मिका घ्राण-
रूपा विषयात्मिका द्व्यणुकादिब्र-
ह्माण्ड पर्य्यन्ता यथा रूपद्रवत्वप्र-
त्यक्षयोगिस्यात् प्रथमत्रिकं गुरुणी
द्वे रसवती द्वयो नैमित्तिकोद्रवः ॥
स्पर्शादयोष्टौ वेगश्च द्रवत्वं च गुरुत्व-
के रूपं रसस्तथा स्नेहो वारिण्येते ।
चतुर्दश स्नेहहीना गन्धयुता क्षिता-
वेते चतुर्दश तत्रक्षिति गन्धहेतुर्ना-
नारूपवती मता ॥ षड्विधस्तु रसस्त-
त्र गन्धोपि द्विविधो मतः स्पर्शस्तु
तस्या विज्ञेयो ह्यनुष्णाशीतपाकजः
नित्यानित्या ॥ ॥

च साद्वेधा नित्यास्यादणुलक्षणा अ-
नित्या तु तदन्यास्यात् सैवावयवयोगि-
नी सा च त्रिविधा भवेद्देह इन्द्रियं विषय-
स्तथा योनिजादिर्भवेद्देह इन्द्रियं
विषयस्तथा योनिजादिर्भवेद्देहः ।
इन्द्रियं घ्राणलक्षणम् विषयो द्व्यणु-
कादिस्तु ब्रह्माण्डान्त उदाहृतः इति
भाषापरिच्छेदः ॥ तस्या अध्यात्म-
मादि यथा पृथिवी पंचमं भूतं ॥
घ्राणश्चाध्यात्ममुच्यते अधिभूतं ।
तथा गन्धो वायुस्तत्रापि दैवतम् ।
इति महाभारते आश्वमेधिकपर्व ।
तस्या उत्पत्ति कारणं यथा श्रूयते ।
वसुधाजन्म सर्वमंगलकारणम्
विघ्ननिघ्नकर पापनाशनं पुण्यव-
र्द्धनं अहो केचिद्वदंतीति मधुकैटभ-
मेदसा बभूव वसुधाजन्म तद्विरुद्ध-
मतं शृणु ऊचतुस्तौ पुरा विष्णुं तुष्टौ
युद्धेन तेजसा आवां वधतु यत्रोर्वी ॥
पयसा संवृतेतिच तयोर्जीवनका-
लेन प्रत्यक्षा सा भवत्स्फुटं ततोब-
भूव मेदश्च मरणस्यानन्तरयोः मेदि-
नीति च विख्याते स्वकाये तन्मतं शृ-
णु जलधौतात्कृता पूर्वं वर्द्धितामेध-
सा यतः कथयामि च तज्जन्म सार्थ-
कं सर्वसम्मतं पुराश्रुतं यत्श्रुत्युक्तं ।
धर्म्मवक्त्राच्च पुष्करे महाविराट् ॥

शरीरस्य जलस्थस्य चिरं स्फुटं म-
लो बभूव कालेन सर्वाग व्यापकः
को ह्रदे स च प्रविष्टः सर्वेषां त-
ल्लोम्नां विवरेषु च कालेन महता
तस्मा द्भव वसुधा उक्ता प्रत्येकं प्र-
ति लोम्नां च कूपेषु सास्थिरा स्थि-
ता आविर्भूता तिरोभूता सा जले च
पुनः पुनः आविर्भूता सृष्टिकाले
तज्जलोपर्य्यवस्थिता प्रलये च ।
तिरोभूता जलाभ्यन्तरवस्थिता प्र-
तिविश्वेषु वसुधा शैलकाननसं-
युता सप्तसागरसंयुक्ता सप्तद्वीपमि-
ता सती हिमाद्रिमेरुसंयुक्ता ग्रहचं-
द्रार्कसंयुता ब्रह्मविष्णुशिवाद्येश्च
सुरैर्लोकैस्तदालये पुण्यतीर्थस-
मायुक्ता पुण्यभारत संयुता पाता-
लसप्त तदधस्त ह्यूर्द्ध्वं ब्रह्मलोककः ॥
ब्रह्मलोकश्च तत्रैव सर्वविश्वं च त-
त्रैव एवं सर्वाणि विश्वानि पृथि-
व्यां निर्म्मितानि च ऊर्द्ध्वं गोलोक वै-
कुण्ठौ नित्या विश्वपरौ च तौ नश्व-
राणि च विश्वानि सर्वाणि कृत्रिमा-
णि च प्रलये प्राकृते ब्रह्मन् ब्रह्म-
णश्च निपातनं महाविराडादिसृष्टौ
सृष्टः कृष्णेन चात्मना नित्यैः स्थिता
च प्रलये काष्ठाकाशेश्वरैः सह क्षि-
त्यधिष्ठात् देवी सा वाराहे पूजिता

सुरैः मुनिभिर्मुनिभिर्विप्रै गन्धर्वा-
दिभिरेव च विष्णोर्वराहरूपस्य प-
त्नी साक्षात्सम्मता तत्पुत्रो मं-
गलो ज्ञेयो घण्टाशो मंगलात्मजः
नारद उवाच पूजिता केन रूपेण वा-
राहे च सुरैर्मही वराहीनच वाराही
सर्वैः सर्वाश्रयो सती तस्याः पूजा-
विधानं वा ध्यानश्चाहरणं क्रमम्
मंगलं मंगलस्यापि जन्मव्यासंवद
प्रभो श्रीनारायण उवाच वाराहे ।
च वराहश्च ब्रह्मणा संस्तुतः पुरा
उद्धार महीं हत्वा हिरण्याक्षं रसा-
तलात् जले तां स्थापयामास पद्म-
पत्रं यथा ह्रदे तत्रैव निर्म्ममे ब्रह्मा
सर्वविश्वं मनोहरं दृष्ट्वा तदधिदे-
वीं च सकामां कामको हरिः वरा-
हरूपी भगवान् कोटिसूर्य्यसमप्र-
भः कृत्वा रतिकरीं शय्यां मूर्त्तिं च
सुमनोहरां क्रीडां चकार रहसि
दिव्यं वर्षमहर्न्निशं सुखसंभोगसं-
स्पर्शान्मूर्च्छां संप्राप सुन्दरी वि-
दग्धायाविदग्धेन संगतो ऽति सु-
खप्रदः विष्णुस्तदंगसंस्पर्शात् बुबु-
धेन दिवानिशं वर्षांते चेतनां प्राप्य ।
कामी तत्याज कामुकीम् पूर्वरूपं
च वाराहं दधार चावलीलया ॥
पूजां चकार भक्त्या च ध्यात्वा च ध-

रणी सती धूपैर्दीपैश्च नैवेद्यैः सिं
दूरैरनुलेपनैः वस्त्रैः पुष्पैश्च बलिभिः
संपूज्या वा च तां हरिः श्रीमहावरा
ह उवाच सर्वाधारा भव शुभे सर्वैः सं
पूजिता सुखं मुनिभिर्मनुभिर्देवैः
सिद्धैश्च मानवादिभिः अम्बुवाची॥
त्यागदिने गृहारम्भप्रवेशने वापीत
डागारम्भे च गृहे च कृषिकर्मणि तव
पूजां करिष्यन्ति मद्वरेण सुरादयः
मूढा ये न करिष्यन्ति यास्यन्ति नरकं
च ते ॥ वसुधोवाच वहामि सर्वं वा
राहरूपेणाहं तवाज्ञया लीलामा
त्रेण भगवन् विश्वं च सचराचरम्
मुक्तां शुक्तिं हरेरर्चां शिवलिंगं शि
लां तथा शंखं प्रदीपं मंत्रं च माणि
क्यं हीरकं मणिं यज्ञसूत्रं च पुष्पं च
पुस्तकं तुलसीदलं जपमालां पु
ष्पमालां कर्पूरं च सुवर्णकम् ॥
गोरोचनां चन्दनं च शालग्रामज
लं विना एतान्वोढुमशक्ताहं क्लि
ष्टा च भगवन् शृणु ॥ श्रीभग
वानुवाच द्रव्याण्येतानि मू
ढा ये अर्पयिष्यन्ति सुन्दरि ते
यास्यन्ति कालसूत्रं दिव्यं व
र्षशतं त्वयि इत्येवमुक्त्वा भग
वान् विरराम च नारद ॥ बभू
व तेन गर्भेण तेजस्वी मंगल
ग्रहः पूजां चक्रुः पृथिव्याश्च ते सर्वे
चाज्ञया हरेः काण्वशाखोक्तध्या
नेन तुष्टुवुः स्तवनेन च ददुर्मूलेन
मंत्रेण नैवेद्यादिकमेव च संस्तुता
त्रिषु लोकेषु पूजिता सा बभूव ह ॥
नारद उवाच किं ध्यानं स्तवनं तस्या
मूलमंत्रं च किं वद गूढं सर्वपुराणेषु
श्रोतुं कौतूहलं मम श्रीनारायण उ
वाच आदौ च पृथिवी देवी वराहेण
च पूजिता ततः सर्वैर्मुनीन्द्रैश्च मनु
भिर्मानवादिभिः ध्यानं च स्तवनं म
न्त्रं शृणु वक्ष्यामि नारद ॥ ॐ श्रीं
ह्रीं क्लीं वसुन्धरायै स्वाहा ॥
अनेनैव च मन्त्रेण पूजिता विष्णुना
पुरा श्वेतचम्पकवर्णाभां शतचन्द्र
समप्रभाम् चन्दनोक्षितसर्वांगीं रत्न
भूषणभूषितां रत्नाधारां रत्नगर्भां
रत्नाकरसमन्वितां वह्निशुद्धांशु
काधानां सस्मितां वन्दितां भजे ध्या
नेनानेन सा देवी सर्वैश्च पूजिता
भवेत् स्तवनं शृणु विप्रेन्द्र ॥
काण्वशाखोक्तमेव च ॥ श्रीवि
ष्णुरुवाच जये जये जलाधारे ज
लशीले जलप्रदे यज्ञसूकरजाये
च जयं देहि जयावहे मंगले मंग
लाधारे मंगल्ये मंगलप्रिये ॥
मं ॥ ॐनमः

गलाढ्ये मंगलेशे मंगलं देहि
मे भवे सर्वाधारे सर्वबीजे सर्व
शक्तिसमन्विते सर्वकामप्रदे
देवि सर्वेष्टं देहि मे भवे पुण्यस्व
रूपे पुण्यानां बीजरूपे सनात
नि पुण्याश्रये पुण्यवतामाल
ये पुण्यदे भवे रत्नाधारे रत्नगर्भे
रत्नाकरसमन्विते स्त्रीरत्नरू
पे रत्नाढ्ये रत्नसारप्रदे भवे
सर्वशस्यालये सर्वशस्याढ्ये
सर्वशस्यदे सर्वशस्यहरे काले
सर्वशस्यात्मिके भवे भूमे भूमि
पसर्वस्वे भूमिपालपरायणे
भूपाहंकाररूपे भूमिं देहि
च भूमिपे इदं पुण्यतमं स्तोत्रं
तां संपूज्य च यः पठेत् कोटि
कोटिजन्मजन्म स भवेद्भूमिपे
श्वरः भूमिदानकृतं पुण्यं लभ
ते पठनाज्जनः भूमिदानहरा
त् पापान्मुच्यते नात्र संशयः
अम्बुवाची भूखनने पापात् स
मुच्यते ध्रुवं अन्यकूपे कूपखना
त् पापात्स मुच्यते ध्रुवं परभूश्रा
द्धजात्पापान्मुच्यते नात्र संशयः
भूमौ वीर्यपरित्यागात् भूमौ दीपा
दिस्थापनात् पापेन मुच्यते प्राज्ञः
स्तोत्रस्य पठनान्मुने अश्वमेध
शतपुण्यं लभते नात्र संशयः
नारद उवाच ॥ भूमि ॥
दानकृतं पुण्यं पापं तद्धरणे च
यत् परभूमौ श्राद्धपापं कूपे कू
पखनने तथा अम्बुवाची भूखनने
वीर्यत्यागजमेव च दीपादिस्था
पनात्पापं श्रोतुमिच्छामि य
त्नतः अन्यद्वा पृथिवीजन्यं पा
पं मतं प्रश्नतः परम् यदस्ति त
त्प्रतीकारं वद वेदविदाम्वर
श्रीनारायण उवाच वितस्तिमा
त्रां भूमिं च यो ददाति च भारते स
न्ध्यापूताय विप्राय स याति विष्णु
मन्दिरम् भूमिं च सर्वशस्याढ्यां
ब्राह्मणाय ददाति यः भूमिरेणु
प्रमाणं च वर्षं विष्णुपदे स्थितिः
ग्रामं भूमिं च धान्यं च यो ददासा
ददाति च सर्वपापविनिर्मुक्तो
चैतो वैकुण्ठवासिनो भूमिदाने
च यत्काले यः साधुश्चानुमो
दते स च याति च वैकुण्ठे मित्र
गोत्रसमन्वितः स्वदत्तां परदत्तां
वा ब्रह्मवृत्तिं हरेत्तु यः स तिष्ठति
कालसूत्रे यावच्चन्द्रदिवाकरौ
तत्पुत्रपौत्रप्रभृति भूमिहीनः श्रि
या हतः पुत्रहीनो दरिद्रश्च अंते या
ति च रौरवं गवां मार्गं विनिष्कृष्य
यश्च शस्यं ददाति च दिव्यं वर्षशतं
चैव कुम्भीपाकेषु तिष्ठति गोष्ठं
तडागं निष्कृष्य मार्गं शस्यं ददाति

च सचतिष्ठत्यसिपत्रे यावदि
न्द्राश्चतुर्दश न पेचपिण्डभूम
परकूपेचस्नातियः प्राप्नोतिन
रकंनैव स्नानजंफलमेवच का
मीभूमौचरहसि वीर्य्यत्यागंक
रोतियः स्निग्धरेणुप्रमाणंचव
र्षतिष्ठतिरौरवे अम्बुवाच्यांभूख
ननं यःकरोतिचमानवः सया
तिकृमिदंशंच स्थितिस्तत्रचवत्
सरम् परकीयतडागेतु कूपे
मूढःप्रयच्छति उद्धरिण्याच
तस्मायो उद्धरिणीं योददातिव
सर्वं फलंपरस्यैव तप्तसूर्म्मिंश्च।
जेत्सः तत्रतिष्ठतिसततो याव
दिन्द्राश्चतुर्दश परकीयतडागे।
च पंकमुत्सृज्यनोत्सृजेत् रेणुः।
प्रमाणवर्षंच ब्रह्मलोकेवसेन्नरः
पिण्डंपित्रे भूमिभर्त्रे नप्रदायच।
मानवः श्राद्धंकरोतियोमूढोन
रकंयाति निश्चितं ॥ भूमौदीपं
योर्पयति सचान्धःसप्तजन्मनि ॥
भूमौशंखंचसंस्थाप्य कुष्ठंजन्मा।
न्तरेलभेत् मुक्तामाणिक्यहीरंच।
सुवर्णंच मणिंतथा पञ्चसंस्था।
पयेद्भूमौ सतिष्ठेन्नरकेयुगं तप
मालांपुष्पमालां कर्पूरंरोचनांत
था योमूढश्चार्पयेद्भूमौ सयाति
नरकंध्रुवं शुभेचन्दने काष्ठञ्च

तडागे कुशामूलके संस्थाप्य भू
मौ नरके वसेन्मन्वन्तरावधि ३।
स्तकंयज्ञसूत्रंचैव भूमौसंस्थाप
येत्तुयः नभवेद्विप्रयोनौच त।
स्यजन्मान्तरेजनिः ब्रह्महत्यासम।
पापं सउच्चैर्लभेद्ध्रुवं प्रस्थिसु
कं यज्ञसूत्रं शङ्खंच सर्ववर्णकैः
यज्ञंकृत्वाचयोभूमिं क्षीरेणनहि
सिंचति सयातितप्तसूर्म्मिंच सन्त
मःसप्तजन्मसु भूकम्पेग्रहणेयो
हि करोतिखननंभुवः जन्मान्तरे।
महापापी सोंगहीनोभवेद्ध्रुवं ॥
भवनं यत्रसर्वेषां भूर्भूमिस्तेनकी
र्त्तिता वसुरत्नं यादधाति वसु।
धासारस्तुन्धरी हरेरूरौचयाजा।
ता साचोर्वीपरिकीर्त्तिता धारय
त्रीधरणी सर्वेषांधारणात्तया
इज्याचयागाधाराद्व क्षोणीती॥
णालयेचया महालयेतयेयाति
तिस्तेनप्रकीर्त्तिता: काश्यपी
कश्यपस्येयमचलास्थिररूपतः
विश्वम्भराभरणाद्वा नन्तानन्तरू
पतः पृथिवीपृथुकन्यात्वा द्विस्त
तत्वात्महत्वने इतिब्रह्मवैवर्त्ते।
प्रकृतिखण्डे पृथिव्युपाख्याने
ऽध्यायः ॥ तस्या भारयथा
स्थिति रुवाच कृष्णभक्तिविहीना।
नाये पेच तद्भक्तनिन्दकाः ॥

तेषां महापातकिनामशक्ता।
ताऽरवाहने स्वधर्माचारहीनाः।
ये नित्य कृत्य विवर्ज्जिताः श्रद्ध
हीनाश्च वेदेषु तेषांभारेणपीडि
ता पितृमातृ गुरुस्त्रीणां पोष।
णभृत्यपोष्ययोः येनकुर्वन्ति ते।
षांचनशक्ता भारवाहने येमि
थ्यावादिनस्तात दयासत्यविही
नकाः निन्दकागुरुदाराणां।
तेषांभारेणपीडिता मित्रद्रोही।
कृतघ्नश्च मिथ्यासाक्षिप्रदायकः
विश्वासघ्नःस्थाप्यहारी तेषांभा
रेणपीडिता कल्याणसूक्तनाः
मानि हरेर्नामैकमंगलं कुर्वन्ति
विक्र——वै तेषांभारेणपीडि।
ता जीवघातीगुरुद्रोही ग्रामया
जीबलुब्धकः शवदाहीशूद्रभो।
जी तेषांभारेणपीडिता पूजायज्ञो
पवासानि व्रतानिनियमानिच
येयेमूढाविहंतार स्तेषांभारेण
पीडिता सदाद्विष्यन्तियेपापा गो
विप्रसुरवैष्णवान् हरिंहरिकथां
भक्तिं तेषांभारेणपीडिता शंखा
हीनांचभारेण पीडिताहं यथावि
धे ततोधिकेनदेवानां तेषांभारे
णपीडिता इत्येवमुक्त्वावसुधा।
रुरोदच पुनःपुनः ब्रह्मात।

ह्मोदनम् दृष्ट्वाता मुवाचकृपानि
धिः तारेतवापनेष्यामि दस्युनाम
प्युपायतः उपायतोपिकार्य्याणि
सिध्यन्त्येव वसुन्धरे ॥ मंत्रंमंगल
कुम्भंच शिवलिंगंचकुंकुमं मधु
काष्टं चन्दनंच कस्तूरीतीर्थमृत्ति
का खड्गंगण्डकाखड्गंच स्फटिकं
पद्मरागकं इन्द्रनीलंसूर्य्यमणिं
तडागेकुशमूलकं शालग्राम।
शिलाशंख तुलसीप्रतिमाजलं।
शंखप्रदीपमालांच शिलार्च्चातुल
सीतथा निर्माल्यंचैवनैवेद्यं हरि
ण मणिंतथा अस्थिसूत्रंयज्ञसूत्रं
दर्पणंश्वेतचामरं गोरोचनांचमुक्ता
च मुक्तिमाणिक्यमेवच पुराणसं
हितांचक्लिंकर्पूरंपरशंतथा वज्रंसं
कांचनंचैव प्रवालंरत्नमेवच कुशा
द्विरंतीर्थतोयं गव्यगोमूत्रगोमये
त्वयिमेस्थापयिष्यन्ति मूढाश्चेता
निसुन्दरि पच्यन्तेकालसूत्रेच वर्षा
णामयुतंध्रुवं इतिब्रह्मवैवर्त्ते श्री
कृष्णजन्मखण्डे ८ अध्यायः ॥ त
स्याःरूपान्तरंयथा इतितस्यवचःश्रु
त्वा जनकस्यमहात्मनः मुनीनाम
त्रिधोरूपं दर्शयामासभूस्ततो नी
लोत्पलदलश्यामा मत्तमात
ङ्गधारिणीम् ॥

वाक्यप्रेमेन मुख्येण मृणालायः
तथेणाभिना सुन्दरी लोकधात्रीति
दृष्टाशस्त्रं रूपालयेत् इतिका-
लिकापुराणे २९ अध्यायः ॥
पृथिव्याः ग्रामशस्याद्युत्पत्तिका-
रणं यथा प्रजाऊचुः अराजकेन
नृपश्रेष्ठ धरित्र्यासकलौषधीः ग्र-
स्तास्ततः क्षयं याता प्रजाः सर्वाः
प्रजेश्वर त्वंनोवृत्तिप्रदोधात्रा
प्रजापालो निरूपितः देहिनः
क्षुत्परीतानां प्रजानां जीवनौ-
षधीः श्रीपराशर उवाच ततोऽ-
थ नृपतिर्दिव्यमादायाजगवं
धनुः शरांश्च दिव्यान् कुपितः ।
सोऽभ्यधावद्वसुधां ततो भ्रनाश
त्वरिता गौर्भूत्वाऽनु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादीं स्तत्रा-
साद्दगमन्मही यत्र यत्र ययौ दे-
वी सा तदाभूतधारिणी तत्र तत्र
तु सा वैण्यं ददर्शाभ्युद्यतायुधं
ततस्तं प्राह वसुधा पृथुं पृथुप-
राक्रमं प्रवेपमाना तद्बाणप-
रित्राणपरायणा पृथिव्युवाच
स्त्रीवधे त्वं महापापं किं नरेन्द्र न पश्य-
सि येन मां हन्तुमत्यर्थं प्रकरोषि न-
पोद्यमं श्रीपृथुरुवाच एकस्मिन्य-
त्र निधनं प्रापिते दुष्टकारिणि बहू-
नां भवति क्षेमं तस्य पुण्यप्रदं ॥

दोवधः पृथिव्युवाच प्रजाना-
मुपकाराय यदि मां त्वं हनिष्यसि
आधारः कः प्रजानां ते नृपश्रेष्ठ
भविष्यति पृथुरुवाच त्वां हत्वा
वसुधे बाणैर्मच्छासनपराङ्मुखीं
आत्मयोगबलेनेमा धारयिष्या-
म्यहं प्रजाः श्रीपराशर उवाच ।
ततः प्रणम्य वसुधा तं भूयः प्रा-
ह पार्थिवं प्रवेपिताङ्गी परमं ।
साध्वसं समुपागता उपायतः
समारब्धाः सर्वे सिध्यन्त्युपक्र-
माः तस्माद्वदाम्युपायं ते तं कुरु
यदीच्छसि समस्ता या मया
जीर्णा नरनाथ महौषधीः यदी-
च्छसि प्रदास्यामि ताः क्षीरपरि-
णामिनीः तस्मात् प्रजाहितार्था-
य मम धर्मभृतांवर तत्तु वत्सं
प्रयच्छस्व त्वं येन वत्सला स-
माघक्षरसर्वत्र येन तीं समंततः
वैण्यौषधीवीजभूतं वीजं सर्वं भाव-
ये श्रीपराशर उवाच ततस्तस्मा-
दुत्सारयामास शैलान् शतसहस्रशः
धनुष्कोट्या तदा वैण्य स्तेन शैला
विवर्द्धिताः ॥ न हि पूर्वविसर्गे वै
विषमे पृथिवीतले प्रविभागः पु-
राणां वा ग्रामाणां वा पुराऽभवत्
न शस्यानि न गोरक्ष्यं न कृषिर्न
वणिक्पथः वैण्यात्प्रभृति

मैत्रेय सर्वस्यैतस्य सम्भवः यत्र
यत्र समं त्वस्याः भूमेरासीद्द्विजो-
त्तम तत्र तत्र प्रजाः सोऽपि निवासं स-
मरोचयत् आहारः फलमूलानि
प्रजानामभवत्तदा कृच्छ्रेण महता
तासोऽपि प्रणष्टास्वौषधीषु वै स
कल्पयित्वा वत्सं तु मनुं स्वायं-
भुवं प्रभुं स्वपाणौ पृथिवीनाथो दु-
दोह पृथिवीं पृथुः शस्यजातानि
निर्सर्गाणि प्रजानां हितकाम्यया
तेनान्नेन प्रजास्तात वर्तन्तेऽ-
द्यापि नित्यशः प्राणप्रदानात् स पृ-
थुर्यस्माद्भूमेरभूत्पिता ततस्तु
पृथिवीसंज्ञा मवापाखिलधारि-
णी ततश्च देवैर्मुनिभि र्दैत्यै रक्षोभि-
रद्रिभिः गन्धर्वैरुरगैर्यक्षैः पितृ-
भिस्तरुभिस्तथा तत्तत्पात्रमुपा-
दाय तत्तद्दुग्धा पुनः पयः वत्सदोग्-
धृविशेषाश्च तेषां तद्योनयोऽभव-
न् सैषा धात्री विधात्री च धारणी
पोषणी तथा सर्वस्य जगतः पृथ्वी
विष्णुपादतलोद्भवा एवं प्रभावः स
पृथुः पुत्रो वीणस्य वीर्यवान् ज-
ज्ञे महीपतिः पूर्वो राजा प्रजार-
ञ्जनात् इति श्रीविष्णुपुराणे १
अंशे पृथुचरिते १३ अध्यायः
तस्या नाम गोरूप ॥ ॥

दोहनानो कारणानि यथा अस्य
ऊचुः बहुभिर्धरणी भुक्ता भूपालैः
श्रूयते पुरा पार्थिवाः पृथिवीयोगात्
पृथिवी कस्य योगतः किमर्थं च कृता
संज्ञा भूमेः किं पारिभाषिकी गौरि-
तीयं च विख्याता सूतकस्माद्ब्रवीहि
नः सूत उवाच वंशे स्वायंभुवे ह्यासी-
द्राङ्गो नाम प्रजापतिः मृत्योस्तु दु-
हिता तेन परिणीता सुदुर्मुखी सु-
नीथा नाम तस्यास्तु वेणो नाम सुतः
पुरा अधर्मनिरतः बलवान्वसुधा-
धिपः लोकेऽप्यधर्मकृज्जातः परभा-
र्यापहारकः धर्माचारप्रसिद्ध्यर्थं
जगतोऽस्य महर्षिभिः अनुनीतोऽपि
न ददाव अनुज्ञां स यदा ततः शापेन
मारयित्वैन मराजकभयार्दिताः
ममन्थुर्ब्राह्मणास्तस्य बलाद्देहमक-
ल्मषाः तत्कायान्मथ्यमानात्तु नि-
ष्पेतुर्म्लेच्छजातयः शरीरे मातुरंशे-
न कृष्णाञ्जनसमप्रभाः पितुरंशस-
मंशेन धार्मिको धर्मचारिणः
उत्पन्नो दक्षिणाद्धस्तात् सधनुः स
शरो गदी दिव्यतेजोमयवपुः सर-
त्नकवचाङ्गदः पृथुरेवाभवद्य-
स्मा ततः पृथुरजायत स विप्रैर॥
भिषिक्तश्च तपः कृत्वा सुदुश्चरम्
विष्णोर्वरेण सर्वस्य प्रभुत्वमगा।

मत्प्रभुः निःस्वाध्यायवषट्-
कारं निर्धनं वीरुधमभूत्तलम् इत्य-
मेवोद्यतः कोपाद्बेणामितवि-
क्रमः ततो गोरूपमास्थाय भूः प-
लायितमथ तस्मात् पृथुतोऽनुगतस्त-
स्याः पृथ्वीमयग्रासनः ततः स्थित्वै-
कदेशेऽत किं करोमीति साब्रवीत्
पृथुरप्यवदत्तां काममीप्सितं देहि।
सुव्रते सर्वस्य जगतः शीघ्रं स्थाव-
रस्य चरस्य च ॥ तथैव चाब्रवीद्भू-
मिर्दोहं वचनराधिपः स्वं स्वं पात्रं
पृथुर्वत्सं कृत्वा स्वायम्भुवं मनुं त-
द्वत्समभवत्तस्मै अन्नाजीवन्ति ते।
नैवं ततस्तद्ऋषिभिर्दुग्धा वत्सः
सोमस्तदाऽभवत् दोग्धा बृह-
स्पतिर्भूत् पात्रं वेदस्तपो रसः वे।
दैश्च वसुधा दुग्धा दोग्धा मित्र॥
स्तदाभवत् इन्द्रो वत्सः समभव-
त् क्षीरमूर्जस्करं बलम् देवानां का-
ञ्चनं पात्रं पितृणां राजतं तदा यो।
तकस्मा भवद्दोग्धा यमो वत्सः
स्वधा रसः अलाबु पात्रं नागानां
भक्तको वत्सकोऽभवत् विषं क्षी-
रं ततो दोग्धा धृतराष्ट्रो भवत् ॥
पुनः असुरैः वपितृगा पेय माय-
मेषां कपीडनी पात्रं माया मधु
ततः मर्कदिश्च निरोचनः ॥

दोग्धा द्विमूर्द्धा तत्रासीन्माया।
येन प्रवर्त्तिताः यक्षैश्च वसुधा दु।
ग्धा पुरान्तर्द्धानमीप्सुभिः कृत्वा
वैश्रवणं वत्सं सामपात्रं महीप-
ते प्रेतरक्षोगणैर्दुग्धा धरा रुधि-
रमुल्वणं रोप्यनाभोऽभवद्दोग्धा
सुमाली वत्स एव तु गन्धर्वैश्च
पुनर्दुग्धा वसुधाप्सरोगणैः
वत्सं चैत्ररथं कृत्वा गन्धान् पद्मद।
लेतथा दोग्धा वसुरुचिर्नाम ना-
ट्यवेदस्य पारगः गिरिभिर्वसुधा।
दुग्धा रत्नानि विविधानि च औष।
धानि च दिव्यानि दोग्धा मेरुर्महाच-
लः वत्सोऽभूद्धिमवांस्तत्र पात्री
शैलमयी पुनः वृक्षैश्च वसुधा दु।
ग्धा क्षीरं छिन्नप्ररोहणं पालाश-
पात्रे दोग्धा तु सालः पुष्पदलाकु-
लः प्लक्षोऽभवत्ततो वत्सः स-
र्वद्रुमगणाधिपः एवमन्यैश्च
वसुधा तथा दुग्धा यथेप्सितम्
इति मत्स्यपुराणे १० अध्यायः
अस्याद्धिवरणं भूगोलशब्दे द्रष्ट-
व्यम् पृथिवी गीता स्त्री पृथि।
वीकथा यथा मैत्रेय पृथिवी।
गीताः श्लोकाश्चात्र निबोधता-
न् यानाह धर्मध्वजिने जनकाया-
सितो मुनिः ॥ श्रीपृथि

व्युवाच कथमेष नरेन्द्राणां मो-
हो बुद्धिमतामपि येन फेनसधर्मा-
णोऽप्यति विश्वस्तचेतसः पूर्वमा-
त्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः
ततो भृत्यांश्च पौरांश्च जिगीषन्ते
यथा रिपून् क्रमेणानेन जेष्यामो व-
यं पृथ्वीं ससागराम् इत्यासक्तधियो
मृत्युं न पश्यन्त्यविदूरगं समुद्राव-
रणं याति मन्मण्डलमथो व-
शे कियदात्मजयादेतन्मुक्तिराः
त्मजये फले उत्सृज्य पूर्वे याया
ता यान्नादाय गतः पिता नोमाम
तिविमूढत्वा जेतुमिच्छन्ति पार्थि-
वाः मत्कृते पितृपुत्राणां भ्रात
णां चापि विग्रहाः जायतेऽत्यन्त
मोहेन ममताहतचेतसाम् पृथ्वीम-
मेयं सकला ममेयं ममेति चैवाम
मतान्वयेयं योयोऽत्र तत्र बभू-
व राजा कुबुद्धिरासीदिति तस्य त
तस्य हष्ट्वा ममतादृतचित्तमेके विहा
य मां मत्स्य पथ्यं व्रजेतु तस्यान्वयस्थ-
स्य कथं ममत्वं हृद्यास्पदं मत्प्रभवं क-
रोति पृथ्वी ममैषाशु परित्यजेनां वद-
न्ति ये दूतमुखैः स्वशत्रून् नराधिपास्ते-
षु ममातिहासः पुनश्च मूढेषु दया॥
भ्युपैति श्री पराशर उवाच ॥ इ
त्येते धरणी ॥ ॥

गीताः श्लोका मैत्रेय यैः श्रुता
ममत्वं विलयं याति तापन्य-
स्ते यथा हिमे इति विष्णुपुराणे
४ अंशे २४ अध्यायः ॥
पृथिवीपतिः पुं राजा ऋषभ-
नामौषधिः इति मेदिनी ॥
यमः इति हेमचन्द्रः ॥
पृथिवीपालः पुं राजा यथा
बुभुजे पृथिवीपालः पृथिवी-
मेवकेवलां इति रघुः ॥
पृथिवीशक्रः पुं राजा इति।
हेमचन्द्रः ॥ पृथुः पुं त्रेता
युगे सूर्यवंशीयपञ्चमनृपः
वेणनृपस्य दक्षिणकरमथ-
नाज्जातः प्रजारञ्जनात् आदेरा
जोपाधिं प्राप्तः यथा अथ ते।
ऋषयः सर्वे प्रसन्नमनसस्ततः
गतकल्मषमेवं तं ज्ञात्वा वेणं।
नृपोत्तमं ममन्थुर्दक्षिणं पा-
णिं तस्यैव च महात्मनः मथितेत
स्य पाणौ तु संजातस्तेन मेव हि।
पुनर्ममन्थुस्ते विप्रा दक्षिणं पाणि-
मेव च स्वकारान् पुरुषा जन्ते हा
दशादित्यसन्निभः तप्तकाञ्चनव-
र्णाङ्गो दिव्यमाल्याम्बरावृतः दि-
व्याभरणशोभाङ्गो दिव्यगन्धानु-
लेपनः मुकुटेन सुवर्णेन कुण्ड-

लाभ्यां विराजते महाका-
योमहाबाहु रूपेणाप्रतिमो
भुवि खड्गबाणधरोधन्वी
कवचीचमहाप्रभः सर्वल
क्षणसम्पन्नः सर्वालङ्कार-
भूषितः तेजसाप्रभावेन सा
क्षादग्निरिवज्वलन् आयमा
जगावेनाम यत्रगङ्गामहावरे
देरोदिवियथाभाति भूमिवे
णात्मजस्तथा तस्मिन्जाते
महाभागे वेदाश्चक्रुरथोऽ
मलाः उत्सवंचक्रिरेसर्वे वा
णाश्चतनयंप्रति दीप्यमानः स्व-
वपुषा वीर्यैरेवमहामतिः शास्त्रे
ष्वदिव्यान्वसाथ कवचेचम-
हाप्रभे ददाविन्द्रःसहस्राक्षो
मालांचम्लानपुष्पिकां जातेत
स्मिन्महाभागे पृथौवीरे-
महात्मनि संप्रहृष्टानिभूता-
निभूतानि समस्तानिदिशोनभाः
सर्वतीर्थानितोयानि पुण्यानि
विविधानिच स्थावराणिचरा
णिच अभ्यषिचन्नराधिपं महा
वीरंप्रजापालं पृथुमेवंद्विजोत्त
मपुंवैण्यंवरराज्ये अभिषिक्तंव
राचरैः देवैर्विप्रैस्तथासर्वैः अभि
षिक्तोमहामनाः राज्ञोचैवाभि
कारैव पृथुर्वैण्यःप्रतापवान् त
त्रापिजाःप्रजाः सर्वाःकदानेवा

नुरंजिताः ॥ तेनानुरंजिताः स-
र्वाःसोवैपृथुरितेतदा अनुरागात्
तवीरस्य नामराजेत्यभाषत म-
यान्तस्यसुवीरस्य समुद्रस्यद्विजो
त्तमाः आपस्तस्तम्भिरेसर्वा भया
त्तस्यमहात्मनः प्रयातस्यरथस्यापि
तस्यैवचमहात्मनः दुर्गमार्गेवि
लोकेचव सुमार्गेपर्वतादयः ध्वज-
भंगंनचक्रुस्ते गिरयःसर्वएवते
अकृष्टपच्यापृथिवी सर्वत्रकाम
धेनवः पर्जन्यःकामवर्षीच वेद
यज्ञान्महोत्सवान् कुर्वन्तिब्राह्म
णाःसर्वे क्षत्रियाश्चतथापरे सर्वा-
कामफलावृक्षा स्तस्मिन्शासतिरा
जनि नदुर्भिक्षंनचव्याधिर्नाका-
लमरणंनृणां सर्वेसुखेनजीव-
न्ति लोकाःधर्मपरायणाः त-
स्मिन्प्रशासतिपृथौ राजराजेम-
हात्मनि इतिपाद्मेभूमिखण्डे २८
अध्यायः ॥ तस्यमाहात्म्य य-
था पृथुना प्रविभक्ताच शोभिता
चवसुंधरा शस्यरत्नवतीस्फीता
पुरपत्तनमालिनी ॥ एवंप्रभावो-
वैण्यश्च राजासीद्राजसत्तमः नम
स्यश्चैवहन्त्यश्च पूज्यश्च भूतिकामै
र्जनैः ब्राह्मणैर्वेदकामैश्च पृ-
थुर्वैण्यःप्रतापवान् आदिकर्तार
राजानांच योधानांप्रथमोनृपः ॥
योहिवोढ रणेयाति ॥

कीर्तयित्वापृथुंनृपं चोरनूपा
नस्पर्शयामास तेमीतराजनिकी-
र्तिमान वैश्यैपरपिहिश्चूद्रैश्च सर्वाः
स्वाहृतोबहुश्रितैः पृथुरेवनम-
स्कार्य्यः सर्वसिद्धिकरस्तुसः
एवंपृथुरभूत्पूर्वं प्रसादाच्चक्र
पाणिनः सार्वभौमोमहातेजा-
दुर्विवक्तःसवासुरैः ॥ तस्यपुत्रो
यथा पृथोः पुत्रो व धर्मज्ञो-
जज्ञातेऽन्तर्द्धिपालिनौ शिखण्डी
चहविर्द्धान मन्तर्द्धानाद्व्यजायत
अरेणाभूत्ताः पुत्रः यथा अ
धोपस्तस्यपुत्रोभूत् ककुत्स्थो
नामवीर्य्यवान् ककुत्स्थस्यप्र
रेणाभूत् तस्यपुत्रः पृथुःस्मृतः
इत्यग्निपुराणम् ॥ अग्निः
इतिमेदिनी ॥ पृथुः स्त्री-
कृष्णजीरकः इत्यमरः ॥
त्वक्पत्री हिंगुपत्री इतिमेदि-
नी अहिफेनः इतिशब्दरत्नाव-
ली ॥ पृथुः त्रि महत् ॥
इत्यमरः निपुणः इति शब्द
रत्नावली ॥ पृथुकः पुं चि-
पिटकः इत्यमरः क्लीवलिंगो
प्ययं यथा हिः स्विन्नमत्रे पृथुके
भृष्टे देशविशेषके नान्यत्रशाल्मि
विप्राणां भक्षणे च ॥

निवेदने अभक्ष्यंचयतीनांच वि
धवाब्रह्मचारिणां इतिब्रह्मवैव
र्त्तेब्रह्मखण्डे २२ अध्यायः ॥
पृथुकः त्रि बालकः इतिमेदिनी
पृथुका स्त्री हिंगुपत्री इतिशब्द॥
चन्द्रिका बालिकाच ॥ पृथुको-
लः पुम् राजबदरः इतिराजनि-
र्घण्टः ॥ पृथुत् पत्रे त्रि पृथुपत्रः
पुं रक्तलशुनः इतिराजनिर्घण्टः
पृथुपलाशिका स्त्री शटी इ-
तिराजनिर्घण्टः ॥
पृथुरोमा पुम् मत्स्यः इत्यम
रः बृहत्लोमयुक्ते त्रि ॥
पृथुलं त्रि महत् इत्यमरः ॥
पृथुला स्त्री हिंगुपत्री इतिजटा-
धरः ॥ पृथुशाखरः पुं पर्वतः
इतित्रिकाण्डशेषः ॥
पृथुशिम्बः पुम् श्योनाकप्रभेदः
इतिराजनिर्घण्टः ॥
पृथुस्कन्धः पुम् शूकरः इ-
तिराजनिर्घण्टः ॥
पृथूदरः पुम् मेषः इतिहारा
वली ॥ बृहत् उदरे त्रि ॥
पृथ्वी स्त्री पृथिवी पृथोर्दुहितृत्व
स्वीकारादेतन्नाम यथा दुहितृ-
त्वमनुप्राप्ता देवी पृथ्वी तथोच्य-

ते इत्यग्निपुराणे ॥ हिङ्गुपत्री
कृष्णजीरकः इत्यमरः हृमाह्र
न्माता इति हेमचन्द्रः ॥ पुनर्न
वा स्थूलैला इति राजनिर्घण्टः
पृथ्वीका स्त्री बृहदेला इत्यमरः
स्थूलैला कृष्णजीरकः इति र
त्नमाला हिङ्गुपत्री इति राजनि
र्घण्टः ॥ पृथ्वीकुरवकः पुं
श्वेतमन्दारकः । इति राजनि
र्घण्टः ॥ पृथ्वीजम् ॥
क्ली गडलवणम् इति रा
जनिर्घण्टः ॥ पृदाकुः
पुं सर्पः इत्यमरः वृश्चिकः।
व्याघ्रः चित्रकः इति मेदि।
नी कुञ्जरः वृक्षः इति सं।
क्षिप्तसारोणादिवृत्तिः ॥
पृश्निः त्रि अल्पतनुः इत्यमरः
स तु खर्वदुर्बलाल्पाङ्गः ॥
इति भरतः पृश्निः स्त्री रश्मिः
इति शब्दरत्नावली ॥
सुतपोराजपत्नी सैव जन्मान्त
रे देवकी भूता इति श्रीभागव
ते १० स्कन्धः ॥ पृश्निका स्त्री
कुम्भिका इति शब्दमाला ॥ पृ
श्निगर्भः पुं श्रीकृष्णः इति हारा
वली ॥ पृश्निपर्णी स्त्री लता।
विशेषः चाकुलिया इति भाषा

चकैरात इति हिन्दीभाषा त
त्पर्य्यायः पृथक्पर्णी २ चि
त्रपर्णी ३ अङ्घ्रिवल्लिका ४ क्रो
ष्टुविन्ना ५ सिंहपुच्छी ६ कल
शिः ७ धावनिः ८ गुहा ९ इत्य
मरः केचित्तु पृश्निपर्ण्यादि च
तुष्कं चाकुलिया इति ख्या
तायां क्रोष्टुविन्नादि पंचकं
विशालछाग्नि इति ख्याता
यामित्याहुः यततु वैद्यानप्र
इष्यते तेहि कलश्यादि शब्दे
न पृश्निपर्णी मेव वदन्ति पृश्नि
पर्णी सिंहपुच्छी चित्रपर्णी क
ष्टुसिंहपुच्छी अनयोरल्पभे
दात्तैवैकार्था इति केचित्
इति भरतः अपिच पृश्निपर्णी
लाङ्गली ११ क्रोष्टुपुच्छिका १२
पृणिपर्णी १३ कलशी १४ क्रो
ष्टुकमेखला १५ दीर्घा १६ शृगा
लहला १७ त्रिपर्णी १८ सिंहपु
च्छिका १९ दीर्घपत्रा २० अतिगुहा
वृष्टिला २२ चित्रपर्णिका २३ इ
ति राजे रत्नमाला महागुहा २४
शृगालविन्ना २५ धमनी २६ मेख
ला २७ लाङ्गलिका २८ पृष्टिपर्णी
दीर्घपर्णी ३० इति राजनिर्घण्टः
अङ्घ्रिपर्णी ३१ धावनी ३२ इति भा

वप्रकाशः अस्या गुणाः कटुत्वं
अतीसारकासवातरोगज्वरोन्मा
दव्रणदाह नाशित्वंच इति राज
निर्घण्टः ॥ त्रिदोषघ्नत्वं वृष्य
त्वं मधुरत्वं सरत्वं श्वासरक्ताती
सार तृड्वमि नाशित्वंच इति
भावप्रकाशः ग्राहित्वं इति
राजवल्लभः ॥ पृश्निभद्रः
पुं श्रीकृष्णः इति शब्दमाला
पृश्निशृङ्गः पुं विष्णुः इति श
ब्दमाला गणेशः इति त्रिका
ण्डशेषः ॥ पृश्नी स्त्री वा
रिपर्णी इति शब्दरत्नावली।
कुम्भिका इति भूरिप्रयोगः ॥
पृष ङ. सेके इति कविकल्पद्रु
मः ॥ पृषत् क्ली विन्दुः इत्य
मरः इदं द्विवचन बहुवचना
न्तमपि भवति पृषतः पुं विन्दुः इ
त्यमरः श्वेतविन्दुयुक्तमृगः इति
मेदिनी तत्पर्य्यायः रंकुः २।
शबलपृष्ठकः ३ इति राजनि
र्घण्टः पृषताम्पतिः पुं वायुः
इति जटाधरः ॥ पृषताश्वः
पुं वायुः इति अमरटीकायां भर
तः पृषती स्त्री श्वेतविन्दुयुक्ता
मृगी इति मेदिनी ॥

पृषत्कः पुं बाणः इत्यमरः ॥
पृषदश्वः पुं वायुः इत्यमरः पृ
षदाज्यं क्ली सदध्याज्यं दधिमिश्रि
तघृतं इत्यमरः ॥ पृषद्वलः
पुं वाय्वश्वः यथा अविश्रमकृदा
न्दोलः कंचैवश्यामवानिलः
पृषद्वलस्तु वाय्वश्वः कुवेरेतम
मोदितः इति शब्दमाला ॥
पृषन्तिः पुं विन्दुः यथा पयः पृ
षन्तिभिः स्पृष्टा वान्ति वाताः श
नैःशनैः इति भरतधृतजाम्ब
वतीविजयकाव्यम् ॥
पृषभाषा स्त्री अमरावती इ॥
तिशब्दरत्नावली ॥
पृषाकरा स्त्री क्षुद्रशिला बाट
खारा इति भाषा इति शब्दचन्द्रि
का पृषातकं क्ली दधियुक्तघृ
ते इति हेमचन्द्रः ॥
पृषोदरः त्रि पृषदुदरं यस्य मनी
षादित्वात् तलोपः इति दुर्गादासः
तदेवं गणमाह सः सिंहो वर्णवि
पर्य्ययात् वर्णादेशाद्वर्णरूपान्मा।
वर्णलोपात् पृषोदरः इति गोपी
चन्द्रधृतकारिका पृषोद्यानं क्ली
क्षुद्रोपवने मनीषादित्वात् पृष
तस्तकार लोपः इति मुग्धबोध
टीकायां दुर्गादासः ॥

पृष्ठं क्ली शरीरपश्चाद्भागः । पीठ इति भाषा इत्यमरः ॥ चरममात्रे इति मेदिनी ॥

पृष्ठग्रन्थिः पुं गडुः कुँज इति भाषा इति हेमचन्द्रः ॥

पृष्ठतः अव्य पश्चात् पृष्ठदेशे यथा ते पृष्ठतः प्रष्ठमियाय नम्रो हिंस्रेषु दीप्तास्त्रधरः कुमारः इति भट्टिः ॥

पृष्ठदृष्टिः पुं भल्लूकः इति राजनिर्घण्टः ॥

पृष्ठमांसादः त्रि वाक्याभिधायी चोगोलखोर इति पारस्य भाषा इति त्रिकाण्डशेषः ॥

पृष्ठमांसादनं क्ली परोक्षे दोषकीर्त्तने इति हेमचन्द्रः तद्वति त्रि ॥

पृष्ठवंशः पुं पृष्ठास्थि पिठेरदांडा इति भाषा तत्पर्य्यायः तीटकः २ इति हेमचन्द्रः स तु मासमात्रेण भवति इति सुखबोधः ॥

पृष्ठवाट् पुं युगपार्श्वगवृषः पाटेरबाड वोयो गरु इति भाषा इत्यमरः ॥

पृष्ठवाह्यः पुं भारवाहकवृषः तत्पर्य्यायः स्थौरी २ पृष्ठ्यः ३ इति हेमचन्द्रः ॥

पृष्ठशृङ्गः पुं वनच्छागः इति हेमचन्द्रः ॥

पृष्ठशृङ्गी न् पुं भीमसेनः नपुंसकः महिषः इति मेदिनी शब्दरत्नावल्यौ ॥

पृष्ठ्यं क्ली पृष्ठानां समूहः । इत्यमरः ॥ पृष्ठ्यः पुं पृष्ठेन भारवाहकाश्वः तत्पर्य्यायः ॥ स्थौरी २ इत्यमरः ॥ पृष्णिः त्रि प्रश्निः इत्यमरटीकायां भरतः ॥ पार्ष्णिः तत्र स्त्रीलिङ्गः ॥ इत्युणादिकोषः ॥

पॄ ञि पि लि पालने पूर्त्तौ । इति कविकल्पद्रुमः ॥

पेचकः पुं पक्षिविशेषः पेंचा इति भाषा तत्पर्य्यायः उलूकः २ वायसारातिः ३ इममदः शाक्राख्यः ४ दिवान्धः ५ वक्रनासिकः ६ हरिनेत्रः ७ दिवाभीतः ८ नक्तचारी ९ पीयुः १० घर्घरः ११ काकभीरुः १२ नक्तचारी १३ इति त्रिकाण्डशेषः ॥ निशाचरः १४ कौशिकः १५ रूपनाशनः १६ पेचः १७ वक्रनासिकः १८ भीरुकः १९ इति शब्दरत्नावली करिपुच्छमूलोपान्तः गुदाच्छादकमांसपिण्डविशेषः इत्यमरः पर्य्यंकः घूकः इति

विश्वः मेघः इति शब्दरत्नावली ॥

पेचकी न् पुं हस्ती इति शब्दरत्नावली पेचिलः पुं हस्ती इति त्रिकाण्डशेषः ॥ पेचु क्ली पेचुली इति त्रिकाण्डशेषः ॥

पेचुली स्त्री शाकभेदः कचु इति ख्यातः यथा केचुके पेचुली पेचु नाडीचो विश्वरोचनः इति त्रिकाण्डशेषः ॥ पेटः पुं प्रहस्तः इति राजनिर्घण्टः ॥

पेटके त्रि इत्यमरः ॥

पेटकं क्ली पुस्तकादीनां मञ्जूषा पेटरा इति भाषा कदम्बके समूहः इति मेदिनी ॥

पेटकः पुं वंशवेत्रादिमयसमुद्गकप्रायः पेटारी इति पेटी इति पेडा इति च ख्यातः तत्पर्य्यायः पिटकः २ पेडा ३ मञ्जूषा ४ इत्यमरः आद्ये स्वल्पपेटिकायां परे महापेटिकायामिति स्वामी ॥ पटाकः पुम् पेटकः इति भरतद्विरूपकोषः ॥

पेटिका स्त्री वृक्षविशेषः पेटारि इति भाषा तत्पर्य्यायः ऊवेराली २ ऊलिंगाली ३ कुक्कुहलिका ४ इति रत्नमाला ॥

पेटी त्रि पेटकः इत्यमरः ॥

पेडा स्त्री मञ्जूषा महापेटिका इत्यमरभरतौ ॥ पेण ऋ पेषे गतौ श्लेषे इति कविकल्पद्रुमः ॥ पेत्वं क्ली अमृते घृते इत्युणादिकोषः ॥ पेयम् क्ली जले इति मेदिनी ॥ दुग्धम् इति शब्दचन्द्रिका ॥ अष्टविधान्नान्तर्गतान्नविशेषः यथा भोज्यं पेयं तथा चूष्यं लेह्यं खाद्यं च चर्व्वणं निष्पेयं चैवमत्र स्यादन्नमष्टविधं स्मृतं इति राजनिर्घण्टः ॥ पातव्ये त्रि इति मेदिनी ॥

पेया स्त्री सिक्थसमन्वितपेयद्रवं अस्या गुणाः पेया स्वेदाग्निजननी वातवर्च्चोऽनुलोमनी तृड्ग्लानिदौर्ब्बल्यकुक्षिरोगविनाशिनी इति राजवल्लभः मिश्रेया इति शब्दचन्द्रिका माण्डा अच्छमण्डम् इति मेदिनी ॥

पेयूषः पुं क्ली अभिनवं पयः इत्यमरः नवप्रसूताया गोः सप्तदिनाभ्यन्तरीणं दुग्धम् यथा आ सप्तरात्रप्रसवे क्षीरं पेयूषमुच्यते इति शब्दावली ॥

पीयते पेयूषः पीयूषपाने नाम्नी।

ति पूषः मर्ईस्मात्तः क्ली वे।
च पीयूषं च अथ पीयूष पेयू।
षे नवे सप्तदिनावधीति शब्दा
र्णवः इति तट्टीकायां भरतः।
अमृते अभिनव सर्पिः इत्युणा
दिकोषः ॥ पेरुः पुं व।
ह्निः सूर्य्यः इत्युणादिकोषः
समुद्रः इति त्रिकाण्डशेषः
पेरोजं क्ली उपरत्नविशेषः ॥
पीरोजा इति यवन भाषा तत्
पर्य्यायः हरिताश्मम् २ पेरजं ३
तद्द्विविधं तस्यांगं हरितं च तस्य
गुणाः पेरजं सकषायं स्यान्मधुरं
फलं दीपनं परम् स्थावरं जंगमं
चैव संयोगाच्च यथा विषं।
तत्सर्वं नाशयेत् शीघ्रं शूलहृत्
तादिदोषजं पाठान्तरं यथा विरसं
सकषायं स्यान्मधुरं दीपनं हि
धीः स्थावरादिविषघ्नं सा हरि
ते चापरस्मृतम् शीतांगं नाशये
च्छीघ्रं शूलं तिमिरं भूतजम् ॥
इति राजनिर्घण्टः ॥
पेल ऋ र कम्पे गतौ ॥ इतिक
विकल्पद्रुमः ॥
पेलं क्ली अण्डकोषः इति हेम
चन्द्रः ॥ पेलवम् ॥

त्रि विरले अत्रसावकाशान्ते प्रका
शः इत्यमरभरतौ कृशः इति
हेमचन्द्रः ॥ कोमलं इति त्रि
काण्डशेषः ॥ पेव ऋ ङ
सेवने इतिकविकल्पद्रुमः ॥
पेशलः त्रि चारुः सुन्दरः दक्षः
चतुरः कोमलः इत्यमरभरतौ
धूर्त्तः इति शब्दरत्नावली ॥
पेशस्कृत् पुं कीटविशेषः कु
मिरके इति भाषा यथा कीटः
पेशस्कृतं ध्यायन् कुड्यान्तेन प्र
वेशितः याति तत्सात्मतां रा
जन् पूर्वरूपमसंत्यजन् इति
श्रीभागवते ११ स्कन्धे ९ अध्या
यः ॥ पेशिः पुं शतकोटिः
इत्युणादिकोषः अण्डमांसवि
दले च स्त्री इति मेदिनीमाधवेक
दन्तपादः ॥ पेशी स्त्री अंगे इ
त्यमरः सुपक्व कलिकामांसी
खड्गपिधानकं मांसपिंडी इति
मेदिनी नदीभेदः पिशाचीवि
शेषः राक्षसीविशेषः ॥
इति शब्दरत्नावली ॥ ॥ ॥
पेषणं क्ली चूर्णने पिष धातो
र्भावे ऽनट्प्रत्ययनिष्पन्ने खले।
शालग्राम तेकालानिज इति भा
षा इति शब्दचंद्रिका ॥

पेषणिः स्त्री पेषणशिला
शिलपेषणी इति भाषा तत्।
पर्य्यायः पेषणी २ पट्टः ३ दृढ
शमा ४ दृढकच्छपः ५ इति शब्द
रत्नावली ॥ पेषलः त्रि पेशा
लः इत्यमरटीकायां भरतरमाना
थौ ॥ पेषाकः पुं पेषणिः इ
त्युणादिकोषः ॥ पेस ऋ र
गत्या इतिकविकल्पद्रुमः ॥
पेसलः त्रि पेशलः इत्यमरटी
कायां भरतः पै शोषे इतिक।
विकल्पद्रुमः पैंजूषः पुं कर्णः
इति हेमचन्द्रः ॥ पैठरम् स्था।
लीपक्वमांसादि इत्यमरः ॥
पैठीनसिः पुं मुनिविशेषः स च
स्मृति गोत्रयोः कारकः इति पु
राणम् ॥ पैण्डिन्यम् क्ली भैक्ष
जीविका इति त्रिकाण्डशेषः ॥
पैतामहम् त्रि पितामहसम्बन्धि।
धनादि यथा कात्यायनः पैताम।
हं च पित्र्यं च यच्चान्यत्स्वयमर्जितं
दायादानां विभागेषु सर्वमेतद्वि।
भज्यते बृहस्पतिः पैतामहम्।
क्रमे पित्रा स्वशक्त्या यदुपार्जितं
विद्याशौर्यादिना प्राप्तम् ॥
॥ इति सम्भानिर्णयः ;

तत्र स्वाम्यं पितुः स्मृतं इति दा।
यभागः ॥ पैतृकम् त्रि पितृ
सम्बन्धि इति शब्दमाला यथा म
नुः ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रा।
तरः समं भजेरन् पैतृकं रिक्थम
नीशास्ते हि जीवतोः मनुविसुपैतृ
कन्तु यदा द्रव्यमनवाप्तमवाप्नुयात्
न तत्पुत्रैर्भजेत्सार्द्धमकामः स्व
यमर्जितम् पैठीनसिः पैतृके वि।
भज्यमाने दायादे समो विभागः
नारदः शौर्य्यभार्य्याधने हित्वा
पञ्चविद्याधने भवेत् त्रीण्येतान्यविभा
ज्यानि प्रसादो यश्च पैतृकः इति दाय
भागः ॥ पैतृकभूमिः स्त्री पितृस
म्बन्धिस्थाने तस्या माहात्म्यं यथा
श्रीभगवानुवाच भवांश्च पाण्डवैः
सार्द्धं प्रविशन् द्वारकोपुरी मत्पित्रा।
मातृभिः सार्द्धं माहेन्द्रवत्तथान्यप उ।
ग्रसेन उवाच वासुदेवनयास्मामि।
भूमिं तां पैतृकीं शुभ्रां सर्वतीर्थ।
परां शुद्धां दैवे कर्म्माणि पैतृके पा।
र्थके भूमिदेशे च पितॄणां निर्वपेत
यः तद्भूमि स्वामि पितृभिः श्रा।
द्धकर्म्म निहन्यते पितॄणां निष्फले
श्राद्धं देवानामपि पूजनम् ॥
किं वित्त फलमर्दं चैव सम्म ॥

णि पैतृकेस्थले अत्रपौत्रक
लेभ्यः प्राणेभ्यः प्रेयसीसदा
उलभा पैतृकीभूमिः पितृभू
गरीयसी तत्रश्राद्धंचपवित्रं
च दैवकर्म्माणि कीर्त्तंचतद्दत्ते
दाने परदत्तमशुद्धकं म्रियते।
पैतृकीभूम्या तीर्थतस्फलं
लभेत् गंगाजलसमंशृते पितृ
तातोदकेहदे तत्रस्नातानले
हृते गंगास्नानफलंलभेत् पि
तृणांतर्पणंतत्र पवित्रंदेवपू
जनं पैतृकीजन्मभूमिश्चेत् फ
लंतद्द्विगुणंलभेत् पैतृकीभू
मिरत्याचदानभूमिःसनाम
पि इतिब्रह्मवैवर्त्ते श्रीकृष्णज
न्मखण्डे ९२ अध्यायः ॥
पैतृष्वसेयः पुं स्त्री पितृष्वस
पत्यं पैतृष्वस्रीयः पितृभगि
नीपुत्रः पिसतुतभाइ इतिभाषा
इत्यमरः ॥ पैत्रः त्रि पितृसं
बन्धिः इतिपैत्रिकः राजनि
र्घण्टः ॥ पैत्रे क्ली पितृतीर्थं
अंगुष्ठतर्जन्योर्मध्यं इत्यम
रः पितृसम्बन्धिनि त्रि ॥
पैत्राहोरात्रः पुं पितृलोकस्य
दिवा रात्रिः ॥ ॥

स तु मनुष्यमानेनमासैकेनभ
वति यथा मासेनस्यादहोरा
त्रः पैत्रोवर्षेणदैवतः इत्य
मरः ॥ पैलः पुं मुनिविशे
षः सच ऋग्वेदी यथा तत्र
र्ग्वेदधरः पैलः सामगोजैमि
निःकविः वैशम्पायनएवैको
निष्णातोयजुषामुत अथर्वाङ्गि
रसामासीत् सुमन्तुर्दारुणो
मुनिः इतिहासपुराणानां
पितामेरोमहर्षणः इतिश्री
भागवते १स्कन्धे ४अध्यायः
पैशाचः पुं अष्टमप्रकारविवा
हान्तर्गताष्टमविवाहः यथा या
ज्ञवल्क्यः पैशाचःकन्यकाच्छ
लात् छलमाहमनुःसुप्तां म
त्तांप्रमत्तांवा रहोयत्रोपगच्छति
सपापिष्ठोविवाहानां पैशाचः
कथितोष्टमः इत्युद्वाहतत्त्वे ॥
पिशाचसम्बन्धिनि त्रि ॥
पैशुन्यं क्ली पिशुनता खलता
तच्च दशविधपापान्तर्गतवाङ्म
यपापविशेषः इतितिथितत्त्वम्
अस्यविवरणंपातकशब्देद्रष्टव्यं
पैष्टः त्रि पिष्टसंबन्धी यथा यथ
प्य हलकः एषा पैष्टमतिसदावह
अन्नीन्द्रस्वरसामाप्या तण्डुलात्र।

विधीयते इतितिथ्यादितत्त्वम्
पैष्टिकं क्ली पिष्टानांसमूहः इ
तिशाश्पिक शब्दटीकायांभरतः
मद्यविशेषः यथा कृत्तमाध्वीका
दि जनितेमद्यत्यागे स्त्रियांपैष्टि
कादि मद्यमपेहेत्तविपरीतमेव
इतिविजयरक्षितः ॥
पैष्टी स्त्री विविधधान्यविकारजा
मदिरा तस्यागुणाः पैष्टीकटु
ल तीक्ष्णास्वादीषद्गौडीसमा
परा वातहृत् कफ कृत्तीक्षत् पि
त्तहृन्मोहनीचसा इतिराजनि
र्घण्टः ॥ पौगण्डः पुम्
दशावर्षीयबालकः यथा
रोगीवृद्धस्तु पौगण्डः कुर्वन्म
न्ये ब्रतंमदा इतिप्रायश्चित्तत
त्त्वब्रह्मपुराणं ॥ पौगण्डः
त्रि अपौगण्डः स्वभावतोऽन्यूना
धिकांगः ऊनविंशान्यगुलीकैक
विंशत्यंगुलीकादिजनः यथा
पौगण्डेत्र विकलांगे स्यादिति
हलायुधः ॥ पौगण्डोविकलांग
कः इतिरत्नकोषः ॥ इत्यमरटी
कायांभरतः ॥ पोटः पुं वे
श्मभूमिः इतिजटाधरः संक्षेपः
इतिपोटगलशब्दटीकायांभरतः
पोटगलः पुं नलः काशः इत्य

मरः मत्स्यः इतिमेदिनी ॥
पोटलिका स्त्री संश्लिष्टवस्त्रादि
पुं टुलि इति भाषा इतिकेचित्
पोटा स्त्री स्त्रीपुंसलक्षणा इत्यम
रः स्त्रीपुंसयो र्लक्षणंविशेषेण
श्मश्र्वादि रूपं यस्याःसा इतिभरतः
पोटिकः पुं विस्फोटकः इति
केचित् ॥ पोट्टली स्त्री ॥
पोट्टलिका वस्त्रबद्धद्रव्यं पुंटु
लि इतिभाषा यथा मुद्राय्यैत्रि
फलाक्वाथे गुडूच्याःक्वाथएववा
दोलायन्त्रे पचःपोच्यः पोट्टल्या
वस्त्रबद्धया इतिवैद्यकम् ॥
पोतुः पुम् कपालास्थिनले इ
तिराजनिर्घण्टः ॥
पोतः पुं स्त्री शिशुः इत्यमरः ॥
पोतः पुं वहित्रम् गृहस्थानम्
पोता इति भाषा वस्त्रं इतिमेदि
नी ॥ दशवर्षीयहस्ती इतिहेम
चन्द्रः ॥ समुद्रयानम् याहाज इ
ति भाषा यथा समुद्रयानेरत्ना
नि महामौल्यानिसाधकैः रत्न
पारीक्षकैःसार्द्धमानयिष्येवहून् ॥
निच एकेनसहसंप्राप्तो महा
मेलवर्णार्णवम् पोतारूढास्त
तः सर्वे पोतवाहे ॥



रुपासिताः अपारेऽस्वरेऽगा
धे यान्ति वेगेन नित्यशः इति
वाराहे गोकर्णमाहात्म्याध्या
यः ॥ पोतकी स्त्री ॥
पूतिका इति शब्दमाला ॥
अपामापत्ती इति राजनिर्घण्टः
पोतजः पुं कुञ्जरादिः इति हे
मचन्द्रः ॥ पोतवणिक्
पुं वहित्रेण वाणिज्यकर्त्ता ।
नौवाणिज्यकरः तत्पर्य्यायः
सांयात्रिकः २ इत्यमरः ॥
पोतरक्तः पुं केलिपातकः हा
लि इति भाषा इति शब्दमाला
पोतलकप्रियः पुं बुद्धविशे
षः इति त्रिकाण्डशेषः ॥
पोतवाहः पुं वहित्रवाहकः
दाँड़ि इति भाषा तत्पर्य्यायः
नियामकः २ इत्यमरः ॥
पोता [२] पुम् विष्णुः इतिसंक्षि
प्तसारोणादिवृत्तिः ॥ ऋत्वि
क् इति भूरिप्रयोगः ॥ पो
ताच्छादनं क्ली वस्त्रकुट्टिमं
इति हारावली ॥ पोताधा
नम् क्ली क्षुद्रमत्स्यसं
घातः पोना इति भाषा इ
त्यमरः अस्य गुणाः ॥ ।
सान्निपत्वम् ॥

लघुत्वे रोचनत्वे च इति राज
वल्लभः ॥ पोतिका स्त्री
पूतिका इत्यमरटीकायां भर
तः ॥ शतपुष्पा मूलपोती ।
इति राजनिर्घण्टः ॥
पोतासः पुं कर्पूरविशेषः ॥
इति राजनिर्घण्टः ॥
पोत्रं क्ली वज्रं सूकरमुखाग्रे
लाङ्गलमुखाग्रम् इति मेदिनी
वहित्रे इति संक्षिप्तसारोणादि
वृत्तिः ॥ पोत्रायुधः पुम्
सूकरः इति राजनिर्घण्टः ॥
पोत्ररथा स्त्री जिनशक्तिवि
शेषः इति त्रिकाण्डशेषः ॥
पोत्री [२] पुं सूकरः इत्यमरः
पोत्रविशिष्टे त्रि पोलिन्दः
पुं नौकावयवभेदः तत्प
र्य्यायः पालावकः २ इति
त्रिकाण्डशेषः ॥ पोलिका
स्त्री पिष्टकविशेषः पातला
रोटी इति हिन्दी भाषा यथा
कुर्य्यात् समितयातीव तन्वी
पर्पटिका ततः स्नेहपेनप्रके
तान्न पोलिकां तां जगुर्बुधाः
तां शुष्कां देलपिकाप्युक्ता तस्या
गुणकवद्गुणाः तमकेता
वा इति लोके इति भाव ॥

प्रकाशः तत्पर्य्यायः पो
लिका २ पोलिः ३ पूपिका ४
पूपला ५ इति हेमचन्द्रः ॥
पोली स्त्री पिष्टकविशेषः तत्
पर्य्यायः पूपाली २ चर्पटी ३
इति त्रिकाण्डशेषः ॥
पोषः पुं पोषणं पुषधातो॥
र्भावे घञ्प्रत्ययनिष्पन्नः य
था यः सर्व्वदास्मान् पुपुषत्स्वपो
षे इति भट्टिः ॥ पोषणम् क्ली
पुष्टिः वृत्तिः पुषधातो र्भावे
ऽनट्प्रत्ययनिष्पन्नः पोषयि
त्नुः पुं कोकिलः भर्त्ता इति
संक्षिप्तसारोणादिवृत्तिः ॥
पोषणकर्त्तरि त्रि पोष्टा ।
पुं स्त्रीकः काटाकरंज इति
इति भाषा इति शब्दचन्द्रिका
पोषणकर्त्तरि त्रि ॥
पोष्टवरः त्रि पोषकश्रेष्ठः ।
पोष्टृ वर इति सप्तमीसमा
सः ॥ पोष्यः त्रि पोषणीयः
पोषितव्यः पुषधातोः कर्म्म
णि यप्रत्ययनिष्पन्नः ॥
पोष्यपुत्रः पुं पालनादिना सुत
त्वमाप्तः यथा अफना कृतिका
नांच षडङ्गानत पोष्यपुत्रकः त
न्नामवक्कृत्ताः प्रेम्णा कार्त्तिकश्चे
ति कीर्त्तकात् इति ब्रह्मवैवर्त्तम्

पतिखण्डे १४ अध्यायः । अथ
तस्य व्यवस्था तत्राह मनुः अपुत्रे
णैव तः कार्य्या यादृक् तादृक् ।
प्रयत्नतः पिण्डोदकक्रियाहे
तो नामसंकीर्त्तनाय च अपिच्य
अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः
सदा पिण्डोदकक्रियाहेतो र्य
स्मात्तस्मात् प्रयत्नतः पुत्रा
कः अपुत्रो मृतपुत्रो वा पुत्रार्थं
समुपोष्य च तितेन पुत्रोत्पत्तस्मा
ज्ज्येष्ठेन जातमात्रेण पुत्री भवति
मानवः पितॄणामनृणश्चैव स
तस्माल्लब्धुमर्हतीति मनुवचो
नावगतकरणापरिहारेऽपि तत्
पुत्र मरणे पिण्डोदकार्थं ॥
पुनः पुत्रकरणमावश्यकम् अ
त्र पुत्रपदं पौत्रप्रपौत्रयो रप्यु
पलक्षणम् तयोरपि पिण्डदात्
त्ववंशकरत्वाविशेषात् अन्यथा
सत्यपि पौत्रे मृतपुत्रस्य निर्निमि
त्तपुत्रपरिग्रहः यदि स्यात्तदा पुत्रपौ
त्रप्रपौत्ररहितस्यैव पुत्रीकरण
मवगम्यते ॥ स्त्रियाभर्त्तुरनुज्ञया
तदधिकारः यथाह वशिष्ठः न
स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्य
त्रानुज्ञानाद्भर्त्तुरिति ॥ प्रतिनि
धिविधिः सर्व्व देवब्राह्मणादेकादशा
विधः यथाह मनुः देवब्राह्मणादीन् ॥

सुतानेतानेकादश यथोदिता।
न् पुत्रप्रतिनिधीनाहुः क्रिया।
लोपान्मनीषिणः बृहस्पतिः पु
त्रास्त्रयोदश प्रोक्ता मनुना येऽनुपू
र्वशः सन्तानकारणं तेषां औरसः
पुत्रिका तथा आज्यं विना यथा।
तैलं सद्भिः प्रतिनिधीकृतं तथै।
कादश पुत्रास्तु पुत्रिकौरसयोर्वि
ना तत्रापि कलौ न सर्वेषां सम्भ
वस्ताने अनेकधा कृताः पुत्रा ऋ
षिभिर्यैः पुरातनैः न शक्यास्ते
ऽधुना कर्त्तुं शक्तिहीनतया मैरि
ति वचनात् दत्तौरसेतरेषां तु पुत्र
त्वेन परिग्रह इत्याद्यभिधाय इमा।
न् धर्म्मान् कलियुगे वर्ज्यानाहुर्म
नीषिणः इति दत्तकेतरप्रतिनिधि
निषेधात् ॥ अथ दत्तकविधि वि
विच्यते तत्र शौनकः ब्राह्मणा।
नां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः
तदभावे सपिण्डे वा अन्यत्र तु न।
कारयेत् सपिण्डेष्विति सामान्य
श्रवणात् समानासमानगोत्रेष्वि
त्यर्थः तथाच सपिण्डाभावे सपि
ण्डदभावे भिन्नगोत्रोपि ग्राह्य इमा
ह शाकलः सपिण्डापत्यकं चैव
सगोत्रजमथापि वा अपुत्रको हि।
ज्ञेयस्मात् पुत्रहे परिकल्पयेत् स
मान गो ॥

त्रजाभावे पालयेदन्यगोत्रजम्
दौहित्रं भागिनेयंच मातृष्वसृसु
तविनेति अन्यत्र तु नकारयेदिति
ब्राह्मणातिरिक्त क्षत्रियादिस
मानजातीयो दत्तकोग्राह्यस्ते
यदाह मनुः माता पितावाद्द्या
तां यमद्भिः पुत्रमापदि सदृशं।
प्रीतिसंयुक्तं सज्ञेयो दत्रिमः सु
तः आपद्यपुत्रप्रतिग्रहीतरपु।
त्रत्वेसदृशं सजातीयं शौनकमाह
बृहद्याज्ञवल्क्यः सजातीयः सु
तोग्राह्यः पिण्डदातासकृत्व
भाक् तदभावे विजातीयो वंशा।
मात्रकरः स्मृतः ग्रासाच्छादना।
मात्रंतु सलभेत तदृक्थिन इति
दौहित्रे भागिनेयंचेति दौहित्रभा
गिनेय निषेधः शूद्रातिरिक्तवि
षयः तथाच शौनकः दौहि।
यांणांस्वजातौ च एकगोत्रसमः
पिता वैश्यानां वैश्यजातेषु शूद्र
णांशूद्रजातिषु सर्वेषामेवव॥
र्णानां जातिष्वेव नचान्यतः दौ।
हित्रो भागिनेयश्च शूद्रैस्तु क्रिय।
ते सुतः ब्राह्मणादित्रयेनास्ति
भागिनेयः सुतः क्वचित् जातिष्वेव
नचान्यत इति नियमः सजातीय
सम्भवे विजातीय निषेधार्थः अ
न्यथा मातृकृतासायनविरोधः
स्यात् तत्रापि ॥

सन्निहितसपिण्डेषु सत्सुभ्रा
तृपुत्र एव पुत्रीकार्य्य इत्याह
मनुः सर्वेषामेकजातानामे
कश्चेत् पुत्रवान् भवेत् सर्वे ते ते
न पुत्रेण पुत्रिणो मनुरब्रवीत्
बृहस्पतिः यद्येक जाता बहवो
भ्रातरश्च सहोदराः एक।
स्यापि सुते जाते सर्वे ते पुत्रिणः स्मृ
ताः इति अत्र वचनाद्द्वयेपि भ्रा
तृसुतेच पुत्रप्रतिनिधितया क
थंचित् संभवत्यन्यानप्रतिनिधिः
कार्य्य इत्यवगम्यते ॥ अतवेशा
मनन्तरेणचास्या वंशान्तरासम्भ
वेन तस्यैव स्ववंशाकरत्वेचेत्।
यतः समस्तस्यापि पुत्रप्रयोज
नस्य सम्भवेन सति सपत्नीपुत्रेण
दत्तकाद्युपादानं ॥ केन पुत्रो देय।
इत्याह शौनकः नैकपुत्रेण कर्त्त
व्यं पुत्रदानं कदाचन बहुपुत्रेण
कर्त्तव्यं पुत्रदानं प्रयत्नत इति हि
पुत्रस्यापि पुत्रदाने अपरपुत्रना।
शे वंशविच्छेदमाशंक्याह बहुपु।
त्रेणेति स्त्रियास्तु जीवति भर्त्तरि
तदनुमतौ प्रोषिते मृते वा तदनु
ज्ञां विनापि यथा वशिष्ठः न स्त्री
पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्य।
त्रानुज्ञानाद्भर्त्तुरिति अनुमतिश्चाप्र
तिषेधेपि भवति अप्रतिषिद्धं पर।

मनुमतं भवतीति न्यायात् ॥ निरू
पेक्ष्य दानमाह याज्ञवल्क्यः दद्या।
न्माता पिता वा यं स पुत्रो दत्तको भ
वेत् तथा माता पितृभ्यामुत्सृ
ष्टस्तयोरन्यतरेण वेति ॥ अ
थ पुत्रपरिग्रहविधिमाह शौन
कः शौनकोहं प्रवक्ष्यामि पुत्रा।
संग्रहमुत्तमं अपुत्रो मृतपुत्रो वा पु
त्रार्थं समुपोष्य च उपोष्य ग्रहणा
त्पूर्वदिने कृतोपवासः वृद्धगोत्रा।
मः वाससी कुण्डले दत्वा उस्नीषं
चांगुलीयकं आचार्य्यं धर्म्मसंयुक्तं
वैष्णवं वेदपारगं मधुपर्केण सं
पूज्य राजानंच द्विजान् शुचीन्।
राज्ञो विप्रकृष्टत्वे ग्रामस्वामिनं वा
न्यूनाहूय सर्वांस्तु ग्रामस्वामिनमे
वेति स्मरणात् द्विजानितिवक्त्वे
त्रित्वपर्य्यवसिते कपिञ्जलन्याया
त् बर्हिः कुशमयं चैव पालाशं चे।
ध्ममेवच एतानाहृत्य सर्वत्र ज्ञा।
तीनाहूय प्रयत्नतः बन्धूनन्नेन सं।
भोज्य ब्राह्मणांश्च विशेषतः अग्न्या
न्याधानादिकं तत्र कृत्वाज्यान्तमेव
नालकं दातुः समक्षं गत्वा च पुत्रं
देहीति याचयेत् दाने समर्थो दाता
स्मै य इत्यनेन पञ्चभिः दद्यादिति
शेषः बन्धून् आत्मसात्पित्र ॥

बन्धून् ज्ञातीन् सपिण्डान् तथा देव
स्यात्वेति मन्त्रेण हस्ताभ्यां परिगृह्य
श्रेगारं गेभ्यश्चं जस्वा आद्यायपिण्डा
मृद्देति वस्त्रादिभिरलंकृत्य पुत्रच्छा
यावहेस्तनम् पुत्रच्छायावहमाह॥
प्रपनियोगादिनास्वयमुत् पादनयो
गपत मितियावत् तथा नारदगीतैस्त्रि
वाधैश्चस्वस्तिशब्दैश्च संपूतेगृहम
ध्येत माधाय चरुं हुत्वाविधानतः
यस्मात्कृतेभ्यश्चावेव तन्मसमन्तर
चैकया सोमोददादित्येताभिः प्रत्य
वे पंचभिस्तथेति वृद्धगौतमः पा
यसेतत्रसाज्यंच शतसंख्यंचहोम
येत् प्रजापतेनत्वदेता निस्तद्विश
प्रजापति मिति॥ वसिष्ठः पु
त्रे प्रतिग्रहीष्यन् बन्धूनाहूय राज्ञ
जनि निवेद्यनिवेशनस्य मध्येव्या
हृतिभिर्हुत्वा अदूरबान्धवं बन्धुस
सन्निकृष्टमेव गृह्णीयात् सन्देहेवो
त् पन्नेदूरबान्धवम् शूद्रमिवस्था
पयेत् विज्ञायते ह्येकेन बहूंस्त्रा
यत इति निवेशनम् गृहं सन्दे
ह इति दूरव्यवस्थितबान्धवस्या
न्यत देशभाषा विप्रकर्षादिना।
कुलशीलादि सन्देहो भवत्येव तं॥
धाते निर्णय पर्यन्तं नत्ववहेतेत्
नत्रहेतुरेकेनेति बन्धून् पित्रा

दीन् यतदन्यतरं विधि तावश्यक
नतश्च शौनकः दक्षिणां गुरवे।
दद्याद्यथाशक्ति द्विजोत्तमः न्येषा
न्यार्द्धमेवाग्र वैश्यादिनप्रातत्र।
ये शूद्रः सर्वस्वमेवापि प्रशक्त।
श्चेद्यथाबले राज्यार्द्धमङ्गराज्या
त्य मेकवर्षहृज्जेयनमिति वृद्धगौ
तमस्मरणात् उत्तममध्यमाधम
भेदेनत्रिभागे सुवर्णं रजतं ता
म्राणामिति सेये शतत्रयं नाणा
काणां सौवर्णमवराजतं मदद्या
ताम्रमखवा उत्तमादिक्रमव्य
या इति वृद्धगौतमस्मरणात्
सर्वस्वमेकवर्षभृति लब्धमिति
यावत्॥ तैत्तिरीयाणांत्वविधि
विशेषमाह बौधायनः अथपुत्र
परिग्रह विधिं व्याख्यास्यामः प्र
तिगृहीष्यन्नुपकल्पयते द्वे वास
सी द्वे कुण्डले अङ्गुलीयकं आ
चार्यं चवेदपारगं कुशामयं बर्हिः
पर्णामयमिध्ममित्यथ बन्धुना
हूय निवेशनस्य मध्ये राजनि नि
वेद्य परिषद्यागारमध्ये ब्राह्मणा
न्नागालेभेनउपवेश्य पुण्याह स्व
स्तिऋद्धिमितिवाचयित्वा यद्देवा
यजनो लेख प्रभृति आग्रणीता
भ्यः कृत्वा दातुःसमक्षं गत्वामेपु
त्रम्॥

देहीति भिक्षेत् ददानीतीतरश्चा
ह तं परिगृह्णीत धर्माय त्वा प
रिगृह्णामि सन्तत्यै त्वा परिगृह्णा
मीत्यथैनं वस्त्रकुण्डलादिभिर
लंकृत्यपरिधान प्रभृत्यग्निमु
खंकृत्वा पक्वान्नहोति यस्त्वाहृ
दाकीरिणा मन्यमान इतिपुरो
ऽनुवाक्यमनूच्य यस्मै त्वं सुकृते जा
तवेद इतियाज्यया जुहोति अथ
व्याहृतिभिर्हुत्वा स्विष्टकृत्प्रभृ
तिसिद्धमाधेनु वरप्रदानात् द
क्षिणां ददात्येते च वाससी पत्रेकु
ण्डले यत्तज्ञोऽङ्गुलीयकं पवेतसो।
वसउत पद्यते तृतीय भागे सम्भ
वतीति आहस्म बौधायन इति
एव शुक्रवित्थभावे परिगृहीतस्य
तु विवाहोक्तिपानभात्रभागित्वे
नत्वंशभागित्वमित्यप्रेवदयते ना
धावमन्त्रः गोत्ररकथेननयितु
नेहरेदृत्रिमः सूतः गोत्ररकथा
नुगः पिण्डोव्यपैति ददतः स्वधेति।
पनेनदानपने दानादेवपुत्रत्वनिवृ
त्ति ज्ञानदत्रिमस्य त्वनिवृत्तिर्होत्र
गोत्र निवृत्तिश्च भवतीत्युच्यते ना
धावगोत्रादि निवृत्ते वेददर्शनात्
संकुर्ध्यात् स्वसमानु पितृतिसम्व
णात् ग्रहणाततत्त्वसंभाव्यमाना
पवदत्तकस्य संस्कारः प्रतिग्रही
त्रा कार्य्यो

न पुनर्जनकेन कृत पूर्वा अपिनि
वर्तनीयाः॥ यदि च तत्पूर्वभा
विनोपि संस्कारा जनकेन न कृता
स्तदा बीजगर्भदोषनाशाव श्यक
त्वेन क्रमान्तरोधेन च प्रतिग्रहीत्रै
वते समाधेयाः॥ एवमुपनयन
मात्रकरणेपि प्रतिग्रहीतदेता
कपुत्रसिद्धिः अन्यथा विद्ववोद
नः पुत्रश्चैवोपनायितः स्वगोत्रे
ण स्वशाखोक्त विधिना सस्वशा
खभाक् इतिवसिष्ठस्मरणात् प
तस्याष्टमाब्दरूप तन्मुख्यकाला
भ्यन्तर वर्त्तिपरिग्रहे बोध्यं अन्य
था मुख्यकाले अधिकार योग्य
त्वाभावे गौणकाले अनधिकारा
न तत् सिद्धिरिति॥ अत्रचजनक
प्रतिगृहीत्रोरुभयोरपि पुत्राभि
सन्धानेसति दत्तकस्य द्व्यामुष्या
यणत्वेनोभयगोत्रभागित्वं विधे।
यत्तो वक्ष्यते चूडाद्या यदिसंस्का
रा निजगोत्रेणवैकृताः दत्ताद्यास्त
नयास्तेस्युरन्यथादास उच्यते॥
एवंचचूडाद्या इत्यत्र गुणसंवि
ज्ञान बहुव्रीहिणा द्विजातीनामु
पनयनलाभः शूद्रस्य विवाह
लाभः॥ तथा पैठीनसिः अथद
त्तकक्रीतकृत्रिम पुत्रिकापुत्राः प
रपरिग्रहेणार्षेणाये ऽत्रजातास्ते
ऽसंगत॥

ऊलीना ह्यामुष्यायणा भवन्
तीति आर्षेण ऋष्युक्तेन परिग्रहे।
ण जनकग्रहीत्रोः स्वीकारेण ह्या
मुष्यायणा भवन्तीत्यर्थः। अथ
तत् कर्तृक श्राद्धनिर्णयः तत्र
पितुः सपिण्डीकरणान्तं षोड
शश्राद्धं दत्तकस्य पूर्वं गृहीतत्वे।
पि सत्यौरसे नाधिकारः औरसे
पुत्र उत्पन्ने तेषु ज्येष्ठेन विधेयते
इति देवलेन ज्येष्ठत्व प्रतिषेधा
त् पिण्डदोऽंशहरश्चैषां पूर्वाभा
वे परः परः इति याज्ञवल्क्यव
चनाच्च अन्यत्र सर्वं औरसवत् द
याद् न विशेषो यथा जातकर्णिः
औरस क्षेत्रजो पुत्रो विधिनापार्व।
णेन तु मत्सहमितवेऊर्ध्व देको
द्दिष्टस्तादृशा इतरे दत्तकादयः
अथ दत्तकाशौचादिनिर्णयः त
त्र शुद्ध दत्तकस्य जनककुले प
ञ्चत्रयमाशौचं नास्ति स्वगोत्र नि।
ह्यमाऽशौचं निहन्तेऽर्थ सिद्ध।
त्वात् ह्यामुष्यायणस्य तु उभय
त्रैवाशौचमिति ब्रह्मपुराणे।
दत्तकश्च स्वयंदत्तः कृत्रिमः क्री
त एव च अपविद्धश्च ये पुत्रा भ।
रणीयाः सदैव ते भिन्नगोत्राः एष
कपिण्डाः इत्यंशकाः स्मृताः
जननेमरणे चैव ह्यशौचस्य
भागि ॥

नः पराश्रवः भिन्नगोत्रः सगोत्रो
वा नीतः संस्कृतश्चेच्छया जनने
मरणे तस्य ह्यशौचं विधीयते
तथा औरसं वर्जयित्वा च सर्वव
र्णेषु सर्वदा क्षेत्रजादिषु जाते
षु च मृतेषु च अशौचन्तु त्रिरात्रं
स्यात् समानमिति निश्चयः ॥
अथ दत्तकविभागः मनुः पुत्रा
न् द्वादशयानाह नृणां स्वायंभु
वो मनुः तेषां षड् बन्धुदायादाः
षडदायादबान्धवाः औरसः क्षेत्र
जश्चैव दत्तः कृत्रिम एव च गूढोत्
पन्नोऽपविद्धश्च दायादा बान्धवा।
स्तु षट् कानीनश्च सहोढश्च क्री
तः पौनर्भवस्तथा स्वयंदत्तश्च
शौद्रश्च षडदायादबान्धवाः बौ
धायनः औरसं पुत्रिकापुत्रं क्षेत्रजं
दत्तकृत्रिमौ गूढजं चापविद्धं च रि
क्थभाजः प्रचक्षते कानीनं च स
होढं च क्रीतं पौनर्भवं तथा स्वयं
दत्तं निषादं च गोत्रभाजः प्रचक्ष
ते औरस पुत्रिकापुत्र क्षेत्रजका
नीन गूढोत्पन्नापविद्ध सहोढ
पौनर्भव दत्तक स्वयमुपागत कृ
तक क्रीतानभिधाय देवलः एते
द्वादश पुत्रास्तु संतत्यर्थमुदाहृताः
आत्मजाः परजाश्चैव लब्धा याह।
च्छिकास्तथा तेषां षड् बन्धुदायादाः

पूर्वे ये पितुरेव षट् विशेषं वा।
पि पुत्राणामाह पूर्वो विशिष्य।
ते सर्वेष्वेनौरसस्यैते पुत्रा दायाह
राः स्मृताः औरसे पुनरुत्पन्ने ते
षु ज्येष्ठेन विधेयते तेषां सवर्णा।
ये पुत्रास्ते तृतीयांशभागिनः
हीनास्तमुपजीवेयुः ग्रासाच्छा।
दनसंस्कृताः ॥ वशिष्ठः तस्मिंश्चे
त् प्रतिगृहीते औरस उत्पद्यते।
स चतुर्थभागभागी यदि नाभ्यु।
दयिकेषु प्रयुक्तः स्यात् सम्प्रतिगृ
हीतपुत्रः आभ्युदयिकेषु यज्ञा
दिषु यदि औरसेन प्रयुक्तेन स्या।
त् सम्भूतेयनमिति शेषः अतश्च
दत्तकग्रहणानन्तरमौरसोत्पत्ता
तौ तदौरसचतुर्थांश विधिर्व।
शिष्टोक्तो दत्तकविषयो ज्ञेयः त
था देवलकात्यायनवचनेत्तृती
यांशग्रहणविधिरिसत् कृष्टगु।
णदत्तकविषयो बोध्यः उपपन्नो
गुणैः सर्वैः पुत्रो यस्य हि दत्रिमः
सहरेतेनैव तद्रिक्थं सम्प्राप्नोप्य।
न्यगोत्रत इति मनुवचनेकवा।
क्यतात् गुणैर्जातिविद्याचारैः
तथाकेनापि गुणिना दत्तकस्य व
स्तुदायादत्वमन्येन चादायादत्वमु
क्तं तद्गुणवद्गुणवद्भेदेन समाधेय
मेवं दत्तकस्य धनग्रहणादेः सुनिभे
देन दर्शाय ॥

रोक्तिर्वैषम्ये गुणागुणविवेके।
नापास्ते एतेनौरसस्य भ्रात्रादि ध
नेयैनेव भ्रातृत्वादिना सम्बन्धेन
अधिकारित्वे तादृशेनैव सम्बन्धे
न तादृशदत्तकस्यापि यथा सम्भ
वमूह्यितो शंभागित्वमवधेयं एवं
च निन्दः पुत्रान्तरस्य त्वेमृतपितृके
दत्तकपौत्रस्य दत्तकोचितांशभा।
गित्वे तदसत्त्वे सर्वहरत्वमपीति।
न च पौत्रस्य स्वपितृयोग्यांशभा
गित्वं नियमात् दत्तकग्रहीतुः पि।
तामहौरससत्त्वे तादृशपितृव्यत
त्सुतयोर्वांशस्य तद्योग्यत्वात् दत्तक
पौत्रः पितृव्यतत्सुतयोर्वांशं लभ
ते इति वाच्ये पुत्रकस्य दत्तकत्वेच
तुर्थांशः पौत्रस्य तु तथात्वे समा
नांश इति वैषम्यात् तत्सम्बन्धस
मानरूपस्य पितुर्योग्यांशाः शास्त्र
सिद्धस्तस्यैव स्वपितृयोग्यांशेति
यथोक्तमेव साधु एवं रीतिः अ।
पौत्रेऽप्यनुसन्धेयमिति ॥ औरसः
क्षेत्रजश्चैव दत्तः कृत्रिम एव च ॥
गूढोत्पन्नोऽपविद्धश्च भागाहा
स्तनया इमे कानीनश्च सहोढ।
श्च क्रीतः पौनर्भवस्तथा स्वयंद।
त्तश्च दासश्च षडिमे पुत्रपांशनाः
अभावे पूर्व पूर्वेषां परान् समभि
षेचयेत् पौनर्भवं

स्वयं दत्ते दासे राज्येन योजयेत् ।
तथानन्तत्र जातीस्तनयान् राजा
राज्येऽभिषेचयेत् पितृणां शे
षयेदित्य मौरसेतनयेसतीति ।
एतावता प्रबन्धेना भिहितो योऽ
यं क्षेत्रजदत्तकादीनां मौरसेन
सह विभागप्रकारः स तु शूद्रस्य
न सम्भवति न स्यात् दास्यां वा दास
दास्यां वा यः शूद्रस्य सुतो भवेत्
सोऽनुज्ञातो हरेदंश मिति यो धर्म्म
व्यवस्थितः इति मनुवचनेन गौ
तोपि दास्यां शूद्रेण कामतोऽप्यु
त्पन्नोभवेत् मृते पितरि कुर्य्युस्तं
भ्रातरस्त्वर्द्धभागिनं अभ्रातृको
हरेत्सर्वं दुहितॄणां सुताहते इ
ति याज्ञवल्क्येन च दासीपुत्रस्या
पि औरसेन समांशाभिधानेन ॥
पितुरनंतरं भ्रातृरहितस्य ता
स्यैव दौहित्रेण सह विभागदर्शी
नेनच दण्डापूपायितं सति पितरि
क्षेत्रज दत्तकादीनां मौरसेन स
मांशे प्राप्ते सति तद्दोषः स्या
त्तथा यत्र च क्षेत्रज दत्तकादी
नां मौरस चतुर्थांशभावि तत्र त
दपेक्षया अत्यन्त विप्रकृष्टस्यापि ।
कारस्य दासीपुत्रस्यौरससमांशा
श्रितमिति महद्वैषम्यं स्यात्
एवं सति शूद्र क्षेत्रजादिषु ॥

सत्यौरसे पत्नीकन्ययोर्दौहित्रा
धिकारे क्रमाधिकार विधि वा
या पतितत्वेन दौहित्र पर्य्यन्ताधि
कारि शृगालायो [?] तदेकतमे सत्य
पि न दासीपुत्रस्य सर्व्वहरत्वं किन्तु
तत् समांशः अतएव दत्तपुत्रेय
था जातेकदाचिदौरसो भवेत्
पितुर्व्विभक्तस्य सर्व्वस्य भवेतां समभा
गिना विति पितृवचनं शूद्रविषय
एवयोजनीयं अथान्य श्रेष्ठ
प्रभृति पुत्राणां धनानधिकारि
तया तदौरसक्षेत्रजयोरेव पि
तामह धनभागित्वस्कीतेर्न तद्गृ
हीतदत्तकपुत्रादेः पितामह
धनाधिकारः किन्तु भरणमात्रे
अन्यादि भार्य्याणां भरणविधा
नेन तद्भरणस्य दण्डापूपायित
त्वात् तथा अन्धपंगवादीननधि
कारिपुत्रानभिधायाह औरसक्षे
त्रजास्त्वेषां निर्द्दोषा भागहारिणः
अपुत्रयोषितश्चैषां भर्त्तव्याः सा
धुवृत्तयः सुताश्चैषां प्रभर्त्तव्या
यावद्वै भर्त्तृसात्कृताः एवं दत्त
कग्रहणानन्तरोत्पन्नौरसेन
सह दत्तकस्य विभागदर्शनात्
सत्यौरसे गृहीतस्य तुर्य्यांशभागि
त्वमिति तथाविधानं विनापरि
गृहीतस्यापि तांशभागित्व मिम [?]

ह तस्मिन् जातेसुतेदत्ते नक
तेश्च विधानके तनस्तस्या वि
तस्य यः स्वामी पितृरञ्जसा मनुः ।
अविधाय विधानेयः परिगृह्णा
ति पुत्रकं विवाहविधिभाजं तेन
कुर्य्यात्तनभाजन मिति अप्रजा
तीयदत्तकस्यापि नो प्राभागित्व
मित्याह यदि स्यादन्यजातीयो गृ
हीतोपि सुतः क्वचित् अंशभाजं
न तं कुर्य्यात् शौनकस्य मतेहि
तत् इति दत्तकचन्द्रिका ॥
पोष्यवर्गः पुं प्रतिपालनीयग
णः स तु मात्रादिः यथा माता ।
पिता गुरुः पत्नी त्वपत्यानि समा
श्रिताः अभ्यागतोऽतिथिश्चा ॥
ग्निः पोष्यवर्गाअमीनव इति का
शीखण्डे अपिच माता पिता गु
रुर्भ्राता प्रजादीनः समाश्रिताः
अभ्यागतोऽतिथिश्चाग्निः पोष्य
वर्ग उदाहृतः भरणं पोष्यवर्ग
स्य प्रशस्तं स्वर्गसाधनं नरकंपी
डनेचास्य तस्मात्यत्नेन तंभ
रेत् इति गारुडे २१५ अध्यायः
पौंसवनं क्ली पुंसवनसंस्कारः
इति भूरिप्रयोगः ॥ पौंस्नं
क्ली पुंस्त्वम् इतिशब्दमाला ।
पौगण्डम् क्ली अवस्थाविशेषः

यथा कौमारं पञ्चमाब्दान्तं पौ
गण्डं दशमावधि कैशोरमापञ्चद
शात् यौवनंचततःपरं इतिदश
मस्कन्धीयद्वादशाध्यायटीका
यां श्रीधरस्वामिधृतवचनम् ॥
पौण्डरीकं क्ली प्रपौण्डरीकम्
इतिराजनिर्घण्टः ॥ ॥
पौण्ड्र्यं क्ली पुण्ड्र्यं इत्यमर
टीकायांभरतः ॥ पौण्ड्रः
पुं देशभेदः चन्देल इतिख्या
तः इतिशब्दरत्नावली ॥
भीमसेनस्य शंखः यथा पौण्ड्रम्
दध्मौ महाशङ्खं भीमकर्म्मावृ
कोदरः इतिश्रीभगवद्गीतायां
अध्यायः ॥ इक्षुभेदः पुंडि
इतिभाषा इतिरत्नमाला ॥
पौण्ड्रकः पुं इक्षुभेदः पुंडिआखु
इति भाषा अस्यगुणाः शीतल
त्वं वृष्यत्वं स्निग्धत्वं मधुरत्वं बृंह [?]
णत्वंच इतिराजवल्लभः ॥ जा
तिविशेषः पुं डो इति भाषा स
च पौण्ड्रिकायां वैश्यजातः इ
ति ब्रह्मवैवर्त्तपुराणम् ॥
पौण्ड्रवर्द्धनः पुं देशभेदः वेहा
र इतिख्यातः इतिशब्दरत्नावली
पौण्ड्रिकः पुं इक्षुभेदः पुंडि इति
भाषा तत्पर्य्यायः पुं ड्रेक्षुः २

पुं तुः ३ सेव्यः ४ अनिरसः ५ मफः ६ इति शब्दमाला ॥
पौतवम् क्ली परिमाणं इति पौतव शब्दटीकायां भरतः ॥
पौतिकम् क्ली पिंगलवर्णक्षुत्तिकाख्यबृहन्मक्षिकाकृतं हेतवर्णं मधु इति जटाधररत्नमाला ॥ पौत्रः पुम् पुत्रस्य पुत्रः नाति इति भाषा तत्पर्यायः नप्ता २ इति हेमचन्द्रः पुत्रेण लोकान्जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् इति दायभागधृतमनुः शंखलिखितवशिष्ठहारीतवचनं पौत्री स्त्री पुत्रात्मजा तत्पर्यायः । नप्त्री २ इत्यमरः । पौनः अव्य। पुनर्वारे तत्पर्यायः ॥ वारम्वारम् २ मुहुः ३ शश्वत् ४ असकृत् ५ पुनःपुनः ६ वारंवारेण ७ अभीक्ष्णं ८ अनित्तणं ९ इति शब्दरत्नावली ॥ पौनःपुणिकः त्रि पुनःपुनर्भवः इति मुग्धबोधव्याकरणम् ॥
पौनर्भवः पुं द्वादशविधपुत्रान्तर्गतपुत्रविशेषः इति जटाधरः अस्य लक्षणं पुत्रशब्दे द्रष्टव्यम् पौरं क्ली रोहिषतृणं रामकर्पूर।

इति व्याख्यातम् इत्यमरः पुरोद्भूते त्रि इति मेदिनी ॥ पौरकः पुं गृहवाह्योपवनम् यथा ॥ निष्कुटस्तु गृहारामो वाट्यारामस्तु पौरकः इति हेमचन्द्रः
पौरवः पुं पुरुवंश्यः यथा दुःशीलास्तनया भोज्या अनोस्तु म्लेच्छजातयः पुरोस्तु पौरवो वंशो यत्र जातोसि पार्थिव इति मात्स्ये ३४ अध्यायः ॥
पौरस्त्यः त्रि प्रथमः इत्यमरः
पौराणिकः पुं पुराणवेत्ता आख्यानाख्यायिकेतिहास पुराणेभ्यश्चेति ठक्त्रोदाहरणेषु पुराणमधीते वेद वेत्ति विग्रहे अण् इति सिद्धान्तकौमुदी ॥ पौरुषम् क्ली पुरुषस्य भावः पुरुषस्य कर्म्म पुरुषस्य तेजः इति मेदिनी ॥ क्लीबा हि दैव मेवैकम् प्रशंसन्ति न पौरुषं दैवं पुरुषकारेण घ्नन्ति सत्त्वाः महोद्यमाः इत्यपि. उद्योगिनाम् पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति दैवं निहत्य कुरु पौरुष मात्मशक्त्या यत्ने कृते यदि न सिध्यति कोत्र दोषः इति हितोपदेशः ॥

पौरुषं त्रि ऊर्द्ध्वविस्तृतदोःपाणिन्मानं पुरुषपरिमाणं इत्यमरः पौरुषेयः पुं समूहः वधः पुरुषस्य पदान्तरं इति मेदिनी पौरुषेयः त्रि पुरुषकृतः पुरुषविकारः इति मेदिनी ॥
पौरोगवः पुं स्त्री पाकशालाध्यक्षः इत्यमरः ॥ पौरोडाशः पुं पुरोडाशसहचरितमन्त्रः पौरोडाशा पुरोडाशात् छन् पुरोडाशसहचरितमन्त्रः पुरोडाशाः स एव पौरोडाशः ततः ष्ठन् इति सिद्धान्तकौमुदी ॥
पौरोडाशिकः पुं पुरोडाशस्य पौरोडाशस्य वा व्याख्यानः इति विग्रहे प्रस्तादिभ्यश्चेति स्वार्थे अण् इति सिद्धान्तकौमुदी ॥
पौर्णमासः पुं यागविशेषः इत्यमरः तथाहि अमावास्यायां अमावास्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत इति श्रुतिविहितदर्शपौर्णमासयागयोः कर्म्मसमुपन्नापकयो रुत्पत्तिश्रुतीः ॥ समाम्नेति यथा आग्नेयाष्टाकपालो ऽमावास्यायां पौर्णमास्यां चाच्युतो भवति उपांशुयाजमन्तरा यजति ताभ्यामेवाग्नीषोमीयमेकादशकपालं पौर्णमास्यामेव प्रायच्छत् ऐन्द्रं दधि अमावास्यायां ऐन्द्रं पयो अमावास्यायामिति ताभ्यां आग्नेयाष्टाकपालोपांशुयाजाभ्यां तेन आग्नेयाष्टाकपालोपांशुयाजाग्नीषोमीयैकादशकपालास्त्रयः पौर्णमास्यां आग्नेयाष्टाकपालेन्द्रदधियागेन्द्रपयोयागास्त्रयो ऽमावास्यायामित्यर्थः अत्र श्रुतिषु अमावास्यापौर्णमासीपदानि प्रतिमत् सहित तद्रूपय। पदानि तत्रपूर्वयोर्यागारम्भः प्रतिपदोर्यागः तथा च देहवै पौर्णमासेनाहे अमावासेनतस्मात् प्रतिपद्युपवसन् यजेतापरेद्युरिति श्रुतिः अस्यार्थः यावत्तिथिकयोर्दर्शपौर्णमासयोः प्रकृतिभूतयोर्विकृतिभूतो दर्शपौर्णमासौ कोशपायिना यमनीयौ पत्रादौ कर्त्तव्यौ इति मलमासतत्त्वम् पौर्णमासी स्त्री पूर्णिमा इत्यमरः पौर्वाह्णिकः त्रि पूर्वाह्णभवः पूर्वाह्णसम्बन्धी विभाषा पूर्वाह्णापराह्णाभ्यामिति सूत्रोदाहरणेषु ॥ पूर्वाह्णे भवतीति विग्रहे अण् ॥ इति सिद्धान्तकौमुदी ॥



पौलस्त्यः पुं कुवेरः इत्यमरः । रावणः इति मेदिनी विभीषणः इति शब्दरत्नावली ॥ पौलस्ती स्त्री सूर्पनखा पुलस्त्यस्य स्त्र्यपत्ये इति व्याकरणं ॥ पौलिः पुम् पाकावस्थागतकलायादिः अर्द्धपाकयवसर्षपादिः वह्निना ईषद्दग्धचुडुचुडुशब्दवान् इति केचित् दरदग्धः इति श्रीधरः इति भरतः तत्पर्य्यायः आपक्वः २ अभ्यूषः ३ इत्यमरः अभ्युषः ४ अभ्योषः ५ इति भरतः ॥ पौलोमी स्त्री ॥ शची इति हेमचन्द्रः ॥ पौषः पुं वैशाखादिद्वादशमासान्तर्गतनवममासः पुष्यनक्षत्रयुक्तापौर्णमासी यत्र मासे सः तत्पर्य्यायः तैषः २ सहस्यः ३ इत्यमरः पौषिकः ४ हैमनः ५ इति राजनिर्घण्टः तिष्यः ६ तिष्यकः ७ इति शब्दरत्नावली । अथ धनुःस्थरविमारभ्य शुक्लप्रतिपदादिदर्शान्त रूपो मासो चान्द्रः कृष्णप्रतिपदादि पौर्णमास्यन्तरूपो गौणचान्द्रः धनूराशिस्थ रविकः सौरः इति स्मृतिः ॥ तत्रमा तफलम् निगदमन्त्रः सह ॥

रोगग्रस्तः परोपकारी पितृवित्तहीनः कष्टान्वितार्थश्च कृशचित्तः पौषप्रसूतः पुरुषः सुधीरः इति कोष्ठीप्रदीपः ॥ पौषी स्त्री पुष्यनक्षत्रयुक्तापौर्णमासी इत्यमरः पुष्येण युक्ता रात्रिः इति मुग्धबोधव्याकरणम् ॥ पौष्करं क्ली पुष्करमूलं इति राजनिर्घण्टः ॥ पौष्करमूलं क्ली पुष्करमूलं यथा मूले पुष्कर काश्मीर पद्मपत्राणि पौष्करे इत्यमरः त्रीणि पुष्करमूले पुष्करे सगन्धिद्रव्य वाणि कख्याते नसदृदे पौष्करं मः पौष्करे मूले पुष्करादीत्यन्वयः इति भरतः ॥ पौष्करिणी स्त्री पुष्करिणी इति शब्दरत्नावली पौष्टिकं क्ली तौर समये गात्राच्छादनवस्त्रविशेषः कावार इति भाषा अस्य गुणाः धनविक्रांत आयुष्यत्वं शुचित्वं रूपविराजनत्वं च इति राजवल्लभः ॥ धर्म्मं धनविक्रम वयस्मिति वा पाठः पुष्टिर्धनजनादीनां वृद्धिरभिधीयते तद्धेतुभूतं कर्म्म इति दुर्गभञ्जः ॥

हारादिभावः ॥

पौष्णं त्रि पुष्णनिर्म्मितं पुष्णसेवि यथा आसनं प्रथमं दद्यात् । पौष्णं दारुजमेव वा वासे वावार्स्मणे कौशे मण्डलस्योत्तरेऽस्तुतेत् इति कालिकापुराणे ६० अध्यायः पौष्णकं क्ली कुसुमाञ्जने इत्यमरः पौष्णी स्त्री देशविशेषः यथा अथ पुष्णपुरं पौष्णी तथा पाटलिपुत्रके इति शब्दरत्नावली ॥ पौष्यः पुं नृपपुत्रः स च करवीरपुरस्य राजा तस्य पुत्रः शिरोभ्राजश्चन्द्रशेखरः यथा तस्मः पुत्रोऽभवत् पौष्यः सर्वशास्त्रार्थपारगः स पुत्रहीनो राजभूत् पौष्यान्वयति सत्तमः ततः पुत्रार्थिने भूपे प्रसन्नो वृषभध्वजः व्रलदत्तफलेऽहल्ले कृत्वेदं तमुवाच ह इदं फलं व्रलदत्तं विभज्याम्पते त्रिधा भोजयेल्लाः स्त्रियो यास्ते महिष्यः शुभमानसः ततः फलेऽस्मिन्देवः महिवेशावृषध्वजः तत्रत्तणात्तत ॥ फलं भक्तं त्रिभागम् स्वयमेव हि ततः स्मुचिते काले पाकेताभिस्तिभक्तिता तत्फलेन्यथाऽहेल गर्भाश्चापाहिताः शुभाः संहर्षा । गर्भकालेन गर्भेभ्यः समजायत खण्डत्रयम् पृथक् ॥

राजा यथा भर्गेण भाषिते तच्च खण्डत्रये पौष्यो यथास्थाने नियोज्य च एकंपिण्डं चकाराशु तत्र पुत्रोऽभ्यजायत तस्य नामाकरोद्राजा बालैः शेखरो हि नः चन्द्रशेखर इत्येवं कान्त्याचन्द्रमसः समः व्रलावर्णोऽद्य यैरम्य करवीराह्वये पुरे दृषद्वती नदीतीरे राजाभूत्वा मुमोद ह इति कालिकापुराणे ४९ अध्यायात् संकलितः ॥ प्याट् अ हे भोः इत्यमरः प्याय ओ ई ङ वृद्धौ इति कविकल्पद्रुमः ॥ प्युष इ र य भागे दाहे इति कविकल्पद्रुमः ॥ प्युष क उत् सृजि इति कविकल्पद्रुमः ॥ प्युस इ र य विभागे इति कविकल्पद्रुमः ॥ प्यै ङ वृद्धौ इति कविकल्पद्रुमः प्र अ विशाम्युपसर्गान्तर्गतप्रथमोपसर्गः अस्यार्थाः गतिः आरम्भः उत्कर्षः सर्वतोभावः प्राथम्य ख्यातिः उत्पत्तिः व्यवहारः इति दुर्गादास कृत ॥

पुरुषोत्तमः ॥ ॥

प्रकटम् त्रि स्पष्टम् अस्य पर्य्यायाः प्रकाश शब्दे द्रष्टव्याः ॥ ॥ प्रकटा प्रकटाचेति लीला ॥

सेयं ह्रियोच्यते इतिभागवतम्।
मतम् प्रकटितम् त्रि प्रकाशि
ते इतिहेमचन्द्रः ॥
प्रकम्पनः पुं वायुः इतिहेमचं
द्रः ॥ प्रकंपनः पुम् ॥
वायुः इतिहेमचन्द्रः ॥ नरकवि
शेषः इतिशब्दरत्नावली ॥
कम्पातिशये क्ली प्रकरम् ।
क्ली अगुरु इतिमेदिनी ॥
प्रकरः पुं समूहः विकीर्णकु।
सुमादिः इतिमेदिनी ॥
प्रकरणम् क्ली प्रस्तावः अभिने
यप्रकारः रूपकभेदः इतिहेम।
चन्द्रः ग्रन्थसन्धिः इतित्रिकाण्ड
शेषः पादः सत्र एकार्थावच्
छिन्न सूत्रसमूहः इतिमुग्धटी
कायां दुर्गादासः ॥ प्रकरी
स्त्री नाट्यांगम् चत्वरभूमिः इ।
तिशब्दरत्नावली ॥ प्रकर्षः
पुं उत्कर्षः यथा गुणप्रकर्षे।
ण जनोऽनुरज्यते जनानुरागप्र
भवा हि सम्पदः इतिकाव्य।
प्रकाशः ॥ प्रकांडः पुं क्ली
मूलादारभ्यशाखावधि वृक्ष।
भागः गुंडी इतिभाषा तत्प॥
र्यायः स्कन्धः २ इत्यमरः ॥
कांडम् २ इतिशब्दरत्नावली

दण्डः ४ इतिराजनिर्घण्टः वि
टपः शस्तः इतिमेदिनी ॥
प्रकाण्डरः पुम् वृक्षः इतिश।
ब्दचन्द्रिका ॥ प्रकामम्
त्रि यथेष्टप्सितम् इत्यमरः प्रका
रः पुम् भेदः सादृश्यं इत्यमरः
प्रकारी स्त्री कोपः इतिहेमचंद्रः
प्रकाशः पुं घोतः तत्पर्यायः
द्योतः २ आतपः ३ इत्यमरः ॥
राजनिर्घण्टोक्त पर्यायाः प्रभा
शब्दे द्रष्टव्याः प्रदीप्तः तत्पर्या
यः स्फुटम् २ स्पष्टं ३ प्रकटं ४
उल्बणं ५ व्यक्तं ६ इतिहेमचंद्रः ॥
प्रव्यक्तं ७ उद्भिन्नम् ८ इतिजटाध
रः प्रहासः इतिमेदिनी ॥ अ
तिप्रसिद्धः इतिशब्दरत्नावली ॥
प्रकाशकः त्रि प्रकाशकर्ता प्र।
काशयतीत्यर्थे णकप्रत्ययः ॥
प्रकाशकज्ञाता[२] पुं कुक्कुटः
इतिशब्दचन्द्रिका । प्रकाश।
कज्ञातरि त्रि प्रकाशात्मा न पुं
सूर्यः इतिशब्दचन्द्रिका । व्य।
क्तस्वभावे त्रि प्रकाशितम् त्रि।
प्रकाशविशिष्टं तत्पर्यायः ।
दर्शितं २ आविष्कृतम् ३ प्रकटि
तम् ४ इतिहेमचन्द्रः ॥ प्रकी
र्णं क्ली ग्रन्थविच्छेदः इतिजटाधरः

चामरम् इतित्रिकाण्डशेषः ॥
प्रकीर्णः पुं पूतिकरंजः इतिरा
जनिर्घण्टः ॥ प्रकीर्णः त्रि
विक्षिप्तः विस्तृतः यथा प्रकी।
र्णाभरणां मनवेश्यकारिणीम्
सदैवभर्त्तुः प्रतिकूलवादिनीम्
परस्यवेश्माभिरतां मलज्जा मेवं
विधां स्त्रीं परिवर्जयामि इति।
लक्ष्मीचरित्रम् नानाप्रकारमि।
श्रितः यथा प्रकीर्णः पुष्पाणां
हरि चरणयोरंजलि रयं इति।
वेणीसंहारः ॥ प्रकीर्णके
क्ली चामरम् इत्यमरः ॥
विस्तारः इतिमेदिनी ग्रन्थ।
विच्छेदः इतिहेमचन्द्रः पा
पविशेषः तथा विष्णुः यदनु।
क्तं तत्प्रकीर्णकम् प्रकीर्णपा
तके ज्ञात्वा गुरुत्वमथलाघवम्
प्रायश्चित्तं बुधः कुर्यात् ब्राह्म॥
णानुमतेसदा अनुक्ते अनुक्तनि
ष्कृतिकं पापम् अतिपातकाद्य।
मतमत्वेन विशेषतोऽनुक्तकम्
इतिप्रायश्चित्तविवेकः ॥
प्रकीर्णकः पुं तुरंगमः इतिमे
दिनी प्रकीर्त्तितं त्रि कथितं यथा
प्रभूतमत्स्यकार्य्यंवा योनरःकर्त्तु
मिच्छति सर्वारम्भेनतत्कुर्य्यात् सिं

द्धादेकं प्रकीर्त्तितं इतिचाणक्य
संग्रहः ॥ प्रकीर्य्यः पुं
करंजभेदः नाटाकरंज इति।
भाषा इत्यमरः पूतकरंजः
रीठाकरंजः इतिराजनिर्घण्टः
प्रकुंचं क्ली प्रशस्तवपुः इतित्रि
कांडशेषः ॥ प्रकृतः त्रि
प्रकरणप्राप्तः यथा प्रकृतम।
नुसरामः प्रकर्षेणकृतः आर
ब्धः प्रपूर्वकृधातोः कर्म
णि कर्त्तरि च क्तप्रत्ययः ॥
प्रकृतिः स्त्री स्वभावः योनिः
लिंगम् स्वामी अमात्यः सुहृत्
कोषः राष्ट्रम् दुर्गम् बलम् ।
पौराणांश्रेणयः इत्यमरः शि
ल्पी इतिहेमचन्द्रः ॥
शक्तिः योषित् इतिशब्दरत्नाव।
ली परमात्मा इतिधरणिः ॥
पंचभूतानि करणे गुह्यम् नेतः
एकविंशाप्तत्तरपादच्छन्दोवि
शेषः माता इतिनानार्थरत्न।
माला प्रत्ययात् प्रथमः सचद्वि
धा धातुर्नाम च इत्यजयपालः
सत्त्वरजस्तमसां साम्यावस्था ॥
यथा सत्त्वं रजस्तमश्चैव गुणा।
त्रयमुदाहृतम् साम्यावस्थिति।

रेतेषां प्रकृतिः परिकीर्त्तिता। केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः। एतदेव प्रजासृष्टिं। करोति विकरोति च॥ इति मात्स्ये॥ अस्याः पर्य्यायः। प्रधानं १ इत्यमरः २ माया ३ शक्तिः ४ चैतन्यं ५ इति राजनिर्घण्टः॥ तस्या नामान्तराणि यथा तमोऽव्यक्तं शिवो धाम रजोयोनिः सनातनः प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ अनुद्रिक्तमनूनं वा ह्यकम्पमचलं ध्रुवं सदसच्चैव तत्सर्वं अव्यक्तं त्रिगुणं स्मृतं ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः अव्यक्तनामानि गुणांश्च तत्त्वतो यो वेद सर्वाणि गतीश्च केवलाः विमुक्तदेहः प्रविभागतत्त्ववित् स मुच्यते सर्वगुणै र्निरामयः इति महाभारते आश्वमेधिकपर्व॥ सा पंचविधा गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती सावित्री च सृष्टिविधौ प्रकृतिः पंचमी स्मृता तस्या उत्पत्तिर्यथा प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता गुणे प्रकृष्टसत्त्वे च प्रशब्दो वर्त्तते श्रुतौ प्रथमे रजसि कृश्च तिशब्दस्तमसः स्मृतः त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता॥ तस्या उत्पत्तिः स्वरूपञ्च यथा योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः पुमांश्च दक्षिणार्द्धाङ्गो वामाङ्गः प्रकृतिः स्मृता सा च ब्रह्मस्वरूपा च या सा नित्या सनातनी यथात्मा च यथा शक्तिर्यथाग्नौ दाहिका स्मृता अत एव हि योगीन्द्रैः स्त्री पुंभेदं न मन्यते सर्वं ब्रह्ममयं ब्रह्मन् शश्वत् पश्यति नारद स्वेच्छामयः स्वेच्छया च॥ श्रीकृष्णस्य सिसृक्षया आविर्बभूव सहसा मूलप्रकृतिरीश्वरी तदाज्ञया पंचविधा सृष्टिकर्म्मविभेद दुर्गा प्रकृतिर्यथा अथ भक्तानुरोधाद्वा भक्तानुग्रहविग्रहा गणेशमाता दुर्गा या शिवरूपा शिवप्रिया नारायणी विष्णुमाया पूर्णब्रह्मस्वरूपिणी ब्रह्मादिदेवैर्मुनिभिर्मनुभिः पूजिता स्तुता सर्वाधिष्ठातृदेवी सा सर्वरूपा सनातनी

धर्म्मसत्यपुण्यकीर्त्ति यशोमंगलदायिनी सुखमोक्षहर्षदात्री शोकार्त्तिदुःखनाशिनी शरणागतदीनार्त्त परित्राणपरायणा। तेजःस्वरूपा परमा तदधिष्ठातृदेवता सर्व्वशक्तिस्वरूपा च शक्तिरीशस्य सततं सिद्धेश्वरी सिद्धरूपा सिद्धिदा सिद्धिरीश्वरी बुद्धिर्निद्रा क्षुत्पिपासा छाया तन्द्रा दया स्मृतिः जातिः क्षान्तिश्च शान्तिश्च कान्तिर्भ्रान्तिश्च चेतना तुष्टिः पुष्टिस्तथा लक्ष्मी धृतिर्माया तथैव च सर्व्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनः उक्तः श्रुतौ श्रुतिगुणश्चातिस्वल्पो यथागमं गुणोऽस्त्यनन्तोऽनन्ताया अपरांच निशामय। लक्ष्मीप्रकृतिर्यथा शुद्धसत्त्वस्वरूपा या पद्मा च परमात्मनः सर्व्वसंपत्स्वरूपा सा तदधिष्ठातृदेवता कान्ता दान्ता च शान्ता च सुशीला सर्व्वमंगला लोभमोहकामरोषाहंकारपरिवर्ज्जिता भक्तानुरक्ता पत्युश्च सर्व्वाभ्यश्च पतिव्रता प्राणतुल्या भगवतः प्रेमपात्री प्रियंवदा। सर्व्वशस्यात्मिका सर्व्वजीवनोपायरूपिणी महालक्ष्मीश्च वैकुण्ठे पाताले वरदा सती स्वर्गे च स्वर्गलक्ष्मीश्च मर्त्त्यानां गृहिणां तथा सर्व्वप्राणिषु द्रव्येषु॥ शोभारूपा मनोहरा प्रीतिरूपा पुण्यवतां प्रभारूपा नृपेषु च वाणिज्यरूपा वणिजां पापिनां कलहाङ्कुरा दयामयी भक्तिमता भक्तानुग्रहकातरा चपले चपला भक्तसम्पदे रक्षणाय च जगज्जीवन्मृतं सर्व्वं यया देव्या विना मुने शक्तिर्द्वितीया कथिता वेदोक्ता सर्व्वसम्मता सर्व्वपूज्या सर्व्ववन्द्या चान्यां मत्तो निशाम २ सरस्वती प्रकृतिर्यथा वागबुद्धि विद्याज्ञानाधिदेवता परमात्मनः सर्व्वविद्यासर्व्वरूपा सा च देवी सरस्वती सुबुद्धिकविता मेधा प्रतिभा स्मृतिदा सतां नानाप्रकारसिद्धान्तभेदार्थकल्पनाप्रदा व्याख्याबोधस्वरूपा च सर्व्वसन्देहभंजिनी विचारकारिणी ग्रन्थकारिणी शक्तिरूपिणी स्वरसंगीतसन्धानतालकारणरूपिणी विषयज्ञानवाग्रूपा प्रतिविश्वेषु जीविनां व्याख्यामुद्राकरा शान्ता वीणापुस्तकधारिणी शुद्धसत्त्वस्वरूपा च सुशीला श्रीहरिप्रिया हिमचन्दनकुन्देन्दुकुमुदाम्भोजसन्निभा जपन्ती परमात्मानं श्रीकृष्णं रत्नमालया तपःस्वरूपा तपसां फलदात्री तपस्विनी सिद्धिविद्यास्वरूपा च सर्व्वसिद्धि।

प्रदा सदा यया विना च विप्रौघो मू-
कोऽमृतसमः सदा देवी तृतीया ग-
दिता श्रुत्युक्ता जगदम्बिका यथा-
गमं यथा किञ्चिदपरां संनिबोध मे
३ सावित्री प्रकृतिर्यथा माता चतु-
र्णां वेदानां वेदाङ्गानाञ्च छन्दसां स-
न्ध्यावन्दनमन्त्राणां तन्त्राणाञ्च वि-
चक्षणा द्विजातिजातिरूपा च जप-
रूपा तपस्विनी ब्रह्मण्यतेजोरूपा
च सर्वसंस्कारकारिणी पवित्र-
रूपा सावित्री गायत्री ब्रह्मणः प्रिया
तीर्थानि यस्याः संस्पर्शं दर्शं वाञ्छ-
न्ति शुद्धये शुद्धस्फटिकसंकाशा ।
शुद्धसत्त्वस्वरूपिणी परमानन्दरू-
पा च परमा च सनातनी परब्रह्म
स्वरूपा च निर्वाणपददायिनी ब्र-
ह्मतेजोमयी शक्तिस्तदधिष्ठातृदे-
वता यत्पादरजसा पूतं जगत् सर्वं
च नारद देवी चतुर्थी कथिता पञ्च-
मीं वर्णयामि ते ४ राधा प्रकृतिर्यथा
या प्रेमप्राणाधिका देवी या पञ्च
प्राणरूपिणी प्राणाधिकप्रियतमा
सर्वाभ्यः सुन्दरी परा सर्वसौभाग्य-
युक्ता च मानिनी गौरवान्विता ।
वामाङ्गार्द्धस्वरूपा च गुणेन तेज-
सा समा परावरा सारभूता प-
रमाद्या सनातनी रामलक्ष्मण
जानकी सीतापतिरामनामकी २

परमानन्दरूपा च धन्या मान्या च पू-
जिता रासक्रीडाधिदेवी च कृष्णस्य
परमात्मनः रासमण्डलसम्भूता रा-
समण्डलमण्डिता रासेश्वरी सुरसि-
का रासावासनिवासिनी गोलोक-
वासिनी देवी गोपीवेशविधायिका
परमाह्लादरूपा च सन्तोषहर्षरू-
पिणी निर्गुणा च निराकारा निर्लि-
प्तात्मस्वरूपिणी निरीहा निरहं॥
भक्तानुग्रहविग्रहा वेदानुसार-
ध्यानेन विज्ञाता सा विचक्षणैः
दृष्टिदृष्टा न सा देवैः सुरेन्द्रैर्मुनिपु-
ङ्गवैः वह्निशुद्धांशुकाधाना रत्ना-
लंकारभूषिता कोटिचन्द्रप्रभाजु-
ष्टपुष्टश्रीयुक्तविग्रहा श्रीकृष्ण-
भक्तिदास्यैकदात्री च सर्वसम्पदां ।
अवतारे च वाराहे वृषभानुसुता च
या यत्पादपद्मसंस्पर्शपवित्रा च
वसुन्धरा ब्रह्मादिभिरदृष्टा या स-
र्वैर्दृष्टा च भारते स्त्रीरत्नसारसम्भू-
ता कृष्णवक्षःस्थलोज्ज्वला यथा
घने नवघने लोला सौदामिनी मु-
ने षष्टिवर्षसहस्राणि प्रतप्तम्
ब्रह्मणा पुरा यत्पादपद्मनख-
दृष्टये चात्मशुद्धये न च दृष्टा-
पि स्वप्नेऽपि प्रत्यक्षस्यापि का कथा।
या तेनैव तपसा दृष्टा भुवि वृन्-
दावने वने कथिता पञ्चमी देवी
नारायणि नमोऽस्तु ते ॥

सा राधा परिकीर्तिता अंशरूपा
कलारूपा कलांशांशसमुद्भवा प्र-
कृतेः प्रतिविश्वेषु देव्यश्च सर्व-
योषितः परिपूर्णतमाः पञ्च वि-
धा देव्यः प्रकीर्तिता या याः प्रधा-
नांशरूपा वर्णयामि निशामय
५ गङ्गा यथा प्रधानांशस्वरूपा
या गङ्गा भुवनपावनी विष्णुवि-
ग्रहसम्भूता द्रवरूपा सनातनी ।
पापिपापेध्मदाहाय ज्वलदिन्-
धनरूपिणी सुखस्पर्शा स्नानपा-
ने निर्वाणपददायिनी गोलो-
कस्थानप्रस्थानसुखसोपानरू-
पिणी पवित्ररूपा तीर्थानां स-
रिताञ्च परा वरा शम्भुमौलिजटा-
मेरुमुक्तापङ्क्तिस्वरूपिणी तपः-
सम्पादिनी सद्यो भारते च तपस्वि-
नां चन्द्रपद्मक्षीरनिभा शुद्धसत्त्व-
स्वरूपिणी निर्मला निरहङ्का-
रा साध्वी नारायणप्रिया १ तुल-
सी यथा प्रधानांशस्वरूपा च तु-
लसी विष्णुकामिनी विष्णुभूष-
णरूपा च विष्णुपादस्थिता सती ।
तपःसंकल्पपूजादि सद्यःसम्पादि-
नी मुने सारभूता च पुष्पाणां प-
वित्रा पुण्यदा सदा दर्शनस्पर्श-
नाभ्यां च सद्यो निर्वाणदायिनी ।
कलौ कलुषशुष्केध्मदाहायाग्नि-
स्वरूपिणी यत्पादपद्मसंस्पर्शात् सद्यः

पूता वसुन्धरा यत्स्पर्शं दर्शं वाञ्छ-
न्ति तीर्थानि चात्मशुद्धये यया विना
च विश्वेषु सर्वकर्माति निष्फलम्
मोक्षदा या मुमुक्षूणां कामिनां स-
र्वकामदा कल्पवृक्षस्वरूपा च भार-
ते वृक्षरूपिणी त्राणाय भारतानां च
प्रजानां परदेवता २ मनसा यथा
प्रधानांशस्वरूपा या मनसा कश्य-
पात्मजा शङ्करप्रियशिष्या च महा-
ज्ञानविशारदा नागेश्वरस्यानन्त-
स्य भगिनी नागपूजिता नागेश्वरी
नागमाता सुन्दरी नागवाहिनी ना-
गेन्द्रगणयुक्ता सा नागभूषणभू-
षिता नागेन्द्रैर्वन्दिता सिद्धयोगि-
नी नागशायिनी विष्णुरूपा विष्णुभ-
क्ता विष्णुपूजापरायणा तपःस्वरू-
पा तपसां फलदात्री तपस्विनी ।
दिव्यं त्रिलक्षवर्षं च तपस्तप्तं यया
हरेः तपस्विनीषु पूज्या च तपस्वि-
नां च भारते सर्वमन्त्राधिदेवी च ज्व-
लन्ती ब्रह्मतेजसा ब्रह्मस्वरूपा पर-
मा ब्रह्मभावेन तत्परा जरत्का-
रुमुनेः पत्नी कृष्णांशस्य पतिव्रता
आस्तीकस्य मुनेर्माता प्रवरस्य तप-
स्विनां ३ षष्ठी यथा प्रधानांशस्व-
रूपा या देवसेना च नारद मातृ-
कासु पूज्यतमा च षष्ठी प्रकीर्तिता



शिशूनां प्रतिविश्वेषु प्रतिपालन
कारिणी तपस्विनी विष्णुभक्ता ।
कार्त्तिकेयस्य कामिनी षष्ठांशारू
पा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता ७
पुत्रपौत्रप्रदात्री च धात्री त्रिजगतां स
ती सुन्दरी युवती रम्या सततं भर्त्तुर
न्तिके स्थाने शिशूनां परमा वृद्धरू
पा च योगिनी पूजा द्वादशमासेषु
यस्या विश्वेषु सन्ततम् पूजा च सू
तिकागारे परा षष्ठदिने शिशोः
एकविंशतिमे चैव पूजा कल्या
णहेतुकी शश्वन्नियमिता चैषा
नित्या काम्याऽऽकृतिः परा मातृरूपा
दयारूपा शश्वद्रक्षणरूपिणी
जले स्थले चान्तरीक्षे शिशूनां स्व
प्नगोचरे ४ मङ्गलचण्डी यथा प्र
धानांशस्वरूपा च देवी मङ्गलच
ण्डिका प्रकृतेर्मुखसंभूता सर्वम
ङ्गलदा सदा सृष्टौ मङ्गलरूपा च सं
हारे कोपरूपिणी तेन मङ्गलचण्डी
सा पण्डितैः परिकीर्त्तिता प्रतिमङ्ग
लवारेषु प्रतिविश्वेषु वन्दिता पञ्चो
पचारैर्योषिद्भिर्भक्त्या च परिपूजिता
पुत्रपौत्रधनैश्वर्य्य यशोमङ्गलदायि
नी शोकसंतापपापार्त्ति दुःखदा।
रिद्रनाशिनी परितुष्टा सर्ववाञ्छा
प्रदात्री सर्वयोषितां रुष्टा क्षणेन ।

संहर्त्तुं शक्ता विश्वं महेश्वरी ५ ॥
काली यथा प्रधानांशा स्वरूपा ।
च काली कमललोचना दुर्गाल
लाटसम्भूता रणे शुम्भनिशुम्भयोः
दुर्गार्द्धांशस्वरूपा सा गुणेन तेज
सा समा कोटिसूर्य्यप्रभाजुष्ट पु
ष्टा ज्वल्यविग्रहा प्रधाना सर्व
शक्तीनां वरा बलवती परा सर्व
सिद्धिप्रदा देवी परमा सिद्धयो ।
गिनी कृष्णभक्ता कृष्णतुल्या ते
जसा विक्रमैर्गुणैः कृष्णभावन
या शश्वत् कृष्णवर्णा सनातनी
संहर्त्तुं सर्वब्रह्माण्डं शक्ता निश्वास
मात्रतः रणं दैत्यैः समं तस्याः
क्रीड़या लोकरक्षया धर्मार्थका
ममोक्षांश्च दातुं शक्ता च पूजिता
ब्रह्मादिभिः स्तूयमाना मुनिभि
र्मनुभिर्नरैः ६ वसुन्धरा प्रकृति
यथा प्रधानांशस्वरूपा च प्रकृते
श्च वसुन्धरा आधाररूपा सर्वेषां
सर्वशस्यप्रसूतिका रत्नाकरा र
त्नगर्भा सर्वरत्नाकरालया प्रजा
भिश्च प्रजेशैश्च पूजिता वन्दिता स
दा सर्वोपजीव्यरूपा च सर्वसम्प
द्विधायिनी यया विना जगत्
सर्वं निराधारं चराचरम् ७ प्रकृ
तेश्च कला याश्च ता निबोध मुनी
श्वर यस्य यस्य च या पत्न्यस्ताः

सर्वा वर्णयामि ते स्वाहा देवी वह्नि
पत्नी त्रिषु लोकेषु पूजिता यया ।
विना हविर्दाने न शक्तीते सुराः स्व
माः १ दक्षिणा यज्ञपत्नी च दीक्षा
सर्वत्र पूजिता यया विना च विश्वे
षु सर्वकर्म च निष्फलं २ स्वधा
पितृणां पत्नी च मुनिभिर्मनुभि
र्नरैः पूजिता पितृदाने च निष्फ
लं च यया विना ३ स्वस्तिदेवी वा
युपत्नी प्रतिविश्वेषु पूजिता आ ।
दाने च प्रदाने च निष्फलं च यया वि
ना ४ पुष्टिर्गणपतेः पत्नी प्रतिवि
श्वेषु पूजिता यया विना परिक्षी ।
णाः पुमांसो योषितो भवेत् ५
अनन्तपत्नी तुष्टिश्च पूजिता वन्
दिता भवे यया विना न संतुष्टाः
सर्वे लोकाश्च सन्ततम् ६ ईशान
सम्पत्तिः पूजिता च सुरैर्नरैः स
र्वे लोका दरिद्राश्च विश्वेषु च यया
विना ७ धृतिः कपिलपत्नी च स
र्वैः सर्वत्र पूजिता सर्वे लोकाश्च
धैर्य्याः स्युर्जगत्सु च यया विना ८
यमपत्नी तमासाध्वी सुशीला
सर्वपूजिता समुन्मत्ताश्च दुष्टा
श्च सर्वे लोका यया विना ९ क्री
डाधिष्ठातृदेवी च कामपत्नी र
तिः सती केलिकौतुकहीनाश्च

सर्वे लोका यया विना १० सत्यपत्नी
सती भक्तिः पूजिता जगतां प्रिया
यया विना भवेल्लोका बन्धुता रहि
ताः सदा ११ मोहपत्नी दया साध्वी ।
पूजिता च जगत्प्रिया सर्वे लोका ।
श्च सर्वत्र निष्फलाश्च यया विना १२
पुण्यपत्नी प्रतिष्ठा सा पुण्यरूपा
च पूजिता यया विना जगत् स ।
र्वं जीवन्मृतं परं मुने १३ सुकर्म
पत्नी कीर्त्तिश्च धन्या मान्या च पू ।
जिता यया विना जगत् सर्वं य ।
शोहीनं मृतं यथा १४ क्रियोद्यो
गपत्नी च पूजिता सर्वसम्मता
यया विना जगत् सर्वं मुच्छन्नमि
व नारद १५ अधर्मपत्नी मिथ्या
सा सर्वधूर्त्तैश्च पूजिता यया वि
ना जगत् तुच्छं मुच्छन्नं विधिनिर्म्मि
तं सत्ये चादर्शना या च त्रेतायां ।
सूक्ष्मरूपिणी अर्द्धावयवरूपा च
द्वापरे संवृता प्रिया कलौ महाप्र
गल्भा च सर्वत्र व्यापिका बलात् क
पटेन समं भ्राता भ्रमत्येव गृहे गृहे
१६ शान्ति १७ लज्जा १८ च भार्य्ये
द्वे सुशीलस्य च पूजिता ॥ या
भ्यां विना जगत् सर्वं मुन्मत्तमि
व नारद ज्ञानस्य भार्य्यास्तिस्र ।
श्च बुद्धि १९ मेधा २० स्मृति २१

स्तथा। याभिर्विनाजगत् सर्वं मृतंमृतसमंतदा मूर्त्तिश्च य॥ स्यपत्नीसा कान्तिरूपामनोहरा। रा परमासाचविश्वेशा निरा। धाराययाविना सर्वं शोभाहू यासा लक्ष्मीर्मूर्तिमतीसती श्री रूपामूर्त्तिरूपाच मान्याधन्याच पूजिता २२ कालाग्निरुद्रपत्नी च निद्रासासिद्धयोगिनी सर्वे लोकाःसमाच्छन्ना मायायोगे नरात्रिषु २३ कालस्यतिस्रोभा र्यास्य सन्ध्या २४ रात्रि २५ दिना नि च २६ याभिर्विनाविधाताच संख्यां कर्त्तुंन शक्यते क्षुत् २७ पिपासे २८ मनोभार्य्ये धन्ये मान्ये सुपूजिते २ याभ्यांव्याप्तं जगत्सर्वं प्रकृतिं निंत्यमेवच प्रभाच २९ दाहिका ३० चैव द्वेभा र्य्येतेजसस्तथा याभ्यांविनाज गत्स्रष्टुं विधाता पि महीश्वरः कालकन्येमृत्यु ३१ जरे ३२ प्रज्व रस्यप्रियाप्रिये याभ्यांजगत् समच्छन्नं विधात्रानिर्मितेवै धौ निद्राकन्याचतन्द्रा ३३ सा प्रीति ३४ रन्यासुखप्रिये याभ्यां व्याप्तंजगत् सर्वं विधिपुत्रविधे र्विधौ वैराग्यस्य हिना येच श्रद्धा ३५ भक्ती ३६ च पूजितेयाभ्यां शश्च ॥

जगत् सर्वं जीवन्मुक्तमिदं सुने अदिति ३७ र्देवमाताच सुरभी च गवां प्रसूः दितिश्च ३९ दैत्य जननी कद्रूश्च ४० विनता ४१ द नुः ४२ उपयुक्ताः सृष्टिविधौ पा ताश्चप्रकृतेःकलाः। कलाश्चा न्याःसन्तिवह्व्यस्तासुकाश्चिद्वि दोधमे रोहिणी ४३ चन्द्रपत्नीच संज्ञा ४४ सूर्यस्यकामिनी शत रूपा ४५ मनोर्भार्य्या शचीन्द्रस्य चगेहिनी ४६ तारा ४७ वृहस्पतेर्भा र्य्या वशिष्ठस्याप्यरुन्धती ४८ अह ल्या ४९ गौतमस्त्रीत्तसानसूया ५० अत्रिकामिनी पितॄणांमानसी। कन्या मेनका ५१ साम्बिकाप्रसूः लोपामुद्रा ५२ तथाहूती ५३ कु वेरकामिनी तथा ५४ यमस्त्रीच बलेर्विन्ध्यावली ५५ तथा कुन्ती च ५६ दमयन्ती च ५७ यशोदा ५८ देवकी ५९ सती गान्धारी द्रौपदी ६१ शैव्या ६२ सावित्री ६३ सत्यवत्प्रिया वृषभानुप्रिया साध्वी राधामाताकलावती ६ मन्दोदरी चकौशल्या ६६ सुभ द्रा ६७ कैटभी ६८ तथा रेव ती ६९ सत्यभामाच कालिन्दी लक्ष्मणा ७२ तथा जाम्बवती ७३ नाग्नजिती ७४ मित्रविन्दा ७५

तथापरा लक्ष्मणा ७६ रुक्मि णी ७७ सीता ७८ स्वयंलक्ष्मीःप्रकी र्त्तिता कलायोजनगन्धाच ७९ व्या समातामहासती वाणपुत्री तथोषा ८० चित्रलेखाच ८१ तत्सखी प्रभा वती ८२ भानुमती ८३ तथा माया वती ८४ सतीरेणुका ८५ चभृगो र्माता हलिमाताचरोहिणी ८६ ए कानंशा ८७ चदुर्गांशा श्रीकृष्णभ गिनीसती वह्व्यःसन्तिकलाश्चैव प्रकृतेरेवभारते यायाश्चग्रामदेव त्यास्ताःसर्वाःप्रकृतेःकलाः क लांशांशसमुद्भूताः प्रतिविश्वेषु योषितः योषितामपमानेन प्रकृ तेश्चपराभवः ब्राह्मणीपूजितायेन पतिपुत्रवतीसती प्रकृतिःपू जितातेन वस्त्रालंकारचन्दनैः कु मारीचाष्टवर्षीया वस्त्रालंकारचं दनैः पूजितायेनविप्रस्य प्रकृति स्तेनपूजिता। सर्वाःप्रकृतिसंभू ता उत्तमाधममध्यमाः सत्वांशा श्चोत्तमा ज्ञेयाःसुशीलाश्चपतिव्र ताः मध्यमाराजसाश्चांसा स्ता श्च भोग्याःप्रकीर्त्तिताः ॥ सु खसंभोगवश्याश्च स्वकार्य्येत त्पराःसदा अधमास्तामसा ज्ञेया ॥ अधमासा ॥

शा अज्ञातकुलसम्भवाः दुर्मु खाःकुलटाधूर्त्ताः स्वतन्त्राःकलहप्रि याः पृथिव्यांकुलटायाश्च स्वर्गेचाप् सरसांगणाः प्रकृतेस्तामसांशाश्चाः पुंश्चल्यःपरिकीर्त्तिताः एवंनिगदि तंसर्वं प्रकृतेःपरिकीर्त्तनं ताश्चसर्वाः पूजिताश्च पुण्यक्षेत्रेश्चभारते पू जितासुरथेनादौ दुर्गादुर्गतिनाशिनी द्वितीयेरामचन्द्रेण रावणस्यवधा र्थिना ततपश्चाज्जगतांमाता त्रिषुलो केषुपूजिता जातादौदक्षपत्न्यांच निहत्यदैत्यदानवान् ततोदेहंपरि त्यज्य यज्ञेभर्तुश्चनिन्दया जज्ञेहिम वतःपत्न्यां लेभेपशुपतिंपतिं गणे शश्चस्वयंकृष्णः स्कन्दोविष्णुकला द्भवः बभूवतुस्तौतनयौ पश्चात् स्याश्चनारद लक्ष्मीर्मंगलभूपेन प्रथमेपरिपूजिता त्रिषुलोकेषु ततपश्चाद्देवतामुनिमानवैः सा वित्रीचाश्वपतिना प्रथमेपरिपूजि ता ततपश्चात्त्रिषुलोकेषु देव तामुनिमानवैः आदौसरस्वतीदे वी ब्रह्मणापरिपूजिता ततप श्चात्त्रिषुलोकेषु देवतामुनिमा नवैः प्रथमेपूजिताराधा गोलो केरासमण्डले पौर्णमास्यांका र्त्तिकस्य कृष्णेनपरमात्मना ॥

गोपिकाभिश्च गोपैश्च बालि-
काभिश्च बालकैः । गवांगणैः स्त-
म्भात्र तत् पश्चान्मायया हरेः । त
दा ब्रह्मादिभिर्देवैर्मुनिभिर्मनुभि-
स्तथा । पुष्पधूपादिभिर्भक्त्या पूजि-
तावन्दिता सदा । पृथिव्यां प्रथमे दे-
वी सुयज्ञेनैव पूजिता । शङ्करेणो-
पदिष्टेन ध्रुवपत्नेत्रेच भारते । त्रिषु
लोकेषु तत् पश्चात् दाक्षायापरमा-
मनः । पुष्पधूपादिभिर्भक्त्या पूजि-
तामुनिभिः सुरैः । कलयायाः समु-
द्भूताः पूजितास्ताश्च भारते । पूजिता
ग्रामदेवीस्ता ग्रामेचनगरेषुवै । एवं
तेकथितं सर्वं प्रकृतेश्चरितं शुभं ।
यथागमं लक्षणञ्च किं भूयः श्रो-
तुमिच्छसि । इति ब्रह्मवैवर्त्ते प्र-
कृतिखण्डे प्रकृतिचरित्रनामा-
नुक्रमः १ अध्यायः ॥ पुरुष-
मानोऽश्चैप्रकृतेर्नास्तिस्वार्थ्य ता ।
यथा नारदउवाच आदौ सार्थ्यंस्व-
स्वार्थ्य पश्चात्कल्पविदुर्बुधाः ।
निमित्तमस्याः प्रभके वदभक्तजन-
प्रिय श्रीनारायणउवाच निमित्तमा-
स्य त्रिविधम् कथयामि निशा-
मय जगन्माताच प्रकृतिः ।
पुरुषश्च जगत् पिता पतीती-
ति जगतां माता ॥

पितः । राधा कृष्णेति गौरीशेत्येवं
शब्दः स्मृतो मतः । कृष्णराधेशगौ-
रीति लोकेन चकदा स्मृतः । प्रसी-
द रोहिणीचन्द्र गृहाणार्घ्यमिदं प्र-
म । गृहाणार्घ्यं मयादत्तं संज्ञया स-
हभास्कर प्रसीद कमलाकान्त ।
गृहाण मम पूजनं । इति देवास्त-
वेदे कौथुमे मुनिसत्तम । तस्माद्धा-
ह्यारणादेव स्मृतो भवति मायवः ।
यथाशास्त्रोक्तात्पश्चात् द्वावेव स-
संभूताः आदौ पुरुषश्चार्थ्य च ॥
स्यात्प्रकृतिश्चेत् सम्भवेन्मात-
णामीच वेदातिक्रमणेऽश्रुते इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे
५० अध्यायः ॥ प्रकृष्टम् त्रि ॥
प्रकर्षप्रकृतम् तत्पर्य्यायः मु-
ख्य २ प्रमुख ३ प्रवर्हम् वर्य्यम् ५
वरेण्य ६ प्रवरं ७ धुरीणम् ८ अनु-
त्तमं ९ प्राग्रहरम् १० प्रवेकम् ११ प्र-
धानम् १२ प्रश्रेसर १३ उत्तमं १४
अग्र्ये १५ ग्रामणीः १६ अग्रणीः
१७ अग्रिमं १८ जात्यं १९ अग्र्यं २०
अनुत्तमं २१ अनवरार्ध्य २२ श्रेष्ठं
२४ परार्ध्यम् २५ परम् २६ ॥
इति हेमचन्द्रः ॥
प्रकोष्ठः पुं कफोणेरधो
मणिबन्धपर्य्यन्त हस्तभागः

इत्यमरः गृहद्वारपिण्डकम् ॥
वीथी इति विश्वः इति च ख्याते ।
इति भरत्राणशब्दटीकायां भरतम-
कृतचरश्चरवेदः प्रकरवरः पुं अस्य
कवच इति शब्दमाला प्रवर इ-
ति प्रसत्व इति च पाठः प्रक्रान्त
त्रि उपक्रमकर्त्ता आरम्भकर्त्ता ।
प्रपूर्वक्रमधातोः कर्त्तरि प्रत्ययनि-
ष्पन्नः इति मुग्धबोधव्याकरणं
प्रक्रमः पुं क्रमः अवसरः इति ।
मेदिनी प्रथमारम्भः तत्पर्य्या-
यः उपक्रमः २ इत्यमरः प्रक्रा-
न्तः त्रि प्रकरणाख्यः आरब्धः य-
था आस्तिकृत्जपनसन्ध्या प्रक्रा-
न्तामायतीगवे मातस्तं पतत्रि-
भ्यः प्रवृद्धः प्रणामत्वाविं इति भ-
ट्टि चतुर्थसर्गः ॥ प्रक्रिया स्त्री ।
नृपादीनां चामरव्यजनच्छत्रधार-
णादि व्यापारः तत्पर्य्यायः ॥
अधिकारः २ इत्यमरः अधीका-
रः ३ नियतविधिः ४ इति शब्दर-
त्नावली प्रकृष्टकार्य्यञ्च प्रकृति-
त्रः त्रि त्वमः इति जटाधरः ॥
प्रकर्षेण क्वणदप्युत्कृष्ट प्रक्वाणः
पुं वीणायाः क्वणितः वीणा-
शब्दः तत् पर्य्यायः प्रक्वाणः
२ इत्यमरः सुक्वाणः ३ सुक्वणः ४
उप ॥

क्वाणः ५ उपक्वाणः ६ इति भर-
तः प्रक्वाणः पुं प्रक्वणः इत्यमरः
प्रक्षरः पुं हयसन्नाहः कुकक्षु-
रः अश्वतरः अश्वत्वरे त्रि इति ।
मेदिनी ॥ प्रख्य त्रि उत्तरपदे ।
तु सादृश्यवाचकः यथा स्फुरत्प्र-
पदे प्रख्यः प्रकारः प्रतिमोनिभः
इति हेमचन्द्रः प्रख्यातः त्रि प्र-
कृष्टख्यातियुक्तः विख्यातः यथा
यस्य व्याकरणो वरेण्यघटनास्फी-
ताः प्रबन्धादश प्रख्याता नववैद्य-
केपि तिथिनिर्द्धारार्थमेकोद्भुतः
इति मुग्धबोधशेषे तत्पर्य्याये
प्रख्यातवप्तकः पुं विख्यातपि-
तृकः यथा स्यादामुष्यायणोऽ-
मुष्यपुत्रः प्रख्यातवप्तकः इति हेम-
चन्द्रः प्रख्यातिः स्त्री प्रकृष्टकी-
र्त्तिः विख्यातिः प्रपूर्वख्याधातोः
क्ति प्रत्ययनिष्पन्ना ॥ प्रगण्डः
पुं कूर्परस्योपरिस्कन्धपर्य्यन्त भागः
कनुइ अवधि वगल पर्य्यन्त इति
भाषा इत्यमरः । प्रगण्डी स्त्री
वहिः प्रकारः दुर्गप्राकारभित्ती ।
शूराणां उपवेशनस्थानानि इति
महाभारते राजधर्म्मे प्रगतजानुः
त्रि प्रगतजानुकः इत्यमरटी-
कायां रमानाथः ॥

प्रगतजानुकः त्रि यस्य जानुनी
मिथो निःसंकदाचित् कं वा म।
हदन्तर लेसः फाफाराकव्यक्ति।
इति भाषा तत्पर्य्यायः प्रज्ञः
२ इत्यमरः प्रज्ञुः ३ प्रगतजानुः
४ इतिभरतः । प्रगन्धः पुम्
पर्पटः इतिराजनिर्घण्टः ॥
प्रगल्भः त्रि प्रत्युत्पन्नमतिः।
तत्पर्य्यायः प्रतिभान्वितः २
ऊं इत्यमरः प्रगल्भता ॥
स्त्री प्रगल्भस्यभावः प्रागल्भ्यं
तत्पर्य्यायः उत्साहः २ अभियो
गः ३ उद्यमः ४ प्रौढिः ५ उद्योगः ६
कियदेतिका ७ अध्यवसायः ८
ऊर्ज्जः ९ इतिहेमचन्द्रः तस्य ल
क्षणं निःशङ्कत्वम् प्रयोगेषु बु
धैरुक्ता प्रगल्भता इत्युज्ज्वलनील
मणिः प्रगल्भा स्त्री नायिकाभेदः
अस्य लक्षणम् पतिमात्रविषयके
लिकलाप कोविदा अस्याश्चेष्टा
रतिः प्रीतिः आनन्दादात्मसं।
मोहः रतिप्रीति यथा सेत्स्यस्त
स्तनमाकलय्य वदनम् संश्लि।
ष्य कण्ठस्थलम् निष्पीड्याधर।
बिम्ब मम्बर मपाकृत्य क्षुद्रस्था
लकम् देवस्याम्बु ॥
इतिराजनिर्घण्टः ऊो ति।

ज्जिनीपतेः समुदये जिज्ञासमा
ने प्रिये वामाक्षी वसनाञ्चलैः श्र
वणयोर्नीलोत्पले निह्नुते आन
न्दादात्मसंमोहो यथा नखाङ्कि।
तमुरःस्थले अधरतले वदस्य क्षते
च्युता वेणीसमालिका विगलिता
च मुक्तावली रतान्तसमये मया।
सकलमेतदालोकितं स्मृतिः क
च पतिः क्व च क्व च नवालिपिता
विधिः सम्मानावस्थायां त्रिविधा धी
रा अधीरा धीराधीरा च व्यङ्ग्यकोप
प्रकाशा धीरा अव्यङ्ग्यकोपप्रकाशा
अधीरा व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा
धीराधीरा प्रौढधीराया अस्य रतावौ
दास्यं अधीराया स्तर्जनताडनादि।
धीराधीराया रतावौदास्यं तर्जना
दिव्यङ्ग्यकोपस्य प्रकाशकम् प्रौढाधी
रा यथा नो तल्पम् भजसे न जल्प
सि सुधाधारा गुरुकारि गिरोहक्।
पातं क्रूरधने वा परिजने कोपप्र
काशाच्छलात् इत्थं केतक ग
र्भगौरि दयिते कोपस्य संगोपने
किं स्याद्देवन चेत् पुनः सहचरीकृ।
तैव वाचिस्मितम् प्रगल्भा अधी
रा यथा प्रतिफलमवलोक्य म
वीयमिन्दोः कलायोहरशिरसि
परस्यावासमाशङ्कमाना गिरिश

प्रवलकम्पा तर्जयामास क
म्प्रं प्रवलवलय वेल्लत् कान्ति भा
ना करेण प्रगल्भधीराधीरा यथा
तल्पोपान्तमुपेयुषि प्रियतमे सा
वीकृत ग्रीवया काकुव्यागत वा
चि साचि हसितस्फुर्जत् कपोल।
श्रिया हस्त न्यस्तकरे पुनर्द्विगह।
णालालारसक्षालित प्रोष्ठी ।
इष्टमपूर्व मांसलरुचो विस
फारिता हृष्टयः इतिरसमञ्जरी
प्रगाढ त्रि भृशं क्लिष्टम् इत्य।
मरः हढं इतिभरतः प्रगाता
त्रि उत्तमगायकः इतिशाह्वर
त्नावली ॥ प्रगुणः त्रि ऋ
जुः इत्यमरः प्रगृह्यम् त्रि स
न्धिरहितेपदम् इतिमुग्धबो।
धव्याकरणम् पदपदपरत्रैव
हिर्भूतेषु शृत्यपदे निपात्यते य
था प्रगृह्यपदे यत् स्वरेणानस
मुन्नीयते इतिजगोदासः ॥
आप्रगृह्यः स्मृतौ वाक्ये इत्यम
रः प्रगृह्यः पाणिपादि कृत
प्रहस्य सेतौ उत्तरत्यरहितः
आ आह्यो ऽवानसन्धीयते स
ग्रग्यर्थः स्मृतौ स्मरणे यथा।
आज्ञातं सत्कृतं वा शेषः वाक्ये
यथा आ एवं मन्यसे इतिभर।
तः ॥

ती

प्रगेव प्रातः इत्यमरः ॥ प्रगे
प्रगेतनः त्रि प्रगेतवः प्रातर्भवः
तत्पर्य्यायः स्वस्तनः २ इतिरा
जनिर्घण्टः ॥ प्रग्रहः पुं त्तुला
सूत्रे अश्वादिरश्मिः वन्दी इत्य
मरः नियमनेभुजः रश्मिः सुव।
र्णालमहीरुहः इतिमेदिनी
कर्णिकारवृक्षः इतिराजनिर्घ
ण्टः । प्रग्राहः पुं प्रग्रहः इत्यमरः
प्रग्रीवः पुं क्ली ग्रहादौ प्रान्तेधा
रणे दारुपङ्क्तिः वातायने इ।
तिसुभूतिः खावशाला इत्येके
अश्वशाला इतिकेचित् इत्यशी
षकम् इतिगोवर्द्धनः इत्यमर
टीकायांभरतः । प्रघटावित्
द त्रि शास्त्रगण्डः इतित्रिकाण्ड
शेषः ॥ प्रघणः पुम् बहि
र्द्वारप्रकोष्ठकम् तत्पर्य्यायः
प्रघाणः २ अलिन्दः ३ इत्यमरः
आलिन्दः ४ इतिभरतः ताम्रा
कुण्डम् लोहमुद्गरः इतिमेदि।
नी ॥ प्रघनः पुम् प्रघणः इ।
तिशब्दः प्रघसः पुम् असुरः
दैत्यः इतित्रिकाण्डशेषः ॥
प्रघाणः पुम् प्रघणः इत्यम
रः प्रघातः पुम् युद्धम् इति
हेमचन्द्र टीका ॥



प्रघाणः पुं प्रघणः इतिमुकुटः प्रघूर्णः पुं अतिथिः इतिहेमचन्द्रः प्रकृष्टचूर्णयुक्ते त्रि ॥ प्रघोषकः पुं ध्वनिः इतिजटाधरः प्रचक्रम् क्ली चलितसैन्यं प्रस्थितसेना इत्यमरः ॥ प्रचण्डः पुं श्वेतकरवीरः । इतिमेदिनी ॥ प्रचण्डः त्रि । दुर्वहः दुर्धर्षः प्रगल्भः प्रतापी इतिमेदिनी ॥ गे नानार्थरत्नमालाच । प्रचण्डमूर्त्तिः स्त्री वरुणवृक्षः इतिशब्दचन्द्रिका । प्रतापयुक्तशरीरश्च प्रचण्डा स्त्री दुर्गाया अष्टनायिकान्तर्गतनायिकाभेदः इतिकालीपुराणम् श्वेतदूर्वा इतिराजनिर्घण्टः प्रचयः पुं समूहः इतिशब्दचन्द्रिका शिथिलावयवसंयोगः स च परिमाणजनकः यथा । संख्यातः परिमाणाच्च प्रचयादपि जायते प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥ परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः इति भाषापरिच्छेदः ॥ प्रचरः पुं पन्थाः इतिधरणिः ॥

प्रकर्षेणागमनञ्च ॥ प्रचररूपः त्रि व्यक्तरूपः प्रचारविशिष्टः प्रचरत् प्रकाशमाने रूपं स्वरूपं यस्य सः ॥ प्रचलाकः पुं शरघातः शिखण्डः भुजङ्गमः इतिमेदिनी प्रचलाकीन पुं मयूरः इतिमेदिनी ॥ प्रचलायितम् त्रि निद्रादिना घूर्णितम् इत्यमरः ॥ प्रचलाः पुं बृहस्पतिः इत्युणादिकोषः प्रचारः पुं प्रचरणं व्यक्तः प्रकाशः यथा दमनकतरुशाखालम्बिछोलं गपुंगमम् तदिनकिरणदिशे लिञ्जरीटप्रचारः इतिशाकुन्तलाख्यः प्रचुरम् त्रि अनेकम् तत्पर्यायः । प्रभूतम् २ प्राज्यम् ३ अदभ्रम् ४ बहुलम् ५ बहु ६ पुरुहम् ७ पुरुभूयिष्ठम् ८ स्फिरम् ९ भूयः १० भूरि ११ इत्यमरः ॥ प्रचुरपुरुषः पुं चोरः इतित्रिकाण्डशेषः बहुनरश्च ॥ प्रचेतकी स्त्री कटुफला इतिराजनिर्घण्टः प्रचेतसः कन्या च प्रचेतापुं सारथिः इतिहेमचन्द्रः प्रचेताः पुं वरुणः इत्यमरः मुनिविशेषः प्रकृष्टहृदि त्रि इति

मेदिनी प्राचीनवर्हि राजपुत्रः ॥ यथा प्राचीनवर्हिर्भगवान् सर्वशास्त्रभृतांवरः समुद्रतनयायां वै दशपुत्रानजीजनत् प्रचेतस इति विख्याता राजानः प्रथितौजसः इतिकौर्म्मे १२ अध्यायः अपिच प्राचीनवर्हिर्भगवान् पुत्रः पृथिव्यामेकराड्वभौ उपयेमे समुद्रस्य लवणस्य सवर्णनाम् तस्मात् सुसाव सामुद्री दशप्राचीनवर्हिषः सर्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः अपृथग्धर्म्मचरितास्तेऽतप्यन्त महत्तपः दशवर्षसहस्राणि समुद्रसलिलेशयाः प्रजापतित्वं संप्राप्य भार्य्या तेषाञ्च मारिषा अभवत्तस्य प्रायेन. तस्मांदक्षोऽभवत्ततः इतिगारुडे ६ अध्यायः ॥ प्रचेलम् क्ली पीतकाष्ठम् ॥ इतिशब्दचन्द्रिका ॥ प्रचेलकः पुं घोटकः इतिशब्दमाला प्रचोदनी स्त्री कण्टकारी इत्यमरः प्रचोदितः त्रि प्रेरितः यथा प्रचोदिता येन पुरा सरस्वती इतिश्रीभागवते २ स्कन्धे ४ अध्यायः ॥ प्रच्छ ज्ञीप्से इतिकविकल्पद्रुमः

प्रच्छदः पुं आच्छादनम् इति शब्दरत्नावली ॥ प्रच्छदपटः पुं प्रकर्षेणाच्छाद्यतेऽनेन सचासौ पटश्चेति पाछुड इतिख्यातः तत्पर्यायः निचोलः २ इत्यमरः निचुलः ३ इतिव्याडिः निचोलम् ४ इतिभरतः निचोली ५ इतिराजदेवः इत्यमरटीकायांभरतः प्रच्छना स्त्री आमन्त्रणा इतिजटाधरः प्रच्छन्नं क्ली अन्तर्द्वारम् इत्यमरः ॥ आच्छन्ने त्रि । प्रच्छर्दिका ॥ स्त्री वमिः इत्यमरः प्रच्छादनं क्ली उत्तरीयवस्त्रम् तत्पर्यायः प्रावरणम् २ संव्यानम् ३ उत्तरीयकम् ४ इतिहेमचन्द्रः ॥ प्रच्छादितम् त्रि आच्छादितम् इतिहलायुधः ॥ प्रजः पुं पतिः जायायां प्रविश्य पुनर्जायते इतिडप्रजः पतिः इति प्रभावतीशब्दटीकायांभरतः प्रजनः पुं उपसरः इत्यमरः हे स्त्री गवादिषु पुंगवादीनाम् प्रथमगर्भाधानाय मैथुनाभियोगः प्रजनं क्लीव मितिकेचित् पशूनां गर्भग्रहणकालः इतिस्वामी गवां प्रथमगर्भग्रहणाभि ॥



योगः इतिसम्भूतिः स्त्री गवी
ऋषभगवानां प्रथमगमनमिति सा
र्वत्वे किंतु वीना प्रपसरं इष्टे।
ति भट्टिः इत्यमरटीकायांभरतः
प्रजननम् क्ली योनिः जन्म नि
तिमेदिनी प्रगमः इतिविश्वः
प्रजनिका स्त्री माता इतिजटा
धरः प्रजवः पुम् प्रकृष्टवेगः।
प्रपूर्वजुधातोर्भावेऽल्प्रत्य
यनिष्पन्नः प्रजवी त्रि प्रकृष्ट
वेगयुक्तः इत्यमरः प्रजल्पः पुं
वाक्यविशेषः यथा असूयेर्ष्या
मदयुजा योऽवधीरणमुद्रया।
प्रियस्यकौशलोद्गारः प्रजल्पःस
तुकथ्यते इत्युज्ज्वलनीलमणिः
प्रजा स्त्री सन्ततिः जनः इत्यमरः
पितृमातृगुणदोषेण प्रजावि
भिन्नायथा मातृगुणशीलदोषेण
पितृशीलगुणेनच विभिन्नाल
प्रजाःसर्वा भवन्तिभवशीलिनो
इत्यग्निपुराणम् ॥ प्रजागरः
पुं प्रकर्षेणजागरणं इतिहला
युधः यथा देवतानांपितृणां
च सोऽरक्ततात्प्रजागरम् त्रेतायुगेव
तर्थांशो रावणस्तपसः तथान्
रामदाशरथिंप्राप्य सगणःक्षय
मीयिवान् इत्यग्निपुराणम् ॥

प्रजाता स्त्री जातापत्या प्रसूता।
इत्यमरः प्रजादा स्त्री
गर्भदात्री क्षुपः इतिराजनिर्घ
ण्टः प्रजादानवि त्रि प्रजानन्ती
स्त्री पण्डिता प्राज्ञी इतिहेमच
न्द्रः ॥ प्रजादानम् क्ली रज
तम् इतिशब्दचन्द्रिका ॥
प्रजापः पुम् राजा इतिहेमचंद्रः
प्रजापतिः पुम् ब्रह्मा इत्यमरः द
क्षादिः महीपालः इतिमेदिनी
जामाता दिवाकरः वह्निः त्व
ष्टा इतिहेमचन्द्रः। दशप्रजा
पतयो यथा मरीचिमत्र्यंगिरसौ
पुलस्त्यं पुलहंक्रतुम् प्रचेतसं
वशिष्ठंच भृगुंनारदमेवच देवा
न्सर्वानृषीन्सर्वांल्पर्पयेदतो
दक्षः इत्याह्निकतत्त्वम्। एक
विंशतिः प्रजापतयोयथा ब्रह्मा
स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथाय
मः मरीचिरंगिराअत्रिश्च पुलस्त्यः
पुलहःक्रतुः वशिष्ठःपरमेष्ठी
च विवस्वान् सोमएवच कर्दम
श्चापियःप्रोक्तः क्रोधोऽर्वाक्क्री
तएवच एकविंशतिरुत्पन्ना
स्तेप्रजापतयः स्मृताः इति
महाभारतेमोक्षधर्मः ॥ ओ
इतिशब्दरत्नावली ॥

पिता यथा जनको जन्मदानाच्च
रक्षणाच्चपितानृणाम् ततोविस्ती
र्णकरणात् कल्पायांप्रजापतिः
इतिब्रह्मवैवर्त्तेगणपतिखंडे ४४
अध्यायः स्वनामख्यातकीटविशे
षश्च प्रजावती स्त्री भ्रातृजाया इत्य
मरः ज्येष्ठभ्रातृपत्नी इतिकेचित्
इतिभरतः सन्तानविशिष्टा च प्र
जाहितम् क्ली जलम् इतिशब्दमाला
प्रजापकावे त्रि प्रजिनः पुं वायुः इ
तिमाला प्रजेश्वरः पुम् राजा इति
त्रिकाण्डशेषः। प्रज्ञः त्रि पण्डितः
इतिप्राकृतशब्दटीकायाम्भरतः
प्रगतजानुकः इतिप्रज्ञशब्दटीका
यां भरतः धरनिश्च प्रज्ञामिः।
स्त्री संकेतम् इतित्रिकाण्डशेषः
प्रज्ञप्ती स्त्री जिनविद्यादेवीविशेषः
प्रज्ञप्ती स्त्री संकेतम् इतित्रिकाण्ड
शेषः प्रज्ञप्ती स्त्री संकेतम् इतित्रि
काण्डशेषः प्रज्ञप्ती स्त्री जिनविद्या
इतिहेमचन्द्रः ॥ प्रज्ञा स्त्री बु
द्धिः प्राज्ञी प्रकर्षेण जानातिया।
इत्यमरः सरस्वती इतिशब्दरत्ना
वली प्रज्ञाकायः पुम् मंजुघोषः
इतित्रिकाण्डशेषः प्रज्ञाचक्षुः पुं
धृतराष्ट्रः इतिशब्दरत्नावली।
प्रज्ञानं क्ली बुद्धिः चिह्नं इत्यमरः प
ण्डिते त्रि इतिभरतद्विरूपकोषः
प्रज्ञालु त्रि पण्डितः इतिभरतद्विरूप
कोषः ॥

प्रज्ञुः पुम् प्रगतजानुकः इत्यमर
यस्यजानुनो मध्ये नितम्बकादावित
केवा सुहृदन्तराले तस्मिन् इत्यम इ
तिभरतः प्रज्वलितः त्रि प्रकृष्टज्व
लन विशिष्टः यथा अग्निं प्रज्वलितं
वंदे जातवेदम् हुताशनम् सुवर्ण
वर्णममलम् समिद्धं सर्वतोमुख
इतिभवदेवभट्टः प्रडीनम् क्लीप
क्षिणाम् गतिविशेषः इत्यमरः
प्रथमडीनम् प्रडीनम् उड्डयना
य क्रमबन्धः निष्पतनमनम् इत्य
मे इतिभरतः प्रणः पुम् ॥
पुराणः पुराणार्थे वर्त्तमानात्प्र
शब्दात् नोवक्तव्यः इतिसिद्धान्त
कौमुदी ॥ प्रणतः त्रि प्रकर्षेण
णतः प्रणतिविशिष्टः यथा
ध्येयंसदापरिभवघ्नमभीष्टदोहं ती
र्थास्पदंशिवविरिञ्चिनुतंशरण्यम्
भृत्यार्त्तिहंप्रणतपालभवाब्धि
पोतं वंदेमहापुरुषतेचरणार
विंदम् इतिश्रीभागवतम् ॥
प्रणतिः स्त्री प्रणामः तत्पर्य्यायः
प्रणिपातः २ अनुनयः ३ इतिहेम
चन्द्रः ॥ प्रणयः पुम् प्रीतिप्रा
र्थनम् तत्पर्य्यायः प्रश्रयः २
इत्यमरः प्रसरः ३ इतिभरतः
प्रसवः प्रेम याञ्चा विश्रम्भः ॥
निर्वाणः इतिमेदिनी ॥ प्रणयी
पुं स्वामी इतिहेमचन्द्रः ॥



प्रणयकेऽपि प्रणयिनी स्त्री भार्य्या
इति हेमचन्द्रः ॥ प्रणवः पुं ओंकारः
इत्यमरः ॥ तस्य पर्य्यायो यथा ओंका
रः प्रणवस्तारो वेदादि र्वर्त्तुलो ध्रु
वः त्रिशंख त्रिगुणो ब्रह्म सत्यो मेशा
दिरव्ययः ब्रह्मबीजं त्रितत्त्वञ्च पञ्च
रश्मिस्त्रिदैवतः इति बीजवर्णाभिधा
ने अपि च ओंकारो वर्त्तुलस्तारो वा
मश्च हंसकारणम् मन्त्राद्यः प्रणवः स
त्य विन्दुशक्तिस्त्रिदैवतं सर्व्वबीजो
त्पादकश्च पञ्चदेवो ध्रुवस्त्रिकः
सावित्री त्रिशिखो ब्रह्म त्रिगुणो गु
णजीवकः आदिबीजं वेदसारो वे
दबीजमतः परम् पञ्चरश्मिस्त्रिकू
टश्च त्रिभवो भवनाशनः गायत्रीबी
जपञ्चांशो मन्त्रविद्याप्रसूः प्रभुः
अक्षरं मातृकासूश्च नादिदैवतमो
क्षदो इति तन्त्रम् अस्योद्धारक्रमो य
था एकमेवाद्वयं ब्रह्म मायया तु चतु
ष्टयम् रोहिणीतनयो रामः अकारात
रसम्भवः तैजसात्मकप्रद्युम्न उका
राक्षरसम्भवः प्राज्ञात्मकोऽनिरुद्धो
वै मकाराक्षरसम्भवः रोहिणीत
नयो राजन्नमृतं परमं पदे यत्र य
त्र महाप्राज्ञ एवमासपरात्मनः
अर्द्धमात्रात्मकः कृष्णो यस्मिन् वि
श्वं प्रतिष्ठितम् इति गोपालतापनी
योपनिषत् ॥ स च मांगलिकः य
था । इति राजनिर्घण्टः । शब्द

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः
पुरा कण्ठं भित्त्वा विनिर्यातौ तेन मांग
लिकावुभौ इति मुग्धबोधटीकायां
दुर्गादासः । अस्य माहात्म्यं यथा
विश्वपादशिरोग्रीवं विश्वेशं विश्वभा
वनम् प्रयाणसमये महापुण्यमोमित्ये
काक्षरं जपेत् तदेवाध्ययनं तस्य स्वरू
पं शृणु अतः परं अकारश्च तथोकारो
मकारश्चाक्षरत्रयम् एतास्तिस्रः स्मृ
ता मात्राः सात्त्विकराजसतामसाः नि
र्गुणा योगिगम्यान्या अर्द्धमात्रोर्द्धसं
स्थिता गान्धारीति च विज्ञेया गान्धार
स्वरसंश्रया पिपीलिकागतिस्पर्शा
प्रयुक्ता मूर्द्ध्नि लक्ष्यते यथा प्रयुक्त ओंका
रः प्रतिनिर्याति मूर्द्धनि तथोंकारम
यो योगी अक्षरे त्वक्षरो भवेत् प्राणो ध
नुः शरो ह्यात्मा ब्रह्म वेध्यमनुत्तमं अप्र
मत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ओमि
त्येतत्त्रयो वेदास्त्रयो लोकास्त्रयोऽग्नयः
विष्णुक्रमास्त्रयश्चैव ऋक्सामानि य
जूंषि च मात्राश्चार्द्धञ्च तस्य त्रिविज्ञेयाः
परमार्थतः तत्र युक्तश्च यो योगी स
तल्लयमवाप्नुयात् अकारस्त्वथ भू
र्लोक उकारश्चोच्यते भुवः सव्यञ्जनो
मकारश्च स्वर्लोकः परिकल्प्यते व्या
क्तात्तु प्रथमा मात्रा द्वितीयाऽव्यक्तसं
ज्ञिका मात्रा तृतीया विच्छक्ति रर्द्ध
मात्रा परं पदम् अनेनैव क्रमेणैता वि
ज्ञेया योगभूमयः ओमित्युच्चारणात्

सर्व्वगृहीतं सदसद्भवेत् ह्रस्वा
तु प्रथमा मात्रा द्वितीया दीर्घ
संयुता तृतीया तु प्लुतार्द्धाख्या
वचसः सा न गोचरे इत्येतदक्ष
रं ब्रह्म परमोंकारसंज्ञितं य
स्तं वेद नरः सम्यक् तथा ।
ध्यायति वा पुनः संसारच
क्रमुत्सृज्य त्यक्तत्रिविधबं
धनः प्राप्नोति ब्रह्म निलयं प
रमे परमात्मनि अक्षीणकर्म
बंधस्तु ज्ञात्वा मृत्युमुपस्थितं
उत्क्रान्तिकाले संस्मृत्य पुनर्यो
गित्वमृच्छति तस्मादसिद्धयो
गेन वा पुनः ज्ञेयान्यरिष्टानि
सदा येनोत्क्रान्तौ न सीदति इ
श्रीमार्कण्डेय ओंकार माहात्म्य
यन्मन्त्रेणातिरिक्तं च यच्छिद्रं य
दयज्ञियं यदमेध्यमशुद्धं वा
तयामं च यद्भवेत् तदोंकारप्र
युक्तेन सर्व्वं चाविकलं भवेत्
इति तिथ्यादितत्त्वं ओमित्येका
क्षरं ब्रह्म व्याहरन् मामनुस्म
रन् यः प्रयाति त्यजन् देहं ।
मद्भावं सोऽधिगच्छति इति श्री

भगवद्गीतायां ८ अध्यायः ॥
प्रणष्टः त्रि प्रवर्षेण नाशयु
क्तः कश्चिदज्ञानसम्भूतः ।
प्रणष्टस्ते धनंजय इति श्री
भगवद्गीतायां १८ अध्यायः
प्रणादः पुं अनुरागजशब्दः
इत्यमरः प्रीतिजनितो मुख
कंठादि शब्दः प्रीतिजे प्रीत
कृते अनुरागकृते शब्दे प्र
णादः प्रीतकृते अनुराग।
कृते शब्दे प्रणादः प्रीत
कृते त्वरणमिति शब्दार्ण
वः गुणानुरक्त लोकप्रभ
वः शब्दः इति मधुमाधवः
अनुरागः जन्मा जनशब्दः
इति कलिंगः इत्यमरटी
कायां भरतः ॥
नादशब्दः श्रवणामयः
इति मेदिनी शेषस्य नामान्त
रे कर्णनादः यथा कर्णस्रो
तः स्थितवाते शृणोति विवि
धान् स्वरान् भेरीमृदंग शं
खानां कर्णनादः स उच्यते ॥
इति माधवकरः ॥ ॥

प्रणामः पुं प्रणतिः प्रणिपा
तः भक्तिश्रद्धातिशययुक्त
नमस्कारः स तु स्वापकर्षबो
धकव्यापारविशेषः इति मुग्ध
बोधटीकायां दुर्गादासः स च
तुर्विधः अभिवादनं १ अष्टाङ्गः
२ पंचाङ्गः ३ करशिरःसंयोगश्च
४ प्रथमस्य लक्षणं तत् प्राह्ने
द्रष्टव्यं द्वितीयो यथा पद्भ्यां
कराभ्यां जानुभ्यां उरसा शि
रसा दृशा वचसा मनसा चै
व प्रणामोऽष्टाङ्ग ईरितः तस्य
फलं भूमौ निपत्य यः कुर्यात्
कृष्णेऽष्टाङ्गनतिं सुधीः सहस्र
जन्मजं पापं तत्क्षणादेव नश्य
यात् तृतीयो यथा। बाहुभ्यां चै
व जानुभ्यां शिरसा वचसा दृशा
पंचाङ्गोऽयं प्रणामः स्यात् पूजा
सु प्रवराविमौ नतिविशेषस्तु
यामले त्रिकोणाकारा सर्वत्र न
तिः शाक्तैः समीरिता दक्षिणाद्वा
यवीं गत्वा दिशं तस्माच्च शाम्भ
वीं ततश्च दक्षिणां गत्वा नम।
स्कारस्त्रिकोणवत् एकहस्तप्र
णाम निषेधो यथा एकहस्तप्र
णामश्च एकं वापि प्रदक्षिणं एका

ले दर्शनं विष्णो इति पुराणं पुराक्त
नं इति तंत्रसारः कायिक वाचि
क मानस भेदेन प्रत्येकं त्रिवि
धः यथा कायिको वाग्भवश्चै
व मानसस्त्रिविधः स्मृतः नमस्का
रस्तत्त्वतैस्तु उत्तमाधम मध्यमः
प्रसार्य पादौ हस्तौ च पतित्वा दं
डवत् क्षितौ जानुभ्यामवनीं गत्वा
शिरसा स्पृश्य मेदिनीं क्रियते
यो नमस्कार उत्तमः कायिकस्तु
सः जानुभ्यां क्षितिं संस्पृष्ट्वा शि
रसा स्पृश्य मेदिनीं क्रियते यो।
नमस्कारो मध्यमः कायिकस्तु
सः पुटीकृत्य करौ शीर्षे दीयते
यद्यथा तथा अस्पृष्ट्वा जानु शी
र्षाभ्यां क्षितिं सोऽधम उच्यते यः
स्वयं गद्यपद्याभ्यां घटिताभ्यां न
मस्कृतिः क्रियते भक्तियुक्तै
र्वा वाचिकस्तूत्तमः स्मृतः ॥
पौराणिकैर्वैदिकैर्वा मंत्रैर्या क्रि
यते नतिः मध्यमोऽसौ नमस्का
रो भवेद्वाचनिकः सदा सवावि
कोऽधमो ज्ञेयो नमस्कारेषु पु
त्रकौ इष्ट मध्या निष्टगते म
नोभिः त्रिविधं पुनः मननं
मानसं प्रोक्तं मुत्तमाधम।

मध्यमं त्रिविधे च नमस्कारे कायि
कश्चोत्तमः स्मृतः कायिकैस्तु नम
स्कारैर्देवास्तुष्यन्ति नित्यशः प्र
णाममेव नमस्कारो दण्डादि प्रतिप
त्तिभिः प्रणाम इति विज्ञेयः स पू
र्वं प्रतिपादितः इति कालि।
कापुराणे ७० अध्यायः ॥
शूद्रस्पर्शितदेवता प्रणामनिषे
धो यथा यः शूद्रेणार्चितं लिंगं वि
ष्णुं वा प्रणमेद्यदि निष्कृतिस्तस्य
नास्त्येव प्रायश्चित्तायुतैरपि इति
कर्मलोचनं ॥
प्रणाय्यः त्रि असंमतः अभि।
लाषविवर्जितः इति मेदिनी सा
धुः इति त्रिकाण्डशेषः प्रियः
इति मुग्धबोधव्याकरणं ॥
प्रणालः पुं } जलनिःसरणमा
प्रणाली स्त्री } र्गः पयनाला इति
भाषा। इत्यमरः ॥
प्रणिधानं क्ली प्रयत्नः समाधिः
प्रवेशनं इति मेदिनी ॥
प्रणिधिः पुं चरः प्रार्थनं इत्यमरः
अवधानं इति भरतः अन्य चरः
इति मेदिनी ॥
प्रणिपातः पुं प्रणतिः इति हे
मचन्द्रः ॥
प्रणिहितं त्रि स्थापितं प्राप्तं।

समाहितं इति मेदिनी ॥
प्रणीतं त्रि उपसम्पन्नं पाकेन सू
प रसादि संपन्न व्यंजनादि इत्य
मरभरतौ क्षिप्तं विहितं प्रवे।
शितं इति मेदिनी कृतं इति
हेमचन्द्रः ॥
प्रणीतः पुं संस्कृतानलः यज्ञे
मंत्रादिना संस्कृताग्निः इत्यमरः
प्रणीता स्त्री यज्ञपात्रविशेषः
इति मेदिनी ॥
प्रणुतं त्रि स्तुतं इत्यमरः ॥
प्रणयः त्रि वपुषः इत्यमरः
प्रततिः स्त्री विस्तृतिः वल्ली इ
ति मेदिनी ॥
प्रतती स्त्री व्रतती इत्यमरटीका
यां भरतः ॥
प्रतनः त्रि पुरातनः इत्यमरः
प्रतर्कणं क्ली वितर्कः तत्पर्यायः
ऊहः २ वितर्कः ३ व्यूहः ४ वहः ५
ऊहः ६ वितर्कणं ७ अध्याहारः ८
अध्याहरणं ९ ऊहनं १० इति
शब्दरत्नावली ॥
प्रतलं क्ली पातालभेदः इति
मेदिनी ॥
प्रतलः पुं विस्तृताङ्गुलिपाणिः
चपेटः इत्यमरः ॥
प्रतानः पुं विस्तरः प्रसर्वततथा

तोऽर्द्धन प्रता निष्पन्नः वायुरोग
विशेषः तस्य संज्ञान्तरं अपतान
नकं यथा दृष्टिं संस्तभ्य संज्ञां च
हत्वा कण्ठेन कूजति हृदि मुक्ते
नरः स्वास्थ्यं याति मोहं वृते पु
नः वायुना दारुणं प्राहुरेके त
दपतानकं इति माधवकरः ।
प्रतानिनी स्त्री प्रतानवती विस्त
तालतादिः इत्यमरभरतौ ॥
प्रतापः पुं कोषदण्डजं तेजः को
षोधनं दण्डो दमः तेहमतात् ।
सैन्यमपि दण्डः ताभ्यां यत्तेजो
जायते सः इति भरतः तत्पर्य्या
यः प्रभावः २ इत्यमरः तापः
तेजः इति मेदिनी ॥ अर्कवृक्षः
इति राजनिर्घण्टः ॥
प्रतापनं क्ली पीडनं इति श
ब्दरत्नावली ॥
प्रतापनः पुं नरकविशेषः इति
शब्दरत्नावली स च कुम्भीपाकः
इति श्रीभागवतं ॥
प्रतापसः पुं शुक्लार्कवृक्षः इ
त्यमरः ॥
प्रतारकः त्रि वंचकः धूर्त्तः य
था यो यस्य प्रतारकः स तस्य
व्यापकः सर्व्वत्र ख्यातो लोक
प्रत्यय निष्पन्नः ॥

प्रतारणं क्ली प्रतारणा तत्पर्य्यायः
वंचनं २ व्यलीकं ३ अभिसंधानं
४ इति हेमचन्द्रः ॥
प्रतारणा स्त्री वंचना यथा यदी
च्छसि वशीकर्त्तुं जगदेकेन कर्म्मणा
उपास्यतां कलौ कल्पलता देवी
प्रतारणा इत्युद्भटः ॥
प्रतारितः त्रि कृतप्रतारणः त
त्पर्य्यायः वंचितः २ इति त्रि
काण्डशेषः ॥
प्रति व्य विंशत्युपसर्गान्तर्गतपं
चदशोपसर्गः बोपदेवेनास्यापि
संज्ञा कृता अस्यार्थाः । प्रतिनि
धिः मुख्यसदृशः यथा प्रद्युम्नः
केशवात् प्रति वीप्सा व्याप्तु
मिच्छा । यथा वृक्षं वृक्षं प्रति सि
चति लक्षणं चिह्नं यथा वृक्षं प्र
ति विद्योतते विद्युत् इत्यभूता ।
ख्याने कथंचित् प्रकारमापन्ने
त्यभूतं तस्याख्याने यथा साधु
र्विष्णो मातरं प्रति भागः स्वीक
पमाणोंऽशः यथा हरं प्रति ह
लाहलं प्रतिदानं गृहीतस्य प
तिदानं यथा भक्तेः प्रत्यस्तं ।
शोभाः तिलेभ्यः प्रति माषान्
यच्छति तिलान् गृहीत्वा माषान्
ददातीत्यर्थः लोके प्रत्यय यथा

शाकप्रति सूपप्रति लेपः ॥
निश्चयः इत्यमरभरत मेदिनी
काराः व्याप्तिः प्रशास्तिः वि
रोधः समाधिः इति मुग्धबोध
टीकायां दुर्गादासः आभिमुख्ये
स्वभावः इति शब्दरत्नावली ॥
प्रतिकः त्रि कार्षापणिकः का
र्षापणेन क्रीतः यथा कार्षापण
द्विगु वक्तव्यः प्रतिरादेशश्चवा
इति सिद्धान्तकौमुदी ॥
प्रतिकर्म नं क्ली प्रसाधने वेशः
इत्यमरः ॥
प्रतिकायः पुं शरव्यं प्रतिरूपकं
इति जटाधरः ॥
प्रतिकारः पुं प्रतीकारः इति श
ब्दरत्नावली ॥
प्रतिकाशः त्रि प्रतीकाशः इत्य
मरटीकायां भानुदीक्षितः ॥
प्रतिकासः त्रि प्रतीकाशः इत्य
मरटीकायां रमानाथः ॥
प्रतिकूपः पुं परिखा इति हारा
वली ॥
प्रतिकूलं त्रि अननुकूलं विपक्षः
तत्पर्य्यायः प्रसव्यं २ अपसव्यं ३
अपष्ठु ४ प्रतीपं इत्यमरः ॥
प्रतिकृतिः स्त्री प्रतिमा इत्यमरः
प्रतिनिधिः प्रतिकारः इति ॥

मेदिनी ॥
प्रतिकृष्टं त्रि गर्ह्यं द्विराहृत्ता ।
कर्षिते इति मेदिनी ॥
प्रतिगतं क्ली पक्षिगतिविशेषः
यथा गता गतं प्रतिगतं संपता
पाच पक्षिणां गतिभेदाः पक्षि
गृहं कुलायो नीडमस्त्रियां । इ
ति जटाधरः ॥
प्रतिग्रहः पुं स्वीकरणं सैन्यपृ
ष्ठं पतद्ग्रहः द्विजेभ्यो विधिव
द्देयं तद्ग्रहः ग्रहभेदः इति
मेदिनी ब्राह्मणस्यार्थः प्रति
ग्रहार्ज्जितः यथा प्रतिग्रहार्जि
ताविप्रस्तत्रिये शस्त्र निर्ज्जिताः
वैश्ये न्यायार्ज्जिता श्चार्थाः शूद्रे श
श्रूषयार्ज्जिताः अयाचितप्रति
ग्रहे दोषाभावो यथा अयाचिता
पपन्ने तु नास्ति दोषः प्रतिग्रहे
अमृतं ते विदुर्देवास्तस्मात्तं
न निर्णुदेत् गुरून्भृत्यां श्चोज्जि
हीर्षन् अर्चिष्यन् देवतातिथीन्
सर्व्वतः प्रतिगृह्णीयात् न तु त
प्येत् स्वयं ततः साधुतः ॥
प्रतिगृह्णीयाद्यथा साधुना द्विजः
गुणवानल्पदोषश्च निर्गुणो हि नि
मज्जति एवं तस्कर हस्ता वा कृता
भरणमात्मनः कुर्य्याद्विप्रो हि प

रतः प्रायश्चित्तं द्विजोत्तमः इतिगा
रुडे २५ अध्यायः तीर्थे प्रतिग्र
ह निषेधो यथा स्ववर्गे मथ सु
क्राम्ना नचैवान्यत् प्रतिग्रहं ॥
स्वकार्य्ये पितृकार्य्ये वा देवताभ्य
र्च्चनेऽपि वा निष्फलं तस्य तत्तीर्थं
यावत्तद्धन मश्नुते अतस्तीर्थे
न गृह्णीयात् पुण्येष्वायतनेषु च
इति कौर्म्मे ३३ अध्यायः राजादि
तः प्रतिग्रह निषेधो यथा। नरा
ज्ञः प्रतिगृह्णीयाल्लुब्धस्य पतिता
दपि नचान्यस्मादशक्तश्च नि
न्दितान्वर्जयेद्बुधः इति कौर्म्मे उप
विभागे १५ अध्यायः विद्यारहित
स्य प्रतिग्रह निषेधो यथा हेम
भूमिं तिलान् गाश्च अविद्वानाद
दानियः भस्मीभवति सोऽग्रायस्मा
त्तस्मात् निष्फलश्च तत् तस्माद्वि
द्वानादद्यादल्पेष्वपि प्रतिग्रहं।
विषयेष्वपरिज्ञानी विषमेऽल्पेन
नश्यति नश्यति गर्हित प्रतिग्र
हादि यथा हस्तिकृष्णाजिनाद्या
स्तु गर्हिता ये प्रतिग्रहाः सद्भिरास्ता
न गृह्णीयुर्दृष्टानृतपतन्ति ते हस्ता
जिन प्रतिग्राही हयानां कृष्णविक्र
यी नवश्राद्धस्य भोक्ता च नभूयः पु
रुषो भवेत् आपदि गर्हित प्रतिग्रह

कर्म यता यथा प्रोक्त प्रतिग्रहा
भवे प्रोक्तायां हृदापदि विप्रोऽ
श्नन् प्रतिगृह्णन् वा येन स्तेनोऽपि
नाघभाक् गुर्व्वादि पोष्य वर्गार्थं
देवतार्थं च सर्वशः प्रत्यादद्याद्धि
जो यत्त्वमपर्ध्य मात्मनापि च।
दधिक्षाराज्य मांसानि गंधपुष्पाणि
मत्स्यकान् शय्याशनासनं शाकं
पयस्याक्षिये न कर्हिचित् अपिद्रः
स्नात कर्मभ्यः समादद्यादयाचि
तानि तेभ्यस्तथान्येभ्यः प्रतिग्राह्य
म संशये प्रतिग्रहीतं शाकस्य न
त्यागे स्वर्गो यथा शाकः प्रतिग्र
हीतं यो वेदहतः स्वसंयतः म
भ्यमानेन गृह्णाति स्वर्गं स्तस्य त
न्निश्चितं प्रतिग्रह स्मरणं वापि या
चिते यानयच्छति तत् कोटि गु
णितं ग्रस्तां स्मरतो दातृत्वमश्नुति
दाता च न स्मरेद्दानं प्रतिग्राही न
याचते तावुभौ नरकं यातो दा
तावेव प्रतिग्रही वदन्ति कवयः
केचिद्दान प्रतिग्रहो प्रति प्रसन्न
लिङ्ग मेवेदं दानं याचकयोर्बलं
दानं दत्तो भवेद्ध्रुवं यथाक्तिपूत
प्रतिग्रही यद्दाने प्रतिगृह्णीयात्
प्रतिग्राही वर्जनार्थः प्रतिग्रहप्र
कारो यथा भूमेः प्रतिग्रहं ॥

ऊर्ध्वा भूमिं कृत्वा प्रदक्षिणं करेगृ
ह्य तथा कन्यां दासदासीं तथा द्वि
जाः करे हि स्पृष्टे विप्रस्य धर्म्या
त्रयः प्रतिग्रहः आरुह्य च गजं।
स्याक्रः कर्णं चास्य स्पृशेत्तिनः न
थ्योचैकशफानां च सर्वेषामविशे
षतः प्रतिगृह्णीत गां पुंगे प्रक्षेकृ
ष्णाजिनं तथा आरण्याः पशवः
सर्वग्राम्याः पुच्छे विवक्षणेः प्रति
ग्रहं मथो रूढस्य आरुह्य वत्स पादके
ईशाया नरथो ग्राह्य छत्रे दण्डं त
धारयेत् कुमारी मथ सर्वेषां मूले
न्यस्तकरो भवेत् आयुधानि समा
दाय तथा भूषाविभूषणं धर्म्मधेनो
तथा स्पृष्ट्वा प्रविश्य च तथा गृहं ॥
अव तीर्थं च सर्वाणि जलस्थानानि
चैव हि उपविश्य च शय्यायां स्पृष्ट्वा
पित्वा करेण वा द्रव्याण्यन्यानि।
धान्यादीय स्पृष्ट्वा वा आत्मनः पवे तक
स्थाने तत् पेठ द्रव्याणि च पृथ
क् पृथक् प्रतिग्रहो द्विजश्रेष्ठ तस्य
वाहनं भवति ते द्रव्याणामथ सर्वेषां
द्रव्यसंप्रयणान्नरः वाचयेत् जलमा
दाय करेण च प्रतिगृह्णं प्रतिग्रहस्य
यो धर्म्मं न जानाति द्विजो विधिं सह
वास्तेन संयुक्तो नरकं प्रतिपद्यते
अथापि हि प्रवक्ष्यामि विधिं सर्व

विशेषणान् वाजिप्रदानेन प्रति
ग्रहे वा दानं प्रहीतोरपि येन पु
ण्यं स्वर्गमवाप्नोति स्पृशन् मेतम्
गृहीत यो स्व विधिवद्विजेन्द्रः कृ
ष्णाष्टम्यां पंचदिनानि पूर्वं पंचो
पचारैः तेन विष्णुः पूज्यो कुष्माण्ड
मंत्रैः हुत्वा हुतं होमं यद्वाम इ
त्यादि मरुत्वतीयं सोंकारपूर्वा
दिभि रन्वितेन प्रत्येकं मष्टोत्त
ऋयाद्विजेन्द्रः सूर्य्येण मंत्रेण।
च तद्दृष्टो षष्ठामयुक्तं त्रिंशतं
जुहोति ऊर्ध्वाद्भुगायत्रिं जपं सह
स्रपश्चात् मशृंसन् रोगद्विजाग्र्यः ॥
तद्धत्थात्मान मयं ततेषु हिदानापि
चैतद्वत माविदध्यात्। द्विजाग्र
वत् आक्रन्त पाप म्रक्षी द्वावप
मृत्यौ जनेस्ल भेतो इतिहस्त्या
वासदेव ४६ अध्यायः अपिच।
विष्णुधर्म्मोत्तरे वीजानां सर्षिमा
दाय रत्नान्यादाय सर्वतः। वस्त्रे
हृष्टान माहृत्यान परिधाय तथा
पुनः आरुह्य यानं तद्वदेवयान
मारुह्य पादुके प्रतिग्रहीता साचि
शीं सर्व्वं चैव प्रकीर्णयेत् ततस्तु
सार्द्ध इष्टेन तस्य द्रव्यस्य दैवत
समापयेत्ततः पश्चात् कामस्तु
भ्याः प्रतिग्रहे विधिं धर्म्ममयोक्तवा

यत्नकुर्य्यात्प्रतिग्रहं दाताशस्तरतर
त्येवनाना कुर्य्यात्सौ द्विजः ब्रह्म
पुराणे ब्राह्मणः प्रतिगृह्णीयात्
वृत्त्यर्थं साधुतस्तथा सर्व्वस्वमपि
मातङ्गात्तिललोहांश्च वर्ज्जयेत् कृ
ष्णाजिनतिलग्राही न भूयः पुरु
षो भवेत् शय्यालङ्कारवस्त्रादि
प्रतिगृह्य स्तनस्यच नरकान्निव
र्त्तेतैवेत्तिलमपीनथा । तथा
ब्रह्महत्यासुरापानमपि स्तेयं न
तिष्ठति आयुरायद्गृहीतं तन्नर्क
पैवेनतिष्ठति एतद्धि इत्यदानं
प्रतिग्रहीतदोषजनक एतदाति
रेकेव विद्यादिरहितेनासमर्थी
य च दातरपि दोषजनकमाह र
तः मकेवलं हिनस्ति शेषम
प्य च नश्यति तद्यथाह्यत एव
याज्ञवल्क्यः विद्यातपोभ्यां हीने
न नतु ग्राह्यः प्रतिग्रहः गृह्णन्प्र
दातारमधो नयत्यात्मानमेवच ।
प्रयोनरकं यतहात प्रतिग्रहोत्र
ये उक्तनयोजपातिभिस्तामनरणे
नाय स्वेच्छया प्रतिगृह्णते दा
ने न दोषाय इत्याह विष्णुः यत्ना
नि प्रतिगृह्णाति स्वेच्छयाभ्यर्थितो
नत नसेयदानेन दोषोऽस्ति यत्ना ।
त्मानं तारयेत् तारणप्रकारमा
ह हारीतः मणिवासोगवादीनां
प्रतिग्रहे सविप्रस्सहस्रंजपेत् ।
देवलः । प्रतिग्रहसमर्थोहि कृत्वा
विप्रो यथाविधि निस्तारयति
दातारमात्मानञ्च स्वतेजसा स्वकारे
वेदाङ्गपारगो विप्रो यदि कुर्य्यात्
प्रतिग्रहं न सयापेन लिप्यते यम
पञ्चभिर्भसा महाभारते नीर्थेन
प्रतिगृह्णीयात् पुण्येष्वायतनेषुच
निमित्तेषुच सर्व्वेषु न प्रमत्तो भवेन्न
रः प्रतिग्रहसमर्थस्य तदकरणेफ
लाधिक्यं यथा याज्ञवल्क्यः प्रतिग्र
हसमर्थोहि नादत्ते यः प्रतिग्रहे ये
लोका दानशीलानां सततानाप्नोति
पुष्कलान् अपवादमाह सएव ।
कुशाः शाकं पयो मत्स्या गन्धाः पु
ष्पं दधिक्षितिः मांसं शय्यासनं
धानाः प्रत्याख्येयं नवारिच अया
च्य शास्त्रगृहीतान् कुशान् गन्धाम
पः पुष्पं मणीन् दधि मत्स्यान्धानाः
पयोमांसं शाकं चैव न निर्णुदेत् ।
मणीन् विषादिनिवारकान् एधो
दकं फलं मूलं मन्त्रमभ्युद्यतं चय
त् अभ्युद्यतं आगच्छदत्त सर्व्व
तः प्रतिगृह्णीयात् मध्वथाभय
दक्षिणां किंचित्तनमस्याख्येयमि
त्याहमनुः अयाचिताहृतं ग्राह्यं ।

मपि दुष्कृतकर्म्मणः अन्यत्र कुल
टाषण्ढपतितेभ्यस्तथा द्विषः ॥
प्रतिग्रहमात्रे प्रयोगसारे प्रति
ग्रहं न गृह्णीयादात्मभोगविधि
त्सया देवतातिथिपूजार्थं ।
यत्नाहुतमुपार्ज्जयेत् अङ्गिराः
कुटुम्बार्थे द्विजः शूद्रात् प्रतिगृ
ह्णीतयाचितं क्रत्वर्थं मात्मनेचैव
नहि याचेत कर्हिचित् यज्ञार्थं
याचने निन्दामाह याज्ञवल्क्यः
चाण्डालो जायते यज्ञकरणाच्छू
द्रभिक्षितात् इति श्राद्धतत्त्वं ॥
प्रतिग्राहः पुं पतद्ग्रहः इत्यमरः
प्रतिग्रहणं च ॥
प्रतिघः पुं क्रोधः इत्यमरः ॥
प्रतिघातः इति मेदिनी मूर्च्छे:
इति शब्दरत्नावली ॥
प्रतिघातनं क्ली मारणं इत्यमरः
प्रतिघ्नं क्ली अङ्गं इति शब्दचन्द्रि ।
का प्रतिच्छन्दः [५] क्ली प्रतिरूपं इ
तित्रिकाण्डशेषः ॥
प्रतिच्छाया स्त्री प्रतिकृतिः मूर्त्ति
सदृशमृत्तिकादिनिर्म्मितप्र ।
तिरूपं इत्यमरभरतौ ॥
प्रतिजङ्घा स्त्री अग्रजङ्घा इति हे
मचन्द्रः ॥
प्रतिजल्पः पुं वाक्यविशेषः यथा
उत्पन्नद्वन्द्वभावेऽस्मिन् प्रामिन्नीहं
सच्छुद्धे त्वत्सन्मानेनेनोक्तं यत्र
स प्रतिजल्पकः इत्युज्ज्वलनी ।
लमणिः ॥
प्रतिजागरः पुं प्रत्यवेक्षणं तत्
पर्य्यायः अवेक्षा २ इत्यमरः जागरप्रतिनिधिः १ जागर
हे गृहमवेक्षस्व इत्यादिनियोगस्य
इति रायमुकुटः ॥
प्रतिजिह्वा स्त्री तालुमूलस्थित
इजिह्वा आलजिभ इति भाषा तत्प
र्य्यायः प्रतिजिह्विका १ [illegible] २ ल
नका ३ अलिजिह्विका ४ इति
शब्दरत्नावली ॥
प्रतिजिह्विका स्त्री प्रतिजिह्वा इ
तित्रिकाण्डशेषः ॥
प्रतिज्ञा स्त्री कर्म्मव्यात प्रकारक
ज्ञानानुकूलव्यापारः इत्यनुमि
तिगादाधरी साध्यनिर्द्देशः इ ।
तिगौतमसूत्रे साध्याभिधायि
कावाक् इति व्यवहारतत्त्वं तत्
पर्य्यायः आ १ प्रतिज्ञानं २ अङ्गी
कारः ३ प्रतिश्रवः ४ ओं ५ समा
धिः ६ संवित् ७ आगूः ८ आश्र
वः ९ संश्रवः १० नियमः ११ आ
भ्युपगमः १२ वाक् १३ आस्था १४
इति शब्दरत्नावली ॥ ॥
संधा १५ सङ्गरः १६ संश्रावः १७

उत्तरीकारः ८ ध्रुवः ९ इति ज
टाधरः प्रतिज्ञाविरोधो न कर्त्तव्यः
यथा त्वयास्यै देव्याधिपतेर्वाच्यं।
ग्राम यत्नोपलं प्रतिज्ञा नावरोध
व्या स्वल्पकेष्वपि वस्तुनि इत्यादि
पुराणं ॥ प्रतिज्ञातं त्रि अङ्गीकृ
ते इत्यमरः ॥
प्रतिज्ञानं क्ली प्रतिज्ञा इत्यमरः।
प्रतिज्ञेयः पुं स्तुतिपाठकः इति
भूरिप्रयोगः प्रतिज्ञातव्ये त्रि ॥
प्रतितालः पुं तालविशेषः यथा
कोनारः समराख्यश्च वैकुण्ठो वा
छिन स्तथा कथिताः शङ्करेणै
वचनाः प्रतितालका कोनारो
यथा कोनारः प्रतितालस्तु चेद्
कौरेद्रुत द्वये द्रुतान्तर परेनाथ
संगाने वर्त्तते रसो १ समराख्या
यथा। लघुद्रुतौ लघु स्तोत्रेन
प्रतालउद्धाहृतः रुद्रसंख्योत्त
रपदः समरे वीरके रसे २ वैकुं।
ठो यथा रुद्र त्रयस्तु वैकुण्ठे प्र
तिताले समीरितः यार्कसंख्या
तौ रः पातो ह्रासे त्रिपुटतालके
३ वांछितो यथा वांछित।
स्तृतीये ताले लघु रेको द्रु
तस्तथा चयोद्रुतान्तरे पु
रो वास ३ हृते ॥

प्रकीर्त्तितः ४ इति संगीतदामो
दरः ॥
प्रतिताली स्त्री तालकोद्घाटनयं
त्रं चाबि इति भाषा इति हेमचन्द्रः
प्रतिदानं क्ली विनिमयः न्यस्ता
र्पणं इत्यमरः ॥
प्रतिदारणं क्ली युद्धं इति श
ब्दमाला ॥
प्रतिदिनं क्ली प्रत्यहं दिनं दिनं
प्रति यथा ततः प्रतिदिनं वेला
वर्द्धते त्रिपलात्मिका इति सत
कृत्यमुक्तावली ॥
प्रतिदिवा न पुं सूर्य्यः इति त्रिकां
डशेषः प्रतिदिनंच ॥
प्रतिदीवा न पुं सूर्य्यः इति शब्द
रत्नावली ॥
प्रतिदेयं त्रि क्रीतद्रव्यस्य दः क्री
तवुद्धा परावृत्य दानं यथा क्रीत्वा
मूल्येन यः पण्यं दुः क्रीतं मन्यते
क्रयी विक्रेतुः प्रतिदेयं तत्तस्मिन्न
वाप्यविदाते इति मिताक्षरा प्रति
ध्वनिः पुं प्रतिनादः गुमरनु।
इति भाषा तत्पर्य्यायः प्रति।
शब्दः १ प्रतिश्रुत् २ प्रतिध्वानं ४
इति शब्दरत्नावली ॥
प्रतिध्वानं क्ली प्रतिध्वनिः इत्यमरः
प्रतिनप्ता पु प्रपौत्रः इति हेम।

चन्द्रः ॥
प्रतिनवं त्रि नूतनं इति जटाधरः
प्रतिनिधि पुं प्रतिमा इत्यमरः
मुख्यसदृशः तस्य विवेचनं य
था अत्यन्तासामर्थ्ये पुत्रकेदृष्यग्र
णे पुत्रं वा विनयोपेतं भगिनीं भ्रा
तरं तथा एषा मभाव एवान्यं ब्रा
ह्मणं विनियोजयेत् गरुडपुरा
णे भार्य्या भर्त्तुर्व्रतं कुर्य्याद् भार्य्या
याश्च पति स्तथा असामर्थ्ये तयो
स्ताभ्यां व्रतभङ्गो न जायते वराह
पुराणे पितृ मातृ पति भ्रातृ श्व
श्रूगुर्व्वादि भूभुजां अद्दिश्यार्थम
पोथित्वा स्वयं च फलभाग्भवेत्
अत्रैव विषये कात्यायनः दक्षिणा
नाथकर्मत्वा पृच्छ्या विहिता च या
मत्र प्रतिनिधौ ममेह शर्म्मदीघ्राम
त्वस्य फलं कुर्य्यान्वेति चेत प्रधान
एव तथा च धार्द्विविक भाष्ये श्रु
तिः यां वै कांचन यज्ञ ऋत्विज।
आशिषमाशासते यजमानायैव।
तामाशासत इति होवाच इति। ब्रा
ह्मणसर्वस्वे तु यजमानायेत्यत्रो
यजमानस्यैव संतिपाठ विशेषः
तथा च सरलार्थ स्तु यां वै कांचन
यज्ञ ऋत्विज आशिषमाशासते सा
यजमानस्यैवेति।

ऋत्विक् यजमान पदे प्रतिनिधि
प्रधान पदे आकांक्षितत्वादिति
अत एव प्रतिनिधि पुत्रादिनाप्या
यन्तु नः पितर इत्यादि वदन्नूह
एव पठति वाक्यस्य काल्पनिक
त्वात्तन्नतच्चेति अत्र प्रतिनिधि
प्रसंगेन स्मृत्यनुसारात् किंचि
ल्लिख्यते कालमाधवीये काम्ये
प्रतिनिधि र्नास्ति नित्य नैमित्ति
के हि सः काम्येषुपक्रमादूर्द्धम
न्ये प्रतिनिधिं विदुः अस्यार्थस्तु
माधवाचार्य्येणाभिहितः यथा नि
त्यनैमित्तिकं प्रतिनिधिनाप्युपक्र
म्य कारयेत् काम्यस्तु समामर्थ्ये
पर्य्यालोच्य यमेव उपक्रम्य कुर्य्यात्
असामर्थ्ये तु उपक्रमादूर्द्ध प्रतिनि
धिनापि तत्कारयेत् एतेच का
म्यश्रौतपरं काम्यस्मार्त्तं तत्रान्य
द्वाराप्युपक्रम्य कुर्य्यात् तथा च
पराशरभाष्ये शातातपः श्रौते
कर्म्मस्वयं कुर्य्यादन्योऽपि स्मार्त्तमा
चरेत् अशक्तौ श्रौतमप्यन्यः कु
र्य्यादाचार मन्ततः यजतः उपक्र
मात् परतः अन्यथा नित्यनैमित्ति
कमात्र परत्वे श्रौतस्मार्त्तभेदेनो
पादानं वार्थं स्यात् नयोरविशेषादे
व प्रतिनिधिलाभात् अत एव भाव



तपावाद्यैस्तथा समाचारः स्मृत्यर्थ
सारेनाभावस्य प्रतिनिधि रभावां
तर मिष्यते सजातीयमप्यभावां
तर मभावस्यप्रतिनिधि र्नेष्यते।
भावस्तु कदाचित् यथोपवासा
दौ ब्राह्मणभोजनादि नापि प्रति
निधानत्वं निषिद्धं वस्तु कुत्रचित्
श्रोत्रियाणा मभोज्यंच यद्द्रव्यं तद्
शेषतः प्रास्य प्रतिनिधित्वेन होम
कार्य्येन कुत्रचित् द्रव्यं वैकल्पिकं
किंचिद्यत्र सकल्पितं भवेत् तद्।
लाभे सदृशं ग्राह्यं न तु वैकल्पिकां
तरं उपात्तेन प्रतिनिधौ मुख्यार्थो
लभ्यते यदि तत्र मुख्य मनादृत्य
गौणेनैव समापयेत् संस्काराणा
मयोग्यो ऽपि मुख्य एव हि गृह्यते।
न तु संस्कार योग्यो ऽन्यो गृह्यते प्र
तिरूपकः मुख्ये कार्य्यासमर्थे तल्ल
क्षेपेण तस्य तादरः प्रति रूपमुपाद
य शास्त्रे ऽन्योपयुज्यते कार्ष्टे रूपै
स्तथा पर्णैः क्षीरैः पुष्पैः फलै
स्तथा गंधैः रसैः सदृशग्राह्यं सर्वा
लाभे परंपरं ग्राम्याणां तु भवे
दारण्यानामरण्यजं ॥
यवाभावे तु गोधूमा स्तथा वे
ण यवादयः हविष्यं गोधूमं।
प्रासं तदलाभे तु माहिषं प्राज्यं

वा तदलाभेन सात्वातैलं प्रयु
ज्यते तैलाभावे ग्रहीतव्यं तैल
जं तिलसंभवं तैलजं तिलसं
भवं तैलमुष्टं तिलपिष्टं तदभा
वे तु सर्षपं कौसुम्भं सर्षपोद्भ
वं हत स्नेहो ऽथवा ग्राह्यः पू
र्वाभावे परः परः तदभावे गवा
दीनां क्रमात् क्षीरं विधीयते ॥
तदलाभे दधिग्राह्य मलाभे तिल
इष्यते। यत्र मुख्यं दधि क्षीरं तत्रा
पि तदलाभतः अजादेः क्षीरद
ध्यादि तदलाभे तु गोघृतं तथा
सर्वे ऽप्यथवा ग्राह्यः कार्य्यकारण
संगतौ अतएव हुताभाव पूर्वं
दधि ततः पयः तथा सर्वत्र गौ
णकालेषु कर्मचोदितमाचरेत्।
प्रायश्चित्तं व्याहृतिभि कृत्वा कर्म
समाचरेत् मात्स्ये। हुते तलभ
ते यत्र मधुक्षीरेण होमयेत्।
क्षीरस्य च दधि तैस्य मधुनस्तु गुडो
भवेत् व्याघ्रदेवेपि मधु यत्र न
विद्येत तत्र जीर्णगुडो भवेत् ॥
पैठीनसिः काण्डमूल पर्ण पुष्प
फल प्ररोह रस गंधादीनां सादृश्येन
प्रतिनिधिं कुर्य्यात् सर्वालाभे यवः
प्रतिनिधि र्भवति काण्डे नाले प्ररो
हेः हरः सर्वालाभे यव इति ॥

कल्पतरुः अवयव इति नारायणो
पाध्यायाः श्रांति दीपिकायां नार
दीयपंचरात्रे अभावे चैव यात्।
नारिकेलं प्रशस्यते बीजाना
मप्यलाभेन यवपको विधीयते।
ओषधीना मलाभेन सहदेवा प्र
शस्यते रत्नाना मप्यलाभेन मु
क्ताफल मनुत्तमं लोहाना मप्य
लाभे तु हेमपात्रं प्रकल्पयेत् लो
हाना मप्यलाभे तु हेमपात्रं प्रक
ल्पयेत् लोहानां तैजस पात्राणां॥
न्यायप्राप्तप्रतिनिधिमधिकृत्यजै।
मिनिः न देवताग्निशब्दक्रियमि।
ति अस्यार्थः देवताया आहवनी
यादे मंत्रस्य प्रयाजादेः दृष्टार्थं क
र्मणः आदृष्टमात्रार्थकत्वेन प्रारा
दुपकारकत्वाय प्रतिनिधिः शीघ्रा
हीनोत्त सन्निपत्योपकारकाणांपु
रोडाशसाधनं दृष्टमेव प्रयोजनं।
मिति तत्र प्रतिनिधि रुचित इत्युक्तं
इत्येकारप्रीत्यर्थं आरब्धकार्त्तिका
दिसत्यानेन व्याध्यादिना सामर्थ्यं पु
त्रादिभिः प्रतिनिधिना कारयितव्यं ना
न्यकल्पविधिना तत्स्नानपवनहिया
नादिति इति मलमासतत्वं स्वयंकर
णासामर्थ्ये अन्यद्वारा यथा दक्षः स्वयंहोम
फलं यत्र तदन्येनेन जायते ऋत्विक्पुत्रो

गुरुर्भ्राता ॥
भागिनेयो ऽथ विट्पतिः एभि
रेव कृते यत्तु तद्भुतं स्वयमेव हि
विट्पतिर्जामाता एवंच ऋत्वि
गादीनरत्र फलमनुतना अत्रा
शौचाशंकया बाधनदिनात् पू
र्वं शुचि तत्कालजीवित्व रूपा
धिकाराभावेपि यदुद्दरणादिकं
क्रियते तत्कर्मकाले तस्य ता र
दोषक स्वयंप्रवर्त्तन वत्प्रवर्त्तनाय
तत्र तदानीं प्रतिनिधीयते अथ
वा निः क्षिप्याग्निं स्वदारेषु कत्विक
ल्पर्त्विजं तथा प्रवसेत् कार्य्यवा
नृविप्रो वृथैव न चिरं वसेदिति छं
दोगपरिशिष्टवदन्यत्रापि प्रति
निधीयते एवं वरणं विनापि ऋ
त्विग्यदि ऋत्विक् प्रवर्त्तते तथा
पि न कर्मसिद्धिः दक्षिणा च न
लभ्यते विकाले दानयोगीति तथा च
नारदः ऋत्विक् च त्रिविधो दृष्टः
पूर्वजुष्टः स्वयंकृतः यदृच्छया च
यः कुर्य्यादात्मिज्यं प्रीति पूर्वकं
यदृच्छया स्वेच्छया इति मिथ्यादि
तत्त्वे प्रतिपः ए सोमनूराज
इति शब्दरत्नावली प्रतिपत्स्त्री
दग्धयो इति त्रिकाण्डशेषः
बुद्धिः तिथिविशेषः तत्पर्यायः प
त्ति २

इत्यमरः सा च चंद्रस्य प्रथमक
लाक्रियारूपा वृद्धिरूपा चेत् शु
क्ला १ पकांककेपिता ह्रासरूपा
चेत् कृष्णा २ सप्तदशांककेपिता
तस्याश्चवस्था यथा सा च कृष्णा
द्वितीयाशुक्लाद्यास्ता प्रतिपत् स
द्वितीया स्यादित्यापस्तंबीयात्
शुक्लाद्यमावस्यायुता ग्राह्या ।
प्रतिपदाद्यमावास्येति वचना
त् त्रिसंध्यव्यापिनी चेत् सर्वत्र तु
स्मादरः तथा च पराशरः त्रिसंध्य
व्यापिनी या तु सैव पूज्या सदा ति
थिः न तत्र युग्मादरणमन्यत्र ह
रिवासरात् कृत्स्नापि उपवासे द्वि
तीया युता न ग्राह्या तथा च वृद्ध
वसिष्ठः द्वितीया पंचमी वे
धाद्दशमी च त्रयोदशी चतुर्द
शी चोपवासे हन्युः पूर्वोत्तरे
तिथी द्वितीया वेधात् यावात्
प्रतिपत्तीये हंतीत्यर्थः एव
मन्यत्र यत्रोपवास परेण विधे
य विधानात् आपस्तंबीय सा
मान्य वचनस्य संकोचः कार्त्ति
क शुक्ल प्रतिपदमधिकृत्य बलि
प्रतिपद्वहाको वीर प्रतिपदा नाम ।
तत्र भावी महोत्सवः यत्र त्वा नरश्चा
दैत्यराज्ञः पूज्याः स्वलंकृतः पुष्पैः
मद्दानेन पूजयिष्यंति मानवाः तत्र मंत्रः
बलिराज नमस्तुभ्यं विरोचनसुत
प्रभो भविष्येंद्र सुराराते पूजेयं प्र
तिगृह्यतां । प्रतिपादो प्रतिपत्ति
ब्दो । अत्र प्रतिपदि । ब्रह्मपुराणे
तु बलिराजेति मंत्रस्य पूर्वमेव
णानेन राजेंद्र समंत्री सहरोहि
त इत्यर्द्धं पश्चादपि । एवं पूजां
न्पः कृत्वा रात्रौ जागरणं व्रत
इत्युक्तमिति पुनर्ब्रह्मपुराणे ॥
शंकरश्च पुरा द्यूते ससर्ज सुमनो
हरं कार्त्तिके शुक्लपक्षे च प्रथमेः
ऽहनि भूपते जितश्च शंकरस्तत्र
जयं लेभे च पार्वती । अतोऽर्थाच्छं
करो दुःखी नित्यं गौरी सुखोषि
ता तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते
तत्र मानवैः तस्मिन् द्यूते जयो
यस्य तस्य संवत्सरः शुभः प
राजयो विरुद्धश्च लब्धनाशकरो
भवेत् पुनर्वाद्यपाणिभिः क्रीडनं
यथा मनुः अप्रमाणिभिः यत्कि
यते न लोके पुनरुक्ते नतिथिसधि
कस्म भविष्यान्तरे यो यो यादृशभावे
न तिष्ठत्यस्यां युधिष्ठिर हर्षदैन्या
दिना तेन तस्य वर्षं प्रयाति हि ॥
तथा महापुराण तिथितत्वे बलि
राज्य प्रवर्त्तिनी स्नाने दाने ध्यान
गुणाः कार्त्तिके स्या ति ॥ ।

द्यो भवेत् प्रतिपद्रोहिणी योगो
यथा भविष्ये रोहिण्यां तिपद्युक्ता
मार्गे मासि सितेतरा गंगायां य
दि लभ्येत सूर्यग्रहशतैः समा ।
तस्याः संज्ञा नंदा तत्राभ्यंग नि
षेधो यथा नंदासु नाभ्यंग मुपा
चरेत् क्षौरं च रिक्तासु जयासु
मांस पूर्णासु योषित् परिवर्ज
नीया भद्रासु सर्वाणि समाच
रेत् नंदादि क्रममाह ज्योतिषे
नंदा भद्रा जया रिक्ता पूर्णा प्रति
पदः क्रमात् प्रतिपदादि पंचद
शतिथिषु पंचदशद्रव्यभक्षण
निषेधमाह स्मृतिः कूष्माण्डे ।
चार्थहानिः स्यात् बृहत्यां तु स्म
रेद्धरिं वकुशत्रुः पटोले स्यात्
तु हानिश्च मूलके कलंकीजा ।
विल्वे तिर्यग्योनिश्च निंबके ।
तालेशरीरनाशः स्यान्नारिके
ले च मूर्खता तुंबी गोमांस तु
ल्या स्यात् कलंबी गोवधात्मिका
शिंबी पापकरी प्रोक्ता पूतिका
ब्रह्मघातिका वार्त्ताकी सुतहा
निः स्याच्चिररोगी च माषके स
र्वपापकरं मांसं प्रतिपदादिषु
वर्जयेत् तत्रदोषनिषेधो यथा
वारे विशाखा प्रतिपत्सु वर्मं इ
तिथ्यादितत्वे नक्षत्रात फलं
मणिकनक विभूषा संयुतस्त्रा
रुकान्ति र्निजकुलकमलोद्वाट
मार्त्तंडबिंबः प्रतिपदि प्राप्तिपूर्णो
लब्धजन्मा प्रतापी भवति विम
लवेशा श्चारुकेशः प्रजेशः इति
कोष्ठीप्रदीपः सा ग्राह्येत्याति ।
थिः महातपा उवाच विष्णो र्विभू
तिमाहात्म्यं कथितं ते प्रसंगतः
तिथीनां श्रूण माहात्म्यं कथ्यमा
नं मया नृप इत्युक्तो महातप
बैलिकोधोऽसौ महान् उवाच ।
देवं ब्रह्माणं तिथिं मे दीयतां प्र
भो यस्यामहं समस्तस्य जगतः
ख्यातिं मामुयां ब्रह्मोवाच देवा
नामथ यक्षाणां गंधर्वाणां च
सत्तम आद्या प्रतिपदा येन त्वम
स्माकं पावक त्वमदात् प्राति
पदकं सम्भविष्यति देवताः अत
स्ते प्रतिपन्नाम तिथिरेषा भवि
ष्यति तस्यां तिथ्योहविष्येण
आज्ञापयेन मूर्त्तिना होष्यति
तेषां प्रीताः स्युः पितरः सर्वदे
वताः चतुर्विधानि भूतानि म
नुष्याः पशवः सुराः देवाः
सर्वे सगंधर्वाः प्रीताः स्युस्त
र्पितेऽत्वयि यश्चोपवासं कुर्वीत
तवद्भक्तः प्रतिपद्दिने दीवाशनो



वार्तेन स्नाने तस्य फलं महत्
चतुर्युगानि षट्त्रिंशत्तन्लोके
प्रोमहीयते तेजस्वी रूपसंप
न्नोऽर्थवान्जायते नरः इहज
न्मन्यसो राजा स्वर्गलोके मही
यते तत्सीम्बभूव सोऽप्यग्रे व
ल दत्ताश्चर्ययो य इदं स्नाने
यात्रित्यप्रातरुत्थाय मानवः अ
ग्रे जन्मसु पापेभ्यो मुच्यते नात्र सं
शयः इति वराहपुराणे महात
पोपाख्याने अगस्त्यतिनाम्ना ।
ध्यायः प्रतिपदि चंद्रदर्शनका
रणं यथा अमावस्याचतुर्दशी
ध्या षष्ठ्याहर्मानसंयुता सूर्य
राहुचतुर्थीष्वष्टद्विधिका ह्यपते
प्राष्टी इति ज्योतिषे ॥
प्रतिपत्तिः स्त्री प्रवृत्तिः प्राग
ल्भ्यं गौरवे संप्राप्तिः प्रबोधः
पदप्राप्तिः इति मेदिनी मीमां
सक मते फलशून्य कर्मणि
यथा देवतोद्देशेन यागादौ
त्यक्त हविरादे रागो निःक्षेपः
प्रतित प्रतिमादे जैले विस
र्जनमित्यादि ॥
प्रतिपत्तिपटहः पुं वाद्य
विशेषः नागरा इति भाषा ॥
तत्पर्यायः ॥ लम्यापटहः २
इति हारावली ॥

प्रतिपत्तूर्य्यं क्ली डगडवाद्यं इ
ति त्रिकाण्डशेषः ॥
प्रतिपन्नफला स्त्री लक्ष्कारवे
ल्ली इति राजनिर्घण्टः ॥
प्रतिपन्नं त्रि अवगत इत्यमरः
अंगीकृतं इति मेदिनी विक्रा
न्तः इति हेमचंद्रः ॥
प्रतिपर्णशिफा स्त्री द्रवंतीर्
ति राजनिर्घण्टः ॥
प्रतिपत्तः पुं शत्रुः इति हेमचं
द्रः साहसं यथा प्रतिबोधि
प्रतितिथि प्रतिपत्त विड्वकाः
इति काव्यचंद्रिका प्रतिवादी च
प्रतिपादकः त्रि प्रतिपत्तिजन
कः बोधकः यथा प्रतिपाद्यप्र
ति पादक भावश्च संबंधः इति
दिनकरी ॥
प्रतिपादनं क्ली दानं प्रतिपत्तिः
बोधनं इति मेदिनी ॥
प्रतिपालकः त्रि पालनकर्त्ता प्र
तिपालयतीति प्रति पूर्व ण्यं ।
तपाधातो र्णक प्रत्यय निष्पन्नः
प्रतिपालनं क्ली रक्षणं पोषणं
यथा कंसायसेनस्य कर्णस्य राधा
प्रतिपालनात् राधेयत्वं संगच्छ
ते इति दुर्गादासः ॥
प्रतिपाल्यं त्रि प्रतिपालनीयं ।

प्रतिपालनीयं प्रति पूर्व ण्यंत ।
पाल रक्षणे इत्यस्मात् कर्मणि
य प्रत्ययेन निष्पन्नं ॥
प्रतिप्रसवः पुं निषिद्धस्य पुनर्वि
धानं यथा रविशुक्र दिने चैव द्वा
दश्यां श्राद्धवासरे इत्यादि नानि
षिद्धस्य तिलतर्पणस्य तीर्थेतर
त्र प्रतिप्रसव माह स्मृतिः अयने
विषुवे चैव संक्रांत्यां ग्रहणेषु च
इत्यादि प्रायश्चित्त तत्त्वे प्रतिप्रसू
तः त्रि प्रतिप्रसव विशिष्टः इति
मलमासतत्त्वे पुनः संभावितः
यथा उक्तानि प्रतिसिद्धानि पुनः
संभावितानि च सापेक्ष निरपेक्षा
णि मीमांस्यानीह कोविदैः इति
सत्कृत्यमुक्तावली प्रतिफलं क्ली
प्रतिबिंब यथा।
प्रतिफलमवलोक्य स्वीयमि
न्दोः कलायाः हरशिरसि परस्या
वासमाशंकमाना इति रसमञ्ज
री तुल्यफलं फलफलं च ॥
प्रतिफलनं क्ली प्रतिबिम्बं यथा
न विंबं वदित्व प्रतिफलन लाभा
दरुणिते तला मध्या रोष्ठ कण्ठ
मपि न लज्जेत कलया इत्यानंद
लहरी प्रतिफलितं त्रि प्रतिबिंबि
तं यथा मोहातीतो विप्रेद्रा मुनि
भिरभिहितो मोहसंक्रांत मूर्त्तिः

साक्षी स्वांते तदस्य प्रतिफलि
त वपुरित्यादि मुक्तिवाद गादा
धरी प्रतिफलकः त्रि प्रफलः
इति शब्दचंद्रिका ॥
प्रतिबद्धः त्रि प्रतिबंधविशिष्टः
प्रति पूर्व बंधधातोः कर्मणि
क्त प्रत्ययेन निष्पन्नः ॥
प्रतिबध्यः त्रि प्रतिबंधनीयः
प्रतिबंधार्हः यथा वस्तुतो हे
तुमन्निष्ठाभावप्रतियोगितावं
च्छेदकत्वप्रकारिता प्रत्यक्षज्ञान
वृत्ति प्रकारितानवच्छेदकत्वेनैव
प्रतिबध्यत्वं निवेशनीयमिति व्याप्य
नुगमजागदीशी प्रतिबंधः पुं
कार्यप्रतिघातः तत्पर्यायः प्र
तिष्टंभः २ इत्यमरः प्रतिबंधकः
पुं विटपः इति शब्दचंद्रिका ॥
प्रतिबोधके त्रि प्रतिबंधि पुं ग्र
न्थिष्ठांतर प्रसंजकं वाक्यं । प्रति
बंधः यथा । प्रतिबंधेरनता
दाहेति विशेषव्याप्तिजागदीशी
प्रतिबलः त्रि समर्थः शक्तः
इति त्रिकाण्डशेषः तुल्यबल
श्च प्रतिभयं त्रि भयंकरं इत्यम
रः भयं क्ली इति मेदिनी ॥
प्रतिभा स्त्री बुद्धिः इति हेमचंद्रः
प्रत्युत्पन्नमतित्वं इति प्रति



भान्वित शब्द टीकायां भरतः
नवनवोन्मेषशालिनी प्रज्ञा य
था प्रज्ञा नवनवोन्मेषशालिनी
प्रतिभामता इति रुद्रः दीप्तिश्च
प्रतिभान्वितः त्रि प्रगल्भः प्रत्यु
त्पन्नमतियुक्तः इत्यमरः ॥
प्रतिभामुखः त्रि प्रगल्भः इ
ति हेमचंद्रः ॥
प्रतिभावान् त्रि प्रतिभान्वि
तः प्रागल्भ्ययुक्तः प्रतिभा
शब्दादस्त्यर्थे वत प्रत्ययेन नि
ष्पन्नः ॥ प्रतिभाहानिः स्त्री
बुद्धिनाशः इति शब्दमाला ॥
प्रतिभूः पुं लग्नकः जामिन्
इति पारस्यभाषा इत्यमरः ।
तस्य कर्त्तव्यत्वं यथा सभाप
तेः कर्त्तव्य माह कात्यायनः
अथचेत्प्रतिभूर्नास्ति वाद्ययो
ग्यस्तु वादिनः स रक्षितो दि
नस्यान्ते दद्याद्भृत्याय वेतनं प्रति
भवति तत् कार्ये तद्दद्वती
ति प्रतिभूर्लग्नकः वादयोरपि
विवादफलस्य साधित धना
दि दानस्य दण्डदानस्य च क्षमः
वादिनोः भाषावादिनः उत्तरवादिन
श्च तथाच याज्ञवल्क्यः उभयोः प्रति
भूर्ग्राह्यः समर्थः कार्यनिर्णये प्रति
भुवस्त्वभावे च राज्ञा ॥
संरक्षणं तयोः राज्ञा सं‥पनं
देउ तल्पधिकरणे निर्णयस्य
कार्ये धनादिदाने राजदंतादि
त्वात् कार्यग्राहस्य पूर्वनिपातः
श्रेयः मद्दत्तको राजनियुक्तः
इति व्यवहारतत्वं ॥
प्रतिमः त्रि उत्तरपदस्थ सदृशावा
चकः यथा गुरुत्तरपदे प्रख्यः
प्रकारः प्रतिमो नितः इति हेम
चंद्रः प्रतिमा स्त्री गजदंतस्यबं
धः अनुकृतिः इति मेदिनी मू
र्त्ति सदृशी मृत्तिकादि निर्मित
प्रतिरूपकं तत्पर्यायः प्रतिमानं
२ प्रतिबिंबं ३ प्रतियातना ४ प्र
तिच्छाया ५ प्रतिकृतिः ६ अर्चा ७
प्रतिनिधिः ८ इत्यमरः प्रतिच्छंदः
९ प्रतिकायः १० प्रतिरूपं ११ ।
इति हेमचंद्रः प्रतिमा वदन प्र
माणं यथा विश्वोस्ता वत् प्रव
क्ष्यामि यादृशं रूपं प्रशस्यते शं
खचक्रधरं शान्तं पद्महस्तं गदा
धरं छत्राकारं शिरस्तस्य कंबुग्री
वं शुभेक्षणं तुंगनासं शुक्तिकर्णं
प्रशान्तोरु भुजक्रमं क्वचिदष्टभु
जं विद्याच्चतुर्भुजं मथापिवा द्वि
भुजं वापिकर्तव्यं भवनेष्वल्पधेसा।
देयमष्टभुजं तस्य यथास्थानं निबोध मे

खाने पादौ तु चतुरंगुलौ चतुर
ष्टांगुलस्तद्वन्मौलिरस्य प्रकीर्त्ति
तः अङ्गुमानमिदं प्रोक्तं पृथुत्वं च
निबोधत सर्वावयवमानेषु विस्त
रेणापरन् द्विजाः चतुरंगुलं लला
टं स्यादूर्द्ध्वं नासा तथैव च द्व्यंगु
लं हनुस्तेय ओष्ठ श्चांगुलसंमि
तः अष्टांगुलं ललाटं तु तावन्मा
त्रे भ्रुवौ मते । अर्द्धांगुला भ्रुवो
र्लेखा मध्ये धनुरिवानता उन्न
ताग्रा भवेत् पार्श्वे श्लक्ष्णा तीक्ष्णा
प्रशस्यते अक्षिणी द्व्यंगुलायामे
तदर्द्धं चैव विस्तरे उन्नतोदर म
ध्ये तु रक्तान्तेशुभलक्षणे तार
का च त्रिभागेन दृष्टिः स्यात् पंच
भागिकी द्व्यंगुलं भ्रुवोर्मध्यं ना
सामूलमथांगुलं नासाग्रविस्त
रं तद्वत् पुटद्वयमथानतं नासापु
टबिलं तद्वदर्द्धांगुलमुदाहृतं ।
कपोले द्व्यंगुले तद्वत् कर्णमूला
द्विनिर्गते हन्वग्रमंडले तद्वद्विस्ता
रो द्व्यंगुलो भवेत् अर्द्धांगुला भ्रु
वोराजीस्त्वोष्ठस्तत्सदृशी समा अ
र्द्धांगुलः समस्तद्वउत्तरोष्ठस्तु वि
स्तरे निष्पाव सदृशो तद्वन्नासा
पुटदले भवेत् सृक्कणी स्मितसंश्लि
ष्टे च कर्णमूलात् षडंगुले क
र्णौ तु भ्रूसमौ ज्ञेयौ वुद्धेन चतुरंगुलौ
द्व्यंगुलौ कर्णपाशौ तु मात्रा ने
कांत विस्तरौ कर्णयोः रूपविद्या
च मस्तकं द्वादशांगुलं ललाटं पृ
ष्ठतो द्वेन प्रोक्तं मष्टादशांगुलं ष
ट्त्रिंशदंगुलश्चास्य परिणाहः शि
रो गतः सकेश निचयश्चास्य द्वि
चत्वारिंशदंगुलः केशान्ताद्धनुके
तद्वदंगुलानि तु षोडश ग्रीवामध्य
परीणाह श्चतुर्विंशति रंगुलः ।
अष्टांगुला भवेद्ग्रीवा पृथुत्वेन वि
शिष्यते स्तनग्रीवान्तरे प्रोक्तमेक
तालं स्वयंभुवा स्तनयो रंतरं तद्व
द्द्वादशांगुलमिष्यते स्तनयोर्मंड
लं तद्वद्द्व्यंगुलं परिकीर्त्तितं चूचु
कं मंडलस्यांतर्यवमात्रं उभे स्मृते
द्वितालं चापि विस्तारादुरस्थल
मुदाहृतं कक्षे षडंगुले प्रोक्ते वा
हुमूले स्तनान्तरे चतुर्दशांगुलौ
पादावंगुष्ठस्तु त्र्यंगुलः पंचांगुल
परीणाहमंगुष्ठाग्रं तथोन्नतं अं
गुष्ठकसमा तद्वदायामे स्यात् प्र
देशिनी तस्याः षोडश भागेन ही
यते मध्यमांगुली अनामिकाष्टभा
गेन कनिष्ठा चापि हीयते पर्वत्रये
ण चांगुल्यो गुल्फौ द्व्यंगुष्ठकौ मतौ
पार्ष्णिर्द्व्यंगुलमात्रा तु कलयो
र्द्वा प्रकीर्त्तिता द्विपर्वांगुष्ठकः ।



एवङ्गोभादा परः पद्मं देयं दक्षिणे
तोहरेः पत्रस्थ खेटकं चैव शंखंच
के च वामतः चतुर्भुजस्य वक्ष्यामि
यष्टेवायुध संस्थितिः दक्षिणे
नगदां पद्मं वासुदेवस्य कारयेत्
वामतः शंखचक्रे च कर्त्तव्ये भू
तिमिच्छता कृष्णावतारे तु गदा
वामहस्ते प्रशस्यते यष्टेच्छयाश
ख चक्र शुभ दृष्टात् प्रकल्पयेत् स
र्यस्तात् पृथिवी तस्य कर्त्तव्या पाद
मध्यतः दक्षिणे प्रणतं तद्वत् गरु
डं तन्निवेशयेत् वामहस्ते भवेल्ल
क्ष्मीः पद्महस्ता सुशोभना गरुत्मा
नथवा वापि संस्थाप्यो भूतिमिच्छ
ता श्रीश्च पुष्टिश्च कर्त्तव्ये पार्श्वयो
ः पद्मसंयुते तोरणं चोपरिष्टाच्च
विद्याधर समन्वितं देवदुन्दुभिसंयु
क्तं गन्धर्व मिथुनान्वितं पत्रवल्लीस
मायुक्तं सिंह व्याल समन्वितं तथा
कल्पलतोपेतं स्तुवद्भिरमरेश्वरैः
एवंविधो भवेद्विष्णु स्त्रिभागेना
स्य पीठिका नवताल प्रमाणास्तु
देव दानव किन्नराः अतः परं प्र
वक्ष्यामि मानोन्मानं विशेषतः ।
जालान्तर प्रविष्टानां भानूनां यद्र
जः स्फुटं त्रसरेणुः स विज्ञेयो वा
लाग्रं ते रथाष्टभिः तदष्ट ॥

केन लिक्षा तु यूका लिक्षाष्टकैर्म
ता यवो यूकाष्टकं तद्वदष्टभि स्त
स्तदंगुलं स्वकीयांगुलमानेन
मुखं स्याद्द्वादशांगुलं मुखमानेन
कर्त्तव्या सर्वावयव कल्पना सौ
वर्णी राजती वापि ताम्रीरत्नम
यी तथा शैल दारुमयी वापि
लौह शीशमयी तथा रीतिका
धातुयुक्ता वा ताम्रकांस्यमयी
तथा शुभदारुमयी वापि देव
तार्च्चा प्रशस्यते अंगुष्ठ सर्वादारभ्य
वितस्तिर्यावदेव तु गृहेषु प्रति
मा कार्य्या नाधिका शस्यते बुधैः
आषोडशात्तु प्रासादे कर्त्तव्या ना
धिका ततः मध्यमेन कनिष्ठा तु
कार्य्या वित्तानुसारतः द्वारोच्छ्राय
स्य यन्मानं अष्टधा तन्तु कारयेत्
भागद्वयेन प्रतिमा त्रिभागीकृ
त्य ततः पुनः पीठिका भागतः का
र्य्या नातिनीचा न चोच्छ्रिता प्रति
मामुखमानेन नवभागान् प्रक
ल्पयेत् चतुरंगुला भवेद्ग्रीवा भा
गेन हृदयं पुनः नाभिस्तस्माद
धः कार्य्या भागेनैकेन शोभिता नि
म्नत्वे विस्तरत्वे च अंगुलं परिकीर्त्ति
तं नाभेरधः स्तथा मेढ्रं भागेनैकेन
कल्पयेत् द्विभागमायतावूरू जा
नुनी चतुरंगुले जंघे द्विभागे वि

प्रोक्तः परीणाहस्त्र्यंगुलः प्रदेशि
नी परीणाहस्त्र्यंगुलः समुदाहृतः
अन्यासामष्टभागेन हीयते क्रमशो
द्विजाः अंगुलेनोच्छ्रयः कार्य्यः अं
गुष्ठस्य विशेषतः तदर्द्धेन तु शे
षाणामंगुलीनान्तथोच्छ्रयः जं
घाग्रे परिणाहस्तु अंगुलानि चतु
र्द्दश जंघे मध्ये परीणाहस्तथैवा
ष्टादशांगुलः जानुमध्ये परीणाह
एकविंशतिरंगुलः जानुच्छ्रायोऽंगु
लः प्रोक्तो मण्डलं त्र्यंगुलं पुनः ऊरु
मध्ये परीणाहस्त्वष्टाविंशतिकोऽंगु
लः एकत्रिंशोपरिष्टाच्च वृषणोऽं
गुलो पुनः अंगुलं च तथा मेढ्र प
रीणाहे षडंगुलं मणिबन्धोदयं ।
विद्यात् केशरेखां तथैव च मणि
कोष परीणाहश्चतुरंगुल इष्यते ॥
विस्तारेणा भवेत्तद्वत् कटिरष्टादशां
गुला द्वाविंशतिस्तथा स्त्रीणां स्तनौ
च द्वादशांगुलौ नाभिमध्ये परीणा
हो द्विचत्वारिंशदंगुलं पुरतः पंच
पंचाशत् कट्यां श्चैव तु वेष्टनं । क
क्षयोरुपरिष्टात् स्कन्धौ प्रोक्तौ षडं
गुलौ अष्टांगुलं च विस्तारे ग्रीवा
चैव तु निर्द्दिशेत् परीणाहे त
था ग्रीवां कलाद्वादश निर्द्दिशेत्
आयामो भुजयोस्तद्वद्द्विचत्वारिंश

दंगुलः कार्य्यं तु बाहुशिखरं प्र
माणे षोडशांगुलं ऊर्द्ध्वं यद्बाहु
पर्वान्तं विद्याद्दष्टादशांगुलं तथै
कांगुलहीनं तु द्वितीयं पर्व मुच्य
ते बाहुमध्ये परीणाहो भवेदष्टा
दशांगुलः षोडशोक्तः प्रबाहुस्तु
षट्कलोग्रकरो मतः सप्तांगुलं
करतलं पंचमध्यांगुलीमता अ
नामिका मध्यमायाः सप्तभागेन
हीयते मध्यमायास्तु हीना वै पंच
भागेन तर्ज्जनी अंगुष्ठ तर्ज्जनीमू
लादधः प्रोक्तस्तु तत् समः अंगु
ष्ठ परिणाहस्तु विज्ञेय श्चतुरंगुलः
शेषाणामंगुलीनान्तु भागो भाग
न हीयते मध्यमा मध्य पर्वन्तमं
गुलं द्वयमायतं यवो यवस्तु स
र्वासां तस्यास्तस्याः प्रहीयते अंगुष्ठ
पर्वमध्यं तु तर्ज्जन्याः सदृशं भवेत्
यवद्वयाधिकं तद्वदग्र पर्वसुदाहृ
तं पर्वार्द्धेन नखान् विद्यादंगु
लीषु समन्ततः स्निग्धं श्लक्ष्णं
प्रकुर्वीत ईषद्रक्तं तथाग्रतो नि
म्न पृष्ठं भवेन्मध्ये पार्श्वतः कल
योच्छ्रितं तथैव केशपर्यन्तः
स्कन्धोपरि दशांगुलः स्त्रियः का
र्य्यास्तु तद्विशेषतो नरूजघनाधि
काः चतुर्द्दशांगुलायामं स्तनौ



स्तनिर्द्दिशेत् नानाभरणसंपन्नाः
किंचित् स्थूलभुजास्तथा किंचि
द्दीर्घं भवेत् कमलकावलितन्मा
नासाग्रीवा ललाटञ्च निर्द्दिष्टास्तत
दंगुलाः अर्द्धार्द्धांगुलि विस्तारः अ
स्यतः परं पल्लवः अधिकं नेत्रयु
ग्मं तच्चतुर्भागेन निर्द्दिशेत् ग्री
वावलि प्रकर्त्तव्या किंचिदर्द्धांगुलो
च्छ्रया एवं नारीषु सर्व्वासु देवानां प्र
तिमासु च नवतालमिदं प्रोक्तं ल
क्षणं पापनाशनं अतः परं प्रव
क्ष्यामि देवाकारान् विशेषतः।
दशतालः स्मृतो रामो बलिर्वै वै
रोचनिस्तथा वराहो नरसिंहश्च
सप्ततालश्च वामनः मत्स्यकूर्म्मौ
च निर्द्दिष्टौ यथा शोभं स्वयंभुवा
अतः परं प्रवक्ष्यामि स्कन्धाकारमु
त्तमं आपीनोरुभुजस्कन्धस्तप्त
काञ्चनसप्रभः शुक्लार्करश्मि
संतानचंद्रांकितजटो विभुः जटा
मुकुटधारी च द्विरष्टवत्सराकृ
तिः बाहुवारणहस्ताभो वृत्तजंघो
रुमण्डलः ऊर्द्ध्वकेशस्तु कर्त्तव्यो
दीर्घायतविलोचनः व्याघ्रचर्म्म
परीधानः कटिसूत्रत्रयान्वितः
हारकेयूरसंपन्नो भुजंगाभरणस्त
था बाहवश्चापि कर्त्तव्या नानाभरण
भूषि ॥

ताः पीनोरु गण्डफलकः कुंडले
भ्यामलंकृतः आजानुलंबबाहुश्च
सौम्यमूर्त्तिः सुशोभनः खेटकं वा
मे हस्ते तु खड्गं चैव तु दक्षिणे ॥
शक्तिं दंडं त्रिशूलंच दक्षिणे तु नि
वेशयेत्। कपालं वामपार्श्वे तु।
नागं खट्वांगमेव च एकश्च वरदो
हस्तस्तथाक्षवलयोऽपरः वैशाखं
स्थानकं कृत्वा नृत्याभिनयसंस्थि
तः स्मृतो दशभुजः कार्य्यो गजासुर
वधे तथा तथा त्रिपुरदाहे च बाहवः
षोडशैव तु शंखं चक्रं गदा शार्ङ्गं च
घंटा तत्राधिका भवेत् तथा धनुः पि
नाकंच शरो विष्णुमयस्तथा चतुर्भु
जोऽष्टबाहुर्वा ज्ञानयोगेश्वरो मतः
तीक्ष्णनासाग्रदशनः करालवदनो
महान् भैरवः शस्यते लोके प्रत्याय
तनसंस्थितः न मूलायतने कार्य्यो
भैरवस्तु भयंकरः नारसिंहो वराहो
वा तथान्येऽपि भयंकराः न हीनाधि
कांगाश्च कर्त्तव्या देवताः क्वचित् स्वामि
नं घातयेन्न्यूनं करालवदना तथा।
अधिका शिल्पिनं हन्यात् कृशा चैव
धननाशिनी कृशोदरी तु दुर्भिक्षं
निर्म्मांसा धननाशिनी वक्रनासा
तु दुःखाय संक्षिप्तांगी भयं॥
करी ॥ चिपिटा ॥ ।

दुःखशोकाय अनेत्रा नेत्रनाशिनी
दुःखदा हीनवक्त्रा तु पाणिपादकृ
शा तथा हीनांगा हीनजंघा च भ्रमो
न्मादकरी नृणां वक्रवक्त्रा च राजा
नं कटिहीना च या भवेत् पाणिपा
दविहीना या जायते मरको महान्।
जंघाजानुविहीना च शत्रुकल्या
णकारिणी पुत्रमित्रविनाशाय
हीना वक्षःस्थलेन तु या संपूर्णाव.
यदा यातु आयुर्लक्ष्मीप्रदा सदा एवं
लक्षणमासाद्य कर्त्तव्यः परमेश्वरः
स्तूयमानः सुरैः सर्व्वैः समन्ताद्दृशये
द्रये शाक्रेण नंदिना चैव महाका
लेन शंकरं प्रणता लोकपाला
श्च पार्श्वेन गणनायकाः स्तनद्दे।
किरिटिश्चैव भूतवेतालसंवृतः ॥
सर्व्वहृष्टाश्च कर्त्तव्याः स्तुवंतः पर
मेश्वरं गंधर्व्वविद्याधरकिन्नराणा
मप्सरोगुह्यकनायकानां गणै
रनेकैः शतशो महेन्द्रमुनिप्रवी
रैरभिनंद्यमानं स्तुवंतं सूक्तैः श
तशः प्रवालपुष्पोपहारप्रचयं
ददद्भिः संस्तूयमानं भगवंतमी
शं नेत्रत्रयेणामरमर्त्यशंभुं। सूत
उवाच अधुना संप्रवक्ष्यामि अर्द्ध
नारीश्वरं परं अर्द्धेन देवदेवस्य
नारीरूपं सुशोभनं ॥ ई ॥ ।


शार्द्धेन जटाभारो बालेन्दुकलया
युतः उमार्द्धे तु प्रदातव्यौ सीमंत
तिलकावुभौ वासुकिं दक्षिणे क
र्णे वामे कुंडलमादिशेत् बालि
काञ्चापि दातव्यं कपाले दक्षिणे
करे त्रिशूलं वापि कर्त्तव्यं देवदे
वस्य शूलिनः वामतो दर्पणं द
द्यादुत्पलं वा विशेषतः वाम
बाहुश्च कर्त्तव्यः केयूरवलयान्वि
तः उपवीतंच कर्त्तव्यं मणिमुक्ता
मयं तथा स्तनभारमथार्द्धे तु वामे
पीनं प्रकल्पयेत् हारार्द्धं मज्वलं
कुर्य्यात् श्रोण्यर्द्धेन तथैव च लिं
गार्द्धमूर्द्ध्वं कर्त्तव्यं व्याघ्राजिनकृता
वरं वामे लंबपरीधानं कटिसूत्रत्र
यान्वितं नानारत्नसमोपेतं दक्षि
णे भुजगान्वितं देवस्य दक्षिणं पा
दं पद्मोपरि समास्थितं किंचिदू
र्द्धं तथा वामं भूषितं नूपुरेण च
र विभूषितान् कुर्य्यादंगुलीषु
अंगुलीयकान् सालक्तकं तथा पा
दं पार्व्वत्या दर्शयेत् सदा अर्द्धना
रीश्वरस्येदं रूपमस्मिन्नुदाहृतं ॥
उमा महेश्वरस्यापि लक्षणं शृ
णुत द्विजाः संस्थानं तु तयोर्द्दे
हे लीलाललितविभ्रमं चतुर्भुजं
द्विबाहुं वा जटाभारेण भूषितं लो

वनत्रय संयुक्त मुमैक स्कंधपाणि
ने दक्षिणेनोत्वणं शूलं वामे कु
च मरं करे। द्वीपिचर्म परीधानं ना
नारत्नोपशोभितं सम्प्रतिष्ठस्व
शंच तथार्द्धेन्दु कृतापानं वाम
त संस्थिता देवी तस्यार्द्धे बाहुद्व
हिता शिरो भूषण संयुक्तैरल
कैर्ललितानना सवालिका क
णावली ललाट तिलकोज्वला
मणि कुण्डल संयुक्ता कर्णिका
भरणा क्वचित् हारकेयूरवकुला
हूर वल्काबलोकिनी वासांशे दे
व देवस्य स्पृशंती लीलया क्वचि
त् दक्षिणेन वहि:कृत्वा बाहु द
क्षिणेन:थवा। स्कंधे वा दक्षिणे
कृतो स्पृशांगुलिभि:क्वचित्।
वामे च दर्पणं दद्यादुत्पलं वा सु
शोभनं कटिसूत्र त्रयं चैव नितंबे
स्यात् सलंबकं जया च विजया
चैव कार्तिकेय विनायकौ ॥
पार्श्वयोर्दर्शयेत्तत्र सतोरणम
गुह्यकं माला विद्याधरां स्तत्र वी
णावान सप्रेगण: एतद्रुप मुमे
शस्य कर्त्तव्यं भूति मिच्छता शि
वनारायणं वक्ष्ये सर्वपाप प्रणाशनं
वामार्द्धे माधवं कुर्याद्दक्षिणे शूलपा
णिनं बाहुद्वयं च कृष्णस्य मणि।
केयूर भूषितं शंख चक्रधरं शांत

मारक्तांगुलि विभ्रमं चक्रस्थाने ग
दां चापि पाणौ दद्यात्पद्मतले शं
खं चैवेतरे दद्याद्रत्नार्घ्यं भूषणोज्व
लं पीतवस्त्र परीधानं चरणे मणि
भूषितं दक्षिणार्द्धे जटाभार मर्द्धे
न्दु कृत लक्षणं भुजंग हार वलयं व
रदं दक्षिणे करं द्वितीयं चापि कु
र्वीत त्रिशूलवरधारिणं। व्यालो
पवीत संयुक्तं कट्यर्द्धे कृत्तिवाससं
मणिरत्नैश्च संयुक्तं पादं नाग विभू
षितं शिव नारायणस्यैवं कल्पये
द्रुप मुत्तमं महावराहं वक्ष्यामि
पद्महस्तं गदाधरं तीक्ष्णदंष्ट्राग्रघो
णास्यं मेदिनी वाम कूर्परं दंष्ट्राग्र
णोद्धृतां देवीं धरणीं भूमलान्वितां
विस्मयोत्फुल्ल नयना मुपरिष्टा
त्प्रकल्पयेत् दक्षिणे कटि संस्थ
न्तु करंतस्य प्रकल्पयेत् कूर्मोपरि
तथा पाद मेकं नागेन्द्र मूर्द्धनि सत्त
यमानं लोकेशै:समंतात् परिक
ल्पयेत् नारसिंहं च कर्त्तव्यं भुजा
ष्टक समन्वितं। रौद्र सिंहासनं
न्तद्धिरण्याकृतिं मुखं तथा। स्त
न्तु पीन शटाकीर्णं दारयन्तं।
दिते सुतं ॥ विनिर्मितं तत्र जा
लं च दानवं परिकल्पयेत् ॥
वमंतं रुधिरोद्गारं भ्रुकुटी कु

रिलेखनं युध्यमानं च कर्त्तव्यं
क्वचित् करण बंधने परिश्रांते
तद्दैत्येन तर्ज्यमानं मुकुंद:
देवं प्रदर्शयेत्तत्र खड्ग खेटक
धारिणं स्तूयमानं तथा विस्म दर्शी
येदमराधिपे ॥ तथा त्रिविक्रमं च
देव ब्रह्माणाक्रमणोत्वणं वाम
पार्श्वे तथा राहु मुपरिष्टात् प्रक
ल्पयेत् अपस्तांहामनं तावत् क
ल्पयेत् सकमंडलुं। दक्षिणे च्छ
त्रिकां विध्यात्सुखवेदीनं प्रदर्शयेत्
भृंगारधारिणं तद्वद्बलितस्यैव पा
र्श्वत: बंधनेचापि कुर्वीत गरुडेन त
स्य दर्शयेत् मत्स्यरूपं तथा मात्स्ये
कौर्मे कूर्माकृतिं न्यसेत् एवं रू
पस्तु भगवान् कार्यो नारायणो
हरि: ब्रह्मा कमण्डलु धर:कर्त्त
व्य:क्वचित्कमलासन: वर्णेन
पद्मगर्भाभ श्चतुर्बाहु:शुभेक्ष
ण: कमंडलुं वामकरे स्रुवं ह
स्ते च दक्षिणे वामे दण्डधरं तद्व
त् स्रुवं चापि प्रदर्शयेत् मुनिभि
र्देव गंधर्वै: स्तूयमानं समन्तत:
कुर्वाण मिव लोकांस्त्रीन्शुक्लांब
र धरं विभुं ॥ मृगचर्मधरं वा
पि दिव्य यज्ञोपवीतिनं। आज्य
स्थालीं न्यसेत् पार्श्वे वेदांश्च चत

र:शुभान्। वामपार्श्वेस्तु सावित्री
दक्षिणे च सरस्वती आग्रे च ऋष
यस्तद्वत् कार्या:पैतामहे पदे ॥
कार्त्तिकेयं प्रवक्ष्यामि तरुणादित्य
सन्निभं कमलोदरवर्णाभं सुकुमा
रं कुमारकं गोणुकैश्चीरकैर्युक्तं म
मयूरवरवाहनं स्थानीये खेटनगा
रे भुजान् द्वादश कल्पयेत् चतु
र्भुज: कर्वटे स्याद्वने ग्रामे द्विबाहु
क: शक्ति:पाशस्तथा खड्ग:शू
र:शूलन्तथैव च वरदश्चैव हस्त:
स्यादथवा भयदो भवेत् एते दक्षि
णे तो ज्ञेया: केयूर कटकोज्वला:
धनु:पताका मुष्टिश्च तर्जनी च
प्रसारिता खेटकं ताम्रचूडश्च वाम
हस्ते प्रशस्यते द्विभुजस्य करे श
क्तिर्वामे स्यात् कुक्कुटोपरे चतुर्भु
जे शक्ति पाशौ वामतो दक्षिणे त्व
सि: वरदो:भयदो वापि दक्षिण:
स्यात्तृतीयक: विनायकं प्रवक्ष्या
मि गजवक्त्रं त्रिलोचनं लंबोदरं
चतुर्बाहुं व्याल यज्ञोपवीतिनं
स्वस्तिकर्णं बृहत्तुण्ड मेकदं
ष्ट्रं पृथूदरं स्वदन्तं दक्षिणे करे
उत्पलं च तथा परे लड्डुकं पर
शुं चैव वामत:परिकल्पयेत् ह
स्तं सिंहगमनं पीनस्कंधांघ्रिपा



णितं युक्तं बुद्धि कृत्बुद्धिभ्या मथ ।
स्तान्मूषिकान्वितं कात्यायन्याः
प्रवक्ष्यामि रूपंदशभुजंतथा त्र
याणामपि देवानामनुकारानु
कारिणी जटाजूटसमायुक्तामर्द्धे
न्दुकृतशेखरां लोचनत्रयसंयुक्तां
पूर्णेन्दुसदृशाननां अतसीपुष्प
वर्णाभां सुप्रतिष्ठां सुलोचनां ॥
नवयौवनसंपन्नां सर्वाभरणभू
षितां सुचारुदशनां तद्वत्पीनो
न्नतपयोधरां त्रिभंगस्थानसंस्था
नां महिषासुरमर्द्दिनीं त्रिशूलंद
क्षिणेदद्यात् खड्गंचक्रं तथैव च
तीक्ष्णबाणं तथा शक्तिं दक्षिणे
सन्निवेशयेत् खेटकं पूर्णचापं
च पाशमंकुशमेवच घंटांवा
परशुंवापि वामतः सन्निवेशये
त् अधस्तान्महिषंतद्वद्विशिरस्कं
प्रदर्शयेत् शिरश्छेदोद्भवं तद्वद्दा
नवं खड्गपाणिनं हृदि शूलेनभि
न्नं निर्यदंत्रविभूषितं रक्तर
क्तीकृतांगंचरक्तविस्फुरितेक्ष
णं वेष्टितं नागपाशेन भ्रुकुटी
भीषणाननं सपाशवामहस्तेन
धृतकेशंचदुर्गया वमद्रुधिरवक्त्रं
च देव्याः सिंहंप्रदर्शयेत् देव्यास्तु
दक्षिणपादंसमंसिंहोपरिस्थितं ।
किंचिदूर्द्ध्वं तथावाममंगुष्ठंमहिषो
परि स्तमानेच तद्रूपममरैः सन्निवे
शयेत् इदानीं सुरराजस्य रूपंव
क्ष्ये विशेषतः सहस्रनयनंदेव
मत्तवारणसंस्थितं पृथूरुवक्षो
वदनं सिंहस्कंधंमहाभुजं किरी
टकुंडलधरं पीवरोरुभुजेक्ष
णं वज्रोत्पलधरंतद्वन्नानाभरण
भूषितं पूजितं देवगंधर्वैरप्सरोग
णसेवितं छत्रचामरधारिण्यो
स्त्रियोपार्श्वेतु कारयेत् सिंहासन
गतंवापि गंधर्वगणसंयुतं इंद्राणीं
वामतस्तस्य कुर्यादुत्पलधारिणीं
सुतवाच प्रभाकरस्य प्रतिमामित
नीं शृणुत द्विजाः रथस्थंकारयेद्दे
वं पद्महस्तं सुलोचनं सप्ताश्वंचैक
चक्रंच रथं तस्य प्रकल्पयेत् मुकु
टेन विचित्रेण पद्मगर्भसमप्रभं
नानाभरणभूषाभ्यां भुजाभ्यां धृत
पुष्करं स्कंधस्थे पुष्करे ते तु लील
यैव धृते सदा चोलकच्छन्नवपु
षं क्वचिच्चित्रेषु दर्शयेत् । वस्त्रयु
ग्म समोपेतं चरणौ तेजसावृतौ
प्रतीहारौ च कर्त्तव्यौ पार्श्वयोर्दण्ड
पिंगलौ कर्त्तव्यौ खड्गहस्तौ च पा
र्श्वयोः पुरुषावुभौ लेखनीकृत
हस्तंच पार्श्वे धातारमव्ययं नाना

देवगणैर्युक्तमेवं कुर्याद्दिवाकरं
अरुणः सारथिस्तस्य पद्मिनीपत्र
सन्निभः अश्वौच वलिसद्ग्रीवावंत
स्थौ तस्य पार्श्वयोः भुजंगरश्मि
भिर्बद्धाः समाश्चारश्मिसंयुताः
पद्मस्थोवाहयस्थोवापद्महस्तः प्र
कल्पयेत् अग्नेस्तु लक्षणंवक्ष्ये
सर्वकामफलप्रदं । दीप्तसुवर्ण
वपुषमर्द्धचंद्रासनस्थितं । बाला
र्कसदृशंतस्य वक्त्रंचापि दर्श
येत् । यज्ञोपवीतिनं देवंलंबकूर्च्च
धरंतथा कमंडलुं वामकरे ।
दक्षिणेत्वक्षसूत्रकं ज्वालावित
नसंयुक्तमजवाहनमुज्वलं ।
कुंडस्थंवापि कुर्वीत मूर्ध्नि सप्त
शिखान्वितं तथायमं प्रवक्ष्यामि
दंडपाशधरंविभुं महामहिषमा
रूढं कृष्णांजनचयोपमं । सिंहा
सनगतंवापि दीप्ताग्निसमलोच
नं महिषंचित्रगुप्तंच करालान्
किंकरांस्तथा समंतादर्शयेत्तस्य
सौम्यासौम्यांस्तथा सुरान् राक्षसें
द्रं तथा वक्ष्ये लोकपालंच नैर्ऋतं न
रारूढंमहाकायंरक्षोभिर्बहुभिर्वृतं
खड्गहस्तंमहानीलकज्जलाचल ।
सन्निभं नरयुक्तविमानस्थंपीतांब
रविभूषितं ॥ वरुणंच प्रव ।
क्ष्यामिपाशहस्तंमहाबलं शंख
स्फटिकवर्णाभंहारकेयूरसं
युतं झषाधिरूढं वरदं पता
काध्वजसंयुतं । भूषणावगत
शांतं किरीटवरधारिणं । वा
युरूपंप्रवक्ष्यामि धूम्रंच मृगवा
हनं चित्रांबरधरं शांतं युवानं
कुंचितभ्रुवं मृगाधिरूढं वरदं
पताकाध्वजसंयुतं कुबेरंच प्रव
क्ष्यामि कुंडलाभ्यामलंकृतं हा
रकेयूररचितं सितांबरधरं सदा
गदाधरंच कर्त्तव्यं वरदंमुकुटान्वि
तं नरयुक्तविमानस्थं मेषस्थंवा
पिकारयेत् वर्णेन पीतवर्णेन
गुह्यकैः परिवारितं । महोदरं
महाकायंअष्टाष्टकसमन्वितं
गुह्यकैर्बहुभिर्युक्तं धनव्यग्र ।
करैस्तथा तथैवेशं प्रवक्ष्यामि
धवलंधवलेक्षणं त्रिशूलपा
णिनंदेवंत्र्यक्षं वृषगतं विभुं ॥
मातृणांलक्षणंवक्ष्ये यथावद
नुपूर्वशः ब्रह्माणी ब्रह्मसदृशी
चतुर्वक्त्रा चतुर्भुजा । हंसाधि
रूढा कर्त्तव्या साक्षसूत्रकमंडलुः
महेश्वरस्यरूपेणतथा माहेश्वरीम
ता जटामुकुटसंयुक्ता वृषस्थाच
इंदुलेखा कपालशूलखट्वांगवर



हाथ चतुर्भुजा कुमाररूपा कौमारी मयूरवरवाहना रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा तथा हारकेयूरसंपन्ना कृकवाकुधरा तथा वैष्णवी विष्णुसदृशी गरुडोपरि समास्थिता चतुर्बाहुश्च वरदा शंखचक्रगदाधरा सिंहासनगता वापि बालकेन समन्विता वाराहीं च प्रवक्ष्यामि महिषोपरिसंस्थितां वराहसदृशी देवी घंटाचामरधारिणी गदाचक्रधरा तद्वद्दानवेन्द्रविनाशिनी इंद्राणीमिंद्रसदृशी वज्रशूलगदाधरा गजासनगता देवी लोचनैर्बहुभिर्वृता तप्तकांचनवर्णाभा सर्वाभरणभूषिता तीक्ष्णखड्गधरा तद्वद्देयोगीश्वरी स्मिता दीर्घजिह्वा ऊर्द्धकेशी मस्थिखंडैश्चमंडिता दंष्ट्राकरालवदनाकुर्य्याच्चैव कृशोदरी कपालमालिनी देवी मुण्डमालाविभूषिता । कपालं वामहस्ते तु मांसशोणितपूरितं सकेशं तु शिरोन्यस्य शक्तिका दक्षिणे तथा गृध्रस्था वायसस्था वा निर्मांसा विगतोदरी करालवदना तद्वत् कर्त्तव्या सा त्रिलोचना चामुण्डा बद्धघंटा च द्वीपिचर्मधराशिवा दिग्वासा कालिका तद्वद्रासभस्था कपालिनी सरक्तपुष्पाभरणा वर्द्धनी ध्वजसंयुता विनायकं च कुर्वीत मातृणामंतिके सदा वीरेश्वरश्च भगवान् वृषारूढो जटाधरः । वीणाहस्तस्त्रिशूली च मातृणामग्रतो भवेत् श्रियं देवीं प्रवक्ष्यामि नवे वयसि संस्थितां सुयौवनां पीनगंडां रक्तोष्ठीं कुंचितभ्रुवं पीनोन्नतस्तनतटां मणिकुंडलधारिणीं सुमंडलं मुखं तस्याः शिरः सीमंतभूषितं पद्मस्वस्तिकशंखैर्वा भूषिता कुंतलालकैः कंचुका बद्धगात्री च हारभूषौ पयोधरौ नागहस्तोपमौ बाहू केयूरकटकोज्ज्वलौ । पद्मं हस्ते च दातव्यं श्रीफलं दक्षिणे करे मेखलाभरणां तद्वत्तप्तकांचनसुप्रभां नानाभरणसंपन्नां शोभनांवरधारिणीं । पार्श्वेतस्याः स्त्रियः कार्य्याश्चामरव्यग्रपाणयः पद्मासनोपविष्टां तु पद्मसिंहासनसंस्थितां करिभ्यां स्नाप्यमानां सा भृंगाराभ्यामनेकशः ॥ प्रतिपालयंतौ करिणौ भृंगाराभ्यां तथापरौ स्तूयमाना च लोकेशैस्तथा गंधर्वगुह्यकैः तथैव यक्षिणी कार्य्या सिद्धासुरनिषेविता

पार्श्वयोः कलशौ तस्यास्तोरणे देवदानवाः ॥ नागाश्चैव तु कर्त्तव्याः खड्गखेटकधारिणः अथ स्नातमक्तानि तेषां नाभेरूर्द्धं च पौरुषीफणाश्च मूर्द्धिकर्त्तव्या द्विजिह्वा बहवः समाः पिशाचा राक्षसाश्चैव भूतवेतालमातरः निर्मांसाश्चैव ते सर्वे रौद्रा विकृतरूपिणः । क्षेत्रपालश्च कर्त्तव्यो जटिलो विकृताननः दिग्वासा जटिलस्तद्वत् श्वगोमायुनिषेवितः कपालं वामहस्ते तु शिरः केशसमावृतं दक्षिणे शक्तिकां दद्यादसुरक्षयकारिणीं अथातः संप्रवक्ष्यामि द्विभुजं कुसुमायुधं पार्श्वे चाश्वमुखं तस्य मकरध्वजसंयुतं दक्षिणे पुष्पबाणं च वामे पुष्पमयं धनुः प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता रतिस्तु वामपार्श्वे च शयनोपस्करान्विता पटश्च पटहश्चैव खरः कामातुरस्तथा पार्श्वतो जलवापी च वनं नंदनमेव च सुशोभनश्च कर्त्तव्यो भगवान् कुसुमायुधः संस्थानमीषदक्तं स्याद्विस्मयं विम्बनेत्रकं । एतदुद्देशतः प्रोक्तं प्रतिमालक्षणं मया विस्तरेण न शक्नोति बृहस्पतिरपि द्वि । जाः । इति मत्स्यपुराणे देवार्च्चानुकीर्त्तने प्रतिमालक्षणं नाम २३२ ॥ २३३।२३४।२३५ अध्यायः ॥ साद्विविधा । स्थापनरूपा स्वयंव्यक्तरूपा च यथा श्रीसदाशिव उवाच शृणु देवि प्रवक्ष्यामि तदेशावसरं हरेः स्थापनं च स्वयंव्यक्तं द्विविधं तत्प्रकीर्त्तितं । शिलामृद्दारुलौहाद्यैः कृत्वा प्रतिकृतिं हरेः श्रौतस्मार्त्तागमैः प्रोक्ता क्रिया संस्थापना हि तत् तत्स्थापनमिति प्रोक्तं स्वयंव्यक्तं हि मे शृणु । यस्मिंस्तु निहितो विष्णुः स्वयमेव नृणां भुवि पाषाणदार्वीरात्मेशः स्वयंव्यक्तं हि तत्स्मृतं । स्वयंव्यक्ते स्थापने वा पूजयेन्मधुसूदनं देवतानामहंषीणामर्च्चनार्थे सनातनः स्वयमेव जगन्नाथः सान्निध्यातिकेशवः यस्य यद्विग्रहे भावं प्रतदेवा विरभूर्द्भुवि तदेव पूजयेन्नित्यं तस्मिन्नेव रमेत्सदा । श्रियोंकशायी देवेशो विधेरर्च्चाः प्रभावेन सप्रवक्ता कृतार्थानां नपसा विरभूद्भुवि ॥ मयापि काश्यपेन सम्पूज्यो माधवः कल्मषापहः दक्षिणोदधितीरेतु नीलाद्रौ पुरुषोत्तमः दारुरूपी जगन्नाथो ब्रह्मणा स्थापितः स्वयं ।



सपवक्त्रः सर्वेषां लोकानां खलु पावति नरनारायणः साक्षात् कृष्णो बदरिकाश्रमे गदाधरो गयायाञ्च प्रयागे माधवस्तथा माधवो विधिवत् कृष्णो गङ्गासागरसङ्गमे कपालमोचने तीर्थे कलिङ्गे चोर्द्ध्वहरिल्या विस्तश्रवह्निरेगत् भीममूर्तिः शिवयनः द्वारकायां वासुदेवः कुरुक्षेत्रे रणेश्वरः ॥ नारायणोऽकंदाद्री कृष्णो नित्यं सनातनः स्वयं श्रीभगवान् कृष्णो धाम्नि वृन्दावने शुभे गोविन्दः केशवो नन्दयशोदानन्दनो विभुः कृष्णो मदनगोपाल गोवर्द्धनधरादिकः चतुरशीतिके कोशे ब्रालाएग्रा तीनके शिवे कलिन्दनन्दिनी तीरे महाप्रलयवर्जिते सदैव कोवैरभ्यर्च्यः श्रीगोपीजनवल्लभः यत्र यत्र हरे रर्चा स्वयं व्यक्ता शुभा मले स्थाने तीर्थे तथा देवे यत्तदा न महोत्सवे । संकीर्त्तनं सर्वभक्ति स्तथा कालादिकं जनं ॥ कायेन मनसा वाचा भक्त्या देवि पुनः पुनः तत्र तत्र समागम्य । रेमे हंसस्तु व्यवस्थितः नाशेरायोगजस्नान मर्चाया विन्दनेन्द्राणां चन्द्रशो विषयं प्रायदं दाति फलमी

प्सितं सर्वबस्यास्तु सौरभ्य मर्चायां लभते नरः श्रंगानामपि सावित्रियं सर्वदा पृथिवीतले जंबुद्वीपे महापुण्ये वर्षे वै भारते शुभे प्रर्चायां सन्निधि विस्मा नैनेव पुकदाचन ॥ तस्माद्वै भारते वर्षे मुनिभि र्हि दशैरपि सेविते सततं सक्रतपोयज्ञक्रियादिभिः भारतेऽस्मिन् महावर्षे नित्यं सन्निहितो हरिः इंद्रद्युम्ने तथा कौर्मे सिंहाद्रौ वदरीवने काश्यां प्रयागे सोमेव शालग्रामाचले तथा । नारायणाचले सोमे वराहे वामनाश्रमे एवमाद्याः स्वयंव्यक्ताः सर्वकामफलप्रदाः स्वयमेव हि सान्निध्यं यस्मिन्याति जनार्द्दनः तस्मिन्नेव स्वयं । व्यक्तं वसंति मुनयः शुभाः महाभागवतश्रेष्ठो विधिना स्थाप्य केशवं मंत्रेण कुर्य्यात् सान्निध्यं स्थापने तद्विशिष्यते नतु शक्त्यादिभिः कार्य्यमकृते स्थापनादिकं श्रीहरेरर्चनं कर्मयोगोत्सवमथाधरं यत्किंचिदुत्सवैः कार्य्यमपरं मंदिरादिकं कुर्व्वं विस्तरेणकुर्व्वन्नितिक्र तमेतद्धरिर्भवेः इति पाद्मोत्तरखण्डे ७२ अध्यायः ॥ ॥

भगवत्याः प्रतिमाराधनविधिर्यथा

ब्रह्मोवाच शृणु तस्याः समाराध्य आराधनविधिं परं यथा सा तोषिता पूर्वं शंकराद्यैः फलप्सुभिः कर्म यत्नेन देवेश तथात्व मपि पूजय । शम्भुः पूजयते देवी मंत्रशक्तिमयी शुभा अक्षमालाकरो नित्यं तेनासौ विभुरीश्वरः अहं शैलमयी देवी यजामि सततं ततम् तेन ब्रह्मत्वमेव वेदं मया प्राप्तं सुदुर्लभं इन्द्रनीलमयी देवी विष्णु रर्च्चयते सदा विष्णुत्वं प्राप्तवांस्तेन अद्भुतैकं सनातनं देवी हेममयीं कान्ता धनदोऽर्च्चयते सदा तेनासौ धनदो देवो धनेशात्वमवाप्तवान् विश्वेदेवा महात्मानो रौप्यां देवीं मनोहरां यजंति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः वायुः पूजयते भक्त्या देवी पित्तलसंभवां वायुत्वं तेन तत्प्राप्त मनोपमं गुणावहं वसवः कांस्यिकां देवीं पूजयंते विधानतः प्राप्तवंतो महात्मानो वसुत्वं सुमहोदयं अश्विनौ पार्थिवीं देवीं पूजयेते विधानतः तेन तावश्विनौ देवौ दिव्य देहं गतौ शुभौ स्फाटिकां शोभनां देवीं वरुणोऽर्च्चयते सदा वरुणत्वं हि सं॥

प्राप्तं तेनकृद्धो समन्वितं देवी मनोमयीं शुभां मग्नि र्यजति भावितः अग्नित्वं प्राप्तवांस्तेन तेजोरूप समन्वितं ताम्रां देवीं सदाकालं भक्त्या देवो दिवाकरः अर्च्चते तत्र संप्राप्तं तेन सूर्यत्वमनुत्तमं मुक्ताशैलमयीं देवीं सोमः पूजयते सदा तेन सोमोऽपि संप्राप्तः सोमत्वं सतेजोज्ज्वलं प्रवालकमयीं देवीं यजंते पन्नगोत्तमाः तेन नागास्त भोगाढ्याः प्रयांति ते परं परं कृष्णायसमयीं देवीं पूजयन्त्यसुरोत्तमाः राक्षसाश्च महात्मानस्तेन तेऽमितविक्रमाः त्रपुसीसमयीं देवीं पिशाचाः पूजयंति तां । तेन ऋद्धिबलोपेताः प्रयांति परमं पदं त्रैलोहिकां सदा देवीं ॥ यजंते गुह्यकादयः तेन भोग बलोपेताः प्रयांतीश्वरमंदिरं वज्रलोहमयीं देवीं यजंते मातरः सदा मातृत्वं प्राप्यंताः सर्वाः प्रयाति परमं पदं । एवं देवाः सगंधर्व्वाः पिशाचोरगराक्षसाः पूजयंते सदा कालं चर्चिकां सुरनायिकां तथा त्वमपि देवेन्द्र यदीच्छसि परां गतिं शिवामणिमयीं पूज ।

लभसे मनसेप्सितान् कामान्
सुरवराधत्त कामिकैः पूजिता
सदा ददातिसर्वलोकानां चिंता
मणिर्यथाशिवा अपिच हेम
तान्मा च सहस्री शैलाचित्राथ
सापि वा पार्थिव्येल स्थिता दे
वी सर्वकाम फलप्रदा यो य
स्य आयुधः प्रोक्तस्तस्मिं स्ता
प्रतिपूजयेत् देवीप्रासादचिं
ता पुंसांकामायुःसुतसौख्य
दा मूलेसंपूजिता वत्स सर्व
भवति पूजिते वार्क्षी वा शैल
जा वापि रत्न धातुमयी मपि।
विधिना शास्त्र दृष्टेन दशबाहु
त्रिलोचना कारयेद्भक्तिमान्
यस्तु देवीं शास्त्रविशारदः।
स्थापन विधि यथा सर्व शैले
ष्टकाशोत्थ गृहवासु विभाजि
ते वल्लभी मंडपं वत्स तासां
तुस्थापनेशुभं गंधनैवेद्य धूप
न वस्त्र माल्य विभूषणैः अधि
वासनपूर्वास्तुस्थापनीयास्तत
हितैः वेदध्वनि महाघोषैः स्त्रीसं
गीतोपशोभितं कर्त्तव्यंस्थापनं
तासां वहुवादित्र नादितं रात्रौ जाग
रणेन प्रदेयाः पूजार्थं हृदये सर्वत
तासं पूर्णसर्वोपकरणान्वितं वापी
कूप तडागादि वाटिका वनशो
भितं वेश्म तद्योपसंपन्नं ध्व
ज छत्र विभूषितं चंद्रादर्पण
दीपादिदेयं द्रव्यं निरूपितं वेदि
का तत्र षष्ठ्यादि दिन संख्यार्थं सि
द्धये कर्तव्या एकमेकं वा यथा
कालपरि अनेन विधिना यस्तु
मानरः स्थापयेन्नरः इहात्र पूज
नीयस्तु स ततो याति परां गतिं इ
ति देवीपुराणे मातृप्रतिष्ठा महा
भागेऽपि अल्पबुद्धीनां प्रतिमास्तु
देवत्वं यथा अग्नौ क्रियावतां देवो
हृदि देवो मनीषिणां प्रतिमास्व
ल्पबुद्धीनां ज्ञानिनां सर्वतो हरिः
अपिच। अग्नौ क्रियावतामस्मिन्
दिवाहंमनीषिणां प्रतिमास्वल्प
बुद्धीनां ज्ञानिनामस्मि सर्वतः प्रति
मा लक्षणवंती यः कुर्याच्चैव मा
नवः। केशवस्य परंलोक मक्षयं
प्रतिपद्यते षष्टिवर्ष सहस्राणां
सहस्राणि महामुने क्रीडते देव
वत्तत्र अप्सरोभिः सकिन्नरैः यः
स्थापयेद्धरे रर्चां सुप्रशस्ते निवे
शने पुरुषः कृतकृत्यता मेनेच म
नुष्णं नयेत् संस्थाप्य प्रतिमां विष्णो
र्हैम रूप्यमृण्मयजां रत्नैर्नरोत्तिको
वापिवहिस्तीर्थे गृहेऽपिवा महास्तेन

गोविंदसम्यक्संस्थाप्यमानवः यं
यं कामयते कामं तं तं प्राप्नोत्यसं
शयं इत्यग्निपुराणे प्रतिमानं क्ली
प्रतिविम्बं वाहित्थस्याधोभागः
इत्यमरः अस्य वाहित्थस्याधो भा
गो दंतयोर्मध्यं प्रतिमानमुच्य
ते प्रतिमीयते अनेन प्रतिमानं
तुमिश्नन हेपे अनट्मिस्योरिति
ष्ट। प्रतिमानंप्रतिच्छाया गजदं।
तांतरालयो विनिकृष्टः इति भरतः
प्रतिमार्गकः पुं पुरविशेषः य
था श्रीमद्वारिपुरं शोभ मुद्दंकः
प्रतिमार्गकः इति जटाधरः॥
हरिचंद्रपुरं शोभ मुद्दंगः प्रति
मार्गकः इति त्रिकांडशेषश्च।
प्रतिमुक्तः त्रि परिहित वस्त्रादि
इत्यमरः॥ प्रतियत्नः पुं लि
प्सा वांछा उपग्रहः वंदी इत्यम
रः निग्रहादिः सतोगुणांतराधा
नं इति भरतः संस्कारः इति स्वा
मी ग्रहणादिः इति रामाश्रमः प्र
तिग्रहः इति मुकुटः प्रतियत्न
स्तु संस्कारे लिप्सोपग्रहणेषु च इ
ति मेदिनी प्रयत्नवति त्रि। इति
त्रिकांडशेषः। रचना इति जटाधरः
प्रतियातना स्त्री प्रतिमा इत्यमरः
तल्पयातनाच॥
प्रतियोगः पुं विरोधः प्रतियु
ज्यते इति युज् घञ् भाव घञ्
प्रत्यय निष्पन्नः॥
प्रतियोगी न् त्रि विरोधी यथा
साध्यवत् प्रतियोगिकान्योन्या
भावा सामानाधिकरण्यं इति
चिंतामणिः सत्प्रतिपक्षः यथा
प्रतियोगिनं दृष्ट्वा प्रतियोगी नि
वर्त्तते इति प्राचीनकारिका॥
प्रतिरंभः पुं प्रतिलंभः। इति
द्विरूपकोषः॥
प्रतिरूपं क्ली प्रतिमा इति त्रिका
ण्डशेषः॥
प्रतिरूपकं क्ली प्रतिबिंबं। इ
ति जटाधरः॥
प्रतिरोधः पुं तिरस्कारः इतिमु
त्यानशाहटीकायां भरतः सत्प्र
तिपक्षः यथा पक्षसाध्यसाध
नाप्रसिद्धिस्वरूपासिद्धिवाधप्र
तिरोधाने निरासः इति सव्य
भिचार शिरोमणिः चौर्य्यं प्र
तिरोधि शाहृदर्शनात् प्रतिरो
धकः पुं चौरः इति हेमचंद्रः
प्रतिरोधी न् पुं चौरः इत्यमरः।
प्रतिलंभः पुं लाभः तत्पर्य्यायः
लंभनं २ इति हेमचंद्रः यथा।

नैव नः प्रियतमो भययासौ य
थेमेन हृणेतेहृणेतेवा पकेतो
द्विपिगमममशुणोज्ञामन्यतःक
थमहः प्रतिलंभः इतिश्रीहर्षः
प्रतिलोमः त्रि वामः इतिहेम
चंद्रः विलोमः यथा ताडभाव
प्यसंस्कार्य्याविति धर्मोव्यवस्थि
तः वैगुण्याजन्मनः पूर्व उत्तरः
प्रतिलोमतः इतिमानवे ९ अ
ध्याये ६८ श्लोकः ॥
प्रतिलोमजः त्रि प्रतिलोमजा
तः उत्तम वर्णाया अधम वर्णा
ज्जातः यथा संकीर्णयोनयोये
त प्रतिलोमानुलोमजाः अन्यो
न्यव्यतिषक्ताश्च तान् प्रवक्ष्या।
शेषतः इतिमानवे १० अध्यायः
प्रतिवचः स क्ली प्रत्युत्तरं इति
हेमचंद्रः ॥
प्रतिवचनं क्ली प्रतिवाक्यं उ
त्तरं इतित्रिकाण्डशेषः ॥
प्रतिवसथः पुं ग्रामः इति।
हेमचंद्रः ॥
प्रतिवाक् च स्त्री उत्तरं इति
शब्दरत्नावली ॥
प्रतिवाक्यं क्ली उत्तरं इत्यमरः
प्रतिवाणिः स्त्री प्रत्युक्तिः प्रत्यु
त्तरं इति भूरिप्रयोगः ॥

प्रतिवादी न् त्रि प्रतिपक्षः यथा
यद्यात्वेवंविधः पक्षः कल्पितः
पूर्ववादिना दद्यात्तत् पक्षसंब
न्धं प्रतिवादी तदोत्तरं इति व्यव
हारतत्वेबृहस्पतिवचनं ॥
प्रतिवासरः पुं प्रतिदिनं इति
हारावली ॥
प्रतिवासी न् त्रि आसन्नगृही नि
कटस्थायी पडसि इतिभाषा प्र
तिवसतीति ग्रहादित्वाणिन् प्र
त्ययनिष्पन्नः ॥
प्रतिविंबं क्ली प्रतिमा प्रतिच्छा
या इत्यमरः ॥
प्रतिविषा स्त्री अतिविषा आत
इस इतिभाषा इत्यमरः ॥
प्रतिविस्तु क्ली विस्तुविस्तुप्रति
मुग्धबोधव्याकरणं ॥
प्रतिविस्तुकः पुं मुचुकुंदवृक्षः
इतिराजनिर्घण्टः ॥
प्रतिवेशः पुं प्रतिवासिगृहं आ
सन्नगृहिणांगृहं इति शब्दरत्ना
वली ॥
प्रतिवेशवासीन त्रि प्रतिवासी
यथा नोजानेप्रतिवेशवासिनिशेराः
किंभावि संभावितं इत्यलंकारकौस्तु
भं प्रतिवेशी न त्रि प्रतिवासी इति

शब्दरत्नावली ॥
निशासनं क्ली आहूय भृत्यादीनां
कार्य्ये प्रेरणं इत्यमरः ॥
प्रतिशिष्ट त्रि प्रत्याख्याते प्रेषिते
इति त्रिकाण्डशेषः ॥
प्रतिश्यास्त्री प्रतिश्यायः इति श
ब्दरत्नावली ॥
प्रतिश्यायः पुं पीनसरोगः इत्य
मरः ॥
प्रतिश्रयः पुं यज्ञशाला इतिज
टाधरः सभा आश्रयः इति मे
दिनी ओकः इतिहेमचंद्रः ॥
प्रतिश्रवः पुं अंगीकारः इत्यमरः
प्रतिश्रुत् स्त्री प्रतिध्वनिः इत्यमरः
प्रतिश्रुतः त्रि अंगीकृतः इत्यमरः
प्रतिषिद्धः यथा अप्रतिषिद्धमनु
मतं भवतीति दत्तकचंद्रिका ॥
प्रतिषेद्धा त्रि प्रतिषेधकर्त्ता तत्प
र्य्यायः माशाह्विकः २ इति त्रिका
ण्डशेषः ॥
प्रतिषेधः पुं निषेधः यथा मा
धान्यस्य विधेर्यत्र प्रतिषेधे प्र
धानता। पर्य्युदासः स विज्ञेयो
यत्रोत्तर पदेननञ् इति माल
मासतत्वं ॥
प्रतिषेधकः त्रि प्रतिषेधकर्त्ता।

त्रि प्रतिषेधविषयः निषिद्धः ॥

यथा षष्टिवर्षसहस्राणां सहस्रा
णिवसेद्दिवि योनुमंतापि भवति
निरये प्रतिषेधकः इत्यग्निपुराणं
प्रतिष्कः पुं दूतः इति शब्दरत्नाव
ली प्रतिष्कशः पुं सहायः वार्त्ता
हरः पुरोगः इतिमेदिनी ॥
प्रतिष्कषः पुं चर्मरज्जुः इति जटा
धरः ॥
प्रतिष्कसः पुं चरः इतिशब्दरत्ना
वली ॥
प्रतिष्टम्भः पुं प्रतिबंधः इत्यमरः
प्रतिष्ठः पुं सुपार्श्वनामकर्हतः
पिता इतिहेमचंद्रः। प्रतिष्ठा
युक्ते त्रि ॥
प्रतिष्ठा स्त्री गौरवः स्थितिः स्था
ने योगनिष्पत्तिः चतुरक्षरपद्य
इतिमेदिनी। संस्कारविशेषः।
तद्विनादि यथा मत्स्यपुराणे ॥
चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा
माधवे तथा समयः सर्व देवानां
प्रतिष्ठा शुभदा भवेत् प्राप्यपक्षं
शुभं शुक्ल मतीते चोत्तरायणे।
पंचमी च द्वितीयाच तृतीया सप्त
मी तथा दशमीपौर्णमासीच तथा
श्रेष्ठा त्रयोदशी आसु प्रतिष्ठा।
विधिवत् कृता बहुफला भवे
त्। प्रतिष्ठा सर्व देवानां केश

वस्यविशेषतः उत्तरायणे माघ
ने शुक्लपक्षे शुभे दिने कृष्णप
क्षे च पंचम्यामष्टम्यांचैवदशम्यां
भृगुवल्लभीमे युगाद्या वयने पुण्ये
कर्त्तव्यं विषुव द्वये चंद्रसूर्यग्रहे
वापि दिने पुण्ये यथर्त्त्वे वा पा
तिथि यस्य देवस्य तस्यां वा तस्य ।
कीर्त्तिता गृह्णाम विशेषेण प्र
तिष्ठा भुक्तिदायिनी पद्मपुराणे
प्रतिपद्धनदस्योक्ता पवित्रा री
पणे तिथिः श्रिया देव्या द्वितीया
स्तिथीनां सत्तमा स्मृता तृतीया
त भवान्याश्चतुर्थी तत्सुतस्य
च पंचमी सामराजस्य षष्ठी प्रोक्ता
गुहस्य च सप्तमी भास्करस्योक्ता
दुर्गायाश्चाष्टमी तथा मातृणां न
वमी प्रोक्ता दशमी वासुके स्तथा
एकादशी ऋषीणांच द्वादशी च
क्रपाणिनः त्रयोदशी त्वनंगस्य
शिवस्योक्ता चतुर्दशी ममचैव
मुनिश्रेष्ठ पौर्णमासी तिथिः स्मृ
ता कल्पतरौ देवीपुराणे महिषा
सुरहंत्र्याश्च प्रतिष्ठा दक्षिणायने
यस्य देवस्य यः कालः प्रतिष्ठाध्वज
रोपणे तार्क्षपूर्वशिलान्यासे शुभ
दस्तस्य पूजितः यस्य देवस्य प्रति
ष्ठाध्वजरोपणे यः कालः शुभदस्त

स्य गर्तादिपूर शिलान्यासे गृहारंभे
स कालः पूजित इत्यर्थः प्रतिष्ठा
समये माघे वा फाल्गुने वापि
चैत्रवैशाखयोरपि ज्येष्ठाषाढक
योर्वापि प्रतिष्ठा शुभदा भवेत् ॥
भविष्ये सोमो बृहस्पतिश्चैव शु
क्रश्चैव बुधस्तथा एते सौम्यग्रहाः
प्रोक्ताः प्रतिष्ठा यज्ञकर्मणि ॥
मत्स्यपुराणे आषाढे द्वे तथा
मूल मुत्तरात्रयमेव च ज्येष्ठा श्र
वणरोहिण्यः पूर्वभाद्रपदे तथा
हस्ताश्विनी रेवती च पुष्या मृगशि
रस्तथा अनुराधा तथा स्वामी प्रति
ष्ठादो प्रशस्यते दीपिकायां प्राजे
शवासव करादितिभाश्विनीपुष्या
स्यामरेज्य शशिभेषु तथोत्तरेषु ।
कर्त्तः शुभेशशिनि केंद्रगते च
जीवे कार्य्या हरेः शुभतिथौ विधि
वत् प्रतिष्ठा प्राजशादयः रोहि
णी ज्येष्ठा हस्ता पुनर्वसु अश्विनी
रेवती पुष्या मृगशिर उत्तरफल्गु
नुत्तराषाढोत्तरभाद्रपद् नक्षत्राणि
सर्वमंगलादर्शांते देवीपुराणे य
था द्वादशमे जीवे अष्टमे वाष्टभा
स्करे प्रतिष्ठा कारिता विष्णोर्महा
भयकरी मता कल्पतरौ देवीपु
राणे चतुर्वर्णे स्तथा विष्णुः प्रति

ष्ठाप्यस्त्ववार्थिभिः प्रतिष्ठा ब्राह्म
णद्वारैव कर्त्तव्या हयशीर्षपंचरा
त्रे भगवद्भक्ता कर्त्तुमिच्छति यः पु ।
णं मम मूर्त्तिं प्रतिष्ठया अन्वेषणी
य स्तेनाचार्य्यस्तेन लक्षणसंयुतं ब्रा
ह्मणः सर्ववर्णानां पंचरात्रविशा
रदः ब्राह्मणानामलाभे तु क्षत्रियो
वैश्यशूद्रयोः क्षत्रियाणामलाभे
तु वैश्यः शूद्रस्य कल्पितः कदा
चिदपि शूद्रस्तु न च कार्य्योर्थ मदि ।
ति बृहन्नारदीये यदिमेच्छेद संस्र
ष्टलिंगं वा हरिमेव वा । स सर्वथा
तु ना भोगी यावदा कृत संप्लवं तथा
स्त्रीणां मनुधर्मीतानां शूद्राणां च ज
नेश्वर स्पर्शने नाधिकारोस्ति विष्णो
वा शंकरेपि वा । प्रतिष्ठा प्रकारस्तु
मत्स्यपुराणादायुक्तः तदसंभवे वि
द्याकर वाजपेयि प्रभृति संमतो भ
विष्यपुक्तः यथा भविष्यपुराणे
स्नपनादि यथाशक्ति कृत्वा तन्मू
लमंत्रकं । विन्यसेद्धृदयांभोजे प्र
तिमास्तु कृता भवेत् । आदि पञ्चात्
पूर्णोन्तु स्तव होमादि महाकपिल
पंचरात्रोक्त कर्म च कर्त्तव्यं । तद्यथा
सपुष्पसकुशेयाणिं न्यसेद्देवस्य ।
मस्तके पंचावरं जपेन्मूल मष्टो
त्तर शतोत्तरं ॥ ततो मूलेन मूर्द्धा

दि पीठांतं संस्पृशेदिति । तत्त्व ।
न्यासं लिपिन्यासं मंत्रन्यासं च वि
न्यसेत् पूर्णोच महतीं कुर्य्यात् स्व
मंत्रोक्तां यथाविधि । प्राणप्रतिष्ठा
मंत्रेण प्राणस्थापनमाचरेत् लि
पिन्यासस्तु मातृकान्यासः उक्तं
च । जपादौ सर्वमंत्राणां विन्यसे
त् लिपिं विना कृतं तन्निष्फलं ।
विद्यात्तस्मात् पूर्वं लिपिं न्यसेत्
क्रादिमतेपि । मातृकायाः षडंगं
च मातृकान्यासमेव च सर्वासाम
थ्यंमकृत्वा पश्चान्मंत्रादि तं न्यसेत्
एतद्वचनाच्च मातृकान्यासः पूर्वं
पश्चात्तत्त्वन्यासः क्रमदीपिकाया
मप्येवंक्रमः मंत्रन्यासस्य तत्तन्मं
त्र विशेषोक्त पद वर्णन्यासः त
दभावे मूलमंत्रेण शिरसि हस्त
न्यासः तत्त्वन्यासस्तु विष्णुविष
यक एव न्यास प्रमाणानि सार
दा क्रमदीपिकोक्ता न्यन्तुसंधेयानि
प्राणप्रतिष्ठा मंत्रस्तु सारदा त्रयो
विंशति पटलोक्तः । यथा । पाशां
कुश पुटा शक्ति र्ह्रीणी बिंदु विभू
षितः । याद्याः सप्तसकारांता व्यो
मसत्वेंदु संयुताः । सर्माते हंसमं
त्रः स्यात्ततो मम पदं भवेत् प्रा
णा इति वदेत् पश्चात् इह प्राणास्त

तःपरं अमुष्यजीव च इह स्थितः ।
मुष्य पदं भवेत् सर्वेन्द्रियाण्यमुष्या
न्ते वाङ्मनश्चक्षुस्ततः श्रोत्रघ्राण
पदे प्राणा इहागत्य सुखं चिरं ॥
तिष्ठन्त्विति वधु रेते प्राणमन्त्राः
यमीरिताः अत्रामुष्य पदात् पूर्वं
पाशाद्यानि प्रयोजयेत् प्रयोगे
षु समाख्याताः प्राणमन्त्रो मनीषि
भिः पाशाङ्कुशपुटा शक्ति विन्य
नेन प्रथमं पाशबीजं आं ततः
शक्तिबीजं ह्रीं ततोऽङ्कुशबीजं ।
क्रों वाणी यकारः बिन्दुविभूषितो
यं याद्याः सप्त सकारान्ताः उद्धृताः ।
यकाराद्युवादेन सप्त तद्भिन्नं बीजं
एवं पृथगुद्धारस्तु सप्तानामपि स
बिन्दुता ख्यापनाय श्रीकण्ठवाक्यं
तावनिवहृणबीजानीत्युक्तं अत्र
वायुबीजस्यैकत्वबीजत्वेन सर्वेषा
सबिन्दुत्वं उक्तं राघवभट्टोऽप्येवं
अन्यस्त्ववाणी बिन्दुविभूषिताः ।
निपठिता नाद बिन्दु विभूषिता इति
व्याख्याते याद्या इत्यस्य विशेषणं
वदति व्योम हकारः सत्त्व ओंकारः
इह बिन्दुः तेन ह्रीं । अत एव पा
शाङ्कुशान्तरित शक्ति मन्त्रः प
रत्नाद्याद्यैर्यादि वसुवर्णगुणं
सहंसमिति प्रपञ्चसार प्रतिपाद्य ।
गुण मित्यनेन होममिति पद्मपाद
चार्ये व्याख्यातं । अग्निवधूः स्वा
हा तेनायं मन्त्रः आं ह्रीं क्रों यं रं
लं वं शं षं सं हों हंसः अमुष्यप्रा
णा इह प्राणाः आमित्यादि अ
मुष्यजीव इह स्थितः आमित्यादि
अमुष्य सर्वेन्द्रियाणि आमित्यादि
अमुष्य वाङ्मन चक्षुः श्रोत्र घ्राण
प्राणा इहागत्य सुखं चिरं तिष्ठन्तु ।
स्वाहा । अमुष्य इति षष्ठ्यन्त देवता
नामोपलक्षणं । अदः पदं द्वियद्रूपं
यत्र मन्त्रेऽपि दृश्यते । अमुष्याभिधा
ने तद्रूपं तत्र स्थाने नियोजयेत् ॥
इति नारदीयात् वशिष्ठसंहिता
यां । हृदि हस्तं सन्निधाय प्राणस्था
पनमाचरेत् प्रागुक्तभविष्यपुरा
ण वचनेन तन्मूल मन्त्रकं तत्तद्दे
वता मन्त्रकं सच वैदिक लौकिकश्च
ओंकारादि समायुक्तं नमस्कारान्त
कीर्तितं स्वनाम सर्वसत्त्वानां मन्त्र
स्त्वभिधीयते । ब्रह्मपुराणे ओंका
रादिनमोऽन्तेन चतुर्थ्यन्त तत्तद्देव
ता नाम रूपो वा । कालिकापुरा
णे । प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा
दक्षिणपाणिना तथैव हृदयं गु
ह्यं दक्षात्प्राणस्त मन्त्रवित् एभिर्मन्त्रैः
प्रतिष्ठां तु हृदयेऽपि समाचरेत् ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः
क्षरन्तु च अस्यै देवत्वसंख्यायै स्वाहे
ति यजुरीरयन् । अंग मन्त्रे रंतिमं
त्रैर्वैदिकैस्तथैव च । प्राणप्रतिष्ठां
सर्वत्र प्रतिमासु समाचरेत् अंग
मन्त्रैः अंगन्यास मन्त्रैः । अतिमन्त्रैः
मूलमन्त्रैः वैदिकैर्मनो ज्योतिरि
त्यादिभिः ॥ स्नपनं पूर्ववत् ।
ल्मीक मृत्तिकादिभिर्मिश्रिताभिः
क्षालनमाह हयशीर्षपञ्चरात्रे ।
वल्मीक मृत्तिकामिश्रं गोमयेन
सभस्मना क्षालयेच्छिल्पि संस्पर्श
दोषाणामुपशान्तये । स्नापयेदर्थ
तोयेन स्नुहदवस्था न दैशिकः । मम
लोऽस्तु सुरेश्वराणि प्रणीते
कर्मणा प्रभाविनाऽशेष जगद्धा
तस्तुं नमो नमः त्वयि संपूजयामीशे
नारायण मनामय । रहिता शिल्पि
दोषैस्त्वमृद्धियुक्ता सदा भव । ते
न यथाशक्ति स्नपनादि पूर्वकं प्र
तिमा हृदये तन्मूल मन्त्र विन्यासे ।
न देवताया विशेष सन्निधिः प्रति
ष्ठेति राघवभट्टधृतमहाकपिलपं
चरात्रेऽपि प्रतिष्ठा प्राह संसिद्धिः ।
प्रतिस्वांशु तिष्ठते । बद्ध्वर्थ्यताभि
धानानां संस्कारादेः प्रतेः स्थितिः
अर्थस्तदयमेतस्य सीयते शास्त्रि ।
केजीने । विशेष सन्निधि योग्यक्रि
यते व्यापकस्य तु ॥ सन्मन्त्रो भा
वनामन्त्रैः प्रतिष्ठा साभिधीयते
सभस्मना गोमय भस्मना अष्टा
मरपलशतं स्नाने देयं च सर्वदा
पलमाह मनुः । पंच कृष्णलको
माषस्ते सुवर्णस्तु षोडश पलं
सुवर्णाश्चत्वारः । तेनाष्टरक्तिका
धिक लौकिकमाषद्वयाधिक तो
लका त्रयेण पलं भवति एवं वि
धाष्टामरपल शतेन लौकिक ष
ष्ट्यधिकशतत्रय तोलका इति ।
एवं वल्मीक मृदादिक्षालनेगाय
त्र्या वल्मीक मृदास्नापयेत् तत्रा
पि अष्टामर शतपलं मूलपाणि
लिखितन्यायात् गायत्र्या मूलमं
त्रेण वा गंधोदक स्नाने स्नुहदवस्था
पतो विन्दू मित्यादि सूक्तत्रयात्मि
कया देशिको गुरुः यजमानो वा
वित्तः नमोऽस्तु इत्यादि मन्त्रो देवता
तरेच तत्तद्देवता नामोहः शिवलिं
गस्याप्यर्चात्वात् स्त्रीलिंगमविरुद्धं ।
यमः । कृत्वा देवकुलं सर्वं प्रतिष्ठाप्य
च देवतां । विधायविविधं चित्रं तल्लो
के विन्दते ध्रुवं । नारसिंहे प्रतिमां ल
क्षणोपेतां नरसिंहस्य कारयेत् सर्व
पापानि संत्यज्य स तु विष्णुपुरं व्रजेत् ।
प्रतिष्ठां नरसिंहस्य यः करोति

यथा विधि निष्कामोनरशार्दूल
देहबंधात् प्रमुच्यते ॥ सकामो
नरसिंहस्य पुरं प्राप्यप्रमोदते।
विधिवत् स्थापयेयस्तुकारयि
त्वा जनार्दनं। नयात् निर्गमं।
तस्य विष्णुलोकात् कथंचन।
माधवस्थानसोल्लासे। देवस्यप
तिमायांतयावंतःपरमाणवः।
तावद्वर्षसहस्राणिस्वर्गलोके
महीयते। राजमार्गेणोपुद्वान्
यत्नोसदा आर्द्रमत्रप्राशनिकेतथा
चूडाकार्ये व्रते चैव. नास्ति पुं
सवनेपिच। पाणिग्रहे प्रति।
ष्ठायांप्रवेशे नववेश्मनः। एत
द्दृष्टिकरंनाम गृहस्यस्यविधी
यते। सूतउवाच। कलौ चैकाह
साध्येन प्रतिष्ठामंत्रविन्नवान् म
ध्यमेनाधमेनापि प्रकुर्यात्कोवि
कैर्मतैः। तथा। निस्वेनिर्वर्तम
निमान् कुर्यादस्तुदयेततः विप्रा
न् संपूजयित्वाथ ततोयागपुरंव्र
जेत् गणेशग्रहदिक्पालान् प्रति
कुंभेषुपूजयेत्। स्थंडिले विधिव
द्विस्तु परिवारगणं यजेत् ॥
स्नापयेत् प्रथमं देवं तोयैः पं
चाविधे रपि। पंचामृतैः पंचगव्यैः
पंच सप्त पिंडकैरपि तिलतैलैश्च सौरै
स्रकषायैरपिसत्तमाः पंचपुष्पा।
दकैःवीथ्याविपत्रैरपिसत्तमा ॥ तु
लसी कुंद मालूर पद्मान्यपाक स्वि
पद्मकं। चम्पकान् शमी पद्म कर
वीरंच पंचमं ॥ मृत्तिका करिदं
तस्य पर्वताग्र खुरस्यच। कुशाव
ल्मीक संभूतस्तदापवल्कमीरिते।
गोमूत्रं गोमयं क्षीरं दधि सर्पिःकु
शोदकं। कुर्यात् प्राण प्रतिष्ठांच
होमं कुर्याद्यथा विधिः। दक्षि
णां विधिवद्दद्यात् स्वर्णार्धं तद
नंतरं इतिभविष्यपुराणे तृतीय
भागे ९ अध्यायः ॥ चतुरंगुल वि
स्तारा दीर्घा हस्त द्वयावधि। पता
का लोकपालानां दशानां यथि।
कीर्तिताः। पंचहस्ताश्चवेदणः
पताकानां प्रकीर्तिताः। ज्योतिष
तुरंसस्पर्शकरंचैव घृतं दधि तथा
मधु। पंचामृत मिदं प्रोक्तं विधे
यंसर्वकर्मसु ॥ प्रतिष्ठानंतरंमा
नेस्य ततःसहस्रं विप्राणां मष्टोत्त
रशतं तथा। भोजयेच्च यथा श
क्त्या पंचाशत्ताथ विंशतिं। षो
डशोपचाराः। आसन मित्यादि
दशोपचाराःपाद्यादि ॥ पंचो
पचारा गंधादि। सर्वोपचारव
स्तूनां मत्लाभे भावनैव हि। ति
मेलेनोदकेनापुष्पणैत्याहनारदः

नारसिंहे। स्नानेवस्त्रेच नैवेद्ये द्वये
दद्यादाचमनीयकं ॥ कालिका
पुराणे। यद्दीयतेचदेवेभ्योगंधपु
ष्पादिकं तथा। अर्घ्यपात्र स्थितैः
स्तोयैरभिषिच्यतमर्चयेत्. देवी
पुराणे। होमो ग्रहादि पूजायां।
शतमष्टोत्तरं भवेत्। अष्टाविंश
तिरष्टौवा यथा शक्ति विधीयते
कात्यायनः। आज्यं द्रव्यमनादे
शे जुहोतिषु विधीयते। अत्र
नीराजनमाह पूजारत्नाकरे दे
वीपुराणे। शंखभेर्यादि निर्नादै
जयशब्दैश्च पुष्कलैः। यावतो दि
वसान् वीर देव्या नीराजनं कृतं।
तावत् कल्प सहस्राणिस्वर्गलोके
महीयते। भक्त्या पिष्टप्रदीपाद्यै
श्चूताश्वत्थादि पल्लवैः औषधीभिश्चमे
ध्याभिःसर्ववीजैर्यवादिभिः नवम्यां
पर्वकालेषुयात्राकालेविशेषतः
यःकुर्याच्छ्रद्धया वीर देव्या नीराज
नंनरः यस्तु कुर्यात् प्रदीपेन स्व।
र्गलोके सगच्छति। पर्वकाल उ
त्सवकालः। देव्या इतिस्त्रीत्वमवि
वक्षितं वहुरूपा निबंधकारै र्श्री।
स्थानवादाचाराच्च। अथ प्रतिष्ठि
तमूर्तौ कदाचित् पूजाभावेन म
हाकपिलपंचरात्रे। एकाह पूजावि
हतौ कुर्याद्द्विगुणं मर्चनं विरात्रेच
महापूजा संप्रोक्षणं मतः परं। ना
साहद्दु मनेकाहं पूजा यदि विह
न्यते। प्रतिष्ठेवभ्योत केश्चित् कै
श्चित् संप्रोक्षणं क्रमः। संप्रोक्षणं
ओं देवस्यत्वेत्यादिना। गवांरसैश्च
संस्नाप्य दर्भतोयै विशोध्य च।
प्रोक्षयेत् प्रोक्षणी तोयै मूलेना
ष्टोत्तरं शतं ॥ सपुष्पं सकुशं पा
णिं न्यसेद्देवस्य मस्तके। पंचवा
रंजपेन्मूल मष्टोत्तरशतोत्तरं ॥
ततो मूलेन मूर्द्धादि पीठांतंस
स्पृशेदिति। तत्वन्यासं लिपिन्या
सं मंत्रन्यासंच विन्यसेत्। प्राण
प्रतिष्ठा मंत्रेण प्राण स्थापनमा
चरेत्। पूजांच महतीं कुर्यात् स्वतं
त्रोक्तां यथा विधि। याग होमादि
षु प्रायः संक्षेपोऽयं विधिः स्मृतः
सम्पूर्ण स्पर्शने तु बोधायनः।
तासां द्रव्यवत् कृतशौचानां देवार्चा
नां भूयः प्रतिष्ठापयेत् तासा मस्पृ
श्यस्पर्शने। प्रकृति द्रव्यस्य ताम्रा
दे र्येयेष्ट शौचं कृत्वा पुनः प्रतिष्ठां
कारयेदिति रत्नाकरः तदा पूज्य
त्व मित्याहूरत्नाकरादयः। आदित्य
पुराणे। खण्डितेस्फुटिते दग्धे।
भ्रष्टमान विवर्जिते। योगहीने



पश्चस्पृष्टे पतिते दुष्टे भूमिष्ठ ॥ अग्न्यङ्गार्च्चितेचैव पतितस्पर्शदूषिते । दग्धास्वेतेषु नोचक्रुः सन्निधानं दिवौकसः । इति सर्वगतो विष्णुः । परिभाषाचकारह । उपचार इत्या सारदातिलके । पाद्यं प्रणमाक ह वीज्ञ विष्णुक्रांतामि विष्यते । तदुक्त जलमितिशेषः गंधपुष्पाक्षत यव कुशाग्र तिल सर्षपैः । सर्व्वैः सर्व देवानां मर्घ्यमतदीरितं जातील वंग कक्कोलै र्जल माचमनीयकं । आज्यं दधिमधुन्मिश्रं मधुपर्कं निवेद्येत् मधुपर्कं दधि मधु घृत सर्षप सहितं कांस्यकांस्येन । गंध श्चंदन कर्पूरकालागुरुभिरीरितः पुष्पाणिदेव देयानि गुग्गुल्वगुरु क्षीर शर्करा मधु चंदनैः धूपयेद्दाम सम्मिश्रैनी चे देवस्य देशिकः नव नयनलंदद्यादुपचारानंतरं ।

अथवह्निहोमो नवावरणको यथा पाक्ति इत्यभिधानात् । तथा चा । ल्पधनानोयत्नमण्डपेन विनापि प्रजामार विष्णुधर्मोत्तरे प्रथम काण्डे ॥ पूजा कार्य्या वहि र्वै धा श्रद्धया भगवंदन । तनल्प दक्षिणे र्य ज्ञैर्यजेदिह कदाच न ॥ विलं देव निकायस्य ॥ यथाश्रद्धमरिंदम । तपसापूजयेतस्मिं न तस्माद्दल्पधनो नरः ॥ यद्देकाले देवप्रतिष्ठा वास्तुयाग गृहोत् स र्गों स्तदा तेनैवाहुतिभिः ग्रहकर्य्यात् गणेशः क्रियमाणे त्विति वचनात् तथा एकस्मिन्नपि ग्रहे होम द्वये विधेयं । एकाम्नावनेक होम करण पक्षे तेनैव परिसमूहना दिकमाह गोभिलः । गणेष्वेकंप रिसमूहन मिध्मो वर्हिः पर्य्युक्षण माज्यभागाविति । पूजादिकंन प्रत्ये कमेव । ब्रह्मपुराणे । देवानांप्रति मायत्र्च्युताभग्नद्दग्धा भवेत् पलानि तस्मैदेयानि श्रद्धया पंचविंशतिः ॥ अष्टोत्तरशतंपलं स्नाने देयंच सर्व दा नारसिंहे । यवगोधूमजैश्चूर्णैरुद्वर्त्य स्नेन वारिणा । प्रक्षाल्य देवं देवेशं वारुणं लोकमाप्नुयात् । पाद पीडं तु यो दद्यात् बिल्वपत्रैर्नि घर्षणं । उत्पातुना च प्रक्षाल्य स र्वपापैः प्रमुच्यते ॥ इति प्रतिष्ठा तत्वं प्रकारांतरं गारुडे षट्प्रत्यये मत्स्यपुराणे चद्रष्टव्यं ॥

प्रतिष्ठाने क्ली नगरविशेषः । विठोर इतिख्यातः ॥ तत्रपुरूरवाराजचक्रवर्त्ती आसीत् इति महाभारतं ॥ ॥

प्रतिष्ठितः त्रि प्रतिष्ठायुक्तः । गौरवान्वितः । निष्पन्नयागः संस्कृतः इति प्रतिष्ठाशब्दार्थ दर्शनात् प्रतिष्ठितानां चाकीर्ति मेरणादतिति ष्ठते इति ब्रह्मवैवर्त्ते गणेशखंडे २४ अध्यायः ॥

प्रतिसरः पुं मन्त्रभेदः ॥ माल्यं ॥ कंकणं व्रणशुद्धिः चमूपृष्ठे इति मेदिनी प्रातः कालः इतिशब्द माला ॥

प्रतिसरः पुं क्ली मण्डने आरक्षे करसूत्रे । नियोज्ये त्रि । इति मेदिनी ॥

प्रतिसर्गः पुं चलनः स्रष्टानंतरं दक्षादीनांसृष्टिः । सच पुराणपंचल क्षणान्तर्गतलक्षणविशेषः यथा ऋषयऊचुः आदिसर्गस्त्वयाख्यातःकथि तोविस्तरेणच प्रतिसर्गंश्रुयेयेषा । मधिपा स्तान्वदस्व नः सूतउवाच यदाभिषिक्तः सकलाधिराज्ये पृथु हरिःग्रामधिपोबभूव । ततोषधीनां मधिपंचकार यज्ञव्रतानां तपसांच सोमं ॥ नक्षत्र तारा द्विज वृक्ष गुल्म लता वितानस्य चरुकगर्भः अपामधीशं वरुणं धनानां राज्ञां प्रभुंवैश्रवणंचतद्वत् ॥ विष्णुरवीणां मधिपंवसूनां मग्निंच लोकाधिपतिंचकार प्रजापतीनां मधिपं च दक्षं चकार शक्रं मरुता मधीशं । दैत्याधिपानामथ दानवानां प्रह्लादमीशंच यमं पितॄणां पिशाच रक्षः पशु भूतयक्ष वेताल राजं त्वथ शूलपाणिं । प्रालेय शैलंच पतिंगिरीणां मीशं स मुद्रं स सरिन्नदानां । गंधर्व्वविद्या धरकिन्नराणामीशं पुनश्चित्ररथं चकार । नागाधिपं वासुकिमुग्रवी र्य्यं सर्पाधिपं तक्षकमादिदेश दि ग्वारणानां मधिपंचकार गजेंद्र मैरावणं नामधेयं । सुपर्णमीशं पततां मथाश्व राजान मुच्चैःश्र वसंचकार ॥ सिंहं मृगाणां वृषभं गवांच प्लक्षं पुनः सर्व वनस्पतीनां पितामहः पूर्व मथाभ्यषिंचदेतान् पुनः सर्वदिगाधिनाथान् पूर्वेण दिक्पाल मथाभ्यषिंचन्नाम्ना सुधर्माण मराति केतुं । ततोधिप रक्षिणतः चकार सर्वेश्वरं शांखपदाभिधानं । सकेतुमन्तं दिगधी शमीशंचकार पश्चाद्भुवनाण्डगर्भः हिरण्यरोमाणमुदग्दिशी शं प्रजापतिं मेरु सुतं चकार अ द्यापि कुर्वंति दिशामधीशाः शत्रून् वहंतस्तु भुवोभिरक्षा चत्वभिरे

भिः पृथु नामधेयोऽप्यभिषिक्तः
प्रथमं पृथिव्यां। मन्वन्तरे चापि ग
ते तत्रैव वैवस्वतेचक्रवर्त्तिनं पृथि
व्यां। गतेन्तरे चाक्षुष नामधेयेवै
वस्वताख्येच पुनः प्रहृष्टे प्रजा।
पतिः सोऽस्यचराचरस्य वभूव स
र्व्यान्वय वंशविरूढः। इति मात्स्ये
आधिपत्याभिषेचनं मन्वन्तराधिपत्य
नाम ८ अध्यायः। अपिच। मा
र्कण्डेय उवाच। वाराहोऽयंकृतः
सर्गो वराहाधिष्ठितो यतः। प्रति।
सर्गः स्मृतः सोऽवै दक्षाद्यैः कृतः
पृथक् रुद्रो विराड्मनुर्दक्षो मरी
च्याद्यास्तु मानसाः। य यं सर्गं
पृथक् चक्रुः प्रतिसर्गः स सस्मृ
तः विराट्सुतोऽसृजत्पृथात्मनुन्
यैर्विततंजगत्। मनुःसप्तमनून्
सृष्ट्वाचकारबहुशः प्रजाः प्रजाः।
सिसृक्षुः समनुर्योसौ स्वायंभुवा
न्वयः असृजत् प्रथमे षष्ठे मनून्
षड्परान् सुतान् स्वारोचिष औत्त
मिश्चनामसौ रैवतस्तथा चाक्षुष
श्च महातेजा विवस्वान् परतस्तथा
यक्षरक्षःपिशाचांश्च नाग गंधर्व
किन्नरान् विद्याधरानप्सरसःसि
द्धान्भूतगणान् बहून् मेघान्तडित
पुतोद्वृतान्लता गुल्मतृणादिकान् मत्

स्यान् पशूंश्चकीटांश्चजलजांस्थ
लजांस्तथा एतानृष्टानि सर्वाणि
मनुःस्वायंभुवः सुतैः सहितः स
सृजे सोऽस्य प्रतिसर्गः प्रकीर्त्तितः अ
न्येषामन्यवोयेवै तेऽपिस्वे स्वेऽन्तरेः
प्रतिसर्गस्वयंकृत्वा प्राप्नुवंतिचरा
चरं। यज्ञस्य संभवं यज्ञानरूपं।
प्राग्वंशमेवच। धर्माधर्मौ गुणान्
सर्वान् वराहःसृष्टवान् पुरा। सु
तान् बहून् समुत्पाद्य दक्षो देव
र्षिसत्तमान्। महर्षीन् सोमपादीं
श्च बहून् पितृगणांस्तथा। सृष्टिं
प्रवर्त्तयामास प्रतिसर्गोऽस्य संस्मृ
तः। अजायंत सुताद्दिव्याः दक्षि
या वाकशुमनः उर्व्वी वेषपाः पदः
मूर्द्धा श्रुतवेदा श्वतमेवात् ब्रह्मणः
प्रतिसर्गोऽयंब्राह्मः सर्गस्तुतः स्मृ
तः। मरीचेः कश्यपो जातः क
श्यपात् सकलं जगत्। देवादै।
त्या दानवाश्च तस्य सर्गः प्रकीर्त्ति
तः। अत्रेर्नेत्राद्भूच्चंद्रः सद्वंश
स्ततो भवेत्। तेन सर्वं जगद्व्याप्तं
सोमसर्गः प्रकीर्त्तितः अथर्वाङ्गिर
सौ कृत्वा पुत्रांश्चवहुशोऽपरो। मं
त्रयंत्रादयो ये वै ते सर्वेऽगिरसः स्मृ
ताः ॥ आज्यपाख्याः पुलस्त्यस्य
पुत्राश्चान्येचरास्तमाः ॥ ।

प्रतिसर्गः पुलस्त्यस्य बलवीर्य्य स
मन्विताः कादवेया गजा अश्वाः प्र
जा बहुतरास्तथा। ससृजे पुलहे
नैव सर्गस्तस्य प्रकीर्त्तितः क्रतोः
पुत्रा वालिखिल्याः सर्वज्ञा भूरिते
जसः अष्टाशीतिसहस्राणि ज्वल
द्भास्कर सन्निभाः प्रचेतसः सुताः
सर्वेयेवैप्राचेतसाः स्मृताः षड्शी
ति सहस्राणि पावकोपम तेजसः
सकालिनो वशिष्ठस्य पुत्राश्चान्ये।
च योगिनः आरुंधतेयाः पंचाश
द्वाशिष्ठःसर्ग उच्यते भृगोश्चभार्गा
वाज्जाताये वै दैत्य पुरोधसः। कव
य स्ते महाप्राज्ञा सैर्व्याप्त मखिलं
जगत्। नारदान्नारका जाता वि।
मानानि तथैवच अप्सरास्तथै
वान्ये नृत्यगीतंच कौतुकं। एते द
त्त मरीच्याद्याः कृतदारान् बहून्
सुतान् उत्पाद्येतान्पादपृथिवीदिवं
च समपूरयन् तेषांसुतेभ्यश्चसुता
स्तत्सुतेभ्यः परेसुताः समुत्प
न्नाः प्रवर्त्तते येऽद्यापि भुवनेषुवै॥
विश्वास्तु चतुर्द्दशः सृष्ट्यामनसश्च
इमाः स्मृताः श्रोत्राद्वायुः समुत्पन्नो
मुखादग्निरजायत प्रतिसर्गो ह्ययं
विष्णोस्तथाचापि दिग्भ्योदश। स्व
स्पर्श्वश्चइमाः पश्चा दक्षिनेजादवा

तरत् भास्करः कश्यपाज्जातोभा
र्य्यायास्यसमन्वितः रुद्राश्चवह
वो जाता भूत ग्रामाश्चनेर्विधाः
श्च वराहोष्ट्ररूपाश्चस्तवगोमा
युगोमुखाः ऋक्षमार्जारवदनाः
सिंहव्याघ्रमुखाः परे॥ नाना
शस्त्रधराः सर्वेनाना रूपा म
हाबलाः। एषवः प्रतिसर्गोऽपि
कथितो द्विजसत्तमाः इतिका
लिकापुराणे २६ अध्यायः ॥

प्रतिसव्यं त्रि प्रतिकूले इतिज
टाधरः ॥

प्रतिसांधानिकः पुं मागधः स्तु
तिपाठकः इति शब्दरत्नावली

प्रतिसीरा स्त्री जवनिका अवथा
यकपटः इत्यमरः॥

प्रतिसूर्य्यः पुं कृकलासः इतित्रि
काण्डशेषः ॥

प्रतिसूर्य्यकः पुं कृकलासः उ
परसूर्य्यकमण्डल इतिविश्वः ॥

प्रतिसृष्टः त्रि प्रेषितः प्रत्याख्या
तः इति मेदिनी दत्तः इति ॥
धरणिः ॥

प्रतिसोमा स्त्री महिषवल्ली इति
राजनिर्घण्टः ॥

प्रतिस्पर्द्धी स्त्री प्रतिकर्त्ता स्पर्द्धी
इति शब्दरत्नावली ॥ ।

प्रतिहतः त्रि द्विष्टः। प्रतिस्खलि
तः रुद्धः। इति मेदिनी। निराशः
यथा। मनोहतः प्रतिहतः प्रति
बद्धो हतश्च सः। इतिमुद्रांकिता
मरकोषे पाठः॥
प्रतिहारः पुं द्वारः द्वारपालः।
इति शब्दरत्नावली मायाकारः
इत्यमरटीकायांभरतः॥
प्रतिहारकः पुं मायाकारः इ।
त्यमरटीकायांभरतः॥
प्रतिहासः पुं करवीरः इत्यमरः
हासकश्चप्रतिहासश्च॥
प्रतिक्षणं अ पौनःपुन्यं इति
शब्दरत्नावली॥
प्रतिवयः पुं रक्षकः इतिशब्द
रत्नावली॥
प्रतिक्षिप्तः त्रि वारितः। प्रेषितः
इतिमेदिनी। अधिक्षिप्तः। इत्यम
रः। हेमतापिक्षेपे। स्पर्द्धया।
परगुणं प्रति दुर्वचनमधिक्षे
पः अधिक्षिप्यतेस्म अधिक्षिप्तः
कः पवं प्रतिक्षिप्तः कस्यचित्
पौर्यादिकं प्रति स्पर्द्धमानेन दु
र्वचनमधिक्षेपः स यस्यकृतः सो
ऽधिक्षिप्तः। इतिमुकुटोऽपि के
चित्त हृप्रेषिते। आरुह्य प्रेषितो
यस्तु प्रतिक्षिप्तः सउच्यते इति
कृष्णदासः इत्याह इति भरतः
प्रतीकः पुं एकदेशः। अंगं॥
प्रतिकूले त्रि। इत्यमरः विलोमः
इति मेदिनी॥ स्वांगः वाग्नि
षेधो यथा। न स्वांग नखवाद्य
वै ऊर्ध्वांजलिना पिवेत्। इति
कौर्मे १५ अध्यायः। अपिच। स्वां
गे पीठेच वाद्ये हरति धनपतेः॥
केशवस्यापि लक्ष्मी। इति ल
क्ष्मीचरित्रे॥
प्रतीकारः पुं कृतापकारस्यप्रत्यप
कारः तत्पर्यायः। वैरशुद्धिः २ वैर
निर्यातनं ३ इत्यमरः चिकित्सा
इति शब्दमाला॥
प्रतीकाशः पुं उपमा इत्यमरः॥
प्रतीची स्त्री पश्चिमदिक् इत्यमरः।
प्रतीचीनं त्रि प्रत्यक्। प्रतीच्यांभवः
इति हेमचंद्रः॥
प्रतीच्यः त्रि प्रतीच्यांभवः। पश्चिम
दिग्जातः। प्रतीची शब्दाद्भवार्थे।
स्य प्रत्ययनिष्पन्नः॥
प्रतीतः त्रि ख्यातः। इत्यमरः॥
सादरः। ज्ञातः॥ हृष्टः। इति
मेदिनी॥
प्रतीतिः स्त्री ज्ञानं। इति जटाधरः।
ख्यातिः। आदरः हर्षः। इतिप्र
तीतशब्दार्थदर्शनात्॥

प्रतीपं त्रि प्रतिकूले। इतिहेम।
चंद्रः॥
प्रतीपः पुं चंद्रवंशीयक्षत्रराज
पुत्रः शान्तनुराजपिताच इति।
पुराणं शब्दरत्नावलीच॥
प्रतीपदर्शिनी स्त्री स्त्रीमात्रं इ
त्यमरः॥
प्रतीरं क्ली तटं इत्यमरः प्र
तीवापः पुं गलितस्यस्वर्णादे
र्द्रव्यान्तरेणावचूर्णनं इतिस्वा
मी न्यसनं निःक्षेपणमिति या
वत् इति सुभूतिः उपद्रवः इति
मुकुटः॥ आवापस्तु प्रतीवापोमा
रीभीतिरुपद्रवः इतिनिर्घंटः॥
इत्यातंचनशब्दटीकायांभरतः॥
पानीयौषधविशेषः यथा उषका
दि प्रतीवापं पिवेत् संशमना
य वै इतिविद्रधिचिकित्सायां
चक्रपाणिदत्तः॥
प्रतीवेशः पुं प्रतिवेशः। इति
शब्दरत्नावली॥
प्रतीवेशी स्त्री प्रतिवेशी। इति
शब्दरत्नावली॥
प्रतीहारः पुं द्वारः द्वारपालः।
इत्यमरः तस्यलक्षणं इङ्गिता।
कारतत्त्वज्ञोवलवान् प्रियदर्शनः।
अप्रमादी सदा दक्षः प्रतीहारः स
उच्यते इति चाणक्यसंग्रहः अ
पिच प्रांशुः सुरूपो दक्षश्च प्रि
यवादी नचोद्धतः। चित्तग्राहश्च
सर्वेषां प्रतीहारो विधीयते॥
इतिमात्स्ये १८९ अध्यायः॥ स
धिविशेषः यथा मयास्योपकृ
ते पूर्वं मयैवोपकरिष्यति इति
यः क्रियतेसन्धिः प्रतीहारः स
उच्यते इतिहारावली॥
प्रतीहारी त्रि द्वारी द्वारार्थकप्र
तीहार शब्दादस्त्यर्थेइनप्रत्ययेन
निष्पन्नः॥
प्रतीहारी स्त्री द्वाःस्थिता इति।
मेदिनी॥
प्रत्यहासः पुं करवीरः इत्यमरः
प्रतीक्षा स्त्री प्रतीक्षणं अपेक्षा
प्रतिपूर्व ईक्षधातो भावे अ प्र
त्ययेन निष्पन्नः॥
प्रतीक्ष्यः त्रि पूज्यः इत्यमरः।
प्रतीक्षणीयश्च॥
प्रतुदः पुं गृध्रादिः आदिनाश्ये
नः। कंकः। काकः। द्रोणकाकः
उलूकः। मयूरः। इति राजनिर्घ
ण्टः अस्यमांसगुणाः। लावाद्या
विष्किरो वर्गः प्रतुदा जांगलाश्च
गाः लघवः शीतमधुराः कषा
याश्चहितान्दणं इति राजवल्लभः



प्रतोदः पुं अश्वादिताडनदण्डः चाबुक् इति भाषा । तत्पर्यायः प्राजनं २ प्रवयणं ३ तोत्रं ४ तोदनं ५ । इति जटाधरः ॥

प्रतोली स्त्री रथ्या । इत्यमरः । अभ्यन्तरमार्गः । नाछ इति ख्याते झली इति च ख्याते । हट्टादिमध्यनिर्मिते पथीति सोजः । पुरी नगरद्वारे इति केचित् । हट्टमार्गे तन्नाम्न्येत्र इति केचित् इति तत्त्वटीकायां भरतः

प्रत्तं त्रि दत्तं । प्रपूर्वदाधातोः कर्मणि क्त प्रत्यय निष्पन्नं इति मुग्धबोधव्याकरणं ॥

प्रत्नः त्रि पुरातनः इत्यमरः ॥

प्रत्यक् त्रि अ पश्चिमदिक् पश्चिमदेशः पश्चिमकालः इति मेदिनी ॥

प्रत्यक्पर्णी स्त्री अपामार्गः इत्यमरः द्रवन्ती । इति राजनिर्घण्टः ॥

प्रत्यक्पुष्पी स्त्री अपामार्गः इत्यमरः ॥

प्रत्यक्श्रेणी स्त्री दन्तीवृक्षः मूषिकपर्णी इत्यमरः ॥

प्रत्यगाशापतिः पुं वरुणः इति हलायुधः ॥

प्रत्यग्रः त्रि नूतनः इत्यमरः । इत्यमरः ॥ ॥

शोधितः । इति जटाधरः ॥

प्रत्यग्रथः पुं अहिच्छत्रदेशः इति हेमचन्द्रः ॥

प्रत्यङ् त्रि पश्चिमदिक् । पश्चिमदेशः । पश्चिमकाल । प्रति पूर्व अञ्चु धातोः कर्मणि क्विप् प्रत्ययेन निष्पन्नः इति व्याकरणं ।

प्रत्यङ्गं क्ली अवयवविशेषः यथा प्रत्यङ्गकर्णनासादि लिङ्गोऽगामिकरादिकं इति शब्दचन्द्रिका

प्रत्यङ्गिरा स्त्री देवीविशेषः तस्या ध्यानं । शवोपरि समासीना रक्ताम्बर तनुच्छदा । सर्वाभरणसंयुक्ता गुञ्जाहारविभूषिता षोडशाब्दा च युवती पीनोन्नत पयोधरा । कपाल कर्त्रिका हस्ता परमानन्दरूपिणी । वाम दक्षिणयोगेन ध्यायेत्सम्यग्विद्रुमाभा । इति प्रत्यङ्गिरा स्तोत्रान्तर्गतं ॥

प्रत्यनीकः पुं शत्रुः इति हेमचन्द्रः ॥

प्रत्यन्तः पुं म्लेच्छदेशः इत्यमरः सन्निकृष्टे त्रि ॥

प्रत्यन्तपर्वतः पुं महापर्वतसमीपवर्तिक्षुद्रपर्वतः इत्यमरः ॥

प्रत्यभियोगः पुं प्रत्यपराधः यथा अभियोगमनिस्तीर्य्यनैनं प्रत्य

भियोजयेत् । अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ॥ अभियुक्त इति अभियोगो ऽपराध स्तमभियोगमनिस्तीर्य्य अपहृत्यैनमभियोक्तारं न प्रत्यभियोजयेदपराधेन न संयोजयेत् ॥ यद्यपि प्रत्यभिस्कन्दनं प्रत्यभियोगरूपं तथापि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधस्य विषयः । अतः स्वाभियोगानुपमर्द्दनरूपस्य प्रत्यभियोगस्यायं निषेधः इति मिताक्षरा ॥

प्रत्यभिवादः पुं } अभिवाद्यस्य
प्रत्यभिवादनं क्ली } गुरोराशीर्व्वचनं । इति गोयीचन्द्रः ॥

प्रत्ययः पुं अधीनः । शपथः । ज्ञानं । विश्वासः । हेतुः । रन्ध्रं ॥ शब्दः । इत्यमरः । प्रथितत्व ॥ आचारः । इति मेदिनी । निश्चयः स्वाङ्गः । इति हेमचन्द्रः ॥ प्रकृत्यनन्तरं जायमानः । वोपदेवेन । स्यप्रसंज्ञाकृता । प्रत्याययन्तीति सप्रतिङ्कृन्तद्धिताः प्रत्ययाः इति संक्षिप्तसारव्याकरणं । सहकारी । इति त्रिकाण्डशेषः ॥

प्रत्ययकारिणी स्त्री मुद्रा मोहर इति पारस्य भाषा । इति त्रिकाण्डशेषः ॥

प्रत्ययितः त्रि आप्तः । विश्वस्तः इत्यमरः ॥

प्रत्यर्थी न त्रि शत्रुः । इत्यमरः । प्रतिवादी । इति शब्दरत्नावली । अर्थिप्रतिपक्षः । यथा । प्रत्यर्थिनोऽग्रतो लेख्यं यथा वेदितमर्थिना । समामासतदर्द्धाहर्नामजात्यादि चिह्नितं । अर्थ्यत इत्यर्थः साध्यः । सोऽस्यास्तीत्यर्थी । तत्प्रतिपक्षः प्रत्यर्थी । इति मिताक्षरा ॥

प्रत्यर्पितं त्रि प्रतिदत्तं । यथा । अर्थ्यप्रवहारोऽपि एकस्मिन् वत्सरे यत्सकाशं यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितं चेति । पुनरन्यस्मिन् वत्सरे तद्द्रव्यं तत्सकाशं तत्तेन गृहीतं याच्यमानोऽपि यदि ब्रूयात् सत्यं गृहीतं प्रत्यर्पितं चेति वत्सरान्तरे गृहीतं प्रत्यर्पितं च नास्मिन् वत्सरे इत्युपयुज्यते । इति मिताक्षरा ॥

प्रत्यवसानं क्ली भोजनं । इति हेमचन्द्रः ॥

प्रत्यवसितं त्रि भक्षितं । इत्यमरः ॥

प्रत्यवस्कन्दः पुं } व्यवहारविधाने
प्रत्यवस्कन्दनं क्ली } नागीतोत्तरविशेषः

यथा। प्रत्यवस्कंदनंनामसत्यं गृहीतं प्रतिदत्तंप्रतिग्रहलब्धमिति वा। यथाह नारदः। अर्थिनालेखितो योऽर्थः प्रत्यर्थी यदि तं तथा। प्रपद्य कारणं ब्रूयात् प्रत्यवस्कंदनं स्मृतं। इति मिताक्षरा। अपिच। अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तत्तथा। प्रपद्य कारणंब्रूयात् प्रत्यवस्कंदनंहि तत्। इति व्यवहारतत्त्वे बृहस्पतिवचनं॥

प्रत्यवस्थाता त्रि शत्रुः। इति हेमचंद्रः॥

प्रत्यवायः पुं पापं। दुरदृष्टं यथा। द्वयं केचिदुपायस्य दुरितं। स्यप्रवदंते। अनुतापमिति तथा वान्येप्रत्यवायस्यमन्वते। इत्येकादशीतत्त्वेजाबालवचनं॥

प्रत्यग्रमन् क्ली गैरिकं। इति त्रिकाण्डशेषः॥

प्रत्यहं अ प्रतिदिनं। यथा। गिरिश मुपचचार प्रत्यहं सा सुकेशी इति कुमारसंभवः॥

प्रत्यक्षं त्रि इंद्रियग्राह्यं तत्पर्य्यायः ऐंद्रियकः २ इत्यमरः। अनुभवविशेषः तत्षड्विधं। घ्राणजं १ रासनं २ श्रावणं ३ चाक्षुषं ४ स्पार्शनं ५ मानसं ६। निर्विकल्पक सविकल्पक भेदेन प्रत्येकं द्विविधं। निर्विकल्पकंतु अतींद्रियं। सविकल्पकं मनोग्राह्यं। षड्विध प्रत्यक्षे आश्रयस्य महत्त्वं कारणं। इंद्रियं करणं। विषयेणसह इंद्रिय सन्निकर्षः अस्यव्यापारः। यथा घ्राणजादि प्रभेदेनप्रत्यक्षं षड्विधं मतं॥ घ्राणस्य गोचरो गंधो गंधत्वादिरपिस्मृतः। तथारसोरसज्ञायास्तथाशब्दोपिचश्रुतेः। उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्व संख्ये। विभागसंयोग परापरत्व स्नेहद्रवत्वं परिमाणयुक्तं। क्रियांजातिं योग्यवृत्तिं समवायंच तादृशं। गृह्णाति चक्षुः संबंधादालोकोद्भूतरूपयोः। उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि च त्वचः। रूपान्यच्चक्षुषोयोग्यं रूपमत्रापिकारणं। द्रव्याध्यक्षे त्वचो योगो मनसाज्ञानकारणं। मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः॥ ज्ञानं यन्निर्विकल्पाख्यं तदतींद्रियमिष्यते। महत्त्वंषड्विधे हेतुरिंद्रियं करणं मतं। विषयेंद्रियसंबंधो व्यापारः सोपि षड्विधः॥

इति भाषापरिच्छेदः॥

प्रत्यक्षदर्शिन् त्रि साक्षी। इति शब्दमाला॥

प्रत्यक्षिन् त्रि व्यक्तद्रष्टार्थः। इति त्रिकाण्डशेषः॥

प्रत्यक्षवादिन् पुं बौद्धः। नान्यत् प्रमाणमिति तन्मते। प्रत्यक्षं वदति यः। कर्त्तरि इन्। प्रत्ययेन निष्पन्नः॥

प्रत्याकारः पुं खड्गकोषः। खाप इति भाषा। इति हेमचंद्रः॥

प्रत्याख्यातः त्रि दूरीकृतः तत्पर्य्यायः। प्रत्यादिष्टः २ निरस्तः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६ इत्यमरः। क्वचित् पुस्तके तु प्रत्यादिष्टेत्यादि श्लोकमेकमधिकं दृश्यते तत्राद्य चतुष्कं प्रत्यादिष्टे परचतुष्कं तिरस्कृते। इति तट्टीका सारसुंदरी॥

प्रत्याख्यानं क्ली निराकरणं। तत्पर्य्यायः। निरसनं २ प्रत्यादेशः ३ निराकृतिः ४ इत्यमरः॥

प्रत्यागमः पुं प्रत्यागमनं। फिरे आसा इति भाषा। यथा। तीर्थयात्रा समारंभे तीर्थप्रत्यागमेऽपिच। इति प्रायश्चित्ततत्त्वं॥

प्रत्यादिष्टः त्रि प्रत्यादेशविशिष्टः तत्पर्य्यायः। निरस्तः २ प्रत्याख्यातः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६। इत्यमरः॥

प्रत्यादेशः पुं निराकरणं। प्रत्याख्यानं। इत्यमरः। भक्ते प्रतिदेवानामादेशश्च॥

प्रत्यालीढं क्ली धन्विनांपादसंस्थानविशेषः। तत्रोर्द्धस्य वामपादप्रसारे दक्षिणपादसंकोचः। इत्यमरटीकायां भरतः। अपीने त्रि। इति मेदिनी॥

प्रत्याशा स्त्री आकांक्षा। यथा मृगोऽन्यत्रमरीचिकासु पश्यन् प्रत्याशयाधावति। इति शांतिशतके॥

प्रत्यासन्नः त्रि निकटवर्त्ती। इति जटाधरः॥

प्रत्यासरः पुं सैन्यपृष्ठः। इति शब्दरत्नावली॥

प्रत्यासारः पुं व्यूहस्यपश्चाद्भागः व्यूहस्य पश्चाद्व्यूहान्तरं। तत्पर्य्यायः व्यूहपार्ष्णिः २ इत्यमरभरतौ॥

प्रत्याहरणं क्ली प्रत्याहारः। इति शब्दरत्नावली॥

प्रत्याहारः पुं स्वस्वविषयेभ्य इंद्रियाकर्षणं। तत्पर्य्यायः उपादानं २। इत्यमरः। प्रत्याहरणं ३। इति शब्दरत्नावली॥



सच योगाङ्गविशेषः ॥ यथा ।
प्रत्याहारस्तु नर्केश प्राणायामस्तृ
तीयकः । समाधिर्धारणाध्यानेष
डङ्गो योग संग्रहः । इति तट्टीका
यां भरतः ॥
प्रत्याहारमाह । शब्दादिष्वनुरक्ता
नि निगृह्याक्षाणि योगवित् कुर्या
च्चित्तानुकारीणि प्रत्याहारपराय
णः इति विष्णुपुराणे ६ अंशे ७ अ
ध्यायः । अपिच । इन्द्रियाणीन्द्रिया
र्थेभ्यः समाहृत्य स्थितो हि सः ॥
मनसा सहबुद्ध्या च प्रत्याहारेषु सं
स्थितः ॥ इति गारुडे २४९ अध्या
यः । अल्पेन बहूनां ग्रहणं । यथा ।
अच् इति हलन्तेन सर्व स्वराणां ग्र
हणं । इति भरतः ॥
प्रस्तुतिः स्त्री प्रस्तावं । इति श
ब्दरत्नावली ॥
प्रस्तुतक्रमः पु प्रधानप्रयोजनानु
कूलप्रयोजनानुष्ठानं । तत्पर्य्या
यः प्रयोगार्थः २ इत्यमरः ॥ प्रक्र
मः योगः । इति केचित् । प्रकृष्टयु
द्धार्थमुपक्रमः प्रयोगः तदाख्यः
इति केचित् प्रयोगो युद्धं तदभि
धेय इति केचित् । प्रस्तुतक्रमो यु
द्धार्थ इति भागुरिः । युद्धार्थं प्रथ
माक्रान्तिः इत्यपरे । कस्मीरे ।
मे प्रथमयुक्तिः प्रयोगः । इत्यप
रे । इति भरतः ॥
प्रस्तुतक्रान्तिः स्त्री प्रस्तुतक्रमः
इत्यमरटीकायां नीरस्वामी ॥
प्रत्युत्तरं क्ली उत्तरं प्रतिउत्तरं य
था ममेयं भूमिः क्रमभ्यागतत्वात्
इति वादिना उक्ते ममेयं भूमि देशव
र्षीणि भुज्यमानत्वात् इति प्रत्यु
त्तरं । इति व्यवहारतत्त्वं ॥
प्रत्युत्थानं क्ली अभ्युत्थानं गात्रो
त्थानं । यथा । दीयन्तां मन्दे त्व
यापि प्रियया चोद्धवेन च स्त्रि
तः पश्यामि भक्त्या प्रत्युत्थानासना
दिभिः इति श्रीभागवते १ स्कन्धे
१९ अध्यायः ॥
प्रत्युत्पन्नः त्रि उत्पत्तिविशिष्टः
प्रत्युत्पूर्वपद धातोः कर्त्तरिक्तः
प्रत्ययेन निष्पन्नः ॥
प्रत्युत्पन्नमतिः त्रि तत्कालबुद्धियु
क्तः तत्पर्य्यायः कुशाग्रीयमतिः २
तत्कालदर्शी ३ तत्कालधीः ४ इति
हेमचन्द्रः । प्रतिभान्वितः । इति ज
टाधरः ॥
प्रत्युद्गमनीयं क्ली धौतवस्त्रकद्वयं
इति मेदिनी । समुपस्थानयोग्यं
पूजनीये च त्रि । इति शब्दर
त्नावली ॥

प्रत्युद्गमः पु) प्रत्युत्थानं यथा
प्रत्युद्गमनं क्ली) एकत्रासनसंस्थि
तिः परिकृता प्रत्युद्गमाद्गुरवः । इत्या
दि साहित्यदर्पणे रसपरिच्छेदः ।
प्रत्युषः पु प्रत्यूषः । प्रातः इत्य
मरटीकायां मधुरेशः ॥
प्रत्युषः स क्ली प्रत्यूषः इत्यमरः
यथा याति व्यक्तिं पुरस्तादरु
ण किसलये प्रत्युषः पारिजातः
इति भरतधृत रुद्रशतकं ॥
प्रत्यूषः पु प्रभातं । इत्यमरः ॥
सूर्य्यः इति शब्दरत्नावली । वसु
भेदः । इति जटाधरः ॥
प्रत्यूषः क्ली प्रभातं इत्यमरटीका
यां भरतः ॥
प्रत्यूहः पु विघ्नः । इत्यमरः ॥
प्रत्येकं क्ली एकमेकं प्रति । यथा
प्रत्येकं वा द्वयं वा त्रय मपि च परं
बीजमत्यन्तगुह्यं । इत्यादिकर्पूरा
ख्यस्तोत्रं ॥
प्रथ ष ङ म ख्यातौ । इति कविक
ल्पद्रुमः ॥
प्रथ क प्रक्षेपे । ख्यातौ । इति क
विकल्पद्रुमः ॥
प्रथमः त्रि प्रधानं प्राक् तत्पर्य्या
यः । आदिः २ पूर्वः ३ पौरस्त्यः
४ आद्यः ५ । इत्यमरः ॥
प्रथा स्त्री ख्यातिः इत्यमरः ॥
प्रथितः त्रि ख्यातः । इत्यमरः
प्रथितिः स्त्री ख्यातिः । प्रथ धा
तोर्भावे क्ति प्रत्ययेन निष्पन्ना ।
इति व्याकरणं ॥
प्रथिमा न त्रि अतिशयेन पृथुः
पृथुशब्दादतिशयार्थे इमन् प्रत्य
येन निष्पन्नः इति व्याकरणं यथा
प्रथिमानं दधानेन वदनेन जघने
न सा । इति भट्टिः ॥
प्रथिमा स्त्री पृथोर्भावः । पृथुत्वं
इति सिद्धान्तकौमुदी ॥
प्रथिमी न त्रि प्रथिमायुक्तः स्थू
लः इति सिद्धान्तकौमुदी ॥
प्रथिष्ठः त्रि अतिशयेन पृथुः अति
बृहन् । इति मुग्धबोधव्याकरणं ।
प्रथुकः पु पृथुकः इत्यमरटीका
यां रायमुकुटः ॥
प्रदः त्रि प्रकर्षेण ददातीति यः । प्र
दाता । इति सिद्धान्तकौमुदी ॥
प्रदत्तं त्रि प्रकर्षेण दत्तं । इति मु
ग्धबोधव्याकरणं ॥
प्रदरः पु भङ्गः । बाणः । इत्यमरः
विदारः । नारीरुग्भेदः । इति मेदि
नी । अस्य नामान्तरं असृग्दरं त
त्फलितयोन्या रक्तादि धात
क्षरणं अस्य निदानं यथा विरु



दृमद्याध्यशनादजीर्णाद्गर्भप्रपाता
दतिमैथुनाच्च । यानाध्वशोकादति
कर्षणाच्च भाराभिघातात् शयनाद्दि
वा च । असृग्दरं भवेत् सर्व्वं साङ्गमर्द्दं
सवेदनं । तस्यातिवृद्धौ दौर्ब्बल्यं ।
भ्रमो मूर्च्छा मदस्तृषा दाहः प्र
लापः पाण्डुत्वं तन्द्रा रोगाश्च वात
जाः । स च चतुर्व्विधो यथा श्लेष्म
पित्तानिल सन्निपातैश्चतुःप्र
कारं प्रदरं वदन्ति । श्लैष्मिकस्य
तस्य लक्षणं । आमं सपिच्छाप्र
तिमं सपाण्डु पुलाकतोयप्रति
मं कफात्तु ॥ पैत्तिकस्य तस्य ।
लक्षणं । सपीतनीलासितरक्त
मुष्णं पित्तार्त्तियुक्तं भृशवेगि पि
त्तात् ॥ वातिकस्य तस्य लक्षणं
रूक्षारुणं फेनिलमल्पमल्पं वा
र्त्तं हि वातात् पिशितोदकाभं ॥
त्रिदोषिकस्य लक्षणं सक्षौ
द्रसर्पिर्हरितालवर्णं मज्जप्रका
शं कुणपं त्रिदोषात् । तच्चाप्यसा
ध्यं प्रवदन्ति तज्ज्ञा न तत्र कुर्व्वीत भि
षक् चिकित्सां । इति माधवकरः ॥
अस्यौषधं यथा हरितलता कद
लीपीता दीर्घशर्करासह प्रदर
हरते रोगनाशकार्य्ये विचारणा
इति गारुडे १९६ अध्यायः ॥

अपि च । दध्ना सौवर्च्चलाजाजी मधुकं
नीलमुत्पलं । पिबेत् क्षौद्रयुतं नारी
वातासृग्दरशान्तये । पथ्यामस्य
कं माषद्वयं । सर्व्वमेकीकृत्य दर्भा
कर्ष चतुष्टयेन पिष्ट्वा तत्र माषाष्ट
कं मधु निःक्षिप्य पेयं ॥ मधुकं
कर्षमेकं तच्चतुष्कर्षा सिता तथा
तण्डुलोदक संपिष्टौ लोहिते प्रद
रे पिबेत् । बलाकङ्कतिकाख्या
या तस्या मूलन्तु चूर्णितं । लोहि
ते प्रदरे क्षीरे शर्करा मधुसंयु
तं ॥ शुचिस्थाने ब्याघ्रनख्या म
लमुत्तरदिग्भवं । नीतं मुत्तरफल्गु
न्याः कटिबद्धं हरेदसृक् ॥ रसाञ्ज
नं तण्डुलकस्य मूलं क्षौद्रान्वितं तण्डु
लतोयपीतं । असृग्दरं सर्व्वभवं नि
हन्ति श्वासञ्च भार्गी सह नागरेण ॥
अशोकवल्कलक्काथशृतं दुग्धं
सुशीतलं यथा बलं पिबेत् प्रात
स्तीब्रासृग्दरनाशनं । अशोकवल्क
लपलं द्वात्रिंशत्पल संमितेन जले
न निक्काथ्य शेषेण पलाष्टक क्का
थेन सह क्षीरपलाष्टकमितं विप
चेत् । तस्य दुग्धावशेषकर्त्तव्यं तन्म
ध्ये पलचतुष्टयमितं दुग्धं पेयं वह्नि
बलापेक्षया वा । कुश मूल सम
द्धृत्य पेषयेत्तण्डुलाम्बुना ॥ ।

पतेत् पीत्वा त्र्यहं नारी प्रदरात्
परिमुच्यते । इति भावप्रकाशः ॥
प्रदर्शितः त्रि आलोकितः यथा
क्रिया वाचित्व माख्यातं प्रसिद्धो
ऽर्थः प्रदर्शितः । प्रयोगतोऽस्य म
नव्याप्येनकार्था हि धातवः इति
मुग्धबोधटीकायां दुर्गादासः ॥
प्रदलः पुं वाणः इति जटाधरः
प्रदक्षिणं क्ली) दक्षिणावर्त्तेन
प्रदक्षिणः पुं (देवमुद्दिश्य भ्रम
णं यथा । एकं देव्यां रवौ सप्त त्री
णि कुर्य्याद्विनायके । चत्वारि के
शवे कुर्य्यात् शिवे चार्द्धं प्रदक्षिणं
इति कर्म्मलोचनं ॥
सर्व्वदेवतोद्दिष्ट प्रदक्षिणं यथा
प्रसार्य्य दक्षिणं हस्तं स्वयं नम्र
शिराः पुनः । दक्षिणं दर्शयन् ।
पार्श्वं मनसापि च दक्षिणः सकृ
त्रिर्व्वा वेष्टयेत्ता देव्याः प्रीतिः प्रजा
यते स च प्रदक्षिणो ज्ञेयः सर्व्वदे
वौघतुष्टिदः । यष्टावर शान्तये
देवाः कुर्य्यात् प्रदक्षिणं सर्व्वान्
कामान् समासाद्य पश्चान्मोक्षम
वाप्नुयात् । मनसापि च यो दद्याद्दे
वेभ्यस्तु प्रदक्षिणं प्रदक्षिणा
यम गृहे नरकानि न पश्यति ॥
इति कालिकापुराणे ७० अध्यायः

॥ अपि च । दक्षिणाद्वायवीं गत्वा
दिशं तस्याश्च शाम्भवीं । ततश्च ।
दक्षिणां गत्वा नमस्कारस्त्रिको
णवत् । अर्द्धचन्द्रं महेशस्य दृष्ट
तश्च समीरितं शिव प्रदक्षिणे ।
मेत्री अर्द्धचन्द्र क्रमेण तु ॥ सव्या
सव्यक्रमेणैव सोमसूत्रं न लङ्घये
त् । सोमसूत्रं जलनिःसरण ।
स्थानं । प्रसार्य्य दक्षिणं हस्तं स्व
यं नम्रशिराः पुनः । दर्शयेद्दक्षि
णपार्श्वं मनसापि च दक्षिणः त्रि
धा च वेष्टयेत् सम्यक् देवतायाः प्र
दक्षिणं । एकहस्तप्रणामश्च ए
कं वापि प्रदक्षिणं । अकाले द
र्शनं विष्णोर्हन्ति पुण्यं पुराकृतं इ
ति तन्त्रसारः ॥
प्रदानं क्ली दानं । इति शब्दरत्ना
वली । प्रकृष्टदानञ्च ॥
प्रदिग्धं क्ली मांसव्यञ्जनभेदः य
था । मांसं बहुघृते भृष्टं सितकाचो
स्नांवुना युक्तः । जीवकाद्यैः स
मायुक्तं परिभुक्तं तदुच्यते तदे
वहुल तक्रात्यं प्रदिग्धं सविजान
के इति शब्दचन्द्रिका । पलिमत्रि
प्रदिक् स्त्री विदिक् इति जटाधरः
प्रदीपः पुं दीपः इत्यमरः ॥
तस्य पर्य्यायः स्नेहाशः दीपकः इक

ज्वलध्वजः ४ शिखातरुः ५ गृह
मणिः ६ ज्योत्स्नावृक्षः ७ दशेन्ध
नः ८ दोषातिलकः ९ दोषास्यः
१० नयनोत्सवः ११ इति शब्दरत्ना
वली । दीपमाहात्म्यं यथा । दी
पेन लोकान् जयति दीपस्तेजो
मयः स्मृतः । चतुर्वर्गप्रदो दीप-
स्तस्माद्दीपं यजेत् श्रिये ॥ सप्त
प्रकारा दीपा यथा । घृतप्रदीपः
प्रथमस्तिलतैलोद्भवस्ततः । सा
र्षपः फलनिर्यासजातो वा राजि
कोद्भवः । दधिजश्चाब्जजश्चैव प्रदी
पाः सप्त कीर्त्तिताः । तस्य पञ्चप्र
कारा वर्त्तिका यथा । पद्मसूत्रभ
वा दर्भगर्भसूत्रभवा तथा ।
शालजा बादरी वापि फलकोषो
द्भवा तथा । वर्त्तिका दीपकृत्येषु
सदा पञ्चविधाः स्मृताः । दीपपात्रा
णि यथा । तैजसं दारवं लौहं मा
र्त्तिकं नारिकेलजं । तृणध्वजोद्भ
वं वापि दीपपात्रं प्रशस्यते । दीप
वृक्षे दीपस्थापनं प्रशस्तं निषेधो
यथा । दीपवृक्षाश्च कर्त्तव्यास्तै
जसाद्यैश्च भैरव । वृक्षे च दीपो
दातव्यो न तु भूमौ कदाचन । सर्वंस
हा वसुमती सहते न त्विदं द्वयं । अ
कार्य्यपादघातञ्च दीपतापस्तथैव

च । तस्माद्यथा तु पृथिवी तापं ना
प्नोति वै तथा । दीपं दद्यान्महादे
व्यै अन्येभ्योऽपि च भैरव । कुर्व्वीत
पृथिवीतापं यो दीपस्तस्य नरः
स तापनं तापनरकमाप्नोत्येव श
तं समाः । सूक्ष्मवर्त्तिः सस्नेहः पा
त्रे भद्रे सुदर्शने । सच्छाये हृत
कोटौ न दीपं दद्यात् प्रयत्नतः ।
लभ्यते यस्य तापस्तु दीपस्य चतु
रङ्गुलात् । न स दीप इति ख्यातो
ह्योघवह्निस्तु स स्मृतः । नेत्राह्ला
दकरः सर्वभूमितापविवर्जितः ।
सुशिखः शब्दरहितो निर्धूमो ना
तिह्रस्वकः । दक्षिणावर्त्तवर्त्ति
स्तु प्रदीपः श्रीविवृद्धये दीपहृत ।
स्थिते मुङ्क्तेहे नैव प्रशस्तिते ॥
दक्षिणावर्त्तवर्त्ती तवावर्त्तदीपः प्र
दीपकः । उत्तमः प्रोच्यते पुत्र सर्व
तुष्टिप्रदायकः । हस्तेन वर्त्तितो
दीपो मध्यमः परिकीर्त्तितः । विही
नः पात्रतैलाभ्यामधमः परिकी
र्त्तितः । इति कालिकापुराणे ६८
अध्यायः । कार्त्तिके तद्दानफलं ।
यथा । कार्त्तिके मासि यो दद्यात् प्र
दीपं सर्पिरादिना । आकाशे मण्डपे
वापि स वाञ्छितफलं लभेत् । इति ।
कर्मलोचने अपि च । सप्तम्यां हरिं

भक्त्या दीपं दत्त्वा दिवानिशं तत्रपा
प विशुद्धात्मा नरो याति दिवं न
प कुलसम्पदे विशेषेण तत्र पंच
दिनानि तु पुण्यानि मेषु यदन्न
मक्षयं सर्वकामिके । एकादश्यां
हरिमुद्दिश्य दीपं प्रज्वाल्य मूषि
का मानुष्यं दुर्लभं प्राप्य परां ग
तिमवाप सा । द्वादश्यां तस्करो
रात्रिदीपमुद्धाप्य चौर्य्यतः । का
रणात् परमं प्राप्तो लोकं विष्णोः
सनातनं । अयं चोऽपि त्रयोदश्यां
दीपान् दत्त्वा परैः कृतान् वेश्या
लीलावती भूत्वा जगाम स्वर्गम
क्षयं लुब्धकोऽपि चतुर्दश्यां प्रज्व
यित्वा जनार्द्दनं । निर्भक्तिः परं स्व
र्गं या विष्णुलोकं जगाम सः । गो
पः कश्चिदमावास्यां पूजां दृष्ट्वा
ऽप्यप्रीतिमान् । स डम्भेन सत्ताजोपा
लो राजराजेश्वरोऽभवत् । तस्मा
द्दीपाः प्रदातव्या रात्रावस्तमिते र
वौ । गृहेषु सर्वगोष्ठेषु चैत्यषाय
तनेषु च । देवानां चैव रथ्यासु श्म
शानेषु सरःसु च । इत्यग्निपुराणं ।
प्रदीपनः पुं स्थावरविषभेदः । इ
त्यमरः । तस्य लक्षणं यथा । वर्णो
लोहितो यः स्यात् दीप्तिमान् ।

दहनप्रभः । महादाहकरः पूर्वैः
कथितः स प्रदीपनः । इति राज
निर्घण्टः । प्रकाशके त्रि ।
प्रदेशः पुं देशमात्रे । तत्पर्य्यायः
आख्यानं २ आख्या ३ भूः ४ अव
काशः ५ स्थितिः ६ पदं ७ इति
राजनिर्घण्टः । तर्ज्जन्यङ्गुष्ठसम्मि
तः । भित्तिः । इति मेदिनी ॥
प्रदेशनं क्ली नृपादेरुपढौकनं
भेटी इति ख्याते । तत्पर्य्यायः । प्रा
भृतं २ उपायनं ३ उपग्राह्यं ४ ॥
उपहारः ५ उपदा ६ । इत्यमरः ।
केचित्तु देवताभ्यो भक्त्या मित्रा
दिभ्यश्च प्रीत्या यत्प्रशस्तं लेहं ।
कादि दीयते तत् इत्याहुः । के
चित्तु प्राभृतादि द्वयं श्रद्धया देवता
ब्राह्मणराजादिभ्यो यद्दीयते तत्र
उपायनादि चतुष्कं तुभ्यमिदं ।
दीयते त्वयैतन्मम कार्य्यं साध
नीयमिति यद्दीयते पुनरिति
ख्याते इत्याहुः । किन्तु षट्कमे
कार्थमेवेति बहवः । उपायनमुप
ग्राह्यं प्राभृतञ्चोपदा स्त्रियामित्य
मरमाला इति भरतः ॥
प्रदेशिनी } स्त्री तर्ज्जनी इत्यमर
प्रदेशिनी } भरतौ ॥
प्रदेहः पुं प्रलेपः इति वैद्यकं

प्रदोषः पुं रजनीमुखं । इत्यमरः
तन्मरात्रेः प्रथम दंड चतुष्टयं ।
यथा प्रदोषोऽस्तमयादूर्द्ध्वं घटि
काद्वयमिष्यते । इति तिथ्यादित
त्वे । दोषः । इति हेमचंद्रः ॥
प्रद्यु स्त्री प्रकृष्टा द्यौः स्वर्गो य ।
स्मात् तत् पुण्यं । इति मुग्धबोध
टीकायां दुर्गादासः ॥
प्रद्युम्नः पुं कंदर्पः । इत्यमरः । स
वासुदेवस्य चतुर्थांशः यथा ॥
एकदेवचतुर्धाहं चतुर्धा पुन र
च्युतः विभेद वासुदेवोऽसौ प्रद्यु
म्नोहरिरव्ययः कृष्णद्वैपायनो
व्यासोविष्णु नारायणः स्वयं अ
पांतरतमाः पूर्वस्वेच्छया भव
द्धरिः इति कौर्मे ४८ अध्यायः
अपिच । अनिरुद्धः स्वयंब्रह्मा प्रद्यु
म्नः कामपवच बलदेवः स्वयंशे
षः कृष्णस्य प्रकृतेः परः इति ब्र
ह्मवैवर्ते श्रीकृष्णजन्मखंडे ११६
अध्यायः प्रद्योतः पुं रश्मिः इ
ति हलायुधः प्रद्योतनः पुं सू
र्यः इति हलायुधः प्रद्यौ स्त्री ।
प्रद्रवः पुं पलायने इत्यमरः ।
प्रधनं क्ली युद्धं इत्यमरः दार
णं इति मेदिनी ॥
प्रधानं क्ली प्रकृतिः । महामात्रः
परमात्मा । बुद्धिः । प्रशस्तं । तत्
पर्यायः । प्रमुखं २ प्रवेकं ३ अ
नुत्तमं ४ उत्तमं ५ मुख्यं ६ वर्य्यं ७
वरेण्यं ८ प्रवर्हं ९ अनवरार्द्ध्यं १०
परार्द्ध्यं ११ अग्र्यं १२ प्राग्रहरं १३
प्राग्र्यं १४ अग्र्यः १५ अग्रीयं १६ ।
अग्रिमं १७ इत्यमरः ॥
प्रधानः पुं महामात्रः सेनापत्या
दिः महामात्रः प्रधानः स्यादिति
पुंस्कांडेबोपालितः इत्यमरटी
कायां भरतः ॥
प्रधिः पुं नेमिः ॥ इत्यमरः ॥
प्रधीः त्रि प्रकृष्टबुद्धियुक्तः प्र
कृष्टबुद्धौ स्त्री इति मुग्धबोध ।
व्याकरणं प्र पिता स्त्री कोशिता
सूर्यगतव्यदिक् इति मेदिनी ॥
प्रकर्षेणातमेदीमेचवि ॥
प्रनिधानं क्ली प्रणिधानं व
धः इति हेमचंद्रः ॥
प्रपंच पुं विपर्यासः विस्तारः इ
त्यमरः । विपर्यासो वैपरीत्यं भ्र
मो वा मायेति स्वामी इति भरतः
संचयः प्रतारणं इति मेदिनी संसा
रः यथा पादुका पंचक स्तोत्रे पंचव
क्त्रादिनिर्गतं षडाम्नाय फलोपेतं प्रपं
चे चातिदुर्लभं इति गुरुपादुकास्तोत्रे ।

प्रपंचितं त्रि विस्तृतं । भ्रमयुक्तं य
था । आत्मानमेवात्मतया विजान
तां तेनैव जातं निखिलं प्रपंचितं
ज्ञानेन भूयोपि च तत् प्रलीयते
रज्ज्वामहे र्भोग भवा भवौ यथा ।
इति श्रीभागवते १० स्कंधे अध्या
यः ॥
प्रपथ्यः त्रि शिथिलः । इति भ
ट्टिप्रयोगः ॥
प्रपथ्या स्त्री हरीतकी इति रा
जनिर्घण्टः ॥
प्रपदं क्ली पदाग्रं इत्यमरः ॥
प्रपन्नः त्रि शरणागतः यथा गो
विंदं पुंडरीकाक्षमनंतमजमव्य
यं केशवंच प्रपन्नोस्मि किंनो मृ
त्युः करिष्यति इति मार्कंडेयपु
राणे मृत्युंजयो नाम १ अध्यायः ।
प्रपन्नाडः पुं प्रपुन्नाडः चक्रमर्द
कः इति रत्नमाला ॥
प्रपा स्त्री पानीयशालिका इत्यम
रः प्रपाणिः पुं करस्याधोदेशः
पाणितलं । इति राजनिर्घण्टः ।
प्रपातः पुं निरवलंबनपर्वतादि
पार्श्वं । आरडि इति ख्याते ॥
यस्मात् पतने अवस्थान क्रिया
विशेषो नास्ति तत्पर्यायः अत
टः १ भृगुः २ इत्यमरः निर्झरः ।
इति मेदिनी । अभ्यवस्कंदः ॥
कूले । इति हेमचंद्रः ॥
प्रपायी न् त्रि पानकर्त्ता । रक्षणक
र्त्ता इति मुग्धबोधव्याकरणं ॥
प्रपावनं क्ली वनभेदः कामार
ण्य इति शब्दमाला ।
प्रपितामहः पुं ब्रह्मा । इति त्रिकां
डशेषः पितामहपिता ॥ इत्य
मरः
प्रपितामही स्त्री प्रपितामहस्य प
त्नी यथा स्वेन भर्त्रा सह श्राद्धमा
ता भुंक्ते स्वधामयं पितामही च
स्वेनैव स्वेनैव प्रपितामही इति
दायभागः ॥
प्रपुन्नाडः } पुं प्रपुन्नाडः । इत्यमर
प्रपुन्नडः } टीकायां भरतः ॥
प्रपुन्नाटः पुं चक्रमर्द्दः । इति ।
राजनिर्घण्टः ॥
प्रपुन्नाडः पुं चक्रमर्द्दकः चाकुंदि
या इति भाषा । इत्यमरः ॥
प्रपुन्नालः पुं प्रपुन्नाडः इति भ
रतद्विरूपकोषः ॥
प्रपुत्रिका स्त्री कंटकारी इति श ।
ब्दचंद्रिका ॥
प्रपौंडरीकं क्ली हस्तिनां मनुष्या
णांच चक्षुः हृद् विशदः शात
पर्णिपत्र तल्प पत्रः । पुंडरिया

ख्यातः। इत्यमरभरतौ॥ तस्य
पर्य्यायः। चक्षुष्यं २ शीतं ३ श्री
पुष्पं ४ पुंडरी ५ इति रत्नमाला।
पुंडर्य्यं ६ पुंडरीयकं ७ पौण्डरीयं
८ सुपुष्पं ९ सानुजं १० अनुजं॥
अस्य गुणाः चक्षुर्हितत्वं मधुरत्वं
तिक्तत्वं शीतलत्वं। पित्त रक्त
व्रण ज्वर दाह तृषा नाशित्वंच
इति राजनिर्घण्टः॥ अपिच पौ
ण्डर्य्यं मधुरं तिक्तं कषायं शुक्र
लं हिमं चक्षुष्यं मधुरं पाके वर्ण्यं
पित्तकफास्रनुत्। इति भावप्र
काशः॥
प्रपौत्रः पुं पौत्रस्य पुत्रः। तत्
पर्य्यायः। प्रतिनप्ता २ इति हेम
चन्द्रः॥
प्रपौत्री स्त्री पौत्रस्य कन्या इति
स्मृतिः॥
प्रफुल्लः त्रि विकाशयुक्तः। तत्
पर्य्यायः। उत्फुल्लः २ संफुल्लः ३
व्याकोषः ४ विकचः ५ स्फुटः ६
फुल्लः ७ विकसितः ८ इत्यमरः
प्रबुद्धः ९ स्मेरः १० स्मितः ११ उन्मि
षितः १२ दलितः १३ स्फुटितः १४ उज्जृ
म्भितः १५ विजृम्भितः १६ स्मेरः १७ वि
निद्रः १८ उन्निद्रः १९ विमुद्रः २०
हसितः २१ इति हेमचन्द्रः॥

प्रबंधः पुं संदर्भः इति त्रिकाण्ड
शेषः। काव्यादिग्रथनं। यथा
प्रबंधोऽयं बंधोरखिल जगतां
तस्य सरसामिति हंसदूतः॥
प्रबंधकल्पना स्त्री प्रबंधस्य क
ल्पना रचना वक्रतया स्तोकसत्या
कथा प्रबंधकल्पनां स्तोक सत्यां
प्राज्ञाः कथां विदुः परम्पराश्रया
या स्यात् सा मताख्यायिका क्व
चित्। इति कोलाहलाचार्य्यः॥
इत्यमरटीकायां भरतः॥
प्रबलः पुं पल्लवः इति शब्दमा
ला। प्रकृष्टबलयुक्ते त्रि यथाञ्चा
ङ्गोलः स महाभाग स्ते लब्ध प
बलादिभिः इति मार्कण्डेयपुरा
णे प्रकृष्टबलेस्त्रीवंच॥
प्रबला स्त्री प्रसारिणी इति राज
निर्घण्टः प्रकृष्टबलवती च।
प्रवालः पुं क्ली रक्तवर्णावर्त्तला
कार रत्नविशेषः पोला इति मुगा
इति च भाषा। तस्याधिष्ठात्री देव
ता मंगलः इति ज्योतिषं॥ तत्
पर्य्यायः। विद्रुमः २ इत्यमरः। अंगा
रकमणिः ३ अंभोधिवल्लभः ४ भौ
मरत्नं ५ रक्तांगः ६ रक्ताकारः ७
लतामणिः ८ अस्य गुणाः मधु
रत्वं। अम्लत्वं कफपित्तादि दोष

नाशित्वं स्त्रीणां वीर्य्यकांतिकरत्वं
धृतेमंगलदायित्वंच। इति राजनि
र्घण्टः॥ अपिच। सारकत्वं। शी
तत्वं। कषायत्वं। स्वादुत्वं वांतिका
रित्वं। चक्षुर्हितत्वं। धारणे पाप।
लक्ष्मीनाशित्वंच। इति राजवल्लभः
तस्य शुभ लक्षणं यथा। पक्वे दृढे
चनं वृत्तं स्निग्ध गात्रस्तरंगकं। सम
गुरु सिराहीनं प्रवालं धारयेच्छु
भं॥ तस्याशुभलक्षणं यथा गौ
रे रंग जलाक्रांतं वक्र सूक्ष्म सको
टरं। रूक्ष कृष्णलघु श्वेतं प्रवा
लमशुभं त्यजेत्॥ इति राजनि
र्घण्टः॥ तस्योत्पत्त्यादि यथा
सूतउवाच। अग्र यत्नेषु रक्तस्यांत्रं
यमस्यार्कबलादिषु॥ विक्षेप त
त्र जायंते विद्रुमाः सुमहागुणाः
तत्र प्रधानं शशलोहिताभं गुंजा
जवापुष्पनिभं प्रदिष्टं। सतीसके
देवक रोमकंच स्थानानि तेषु प्र
भवं सरागं॥ अन्यत्र जातंच न त
त् प्रधानं मूल्यं भवेच्छिल्पविशे
ष योगात्। प्रसन्नं कोमलं स्नि
ग्धं सरागं विद्रुमं हितं। धन धा
न्य करं लोके विषार्त्ति भयनाशनं
परीक्षा पुलकस्योक्ता रुधिराख्य
स्य वै मणेः। स्फटिकस्य विद्रु

मस्य रत्नस्यानाय प्रोक्तक इति।
गारुडे ८० अध्यायः॥ अथ विद्रु
म परीक्षा श्वेतसागर मध्ये तु
जायते वल्लरी तु या। विद्रुमाना
मरत्नाख्या दुर्लभा वज्ररूपिणी
पाषाणप्रभजत्येषा प्रयत्नात्तस्को
थितासतो। विद्रुमेनाम यद्रत्नमा
मनंति मनीषिणः। ब्रह्मादिजाति
भेदेन तच्चतुर्व्विध मुच्यते। अरुणं
शशरक्ताभं कोमलं स्निग्ध मेवच
प्रवाले विप्रजातिः स्यात् साव वे
धमनोरमे। जवाबंधुक सिंदूर दा
डिमी कुसुमप्रभं। कठिनं दुर्व्वेधम
स्निग्धं क्षत्रजातिं तदुच्यते। पला
शकुसुमाभास तथा पाटल स
न्निभं वैश्यजाति भवेत्स्निग्ध व
र्णाढ्यं मंदकांतिभं। रक्तोत्पलदला
कारं कठिनं न चिरद्युति। विकर्म
शूद्रजातिः स्याद्धायुवर्ध्यनथैवच
रक्तता स्निग्धता दार्ढ्यं चिरद्युतिश्च
वर्णिता। प्रवालानां गुणाः प्रो
क्ता धनधान्यकराः पराः। हिमाद्रौ
यत्संजातं तद्रक्तं मतिनिष्ठुरं॥
तत्र स्निग्धो भवेद्बिंबकर्कोटिमधु
रःस्थितः। तस्य धारण मात्रेण वि
षवेगः प्रणश्यति। विवर्णतावख
रता प्रवालेरक्षणाद्धये रेखाकाकप



दोविड् येषां वस्त्रेषु दोषकृत् न
षां प्रवाले सर्वत्र वर्जनीयं विचक्ष
णैः रेखा हन्त्याशु यशो लक्ष्मी माव
र्त्तः कुलनाशनः। पटलो रोगकृ
त्ताघ्नातो बिंदु हंत विनाशकृत्।
त्रासः संजनयेत्त्रासं नीलिका स
त्वकारिणी मूल्यमुह्य प्रवालं।
स्वच्छस्य द्विगुणं मूल्यं धारणे
स्यापि नियमा जाति भेदेन पूर्व
वत्। तथाहि विरूप जाति विष
म विवर्णां खरं प्रवालं प्रवदंति
येये। तेषां तु मेवाकृति वै वदं
ति सत्यं वदंत्येष कृतोमुनीन्द्रः इ
ति युक्तिकल्पतरौ प्रवालपरी
क्षा॥ किशलयः॥वीणादंडः
इति मेदिनी॥
प्रवालिकः पुं जीवशाकः। इति
राजनिर्घण्टः॥
प्रवालफलं क्ली रक्तचंदनं।
इति भावप्रकाशः॥
प्रबुद्धः त्रि पंडितः प्रफुल्लः।
इति हेमचंद्रः। जागृतः यथा।
प्रातस्तरां पतत्त्रिभ्यः प्रबुद्धः।
प्रणमत्रविं इति भट्टिः॥
प्रबोधः पुं विनिद्रत्वं। इति हेम
चंद्रः प्रकृष्टज्ञानंच। यथा ता
वत् सत्यं जगद्भाति प्रबोधे स
मसमुद्भवेत्। इत्यात्मबोधग्रंथः।
प्रबोधनं क्ली गन्धपूर्वगंधस्य वेद
नादेः प्रयत्न विशेषेण पुनः प्र
वृत्तिगंधोत्पादनं तत्पर्यायः
अनुबोधः २ इत्यमरभरतौ॥
बोधजननंच॥
प्रबोधनी स्त्री दुरालभा इति रा
जनिर्घण्टः उत्थानैकादशी तस्या
माहात्म्यं यथा। ब्रह्मोवाच प्रबो
धन्याश्च माहात्म्यं पापघ्नं पुण्यव
र्द्धनं। मुक्तिदं तद्बुद्धीनां शृणुष्व
मुनिसत्तम। तावद्गर्जंति तीर्था
नि पुण्यान्यायतनानिच। यावत्
प्रबोधनी विष्णोस्तिथिर्नायाति का
र्तिके अश्वमेध सहस्राणि वाज
पेयशतानिच एकेनैवोपवासेन
प्रबोधन्यां भवंति हि मेरुमंदर
तुल्यानि पापानि सर्वकृन्यपि भ
स्मसात् कुरुते मर्त्यो हरिबोधमु
पोषणात् पूर्वजन्म सहस्रेषु यत्
पापं समुपार्जितं जागरेण प्रबोध
न्यां दहते तूलराशिवत्। उपवासं
प्रबोधन्यां यः करोति समाहितः।
विधिवद्गुरु मुनिश्रेष्ठ यथोक्तं ल
भते फलं। यानि कानिच तीर्था
नि त्रैलोक्ये संभवंति वै। तानि
तस्य गृहे सम्यक् कुतनायेन॥।

प्रबोधनी। किंतस्य बहुभिः पुण्यैः
स्वर्लोके सुखप्रदैः। कुर्वन्संतोषि
तायेन संपूर्णा हरिबोधनी बोध
नीं समुपोष्यैव मुक्तिभागी भवेन्नरः
प्रबोधनीं नरः स्पृष्ट्वा न पुनर्गर्भमादि
शेत्। स्नाने दाने जपो होमः सम
द्दिश्य जनार्द्दनं नैर्यत् क्रियते
कुर्वे प्रबोधन्यां तदक्षयं॥ येऽर्च
यंति नरास्तस्यां भक्त्या विष्णुं
जगत्पतिं। उषित्वा बोधनीं तेन
प्रभवेषु हि बोकसः। महाव्रतमि
दं पुत्र महापापौघनाशनं प्रबो
धो मुने विष्णोर्विधिवत् समुपो
षणं। सत्यानीच सायोगी च सत
पस्वी जितेन्द्रियः। स्वर्गमोक्षाच
तस्मात्ताय उपास्ते प्रबोधनी।
यत्तज्जन्मकृतं पापं स्वल्पं वा यदि
वा बहु। करोति भस्मसात् हि सः
प्रबोधन्यां प्रपूजितः हरिपूजा
विधानं वा कार्त्तिके बोधवासरे
गीतशास्त्रविनोदेन प्रबोधन्यां तु
जागरात्। चंद्रसूर्योपरागेच य
त्फलं परिकीर्त्तितं। तस्मात्स
हस्रगुणितं प्रबोधन्यां हि जागरा
त् स्नानं दानं जपो होमः स्वाध्या
यश्चार्च्चनं हरेः। यत्स्मात्कोटि
गुणं प्रबोधन्यां हि जागरात्॥
तस्या अनुष्ठानं यथा। ब्रह्मोवाच
शृणु मे भक्तितः पुत्र बोधन्येकाद
शी हरेः। उपोष्या येन विधिना तं
विप्र प्रवदामि ते। कार्त्तिके शुक्ल
पक्षे तु दशम्यां नियतः शुचिः।
स्नात्वा देवार्च्चनं कृत्वा वह्निकार्य्यं
यथा विधि। आचांतः स्वप्रसन्ना
त्माहविष्यान्नः ससंस्कृतं। भुक्त्वा
चम्य स्वपेत् सम्यक् कृत्वा शौचं
च पादयोः रात्रेश्च पश्चिमे यामे
समुत्थाय यथा विधि। कृत्वा मू
त्रपुरीषेत् शौचं कुर्यात्ततो द्विजः
कृत्वा दं गुल नात्रेत्त दीरद्द्वद
समुद्भवं भक्षयेद्दंतकाष्ठं च स्ना
त्वाचमेत् प्रयत्नतः। सद्गत्वा गाति
तथा त्रिश्व विरं ध्यायेज्जनार्द्दनं।
अतसीपुष्पसंकाशं कमलायतं
चतुर्भुजं। शंखचक्रगदाशार्ङ्ग
पीतवस्त्रं किरीटिनं। प्रसन्नवद
नं देवं सर्वलक्षणलक्षितं। ततो
ऽनुदये वापि हस्तेन परिगृह्य च
कृष्णाद्विते प्रगृह्णीयात् नियमं
विष्णुतुष्टये। ध्यात्वा जलं गृही
त्वा तु भानुरूपं जनार्द्दनं दद्यार्घ्यं
दापयेत् पश्चात् करतोयेन मानवः
एवमुच्चार्य्येदाचे तस्मिन्काले महा
मुने एकादश्यां निराहारः स्थित्वाचे



वापरेः स्मृति । भो देवेन्द्र पुण्डरीका
क्ष शरणं मे भवाच्युत । एवमुक्त्वा
ततः सम्यक् नित्यकर्म्म सुकर्म्मधीः
समर्पयेद्विधानेन विष्णुं संपूजयेत्
मुने ॥ सहस्रसंख्यास्तस्यः स्वा
विद्रीं संजपेद्द्विजः सर्वकामप्रद
करीं व्रतस्य परिपूर्त्तये इति पा
द्मोत्तरखण्डे १२६ अध्यायः विधा
नान्तरं हरिभक्तिविलासे षोडश
विलासे द्रष्टव्यं ॥

प्रबोधिनी स्त्री प्रबोधनी उत्था
नैकादशी यथा । वराह उवाच
उपवासासमर्थानां सदैव हि पु
ललोचने । एका सा द्वादशी पु
ण्या उपोष्या या प्रबोधिनी तस्या
माराध्य विश्वेशं जगतामीश्वरेश्व
रं । प्राप्नोति सकलं तद्धि द्वादश
द्वादशी फलं । पूर्व्वभाद्रपदा
योगे सैव वा द्वादशी भवेत् ।
अतीव महती तस्या पूर्व्वकृत्यम
पाक्षयं उत्तरांगार सहिता य
दि चैकादशी भवेत् तदा कोटि
गुणं पुण्यं केशवाल्लभते फलं
सकृदेवार्च्चिते तस्या सर्व्वकृत
मिहाक्षयं । यथा प्रबोधिनी
पुण्या तथा यस्यां स्वपेद्धरिः ।
उपोष्या हि महाभागे अनन्त फ

लदा हि सा । शयने बोधने चैव ह
रेश्च परिवर्त्तने । उपोष्यैव विधा
नेन नरो निर्म्मलतां व्रजेत् । त
स्मात् सर्व्वप्रयत्नेन द्वादशी सम
पोषयेत् यदीच्छेत विशालाक्षि
शाश्वतीं गतिमात्मनः एकादशी
सोमयुक्ता कार्त्तिके मासि भामि
नि उत्तराभाद्रसंयोगे अनन्ता सा
प्रकीर्त्तिता तस्यां यत् क्रियते भद्रे
सर्व्वमानन्त्यमश्नुते अनन्तपु
ण्यफलदा तेनानन्ता स्मृता प्रिये
एकादशी भौमयुता यदा स्याद्
तथाविधि । स्नात्वा देवं समभ्य
र्च्य प्राप्नोति परमं फलं प्राप्नोति
सकलं तद्धि द्वादशद्वादशीन
रः जलपूर्णं तदा कुंभं स्थाप
यित्वा विचक्षणः पञ्चरत्न स
मायेतं हेमपात्रयुतं तथा ॥
तस्यां स्कंधे नपरि तं मत्स्यरूप
जनार्द्दनं । माषकेन सुवर्णेन ह
तमेनं वरानने । स्नापयित्वा विधा
नेन कुंकुमेन विलेपितं पीतव
स्त्र युगाच्छन्नं छत्रोपानद्युगान्वितं
पूजयेत् कमले देवि मत्स्यकः संस्थिते
स्त्रियः मत्स्यकूर्म्मवराहं च नारसिंहं
च वामनं रामं रामं च कृष्णं बौद्धं च
तं कल्किनं एवं दशावतारांश्च पूजये
द्भक्तिसंयुतः ॥ पुष्पैर्धूपैस्त ॥

था दीपै र्नैवेद्यै र्विविधैरपि सं
पूज्यैव मलंकारै र्विविधैः पूज
नं चरेत् ततस्तस्याग्रतो देयं नै
वेद्यं पावितं चितं । एवं संपूज्य
गोविन्दं दिवापि कमलेक्षणं
रात्रौ चोत्थापनं कार्य्यं देवदे
वस्य सुव्रते विमले स्नात्वा भ
क्त्या संपूज्य केशवं । पुष्पधूप
दि नैवेद्यैः फलै र्नानाविधैः शु
भैः ततस्तु पूजयेद्विद्वानाचा
र्य्यं भक्तिसंयुतः । अलंकारेप
हारैश्च वस्त्राद्यैश्च स्वशक्तितः
पूजयित्वा विधानेन तं देवं प्र
तिपादयेत् जगदादि जगद्रूप
मनादि जगदादिकृत् जलशा
यिन् जगद्योने प्रीयतां मे जनार्द
न । अनेनैव विधानेन कुर्य्यादेका
दशीं नरः तस्य पुण्यं भवेद्यत्त त
च्छृणुष्व वसुंधरे यदि वक्त्रसह
स्राणां सहस्राणि भवन्ति हि । सं
ख्यातुं नैव शक्यन्ते प्रबोधिन्या स्त
था गुणाः तथाप्युद्देशमात्रेण श
क्त्या वक्ष्यामि तच्छृणु चन्द्रतारार्क
संकाशमधिष्ठाया नुजीविभिः स
हैव यान मागच्छेत् ब्रह्मलोकं वसुन्ध
रे ततः कल्पसहस्रान्ते स महीपश्च
तो भवेत् आयुरारोग्यसंपन्नो जन्मा

न्तरे भवेत्ततः ब्रह्मघ्नश्च सुरापश्च
स्तेयी च गुरुतल्पगः पापान्येतानि
सर्व्वाणि श्रवणेनैव नाशयेत् ए
षेपत्रधीमानः धनोपि भक्त्या स्य
शान्नन्तरष्ठ इह धीयमानः स्प
णोति भक्त्या मति ददाति विक
ल्मषः सोऽपि दिवं प्रयाति दुःस्वप्न
प्रणाशम् एति पठमाने माहात्म्ये
भव भय हारके नरस्य यः कृष्ण
हृतवरमेतदध्यायाया व्याधिम्याः
किमत्र फलेन तस्य वाच्यं ॥ ते
धन्यास्ते कृतार्थाश्च तैरेव सुकृतं
कृतं । तेरात्मजन्म सफलं कृतं
ये व्रतकारकाः इति वराहपुरा
णे प्रबोधिनी माहात्म्यं ॥

प्रभञ्जनः पुं वायुः इत्यमरः ॥
भञ्जनकर्त्तरि त्रि ॥

प्रभद्रः पुं निम्बः इति राजनिर्घ
ण्टः प्रभद्रा स्त्री प्रसारिणी इति
राजनिर्घण्टः ॥

प्रभवः पुं जन्महेतुः । पित्रादिः
आद्योपलब्धिस्थानं आधारः ।
लब्धये प्रथमज्ञानार्थं यत्तस्या
नं देशः सः यथा वाल्मीकिः श्लो
कप्रभवः । हिमवान् गंगा प्रभवः
इत्यमरभरतौ । अयं मूलं । प्रभु
निर्भेदः । इति हेमचन्द्रः । परा

द्रुमः। इति मेदिनी। जन्म। इति शब्दरत्नावली॥

प्रभविष्णुः पुं वटुकभैरवस्याष्टोत्तरशतनामान्तर्गतनामविशेषः यथा प्रभविष्णुः प्रभाववान् इत्यादि विश्वसारतन्त्रे आपदुद्धारकल्पः॥ प्रभुः यथा न भर्त्ता नैव च सुतो न पिता भ्रातरो न च दायादो वा विसर्गे वा स्त्रीधने प्रभविष्णवः॥ इति दायभागः॥ प्रकर्षेण भवनशीले त्रि॥

प्रभविष्णुता स्त्री प्रभुता प्रभविष्णुशब्दात् भावार्थे तप्रत्ययेन पदं निष्पन्नं॥

प्रभा स्त्री कुबेरपुरी इति हेमचन्द्रः। दीप्तिः। तत्पर्य्यायः रोचिः २ द्युतिः ३ शोचिः ४ त्विषा ५ ओजः ६ भाः ७ रुचिः ८ विभा ९ आलोकः १० प्रकाशः ११ तेजः १२ रुक् १३ इति राजनिर्घण्टः॥ गोपीविशेषः यथा दृष्ट्वा त्वं प्रभया गोप्या युक्तो वृन्दावने वने प्रभा देहं परित्यज्य जगाम सूर्य्यमण्डले ततस्तस्याः शरीरं च तीव्रं तेजो बभूव ह संविभज्य त्वया दत्तं प्रेम्णा रुदता पुनः विमृज्य च त्वया लौहं लज्जया मज्जये न च। हुताशनाय किंचित्तेभ्यश्चापि किंचन। किंचित् पुरुषसिंहेभ्यो देवेभ्योऽप्यापि किंचन किंचिद्दत्तं जनेभ्यश्च नागेभ्यश्चापि किंचन ब्राह्मणेभ्यो मुनिभ्यश्च तपस्विभ्यश्च किंचन स्त्रीभ्यः सौभाग्ययुक्ताभ्यो यशस्विभ्यश्च किंचन। तद्दत्वा तत्सर्वेभ्यः पूर्वे रोदितमुपयतः इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ९ अध्यायः। दुर्गा यथा यमस्य भगिनी जाता यमुनातेन सा मता। प्रभा प्रसादशीलत्वात् ज्योत्स्ना चेन्द्रार्कमालिनी इति देवीपुराणे ४५ अध्यायः। सूर्य्यपत्नी यथा। सूत उवाच विवस्वान् कश्यपात् पूर्वमदित्यामभवत् सुतः। तस्य पत्नीत्रयं तद्वत् संज्ञा राज्ञी प्रभा तथा रैवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतं। प्रभा प्रभातं सुषुवे त्वाष्ट्री संज्ञा तथा मनुं॥ इति मात्स्ये ॥ अध्यायः॥

प्रभाकरः पुं सूर्य्यः अग्निः चन्द्रः समुद्रः इति शब्दरत्नावली अर्कवृक्षः इत्यमरः॥

प्रभाकीटः पुं खद्योतः॥ इति राजनिर्घण्टः॥

प्रभंजनः पुं प्रोभंजनः इति हेमचंद्रः

प्रभात क्ली प्रातःकालः तत्पर्य्यायः प्रत्युषः २ अहर्मुखं ३ कल्यं ४ उषः ५ प्रत्यूषः ६। इत्यमरः॥ दिनादिः ७ निशान्तं ८ मुहूर्त्तप्रगे ९ प्राह्णं ११ इति राजनिर्घण्टः गोसः १२ गोसर्गः १३ उषः १४ उषकं १५ इति शब्दरत्नावली॥ तत्र दर्शनीया यथा वैद्यः पुरोहितो मन्त्री दैवज्ञोऽथ च नर्त्तकः प्रभातकाले द्रष्टव्यो नित्यं स्वप्रियमिच्छता इति राजवल्लभः॥

उषा १६ ऊषा १७ विभातं १८

प्रभावः पुं कोषदण्डजं तेजः। तत्पर्य्यायः। प्रतापः २ इत्यमरः। कोषो धनं दण्डो दमः तदुभतात् सैन्यमपि दण्डः ताभ्यां यत्तेजो जायते स प्रतापः प्रभावश्च कथ्यते। इति भरतः। शक्तिः तेजः। इति हेमचन्द्रः शान्तिः इति मेदिनी॥

प्रभावजः पुं शक्तिविशेषः यथा भावो वीर्य्याधिकं तज्ज्ञानं इत्यमरटीका सारसुन्दरी॥ प्रभुत्वसाधकत्वात् दण्डकोषौ प्रभुशक्तिः इति भरतः॥

प्रभावान् त्रि प्रभायुक्तः प्रभाशब्दादस्त्यर्थे वतुप्रत्ययेन पदं निष्पन्नं प्रभावती स्त्री मालिनामकोनविंशल्लाहस्ताक्षरा गणानां वीणा इति हेमचन्द्रः त्रयोदशाक्षरछन्दः यथा यस्याः पिये प्रथमकं मनरहं यतश्च तथा गुरु नवमं दशमान्तिमे सान्त्य भवन्ति रपि चेत् गुणग्रहैः सा लक्ष्यता मरुतरुते प्रभावती इति श्रुतबोधः॥

प्रभाषः पुं वसुभेदः इति जटाधरः अपि च प्रत्यूषश्च प्रभावश्च वसवो नामभिः स्मृताः इति गारुडे ६ अध्यायः प्रकृष्टकथने च

प्रभासः पुं सोमतीर्थं इति त्रिकाण्डशेषः जैनगणाधिपविशेषः इति हेमचन्द्रः॥

प्रभिन्नः पुं उत्तरमदहस्ती तत्पर्य्यायः गर्ज्जितः २ मत्तः ३ इत्यमरः भ्रान्तः ४ मदकलः ५ इति राजनिर्घण्टः प्रकृष्टभेदविशिष्टे त्रि

प्रभुः पुं विष्णुः इति शब्दरत्नावली पारदः इति राजनिर्घण्टः शब्दः इति धरणिः।

प्रभुः त्रि अधिपतिः तत्पर्य्यायः स्वामी २ ईश्वरः ३ पतिः ४ ईशिता ५ अधिभूः ६ नायकः ७ नेता ८



परिबृढः १ अधिपः २ इत्यमरः
पालकः ३ इति शब्दरत्नावली
नियः । इति धरणिः शाकः ।
इति नानार्थरत्नमाला ॥
प्रभुता स्त्री प्रभुत्वं ऐश्वर्य्यं इति
हलायुधः ॥
प्रभुभक्तः पुं उत्तमघोटकः य
था प्रभुभक्ता भक्तिमन्तः कुली
नेषु कृतेलोत् कृताः इति शब्दचंद्रि
का स्वाम्यनुरक्ते त्रि यथा वक्ता ।
श्री स्वल्पसंतुष्टः सनिद्रः प्री
त्रचेतनः प्रभुभक्तस्य स्वरस्य
ज्ञातव्याः षट् शुनोगुणाः
इति चाणक्यसंग्रहः । प्रभू
त त्रि प्रचुरं इत्यमरः उद्गत
इति मेदिनी भूतं उद्गतं इति
शब्दरत्नावली प्रभूतस्तु त्रि
तमः शाकः इति हेमचन्द्रः
प्रभृति अ तदादिः यथा ।
ततः प्रभृति पितरः पिण्डसं
ज्ञां तु लेभिरे इति तिथ्यादितत्त्वं
प्रभेदः पुं भेदः तत्पर्य्यायः
प्रकारः २ विशेषः ३ भिदा ४
अंतरं ५ इति जटाधरः ॥
प्रभ्रष्टकं क्ली शिखालंबिमा
ल्यं चूडातोलंबमानमाल्यं इ
त्यमरभरतौ ॥ ॥

प्रमत्तः त्रि प्रमादी अनवधान ।
तायुक्तः यथा मत्तं प्रमत्तमुन्म
त्तं सुप्तं बालं स्त्रियं जडं प्रपन्नं वि
रथं भीतं न रिपुं हंति धर्मवित् ।
इति श्रीभागवते १ स्कंधे ७ अध्या
यः मत्तेमद्यादिना प्रमत्तमन
वहितं उत्सन्नं ग्रहवातादिना
जडं अनुद्यमं प्रपन्नं शरणागतं
विरथं भग्नरथं । इति श्रीधर ।
स्वामी अपर प्रमत्तो यथा से
ध्या पूजाविहीनस्य प्रमत्तः प्रति
तः स्मृतः इति ब्रह्मवैवर्ते प्र
कृतिखंडे ३९ अध्यायः सच गा
ज्ञा नाकानयितव्यः यथा म
त्तोन्मत्तप्रमत्तार्तभृत्याज्ञाकानये
द्यः इति मिताक्षरा ॥
प्रमथः पुं घोटकः शिवपारिष
दः इति शब्दरत्नावली सच षट् [त्रिंशत्कोटिसंख्यकः]
त्रिंशत् सहस्राणि प्रमथा द्विज
सत्तमाः तथैकत्र सहस्राणि भा
गे षोडश संस्थिताः नानारूपध
रा ये वै जटाचंद्रार्द्धमंडिताः ते
सर्वे सकलैश्वर्य्ययुक्ता ध्यानप
रायणाः योगिनो मदमात्सर्य्य
दंभाहंकारवर्जिताः क्षीणपापा
महाभागाः शंभोः प्रीतिका
राः पराः ॥ ॥

तेते परिग्रहं राज्यं कोऽपि नेच्छंति सम
कदाचन संसारविमुखाः सर्वेष्
तयोयोग ततपराः ध्यानावस्थ
महादेवपरिवार्य्यभूतास्तथा कृ
त्वापरिषदरूपा तिष्ठंति विगत
क्लमाः यदैव परमेशोऽपि तिष्ठत
यत्र विकापतिः तदैव ते पारिष
दाः सर्वे संवेष्टयंति तं ते षोडश
समाख्याताः कोटयो ये भूतव्रताः
सिंहव्याघ्रादिसारूप्या अनिमादि
समायुताः । अपरे कामिनः शंभोः
सुतमीसचिवाः स्मृताः । विचित्र
रूपाभरणा जटाचंद्रार्द्धमंडिताः ।
हरस्य तुल्या रूपेण विषादाह्वृषभ
ध्वजाः उमासदृशरूपाभिः प्रमदा
भिः समागताः विचित्रमाल्याभर
णादिवस्त्रगंधभूषणाः उमास
हायं क्रीडंतमनुगच्छंति भूषिताः
शृंगारवेशाभरणा अष्टौ ते कोट
योगणाः अर्द्धनारीश्वराश्चान्ये
एवर्द्धनारीश्वरं हरं अनुयांति महा
भागास्तत्स्वरूपा हरस्य ये उमा स
हायो हियदा रमते सखं हरः
अर्द्धनारीशरीरास्तु द्वारपाला भवं
ति ते आकाशगामी गच्छति नित्य
शः ध्यानस्थ परिवर्त्यंति सलिला
दिभिरीश्वरं नानाख्यास्त्वपराः शंभो

र्गणास्तु प्रमथाः स्मृताः प्रमथ्नंति
च युद्धेषु युध्यमानान्महाबलान् ।
ते वै महाबलाः शूराः संख्यया नव
कोटयः अपरे गायकाः तालमृदं
गपणवादिभिः नृत्यंति वाद्यैरूर्द्ध्व
तो गायंति मधुरस्वरं नानारूपध
रास्तेवै संख्यया कोटयस्त्रयः स
तते वा अनुगच्छंति विचरंतं महेश्व
रं सर्वे मायाविनः शूराः सर्वे शा
स्त्रार्थपारगाः सर्वे सर्वत्र सर्वज्ञाः
सर्वे सर्वचराः सदा महात्मा सर्व
भुवनं गत्वायांति पुनः पुनः अ
णिमाद्यष्टकैश्वर्य्ययुक्तास्ते वै महा
बलाः अपरे रुद्रनामानो जटाचं
द्रार्द्धमंडिताः देवेंद्रस्य नियोगेन
वर्त्तंते त्रिदिवे सदा तेषां संख्या च
एककोटिस्ते सर्वे बलवत्तराः ऊर्द्ध्व
तिष्ठंति सदा सेवां हरस्य सततं गणाः
विस्मयंत पापिष्ठान् धर्मिष्ठान् पा
लयंति च अनुकूलंति सततं भूतपा
प्रपन्नवनान् विघ्नांश्च सततं हं
तियोगिनां प्रथमात्मनो षट्त्रिं
शत् कोटय स्तेते हरस्यसकला
गणाः वराहगण नाशार्थं हि
तायजनानां तथा शंकरस्य च से
वायै समस्ता इमे गणाः आह
स्वगणान् दृष्ट्वा नरसिंहं तथा हरिः



स्वयंसरभरूपः सन् ध्यायन् नाहं
यतोऽकरोत् तस्माच्छांकरावुभौ
जातास्तेभेषावक्रूररूपता क्रूरदृ
ष्टा क्रूरयुद्धेः क्रूरकृत्ये विशाल्
गणान् वराहस्य हतेस्येव यतः
प्रोक्तकपर्हिना तेन ते क्रूरकर्मा
णः प्रजानाञ्च भयकराः न सदा
क्रूरकर्माणि ते कुर्वन्ति महोज
सः हृष्टिमात्रस्यते क्रूराः क्रूराश्च
काठ्मनः फलेजलेतथापुष्पे
त्रंमूलेतथैवच निवेदितानिभुं
जंतिवृन पर्वत सानुषु श्माशाने
पिचभुंजंतिपत्रपुष्पादिकंचयत्
भवेद्गीस्य यज्ञीयं तेजोगणास्त
महोजसः आमिषं नापि चाश्न
तिहितास्तेच चतुर्दशी तस्मात्
षड्को भुंक्ते चतुर्दश्यां मधोस्त
दा ततः सर्वगणास्तत्रभुंजेतेप
लेलाद्यपि हते वराहस्य गणे म
तीमासाद्यते गणाः चतुर्भागाः
स्वयंभक्ता भूते कर्मनिवेशगुः।
भूतत्वमभवत्तेषां चतुर्भागव
तो तदा वचनात् पद्मजातस्य
भूतग्रामास्ततो मताः योलो
कविदितः पूर्वं भूतग्रामश्चतु
र्विधः यतस्तेभ्योऽधिका येन्ये
तेहरध्यामउच्यते इति वः सर्वे

क्रूर

माख्यातं भूताः शंभुगणाः प्रख्या
यदाहारा यदाकारा यत्कृतास्तेन
महोजसः य इदं गणपानिस
माख्यानं योगमुत्तमं सदोद्यो
युः सदोत्साही योगयुक्तश्च जा
यते इति कालिकापुराणे पा
विषदोत्पत्तिर्नाम ४९ अध्यायः
प्रमथनं क्ली वधः इत्यमरः॥
क्लेशनं विलोडनं इति मथधा
त्वर्थदर्शनात्॥
प्रमथ्या स्त्री हरीतकी इति मे
दिनी प्रमथाधिपः पुं शिवः इत्य
मरः प्रमथितं क्ली निर्जलतक्रं
इति राजनिर्घण्टः॥
प्रमदः पुं हर्षः इत्यमरः धुस्तू
र ... इति शब्दचन्द्रिका मत्तत्रि
इति मेदिनी॥
प्रमदकाननं क्ली प्रमदावनं इ
त्यमरटीकायां भरतः॥
प्रमदवनं क्ली राज्ञोऽन्तःपुरोचि
तवनं इत्यमरः॥
प्रमदा स्त्री उत्तमयोषित्।इति
मेदिनी॥
प्रमदाकाननं क्ली प्रमदवनं इ
त्यमरटीकायां भरतः॥
प्रमदावनं क्ली प्रमदवनं इति
शब्दरत्नावली॥

प्रमनाः त्रि हर्षयुक्तः इत्यमरः प्र
मयः पुं वधः इति हेमचन्द्रः॥
प्रमा स्त्री यथार्थज्ञानं तत्पर्या
यः प्रमितिः २ इत्यमरः प्रमाणं
२ इति शब्दरत्नावली न्यायमते
तद्वति तत्प्रकारकज्ञानं प्रम
भिन्नज्ञानं अप्रमाः कारणगुणः
स च प्रत्यक्षे विशेष्ये विशेषणस्य
स्य संबंधः अनुमितौ साध्यवि
शिष्टपक्षे परामर्शः शाब्दबोधे
योग्यतायाः तात्पर्यस्य वा य
थार्थज्ञानं उपमितौ शाक्यसा
दृश्यबुद्धिः यथा दोषोऽप्रमा
या जनकः प्रमायास्तु गुणो भ
वेत् प्रत्यक्षे तु विशेष्येण विशे
षणवता समं सन्निकर्षो गुणः
स्यादथ त्वनुमितौ पुनः प
क्षे साध्यविशिष्टे च परामर्शो
गुणो भवेत् शक्ये सादृश्य
बुद्धिस्तु भवेदुपमितौ गुणः।
शाब्दबोधे योग्यतायास्तात्प
र्यस्याथवा प्रमा। गुणः स्यात् भ्र
मभिन्नं तु ज्ञानमत्रोच्यते प्रमा।
अथवा तत्प्रकारं यत् ज्ञानं तद्वि
शेष्यकं इति भाषापरिच्छेदः
प्रमाणं क्ली विस्तः यथा प्रमाणं
प्राणनिलयः प्राणभृत् प्राणजी
वनः॥

इति महाभारते शान्तिपर्वणि दानध
र्मः नित्यं मर्यादा शास्त्रं सत्य
वादी इयत्ता हेतुः प्रमाता इति मे
दिनी। प्रमा इति शब्दरत्नावली
नित्य क्लीवैकत्ववानयं शब्दः य
था वेदाः प्रमाणं स्मृतयः प्रमा
णमित्यादि। न्याये तु प्रत्यक्षानुमा
नोपमानः शब्दाः प्रमाणानि इ
त्यत्र वक्तव्ये तोऽपि प्रमाणवाचि
तार्थकः पुं तर्कविशेषः तस्य
लक्षणं आत्माश्रयादिचतुष्कान्य
प्रसंगत्वे सति विधेयव्याप्तिग्राहकः
विषयपरिशोधकश्च। तत्राद्योय
था धूमो यदि वह्निव्यभिचारी स्या
त्तदा वह्निजन्यो न स्यात् द्वितीयस्तु
पर्वतो यदि निर्वह्निः स्यात् निर्धूमः
स्यात्। इति तर्कजागदीशी॥
प्रमातामहः पुं मातामहपिता।
यथा पितामहः पितृपिता तत्
पिता प्रपितामहः मातृर्माता
महाद्येवं सपित्रोस्तु समाभयः
इत्यमरः॥
प्रमातामही स्त्री प्रमातामहप
त्नी इति स्मृतिः॥
प्रमाथः पुं प्रमथनं बलात्हर
रणं इति पुराणं॥
प्रमाथी त्रि पीडनकर्त्ता मा

रणकर्त्ता । प्रपूर्व्व मथधातोः क
र्त्तरि णिन् प्रमथनशीलः देहेन्द्रि
याक्षोभक इत्यर्थः इति श्रीधरस्वा
मी यथा चञ्चलं हि मनः कृष्ण प्र
माथि बलवद्दृढं अपि च इन्द्रिया
णि प्रमाथीनि हरन्ति प्रसभं मनः
इति श्रीभगवद्गीता ॥
प्रमादः पुं अनवधानता इत्यमरः
लोभ प्रमाद विश्वासैः पुरुषो न
श्यते त्रिभिः तस्माल्लोभो न कर्त्तव्यः
प्रमादो न न विश्वसेत् इति गारुडे
नीतिसारे ११५ अध्यायः ॥ प्रमाद
वान् त्रि प्रमादयुक्तः तत्पर्य्यायः
जाल्मः २ असमीक्ष्यकारी ३ खट्वा
रूढः ४ इति जटाधरः ॥
प्रमादिका स्त्री दूषिता कन्या तत्
पर्य्यायः संवेदा २ दूषिता ३ धर्ष
कारिणी ४ इति शब्दरत्नावली ।
प्रमादी न् त्रि प्रमादविशिष्टः अ
नवधानतायुक्तः यथा कुरङ्ग मा
तङ्ग पतङ्ग भृङ्ग मीना हताः पं
चभिरेव पंच । एकः प्रमादी स क
थं न हन्यते यः सेवते पंचभिरे
व पंच इत्युद्भटः ॥
प्रमापणं क्ली मारणे इत्यमरः
प्रमितः त्रि ज्ञातः इति जटाधरः
प्रमितिः स्त्री प्रमा इत्यमरः ।

प्रमीढः त्रि घनः मूत्रितः ।
इति मेदिनी ॥
प्रमीतः त्रि मृतः यज्ञार्थह
तपशुः इत्यमरः ॥
प्रमीला स्त्री तन्द्रा इत्यमरः ।
प्रमुखं क्ली तदात्वं तत्कालः
इति त्रिकाण्डशेषः ॥
प्रमुखः पुं पुन्नागवृक्षः इति
शब्दचन्द्रिका ॥
प्रमुखः त्रि प्रधानं श्रेष्ठः इत्य
मरः प्रथमः इति मेदिनी सम्
हः मान्यः इति शब्दरत्नावली
प्रमुत् द } त्रि हृष्टः इत्यमरः
प्रमुदितः }
प्रमेहः पुं रोगविशेषः तत्प
र्य्यायः मेहः २ मूत्रदोषः ३ ।
इति राजनिर्घण्टः बहुमूत्रता ४
इति हेमचन्द्रः अस्य निदानं आ
स्यासुखं स्वप्नसुखं दधीनि ग्रा
म्यौदकानूपरसाः पयांसि न
वान्नपानं गुडवैकृतं च प्रमेहहेतुः
कफकृच्च सर्वं अस्य संप्राप्तिर्य
था ॥ मेदश्च मांसं च शरीर
जं च क्लेदं कफो बस्तिगतः
प्रदूष्य । करोति मेहान् सम
दीर्णमुष्णैस्तानेव पित्तं प
रिदूष्य चापि ॥ वातिकस्य ।

तस्य लक्षणं क्षीणेषु दोषेष्ववकृ
ष्य धातून् संदूष्य मेहान् कुरुतेऽ
निलश्च तस्य कफजादिभेदेन सा
ध्यादि लक्षणं यथा साध्याः कफो
त्था दश पित्तजाः षट् याप्यान साध्यः
पवनाच्चतुष्कः समक्रियत्वाद्विषम
क्रियत्वान्महात्ययत्वाच्च यथाक्रम
ते कफः सपित्तः पवनश्च दोषा मेदो
स्रशुक्राम्बु वसालसीकाः मज्जा रसौ
जः पिशितं च दूष्याः प्रमेहिणां विंश
तिरेव मेहाः तस्य पूर्वरूपं दन्तादी
नां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः
दाहश्चिक्कणता देहे तृट् स्वाद्वा
स्यं च जायते सामान्यं लक्षणं तेषां
प्रभूताविलमूत्रता दोषदूष्याविशे
षेऽपि तत्संयोगविशेषतः मूत्र
वर्णादिभेदेन भेदो मेहेषु कल्प्यते
क्रमेण कफजानां दशानां लक्षणा
नि अच्छं बहुसितं शीतं निर्गन्ध
मुदकोपमं मेहत्युदकमेहेन किं
चिच्चाविलपिच्छिलं । इक्षो रसमि
वात्यर्थं मधुरं चेक्षुमेहतः सा
न्द्रीभवेत् पर्युषितं सान्द्रमेहेन मे
हति सुरामेही सुरातुल्यमुपर्य्य
च्छमधोघनं । संहृष्टरोमा पि
ष्टेन पिष्टवद्बहुलं सितं ॥ शुक्रा

भं शुक्रमिश्रं वा शुक्रमेही प्रमे
हति मूर्त्ताणून् सिकतामेही सि
कतारूपिणो मलान् शीतमेही
सुबहुशो मधुरं भृशशीतलं
शनैः शनैः शनैर्मेही मन्दं मन्दं
प्रमेहति लालातन्तुयुतं मूत्रं
लालामेहेन पिच्छिलं । क्रमेण
पित्तजानां षण्णां लक्षणानि ।
गन्धवर्णरसस्पर्शैः क्षारेण क्षार
तोयवत् । नीलमेहेन नीलाभं ।
कालमेही मसीनिभं हारिद्रमेही
कटुकं हरिद्रासन्निभं दहत् वि
स्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलि
लोपमं विस्रमुष्णं सलवणं र
क्ताभं रक्तमेहतः क्रमेण वातजा
नां चतुर्णां लक्षणानि वसामे
ही वसामिश्रं वसाभं मूत्रयेन्मु
हुः मज्जाभं मज्जमिश्रं वा मज्ज
मेही मुहुर्मुहुः कषायं मधुरं रू
क्षं क्षौद्रमेहं वदेद्बुधः । हस्तीम
त्त इवाजस्रं मूत्रं वेगविवर्जितं ।
सलसीकं विबद्धं च हस्तिमेही प्र
मेहति । कफजादिभेदेन तेषा
मुपद्रवाः । अविपाकोऽरुचिश्छ
र्दिर्निद्रा कासः सपीनसः उपद्र
वाः प्रजायन्ते मेहानां कफज
न्मनां ॥ बस्तिमेहनयोस्तोदो



मृक्षावदरणंज्वरः दाहस्त । स्याम्लिकामूर्च्छाविड्भेदाः पित्त जन्मनो वातजानामुदावर्त्तः कंप हृद्ग्रहलोलताः शूलमुन्निद्रता शोषः कासः श्वासश्च जायते प्रवि ष्टलक्षणं यथोक्तोपद्रवारिष्टम तिप्रस्तुतमेव च पिडका पीडितं गाढंप्रमेहो हन्ति मानवं ॥ ज्ञा तः प्रमेही मधुमेहिनो वा नसा ध्यरोगाः सहिवीजदोषात् येवापि केचित् कुलजा विकारा भवंति तांश्च प्रवदंत्यसाध्यान् सर्वएव प्रमेहास्तु कालेनाप्रतिकारि णः मधुमेहत्वनायांति तदासा ध्या भवंतिहि मधुमेहे मधुसमं जायतेसकिलद्विधा क्रुद्धेधातु क्षयाद्वायोदोषावृतपथेऽथवा । आवृतोदोषलिंगानि सोनिमित्तं प्रदर्शयन् ४ क्षीणः क्षणात्क्ष णात्पूर्णो भजते कृच्छ्रसाध्यतां मधुरं यच्च मेहेषु प्रायो मध्विवमेह ति सर्वेऽपि मधुमेहाख्या माधुर्या च्चतनोरतः प्रमेहिणो यदा मूत्र मनाविलमपिच्छिलं विशदं तिक्त कटुकं तदारोग्यं प्रचक्षते इति माध वकरः अथ दशविधपिडकाः पि डकाश्चेह दशधाः अथ प्रमेहस्यचि

चिकित्सा श्यामाककोद्रवोद्दाल गोधूमचणकाढकी कुलत्थाः क थिता भोज्ये पुराणा मेहिनो हिताः यवान्नविकृतिर्मुद्गाः शालयः ष ष्टिकास्तथा तथा तिक्तानि शा कानि जांगलाः पक्षिणो मृगाः उद्दालोवनकोद्रवः प्रमेहीगुरुड गधाज्यतैलतक्रसुराः सुक्ता प्रगे क्षुरसपिष्टान्नानूपमांसानि वर्जयेत् मुस्ताहरीतकीलोध्रैः कट्फलेन कृतेसृते पीतेमधुयुते हंति प्रमे हं कफहेतुकं पटोलनिम्बामलका मृतानां पिबेत् कषायं मधुना समेतं उशीर लोध्रार्जुनचंदना नांतथापिबेत् पित्तनिमित्तमेही पाठाशिरीषदुःस्पर्शाजातितिंदु ककिंशुकैः कपित्थस्य भिषक् । क्वाथं हन्तिमेहे प्रयोजयेत् पा ठादिभिः सहितस्य कपित्थस्य क्वा थं गुडूच्याः स्वरसः पेयो मधुना सर्वमेहजित् हरिद्राचूर्णयुक्तो वा रसोधात्र्याः समाक्षिकः मधुना त्रैफलंचूर्णमथवाप्यजतकं वा लो हजं वाः भयोभ्यं वा लिह्यान्मेह निवृ त्तये चंद्रप्रभा वचा मुस्ता भूनि । म्बमृतदारवः हरिद्रातिविषादा र्वी पिप्पलीमूलचित्रकं त्रिविद ।

तीपत्रकंच त्वगेला वंशलोचना प्रत्येकं कर्षमात्राणि कुर्यादेता नि बुद्धिमान् धान्यकं त्रिफला चव्यं विडंगं गजपिप्पली सुवर्ण माक्षिकं व्योषं द्वौक्षारौ लवणत्र यं एतानि टंकमात्राणि संचूर्णि यान् पृथक् पृथक् द्विकर्षं हत लोहः स्याच्चतुष्कर्षा सिता भवेत् शिलाजतुष्ट कर्षं स्यादष्टौ कर्षा श्च गुग्गुलोः विधिना योजिते रे तैः कर्त्तव्या गुटिका शुभा चंद्र प्रभा इति विख्याता सर्वरोग प्रणा शिनी निहंति विंशतिंमेहान् कृ च्छ्रमष्टविधं तथा चतस्रः श्मर रीस्तद्वन्मूत्राघातांस्त्रयोदश अ ण्डवृद्धिं पाण्डुरोगं कामलांचहली मकं कासश्वासंतथा कुष्ठमग्नि मांद्यमरोचकं वातपित्तकफव्या धीन् बल्या हृद्या रसायनी सम्या ग्धृष्यारस्मात् प्रयत्नाद्गुटिका मिमां प्राप्नवांस्त्विमा यस्मान्न स्याच्चंद्रप्रभा स्मृता चंद्रप्रभाक त्रं इति लोके व्योषं त्रिकटु द्वौ क्षारौ सर्जिका यवक्षारौ लवण त्रयं सैंधवरुचकंवापि विड्वल वणत्रयमिति चंद्रप्रभावटि का प्रमेहपिडकानां पाकं कार्य्यं

रक्तविमोचनं पाटनंचविप क्वानांततो व्रणविधिस्मृतः इति भावप्रकाशः ॥ प्रमोचनी स्त्री गवाक्षी गोडुं बा इति जटाधरः प्रकृष्टेनाव नकर्मणि त्रि प्रमोदः पुं हर्षः इत्यमरः प्रमोदितः पुं कुवेरः इति शब्दमाला प्रमोदयुक्ते त्रि । प्रमोदिनी स्त्री जिंगिनीवृक्षः इति भावप्रकाशः प्रकृष्टहर्ष युक्ताच प्रम्लोचा स्त्री अप्सरो विशेषः यथा तत्र तस्मान्नदी मध्यान् समुत्तस्थौ मनोरमा । प्रम्लोचा नाम तन्वंगी तत्स मीपे वराप्सराः इति गारुडे ४५ अध्यायः प्रयतः त्रि पवित्रः इत्यमरः प्रयत्नः पुं प्रकृष्टय त्नः न्यायमते सच त्रिविधः यथा प्रवृत्तिश्च निवृत्तिश्च तथा जीव नकारणं एवंप्रयत्न त्रैविध्यं तां त्रिकैः परिदर्शितं चिकीर्षाकृ तिसाध्येष्टसाधनत्वमतिस्तथा उपादानस्य चाध्यक्षं प्रवृत्तौ ज नकं भवेत् निवृत्तिस्तु भवेद्द्वेषा द्द्विष्टसाधनताधियः यत्नो जीवन योनिस्तु सर्वदातींद्रियो भवेत् शरीरे प्राणसंचारे कारणं तस्य

कीर्त्तितं इतिभाषापरिच्छेदः।
प्रयत्नवान् त्रि प्रकृष्टयत्नवि
शिष्टः तत्पर्य्यायः प्रतियत्नः २
इतित्रिकाण्डशेषः॥
प्रयस्त त्रि हुतेवहुर्मीनादिना
द्रव्येणप्रयत्नस्ससंस्कृतव्यंजना
दि इत्यमरः प्रयागः पु तीर्थभे
दः यज्ञः इंद्रः अश्वः इतिमेदि
नी अथप्रयागमाहात्म्यं तत्रैव
केनयमित्त प्रयाग ऋषिसंमते
यत्रब्रह्मादयो देवा दिशश्च सदि
गीश्वराः लोकपालाश्च सिद्धा।
श्च निरताः पितरस्तथा सनत्कु
मारप्रमुखास्तथैव च महर्षयः
तथा नागाः सुपर्णाश्च सिद्धा।
श्चक्रचरास्तथा गंधर्वाप्सरस
श्चैव सरितः सागरास्तथा ह
रिश्च भगवानास्ते प्रजापतिमि
राहृतः तत्रत्रीण्यग्निकुंडानि त
यो मध्येन जाह्नवी प्रयागात स
मतिक्रांता सर्वतीर्थपुरस्कृता
तपनस्य सुता तत्र त्रिषु लोकेषु
विश्रुता यमुना गंगया सार्द्धं संग
ता लोकभाविनी गंगायमुनयोर्म
ध्ये पृथिव्या जघनं स्मृतं प्रयागं ज
घनस्यांतमुपस्थमृषयो विदुः प्र
यागं सप्रतिष्ठानं कंबलाश्वतरावुभौ
तीर्थं भोगवती चैव वेदी प्रोक्ता।

प्रजापतेः तत्रवेदाश्च यज्ञाश्च
मूर्त्तिमंतो महामते। प्रजापति
मुपासंते ऋषयश्च महाव्रताः
यजंते क्रतुभिर्देवा स्तथा चक्रध
राः सदा ततः पुण्यतमं नास्ति
त्रिषु लोकेषु भारत प्रयागं स
र्वतीर्थेभ्यः प्रवदंत्यधिकं द्विजाः
श्रवणात्तस्य तीर्थस्य नाम संकी
र्त्तनादपि मृत्तिकालंभनाद्वापि
सर्वपापैः प्रमुच्यते तत्राभिषेकं
यः कुर्य्यात् संगमे संशितव्रतः
पुण्यं स महदाप्नोति राजसूयाश्व
मेधयोः। एषा यजन भूमिर्हि
देवानामपि सत्कृता। दत्तंतत्र
स्वल्पमपि महद्भवति सत्तजा।
नवेद वचनात्तात नलोक वचना
दपि मतिरुत्क्रमणीयातिप्रया
गमरणं प्रति दशतीर्थसहस्रा
णि षष्टिकोट्यस्तथा पराः तेषां
सान्निध्यमत्रैव कीर्त्तितं सततेद
न यत्पुण्यं त्रिषु लोकेषु वेदवि
द्यावृतफलं स्नानमात्रस्य तत्पु
ण्यं गंगायमुन संगमे इति पाद्मे भू
मिखंडे १२७ अध्यायः अपि च पुत्र
कामः प्रयागे हि स्नात्वा पुत्रमिता
मितो धनकामः पुराशक्रस्नातो
ऽत्र द्विजोत्तम धनदस्तिधीश्व
रोन तस्माज्जहार मायया ॥

तारापथेणानेरैर्योव वर्षाणामयु
तंपुरा अन्नाहारः प्रयागेस्मिन्नकृ
तवान् पुण्यमुत्तमं सिद्धिं च साध
कायांति प्रयागेस्मिन् द्विजोत्तम
इतिपाद्मोत्तरखंडे २२ अध्यायः
अपि च युधिष्ठिर उवाच भगवन्
श्रोतुमिच्छामि प्रयागगमने फ
लं मृतानां का गतिस्तत्र स्नातानां
मपि किंफलं ये वसंति प्रयागे तु
ब्रूहि तेषां तु किंफलं भवता वि
दितं ह्येतत् तन्मे ब्रूहि नमोस्तु ते
मार्कंडेय उवाच कथयिष्यामि!
मि ते वत्स या चेष्टा यच्च तत्फलं
दृष्ट्वा महर्षिभिः सम्यक् कथ्य
मानं मया श्रृणु तं यत्र स्नात्वा दिवं
यांति ये मृतास्ते पुनर्भवाः य
त्र ब्रह्मादयो देवा रक्षां कुर्वंति सं
गताः बहून्यन्यानि तीर्थानि स
र्वपापहराणि च कथितं ते न शक्
क्रोमि वक्तुं वर्षशतैरपि॥ संक्षे
पेण प्रवक्ष्यामि प्रयागस्येह की
र्त्तनं षष्टिर्धनुसहस्राणि यानि
रक्षंति जाह्नवी यमुनां रक्षति स
दा सविता सप्तिवाहनः प्रयागं
तु विशेषेण स्वयं रक्षति वासवः
मंडलं रक्षति हरिः सर्वदेवैश्च सं।
स्मितं न्यग्रोधं रक्षते नित्यं शूलपा
णि महेश्वरः स्थानं रक्षंति वेदे।

वाः सर्वपापहरं शुभं स्वकर्मणा
हता लोका नैव गच्छंति तत्पदं
स्वल्पमल्पतरं पापं यदा तस्य न
राधिप प्रयागस्मरमाणस्य स
र्वमायाति संक्षयं दर्शनात्तस्य
तीर्थस्य नामसंकीर्त्तनादपि मृ
त्तिकालंभनाद्वापि नरः पापात्
प्रमुच्यते पंचकुंडानि राजेंद्र येषां
मध्येन जाह्नवी। प्रयागे विशतः
पुंसः पापं नश्यति तत्क्षणात्।
योजनानां सहस्रेषु गंगां यः स्मर
ते नरः अपि दुष्कृतकर्मासौ लभ
ते परमां गतिं कीर्त्तनान्मुच्यते पा
पात् दृष्ट्वा भद्राणि पश्यति आ
पितो यदि वा हीनः क्रुद्धो वापि
भवेन्नरः गंगायमुनमासाद्य
त्यजेत्प्राणान् प्रयत्नतः दीप्त
कांचनवर्णाभैर्विमानैर्भानुव
र्णिभिः ईप्सितांल्लभते कामान्
वदंति ऋषि पुंगवाः सर्वरत्न
मयैर्दिव्यैर्नानाध्वजसमाकुलैः
वरांगनासमाकीर्णैर्मोदते शु
भलक्षणैः गीतवादित्रनि
र्घोषैः प्रसुप्तः प्रतिबुध्यते या
वन्न स्मरते जन्म तावत् स्वर्गे।
महीयते तस्मात्स्वर्गात्परि
भ्रष्टः क्षीणकर्मा नरोत्तमः
हिरण्य रत्न संपूर्णे समृद्धे जा
यते कुले ॥ तदेव स्मरते ती

र्थं स्मरणान्तु गच्छति देशस्थो
यदि वारण्ये विदेशे यदि वा गृहे
प्रयागं स्मरमाणस्तु यस्तु प्रा
णान् परित्यजेत् ब्रह्मलोकम
वाप्नोति वदंति मुनिपुंगवाः स
र्वकामफला वृक्षा मही यत्र हिर
ण्मयी ऋषयो मुनयः सिद्धास्त
त्र लोके स गच्छति स्त्रीसहस्रा
कुले रम्ये मंदाकिन्यास्तटे शुभे
मोदते मुनिभिः सार्द्धं स्वकृतेनेह
कर्म्मणा सिद्धचारणगंधर्व्वैः पू
ज्यते दिवि दैवतैः अथ स्वर्गात्
परिभ्रष्टो जंबुद्वीपपतिर्भवेत् अ
तः शुभानि कर्म्माणि चिंतयानः
पुनः पुनः गुणवान् वित्तसंप
न्नो भवतीह न संशयः कर्म्मणा
मनसा वाचा सत्यधर्म्मप्रतिष्ठि
तः गंगायमुनयोर्मध्ये य
स्तु ग्रामं प्रयच्छति स्वर्णं म
णिमुक्तां वा तथैवान्यत् प्रति
ग्रहं स्वकार्य्ये पितृकार्य्ये वा दे
वताभ्यर्च्चनेऽपि वा निष्फलं तस्य
तत्तीर्थं यावदेतन्न सम्प्लवेत् अत
स्तीर्थे न गृह्णीयात् पुण्येष्वाय
तनेषु च कपिलां पाटलां भां तु
यस्तु धेनुं प्रयच्छति यावंति रो
माणि तस्या वै संति गात्रेषु
सत्तम तावद्वर्षसहस्राणि
रुद्रलोके महीयते इति कौ

र्म्मे प्रयागमाहात्म्ये ३३ अध्यायः
तत्र मुण्डनविधि यथा गंगा।
यां भास्करक्षेत्रे माता पित्रोर्गु
रौ मृते आधाने सोमपाने च।
वपनं सप्तसु स्मृतं। इति स्मृति
समुच्चय लिखित वचनं प्रया
गादिभिन्न गंगायां विषयकं।
भास्करक्षेत्रं प्रयागः अपि च।
प्रयागमधिकृत्याकेशानां याव
तीसंख्या छिन्नानां जाह्नवीजले
तावद्वर्षसहस्राणि स्वर्गलोके
महीयते प्रयागे क्षीणमपि मु
ण्डनेनतु केशानां ह्यङ्गुलच्छेदन
मात्रं यथा केशमूलान्युपाश्रित्य
सर्व्वपापानि देहिनां तिष्ठंति ती
र्थस्नानेन तस्मात्तान् सर्व्वान् वापयेत्
प्रयागे मुण्डनाकरणे दोषोऽपि।
गंगायां भास्करक्षेत्रे मुण्डनं यो
न कारयेत् स कोटिकुलसंयु
क्तो याति कल्पं रौरवे वसेत् इति
प्रायश्चित्ततत्त्वं ॥
प्रयागभवः पुं इंद्रः इति शब्द
माला ॥
प्रयाणं क्ली गमनं। इति ह
लायुधः ॥ यथा ॥
उद्घाटित नव द्वारे पंजरे विह
गोऽनिलः यत्तिष्ठति तदाश्चर्य्यं
प्रयाणे विस्मयः कुतः इत्युद्भ

टः तत्पर्य्यायः प्रस्थानं २ गमनं
३ व्रज्या ४ अभिनिर्य्याणं ५ प्रया
णकं ६ इति हेमचंद्रः अत्रवर्ण
नीयानि यथा भेरीनिस्वनः १ भू
कम्पः २ बलधूलिः ३ करभः ४
हयः ५ ध्वजः ६ छत्रं ७ वणिक् ८
शकटं ९ रथः १० इति कविकल्प
लता। प्रयातः पुं सौप्तिकः भृगुः
इति हेमचंद्रः गतेत्रि ॥
प्रयामः पुं नीवाकः इत्यमरः
महार्घहेतोर्धान्यादिषु जनाना
मादरातिशये तत्संग्रहणार्थि।
कं इति केचित् क्रयाहरः इति
केचित् मूल्याधिकाद्धेतोर्निश्च
येन परिच्छेदनं इति केचित्।
इति भरतः ॥
प्रयासः पुं प्रयत्नः तत्पर्य्यायः
श्रमः २ क्लमः ३ क्लेशः ४ परि
श्रमः ५ आयासः ६ व्यायामः ७
इति हेमचंद्रः ॥
प्रयुक्तं त्रि प्रकर्षेण युक्तं यथा।
गुणप्रयुक्ताः परमं मनुष्या श्रा
राध्या वेषभवा भवंति हि। तथा
विधा ये न विशुद्धवेशास्ता स्तत्तं
तिवायपा इव ते तिनम्रता इत्युद्भ
टः। प्रकृष्टसमाधियुक्तं प्रकृ
ष्टसंयोगविशिष्टं प्रकृष्टनिंदा

युक्तं प्रकृष्टसंयमविशिष्टं प्रप्र
र्वयुजधात्वर्थ दर्शनात् हेतौ क्ली
यथा न च समवायिनिमित्ताभा
वप्रयुक्तो नियमेन कार्य्याभावः
किंतु समवायिकारणाभावः
प्रयुक्तोऽपि इति रक्षितः ॥
प्रयुक्तिः स्त्री प्रयोजनं प्रपूर्व्व
युजधातोर्भावे क्तिः यथा न
तरणेपायुषली भार्य्या प्रवीरेषु
त्रकाम्यति क्व हृदस्य राजमानेशा
इति नसुः प्रयुक्तयः इति प्राचः
प्रयुतं क्ली नियतं इति हेमचंद्रः
प्रयुद्धार्थः पुं मल्लतक्रमः इति
प्रोगाध्यशब्दटीकायां रमानाथः
प्रयोक्ता त्रि प्रयोगकर्त्ता यथा
उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृथा
हकौ क्रमात् इत्यमरः ॥
प्रयोगः पुं कर्म्मणि वशीकर
णे प्रयुक्तिः निदर्शनं इति मे
दिनी घोटकः इति शब्दमाला।
प्रयोगार्थः पुं प्रधानप्रयोगा
नुकूले प्रयोजनानुष्ठाने तत्प
र्य्यायः मल्लतक्रमः २ इत्यमरः
प्रयोगी न त्रि प्रयोगयुक्तः प्र
पूर्व्वयुजधातोर्णिन् ॥
प्रयोजकः त्रि प्रयोगकर्त्ता नि
योगकर्त्ता स्वतंत्र तत्प्रयोजकौ।



कर्त्ता इति सुपद्मव्याकरणं ।
प्रयोजनं क्ली कार्य्यं हेतुः इति
मेदिनी सर्व्वस्यैव हि शास्त्रस्य क
र्म्मणो वापि कस्यचित् यावत्
प्रयोजनं नोक्तं तावत् केन गृ
ह्यते सिद्धार्थं सिद्धसंबंधं श्रोतुं
श्रोता प्रवर्त्तते ग्रंथादौ तेन व
क्तव्यः संबंधः सप्रयोजनः इ
ति प्राचः ॥
प्रयोज्यः त्रि प्रयोक्तुं शक्यः भृ
त्यः इति मुग्धबोधव्याकरणं ।
मूलधने क्ली ॥
प्ररूढः पुं ज्वरं इति मेदिनी ।
प्ररूढः त्रि वद्धमूलः इति मेदि
नी जातः प्रवृद्धः इति शब्दरत्ना
वली ॥
प्ररोहः पुं अंकुरः इति हेमचंद्रः
प्रलपितः त्रि कथितः प्रपूर्व्व
लपधातोः कर्म्मणिक्तः यथा ज
नस्थाने भ्रांतं कनकमृगतृष्णा
न्वित धिया वचो वैदेहीति प्रति
पद मुदश्रु प्रलपितं इति काव्य
प्रकाशः प्रलंबः पुं दैत्यभेदः
स च दनुपुत्रः मनुष्यवध्यः य
था एकाक्षऋषभोरिष्टः प्रल
म्बनरकौ तथा इन्द्रतापनकेशी
च पुरः शंबोऽथ धेनुकः गवेष्टि

कोरगवाश्वतालकेतुश्च वीर्य्यवा
न् एते मनुष्यवध्यास्तु दनोः पु
त्रान्वयाः स्मृताः इत्यग्निपुराणं
त्रपुषः पयोधरः लताकुरः प्रा
लंबा हारभेदः प्रलंबनं इति मेदिनी
प्रलंबघ्नः पुं बलरामः इत्यमरः
प्रलंबभित् पुं बलरामः इति हे
मचंद्रः ॥
प्रलंबाण्डः पुं दीर्घाण्डकोषवि
शिष्टः तत्पर्य्यायः मुष्करः इति
हेमचंद्रः ॥
प्रलवित्रः त्रि प्रकर्षेण लवितमा
त्रादिः प्रपूर्व्वलवधातोः कर्म्मणिक्तः
प्रलयः पुं प्रलीयते लीयतेऽस्मिन् जगत्
स्मिन्नसौ तत्पर्य्यायः संवर्त्तः २
कल्पः ३ क्षयः ४ कल्पांतः ५ इत्य
मरः लयः ६ संक्षयः ७ विलयः ८
इति शब्दरत्नावली प्रतिसर्गः ९
प्रतिसंचरः १० स च नित्यनैमित्ति
कप्राकृतात्यंतिकभेदेन चतुर्धा
यथा कूर्म्मे उवाच नित्यो नैमि
त्तिकश्चैव प्राकृतात्यंतिकौ त
था चतुर्धायं पुराणेऽस्मिन् ।
प्रोच्यते प्रतिसंचरः । नित्यो यथा
योऽयं संदृश्यते नित्यं
लोके भूतक्षयस्त्विह नित्यः संकी
र्त्तितो नाम्ना मुनिभिः प्रतिसंचरः

नैमित्तिको यथा ब्राह्मो नैमित्ति
को नाम कल्पान्ते यो भविष्यति
त्रैलोक्यस्यास्य कथितः प्रति स
र्गो मनीषिभिः प्राकृतो यथा ।
महदाद्यं विशेषान्तं यदा संयाति
संक्षयं प्राकृतः प्रतिसर्गोऽयं
प्रोच्यते कालचिंतकैः ॥ आत्यं
तिको यथा ज्ञानादात्यंतिकः ।
प्रोक्तो योगिनः परमात्मनि प्र
लयः प्रतिसर्गोऽयं कालचिंता
परैर्द्विजैः । आत्यंतिकश्च कथि
तः प्रलयो लयसाधनः नैमि
त्तिकप्रलयविस्तारो यथा नै
मित्तिकमिदानीं वः कीर्त्तयिष्ये
समासतः चतुर्युगसहस्रान्ते सं
प्राप्ते प्रतिसंचरे । आत्मसंस्थाः प्र
जाः कर्त्तुं प्रतिपेदे प्रजापतिः ततो
भवत्यनावृष्टिस्तीव्रा सा शतवा
र्षिकी भूतक्षयकरी घोरा सर्व्वभूत
भयंकरी ततो यान्यल्पसाराणि स
त्त्वानि पृथिवीतले तानि चाग्रे प्रली
यन्ते भूमित्वमुपयान्ति च । सप्तरश्मि
रथो भूत्वा समुत्तिष्ठद्दिवाकरः अ
सह्यरश्मिर्भवति पिबन्नम्भो गभ
स्तिभिः तस्य ते रश्मयः सप्त पिबन्त्य
म्बु महार्णवे तेनाहारेण ते सूर्य्याः ।
दीप्ताः सप्त भवन्ति हि ततस्ते रश्म

यः सप्त सूर्य्या भूत्वा चतुर्द्दिशं चतु
र्लोकमिदं कृत्स्नं दहन्ति शिखिनो य
था व्याप्नुवन्तश्च ते विप्रास्तूर्द्ध्वं चा
धश्च रश्मिभिः । दीप्यन्ते भास्कराः
सप्त दहन्तोऽग्निप्रतापिनः ते सूर्य्या
वारिणा दीप्ता बहुसाहस्ररश्मयः
खं समावृत्य तिष्ठंति निर्द्दहंतो वसुं
धरां ततस्तेषां प्रतापेन दह्यमाना
वसुंधरा साद्रिनद्यर्णवद्वीपा निः
स्नेहा समपद्यत । दीप्ताभिः संतता
भिश्च ज्वालाभिश्च समावृत्तः अध
श्चोर्द्ध्वं च तिर्य्यक्च समावृत्य सह
स्रशः । सूर्य्याग्निना प्रसृष्टानां सं
सृष्टानां परस्परं । एकत्वमुपग
ताना मेकज्वालो भवेत् प्रभुः । स
र्व्वलोकप्रणाशश्च सोऽग्निर्भूत्वा
तु कुण्डली । चतुर्लोकमिदं कृ
त्स्नं निर्द्दहत्यात्मतेजसा ततः प्र
लीने सर्व्वस्मिन् जंगमे स्थावरे
तथा निर्वृक्षा निस्तृणा भूमिः कू
र्म्मपृष्ठप्रकाशते अम्बरीषमिवा
भाति सर्व्वमापूरितं जगत् सर्व्वमे
व तदर्च्चिर्भिः पूर्णं जाज्वल्यते न
भः पाताले यानि तीर्थानि महो
दधिगतानि तु । ततस्तानि प्रली
यन्ते भूमित्वमुपयान्ति वै द्वीपाश्च
पर्व्वताश्चैव वर्षाण्यथ महोदधीन् ।

तान्सर्व्वान् भस्मसात् कृत्वा सप्तात्मा
पावकः प्रभुः समुद्रेभ्यो नदीभ्यश्च
पातालेभ्यश्च सर्व्वशः पिबन्नपः
समिद्धोऽग्निः पृथिवीमाश्रितो ज्व
लन्। ततः संवर्त्तकः शैलानति
क्रम्य महांस्तथा लोकान्दहति।
दीप्तात्मा रुद्रतेजोविजृम्भितः॥
स दग्ध्वा पृथिवीं देवो रसातलम
शोषयत्। अधस्तात् पृथिवीं द
ग्ध्वा दिवमूर्द्ध्वं दहिष्यति योजना
नां शतानीह सहस्राण्ययुतानि च
उत्तिष्ठन्ति शिखास्तस्य वायुः संवर्त्त
कस्य च गन्धर्व्वांश्च पिशाचांश्च स
यक्षोरगराक्षसान्। तदा दहत्यसौ
दीप्तः कालरुद्रप्रचोदितः भूर्लो
कं च भुवर्लोकं स्वर्लोकं च तथा म
हः। दहेदशेषं कालाग्निः कालो
विश्वतनुः स्वयं व्याप्तेष्वेतेषु लो
केषु तिर्य्यगूर्द्ध्वमथाग्निना तत्तेजः
समनुप्राप्य कृत्स्नं जगदिदं श
नैः। अयोगुडनिभं सर्व्वं तदैवैकं
प्रकाशते ततो गजकुलोन्नादाः
स्तडिद्भिः समलङ्कृताः उत्तिष्ठ
न्ति तदा व्योम्नि घोराः संवर्त्तका
घनाः केचिन्नीलोत्पलश्यामाः
केचित्कुमुदसन्निभाः धूम्रव
र्णास्तथा केचित् केचित्पीताः पयोध
राः केचिद्रक्ता।

भ्रवर्णाश्च स्थूलाः हारनिभास्तथा
शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननि
भाः परे मनःशिलानिभास्त्व
न्ये कपोतसदृशाः परे केचिद्
इन्द्रवर्णाभास्तथान्ये क्षीरसन्नि
भाः तथा कर्पूरवर्णाभा भिन्नां
जननिभास्तथा इन्द्रगोपनिभाः
केचिद्धरितालनिभास्तथा का
र्मुकनिभाः केचित्तु तिष्ठन्ति
घनादिवि केचित् पर्व्वतसङ्काशा
केचिद्गजकुलोपमाः कूटागारनि
भाश्चान्ये केचिन्मीनकुलोद्वहाः॥
बहुरूपा घोररूपा घोरस्वरनिना
दिनः तदा जलधराः सर्व्वे पूरयं
ति नभस्तलं ततस्ते जलदा घो
रा वारिणा भास्करात्मजाः सप्तधा
संहृतात्मानस्तमग्निं शमयन्त्युत त
तस्ते जलदा वर्षं वर्षन्तीह हिमौघ
वत् सुघोरमशिवं सर्व्वं नाशयन्ति
च पावकं प्रवृष्टेन तदात्यर्थमम्भसा
पूर्य्यते किल अद्भिस्तेजोभिभूतत्वा
त्तदाग्निः प्रविशत्यपः नष्टे चाग्नौ
वर्षशतैः पयोदाः जलसम्भवाः प्ला
वयन्तोऽथ भुवनं महाजलपरिस्रवैः
धाराभिः पूरयन्तीदं चोद्यमानाः स्वयं
भुवा उद्धृतः सलिलैस्तैश्च वेलाइव म
होदधेः साद्रिद्वीपा तथा पृथ्वी॥

जलैः संछाद्यते शनैः। आदित्य
रश्मिभिः पीतं जलमभ्रेषु तिष्ठति
पुनः पतति तद्भूमौ पूर्य्यन्ते तेन
चार्णवाः॥ ततः समुद्राः स्वां वे
लामतिक्रान्तास्तु कृत्स्नशः प
र्व्वताश्च विलीयन्ते मही चाप्सु निम
ज्जति तस्मिन्नेकार्णवे घोरे नष्टे स्था
वरजङ्गमे योगनिद्रां समास्थाय
शेते देवः प्रजापतिः चतुर्युगसह
स्रान्तं कल्पमाहुर्महर्षयः वारा
हो वर्त्तते कल्पो यस्य विस्तार ईरितः
असंख्यातास्तथा कल्पा ब्रह्मवि
ष्णुशिवात्मकाः। कथिता हि पुरा
णेषु मुनिभिः कालचिन्तकैः सा
त्त्विकेष्वथ कल्पेषु माहात्म्यमधि
कं हरेः तामसेषु शिवस्योक्तं राज
सेषु प्रजापतेः सोऽयं प्रवर्त्तते कल्पो
वाराहः सात्त्विको मतः। अन्ये च
सात्त्विकाः कल्पा मम तेषु परिग्र
हः ध्यानं तपस्तथा ज्ञानं लब्ध्वा
तेष्वेव योगिनः आराध्य गिरिशं य
न्त्वा यान्ति तत् परमं पदं। सोऽहं स
त्त्वं समाधाय मायी मायामयं स्वयं
एकार्णवे जगत्यस्मिन् योगनिद्रां
व्रजामि तु मां पश्यन्ति महात्मानः
सुप्तं काले महर्षयः जनलोके व
र्त्तमानास्तपसा योगचक्षुषा अहं

पुराणपुरुषो भूर्भुवःप्रभवो विभुः
सहस्रचरणः श्रीमान् सहस्राक्षः
सहस्रपात् मन्त्रोऽग्निर्ब्राह्मणा गा
वः कुशाश्च समिधो ह्यहं प्रोक्ष
णी च स्रुवश्चैव सोमो घृतमथास्म्य
हं संवर्त्तको महानात्मा पवित्रं प
रमं यशः वेदवेद्यः प्रभुर्गोप्ता गो
पतिर्ब्रह्मणो मुखं अनन्तस्तारको
योगी गतिर्गतिमतां वरः। हंसः
प्राणोऽथ कपिलो विश्वमूर्त्तिः स
नातनः क्षेत्रज्ञः प्रकृतिः कालो
जगद्वीजमथामृतं। माता पिता
महादेवो मत्तो ह्यन्यन्न विद्यते आ
दित्यवर्णो भुवनस्य गोप्ता नाराय
णः पुरुषो योगमूर्त्तिः। मां पश्य
न्ति यतयो योगनिष्ठा ज्ञात्वात्मान
ममृतत्वं व्रजन्ति। प्राकृतप्रलय
विस्तारो यथा। कूर्म उवाच॥
अतः परं प्रवक्ष्यामि प्रतिसर्गमनु
त्तमं। प्राकृतं प्रसमासेन शृणुध्वं
गदतो मम गते परार्द्धद्वितये का
ले लोकप्रकालकः। कालाग्नि
र्भस्मसात् कर्त्तुं करोति निखिलं
मतिं आत्मन्यात्मानमावेश्य भू
त्वा देवो महेश्वरः। दहेदशेषं ब्रह्मा
ण्डं सदेवासुरमानुषं॥ तमावि
श्य महादेवो भगवान्नीललोहितः

करोति लोकसंहारं भीषणं लोकमाश्रितः। प्रविश्य मण्डलं सौरं कृत्वासौ बहुधा पुनः। निर्द्दहत्यखिलं लोकं सप्तसप्तिस्वरूपधृक्। स दग्ध्वा सकलं सत्त्वमस्त्रं ब्रह्मशिरो महत्। देवतानां शरीरेषु क्षिपत्यखिलदाहकः। दग्धेष्वशेषदेहेषु देवी गिरिवरात्मजा। एकास्ते साक्षिणी शम्भोस्तिष्ठते वैदिकी श्रुतिः। शिरःकपालैर्देवानां कृतस्रग्वरभूषणः। आदित्यैश्चन्द्रादिगणैः पूरयन्व्योममण्डलं। सहस्रनयनो देवः सहस्राकृतिरीश्वरः। सहस्रहस्तचरणः सहस्रार्च्चिर्महाभुजः॥ दंष्ट्राकरालवदनः प्रदीप्तानललोचनः। त्रिशूली कृत्तिवसनो योगमैश्वरमास्थितः। पीत्वा तत् परमानन्दं प्रभूतममृतं स्वकं करोति ताण्डवं देवीमालोक्य परमेश्वरः। पीत्वा नृत्यामृतं देवी भर्त्तुः परममङ्गला। योगमास्थाय देवस्य देहमायाति शूलिनः॥ स भुक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक्। ज्योतिःस्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलं। संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु। गुणैरशेषैः पृथिवी विलयं याति वारिषु। स वारितत्त्वं सगुणं ग्रसते हव्यवाहनः। तैजसं गुणसंयुक्तं वायौ संयाति संक्षयं। आकाशे सगुणो वायुः प्रलयं याति सत्तमाः। भूतादौ च तथाकाशं लीयते गुणसंयुतं। इन्द्रियाणि च सर्व्वाणि तैजसे यान्ति संक्षयं। वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः। वैकारिकस्तैजसश्च भूतादिश्चेति सत्तमाः। त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत्। महान्तमेभिः सहितं ब्रह्माणमतितेजसं। अव्यक्तं जगतो योनिः संहरेदेकमव्ययं। एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः॥ वियोजयति चान्योन्यं प्रधानं पुरुषं परं। प्रधानपुंसोरजयोरेष संहार ईरितः। महेश्वरेच्छाजनितो न स्वयं विद्यते लयः। गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते। प्रधानं जगतो योनिर्मायातत्त्वमचेतनं। कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः॥ गीयते मुनिभिः साक्षी महानेकः पितामहः। एवं संहारकरणी शक्तिर्माहेश्वरी ध्रुवा। प्रधानाद्यं विशेषान्तं दहेद्रुद्र इति श्रुतिः। योगिनामथ सर्व्वेषां ज्ञानविन्यस्तचेतसां।

आत्यन्तिकं चैव लयं विदधातीह शङ्करः। इति कौर्म्मे ४२। ४३ अध्यायः॥ आत्यन्तिकप्रलयविस्तारो यथा। श्रीपराशर उवाच। आध्यात्मिकादि मैत्रेय ज्ञात्वा तापत्रयं बुधः। उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयं। आध्यात्मिको वै द्विविधः शारीरो मानसस्तथा। शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः। शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः। गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा। तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकैः। भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि। कामक्रोधभयद्वेषलोभमोहविषादजः। शोकासूयावमानेर्ष्यामात्सर्य्यादिभवस्तथा। मानसोऽपि द्विजश्रेष्ठ तापो भवति नैकधा। इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः। मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः। सरीसृपाद्यैश्च नृणां जन्यते चाधिभौतिकः। शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः। तापो द्विजवरश्रेष्ठ। कथ्यते चाधिदैविकः। तदस्य त्रिविधस्यापि दुःखजातस्य पं। डितैः॥ ॥

गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः। निरस्तातिशयाह्लादसुखभावैकलक्षणा। भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता। तस्मात्तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः। तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म्म चोक्तं महामुने। आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते। शब्दब्रह्मागममयं परं ब्रह्म विवेकजं। अन्धन्तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवं। यथा सूर्य्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजं। मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम। तदेतच्छ्रूयतामत्र सम्बन्धे गदतो मम। द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति। द्वे विद्ये वेदितव्ये वै इति चाथर्व्वणी श्रुतिः। परया त्वक्षरप्राप्तिरृग्वेदादिमयापरा। यत्तदव्यक्तमजरमचिन्त्यमजमव्ययं। अनिर्द्देश्यमरूपञ्च पाणिपादाद्यसंयुतं। विभुं सर्व्वगतं नित्यं भूतयोनिमकारणं। व्याप्यं व्याप्यं यतः सर्व्वं तद्वै पश्यन्ति सूरयः॥ तद्ब्रह्म तत्परं धाम तद्ध्येयं मोक्षकाङ्क्षिणां। श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदं॥ तदेव भगवद्वाच्यं स्वरूपं परमात्मनः॥

वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः । एवं निगदितार्थस्य सतत्त्वं तस्य तत्त्वतः । ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयं । अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः । शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते मैत्रेय भगवच्छब्दः सर्वकारणकारणे । सर्वाणि तत्र भूतानि वसन्ति परमात्मनि भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः । खाण्डिक्य जनकायाह पृष्टः केशिध्वजः पुरा नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः । भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत् धाता विधाता जगतां वासुदेवस्ततः प्रभुः स सर्वभूतप्रकृतिर्विकार गुणांश्च दोषांश्च मुने व्यतीतः । अतीत सर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले समस्तकल्याणगुणात्मको हि स्वशक्तिलेशावृतभूतसर्गः इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ तेजोबलैश्वर्य्यमहावबोधसुवीर्य्यशक्त्यादिगुणैकराशिः परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे । स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः । संज्ञायते येन तदस्तदोषं शुद्धं परं निर्म्मलमेकरूपं संदृश्यते वाप्यवगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तं । इति विष्णुपुराणे ६ अंशे आत्यन्तिकप्रतिसंचरो नाम ५ अध्यायः । अपि च । नारद उवाच कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगं दिव्यमेकयुगं ज्ञेयं तस्य या चैकसप्ततिः मन्वन्तरं तदुक्तं ते तु यत्र चतुर्दश सकले नाम वै कालस्तदन्ते प्रलयस्तथा । सा ब्रह्मरात्री राजेन्द्र शेते स्वभुजासनः त्रयो लोकास्तदा राजन् लीयन्ते तन्निमित्ततः नैमित्तिको लयो नाम दैनंदिन इतीर्य्यते एवं दिनप्रमाणेन ब्रह्मणः शतवार्षिकं आयुः पूर्वपरार्द्धेन परार्द्धे द्वे प्रकीर्त्तिते द्विरूपरार्द्धे व्यतीते तु ब्रह्मणो जगदात्मनः । तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप लयः प्राकृतिको ह्येष लीने ब्रह्मणि भूतये ब्रह्माण्डकोषेपि सकलः प्रलयं याति सर्वशः । एवंरूपं तव वदामि प्रलय । स्यास्य भू ॥

यते । शतवर्षाणि भूमौ हि पर्ज्जन्यो नैव वर्षति । दुर्भिक्षे निर्ज्जने लोके प्रजाः सर्वाः क्षुधार्द्दिताः । परस्परं भक्षमाणाः लयं यास्यन्ति भूमिप समुद्रेषु च यदर्णाश्च वहेषु वल्लत्सु च । देहेषु चैव यो रसस्तद्धि रविर्हरति रश्मिभिः ततः संवर्त्तको नाम ज्वालामालीकृताशनः संकर्षणमुखात् प्रोद्धृत्यानिलसारथिः सर्वं ब्रह्माण्डं वै ततः कालक्षोभगर्ज्जितः एवं दग्धं महाराज वह्निकाभ्यासमेततः दग्धा गोमयपिण्डभे ब्रह्माण्डं सारवर्ज्जिते । प्रचण्डपवनो राजेस्ततो वर्षशते पुनः संवर्त्तको नाम महान् ब्रह्माण्डं चालयिष्यति ततो मेघा महाघोरा नानावर्णाश्चानेकशः शतवर्षाणि वर्षन्ति गर्ज्जन्ति च महास्वनाः । एकोदकं ततो विश्वं निर्वीर्णं निर्विकारकं भूमेर्गन्धगुणं राजन्नप्संस्थापः समेततः गुणनाशात् स्वयं पृथ्वी प्रलयं प्राप्यते तदा । तेजस्त्वपां रसगुणं सगन्धं पिबते बलात् ततः प्रलयं नायाति राजन्नापोपि तत्क्षणात् ॥ तेजः संस्थे ततो रूपं रसगन्धसमन्वितं । वायुर्हरति चण्डात्मा तेजः प्रलयमृच्छति ॥ आकाशभूतततो वायोः स्पर्शाख्यगुणैः सह । समादत्ते महाराज अत्रैव प्रलीयते । आकाशस्य गुणं शाब्दं गुणैरन्यैः समन्वितं अहङ्कारः समादत्ते नभस्तस्मिन् प्रलीयते तैजसेष्विन्द्रियाण्येव देवा वैकारिके तथा । अहङ्कारे प्रलीयन्ते जगदेतच्चराचरं अहङ्कारं भक्षयति ततः सत्त्वादयो गुणाः । ग्रसते तान् महाराज आद्या प्रकृतिरुच्यते न तस्याः कालदोषेण परिणामो नरर्षभ । आद्यन्तरहिता सा हि नित्यं कारणमव्ययं ॥ शक्तिर्भगवतः सा हि तदेकपरमा च सा इत्युक्तः प्रलयो राजन् विश्वस्यास्य महामते । यथोत्पत्तिक्रमेणास्य व्युत्क्रमेण लयस्तथा इति । पाद्मे स्वर्गखण्डे २९ अध्यायः ।

प्रलापः पुं प्रलपनं । अनर्थकवाक्यं । निष्प्रयोजनमुन्मत्तादिवचनं इत्यमरभरतौ । रोगाणामुपसर्गोयं ॥

प्रलापहा पुं कुलत्थाञ्जनं इति राजनिर्घण्टः ॥

प्रलीनता स्त्री प्रलयः तत्पर्य्यायः ॥ इन्द्रियस्वापः २ चेष्टानाशः ३ इति राजनिर्घण्टः ॥

प्रवक्ता त्रि प्रकर्षेणवक्तियः वेदा
दिवाचकः यथा जातिमात्रोपजीवी
वा कामंस्याद्ब्राह्मणब्रुवः ॥ धर्म
प्रवक्ता नृपते र्नेष्ठ शूद्रः कदा
चन इतिमानवे ८ अध्यायः ॥
प्रवचनं क्ली वेदः प्रकृष्टवाक्यं
इति मेदिनी ॥
प्रवचनीयः त्रि प्रवक्ता प्रवाच्यः
इति मेदिनी ॥
प्रवणः पुं चतुष्पथः इत्यमरः ।
प्रवणः त्रि क्रमनिम्नभूमिः उर
रे प्रह्वः । इति मेदिनी आयतः
प्रगुणः क्षणः इति विश्वः स्नु
तः स्निग्धः इति शब्दरत्नावली
आशक्तः इति हेमचंद्रः क्षीणः
इति धरणिः ।
प्रवत्स्यत् पतिका स्त्री नायि
काभेदः अस्या लक्षणं अस्याः
पतिरग्रिम क्षणे देशांतरं या
स्यत्येवसा । अस्या चेष्टा का
कुवचन कातरप्रेक्षण गम
नविघ्नोपदर्शन निर्वेद संता
प संमोह निश्वास वाष्पादयः
अथाप्रवत्स्यत् पतिका ।
यथा । प्राणेश्वरे किमपि
जल्पति निर्गमाय तामोद
री वदनं मानमयांचकार ।
आलीकुल निभृतमेत्य ॥

लता निकुंज गुंजन्मत्तकोकिल क
लध्वनिमाततान १ मध्याप्रवत्स्यत्
पतिका यथा गंतप्रियेवदतिति:
प्रस्थितेन दीर्घमासीन्नवा नयन
यो र्जलमाविरासीत् आयुर्लिपिं
पठितमेणदृशः परंतु भालस्य
लौकिमुकरः समपाजगाम: २
प्रौढाप्रवत्स्यत् पतिका यथा
नाथंमुचतिसखीवामपि नतु त्वा
मे वियोग ज्वरस्तेनाहं विहितां
जलिरीडुपते पृच्छामि सत्यं वद
तांबूले कुसुमे पटीर मुदकं
यद्वेधुभिर्दी यते तत्स्यादत्र
परत्रवाकिमुविषज्वालावलीद्रः
सहं ३ परकीयाप्रवत्स्यत्पतिका
यथा न्यस्त पन्नग मूर्ध्नि पादयु
गलं भक्ति र्विमुक्ता गुरौ त्यक्ता
नीतिरकारि किं न भवतो हेतो
र्मयादुष्कृतं अंगानां शत यातु
नान्नयनेयो: कोपक्रमो रौरवः
कुंभीपाक पराभवश्च मनसो यु
क्तं त्वयि प्रस्थिते ४ सामान्यप्रव
त्स्यत्पतिका यथा मुक्ता प्रदेहि
वलयाय भवद्वियोग मासाद्य या
स्यतिवहिः सहसा यदेतत् इत्थं
निगद्य विगलन्नयनांबुधारा वारा
गना प्रियतमंकरयो र्बभार । ५
इतिरसमंजरी ॥

प्रवयणं क्ली प्रयतोदः इति हेम
चंद्रः ॥
प्रवयाः स पुं वृद्धः इत्यमरः ॥
प्रवरं क्ली अगुरु इतिभावप्रका
शः गोत्रे श्रेष्ठेत्रि इतिमेदिनी ॥
प्रवरः पुं संततिः इतिमेदिनी ।
गोत्रप्रवर्तक मुनिव्यावर्तको मु
निगणः तद्यथा च यमदग्निगोत्र
स्य प्रवराः यमदग्नि उर्व वशिष्टाः
भरद्वाजगोत्रस्य भरद्वाजांगिरस
वार्हस्पत्याः । विश्वामित्रगोत्रस्य
विश्वामित्रमरीचि कौषिकाः अ
त्रिगोत्रस्य अत्र्यात्रेय शातातपाः
गौतमगोत्रस्य गौतम वशिष्ट
वार्हस्पत्याः वशिष्टगोत्रस्य व
शिष्टः केषाचित् वशिष्टात्रि ।
सांकृतयः काश्यपगोत्रस्य का ।
श्यपाप्सार नैध्रुवाः अगस्त्य गो
त्रस्य अगस्ति दधीचि जैमिनयः
सौकालिनगोत्रस्य सौकालिनां
गिरस वार्हस्पत्याप्सार नैध्रुवाः ॥
मौद्गल्यगोत्रस्य उर्वच्यवन भार्गव
जामदग्न्याप्नुवतः पराशरगोत्र
स्य पराशरशक्तिवशिष्टाः ॥ वृह ।
स्पतिगोत्रस्य वृहस्पतिकपिल ।
पार्ष्णिणः । कांचनगोत्रस्य अ
स्त्यदेवलदेवराजाः विष्णुगो

त्रस्य विष्णु वृद्धि कौरवाः कौशि
कगोत्रस्यकौशिकात्रिजमदग्नयः
कात्यायनगोत्रस्य अत्रिभृगु व
शिष्टाः आत्रेयगोत्रस्य आत्रेय ।
शातातप सांख्याः कात्रगोत्रस्य
कात्रस्त्यदेवलाः कृष्णात्रेयगोत्र
स्य कृष्णात्रेयात्रेयावास्याः सांकृति
गोत्रस्य अव्याहारात्रिसांकृतयः ।
कौण्डिल्यगोत्रस्यकौण्डिल्यस्तिमि
क कौत्साः गर्गगोत्रस्य गार्ग्य
कौस्तुभ माण्डव्याः आंगिरसगो
त्रस्य आंगिरस वशिष्ट वार्हस्पत्याः
अनावृकात्तगोत्रस्य गार्ग्यगौत
मवशिष्टाः अव्ययगोत्रस्य अव्य
वलिसारस्वताः जैमिनिगोत्र
स्य जैमिनि उतथ्य सांकृतयः ।
हरितगोत्रस्य कुत्स हरितांगिरो वार्ह
स्पत्याः शाण्डिल्यगोत्रस्य शाण्डि
ल्यासितदेवलाः वात्स्यगोत्र सा
वर्णिगोत्रयोः उर्वच्यवन भार्गव
जामदग्न्याप्नुवतः आल्लेखायन
गोत्रस्य आल्लेखायन शालंकाय
न शाकटायनाः वैयाघ्रपद्यगोत्र
स्य सांकृतिः घृतकौशिकगोत्र
स्य कुशिक घृतकौशिकाः के
षांचित् कुशिक कौशिक वंकु
लाः शाक्तिगोत्रस्य शाक्ति पराश
र वशिष्टाः ॥

काण्वायनगोत्रस्य काण्वायनाङ्गिर
सवार्हस्पत्यभरद्वाजाजमीढाः
वाल्मीकिगोत्रस्य अत्रेयभानेनवा
त्सकयः गौतमगोत्रस्य गौतमा
प्साराङ्गिरसवार्हस्पत्य नैध्रुवाः
केषांचित् गौतमाङ्गिरसावास्याः
शुनकगोत्रस्य शुनकशौनकगृ
त्समदाः सायायनगोत्रस्य प्र
वराः और्वच्यवनभार्गवजामद
ग्न्याप्नुवानः इति धनञ्जयकृतध
र्मप्रदीपे गोत्रप्रवरविवेकः ॥
प्रवर्त्तः पुं होमाग्निः इति हेम
चन्द्रः ॥
प्रवर्त्तकः त्रि प्रवर्त्तनकारी प्रवृ
त्तिजनकः यथा प्रवर्त्तकं वाक्य
मवाचचोदनां निवर्त्तकं नैवमुवा
चभाष्यकृत् तनस्य विद्या न हि वो
दनास्तिस्या प्रवर्त्तिकायान भवेदि
ति स्थितिः इति संक्षेपसारीरकं
प्रवर्त्तनं क्ली प्रवृत्तिः यथा नैन
वीन्त समस्यति परोत् सर्गैच भु
जने इतरार्थ गृहे येषां कवीनां ।
स्यात् प्रवर्त्तनं इति काव्यप्रका
शः आरम्भः यथा स्तने न त्वा
मिति पुनस्तेहपर्येवापि मान
वेराजान मामेव ततः ऊर्ध्वात्
सेत प्रवर्त्तनं इति मिताक्षरा ॥

प्रवर्त्तना स्त्री प्रवृत्तिप्रेरणं यथा
अथवाभवतः प्रवर्त्तना न कथं
पिष्टमियं पिनष्टि न स्वत एव स
तां परार्थना ग्रहणं नो हि यथा
यथार्थना इति नैषधं ॥
प्रवर्त्तितः त्रि जातः यथा त्वं ।
तदोजस्विनदेववीर्य्येन तथैववैनेस
र्गिकमुन्नतत्वे न कारणात् स्वात्
विभिदे कुमारः प्रवर्त्तितो दीपइ
वप्रदीपात् इति रघुवंशे ५ स
र्गः ॥ प्रवर्द्धनं क्ली विवर्द्धनं ।
प्रपूर्व वृधधातोर्भावे अनट् ।
कर्त्तरि अन प्रत्यये त्रि ॥
प्रवल्लाकी पुं भुजङ्गः चित्रमेख
लकः इति विश्वः ॥
प्रवर्हः त्रि प्रधाने श्रेष्ठः इत्यमरः
प्रवहः पुं गृहनगरादेर्वहिर्गम
ने इत्यमरः ॥
वायुः इति हेमचन्द्रः सप्तवाय
न्तर्गत द्वितीयवायुः । सत्वग्रा
वहवायोरूर्द्धस्थितः । इति सि
द्धान्तशिरोमणिः यस्माज्ज्योती
षि वहति प्रवहस्तेन स स्मृतः ॥
अम्बरीका यस्माज्ज्योतींषि प्रक
र्षेण वहति तेन स वायुः प्रवहः
स्मृतः प्रवहस्यैव भेदाः सर्वे वायु
स्कंधाः इति विष्णुपुराणे २ अंशे

१२ अध्यायः ॥
प्रवहणं क्ली वर्णीरथः स्त्रीरत्न
वहनार्थमुपरि वस्त्राच्छादितम
नुष्यवाह्ययानविशेषः इत्यमरभ
रतौ प्रवल्हिः स्त्री प्रवल्हिका इत्यम
रटीकायां भरतः ॥
प्रवल्हिका स्त्री प्रहेलिका इत्यमरः
प्रवल्ही स्त्री प्रवल्हिका इति भरतः
प्रवाक्क त्रि वाचोयुक्तिपटुः यथा
वाचोयुक्तिपटु वाग्मी वचोज्ञः प्र
वचाः प्रवाक् इति जटाधरः ॥
प्रकृष्टवाक्यंच ॥
प्रवाचकः त्रि प्रकृष्टवक्ता प्रपूर्व
वच धातोः वर्त्तरि ण्वुल प्रत्ययः ।
प्रवाणिः } स्त्री तन्त्रशलाका मो
प्रवाणी } गा इति भाषा इति शिष्ट
णिशाद्ध टीकायां भरतः ॥
प्रवादः पुं परस्परवाक्यं यथा ।
इत्थं प्रवादं युधि संप्रहारं प्रचक्र
तु रामनिशाविहारौ । हताय
मत्वा रघुनन्दनोऽथ वाणेन र
क्तः प्रथनान्निरास्थात् इति भट्टिः
जनरवः यथा प्रेयांस्तेहं त्वम
पि च मम प्रेयसीति प्रवादः त्वं मे
प्राणा अहमपि तवास्मीति हृ
तप्रलापः त्वं मे तेस्या मह मपि
वचनञ्च नो साधु राधेश्वरारोरेनो
नहि समुचितो युक्तमस्मत् ॥

प्रयोगः इत्यलंकारकौस्तुभः ।
प्रवारः पुं प्रवरः वस्त्रं प्रपूर्व
वृ धातोः घञ् इति संक्षिप्तसार
व्याकरणं ॥
प्रवारणं क्ली काम्यदानं इत्यम
काम्यस्य कमनीयस्य वस्तुनो व
स्त्रीरत्नादिनो दानं काम्यन का
मनया वा दानं प्रवारणमुच्यते
काम्य शब्दोत्र नेत्रणो भयार्थः
प्रकर्षेण वार्य्यते संवृयते प्रवा
रणं तच्च महादानं प्रवारणं महा
दानमिति त्रिकाण्डशेषः इति
तट्टीकायां भरतः निषेधः इति
मेदिनी ॥
प्रवासः पुं विदेशस्थितिः यथा
कार्ये जयैरादितराज्यलाभा सैन्य
णेन नीता विकृतिं लघिम्ना राम
प्रवासे व्यमृशन्नदोषं जनापवा
दं सनरेन्द्र मृत्युं इति भट्टिः ॥
द्वादशवर्षीकृतवार्षिकप्रोषि
तस्य तत्प्रवासस्याद्य दिने श्राद्धं
कर्त्तव्यं यथा प्रवासवासरेते
यं तस्मात् संकल्पयेः थवा इति ।
मिताक्षरा प्रवासागतेन गुर्वा
द्यभिवादनं कर्त्तव्यं । यथा ॥
विप्रोष्य पादग्रहणमन्वहञ्चा
भिवादनं गुरुदारेषु कुर्वी
त सतां धर्ममनुस्मरन् ॥



मातृस्वसा मातुलानी श्वश्रू ।
श्वाश्च पितुःस्वसा प्रवृज्याग
रुपत्नीवसमास्ना गुरुभार्य्यया
भ्रातृभार्य्याप संग्राह्या सवर्णा
हन्यहन्यपि विप्रोष्य भ्य संग्रा
ह्या ज्ञाति संबंधियोषितः पितु
र्भगिन्यां मातृश्च ज्यायस्यांच स्वस
र्य्यपि मातृवद्वृत्तिमातिष्ठेन्माता
ताभ्यो गरीयसी इति कौर्म्मेउप
रिभागे १२ अध्यायः ॥
प्रवासनं क्ली वधः इत्यमरः प्र
वासना यथा सीता प्रवासनप
टोः करुणा ज्ञतस्ते इत्युत्तरवीर
चरित्रे प्रवासी त्रि प्रवासविशि
ष्टः प्रोषितः विदेशस्थः यथा
अध्वनीनोऽध्वगोऽध्वन्यः पान्थः
पथिकदेशिकौ प्रवासी तद्गणो
हारि पाथेयं संबलं समे इति हेम
चंद्रः प्रवाहः पुं प्रवृत्तिः जल
स्रोतः इति मेदिनी व्यवहारः ॥
इति विश्वः प्रकृष्टाश्वः इति ना
नार्थरत्नमाला ॥
प्रवाहकः पुं राक्षसः इति शब्द
माला प्रकृष्टवहनकर्त्तरि त्रि
प्रवाहिका स्त्री ग्रहणीरुक्
इत्यमरः ॥
अस्या निदानं ग्रहणीशब्दे द्रष्ट
व्यं अस्याः स्वरूप माह चरकः ।
अग्न्यधिष्ठान मन्नस्य ग्रहणाद्ग्रह ।
णीमता अपक्कंधारयेन्नत्र पक्कं
सृजति वाप्यधः । सुश्रुतेपि षष्ठी
पित्तधरा नाम या कला परिकी
र्त्तिता । आम पक्वाशयान्तःस्था
ग्रहणी साभिधीयते ग्रहण्या ब
ल मग्निर्हि सचापि ग्रहणीश्रितः
तस्माद्ग्नौ प्रदुष्टे तु ग्रहण्यपि वि
दुष्यति तस्मात् कार्य्यः परीहारो
ह्यतीसारे विरिक्तवत् अतीसारे
द्रवपात प्रवृत्तिः ग्रहण्यां तु ब
द्धस्यापि मलस्य प्रवृत्तिरिति त
यो भेदः ग्रहणीरोगस्य भेदं सं
ग्रहग्रहणी रोगमाह । द्रवं घनं
सितं ... सकटी वेदनं पाक्वत
आमं बहुसपैच्छिल्यं सशब्द मंद
वेदनं पक्षात्मा साह्वशाहाह्वानि
त्यं चापि विमुंचति ग्रहणक्कजन मा
लसं दौर्बल्य सदने भवेत् दिवाप्र
कोपो भवति रात्रौ शान्तिंच गच्छ
ति दुर्विज्ञेया दुर्निवारा चिरका
लानुबंधिनी सा भवेदामवाते
न संग्रहग्रहणी मता ॥ अ
थ घटी यंत्राख्य ग्रहणी ।
रोगभेदमाह ॥
प्रसुप्तिः पार्श्वयोः शूलं तथा
जलघटीध्वनिः तंवदंति घ
टी यंत्रमसाध्यं ॥ ॥

ग्रहणीगदं अथ ग्रहणी रोगस्या
रिष्टमाह येलंबतेः सिध्यति ना
तिसारस्तेः स्यादसाध्यो ग्रहणी ग
दोपि वृद्धस्य जायते यदा गदोऽयं
देहे तदा तस्य विनाशमृच्छेत् ॥
अथ सामान्य ग्रहणी रोगस्य चि
कित्सा माह ग्रहणी माश्रितं
रोग मजीर्णं वदुपाचरेत् लंघनै
र्दीपनीयैश्च मंदातीसार भेष
जैः दोषं सामं निरामंच विद्याद
त्रातिसारवत् अतीसारोक्त वि
धिना तस्यामंच विपाचयेत् ॥
पेयादिपटुलघ्वन्नं पंचकोलादि
भिर्युतं दीपनानि च तक्रंच ग्रह
ण्यां योजयेद्भिषक् कपित्थबिल्व
चांगेरीतक्रदाडिमसाधिता यवा
गू ... च यत्यामं शकृत् संवर्त्तयत्य
पि संवर्त्तयति चनीकरोति अथख
ड्यूषः मुद्गयूषरसं तक्रं धान्यजी
रकसंयुतं सैंधवेनान्वितं दद्यात्
खडयूष मिति कीर्त्तितं रसं लघुग्रा
हिकं मांसभवं कर्षं गंधकमङ्घ्रपा
रदमभ्रेकर्ष्याङ्कभोकजली अ
हं शुष्कणा तथा पंचलवणं सार्द्धंच
कर्षं पृथक् भृष्टं हिंगुच जीरकंद्व
यं युतं सर्वार्द्धभागं चित्तं खादेदेक
मितं प्रहरे त्रिगदं वा स्नाकस्य बिल्वेन च
लघुनायिकाचूर्णमित्यर्थः इतिल
घुलाई चूर्णं त्रिकटु त्रिफला चैव
विडंगं जीरकद्वयं भल्लातकं यवा
नीच हिंगु लवणपंचकं गृहधूमो
वचा कुष्ठं रसो गंधक मभ्रकं क्षार
त्रया जमोदे च चित्रकं गजपिप्पली
मुस्ता मोचरसं पाठा लवङ्गं जाति
पत्रकं समभागं कृतं चैषां चूर्णं
श्लक्ष्णं विनिर्मितं शक्राशनस्य
चूर्णं तु चूर्णतुल्यं प्रदापयेत् मंदा
ग्निकासकृल्लीमप्लीहपाण्डुरुचि
ज्वरान् विष्टम्भं संग्रहं शूलं हन्या
नातिसारजित् आमवातापहं बल्यं
सूतिकादोष नाशनं वर्द्धयेत्साय.
मल्लेच स्नाने पिशित भोजनं पथ्यं
कांजिकमथापि दधि तक्रमथवा
पिबा वृहल्लाई चूर्णमिदं लाईभा
षितमुत्तमं इति वृहल्लाई चूर्णं वृ
हन्नायिकाचूर्णमितिप्रसिद्धं जाती
फल लवंगैलापत्र त्वङ्नागके ।
शरैः कर्पूर चंदन तिल त्वक्की
री तगरामलैः तालीशपिप्पली
पथ्या स्थूलजीरक चित्रकैः शु
ण्ठी विडंग मरिचैः समभागा वि
चूर्णितैः यावंत्येतानि सर्वाणि द
द्यात्तंगाव तावती सर्वचूर्णसमानां
शा प्रदेयाम्लभृष्टा शर्करा कर्षमात्र मि

मिदंखादेन्मधुना लावितं जनः ना
शयेद्ग्रहणीकासं क्षयंश्वासमरोच
कं जातीफलादिचूर्णं चित्रकं पि
प्पलीमूलं क्षारौ लवणपंचकं ।
व्योषं हिंग्वजमोदां च चव्यं चैकत्र चू
र्णयेत् वटिकामातुलुंगस्य रसे ।
वा दाडिमस्य वा कृता विपाचय ।
त्यामं प्रदीपयति चानलं क्षारौ स
र्जिका यवक्षारश्च लवणपंचक
मिति सैंधवं रुचकं चैव विडं सा
मुद्रकं गडमिति व्योषं शुंठी पिप्प
ली मरिचानि अजमोदा च यवा
निका मातुलुंगबीजपूरकं चित्र
कादिवटिका श्रीफलशलाटुक
ल्कोनागरचूर्णेन मिश्रितः सगुडः
ग्रहणीगदमत्युग्रं तक्रभुजा शी
लितो जयति श्रीफलशलाटुः वि
ल्वस्यामफलं गुडस्याग्रभागाद्वयं
विल्वकल्कः चतुष्पलं तथा का
एरंडत्रिपलं लवणत्रयं वार्त्ताकोः
कुडवं चार्कमूलाद्विल्व तथानला
त् दग्ध्वा द्रवेण वार्त्ताको गुटिका
भोजनोत्तरं भुक्ताभुक्तं पचत्याश्व
नाशयेद्ग्रहणीगदं कासंश्वासं त
थार्शांसि विसूचीं च ह्रुद्रामयं वा
र्त्ताकुगुटिका मस्तकादिचूर्णं वि
ल्व कौटजं सूक्ष्मचूर्णितं मधुना
चसमालीढं ग्रहणीं सर्वजां जयेत् ।
कौटजं इंद्रयवः मस्तकादिचूर्णं
स्वेतोवायदिवारकः सपक्वो ग्रह
णीगदः गुडेनाधिकसर्जेन भ
क्षितेनाश्मनश्यति सर्जः रालः
सर्जरसचूर्णं विल्वाद्ध शाक्रयव
बालकमोचसिद्धमाज्यं पयः पिव
ति यो दिवसत्रयेण सोऽतिप्रवृद्ध
चिरज ग्रहणीविकारं सामं सशो
णितमसाध्यमपि क्षिणोति मो
चो मोचरसः क्षिणोति हन्ति ॥
प्रस्थत्रये ह्यामलकी रसस्य शुद्ध
स्यदत्त्वार्द्धतुलां गुडस्य चूर्णीकृते
ग्रंथिक जीव चव्य व्योषभ कुस्तार
वषाजमोदैः विडंगसिंधु त्रिफला
''वानी पाठाग्नि धान्यैश्च पलप्र
माणैः दत्वा त्रिवृच्चूर्णपलानि च
ष्टावष्टौ च तैलस्य पचेद्यथावत्
तं भक्षयेदक्षफलप्रमाणं यथे
ष्टचेष्टस्त्रिसुगंधियुक्तं अनेन सर्वे
ग्रहणीविकाराः सश्वासकासस्वर
भेदशोथाः शाम्यंति चायं चिरमंतर
ग्नेर्हतस्य पुंस्त्वस्य च वृद्धिहेतुः स्त्री
णां च वंध्यामयनाशनः स्यात् कल्या
णको नाम गुडः प्रसिद्धः तैलमता
कुचित्रकस्तु त्रिसुगंधि पलं पलं ।
सिद्धे निधेयमत्रैव गुडे कल्याण ॥

पूर्वके कल्याणकगुडः ॥ पिप्पली
पिप्पलीमूलं चित्रकं गजपिप्पली
धान्यकं च विडंगानि यवानी म
रिचानि च त्रिफला चाजमोदा च न
लिनी जीरकद्वयं सैंधवं रोम
कं चापि सामुद्रं रुचकं विडं आ
रग्वधश्च त्वक्पत्रं सूक्ष्मैला चोप
कुंचिका शुंठी शक्र यवाश्चैव प्रसे
कं कर्षसंमिताः मृद्वीकायाः प
लान्यत्र चत्वारिंशन्मितानि हि त्रिवृ
तायाः पलान्यष्टौ गुडस्यार्द्ध तुला
तथा तिलतैल पलान्यष्टौ वाम
लक्या रसस्यात्र प्रस्थत्रयमिदं स
वैशनैर्मृद्वग्निना पचेत् उदुंबरे
वामलकं वादरं वा यथाफलं ता
वन्मात्रमिदं खादेद्दस्तये ह्यपथ्यान
ले निखिलान् ग्रहणीरोगान्मम
हांश्चैव विंशतिं । उरोघाते प्रति
श्यायं दौर्वल्यं वह्निसादयं ज्वरा
नपि हरेत् सर्वान् कुष्ठान् कांतिं
मतिं स्वरं पिचुपाठान्वयाहं तिर
क्तपित्तं च विद्रधं ह धातुक्षीणे व
यक्षीणः स्त्रीषु क्षीणः क्षयी च यः
तेभ्यो हितश्च वंध्यायै महाकल्या
णकोगुडः महाकल्याणकगुडः
कूष्माण्डानां सुपक्वानां छिन्नानां
निष्कुलत्वचां । सर्पिः प्रस्थे पल
शतं ताम्रपात्रे शनैः पचेत् ॥
पिप्पली पिप्पलीमूलं चित्रकं ग
जपिप्पली धान्यकानि विडंगानि
नागरं मरिचानि च त्रिफला वाज
मोदा च कलिंगाजाजिसैंधवं प
कैकस्य पलं चैकं त्रिवृतोऽष्टौ प
लानि च तैलस्य च पलान्यष्टौ
गुडात् पंचाशदेव तु आमलक्या
रसस्यात्र प्रस्थत्रयं मृदौ दिनं ता
वत् पाकं प्रकुर्वीत मृदुना वह्नि
नाभिषक् यावद्दर्वी प्रलेपः स्या
त्तद्देनमवतारयेत् उदुंबरं चाम
लकं वादरं वा यथा फलं तावन्मा
त्रमिदं खादेद्दृत्येद्वा यथानलं
अनेनैव विधानेन मधुकश्च दि
ने दिने निहंति ग्रहणीरोगान्
कुष्ठान्यर्शो भगन्दरान् ज्वरमाना
हहृद्रोग गुल्मोदर विसूचिकाः
कामलांपांडुरोगांश्च प्रमेहांश्चैव
विंशतिं वातशोणितवीसर्पद
द्रुयक्ष्मह लीमकान् वातपित्त
कफान् सर्वान् कुष्ठान् कृच्छ्रान्
समाचरेत् आधिक्षीणा वयः क्षी
णाः स्त्रीषु क्षीणाश्च ये नराः तेभ्यो
हितो गुडोऽयं स्याद्वंध्यानामपि ।
पुत्रदः वृष्यो बल्यो हरणश्च वय
सः स्थापनः परः कूष्माण्डकल्या



णकगुडः अतीसारादिकार लि
खितेविल्व तैलंचात्र हितं इति भा
वप्रकाशे ग्रहणीरोगाधिकारः।
प्रवाही स्त्री वाहुका इति राज।
निर्घण्टः॥
प्रवाहुः पुं ऊर्ध्वस्याधोभागः य
था मरवेवाहु प्रवाहुच मनःसर्वे
न्द्रियाणि च। रत्न त्वमाह तेस्यर्थ्य
स्तवनारायणोऽव्ययः इति विस्नु
पुराणे ५अंशे ५अध्यायः॥
प्रवाहुकम् अ समानकाले ऊ
र्द्धार्थे प्रवाहिकेति पाठान्तरं इ
ति कौमुदीटीका तत्ववोधिनी।
प्रविख्यातिः स्त्री अतिप्रसिद्धिः
तत्पर्य्यायः विश्रावः २ इत्यमरः
प्रविदारणं क्ली युद्धं इत्यमरः।
अवदारणं इति मेदिनी आकी
र्णे इति शब्दरत्नावली॥
प्रविरः पुं पीतकाष्ठं इति शा
ब्दचंद्रिका॥
प्रविश्लेषः पुं प्रकृष्टविश्लेषः
तत्पर्य्यायः विधुरं २ इत्यमरः
विकलं यथा वैकल्ये ऽपिच।
विश्लेष विधुरं विकले त्रिष्विति
भरतधृतत्रिकाण्डशेषः॥
प्रविषा स्त्री अतिविषा इत्यमरः
प्रविष्टः त्रि प्रवेशविशिष्टः यथा

सतं प्रविष्टं हृतमानतापिभि र्भ
दैरनेकैरवलोकमाधवः इति।
श्रीभागवते वाणयुद्धे ६२ अध्यायः
प्रवीणः त्रि प्रकृष्टवेत्रियः तत्प
र्य्यायः निपुणः २ अभिज्ञः ३
विज्ञः ४ निष्णातः ५ शिक्षितः ६
वैज्ञानिकः ७ कृतमुखः ८ कृती ९
कुशलः १०। इत्यमरः॥
प्रवीरः पुं सुभटः उत्तमे त्रि इ
ति धरणिः॥
प्रवृत्तः त्रि प्रवृत्तिविशिष्टः यथा।
प्रवृत्त एव स्वयमुज्झितश्रमः क्र
मेणपेष्टुं भुवनद्विषामपि तथापि
वाचालतया पुनक्ति मो मिथस्त
दाभाषण लोलुपं मनः इति माघ
प्रथमसर्गः आरम्भः यथा प्रवृ
त्तमन्यथा कुर्यात् यदि मोहात् क
थंचन यत स्तदन्यथा भूतं तत
एव समापयेत् इति छंदोगपरि
शिष्टं प्रकृष्टवर्त्तनविशिष्टश्च॥
प्रवृत्तिः स्त्री प्रवाहः उदंतः प्रव
र्त्तनं अवंत्यादिदेशः इति मेदिनी
हस्तिमदः इति हेमचंद्रः॥
न्यायमते यत्नविशेषः अस्याः
कारणं चिकीर्षा कृतिसाध्यताज्ञा
नं इष्टसाधनताज्ञानं उपादानप्र
त्यक्षं यथा प्रवृत्तिश्च॥।

निवृत्तिश्च तथा जीवन कारणं।
एवंप्रयत्नत्रैविध्यं तान्त्रिकैः परि
दर्शितं चिकीर्षा कृतिसाध्येष्ट
साधनत्व मतिस्तथा उपादानस्य
चाध्यक्षं प्रवृत्तौ जनकं भवेत्।
इति भाषापरिच्छेदः॥
प्रवृत्तिज्ञः पुं चारभेदः तत्पर्य्यायः
वार्त्तिकः २ वार्त्तायनः ३ इति त्रि
काण्डशेषः॥
प्रवृद्धः त्रि वृद्धियुक्तः तत्पर्य्यायः
प्रौढः २ एधितः ३ प्रसारितः ।
तत्पर्य्यायः प्रसृतः २ इत्यमरः
प्रवेकः त्रि उत्तमः प्रधानं इत्य
मरः॥
प्रवेटः पुं यवः इति त्रिकाण्ड।
शेषः॥
प्रवेणिः स्त्री कुथः वेणी। इति
मेदिनी॥
प्रवेणी स्त्री वेणी गजपृष्ठस्य।
चित्रकम्बलं इत्यमरः॥
प्रवेलः पुं पीतमुद्गः इति हेम
चंद्रः॥
प्रवेशः पुं अन्तर्विगाहनं इति
हेमचंद्रः॥
प्रवेशनं क्ली सिंहद्वारं इति हेम
चंद्रः प्रवेशश्च॥
प्रवेष्टः पुं वाहुः इत्यमरः वाहुः

नीचभागः इति शब्दचंद्रिका॥
हस्तिदंतमांसं इति हारावली।
गजपृष्ठतल्पं इति त्रिकाण्ड
शेषः प्रव्यक्तं त्रि स्फुटं इत्यमरः
प्रव्रजितः पुं बुद्धभिक्षुशिष्यः
तत्पर्य्यायः चेलकः २ श्रामणे
रः ३ महापाशकः ४ गोमी ५ इति
त्रिकाण्डशेषः प्रव्रज्याश्रमवि
शिष्टः प्रव्रजिता स्त्री मांसी मुंडी
रीतापसी इति मेदिनी॥
प्रव्रज्या स्त्री संन्यासः प्रपूर्वव्रज
धातोर्भावेक्यप् प्रत्ययः अस्य प्र
योगः वक्ष्यमाणश्लोके द्रष्टव्यः।
प्रव्रज्यावसितः पुं संन्यासभ्रष्टः
यथा नवाह मित्युपगतः प्रव्रज्या
वसितः कृतः इति दायभागवचन
व्याख्यायां कर्मसंग्रहः॥
प्रशंसा स्त्री प्रशंसनं तत्पर्य्यायः
वर्णना २ ईडा ३ स्तवः ४ स्तोत्रं ५
स्तुतिः ६ नुतिः ७ श्लाघा ८ अर्थ
वादः ९ इति हेमचंद्रः आत्मप्रशं
सा निषेधो यथा न चात्मानं प्रशं
सेद्वा परनिन्दांच वर्जयेत् वेद
निंदां देव निंदां प्रयत्नेन विव
र्जयेत् इति कौर्म्मे उपविभागे ९
अध्यायः॥
प्रश्रमः पुं शामता उपशामः यथा




एतानि दशपापानि प्रश्रमं यांत
जाकृवि इति तिथ्यादितत्त्वं ॥
प्रशमनं क्ली मारणं वधः इति
हेमचंद्रः शमनं प्रशान्तिः ।
यथा सर्वाबाधाप्रशमनं त्रैलो
क्यस्याखिलेश्वरि एवमेव त्वया
कार्य्यमस्मद्वैरि विनाशनं इति
मार्कण्डेयपुराणं ॥
प्रशस्तं त्रि क्षेमं इति शब्दरत्ना
वली प्रशंसनीये अतिश्रेष्ठे इ
ति मल्लिकादिशब्दटीकायां ।
भरतः ॥
प्रशान्त म त्रि प्रकर्षेण शाम्यति
यः प्रशान्तः इति मुग्धबोधव्याकर
णं प्रशान्तः त्रि प्रकृष्टशमतावि
शिष्टः यथा प्रशान्तस्यापदाकी
र्णोमुनिशिष्यो प्रशोभितं इति मा
र्कण्डेयपुराणं ॥
प्रशास्ता रे त्रि ऋत्विक् भित्रे इति
संक्षिप्तसारोणादिवृत्तिः शास ।
नकर्त्ता च ॥
प्रश्नः पुं जिज्ञासा तत्पर्य्यायः ।
अनुयोगः २ पृच्छा ३ इत्यमरः
प्रश्नदूती स्त्री प्रहेलिका इति ।
त्रिकाण्डशेषः ॥
प्रश्नी स्त्री ऊर्म्मिका इति त्रिका
ण्डशेषः ॥

प्रश्रयः पुं प्रणयः इत्यमरः
प्रश्रितः त्रि विनीतः इत्यमरः
प्रश्लथः त्रि शिथिलः इति त्रि
काण्डशेषः ॥
प्रष्टा र्ष त्रि प्रश्नकर्त्ता तत्पर्य्या
यः कथंकथिकः २ इति त्रिका
ण्डशेषः प्रष्ठः त्रि अग्रगामी इ
त्यमरः प्रष्ठवाह् पुं युगपार्श्वगः
इत्यमरः शिक्षार्थंयुगवाहिपार्श्व
योजितः इति भरतः योजितयुग
पार्श्वदमनार्थं यद्धालिका श्राम
येतिसः इति मधुः युवागो दम
नाय योजितः इत्यन्ये ॥
प्रष्ठी स्त्री प्रष्ठभार्य्या अग्रगामिप
त्नी इति जटाधरः ॥
प्रष्ठौही स्त्री बालगर्भिणी प्रथ
मगर्भवती गौः प्रष्ठं प्रथम
गर्भं वहति या सा बाला सती
गर्भिणी प्रथमगर्भसमर्था इति
भरतः प्रस म ङ ष प्रसवे ततो
इति कविकल्पद्रुमः ॥
प्रसक्तं क्ली नित्यं इति जटाधरः
तद्वति त्रि ॥
प्रसक्तिः स्त्री प्रसंगः अनुमितिः
व्याप्तिः इति सव्यभिचार शि
रोमणिः ॥ ॥
प्रसंगः पुं संगतिविशेषः यथा

स प्रसंग उपोद्घातो हेतुतावसर ।
स्तथा निर्वाहकैककार्य्यत्वे षो
ढा संगतिरिष्यते । तस्य लक्षणं
स्मृतस्योपेक्षानर्हत्वं । तदर्थस्तु
स्मृति विषयतापन्नत्वे सति द्वेषवि
षयतानापन्नत्वं इत्यनुमितिग्र
न्थे गदाधर भट्टाचार्य्यः अन्योद्द
शेन प्रवृत्तावन्यस्यापि सिद्धिः
यथा दृष्टा न हरते पापं स्पृष्टा
न त्रिदिवे नयेत् प्रसंगेनापिया
गंगा मोक्षदा ह्यवगाहिता ॥
इति प्रायश्चित्ततत्त्वं ॥ प्रसक्तिः
यथा आनीता भवता यदा प
तिरता साध्वी धरित्री सुता स्फूर्ज
द्वास मायया न च कथं रामो
गमं गीकृते कर्णचेतसि [illegible] क
नयने दूर्वादलश्यामलं तत्केव
लपदं भवेत् परवधूसंगप्रसंगः
कृतः इति नाटके ॥ प्रस्तावः ॥
यथा तत्रैव गंगा यमुना च तत्र
गोदावरी तत्र सरस्वती च सर्वा
णि तीर्थानि वसंति तत्र यत्राच्युतो
दारकथाप्रसंगः इति पौराणि
काः मैथुनं यथा प्रसंगनित्य
कृतप्रष्ठयानादिति कृतिनिष्ठ
य वचनटीकायां विजयरक्षितः
प्रसत्तिः स्त्री प्रसन्नता नैर्मल्य

इति जटाधरः ॥
प्रसत्वरी स्त्री प्रतिपत्तिः इति सं
क्षिप्तसारोणादिवृत्तिः ॥
प्रसत्वा न पुं धर्मः प्रजापतिः इति
संक्षिप्तसारोणादिवृत्तिः ॥
प्रसन्नः त्रि निर्म्मलः तत्पर्य्यायः ।
अच्छः २ इत्यमरः संतुष्टः इति
मेदिनी ॥
प्रसन्नता स्त्री प्रसन्नस्य भावः त
त्पर्य्यायः प्रसादः २ इत्यमरः प्रसन्ना स्त्री सुरा इत्य
मद्यविशेषः तस्य गुणाः प्रसन्ना
गुल्मवातार्शोविबंधानाहनाशिनी
शूलप्रवाहिकाटोप कफवातार्शसां
हिता इति राजवल्लभः प्रसाद वि
शिष्टा यथा सैषा प्रसन्ना वरदा नृ
णां भवति मुक्तये इति चण्डी ।
प्रसन्नेरा स्त्री मदिरा इत्यमर ।
टीकायां भरतः ॥
प्रसभः पुं बलात्कारः इत्यमरः
प्रसरः पुं तंतुव्रणविटपादेर्विस
र्पणं प्रकर्षेण निकटे सरणं स
र्पणं तत्पर्य्यायः विसर्पः २ इत्यम
रभरतौ प्रणयः वेगः इति मे
दिनी समूहः इति शब्दरत्नावली
युद्धं इति विश्वः नाराचः ॥ इति
भूरिप्रयोगः ॥



प्रसरणं क्ली सैन्यानां सर्वतो व्याप्तिः तत्पर्य्यायः आसारः २ इत्यमरः ॥ प्रसरणी ३ प्रसरणिः ४ प्रसारणी ५ इति रामाश्रमः सैन्यानां तृणकाष्ठादि हेतवे इतस्ततो गमने इति हेमचन्द्रः ॥

प्रसरणी स्त्री प्रसरणं इत्यमर। टीकायां भरतः ॥

प्रसर्पणं क्ली गमने प्रसरणे प्रपूर्व सृपधातोर्भावेऽनट्प्रत्ययः

प्रसवः पुं गर्भमोचनं तत्पर्य्यायः प्रसूतिः २ इत्यमरः उत्पादः अपत्यं फलं कुसुमं इति मेदिनी प्रसवस्य मासनियमो यथा ॥ नवमे दशमे मासि नारी गर्भं। प्रसूयते एकादशे द्वादशे वान्यतोऽन्यत्र विकारतः इति भावप्रकाशः ॥ प्रसूतिकारकौषधादि यथा पीतेन कांजिकेनुद्धृत्य तेनाथ पुंखया हिंगुसैंधवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥ मातुलुंगस्यैव मूलं कटिबद्धं प्रसूतिकृत् अपामार्गस्यैव मूलं योनिस्थं च प्रसूतिकृत् अपामार्गस्यैव मूले गर्भवत्यास्तु नाभितः उत्पाद्यमाने सकले पुत्रः स्यादन्यथा सुता अपामार्गस्यैव मूले ॥

नारीणां शिरसि स्थिते गर्भशूले विनश्यति नात्र कार्य्या विचारणा इति गारुडे १९६ अध्यायः ॥ अपिच पाठालांगलिसिंहास्यमयूरकजटैः पृथक् नाभिवस्तिभगालेपात् सुखं नारी प्रसूयते ॥ पाठायास्तु शिफा योनौ या नारी संप्रधारयेत् उषःप्रसवकाले तु सा सुखेन प्रसूयते तथाम्बु पदि पिष्टेन मूलेन परिलेपयेत् लांगल्याश्चरणौ सूतेऽतिप्रमेतेन गर्भिणी मातुलुंगस्य मूलानि मधुकं मधुसंयुतं घृतेन सह पातव्यं सुखं नारी प्रसूयते इति चक्रपाणिदत्तः ॥ सुखप्रसवमंत्रो यथा अस्ति गोदावरीतीरे जम्भला नाम राक्षसी तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् सुखप्रसवचक्रं यथा पंचरेखाः समालिख्य तिर्य्यगूर्द्धक्रमेण हि पदानि षट्दशाद्यास्त्वेकमाद्यमनोत्रये नवमे सप्त दद्यात्तु वामे पंचदशे तथा द्वितीये चाष्टमे षट् दिशि द्वौ षोडशी क्रमतिः एकादिना समन्तेय मिदं काकुद्द त्रिकोणके तदा द्वात्रिंशदादिः साचेतस्कोष्ठेषु सर्वतः दर्शनाद्धारणा तोसंप्रभवेत्स्यादेष कर्मसु।

द्वात्रिंशत् प्रसवे नार्य्या अन्तस्थिशङ्कमे नरणं भूताविष्टेषु पंचाशान्तनापन्यासु वै शाते द्वासप्ततिस्तु वैध्याया चतुःषष्टी रणाधुनि विषे विंशो धान्यकीटेषु षड्विंशति रेव च चतुरष्टौ च वालानां रोदने परिकीर्त्तिताः इति ज्योतिस्तत्वं तस्यैव कृतं। यथा गर्ग उवाच अकालप्रसवा नार्य्यः कालातीत प्रजास्तथा विकृत प्रसवाश्चैव युग्मप्रसवनास्तथा अमानुषा अवं। डाश्च नजातव्यंजना तथा ॥ हीनांगा अधिकांगाश्च जायेते यदि वा स्त्रियः पशवः पक्षिणश्चैव तथैव च सरीसृपाः विनाशंतस्य देशस्य कुलस्य च विनिर्दिशेत् निर्वासये तोन्नृपतिः स्वराष्ट्रात् स्त्रियश्चैव एवम्प्रसवतो द्विजेन्द्राः किमिच्छकैर्ब्राह्मणतर्पणं च लोके ततः शान्तिमुपैति पापं इति मात्स्य अद्भुतशान्ति स्त्रीप्रसवविकृतो नाम २०९ अध्यायः प्रसवाद्भुतं च। यथा एकोदरषस्त्रयो गावः समास्त्रा नवदेतिनः सिंहप्रसूतिकाश्चैव कथिताः स्वामिघातकाः तिस इति वक्तव्ये द्वादशमासान् इत्थं सकं सिंहप्रसूता श्च स्त्रियो वाध्याः

भानौ सिंहगते चैव यस्य गौः संप्रसूयते। मरणं तस्य निर्दिष्टं षड्भिर्मासै र्न संशयः अत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभं प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः आहुतीनां घृताक्तानां मधुना जुहुयात्ततः व्याहृतिभिश्चायं होमः सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणां अपिच सिंहराशिगते सूर्य्ये गोप्रसूति र्यदा भवेत् पौषे च महिषी सूते दिवा अश्वतरी तथा तदानिष्टं भवेत् किंचित् तच्छान्त्यै शान्तिकं चरेत् अस्य वामेति सूक्तेन तद्विष्णो रिति मन्त्रतः जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकं मृत्युंजय विधानेन जुहुयाच्च तथा घृतं श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः इत्यद्भुतसागरे नारदः ॥

प्रसवकः पुं पियालवृक्षः इति शब्दमाला ॥

प्रसवबन्धनं क्ली वृन्तं इत्यमरः

प्रसवस्थली स्त्री माता यथा ॥ इयमियं मयदानव नन्दिनी त्रिदशनाथ जितः प्रसवस्थली इति महानाटकं ॥ ॥



प्रसविता [२] पुं पिता इति शब्दरत्नावली ॥

प्रसवित्री स्त्री जनयित्री माता प्रपूर्वक सूधातोः कर्त्तरि तृन् ईप् च

प्रसव्यं त्रि प्रतिकूलं इत्यमरः ।

प्रसहः पुं बलात्कारेण भक्षकपक्षी स च कुररश्येनादिः यथा । प्रसह्य भक्षयन्त्येते प्रसहास्तेन कीर्त्तिताः । प्रसहमांसगुणाः । गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः इति राजवल्लभः । अपिच काकोगृध्र उलूकश्च चिल्लश्च शशघातकः चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः शशघातकः वाज इति लोके प्रसहाः कीर्त्तिता एते प्रसह्य छित्वा भक्षणात् प्रसहाः खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि इति भावप्रकाशः ।

प्रसहनः पुं हिंस्रपशुः यथा । शार्दूलसिंहप्रारभर्कतरक्षुऋक्षा यस्मात् प्रसह्य विनिहत्य निवर्त्तयन्ते ते कीर्त्तिताः प्रसहनाः पललं तदीयमर्शःप्रमेहजठरामयक्ष्महारि इति राजनिर्घण्टः ।

प्रसहनं क्ली यथा परस्परप्रसहनचुम्बनादिकाः शृङ्गारसुखे बहुलविधाभिदा मताः इति काव्यप्रकाशटीकाधृतकौमुदी सहने क्ली नहति त्रि ।

प्रसहा स्त्री बृहतिका इति रत्नमाला प्रसह्य अव्य हठार्थके बलात्कारार्थे इत्यमरः ॥

प्रसह्यचौरः पुं हठात्चौर्य्यकारी डाकाइत इति ल्टेरा इति च भाषा तत्पर्य्यायः वंदीकारः २ मावलः ३ विलाभः ४ इति त्रिकाण्डशेषः प्रसातिका स्त्री अणुव्रीहिः सूक्ष्मधान्यं इति रत्नमाला

प्रसादः पुं प्रसन्नता नैर्मल्यं इत्यमरः अनुग्रहः काव्यगुणः ॥ स्वास्थ्यं प्रसक्तिः इति मेदिनी ॥ वैदर्भीरीतियुक्तकाव्यगुणः तल्लक्षणं ग्राम्यशब्दभिन्नव्यक्तार्थपदत्वं यथा ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः गौडवैदर्भपाञ्चाली रीतयः परिकीर्त्तिताः व्यक्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः इति काव्यचन्द्रिका देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषश्च यथा स्वामी हृष्टः प्रजाराजा प्रजापालनतत्परः प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप

सः इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा ॥

प्रसादनं क्ली अन्नं इति त्रिकाण्डशेषः प्रसन्नताकारकं यथा बलवर्णप्रसादनमिति राजवल्लभः

प्रसादना स्त्री सेवा परिचर्य्या इत्यहेमचन्द्रः ॥

प्रसाधनं क्ली वेशः इत्यमरः । कंकतिका इति भरतधृतामरमाला प्रकृष्टनिष्पत्तिश्च ॥

प्रसाधनी स्त्री कंकतिका इत्यमरः सिद्धिः इति मेदिनी ॥

प्रसाधिका स्त्री नीवारः । यथा । प्रसाधिका तु नीवारस्तृणधान्यमिति स्मृतं प्रसाधिकागुणाः नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् इति भावप्रकाशः वेशकारिणी यथा प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव । इति कुमारसम्भवे सप्तमः सर्गः

प्रसाधितः त्रि अलंकृतः इत्यमरः प्रकृष्टनिष्पन्नः निष्पादितः यथा ततः प्रस्थमितं कल्कं दत्वा तोयचतुर्गुणे क्षीरे प्रसाधितं तैलं गृह्णं च बलवर्णकृत् इति सारसंग्रहः ॥

प्रसारः पुं प्रसरणं इति हेमचन्द्रः ॥ ॥

प्रसारणं क्ली पञ्चविधकर्म्मान्तर्गतकर्म्मविशेषः तत्तु विस्तारस्वरूपः यथा उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा प्रसारणं च गमनं कर्म्माण्येतानि पञ्च च इति भाषापरिच्छेदः ॥

प्रसारणी स्त्री लताविशेषः गंधभादालिया इति भाषा अस्या गुणाः वातपित्तनाशित्वं उष्णत्वं बलशुक्रकारित्वं च इति राजवल्लभः सैन्यानां सर्वतो व्याप्तिः इति प्रसरणशब्दटीकायां भरतः

प्रसारिणी स्त्री लज्जालुलता प्रसारिणी गंधभादालिया इति भाषा तत्पर्य्यायः सुप्रसरा १ सारिणी २ प्रसरा ३ सरा ४ चारुपर्णी ५ राजवला ६ भद्रपर्णी ७ प्रतानिका ८ प्रवला ९ राजपर्णी १० चैरूपर्णी ११ भद्रवला १२ चंद्रवल्ली १३ प्रभद्रा १४ अस्या गुणाः गुरुत्वं उष्णत्वं तिक्तत्वं वातार्शःश्वयथुमलविष्टम्भनाशित्वं च इति राजनिर्घण्टः ॥ १५

प्रसारी त्रि प्रसरणशीलः तत्पर्य्यायः विसृत्वरः १ विसृमरः २ विसारी ३ इत्यमरः प्र[illegible] सि ते क्ली श्रेयं इति शब्दचं[illegible] द्रिका मांसके त्रि इत्यमरः ॥ ।



प्रसितिः स्त्री बंधनसाधनरज्जनि
गडादिः इत्यमरः ॥
प्रसिद्धः त्रि भूषितः ख्यातः इ
ति मेदिनी ॥
प्रसिद्धिः स्त्री टंकारः ख्यातिः
इति त्रिकाण्डशेषः भूषा इति
प्रसिद्धशाहार्थदर्शनात् ॥
प्रसूः स्त्री माता घोटकी इत्य
मरः कदली वीरुत् इति मे
दिनी ॥
प्रसूका स्त्री वाजिनी इति रा
जनिर्घण्टः ॥
प्रसूनं क्ली कुसुमं इतिमेदिनी
प्रसूनः त्रि संजातः सूतः इति
मेदिनी ॥
प्रसूता स्त्री जातसंताना तत्प
र्य्यायः जातापत्या २ प्रजाता ३
प्रसूतिका ४ इत्यमरः ॥
प्रसूतिः स्त्री प्रसवः इत्यमरः
उद्भवः तनयः दुहिता इति
मेदिनी ॥
प्रसूतिका स्त्री प्रसूता इत्य
मरः प्रसूतिजं क्ली दुःखं इ
त्यमरः प्रसूनं क्ली पुष्पं।
फलं इत्यमरः जाते त्रि।
इति मेदिनी प्रसूनेषुः पुं
कामदेवः इति त्रिकाण्डशे
षः ॥

प्रसृतं क्ली पलद्वयं इतिशब्दमा
ला प्रसृतः पुं निकुब्जपाणिः अ
र्द्धांजलिः इत्यमरः ॥
प्रसृतः त्रि प्रहृष्टः प्रसारितः इ
त्यमरः विनीतः वेगितः इति
मेदिनी गतः इति त्रिकाण्डशेषः
नियुक्तः इति हलायुधः ॥ प्र
सृता स्त्री जंघा इति मेदिनी ॥
प्रसृतिः स्त्री प्रसृतः आकुंचित
पाणिः इतिरायमुकुटः राजनि
र्घण्टश्च प्रसेकः पुं सेचनं च्यु
तिः इति मेदिनी ॥
प्रसेदिका स्त्री क्षुद्रारामः इति
हेमचंद्रः ॥
प्रसेदिवान् त्रि प्रसन्नः प्रपूर्व
सदे तोः कर्त्तरिक्वसुप्रत्ययनि
ष्पन्नः प्रसेवः पुं वीणांगं स्यूतः
इति मेदिनी ॥
प्रसेवकः पुं वीणाप्रान्तवक्रका
ष्ठं दण्डाधःशब्दगाम्भीर्य्यार्थंदा
रुमयं भाण्डंचर्म्मणाच्छाद्य
दीयतेसः इत्यन्ये वीणास्थितालाबुफलं इत्यपरे इतिभरतः तत्प
र्य्यायः ककुभः २ इत्यमरः ॥
सूत्ररचितभाण्डं थोकडा इतिख्या
तः तत्पर्य्यायः स्यूतः २ स्योतः
४ थौनकटः ४ स्योतः ५ ॥

स्यूतः ६ इतिभरतः प्रकृष्टतंतु
संतानकर्त्ता च ॥
प्रस्कंदनं क्ली विरेकः इतिरत्न
माला ॥
प्रस्कन्नः पुं ऋषिविशेषः सच
वैदिकसंध्यान्तर्गतसूर्य्योपस्था
नमंत्रस्यऋषिः पतितेत्रि इति।
हेमचंद्रः ॥
प्रस्तरः पुं प्रस्तृणाति आच्छाद
यतिइयः पाथर इतिभाषा तत्प
र्य्यायः ग्रावा २ पाषाणः ३ उपलः
४ अश्मा ५ दृषान् ६ दृषत् ७ पा
षाणकः ८ पारटीटः ९ मतकः
१० काचकः ११ शिला १२ पल्लवा
दिरचित शय्या यथा पल्लवाद्य
भिरीचते शयनीयेन संस्तरः प्र
स्तरः प्रस्तिरश्चेति प्रस्तारोऽपिच
कुत्रचित् इतिशब्दरत्नावली म
णिः इति मेदिनी ॥
प्रस्तरिणी स्त्री गोलोमिका इति
राजनिर्घण्टः ॥
प्रस्तारः पुं तृणवनं तत्पर्य्यायः
तृणाटवी २ ऋषः ३ इतिहेमचंद्रः
पल्लवादिविरचितशयनीयं इ
ति शब्दरत्नावली शय्या। इति।
हारावली छंदः प्रभृतीनां प्रभे
द ज्ञापक संकेत विशेषः ॥

यथा पादे सर्वगुरावाद्यात् लघु
न्यस्य गुरो रधः यथोपरितथा
शेषं भूयः कुर्य्यादमुं विधिं ऊने
दद्याद्गुरूनेव यावत् सर्वे लघु
र्भवेत् प्रस्तारोऽयं समाख्यातः
छंदोविचितिवेदिभिः इतिवृत्त
रत्नावली ॥ अपिच अह पत्था
र पढम गुरु हेट्ठ ठाण लहु
आ परिठवड अप्प बुद्धीप।
सरिसा सरिसा पंती उव्वरिआ गु
रुलहू देहु अमरटीका पतद्भेद
ज्ञानं प्रस्तारं दर्शयति प्रथम गु
रोरधः स्थाने लघुकं स्थापयअ
मबुद्ध्या सदृशी सदृशी पंक्ति
रुद्धृतो गुरुलघु देहि सदृशी पं
क्तिर्दक्षिणे कार्य्या वामे गुरुल
घुभिः पूरणं कार्य्यं इदंतु मात्रा
प्रस्तारविषयं तत्रापि गुरो र्लिख
न यावत्पतेत् गुरु र्लेख्यः अपरत्र
लघु र्देयः वर्णप्रस्तारे तु गुरुणे
व पूरणं कार्य्यं तत्राय प्रकारः प्र
दौ गुरुर्लेख्यः तत्र प्रथमं गुरोर
धः स्थाने लघु र्लेख्यः तदक्षि
णे चोपरिस्थितपंक्तेः सदृशी
कार्य्या वामे च गुरु लघुभिः पू
रणं कार्य्यं वामे चैक एक ।
लघुः पतति वर्णप्रस्तारेतु ॥



वामे लघुस्पर्शो नास्ति यथा त्रि
कल प्रस्तारे ऽऽ प्रथम गुरो र
धो लघु दीयतश्च कलार्द्ध ऽऽ
णे गुरुरेव कार्य्यः दक्षिणे च पं
क्त्यभावः ततो गुरो रधो लघुर्लेख्यः
दक्षिणे च लघो रधो लघुर्लेख्यः
वामे च कला पूरणं एकेन ल
घुना कार्य्यं एवं चतुष्कला ऽऽ
दावपि बोध्यं यथा अहारच्छेद
सि ऽऽ एवमन्यत्रापि बोध्यं अथ
सकलप्रस्तारसंख्या दवीसास
तसग्रानइं सत्तावह सहजइं वा
यालिसह लक्खं तेरहकोडीस
मग्गाइं अस्यटीका अत्रैकाक्ष
रमारभ्य षड्विंशत्यक्षरं वर्णोद्द
ष्टानां प्रस्तारे कियती संख्येत्य
तआह १३४२१७७२६ षड्विंशतिः
समस्ता तानि तथा सप्तदशसह
स्राणि द्विचत्वारिंशल्लक्षा त्रयो
दशकोट्यः समग्राणि अंकस्य
वामागति निरूपकाः स्थाप्याः इति
पिंगलः श्रीत्रबोधभूषणश्च ॥
प्रस्तार्य्यर्म्म स्त्री नेत्ररोगभेदः ।
तस्य लक्षणं प्रस्तार्य्यर्म्म तनुस्ती
र्णश्यावं रक्तनिभं सिते इति माधव
करः अपिच समन्ताद्विस्तृतः श्यावो
रक्तो वा मांससञ्चयः सन्निपातेन।
दोषाणां प्रस्तार्य्यर्म्म तदुच्यते इति
रक्षितधृत निमिः तस्यौषधं कत
कस्यफलं शंखत्र्यूषणं सैन्धवा
नि फेनो रसाञ्जनं क्षौद्रं विडंगा
नि मनःशिला कुक्कुटाण्डकपा।
लानि वर्त्तिरेषा व्यपोहति ति
मिरपटलकाचमर्म्मशुक्लं तथैव
च कण्डूक्लेदार्बुदं हन्ति मलमा
प्रस्त्रावती इति चक्रपाणि
दत्तः प्रस्तावः पुं अवसरः इत्यमरः
प्रसंगस्तुतिः इति भरतः ॥ प्रसं
गः इति भानुदीक्षितः प्रकरणं
यथा प्रस्ताव देश कालादे र्वै
शिष्टात् प्रतिभाजुषां इत्या
र्ष काव्यप्रकाशः ॥
प्रस्तावना स्त्री आरम्भः इति जटा
धरः सूत्रधारेण सह नटी विदूष
कादीनां परस्परविचित्रभाषणं
तस्या लक्षणं नटी विदूषको वापि
पारिपार्श्विक एव वा सूत्रधारेण स
हिताः संलापं यत्र कुर्वते चित्रैर्वा
क्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपि
भिर्मिथः आमुखं तत्तु विज्ञेयं ना
म्ना प्रस्तावनापि सा इति सा
हित्यदर्पणः ॥
प्रस्तिरः पुं पल्लवादिरचितशय्या
इति शब्दरत्नावली ॥

प्रस्तीतः } त्रि संहतः ध्वनितः प
प्रस्तीमः } पूर्व स्त्यैधातोः कर्म्मणि
क्तप्रत्ययः इति मुग्धबोधव्याकरणं
प्रस्तुतः त्रि प्रकरणप्राप्तः यथा।
अप्रस्तुतप्रशंसा सा या चैव प्रस्तु
ताश्रया इति काव्यप्रकाशः ॥
प्राकरणिकः प्रासंगिकः इत्य
लंकारकौस्तुभः निष्पन्नः यथा
प्रस्तुत श्चेन्मे यह अत्र प्रस्तुतं
अन्नमयं यवागूः प्रस्तुता यवागू
मयी इति कलापतद्धितः प्रक
र्षस्तुतियुक्तः प्रपूर्व स्तुधातोः।
कर्म्मणि क्तः उपस्थितः प्रतिपन्नः
उद्युक्तः इति लोकव्यवहारद
र्शनात् ॥
प्रस्तृतः त्रि अन्तरितः इति त्रि
काण्डशेषः ॥
प्रस्थः पुं परिमाणविशेषः स्त
चतः कुडवचतुष्टयः इत्यमर भरतौ
आढकचतुर्थांशः इति लीला
वती द्विशरावपरिमाणं इति वै
द्यकपरिभाषा ॥
प्रस्थः पुं क्ली अद्रेः समभूभागः
अद्रेरेकदेशः इति भरतः ॥
तत्पर्यायः स्नुः २ सानुः ३ इत्य
मरः उन्मितवस्तु इति मेदिनी
विस्तारः यथा दीर्घं प्रस्थ समा
नेच न कर्ष्यान्मेदिनीबुधः इ
ति ब्रह्मवैवर्ते जन्मखण्डे ८३ अ
ध्यायः प्रकृष्टस्थितिविशिष्टे
त्रि प्रस्थपुष्पः पुं तरुवकः इ
त्यमरः स्वल्पपत्रतुलसी जंब
भेदः इति केचित् जंबीरसामा
न्य इति केचित् इति तट्टीकायां
भरतः प्रस्थानं क्ली विजिगीषोः
प्रयाणं इत्यमरः गमनमात्रं य
था प्रस्थानतेजोलिपिकाकलनाति
स्त्रितेपठितापेः इत्यादिपद्यांक
हृतः प्रस्थानविघ्नः पुं गमनव्या
घातः यथा यः पुनर्विवाहाव
सरे मंगलवर्त्तिवासरे प्रतिष्ठ
मानस्य ततः प्रस्थानोपयिकेक
र्म्मप्रारम्भाकृत्य तदानीं न करि
ष्यामीति प्रस्थानविघ्नमाचर।
ति तदासौ द्विगुणं भर्त्ते दाप्यः
इति मिताक्षरा ॥ प्रस्थापितः
त्रि प्रेषितः इति हेमचन्द्रः ॥
प्रकर्षेणस्थापितश्च प्रस्थिका
स्त्री अम्बष्ठा इति भावप्रकाशः
प्रस्फुटः त्रि प्रफुल्लः इति श
ब्दरत्नावली ॥
प्रस्फोटनं क्ली सूर्प इत्यमरः ता
उने विकाशने इति मेदिनी ॥
पचनं इति हेमचन्द्रः ॥

प्रस्रवणं क्ली यत्रस्थानेस्रवा
जलंगलति तत् इति भरतः ॥ अ
विच्छेदेन स्रवज्जलं यत्रस्थानेप
ततियत्र निपत्यच वक्रलीभव
ति तत् इति स्वाम्यादयः ॥ गिरेरु
परि निर्झरादि प्रभव जल संस्था
नः इति संज्ञाजः अजस्रं मंदवेगे
न स्रवज्जलं इतिकोकूटः ॥ त
त्पर्य्यायः उत्सः २ इत्यमरः ॥ ज
लप्रस्रावः ३ प्रस्रवणः ॥ प्रस्र
वणजलं स्वच्छं लघुमधुरं रोच
नेच दीपनकृत् इति राजनिर्घंटः ॥
प्रस्रवणः पुं माल्यवत्पर्वतः
इति हेमचंद्रः ॥ स्वेदः इति त्रिकां
डशेषः ॥ प्रकर्षेणस्रवणे क्ली
प्रस्रावः पुं मूत्रं इत्यमरः ॥ गौ
प्रस्राव माहात्म्य यथा प्रस्रावे
ण तु यः स्नायात् रोहिण्यां मा
नवोद्विज सर्वपाप कृतादोषा
त् दहत्याशु न संशयः इति व
राह पुराणं ॥
प्रस्वानः पुं उच्चैः शब्दः प्रपूर्वस्व
नधातोर्भावे अप्रत्ययेन निष्पन्नः ॥
प्रस्वेदः पुं अतिशयघर्म्मः त
स्यौषधं यथा चंदनं कुंकुमं मांसी
कर्पूरो जातिपत्रिका जातीक ।
क्कोलकप्रागनोलवंगास्यफलानि
च अगुरूशीर काश्मर्य्यः कुष्ठंतगर
नालिका गोरोचना प्रियंगुश्च चो
लं मदनकं नखं सरलः समपर्ण
श्च लाक्षा चामलकी तथा । क
हेरकः पद्मकंच पते स्तैलं प्रसा
धितं । प्रस्वेद मल दौर्गंध्य कं
डु कुष्ठ हरं परं । पुमान् युवा
स्यात् प्रियकाम्याः स्त्रीणांचास्मेत
वल्लभः स्त्रीशतं गच्छतेरूक्ष्वेथा
पि लभतेसुतं इति गारुडे १९८ ॥
अध्यायः ॥
प्रहतं त्रि विततं क्षुण्णं इति शब्द
रत्नावली प्रकर्षेण हिंसिते ग ।
तेच ॥
प्रहनेमिः पुं चंद्रः इति त्रिकाण्ड
शेषः ॥
प्रहरः पुं वासरस्याष्टभागैकभागः
प्रहर इति हिंदीभाषा । तत् ।
पर्य्यायः यामः २ इत्यमरः ॥
प्रहरकुटुंबी स्त्री कुटुंबिनीक्षुपः
इति राजनिर्घंटः ॥
प्रहरणं क्ली अस्त्रं इत्यमरः ॥ क
र्णीरथः इति तट्टीका सारसुंदरी ।
युद्धं इति हलायुधः प्रहारश्च ॥
प्रहरी त्रि यामिकः प्रहरो विद्य
ते अस्येति प्रहरशब्दादस्त्यर्थे इन्
प्रत्ययेन निष्पन्नः ॥ ॥

प्रहर्षणः पुं बुधग्रहः इति त्रिकां
डशेषः हर्षविशिष्टे हर्षकारकेच
त्रि प्रहर्षणी स्त्री हरिद्रा इति हारा
वली त्रयोदशाक्षरपादच्छंदोभेदः
तस्या लक्षणं यथा आशाभि र्म
नजरगाः प्रहर्षणीयं तस्या ल
क्ष्य यथा गोपीनां मधुरस्तथारा ।
तस्यपाने रुतेग स्तन कलसो
पगूहनेच्छ । आश्चर्य्यं रुधिर ।
ति विभ्रमैर्मुरारेः संसारे मति
रभवत् प्रहर्षणीह इति छंदो
मंजरी ॥
प्रहसनं क्ली प्रहासः रूपकभे
दः परिहासः इति मेदिनी आ
क्षेपः इति हेमचंद्रः रूपक भे
दस्य लक्षणं यथा भाणवत् सं
धि संध्यंग लास्यांगांके विनि
र्मिते भवेत् प्रहसने वृत्तं निंद्या
नां कवि कल्पितं तत्र नारभ ।
टीनापि विष्कंभक प्रवेशकौ ।
अंगी हास्य रस स्तत्र वीथ्यंगानां
स्थितिर्नवा तपस्वि भगवद्विप्र
प्रभृतिष्वत्र नायकः एको यत्रभ
वेद्धृष्टो हास्यं तच्छुद्ध मुच्यते इति
साहित्यदर्पणः ॥
प्रहसंती स्त्री यूथी इति त्रिकां
डशेषः वासंती इति राजनिर्घंटः
प्रकृष्टांगारधानीच ॥
प्रहस्तः पुं विस्तृतांगुलिपाणिः
चपेटः इत्यमरः रावणसेनापति
विशेषः यथा ततो नीलाम्बुदप्र
ख्यः प्रहस्तो नाम राक्षसः ॥ अ
ब्रवीत् प्रांजलि र्वाक्यं सूरः सेना
पतिस्तदा इति रामायणे लंका
कांडे ८ सर्गः ॥
प्रहारः पुं आघातः यथा भल्ल
प्रहारेण शिर श्चामरस्य पृथक्
कृतं । इति चंडी ॥
प्रहारणं क्ली काम्यदाने इति भ
वारण्यशब्दटीकायांसारसुंदरी ।
प्रहारवल्ली स्त्री मांसरोहिणी इ
ति भावप्रकाशः ॥
प्रहासः पुं शिवः इति त्रिकाण्ड
शेषः । नटः । इति धरणिः सो
मतीर्थं इति जटाधरः अट्टहासः
इति शब्दरत्नावली ॥
प्रहासी न पुं प्रकृष्टं हासयति
हसति च यः भाड इति भाषा
तत्पर्य्यायः वासंतिकः २ केलि
किलः ३ वैहासिकः ४ विदूष
कः ५ प्रीतिदः ६ इति हेमचंद्रः
प्रहिः पुं कूपः इत्यमरः ॥
प्रहितं क्ली सूपः इति हेमचंद्रः
क्षिप्ते त्रि इति निरुक्त शब्द ॥



टीकायां भरतः ॥

प्रहीणः त्रि परित्यक्तः । प्रपूर्व्वहा । धातोः कर्म्मणि क्तः इति मुग्धबोधव्याकरणं प्रहीण एवं ध्वनिना पितृक स्खला मधारेण शारद्वतेन इति रघुकाव्यं च ॥

प्रहुतं क्ली भूतयज्ञः इति जटाधरः ॥

प्रहेणकं क्ली पिष्टकविशेषः तत्पर्य्यायः वायनं २ व्रतोपायनं ३ इति त्रिकाण्डशेषः प्रहेलकं ४ वायनकं ५ इति हारावली प्रहेलकं क्ली प्रहेणकं इति हारावली ॥

प्रहेलिका स्त्री दुर्व्विज्ञानार्थप्रश्नः कूटार्थभाषिताकथा हेयालि । इति भाषा तत्पर्य्यायः प्रवह्लिका २ इत्यमरः प्रवह्लिका ३ प्रवह्लिः ४ प्रवह्ली ५ प्रहेलिः ६ इति भरतः प्रश्नदूती ७ प्रवह्लीका ८ इति शब्दरत्नावली तस्य लक्षणं व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका साहि धार्थी च शाब्दी च विख्याता प्रश्नशासने आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य भंगतः आर्थी । यथा तरुण्या लिंगितः कण्ठे नितम्बस्थलमाश्रितः गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः पानीयकुम्भ इति शाब्दी यथा सदारिमध्यापि न वैरियुक्ता नितान्तरक्ताप्यसितैव नित्यं यथोक्तवादिन्यपि नैव दूती का नाम कान्तेति निवेदयन्ति । सारिका इति विदग्धमुखमण्डने ॥

प्रह्लादः पुं प्रह्लादः स च हिरण्यकशिपोः पुत्त्रः परमवैष्णवः । तस्य चरित्रं भागवतादौ वर्ण्णितं । प्रह्लत्तिः स्त्री प्रीतिः इति मुग्धबोधव्याकरणं ॥

प्रह्लन्नः त्रि प्रीतः इत्यमरः ॥

प्रह्लादः पुं पह्लादः स च पूर्व्वजन्मनि शिवशर्म्मणः पुत्त्रः सोमशर्म्म नामासीत् ततो दैत्यभावनया मृतः अनन्तरं कमलायां हिरण्यकशिपोः सकाशाद्दैत्यभावेन जातः यथा सूत उवाच सलोष्टेन समं मेने काञ्चनं भूषणं पुनः जिताहारः स धर्म्मात्मा निद्रया परिवर्जितः विषयान्तपरित्यज्य एकान्तमपि सेवते योगासन समारूढो निराशो निष्परिग्रहः तस्यैवं संस्थितस्यास्य कालः समागतः आगतान् दानवान् विप्रः ॥

सोमशर्म्मा व्यलोकयत् मृत्युकाले तु संप्राप्ते प्राणयात्रा प्रवर्त्तके । शालग्रामे महाक्षेत्रे ऋषीणामेव सन्निधौ केचिद्वदन्ति वै देवाः केचिद्वदन्ति दानवाः एवंविधो महाशब्दः कर्णरन्ध्रं गतस्तदा ॥ तस्यैव विप्रवर्य्यस्य सविप्राः सोमशर्म्मणः ज्ञानध्यानात् प्रचलितः प्रविष्टं दैत्यजं भयं तेन ध्यानेन तस्यापि दैत्यभूतेन वै तदा सत्वरं तस्य वै प्राणा गतास्तस्य महात्मनः दैत्यभावेन संयुक्तः सद्भिस्तत्त्ववशं गतः तस्माद्दैत्यगृहे जातो हिरण्यकशिपोस्तदा देवासुरे महायुद्धे निहते स्कन्दरूपिणा युध्यमानेन तेनापि प्रह्लादेन महात्मना संस्पृष्टं वासुदेवं तद्विश्वरूपं विचिन्तितं योगाभ्यासेन पूर्व्वेण ज्ञानमासीन्महात्मनः सस्मार पौर्व्विकं सर्व्वं चरित्रं शिवशर्म्मणः सोऽयं हि सोमशर्म्मा वै प्रविष्टो दानवीं तनुं ॥ कस्य कार्य्यं सदा पुण्यं केवलं ध्यानमुत्तमं प्रयामि च महापुण्यं ज्ञानाद्धर्म्मो दैत्यादिभिः समरे योध्यमानेन प्रह्लादेन महात्मना एवं विनाकृताः सर्व्वे स्वपतो हि जगन्मम पतन्ते सर्व्वमाख्यातं सर्व्वसन्देहनाशनं सूत उवाच प्रह्लादेन हतेऽसंख्ये देवदेवेन चक्रिणा संह्रादे च महाविप्रास्तस्मिंश्च कालेनमिति प्रह्लादस्य तु या माता हिरण्यकशिपोः प्रिया प्रह्लादस्य महाशोके दिवा रात्रौ प्रशोचति पतिव्रता महाभागा कमला नाम दुःखिता खिद्यमाना दिवा रात्रौ नारदस्तामुवाच ह । मा शुच त्वं महाभागे पुत्त्रार्थं पुण्यभागिनि । निहतो वासुदेवेन तव पुत्त्रः समेष्यति तद्रूपलक्षणोपेतस्त्वोदरे महामतिः । प्रह्लादेति चैवं नाम पुनरस्य भविष्यति विहीन आसुरैर्भावैर्वैष्णवेन समन्वितः इदं त्वं मोदस्व भद्रे सर्व्वदेवैर्नमस्कृतः सुखी भव महाभागे पुत्त्रेण तेन वै सदा न प्रकाशय त्वया देवि स्ववाक्यं चैव कस्यचित् कर्त्तव्यमज्ञानभावैः सुगोप्यं त्वं सदा कुरु एवमुक्त्वा गतो विप्र नारदो मुनिसत्तमः कमलायास्तोदरे वै आसीत्तज्जन्म चोत्तमे पुनः प्रह्लादो वै नाम तस्यां जातो महात्मनः बाल्यभावं गतो विप्र कृष्ण एवं विचिन्त्य च ।

रसिंहप्रसादेन देवराजोऽप्यभूत्
स हि इति पाद्मे भूमिखण्डे ५
अध्यायः । प्रमोदः । इति विश्वः
प्राहुः इति धरणिः ॥
प्रक्षः त्रि नम्रः इत्युणादिको
षः आसक्तिः इति हेमचन्द्रः ॥
प्रक्षरः पुं अश्वसन्नाहः इति ।
हेमचन्द्रः ॥
प्रक्षालनं क्ली धावनं मार्जनं ।
यथा धर्मार्थं यस्य वित्तेहा वरं त
स्य निरीहता प्रक्षालनाद्धि पङ्क
स्य दूरादस्पर्शनं वरं इति हितो
पदेशे १ परिच्छेदः ॥
प्रक्षालितः त्रि धौतः मार्जितः
इति हलायुधः ॥
प्रक्षेपः पुं औषधादिषु क्षेपणी
य द्रव्यं यथा प्रक्षेपः पादिकः
क्वाथात् स्नेहे कल्कसमो मतः
षोडशांशस्तु तद्भागं वातपित्तक
फार्तिषु दीर्घ कषाये दातव्यो वि
परीतस्तु शर्करा मात्रा स्नेहद्र
व्यादीनां स्नेहकाथे च चूर्णवत् ॥
माक्षिकं हिंगु सिन्धूत्थः जरणाद्या
स्तु शाणिकाः इति वैद्यकपरि
भाषा विक्षेपः यथा समिद्भिः क्षेप
णं कर्म कुर्वन्ति भवदेवभट्टः ॥
प्रक्षेपणं क्ली प्रकर्षेण क्षेपः नि

क्षेपणं प्रशब्दविशिष्टधातोर्भावे अन
ट् प्रत्ययः ॥
प्रक्ष्वेडनः पुं नाराचः इत्यमरः ।
प्रक्ष्वेडना स्त्री नाराचः इत्यमरटी
कायां भरतः ॥
प्रक्ष्वेदनः पुं } नाराचः इत्यमर
प्रक्ष्वेदना स्त्री } टीकायां भरतः
प्राक् अव्य पूर्वदिग्देशकालाः इत्य
मरः प्राची दिक् प्राग्देशः कालो वा
प्राक् एवं प्राच्या दिशः प्राचो दे
शात् कालाद्वा आगतः प्रागाग
तः एवं प्राच्यां दिशि प्राचि देशे वा
वसति प्राग्वसति दिक् शब्दाद्दि
ग्देश काले इति प्रथमा पञ्चमी
सप्तमीनां स्थाने अचो लुगिति
स्ताने लुक् इति तट्टीकायां भर
तः पूर्वं प्रभाते ॥ अवान्तरे
अतीते अग्रे इति हेमचन्द्रः ।
मेदिनी च ॥ क्रमप्राप्तिः इ
ति शब्दरत्नावली ॥
प्राकषिकः पुं षिङ्गः मायानर्त्तकः
इत्युणादिकोषः ॥
प्राकाम्यं क्ली शिवस्याष्टैश्वर्यान्त
र्गतैश्वर्यविशेषः तच्च इच्छानभि
घातः इत्यमरटीकायां भरतः ॥
हेमचन्द्रस्य स्वाच्छन्द्यानुमतिः ।
तत्पर्यायः अवसर्गः २ स्वाच्छन्द्या

नुमननं ३ इति त्रिकाण्डशेषः ॥
प्राकारः पुं वप्रोपरि अन्यत्र वा इ
ष्टकादिरचितवेष्टनं तत्पर्यायः
वरणः २ सालः ३ इत्यमरः प्रा
लः ४ इति भरतः वप्रः ५ यथा
प्राकारेणापसार्व वप्रः पितृकेदार
योरपि इति रत्नकोषः ॥
तस्य परिमाणं यथा । ऊर्द्धं षोड
शहस्तेभ्यो नैव कुर्य्याद्गृहं गृही ।
ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न
शुभप्रदं । तस्य द्वारमानं प्रस्थ
हस्तद्वयात् पूर्वं दीर्घे हस्तत्र
यं तथा गृहिणां शुभदं द्वारे प्रा
कारस्य गृहस्य च न मध्यदेशे क
र्त्तव्यं किञ्चिन्न्यूनाधिके शुभं । इ
ति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे
१०३ अध्यायः ॥
प्राकृतः त्रि नीचः इत्यमरः भाषा
भेदः स च संस्कृतप्रकृतिकः ।
यथा । अथ प्राकृतं । अथ शब्द
आनन्तर्यार्थोऽधिकारार्थश्च । प्र
कृतिः संस्कृतं तत्र भवं तत आगतं
वा प्राकृतं संस्कृतानन्तरं प्राकृतम
धिक्रियते । संस्कृतानन्तरं प्राकृतस्या
नुशासनं सिद्धसाध्यमानभेदसं
स्कृतयोनेरेव तस्य लक्षणं न देश्य

इति ज्ञापनार्थं संस्कृतसमं संस्कृ
तलक्षणेनैव गतार्थं प्राकृते प्रकृ
ति प्रत्यय लिङ्ग कारक समास सं
ज्ञादयः संस्कृतवद्वेदितव्याः लो
कादिति च वर्त्तते तेन ऋ ॠ ऌ ॡ
ऐ औ ङ ञ श ष विसर्जनीय प्लुतव
र्जो वर्णसमाम्नायो लोकादवगन्त
व्यः ङ ञौ स्ववर्ग्यसंयुक्तौ भवत एव
ऐदौतौ च केषाञ्चित् कैतवं कैअवं
सौन्दर्यं सौअरिअं । कौरवाः कौ
रवा तथा स्वरव्यञ्जनं द्विवचनं
चतुर्थी बहुवचनं च न तु भवति
अबहुलं बहुलमित्यपि कृतं वे
दितव्यमाशास्त्रपरिसमाप्तेः त
तश्च क्वचित् प्रवृत्तिः क्वचिदप्रवृ
त्तिः क्वचिद्विभाषा क्वचिदन्यदेव
भवति इति हेमचन्द्रः कृत शब्दा
नुशासन वृत्तौ अष्टमाध्यायस्य च
तुर्थः पादः । प्रकृतिसम्बन्धी यथा
इत्युक्त्वासीद्धरिस्तूष्णीं भगवाना
त्ममायया पित्रोः संपश्यतोः स
द्यो बभूव प्राकृतः शिशुः इति श्री
भागवते दशमस्कन्धे ३ अध्यायः ।
प्राकृतज्वरः पुं वर्षाशरद्वसन्तेषु
त्रिषु ऋतुषु क्रमेण वातपित्तक
फजज्वरः यथा वर्षाशरद्वसन्तेषु
वाताद्यैः प्राकृतः क्रमात् इति

माधवकरः ॥
प्राकृतदोषः पुं वर्षाशरद्वसंतेषु क्रमेण कुपितो वातःपित्तं कफश्च यथा चय प्रकोप प्रशमाः पित्तस्य ग्रीष्मादिषु श्लेष्मणः शिशिरादिषु वायोर्ग्रीष्मादिषु त्रिषु इति रक्षितः ॥
प्राकृतप्रलयः पुं प्रकृतेर्लयः तस्य विवरणं यथा निर्गुणस्य च नित्यस्य चाद्यंतरहितस्य च निमेषाणां सहस्रेण प्रकृतेर्लय उच्यते बाह्यदेशात्मकस्तस्य वासरश्च प्रकीर्तितः मासास्त्रिंशद्दिवा रात्रैर्वर्षंद्वादशमासकैः एवंगते शताब्देच श्रीकृष्णे प्रकृतेर्लयः प्रकृत्याच प्रलीनायां तद्देवं प्राकृतो लयः सर्वैः संहृतसृष्टैश्चैका महाविलो प्रकृष्टया कृष्णवक्षसि लीना च मूलप्रकृतिरीश्वरी शाक्तावदंति तां दुर्गां विष्णुमायां सनातनीं सर्वशक्ति स्वरूपां च परां नारायणीं सतीं बुद्ध्याधिष्ठातृदेवीं च कृष्णस्य त्रिगुणात्मिकां यस्या यया मोहिताश्च ब्रह्मविष्णुशिवादयः वैष्णवास्तां महालक्ष्मीं परां राधां वदंति ते यदंशा महालक्ष्मीः प्रिया नारायणस्य च प्राणाधिष्ठातृदेवीं च प्रेम्णा प्राणाधिकां वरां शश्वत् प्रेममयीं शक्तिं निर्गुणां निर्गुणस्य च नारायणश्च शंभुश्च संहृत्य स्वगणान् बहून् मुहुर्मुहुः स्वस्वरूपी च कृष्णे लीनश्च निर्गुणे गोपा गोप्यश्च गावश्च सर्वपक्ष्यन्नरादयोऽपि सर्वे लीनाः प्रकृतौ च प्रकृतिः प्रकृतीश्वरे महाविलो विलीनाश्च सर्वे ते तद्विश्वगः महाविष्णुः प्रकृत्यां च सा चैव परमात्मनि प्रकृतिर्योगनिद्रा च श्रीकृष्णनेत्रपद्मयोः अधिष्ठानं चकार वै मायया चेश्वरेच्छया प्रकृतेर्वत्सरं यावन्निमेषकालं प्रकीर्त्तितं तावद्धि देवदिने निद्रा कृष्णस्य परमात्मनः अमूल्यरत्नतल्पे च वह्निशुद्धांशुकार्चिते गंधचंदनमाल्याढ्ये वायुना सुरभीकृते पुनः प्रजागरे तस्य सर्वसृष्टिर्भवेत्ततः एवं सर्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः अपिच प्रकृतौ संस्थिता यस्मात् सर्वतत्त्वान्यशेषतः अहंकार महत्तत्त्वगतो यत् प्राकृतो लयः प्रकृतौ संस्थितो व्यक्तमतीतं प्रलयस्तु यत् तस्मात् प्राकृतसंज्ञोऽयं प्रोच्यते प्रतिसंचरः अग्रे यः कश्चि ॥

तो विप्राः प्राकृताख्यो महालयः इति कालिकापुराणे २४ अध्यायः
प्राकृतमानुषः पुं सामान्यमनुष्यः यथा एकादश चमूनाथं भीमपादेन मारयत् । पंचानामपि यो भर्त्ता नासौ प्राकृतमानुषः इति महाभारते गदापर्व ॥
प्राकृतमित्रं क्ली स्वदेशाव्यवहित देशावस्थित राजादि यथा सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः स्यातामित्रे मित्रं च सहज प्राकृतावपि इति माघे द्वितीयसर्गः अस्यटीका मनुदेहे ऽयं चेयः किं करिष्यतीत्याशंक्यात सबलवत्तावके मित्रामित्रे बलाबलविवेकं तावत् करोति सावति क्रियया उपकारापकाराभ्यां तत्र कृपया निहृतः कृत्रिमः सखा सुहृत् गरीयान् बलवान् एवं शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिम मित्र शत्रु च कार्यतः उपकारापकाररूप कार्यवशात् निर्हेतुकाविति शेषः उक्त कार्यापाये यावज्जीवमनपायादनयो मित्रामित्र भावोऽपि अनपायीति गरीयस्त्वमिति भावः सहज प्राकृतौ तु नैव मित्यादि । स्यातां । मिति सहजातः सहजः एकशरीरावयवात् नच सहजे मित्रे । मातृष्वसेय पितृष्वसेयादिः सहजशत्रुस्तु पितृव्य तत्पुत्रादिः प्रकृत्या सिद्धः प्राकृतः पूर्वोक्तसहजकृत्रिम लक्षणरहित इत्यर्थः तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृते मित्रे अपि स्यातां तौ सहज प्राकृतौ शत्रुमित्रे च स्यातां तत्वात् कार्यवशादिति येन तो भयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिम शत्रुरेव मित्रं च मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः अनेन कृत्रिमत्वं सर्वापवादीति सिद्धं इति मल्लिनाथः ॥
प्राकृतशत्रुः पुं एकविषयाभिनिवेशि राजादिः यथा विषयान्तरः प्राकृतः शत्रुः इति माघटीकायां मल्लिनाथः ॥
प्राकृतिकः त्रि प्रकृतिविकारः प्रकृतिसंबंधी यथा एवं सर्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः ॥
प्राकृतः त्रि प्राग्भवः यथा मेघे

दिरे प्राक्तन जन्म विद्याः इतिकु
मारसंभवः अन्यच्च । प्राक्तनेन
शुभं सर्वं सुखं च विभवश्चिरं दुः
खं च शोकं प्राक्तनेन विपत् सं
पच्च सांप्रतं इति ब्रह्मवैवर्त्ते श्री
कृष्णजन्मखण्डे ९४ अध्यायः अ
पिच विधात्रा लिखितं कर्म प्राक्त
नेकेन वार्यते माभुक्तं क्षीयते क
र्म कल्पकोटिशतैरपि इति तत्रै
व १२९ अध्यायः ॥
प्राक्तनकर्म क्ली भाग्यं अदृष्टं इ
ति जटाधरः पुराकृतकार्यंच ।
प्राक्फलः पुं पनसः इति जटा
धरः ॥
प्राक्फल्गुनी स्त्री पूर्वफल्गुनी
यथा प्राक्फल्गुन्यां जन्मकाले
च यस्य इति कोष्ठीप्रदीपः ॥
प्राक्फल्गुनीभवः पुं बृहस्पतिः
इति हारावली पूर्वफल्गुन्यां जा
ते त्रि प्राक्फाल्गुनः पुं बृहस्पतिः
इति शब्दरत्नावली ॥
प्राक्फाल्गुनेयः पुं बृहस्पतिः
इति त्रिकाण्डशेषः ।
प्राखर्य्यं क्ली प्रखरत्वं तीक्ष्णता
प्रखरशब्दात् भावार्थेष्यप्रत्य
यः प्रागभावः पुं संसर्गाभाव
विशेषः तस्य लक्षणं विनाश्यभाव
त्वं ।

इति सिद्धान्तमुक्तावली ॥
प्रागल्भ्यं क्ली प्रगल्भता यथा
प्रागल्भ्यहीनस्य नरस्य विद्या श
स्त्रं यथा कापुरुषस्य हस्ते न त
प्रीतिमुत्पादयते शरीरे ऽन्धस्य दा
रा इव दर्शनीयाः इति ज्योतिस्तत्त्वं
स्त्रीणामयत्नभावविशेषः यथा
प्रागल्भ्यौदार्य्यमाधुर्य्यशोभा
धीरत्वकान्तयः दीप्तिश्चायत्नजा
भावहावहेला स्त्रियोऽङ्गजाः इ
ति हेमचन्द्रः ॥
प्रागुदीची स्त्री पूर्वोत्तरदिक्
ईशानकोणः यथा नैशान् कौ
र्णोमस्तिकाः प्रागुदीच्यां दिशि क्षि
पेत् इति भवदेवभट्टः ॥
प्राग्ज्योतिषः पुं कामरूपदेशः
इति हेमचन्द्रः ॥ तत्र नरकराज
पुरं यथा श्रीभगवानुवाच कर
तोया समागा पूर्वभागावधि
श्रिता यावल्ललितकान्तास्ति ताव
द्देशः पुरं तदा तत्र देवी महामाया
योगनिद्रा जगत्प्रसूः कामाख्या
रूपमादाय सदा तिष्ठति शोभना
अत्रास्ति नदराजोऽयं लौहित्यो
ब्रह्मणः सुतः अत्रैव दश दिक्
पालाः स्वे स्वे पीठे व्यवस्थिताः
अत्र स्वयं महादेवो ॥ ।

ब्रह्मा वायं च सर्वदा चन्द्रः सूर्य्यश्च
सततं वसतेऽत्रैव पुत्रक सर्वक्री
डार्थमायाता रहस्य देशमुत्तमं ।
अत्र श्रीः सर्वतोभद्रा भोग्य मत्र
सदा वसु अत्रैव हि स्थितो ब्रह्मा
प्रागत्रैव ससर्ज्ज ह । ततः प्राग्ज्यो
तिषाख्येयं पुरी शक्रपुरीसमा
अत्रैव स भक्तेन ह्यभिषिक्तो म
या स्वयं कृतदारः सहामात्यैराज्ञा
भूत्वा महाबल । ततो विदर्भराज
स्य पुत्रीं मायां कन्यां हरिः पुत्रार्थे
वरयामास नरकस्य समां गुणैः इ
ति कालिकापुराणे ३९ अध्यायः
प्राग्भारः पुं पर्वताग्रभागः इति
त्रिकाण्डशेषः क्वचित् प्राग्भा
व इति च पाठः ॥
प्राग्रहरः त्रि श्रेष्ठः इत्यमरः ॥
प्राग्राट् क्ली अघनदधि इति त्रि
काण्डशेषः ॥
प्राग्र्य त्रि श्रेष्ठः इत्यमरः ॥
प्राग्वंशः पुं हविषां होतव्यानां ।
आधारो यज्ञगृहं ततः प्राक् पूर्व
देशे यजमानसदस्यादिस्थित्य
र्थं गृहं इत्यमरभरतौ पूर्वकलं
च प्राचीनः पुं पुष्ट इति हेमचन्द्रः
प्राचारः पुं कृतादिकरणं तस्य

र्य्यायः स्रोतः २ इत्यमरः ॥
प्राघुणः पुं अतिथिः इति त्रिका
ण्डशेषः ॥
प्राघुणिकः पुं अतिथिः यथा
अमितमधु तत् कथा मम श्रव
णप्राघुणिकी कृता जनैः मद
नानल बोधने भवेत् खग धाय्या
धिगर्थेष्वधापिताः इति नैषधद्वि
तीयसर्गः प्राघूर्णिकः पुं अतिथिः
इति हेमचन्द्रः ॥
प्राङ् त्रि पूर्वदिक् पूर्वदेशः ॥
पूर्वकालः इति मेदिनी ॥
प्राङ्गः पुं पणववाद्यं इति शब्द
रत्नावली ॥
प्राङ्गणं क्ली पणववाद्यं इति शब्द
रत्नावली गृहभूमिः अङ्गिना इ
ति उठान इति च भाषा तत्प
र्य्यायः अजिरं २ चत्वरं ३ अङ्गणं
४ इति हेमचन्द्रः सूर्य्यविद्धस्य ।
तस्य दोषो यथा अभद्रं दर्शयेद्
वेधं प्राङ्गणं च तथैव च । इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ९२
अध्यायः ॥
प्राङ्न्यायः पुं व्यवहारे तत्रोत्तर
विशेषः यत्राभियुक्तः पूर्वं ब्रूया
दस्मिन्नर्थे अनेनाहमभियुक्तस्त
तत्र चायं व्यवहारमार्गेण पराजित

इति उक्तंच कात्यायनेन प्राचारे
एणावमन्नोपि पुनर्लेखयते यदि
सोभिधेयो जितः पूर्वं प्राम्नायश्च
स उच्यते इति मिताक्षरा ॥
प्राचिका स्त्री वनमक्षिका डाँश
इति भाषा इत्यमरभरतौ ॥
प्राची स्त्री पूर्वादिक् इत्यमरः
पूजकपूज्ययोरग्रं यथा देवाग्रे
स्वस्य चाप्यग्रे प्राची प्रोक्ता गुरु।
कर्मैः इति यत्रैव भानुरुत्तिष्ठ
त्युदेति प्राचीति तां वेदविदो व
दंति तथा पुरः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदंति तंत्रे ॥
इति तिथ्यादितत्वं ॥
प्राचीनः त्रि पूर्वदिग्देशकालभ
वः तत्पर्यायः प्राक् २ प्राचीरं।
तत्पर्यायः प्रावेष्टकः २ वृतिः ३
इति हेमचंद्रः ॥
प्राचीनपनसः पुं विल्वः इति त्रि
काण्डशेषः ॥
प्राचीनवर्हिः पुं इंद्रः इति हेम
चंद्रः राजविशेषः यथा हविर्द्धा
नात् षडाग्नेयी पुत्रानजनयद्धृतं।
प्राचीनवर्हिषं शुक्लं जयं कृ
ष्णं प्रयाजिनं प्राचीनवर्हि
र्भगवान् महानासीत् प्रजाप
तिः। हविर्द्धी ॥ ॥

नात् द्विजश्रेष्ठ येन संवर्द्धिताः प्र
जाः प्राचीनाग्राः कुशास्तस्य पृथि
व्यां विश्रुता मुने प्राचीनवर्हिर्भग
वान् ख्यातो भुवि महाबलः ॥
समुद्रतनयायां तु कृतदारो मही
पतिः महतस्तपसः पारे सवर्णा
यां महीपतिः महतस्तपसः पा
रे सवर्णायां महीपतिः सुषुवे द
श पुत्रांश्च मुख्यिणावे प्रचेतसः
दशवर्षसहस्राणि समुद्रसलिले
शयाः इति वह्निपुराणे वरुसर्गो
नामाध्यायः ॥
प्राचीना स्त्री वनतिक्तिका आक
नादि इति भाषा इत्यमरः रास्ना इ
ति शब्दचंद्रिका प्राग्भवा च ॥
प्राचीनामलकं क्ली पानीयामलकं
प्राचीआमला इति भाषा तत्पर्या
यः वारिवदरं २ इति त्रिकाण्डशेषः
अस्य गुणाः दोषत्रय दारनाशित्वं
इति भावप्रकाशः ॥
प्राचीनावीतं क्ली श्राद्धादौ वाम
करे वहिष्कृते सति दक्षिणस्कंधा
र्पितयज्ञसूत्रं इत्यमरभरतौ ॥
तथाहि सव्यं बाहुं समुद्धृत्य द
क्षिणे तु धृतं द्विजाः प्राचीनावीत
मित्युक्तं पित्र्ये कर्मणि योजयेत् इति।
कौर्मे उपरिभागे १० अध्यायः।

प्राचीनावीती पुं प्राचीनावीत
विशिष्टः यथा सव्यं बाहुमुद्धृ
त्य शिरोऽवधाय दक्षिणांशे प्रति
ष्ठापयति सव्यं कक्षमवलंबं भ
वति एवं प्राचीनावीती भवतीति
इति गोभिलः प्रतिष्ठापयति य
ज्ञोपवीतमिति शेषः। इत्या।
ह्निकतत्वं ॥
प्राचीपतिः पुं इंद्रः इति त्रिकां
डशेषः ॥
प्राचीरं क्ली प्रांततोवृतिः पाँची
ल इति भाषा इत्यमरः दुर्गादिन
गरादेः प्रांतभागे वेणुकंटक
वेष्टादिमयी वृतिर्वेष्टनिका इति
भरतः स्त्रियामपि वृतो प्राची
र पुपवारादिति स्वाम्यादयः तत्
पर्यायः वृतिः २ इति भट्टः।
प्राचीनं २ इति मुकुटः प्राचीरं
प्राचीरोपि ४ स्यात् प्राहृतिः ५ प्रा
न्तोवृतिः ६ इष्टकामृत्तिकाद्यै
श्चरहृबाटादिवेष्टने इति शब्द
रत्नावली अथ प्राचीरनिर्णी
यः गर्मैश्च भेदा मनुजेस्वलंख्याः
प्राचीरखंडा नृपते भवंति राज
देशेतनाः सर्वप्राचीराः पृथिवी
भुजः विंशतिस्तत्पंचाशं पार्श्व

योः पंच पंच च पश्चात् पंच च
विस्तेयोः प्राचीराः पृथिवी भुजः
सर्वप्रान्ते तावरणे नामप्राचीर
उच्यते। प्रतिप्राकारसंस्थाने द्वा
रे नाभिमुखस्थिते तत्र जयाख्य
स्पर्द्दीर्घस्य वास्तुखण्डस्य निर्णयः
तथथा राजच्छत्रांतरे पंच राज।
द्वारे महीपते ४ राजदंडत्रये सा
र्द्धे जयद्वारे प्रतिष्ठिताः अद्वारे
राजदंडार्द्धे प्राचीराः पृथिवीप
तेः एवं व्यवस्थिते स्थाने मध्यमे
तद्वि तिष्ठति राजच्छत्र हये सार्द्धे
माथामे जय वास्तुनि परिणाहेपं
च राजदण्डाः स्थितिमध्यतः रा
जपद्दाभिधानेन स्थान मेतन्निगद्य
ते अस्मिन् गृहं नृपः कृत्वा सुचिरं
सुखमश्नुते अज्ञानादृभतो राजा
योऽन्यत्र गृहमारभेत् सोऽचिरात्क
ष्टमाप्नोति रोगं शोकं भयं तथा
यमदण्डो हयदण्डो कोणाइति
रूपस्तवः ये चान्ये वास्तुदोषाः
स्युः स्थाने दोषाश्च ये पुनः तान्
स्पृशपते राजपट्टस्तेः सर्पं गरु
डो यथा द्विगुणादिरतोपि स्यात्
क्रमाद्भंगादि वास्तुषु राजच्छत्र
मितेप्येवं प्राचीरे गुणदोषकौ
इति युक्तिकल्पतरुः ॥

प्राचेतसः पुं वाल्मीकिमुनिः इति
हेमचंद्रः ॥
प्राचेतसः पुं प्राचीनवर्हीराजपुत्राः
सोतनित्यबहुवचनांतोयं यथा।
एवमुक्तास्ततेपुत्रास्ततः प्राचेत
सोदशा पयोधि सलिले मग्नास्त
पस्तेपे सुदारुणं पतत्रिराजमा
रूढंनीलोत्पलदलच्छविं दृष्ट्वा
प्राचेतसः सर्वे शिरोभिरवनीग
ताः इति वह्निपुराणे ॥
प्राच्यः पुं शरावत्याःप्राग्दक्षिण
देशाः इत्यमरः पूर्वदेशीयेत्रि।
प्राजकः पुं सारथिः यथा यत्र
पवर्ततेयुग्यंवैगुण्यात् प्राजक
स्यच तत्रस्वामीभवेद्दंड्योहिंसायां
द्विशतंदमं ॥ इति मनुवचने।
यत्र सारथेरकौशल्याद्यानम
न्यथा गच्छति तत्र हिंसायां स्व
शिक्षित सारथि नियोगात्स्वामी
द्विशत दंडंदद्यात्स्यादितिकुल्लू
कभट्टः इतिप्रायश्चित्ततत्वं ॥
प्राजनं क्ली तोदनं। पाचनीवाडी
इतिभाषा इत्यमरः ॥
प्राजापत्यं क्ली द्वादशाहसाध्य
व्रतविशेषः। तत्र दिवसत्रयंरा
त्रिमात्र भोजनं २२ ग्रासाः दिव
सत्रयंदिवामात्रभोजनं २६ ग्रासाः

दिवसत्रयं अयाचित भोजनं २४
ग्रासाः दिवसत्रयं उपवासः य
था त्र्यहं सायं त्र्यहं प्रात स्त्र्यह
मद्यादयाचितं। त्र्यहं परंतुना
श्नीयात् प्राजापत्यंचरन् द्विजः
ग्राससंख्या पराशरेणोक्ता सा
यं द्वाविंशतिर्ग्रासाः प्रातः षड्विं
शति स्तथा। अयाचितेचतुर्विं
शः परंचानशनं स्मृतं ॥ इति
प्रायश्चित्ततत्वं ॥ तत्र अगम्या
गमनादि प्रायश्चित्तं यथा ॥
अगम्या गमने कृत्वा मद्यगोमां
स भक्षणं शुध्येच्चांद्रायणाद्विप्रः
प्राजापत्येन भूमिपः वैश्यःसां
तपनाच्छूद्रः पंचाहोभिर्विशुध्य
प्रायश्चित्तेकृतेदद्याद्गवांब्राह्म।
णभोजनं इतिगारुडे २२६ अ
ध्यायः ॥ रोहिणीनक्षत्रे ॥
यथा पैत्र्यगुरुःशशी चैव प्राजा
पत्यस्यविस्तथा पूर्णिमा गुरुवा
रेण महाज्यैष्ठी प्रकीर्तिता इति
प्रायश्चित्ततत्वं ॥
प्राजापत्यः पुं प्रयागः इतित्रिका
ण्डशेषः जैनराजभेदः तत्पर्य्यायः
त्रिपृष्ठः २ इतिहेमचंद्रः। काय
नामक विवाहः सह धर्मचरतां
इतिनियमकृत्वा कन्याधानं ॥

यथा इत्युक्त्वाचरतांधर्मंसहयादी
यतेर्थिने। स कायःपावयेत्तज्जः
षट्षड्वंश्यान् सहात्मना इति।
मिताक्षरा कायःकः प्रजापति
र्देवतास्येतिप्राजापत्यइत्यर्थः
इत्युद्वाहतत्वं प्राजापत्या स्त्री प्र
व्रज्याश्रम पूर्वकर्तव्य प्रजापति
देवताक सर्वस्वदक्षिणेष्टिः।
यथा प्राजापत्यां निरूप्येष्टिं स
र्ववेद सदक्षिणां। आत्मन्यग्नीन्
समारोप्य ब्राह्मणः प्रव्रजेद्गृहा
त् इति मानवे ६ अध्यायः ॥
प्राजिता* पुं सारथिः इत्यमरः
प्रकृष्टगन्तरित्रि ॥
प्राज्ञः पुं कल्किदेवस्यज्येष्ठभ्राता
यथा कल्किं द्रष्टुं हरेरंशमाविर्भू
तं वशम्भले कविप्राज्ञ सुमंतवः
पुरस्कृत्य महाप्रभं इतिकल्किपु
राणे २ अध्यायः .पण्डितः इत्य
मरः राजशुकः इति राजनिर्घ
ण्टः ॥ प्राज्ञः त्रि पण्डितः
दक्षः इति शब्दरत्नावली ॥
प्राज्ञमानी त्रि पण्डिताभिमानी
यथा दुःखिताय शयानाय ॥
श्रद्दधानाय रोगिणे। योभेष
ज मविज्ञाय प्राज्ञमानी प्रयच्छ

ति ॥ इति चरकः ॥
प्राज्ञा स्त्री बुद्धिमती तत्पर्य्यायः।
धीमती २ इत्यमरः ॥ बुद्धिः। य
था। प्रज्ञा प्राज्ञा धरा ज्ञप्तिः प
ण्डा संवेदनं विदा। इति रायमु
कुटधृत शब्दार्णवः ॥
प्राज्ञी स्त्री स्वयंज्ञात्री। तत्पर्य्यायः
प्रज्ञा २ इत्यमरः। पण्डितपत्नी ॥
इति प्राज्ञशब्दटीकायां भानु
दीक्षितः ॥
प्राज्यं त्रि प्रचुरं ॥ इत्यमरः ॥
प्रांजलः त्रि सरलः यथा ऋजा
वजिह्म प्रगुणो प्रांजलः सरलो
पिच। इति जटाधरः ॥
प्राड् पुं पृच्छतियः प्रश्नकर्त्ता
इतिमुग्धबोधव्याकरणं ॥
प्राड्विवाकः पुं व्यवहारद्रष्टा ज
ज इति इंगरेजी भाषा। तत्पर्या
यः। अक्षदर्शकः २ इत्यमरः।
द्वैव्यवहाराणांऋणादानादि
विवादानांद्रष्टरि निर्णेतरि। प
मीध्यते इत्यर्थः पृच्छति वादि प्र
तिवादिवाक्यं प्राट् दड्जुरुवाक्
प्राडितिनिपातः विविच्यवक्तिवि
वाकः कर्मावेग्मी इतिचप्राट्
वासौविवाकश्चेति प्राड्विवाकः वि

वादानुगतं पृष्ट्वा पूर्व्ववाक्यं प्रयत्नतः । विचारयति येनासौ प्राड्विवाकस्ततस्स्मृतः ॥ इति स्मृतिः ॥ इति भरतः ॥ अपि च । अर्थि प्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्व्वचनं विरुद्धाविरुद्धं च सभ्यैः सह विविनक्ति विवेचयतीति वेति विवाकः प्राट् । चासौ विवाकश्चेति प्राड्विवाकः । उक्तञ्च । विवादानुगतं पृष्ट्वा ससभ्यस्तत् प्रयत्नतः । विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः ॥ इति मिताक्षरा ॥

प्राणः, पुं, ब्रह्मा । इति त्रिकाण्डशेषः ॥ हृन्मारुतः । बोलः । काव्यजीवः । अनिलः । बले, क्लीवे त्रि इति मेदिनी ॥ सूक्ष्मशरीरसमष्ट्युपहितचैतन्यं प्राणनवान् नासाग्रस्थानवर्त्ती वायुः । इति वेदान्तसारः ॥ तस्य कर्म बहिर्गमनं । इति श्रीधरस्वामी ॥ तस्य रूपं स्थानानि च यथा, इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितं । आस्या नासिकयोर्मध्ये हृन्मध्ये नाभिमध्यगे । प्राणालय इति प्राहुः पादाङ्गुष्ठेऽपि केचन ॥ इति योगार्णवः ॥ पंच प्राण विवरणं बहुवचनान्त प्राणशब्दे द्रष्टव्यं ॥ पातः पुत्रः यथा आवर्त्तिर्नियतिश्चैव मेरोः कन्ये महात्मनः । भार्य्ये धातृविधात्रोस्ते तयोर्जातौ सुतावुभौ । प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ॥ इति मार्कण्डेये रुद्रसर्गाध्यायः ॥

प्राणकः, पुं, सत्त्वजातीयः । प्राणिमात्रं । जीवकद्रुमः । चोलः । इति । मेदिनी ॥

प्राणथः, पुं, वायुः । बलवान् । इत्युणादिकोषः ॥ प्रजापतिः । तीर्थं । इति संक्षिप्तसारोणादिवृत्तिः ॥ प्राणदे क्ली, जलं । रक्तं । इति हेमचन्द्रः ॥

प्राणदः, पुं, जीवकवृक्षः । इति राजनिर्घण्टः ॥

प्राणदा, स्त्री, ऋद्धिवृक्षः । हरीतकी । इति राजनिर्घण्टः ॥

प्राणनं, क्ली, जीवनं । इति जटाधरः । गले पुं । इति शब्दचन्द्रिका ॥

प्राणनाथः, पुं, पतिः । इति शब्दरत्नावली ॥

प्राणन्तः, पुं, वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । रसाञ्जनं । इत्युणादिकोषः ॥

प्राणन्ती, स्त्री, क्षुत् । हिक्का । इत्युणादिकोषः ॥

प्राणप्रदा, स्त्री, ऋद्धिनामकौषधं ।

इति रत्नमाला ॥

प्राणभास्वान्, पुं, समुद्रः । इति शब्दरत्नावली ॥

प्राणमयकोषः, पुं, कर्म्मेन्द्रियसहितप्राणादिपञ्चकं । इति वेदान्तसारः ॥

प्राणसंयमः, पुं, प्राणायामः । यथा, तदशक्तौ तत्त्वनिष्ठमेवं प्राणस्य संयमः । इति तन्त्रसारः ॥

प्राणसद्म, क्ली, शरीरं । इति केचित् ॥

प्राणसमा, स्त्री, पत्नी । इति हेमचन्द्रः ॥

प्राणहारकं, क्ली, वत्सनाभः । इति राजनिर्घण्टः ॥ प्राणनाशके त्रि ॥

प्राणाः, पुं, असवः । इत्यमरः ॥ देहे अन्तः सन्निहितेषु पञ्चवायुषु अस्यन्ते असवः नाम्नीति उः प्राणिति एभिः प्राणाः घञ् एवमिति असुवत् प्राणा अपि पुं बहुत्वे इत्यर्थः अत्र प्राणशब्दाभ्यां बहुवचनोत्ताभ्यां पञ्चप्राणादय उच्यन्ते न पुनरेकैकाभिधाने बहुवचने अत एव प्राणोऽपान इत्युक्तं । हृदि प्राणो गुदेऽपान इत्यादिवदेकत्वे इति टीकायां भरतः ॥ शरीरस्थपञ्चप्राणा यथा । प्राणोऽपानः समानश्चोदानव्यानौ च वायवः । शरीरस्था इमे इत्यमरः ॥ इमे प्राणादयः पञ्चवायवः शरीरे तिष्ठन्ति ते च नियतस्थानस्थाः यदाहुः । हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशे च व्यानः सर्व्वशरीरगः इति । एतद्व्यापाराश्च यथा ॥ अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनं भाषणादि निमेषादि तद्व्यापाराः क्रमादमी । इति च भरतः ॥ प्राणकराणि यथा सद्यो मांसं नवान्नञ्च बाला स्त्री क्षीरभोजनं । घृतमुष्णोदकञ्चैव सद्यः प्राणकराणि षट् । प्राणहराणि । यथा शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् इति चाणक्यकर्म्मलोचने ॥ प्राणवियोगकाले कर्त्तव्यं यथा कण्ठस्थानं गते जीवे भीतिविभ्रान्तमानसः ज्ञाता च विक्लवे तत्र शीघ्रं निःसारयेद् गृहात् । कुशास्तरणशायी च दिशः सर्व्वान् प्रपश्यति लब्धस्मृतिर्मुहूर्त्तेन यावज्जीवो न नश्यति वाचयेत् स्वहस्तेन भूमे देवा द्विजातयः सर्व्वं च हिरण्यं च यथोत्पन्नेन मार्थवि परलोकहितार्थाय गोप्रदानं विधिश्चैते सर्व्वदेवमया गाव ईश्वरेणावतारिताः अस्मात्तारयेत्तस्मात् प्रव

2456

रेति महीतले पलासांश्चैवदानेन
प्रीत्वं मुच्येत किल्विषात् पश्चात्
ष्कृतिकर्थदिक्मनुन् कर्णेन च श्रा
वयेत् यावत् प्राणान् प्रमुच्येत
कृत्वाकर्मसङ्कटं दृष्ट्वा स्वविक
लहोने मम मार्गानुसारिणं प्र
याणकाले तु नरो मंत्रेण विधिपू
र्वकं मंत्रेणानेन कर्तव्यं सर्वक्षेमा
र्थमोत्तमं मधुपर्कान्तरं गृह्य इमं
मंत्रमुदाहरेत् मंत्रः गृहाण चेमं
मधुपर्कं माधं संसारनाशनकरं
त्वमस्तेन तत्त्वं नारायणेनरचितं
भगवन् प्रियाणां हि देवशान्तिक
रणं स्वर्लोक इमं तन पथेन
मंत्रेण दद्याद्धि मधुपर्ककं पुरुषो
मृत्युकालेत्वपरलोकसुखावहं प
र्वेति निःस्नातान् प्राणान् संसारे च
न गच्छति नष्टसंत्वमसदिष्टपत्ता
त्वामस्मुवशं गतं महावनस्पतिं
गत्वा गंधांश्च विविधानपि हुत्वैते
लसमायुक्तं कृत्वा वै देहशोधनं।
तेजोमयकरं वास्य तत्सर्वं परि
कल्पच दक्षिणाग्रं शिरः कृत्वा
सलिले तं निधाय च तीर्थायावा
हनं कृत्वा स्नापनं तस्य कारयेत्
गयादीनि च तीर्थानि येच पुण्याः
शिलोच्चयाः कुरुक्षेत्रं गंगा च य

मुना च सरिद्वरा कौशिकी च पयोष्णी
च सर्वपापप्रणाशिनी गण्डकी भ
द्रनामा च सरयूर्बलदा तथा वनानि
नववाराहं तीर्थं पिण्डारकं तथा पृ
थिव्यां यानि तीर्थानि चत्वारः साग
रास्तथा सर्वाणि मनसा ध्यात्वा स्ना
नमेवं तु कारयेत् प्राणान्तेन तु
स्नात्वा चिन्तां कृत्वा विधानतः तस्या
उपरि तस्याप्यदक्षिणाग्रे शिरस्त
था देवानग्निमुखान् ध्यात्वा गृ
ह्य हस्ते कुशाग्रं प्रज्वाल्य विधि
वत्त्वमंत्रमेनमुदाहरेत् मंत्रः॥
कृत्वा तु दुष्करं कर्म जानता वाप्य
जानता मृत्युकालवशं प्राप्य न
रः पंचत्वमागतः धर्माधर्मसमा
युक्तो लोभमोहसमावृतः दहेयं
तस्य गात्राणि देवलोकाय गच्छतु
एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्र
दक्षिणं ज्वलमानं तदा वह्निं शिरः
स्थाने प्रदापयेत् चातुर्वर्ण्येषु संस्का
रमेवं भवति पुत्रक गात्राणि वास
सी चैव प्रक्षाल्य विनिवर्त्तयेत्॥
मृतनाभनयोर्हि द्विप्रयद्यात् पिण्डं
महीतले तदा प्रभृति चाशौचं दै
वकर्म न कारयेत् इति वराह
पुराणे श्राद्धोत्पत्तिर्नामाध्यायः।
प्राणा स्त्री पक्षिणीविशेषः सा चारुण

2457

गरुडयोः स्वसा: यथा पुलहस्या
त्मजः सर्गाः प्राणायास्तु निबोधते
कन्याः षडिति विख्याताः प्राणाया
वै विजज्ञिरे श्येनी भासी तथा क्रौं
ची धृतराष्ट्री शुकी शुकी अरुणस्य
भार्य्या श्येनी वीर्यवन्तौ महाबलौ
संपातिश्च जटायुश्च प्रसूतौ पक्षि
सत्तमौ संपातिर्जनयत् गृध्रान्
काकाः पुत्रा जटायुषः भार्य्या ग
रुत्मतश्चापि भासी क्रौंची शुकी॥
शुकी। इत्यग्निपुराणं॥
प्राणाधिनाथः पुं पतिः इति ह
लायुधः॥
प्राणापानौ पुं अश्विनीकुमारौ।
यथा प्राणापानौ कथं देवावश्वि
नौ संबभूवतुः। इति प्रजापाल
प्रश्ने महातपा उवाच तस्यात्वाष्ट्रा
मश्वरूपायामादित्यस्तीव्रतेसा वी
र्जं निर्वापयामास तज्जले तद्धिया
उपात् तत्र प्राणस्त्वपानश्च यौतौ।
चात्मजितौ पुरा वरदानेन च पुन
र्मूर्त्तिमन्तौ बभूवतुः तौ चाश्वा मश्व
रूपिण्यां जातौ येन नरो त्तमौ न
नस्ता वश्विनौ देवौ कीर्तितौ रवि
नन्दनौ इति वाराहे अश्विनोत्
पत्तिनामाध्यायः॥

प्राणायामः पुं योगाङ्गविशेषः
तत्रोक्तलिनियमौ ज्ञानार्णवे क
निष्ठानामिकाङ्गुष्ठैर्यन्नासापुट
धारणं प्राणायामः स विज्ञेय
स्तर्जनीमध्यमे विना स द्विविधः
सगर्भो मंत्रजापेण निर्गर्भो
मात्रया भवेदिति मात्रा च वाम
जानुनि तद्धस्तभ्रामणं यावता
भवेत् कालेन मात्रा सा ज्ञेया
मुनिभिर्वेदपारगैः अथ प्रा
णायामः मूलमंत्रस्य बीजस्य
प्रणवस्य वा षोडशवार जपेन
वामनासापुटे वायुं पूरयेत् त
स्य चतुःषष्टिवार जपेन वायुं कुं
भयेत् तस्य द्वात्रिंशद्वार जपेन
वायुं रेचयेत् पुनर्दक्षिणनासापु
टेन उभाभ्यां कुंभयित्वा वामेन रेच
येत् पुनर्वामेन पूर्य्य उभाभ्यां कुं
भयित्वा दक्षिणेन रेचयेत् तथा
च कालीहृदये प्राणायामत्रयं
कुर्य्यान्मूलेन प्रणवेन वा। अथवा
मंत्रबीजेन यथोक्तविधिना सुधी
रिति सारसमुच्चयेपि विपरीतमतो
विदधीत बुधः पुनरेव ततद्विपरीत
कमिति। यौगिके पुनर्मात्रानियमः
तथा च गौतमीये मंत्रः प्राणायामः प्रो

कं यो योगिकं कथयामि ते पूरये
द्वामया विद्वान् मात्राषोडशभिः सु
खेयेति यद्वा चतुःषोडशाष्टवा
र जपेन पूरकादिकं कुर्यात् अ
थवा एकचतुर्द्विवारेण तथाच
तेनान्तरे पूरयेत् षोडशभिर्वायुं
धारयेत्तच्चतुर्गुणैः रेचयेत् कुंभ
कार्द्धेन अथवान्या तत्तृतीयकैः त
दशकेनाच्च तत्त्वमेव प्राणस्य सं
यमः अस्यानित्यत्वमाहतत्रैव
प्राणायामं विनामंत्रपूजनेन नहि
योगपतो गोपाले न विशेषो ।
यथा कामबीजस्यैकवारजपेन
दक्षिणनासया वायुं रेचयेत् ॥
पुनः सप्तवारजपेन वामनासया
वायुं पूरयेत् नासापुटौ धृत्वा विं
शतिवारजपेन वायुं कुंभयेत् पुन
र्वामेन रेचयेत् दक्षिणेन पूरयेत्
उभाभ्यां कुंभयेत् पुनर्दक्षिणेन रे
चयेत् वामेन पूरयेत् उभाभ्यां कुंभ
येत् तथाच एकेन रेचयेत् काम
बीजेनैव पृथक् पृथक् पूरयेत्
सप्त जपेन विंशत्यानेन धारयेत्
सर्वेषु ह्यस्मंत्रेषु बीजेनानेन रेचये
त् यद्वा मूलमंत्रेणैव प्राणायामः त
थाच पवनसंयमनं तत्मनाचरेत् यमि
हृ तन्मममेसोमद्गमिच्छति यदि दशान्तरं

जपति तदा दशान्तरेण चेतत्र वाष्टा
विंशतिवारं रेचयेत् पूरयेद्वामया
तद्द्वारेयेमत्न् समाणतः प्राणा
यामो भवेदेको रेच पूरक कुंभकैः
अष्टादशान्तरेण चेत् द्वादशैवं
समाचरेत् अन्यमनुभिर्वर्णानुरू
पमित्युक्तत्वात् तत्तन्मंत्रवर्णैः स
ख्याकैः रेचकादि त्रयं कुर्यात् क्र
मदीपिकायां । रेचयेन्मारुतं द
क्षया दक्षिणः पूरयेद्वामया मध्य
नाड्या पुनर्धारयेदित्यादि एतत्तु
श्रीकृष्णमंत्र विषयं नान्यत्र इति
तंत्रसारः अपिच आसनं पद्म।
काद्युक्तं प्राणायामो मरुज्जयः
मंत्रध्यानयुतो गर्भो विपरीतो
अगर्भोसि सगर्भस्तुः ।
प्राणायामस्तेनाधिकः एवं द्विधा
त्रिधा प्रोक्तः पूरणात् पूरकः सच
कुंभको निश्चलत्वात् स रेचनाद्रेच
कस्त्रिधा लघु द्वादश मात्रः स्याच्च
चतुर्विंशतिकः परः षट्त्रिंशन्मा
त्रिकः श्रेष्ठः प्रत्याहारस्य शोधनं । इ
तिगारुडे ४९ अध्यायः ॥ तस्य फ
लं यथा प्रथमे जनयेत् स्वेदं म
ध्यमेन च वेपथुं । विपाकं हि त
तीयेन जयेद्दोषाननुक्रमात् इति
तत्रैव २२० अध्यायः ॥ ॥

अन्यच्च यथा पर्वत धातूनां ध्मा
तानां दह्यते मलं तथेन्द्रिय कृता
दोषा दह्यन्ते प्राणनिग्रहात् प्रथ
मे साधनं कुर्यात् प्राणायामस्य ।
योगवित् प्राणापान निरोधस्तु प्रा
णायाम उदाहृतः लघु मध्योत्तरी
याख्यः प्राणायाम स्त्रिधोदितः त
स्य प्रमाणं वक्ष्यामि तदलर्क शृणु
ष्व मे लघु द्वादशमात्रस्तु द्विगुणः
स तु मध्यमः त्रिगुणाभिस्तु मात्राभि
रुत्तरीय उदाहृतः निमेषोन्मेषणे
मात्रा तालो लघ्वक्षरो मतः प्राणा
यामस्य संख्यार्थं स्मृतो द्वादश मा
त्रकः प्रथमे जनयेत् स्वेदं मध्यमे
न तु वेपथुं विषादं हि तृतीयेन ।
जयेद्दोषाननुक्रमात् मृदुत्वं सेव्य
मानास्तु सिंहशार्दूलकुंजराः यथा
यान्ति तथा प्राणो वश्यो भवति ।
योगिनः । वश्यं मत्तं यथेच्छातो ना
गं नयति हस्तिपः तथैव योगी च्छ
न्देन प्राणं नयति साधितं यथा हि
साधितः सिंहो मृगान् हन्ति न मानु
षान् तद्वन्निषिद्धः पवनः किल्बिषं
न तृणां तनुं ॥ तस्माद्युक्तः सदा
योगी प्राणायामपरो भवेत् श्रू
यतां मुक्ति फलदं तस्यावस्था च ।
तुष्टयं ध्वस्तिः प्राप्तिस्तथा संवित्

प्रसादश्च महीपते स्वरूपं शृणु चै
तेषां कथ्यमानं मनुक्रमात् कर्म
णा मिष्टदुष्टानां जायते फल संक्षयः
चेतसो विकषायत्वं यत्र सा ध्वस्ति
रुच्यते इष्ट दुष्टानां पुण्य पापानां
परिकामुष्मिकानां कामान् लोभ
मोहात्मकांस्तु यान् निरुध्यास्ते
सदा योगी प्राप्तिः सा सार्वकामि
की ॥ अतीतानागतानर्थान् विप्र
कृष्ट तिरोहितान् विजानातींदुस
र्क्षर्त्तग्रहाणां ज्ञानसम्पदा तत्प
प्रभावस्तु यदा योगी प्राप्नोति संवि
दं तदा संविदिति ख्याता प्राणाया
मस्य सा स्थितिः यांति प्रसादं येना
स्य मनः पंच च वायवः इंद्रिया
णींद्रियार्थाश्च स प्रसाद इति स्मृतः
शृणुष्व च महीपाल प्राणायाम
स्य लक्षणं युंजतश्च यथा योगं या
दृग्विहितमानसं इति मार्कण्डेय
पुराणे योगिचिकित्सा नामाध्यायः
अन्यच्च । प्राणाख्य मनिलं व
श्यमभ्यासात् कुरुते तु यत् प्रा
णायामः स विज्ञेयः सबीजो
बीज एव च परस्परेणाभिभवं प्रा
णापानौ यदा निलौ कुरुतः सद्वि
धानेन तृतीयः संयमात्तयोः त
स्याबालंबनवतः स्थूलरूपं द्विजोत्त

मं आलंबनं मनं तस्य योगिनो भ्र
मतः स्मृते पतेषां टीका । प्राणा
याम माह प्राणायाममिति । सबी
जः सालंबनो भगवन्मूर्त्तिध्यान
मंत्रजप सहितः । द्विविध स्यापि
तस्य पुन स्त्रैविध्यमाह परस्परेणे
ति । उच्छ्वासमनमुखेनासिकाभ्यां
वहिर्निर्गच्छति वायुः स प्राणः ।
निश्वासेनांतः प्रविशति वः सोऽ
पानः तत्र प्राणं हत्वा प्राणायामः
एव मपानं हत्वा प्राणहते रभिभ
पूरकाख्यः । एवमनेन परस्परा
भिभव प्रकार द्वयेन स प्राणाया
मो द्विधा तयोर्युगपत् संयमात्
कुंभकाख्य स्तृतीयः प्राणायामः
यद्वा सद्विधानेनेत्येक मेव पदं ।
तत्र चायमर्थः । सद्विधानेन सद्
गुरूपदिष्ट मार्गेण रेचक पूरका
भ्यायत् परस्पराभिभूतं द्वयं यत्र
कुंभकेनाभयोः सहाभिभवः प
वमभिभवत्रयेणैव प्राणायाम इ
ति सबीजस्यालंबनमाह तस्यैव
स्थूले वक्ष्यमाणे हिरण्यग ।
र्भो दिरूपे ॥ इति विस्णुपुरा
णे ६ अंशे ७ अध्यायः ॥
गायत्रीप्राणायामो ॥ यथा ।
सव्याहृतिं सप्रणवां गायत्रीं शि
रसासह । त्रिः पठेदायतप्राणः प्रा
णायामः स उच्यते प्राणायामत्र
यं कृत्वा प्राणायामैस्त्रिभि स्त्रिभिः
अहोरात्रकृतात् पापान्मुच्यते नात्र
संशयः सर्वपापहरं प्रोक्तं प्राणा
यामं द्विजन्मनां नतस्त्वभ्यधिकं
नास्ति तपः परम पावनं ॥ प्राणसं
धारणं मासं कुशाग्रच्युतविंदुना ।
यः कुर्यात् प्रयतो नित्यं प्राणायाम
स्तु तत्समः निरोधाज्जायते वायुः
स्तस्मादग्नि स्ततो जलं । त्रिभिः ।
शरीरं सकलं प्राणायामेन शुद्ध्य
ति आकेशाग्रान् नखाग्राच्च तपस्त
प्येत सदारुणं । आत्मानं शोध
येद्यस्तु प्राणायामैः पुनः पुनः
आवर्ण्या पौर्णमास्यां च सोपवासो
जितेंद्रियः प्राणायामशतं कृत्वा
मुच्यते सर्वकिल्विषैः इत्यग्नि ।
पुराणं । प्राणिद्यूतं क्ली पणपूर्व
कमेषकुक्कुटादियुद्धं तत्पर्यायः ॥
समाह्वयः २ इत्यमरः साह्वयः ३
इति शब्दरत्नावली ॥
प्राणिमाता स्त्री गर्भदात्रीक्षुपः
इति राजनिर्घण्टः ॥
प्राणिहिता स्त्री पादुका इति
त्रिकाण्डशेषः ॥
लोकहितकारिणी च ॥ प्राणी

त्रि प्राणविशिष्टः । मनुष्यादिः
तत्पर्यायः । चेतनः २ जन्मी ३
जंतुः ४ जन्युः ५ शरीरी ६ इति
मरः प्राणीत्व क्ली अरणं यथा ।
प्राणीत्यमरणं मर्त्यानां प्रयोगः
स्यात् कलाविकः इति त्रिकाण्ड
शेषः प्राणेशः पुं पतिः इति हे
मचंद्रः प्रातः अ प्रभाते तत्पर्या
यः प्रगे २ इत्यमरः सूर्योदयात्र
यि त्रिमुहूर्त्तकालः यथा प्रातः
कालो मुहूर्त्तास्त्रीन् संगव स्तावदे
वत्तु इति तिथ्यादितत्वं ॥
प्रातः कृत्यं क्ली प्रभातकर्त्तव्य
कर्म तदनुष्ठानं यथा ब्राह्मे मु
हूर्त्ते उत्थाय धर्म मर्थं च चिंतयेत्
कायक्लेशां स्तदुद्भूतान् ध्यायेन्म
नसेश्वरं उषः कालेऽभ्युदयतो मेहं कृ
त्वावावश्यकं बुधः । स्नायान्नदीषु
शुद्धासु शौचं कृत्वा यथाविधि प्रा
तः स्नानेन पूयंते ये पि पापकृतो
जनाः तस्मात् सर्व प्रयत्नेन प्रा
तः स्नानं समाचरेत् प्रातःस्नानं
प्रशंसंति दृष्टादृष्टकरं शुभं ऋ
षीणां ऋषिता नित्यं प्रातः स्ना
ना न्न संशयः मुखे सुप्तस्य ।
सततं लाला याः प्रस्रवंति हि
ततो नैवा ॥ ॥
चरेत् कर्माण्यकृत्वा स्नान मादितः
अलक्ष्मीः कालकर्णी च दुःस्वप्नं
दुर्विचिंतितं । प्रातः स्नानेन पापा
नि पूयंते नात्र संशयः । न च स्नानं
विना पुंसां पावनं प्रयदे स्मृतं ।
होमे जप्ये विशेषेण तस्मात् स्नानं
समाचरेत् अशक्ता वशिरस्कं वा
स्नानमस्य विधीयते आर्द्रेण वास
सा चाथ मार्जनं कायिकं स्मृतं अ
शयते समता पत्रे स्नानमेव स
माचरेत् ब्राह्मादीनि यथा शक्तौ
स्नानान्याहुर्मनीषिणः ब्राह्मा
ग्नेय महिष्टं वायव्यं दिव्य मेव च ।
वारुणं यौगिकं तद्वत् षोढा स्नानं
प्रकीर्त्तितं ब्राह्मं तु मार्जनं मंत्रैः कु
शैः सोदकविंदुभिः आग्नेयं भस्म
नापाद मस्तकादि विधूननं गवां
हि रजसा प्रोक्तं वायव्यं स्नानमुत्त
मं यत्तु सातपवर्षेण स्नानं तद्दि
व्य मुच्यते वारुणं चावगाहस्तु
मानसं त्वात्मवेदनं यौगिकं स्ना
नमाख्यातं योगो विष्णु विचिंतनं
आत्मतीर्थ मिति ख्यातं सेवितं
ब्रह्मवादिभिः मनः शुचिकरं
पुंसां नित्यं तत् स्नान माचरेत् श
क्तश्चेद्वारुणं विद्वान् प्राजापत्य
न्तथैव च प्रक्षाल्य दंतकाष्ठं वै भक्ष

पित्वाविधानतः आचम्यप्रयतो
निमंस्नानंप्रातःसमाचरेत् मध्या
गुल समसंयाल्पहाद्शांगुलसं
मिते सत्वचे दंतकाष्टस्यात्तस्या
ग्रणचधावयेत् क्षीरिवृक्ष सम
द्भूतंमालतीसंभवंशुभं अपामा
र्गंच बिल्वंच करवीरं विशेषतः
वर्जयित्वानिंदितानि गृहीत्वेनं य
थोदितं परिहृत्यदिनंपापंभक्षयि
त्वाविधानतः नोत्पाटयेद्दंतका
ष्टंनांगुल्याधावयेत् क्वचित् प्रक्षा
ल्यभुक्त्वा तज्जह्याच्छुचौदेशेसमा
हितः स्नात्वासंतर्पयेद्देवानृषीन्
पितृगणांस्तथा स्वमार्गमंत्रैरात्मा
नंकुशैःसोदकबिंदुभिः आपोहि
ष्ठाव्याहृतिभिःसावित्र्यावारुणैः
शुभैः ओंकारव्याहृतियुतांगाय
त्रींवेदमातरं जप्त्वा जलांजलिंद
द्यात्भास्करं प्रति तन्मनाः प्राक्
कूलेषु समासीनो दर्भेषु सम
माहितः प्राणायामत्रयंकृत्वा
ध्यायेत् संध्यामितिस्मृतिः या
संध्यासाजगत्सूति र्मायातीता
च निष्कला ऐश्वरीतु पराशक्ति
स्तत्वत्रयसमुद्भवा ध्यात्वार्कमंड
लगतांसावित्रींवैजपन्बुधः प्राङ्
मुखःसततंविप्रःसंध्योपासनमाचरे

त् संध्याहीनोऽशुचिर्नित्यमनर्हः
सर्वकर्मसु यदन्यत् कुरुते किंचि
न्न तस्य फलमाप्नुयात् अनन्यचे
तसः शांता ब्राह्मणा वेदपारगाः
उपास्य विधिवत्संध्यां प्राप्ताःपूर्व
रंगतिं योन्यत्र कुरुते यत्नं धर्म
कार्ये द्विजोत्तमः विहाय संध्या
प्रणतिं स याति नरकायुतं तस्मा
त्सर्वप्रयत्नेन संध्योपासनमाचरे
त् उपासितो भवेत्तेन देवो योगा
तनुः परः सहस्रपरमां नित्यं श
तमध्यां दशावरां सावित्रीं वै जपे
द्विद्वान् प्राङ्मुखः प्रयतः स्थितः
अथोपतिष्ठेदादित्यमुदयन्तं स
माहितः मंत्रैस्तु विविधैः सौरैरृ
ग्यजुःसामसंभवैः उपस्थाय म
हायोगं देवदेवं दिवाकरं कुर्वीत
प्रणतिं भूमौ मूर्ध्नानेन तु मंत्रतः
ओं खखोल्काय शांताय कार
णत्रय हेतवे निवेदयामि चा
त्मानं नमस्ते ज्ञानरूपिणे ॥
त्वमेव ब्रह्म परमं आपो ज्योती
रसोऽमृतं भूर्भुवःस्वस्त्वमोंका
रः सर्वे रुद्राः सनातनाः पुरु
षः सन्महोऽन्तस्त्वां प्रणमामि
कपर्दिनं ॥ त्वमेव विश्वं ब
हुधा सदसत् सूयसे च ॥

यत् नमो रुद्राय सूर्याय त्वामहं
शरणं गतः प्रचेतसे नमस्तुभ्य
मुमायाः पतये नमः नमोऽस्तु
नीलग्रीवाय नमस्तुभ्यं पिनाकि
ने विलोहिताय भर्गाय सहस्रा
क्षाय ते नमः नम उमापतये तुभ्य
मादित्याय नमोऽस्तु ते नमस्ते वज्र
हस्ताय त्र्यम्बकाय नमोऽस्तु ते प्रप
द्ये त्वां विरूपाक्षं महांतं परमेश्व
रं हिरण्मये गृहे गुप्तमात्मानं स
र्वदेहिनां नमस्यामि परं ज्योति ।
र्ब्रह्माणं त्वां परां गतिं । विश्वं पशु
पतिं भीमं नरनारी शरीरिणं न
मः सूर्याय रुद्राय भास्वते परमे
ष्ठिने उग्राय सर्वभक्षाय त्वां प्रप
द्ये सदैव हि एतद्वै सूर्य हृदयं ज
प्त्वा स्तवमनुत्तमं प्रातःकाले
थ मध्याह्ने नमस्कुर्याद्दिवाकरं
इदं पुत्राय शिष्याय धार्मिकाय
द्विजातये । प्रदेयं सूर्यहृदयं ब्रह्म
णा तु प्रदर्शितं सर्वपाप प्रशमनं
वेदसारं समुद्भृतं ब्राह्मणानां हि
तं पुण्यमृषिसंघैर्निषेवितं य
स्तु नित्यं पठेद्धीमान् स्वेदमादि
त्यमण्डलं । महापातकयुक्तोपि
पूयतेनात्र संशयः दयापस्मारकु
ष्ठैर्व्याधिभिः पीडितोपि सन्नमा

शतगुणं स्तोत्रसंख्यातो भवति द्रु
तं भूत ग्रह पिशाचानि वीजयन्ति स
न कर्हिभिः । स्तुवन् ध्यात्वा हरिंवि
प्रोमुच्यते महतो भयात् अथा
गत्य गृहं विप्रः समाचम्य यथावि
धि प्रज्वाल्य वह्निं विधिवज्जुहुया
ज्जातवेदसं ऋत्विक्पुत्रोथ पत्नी
वा शिष्यो वापि सहोदरः प्राप्यानु
ज्ञां विशेषेण जुहुयुर्वा यथाविधि
पवित्रपाणिः पूतात्मा शुक्लाम्बर
धरो नरः अनन्यमानसो भूत्वा जु
हुयात् संयतेन्द्रियः विना दर्भेण
यत्कर्म विना मंत्रेण वा पुनः राक्ष
सं तद्भवेत् सर्वं नामुत्रेह फलप्रदं
दैवतानि नमस्कुर्याद्देयसारान्निवे
दयेत् दद्यात् पुष्पादिकं तेषां वृ
द्धांश्चैवाभिवादयेत् गुरुंचैवाप्यु
पासीत हितं चास्य समाचरेत् ॥
वेदाभ्यासं ततः कुर्यात् प्रयत्ना
च्छक्तितो द्विजः । जपेदध्यापये
च्छिष्यान् धारयेच्च विचारयेत्
अवेक्ष्य च शास्त्राणि धर्मादीनि
द्विजोत्तमः वैदिकांश्चैव निगमा
न्वेदांगानि विशेषतः । उपेया
दीश्वरं चाथ योगक्षेमप्रसिद्धये
साधयेद्विविधानर्थान् कुटुम्बा ।
र्थे ततो द्विजः इति कौर्मे उपविभा




गे ९ अध्यायः अपिच प्रातः शि
रसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुं।
प्रसन्नवदनं शान्तं स्मरेत्तन्नाम पूर्व
कं ॐ नमो गुरवे तस्मा इष्टदेवस्व
रूपिणे यस्य वाक्यामृतं हन्ति वि
षं संसारसंज्ञकमिति पठेत् अ
हं देवो नचान्योऽस्मि ब्रह्मैवास्मि
नशोकभाक् सच्चिदानन्दरूपोऽहं
नित्यमुक्तस्वभाववान् इतिभाव
येत् लोकेश चैतन्यमयादिदेव
श्रीकान्तविष्णो भवदाज्ञयैव।
प्रातः समुत्थाय तवप्रियार्थं सं
सारयात्रा मनुवर्त्तयिष्ये जानामि
धर्मं नचमेप्रवृत्तिर्जानाम्यधर्मं
नचमेनिवृत्तिः त्वयाहृषीकेशहृ
दिस्थितेन यथानियुक्तोऽस्मि त
था करोमि विष्णुपुराणे मत्कृ।
ष्णितेयत्कर्ममनर्थचास्याविरोधिनं
अपीडयातयोः काममुभयोरपि
चिंतयेत् धर्मलक्षणं भविष्ये।
धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युद
य साधनं अतएव जैमिनिः चो
दनालक्षणोऽर्थोधर्म इति तेनवै
दिक लिंगप्रतिपाद्योऽर्थोधर्मः को
ऽर्थोयोऽभ्युदयाय इति भविष्ये॥
ततः ॐ प्रियदत्तायै भुवे नमः इ
तिनमस्कृत्यदतिलेचरणंमसेत्

छेहोगपरिशिष्टे श्रोत्रियं सुभगां
मग्निं गांचैवाग्निचितं तथा प्रात
रुत्थाय यः पश्येदापद्भ्यः सवि
मुच्यते। पापिष्ठं दुर्भगं मद्यं न
ग्नमुत्कृत्तनासिकं प्रातरुत्थाय
यः पश्येत्तत् कलेरुपलक्षणं।
अतएव व्यासः धनिनः श्रोत्रियो
राजा नदी वैद्यस्तु पंचमः पंच य
त्र नविद्यंते तत्रवासं नकारयेत् म
हाभारते। कर्कोटकस्य नागस्य
दमयन्त्या नलस्यच ऋतपर्णस्य रा
जर्षेः कीर्तनं कलिनाशनं मात्स्ये।
कार्त्तवीर्यार्जुनो नाम राजाबाहु
सहस्रभृत् योऽस्य संकीर्त्तयेन्नाम
कल्यमुत्थाय मानवः नतस्य
शः स्यान्नष्टंच लभते पुनः।
कल्यप्रातः। अथविण्मूत्रोत्सर्गः
विष्णुधर्मोत्तरे निष्क्रम्य ग्रामाद्बहिरा
मनिलमेवारुणोदये वेगात् सर्गं
ततः कृत्वा दंतधावन पूर्वकं॥
स्नानं समाचरेत् प्रातः सर्वकल्म
षनाशनं अरुणोदयकालमाह
स्कन्दपुराणे। उदयात् प्राक् चतस्र
स्तु नाडिका अरुणोदयः तत्रस्नानं
प्रशस्तंस्यात्सहि पुण्यतमं स्मृतं॥
नाडिकादंडः। विष्णुधर्मोत्तरे वेगा
रोधंनकर्त्तव्यमन्यत्रकोपवेगतः

आयुर्वेदीयेपि। नवेगितोऽन्यका
र्यसिद्धिः स्यात्रा जित्वा साध्यमा
मयं अंगिराः। उत्थाय पश्चिमे
रात्रेस्तत आचम्यचोदकं अंतर्द्धा
य तृणैर्भूमिं शिरः प्रावृत्य वाससा
वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वा
सवर्जितः कुर्यान्मूत्रपुरीषेतु
शुचौ देशे समाहितः विष्णुपु
राणे ततः कल्यं समुत्थाय कु
र्यान्मूत्रं नरेश्वर नैर्ऋत्यामिषुवि
क्षेपमतीत्याभ्यधिकं भुवः तिष्ठ
न्नातिचिरं तत्र नैव किंचिदुदीरये
त् कल्यमुषः काले मैत्रमित्रदे
वताकपायु संवेधात् पुरीषात्
सर्गः नैर्ऋत्यामुत्थान देशमार
भ्य उत्थायेत्यनेन उपस्थितेः इषु
प्र योग्यदेशाद्बहिः तद्देशप
रिमाणमाह पितामहः मध्यमे
नतु चापेन प्रक्षिपेत्तु शरत्रयं ह
स्तानांचशतेसार्द्धंलक्ष्यंकृत्वा वि
चक्षणः आपस्तंबः मूत्रपुरीषयो
रुत्सर्गं कुर्यात् दक्षिणां दिशं दक्षिणा
परां वेति दक्षिणा परां नैर्ऋती।
मनुः मूत्रोच्चार समुत्सर्गं दिवा
कुर्यादुदङ्मुखः दक्षिणाभिमुखो
रात्रौ सन्ध्ययोश्च यथा दिवा यत्न
यमवचने प्रत्यङ्मुखश्चपूर्वाह्णेत

पराह्णेच प्राङ्मुखः उदङ्मुखस्तु मध्या
ह्ने निशायां दक्षिणामुखः इति त
द्विज्ञा विकल्पार्थः सूर्याभिमुखत्वनि
रासार्थंच नतु नियमार्थं देवलश्चैव
न विरोधात् तथाचदेवलः सदैवो
दङ्मुखः प्रातः सायाह्ने दक्षिणामु
खः विण्मूत्रमाचरेन्नित्यं संध्यायां
परिवर्जयेदिति। अत्रप्रातः सायाह्न
शब्दो दिवारात्रिपरो पूर्वोक्तमनुव
चनैकवाक्यत्वात् संध्यायां परि
वर्जयेदिति तु पीडितेतरपरं यमः
कृत्वा यज्ञोपवीतंतु पृष्ठतः कंठले
म्बितं विण्मूत्रंच गृही कुर्याद्यद्वा क
र्णे समाहितः पृष्ठतः पृष्ठे कंठल
म्बितं निवीतं नतु पृष्ठलम्बितं निवी
तं मानुषे देशावलंबं ग्रामाधर्म
ष्विति नियम परिशिष्ट वचनात्।
नियम्य प्रयतो वाचं संवीतांगोऽ
वगुंठितः इतिमनुवचनाच्च अत्र
संवीतं निवीतं संवीतं मानुष इ
ति तैत्तिरीयश्रुतेः मानुषमनु
कादिकृत्ये पृष्ठलम्बितं निवीती
वेति बौधायनीयाच्च ततश्च हार
वत् कृत्वा पृष्ठलम्बितं स्कंधे इत्य
र्थः एकवस्त्रतापत्तेश्चवस्त्रा मा
ह सांख्यायनः यद्येकवस्त्रो य
ज्ञोपवीतं कर्णे कृत्वा प्रवगुंठितइति



कर्णे दक्षिणे पवित्रे दक्षिणे कर्णे
विण्मूत्रं समाचरेदिति स्मृतौ तथा द
र्शनात् अवगुण्ठितः कृतशिरोवगु
ण्ठनः मनुः छायायामन्धकारे वा
रात्रावहनि वा द्विजः यथा सुखमु
खः कुर्यात् प्राणबाधभयेषु च ॥
महाभारते प्रत्यादित्यं प्रतिजलं
प्रतिगां च प्रतिद्विजं । मेहंति ये च
पथिषु ते भवंति गतायुषः यतिः
सांमत्ये मनुः न मूत्रं पथि कुर्वी
त न भस्मनि न गोव्रजे न फालकृ
ष्टे न जले न चित्यां न च पर्वते । न जी
र्णे देवायतने न वल्मीके कदाचन
न ससत्वेषु गर्तेषु न गच्छन्नापि
संस्थितः न नदी तीरमासाद्य न
च पर्वत मस्तके गवाग्निविप्रा
नादित्य मपः पश्यं स्तथैव च न
कदाचन कुर्वीत विण्मूत्रस्य विस
र्जनं ससत्वेषु प्राणिमत्सु सं
स्थितः उत्थितः पर्वत निषेधादे
व मस्तक निषेधे सिद्धे पुनर्निषे
धो यत्र पर्वतोः प्राक्त परीहारस्त
त्रापि मस्तक वर्जनार्थः अथवा पर्वत
मस्तक निषेधोधिकदोषाय वशि
ष्ठः आहार निर्हार विहार योगाः स
संवृता धर्म विदा तु कार्याः वाग्बु
द्धिगुप्तीच तपस्तथैव धनायुषी गुप्त

तमे न कार्ये निर्हारो मूत्र पुरीषो
त्सर्गः विहारः स्त्री संभोगः यो
गः समाधिः वाग्गुप्तिरप्रभाला
पत्यागः बुद्धिगुप्तिरनिष्टचिंतात्या
गः हारीतः आहारं तु रहः कुर्या
न्निर्हारं चैव सर्वदा । गुप्ताभ्यां ल
क्ष्मीपतेः स्यात् प्रकाशे हीयते त
था विष्णुपुराणे सोमाग्न्यर्कानिला
पुणां पूज्यानां च न संमुखं कुर्या
त् ष्ठीवन विण्मूत्र समुत्सर्गं च पं
डितः आपस्तंबः न च सोपानत्कं
मूत्रपुरीषे कुर्यादिति बृहन्मनुः
करगृहीत पात्रेण कृत्वा मूत्रपुरी
षके मूत्रं तु अल्पपानीयं पीत्वा चांद्रा
यणं चरेत् । भरद्वाजः अथावक्ष
छविण्मूत्रे लोष्टकाष्ठतृणादिना
उद्धृतवासा उत्तिष्ठेत् दृढविधृतमेह
नः उद्धृतवासाः कटिदेशादुद्धृतेति
मवस्त्रः । अथ शौचं देवलः प
श्चिमे दक्षिणहस्तमथः शौचं न
योजयेत् तथैव वामहस्तेन नाभेर
र्द्धं न शोधयेत् प्रकृति स्थितिरेषा
स्यात् कारणादुभय क्रिया कारणा
द्रोगादेः । ब्रह्माण्डपुराणे उद्धृतोद
कमादाय मृत्तिकां चैव वाग्यतः उ
दङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणा
मुखः सनिर्णिक्ते मेद दद्यात्तु ॥

दंते तप यवच कुर्यात् शौच मिति
शेषः सनिर्णिक्ते भरद्वाजोक्त लो
ष्टादि प्रमृष्टे गुदे उदकपात्राभा
वे करेण जलाशयात् उदक ग्र
हणमाह आदित्यपुराणे रत्निमा
त्रे जलं त्यक्त्वा कुर्याच्छौचं मनुद्धृते
पश्चाच्च शोधयेत्तीर्थमन्यथा न शु
चिर्भवेत् तस्मिन्देशे शौचं कर्त
व्यं यस्मादुद्धृतमात्र व्यवहितं जलं
तत्स्थलमेव तीर्थं जलसमीपत्वा
त् विष्णुपुराणे वल्मीक मूषिको
त्खातां मृदं मंतर्जलां तथा शौचा
वशिष्टां गेहाच्च नादद्याल्लेपसंभ
वां अंतः प्राण्यवपन्नां च हलोत्
खातां सकर्दमां मनुरद्वौ एका
लिंगे गुदे तिस्रः तथा वामकरे
दश उभयोः सप्त दातव्या मृदः
शुद्धिमभीप्सता उभयोः करयोः
वामहस्ते दशदानानंतरं तत्पृष्ठे
षट्दानमाह हारीतः दशमध्ये
च षट् पृष्ठे इति शंखदक्षौ तिस्रः
स्रः मृत्तिकाः देयाः कृत्वा तु नख
शोधनं तिस्रस्तु पादयोर्देयाः शु
द्धिकामेन नित्यशः नखशोध
नं तृणादिना नखेन मलशोधनं
तिस्र इति हस्तयोरिति शेषः पाद
प्रक्षालनं तु न कांस्ये कर्त्तव्यमाह वि

ष्णुधर्मोत्तरे दर्भैर्न मार्जयेत् पादौ न
च कांस्ये प्रधावयेत् दक्षः लिंगे तु
त्र समाख्याता त्रिपर्वी पूर्यते यया
अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्ति
का स्मृता द्वितीया च तृतीया च त
दर्द्धं परिकीर्तितं गृहीतु उक्त प्रमा
णया मृदा गंधलेपक्षयो न भवति
तदा अधिकयापि कर्तव्यं गंधलेप
क्षयकरं शौचं कुर्यादतंद्रितः इति
याज्ञवल्क्य वचनात् गुदादन्यत्र
परिमाणमाह यमः मृत्तिका तु स
मुद्दिष्टा त्रिपर्वी पूर्यते यया त्रिप
र्वी तर्जनी मध्यमानामिकानामग्र
पर्वत्रयं मूत्रमात्रे तु मृत्तिः एका
लिंगे मृदं दद्यात् वामहस्ते तु मृत्त्रयं
उभयोर्हस्तयोर्द्वे तु मूत्र शौचं प्रकी
र्तितं ब्रह्मपुराणे । पादयोर्द्वे गृहीता
च सम्यक्षालित पाणिमान् द्विराच
म्य ततः शुद्धः स्मृत्वा विष्णुं सनातनं
पादयोर्द्वे एकैका इदं मूत्रे पुरीषो
त्सर्गे तिस्रः प्रविधानात् दक्षः
यच्छौचं दिवा शौचं तदर्द्धं रात्रौ वि
धीयते आतुरे च तदर्द्धं स्यात् मार
र्द्धं तु पथि स्मृतं ॥ यथोक्त कर
णाशक्तौ वेदेन तु निशादि पु
रस्कारेण वा कार्यमाह दक्षः यथा
पेतः ॥ आपस्तम्बः पथि पा

दत्त विज्ञेय आर्त्तः कुर्याद्यथाव
लं यतयो विशेषस्तु आर्त्तानामा
भापविहरणीयः दक्षः देशंका
लं तथात्मानं द्रव्यं द्रव्यप्रयोजनं
उपपत्तिमवस्थां च ज्ञात्वा शौचं
प्रकल्पयेत् ब्रह्मपुराणे तथा
वडुपनीयेत द्विजः शूद्रस्तथांग
ना गंधलेपक्षयकरं शौचं तेषां
विधीयते प्रमाणं शौचसंख्या।
वा न शिष्टैरुपदिश्यते यावच्छ
मुद्धिं मन्येत तावत् शौचं समा
चरेत् दक्षः न्यूनाधिकं न क
र्तव्यं शौचं शुद्धिमभीप्सता प्राय
श्चित्ते प्रसज्जेत विहितातिक्रमे कृ
ते शौचाचारविहीनस्य समस्ता
निष्फलाः क्रियाः गंधलेपक्षये
समधिकं न कर्तव्यं पूर्वोक्त याज्ञव
ल्क्य विरोधात् गंधलेपाक्षयेत्वधि
कसंख्यापि याज्ञवल्क्यवचनेन म
नुपनीतादिपरं वा पूर्वोक्तं ब्रह्म।
पुराणेववाक्यात् यत्तच्छौचं गृ
हस्थानां द्विगुणं ब्रह्मचारिणां त्रि
गुणं तु वनस्थानां यतीनां च चतुर्गु
णं इदं तु देशकालादिकं संख्यामात्रे
तरं नेतराभिधानात् आत्रेयपादः शौ
चं तु द्विविधं प्रोक्तं बाह्यमाभ्यंतरं तथा
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथा

परं गंगातोयेन कृत्स्नेन मृद्भारैश्च
नगोपमैः आमृत्योः स्नातकश्चैव
भावदुष्टो न शुध्यति ॥ स्मृतिः।
पादं तं च प्रमेतं च मूत्रोच्चारकृतं त
था भुंजानमाचमानं च नास्तिकं ना
भिवादयेत् जन्मप्रभृति यत्किं।
चित् चेतसा धर्ममाचरेत् सर्वं त
न्निष्फलं याति एकहस्ताभिवादना
त् कूर्मपुराणः यस्मिन् स्थाने कृतं
शौचं वारिणा तद्विशोधयेत् न मृ
द्भिस्तु भवेत्तस्य मृत्तिका यो न शो
धयेत् शौचानंतरं हारीतः गोम
येन मृदा वा कमंडलुं प्रमृज्य।
पूर्ववदुपस्पृश्य आदिमेसोमम
ग्निं वा वीक्षेतेति अत्र मार्जनान
तरं क्षालनं अन्यत्र तथा दर्शना
त् आचमनानंतरं स्यादिमादि
दर्शनं यथासंभवं। शौचं कृत्वा
मूत्रोच्चारं न पश्येत् दृष्ट्वादित्यम
ग्निं सोमं वा पश्येदिति अथाच
मनविधिः। दक्षः। प्रक्षाल्य पा
णी पादौ च त्रिः पिबेदंबुवीक्षितं
संहृत्यांगुष्ठमूलेन द्विः प्रमृज्यात्त
तो मुखं। संहृत्य तिसृभिः पूर्वमा
स्यमेवमुपस्पृशेत् अंगुष्ठेन प्र
देशिन्या घ्राणं पश्चादनंतरं अं
गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रे पुनः

पुनः नाभिं कनिष्ठांगुष्ठेन हृदयं त
तलेनैव सर्वाभिस्तु शिरः पश्चाद्बा
हू चाग्रेण संस्पृशेत् ॥ पादप्रक्षा।
लने विशेषयति देवलः। प्रथ
मं प्राङ्मुखः स्थित्वा पादौ प्रक्षाल
येत् शनैः उदङ्मुखो वा दैवत्ये पै
त्र्ये दक्षिणामुखः शनैरवरः
दैवपैत्रके तु आपस्तंबः प्रत्य
क् पादावसेचनमिति। प्रत्यक्
पश्चिमाभिमुखः क्रममाह।
गोभिलः। सव्यं पादमवनेनिज
इति सव्यं पादं प्रक्षालयेत्। द
क्षिणं पादमवनेनिज इति दक्षि
णं पादं प्रक्षालयेदिति अर्हणी
ये तथा दर्शनात् सर्वत्र तथा क
ल्पने पारस्करः। सव्यं पादं प्रक्षा
ल्य दक्षिणं प्रक्षालयतीति सू
त्रेण प्राक् सव्यपादप्रक्षालने
सिद्धे सव्यं प्रक्षाल्य दक्षिणं प्र
क्षालयतीत्यत्र सव्यग्रहणं सा।
मान्यार्थं तेनान्यस्यापि पादप्र
क्षालने सव्यस्यैव प्राथम्यं अ
न्यार्थं पुनर्वचनमिति न्यायात्
अस्मार्थमधिकार्थं ब्राह्मणश्च
दक्षिणं प्रथममिति सूत्रे तस्य
पादौ यदि ब्राह्मणः प्रक्षालय।
ति तदा दक्षिणं प्रथममिति ते
सव्यं यथा प्रक्षालयतीत्यनुष्ठेना

आश्वलायनः दक्षिणमग्रे ब्राह्मणा
यप्रयच्छेत् सव्यं शूद्रायेति। स्वयं प्र
क्षालने सव्यस्यैव प्राथम्यं इति पं
वे हरिशर्मापि आचमने पाणिपा
दप्रक्षालने मूत्रायुत सर्गी यथा
हेद्वपराशरः कृत्वा च शौचं प्र
क्षाल्य हस्तौ पादौ च मृज्जलैः नि
बद्धशिख आसीनो द्विज आचमनं
चरेत् कृत्वोपवीतं सव्यांसे वाग्मनः
कायसंयतः आपस्तंबः इत्येव
मद्भिराजानु प्रक्षाल्य चरणौ पृथक्
हस्तौ चामणिबंधाभ्यां पश्चादासी
नसंयतः आजानुभ्यामणिबंधा
भ्यां मित्यवधृपादाने तत्पर्यंता
भुचिलशौकायां अथ श्रमापनोद
नाय अतिशय शौचाय वा। अत्र
पदोक्तं अंग प्रकर्षात् फलप्रकर्ष
इति। शिखाबंधने विशेषमाह
ब्रह्मपुराणे गायत्र्या तु शिखां बद्ध्वा
नैऋत्यां ब्रह्मरंध्रतः। जूटिकां च त
तो बद्ध्वा ततः कर्म समाचरेत्। पिबे
दित्यत्रानुजानाह याज्ञवल्क्यः अं
तर्जानु शुचौ देशे उपविष्ट उदङ्मु
खः प्राग्वा ब्राह्मेण तीर्थेन द्विजो
नित्यमुपस्पृशेत् अंतर्जानु जानुनो
र्मध्ये हस्तौ कृत्वेति शेषः। वाश
हादीशानाभिमुखः ईशानाभिः



मृत्वा भूत्वोपस्पृशेत् यथा विधि।
इति मरीच्युक्तेः। ब्राह्मेण तीर्थेन
अंगुष्ठमूलेन कनिष्ठदेशिन्यंगुष्ठ
मूलान्यग्रकरस्य च प्रजापतिपि।
त्र्यवल देवतीर्थान्यनुक्रमादिति
याज्ञवल्क्यात् दक्षिणी तर्जनी क
रस्य दक्षिणस्य यथा मार्कण्डेयपु
राणे अंगुष्ठोत्तरतो रेखा या पाणेर्द
क्षिणस्य च एतद्ब्राह्ममिति ख्यातं
तीर्थमाचमनाय वै अग्रहितेन।
स्त्रीशूद्राविति मिताक्षरा अत एव
स्त्रिया स्वदक्षिणकतीर्थं शूद्रजातेस्त
थैव च सकृदाचमनाच्छुद्धिरेतयो
रेव चोभयोः ब्राह्मतीर्थावरोधेन
मनुः कायत्रैदशिकाभ्यां वा न पि
त्र्येण कदाचन उक्ततीर्थत्रयस्य ब्र
ह्मणादिना व्यत्यये करमध्यात्मका
ग्न्येनापि एवं च सर्वाविरोधस्तु व।
र्णादि पात्रेणाप्याचमनं कार्यं स्व
यमसामर्थ्येऽन्येनाचमने कारयित
व्यं याज्ञवल्क्यः अद्भिस्तु प्रकृति
स्थाभिर्हीनाभिः फेनबुद्बुदैः हृत्
कंठतालुगाभिस्तु यथा संख्यं द्विजा
तयः शुध्येरन् स्त्री च शूद्रश्च सकृत्
स्पृष्टाभिरंततः अंततः ओष्ठपात उ
त्तरोत्तर मपकर्षात् अत एव स्पृष्टा
भिरंकेन नभविताभिरिति सौम्य

द्रो वाथ नित्योऽभः क्षालनाच्च करौ
हृद्यो विति ब्रह्मपुराणाच्च। आच
मनार्थं पाणिपादप्रक्षालनमे
वेत्येके इति शूद्राधिकारे गौतमो
क्तेश्च आचमनार्हजलाभावे इद
मित्याचाराध्यायः मनुः हृद्गाभिः
पूयते विप्रः कंठगाभिस्तु भूमि
पः वैश्योऽद्भिः प्राशिताभिस्तु
शूद्रः स्पृष्टाभिरंततः अत्रैवैश्या
वधि प्राशनमुक्तं अनुपनीता
नां स्त्रीशूद्रवदाचमनं न यावदु
पनीयेत। इति प्रागुक्तशौचे तथा
दर्शनात् मिताक्षरादयोऽप्येवं
अंत्रेषु विशेषयति बौधायनः।
पादप्रक्षालनाच्छेषेण नाचाम
त् यद्याचामेत् भूमौ स्रावयित्वा
चामेदिति उशनाः कांस्यायसे
न पात्रेण त्रपुसीसकपित्तलैः।
आचांतः शतकृत्वोऽपि न कदाचि
च्छुचिर्भवेत् कांस्यादिपात्रकर
णकाचमने कांस्यायसेनेत्यादि
ना निषिद्धमिति केचित् हस्ते
नाचमनेऽपि कांस्यादिपात्राव
र्जिते न निषिद्धमित्यपरे आच
मनजलनिषेधेऽशक्तौ लिखितो
न शूद्राशुच्येकपाण्यावर्जितेने
ति ग्रामाशुचिपदं आचमन क
र्तृभिन्नपरं शूद्रसाहचर्यात्॥

एकपाणिपदमपि आचमनकर्तृ
भिन्नपाणिपरं तेन स्वीयवामपा
ण्यावर्जितमनिषिद्धं तथा च कर्म
उत्वधिकारे बौधायनः मूत्रपुरीषे
कुर्वन् दक्षिणहस्तेन गृह्णाति स
व्येनाचमनीयमिति गृह्णाति जल
पात्रमिति शेषः। आचामेदित्यनुवृ
त्तौ देवलः शिखां बद्ध्वा वसित्वा द्वे
निर्णिक्ते वाससी शुभे तूष्णीं भूत्वा
समादाय नोद्धृत्य विलोकयन्।
एकवस्त्रः प्राचीनावीतीन इत्या
दि पारस्कर दर्शनात् यत्रैतत्स्ना
न तर्पणादौ एकवस्त्रत्वविहितं तत्
प्रतदंगत्वादेकवासा एवाचमनेऽ
प्यांत् प्रचेताः अनुस्नाभिरफेना
भिः पूताभिर्वीतधूपवत्तया हृद्गता
भिरशाद्वाभिस्त्रिश्चतुर्वाद्विराचमे
त् चतुर्वेति भाव शुद्ध्यपेक्षया वि
कल्पः ननु फलभूयस्त्वार्थकल्प
नागौरवापत्तेः वीक्षणानुसरयोर्भ
हुभाष्या माधवाचार्योक्तपराशर
भाष्ये यो परवादमाह यमः गाव
वीक्षितेनापि शुद्धिरुक्ता मनीषि
भिः उदकेनात्रराण्ये च तथाप्यमेनास
पायिनां आचामेदित्यनुवृत्तौ वसिष्ठः
शूद्रादपि या गोस्तर्पणाय स्युर्नैव।
र्णरसदुष्टाभिर्याश्च स्युरशुभागमाः

इति प्रदेशो विदीर्णो भूभागः अग्नि
भागगाः अग्निविदग्धादागताः।
यस्मिन्देशे वर्णादिदुष्टमेव तोयं
तत्र तदपि ग्राह्यं तथा च मरीचिः
येषु स्थानेषु यच्छौचं धर्माचारश्च
यादृशः तत्र तन्नावमन्येत धर्म
स्तत्रैव तादृशः येषु स्थानेषु ये
देवा येषु देशेषु ये द्विजाः येषु
स्थानेषु यत्तोयं याचयत्रैव मृ
त्तिका आचमने उदकग्रहणप्र
कारं परिमाणं चाह भरद्वाजः।
आयतं पर्वणोः कृत्वा गोकर्णाकृ
ति वत्करं संहतांगुलिना तोयं
गृहीत्वा पाणिना द्विजः मुक्तांगु
ष्ठकनिष्ठाभ्यां शेषेणाचमनं च
रेत् माषमज्जनमात्रास्तु संगृह्य
त्रिः पिबेदपः। पाणिना दक्षिणे
न त्रिः पिबेद्दक्षिणेनापि इत्या
दिपुराणोक्तेः मार्कंडेयः स
व्येन हस्तेन कुर्यादाचमनक्रि
यां नोच्छिष्टेन न पवित्रेन भुक्तो
च्छिष्टं तु वर्जयेत् मदनपारिजा
ते तु: ग्रंथिर्यस्य पवित्रस्य तेनाच
मनं चरेत् ग्रंथनाद्ग्रंथिरिति स
मुद्रकरेऽपि आचमनानुष्ठानं दे
वलः नागच्छन्न शयानश्च न च
लन्न पतन्न स्पृशन् न हसन्नेव स

जल्पमानान्नैचैववीक्षयन् चलन्
कम्पमान इति रत्नाकरः आत्मानं
आत्मस्थानेऽरुदयं वीक्षयन्निति ॥
स्वार्थेलिव केशान्नीवीमधःकायं
नस्पृशन् धरणीमपि यदिस्पृशति
चैतानि भूयः प्रक्षालयेत्करं अ
धःकायं नाभेरधःप्रदेशं अधःका
यं नाभेरधःप्रदेशं करे दक्षिणे आ
चमनात्तु हैमोगोभिलः नांतरी
येकदेशेन कल्पयितोत्तरीयक
मिति। अंतरीयमधःपरीधानं
तदेकदेशमुत्तरीयं कृत्वा मरीचिः
न बहिर्जानु हस्तस्यात्तासनस्थो
न चोत्थितः न पाङ्क्तास्यो नाम्बै
नैःश्रुचिःप्रयतमानसः उपस्प
र्शद्विजोनित्यमुदङ्ः प्राङ्मुखो भवेन्नरः
भुक्कासनस्थो नाचामेन्मान्यका
लेकदाचन जलस्थलोभयक।
सीजुष्ठानार्थेन जलस्थलेकचर
णेनाचमनं कर्त्तव्यमित्याह पैठी
नसिः अंतरुदके आचांतोऽन्तरेव
शुद्धः स्यात् बहिरुदके आचांतो
बहिरेव शुद्धः स्यात् तस्मादन्तरेकं
बहिरेकं च कृत्वा पादमाचामेत्
सर्वत्र शुद्धो भवतीति जलेऽन्तिष्ठ
न्नाचामेत् जानोरूर्ध्वं जले तिष्ठन्ना
चान्तः शुचितामियात् अधस्तात्स्नान

कृत्वोपि समाचांतो न शुध्यतीति वि
ष्णुः हारीतः आर्द्रवासा जले कुर्या
त्तर्पणाचमने जपं शुष्कवासाः स्थले
कुर्यात्तर्पणाचमने जपं कात्यायनः।
स्नानमाचमनं होमं भोजनं देवतार्च्चनं
प्रौढपादो न कुर्वीत स्वाध्यायं पितृत
र्पणं आसनारूढपादस्तु जानुनो
र्जंघयोस्तथा कृत्वावसक्थिकोय
स्तु प्रौढपादः स उच्यते आसनारूढ
पादः आसनमारोपितपादतलः जानु
नोर्जंघयोः कृत्वावसक्थिकोवस्त्रा
दिना कृतपृष्ठजानुजंघाबंधः तद्वये
न भेदप्रतीतेः प्रौढपादस्य द्विविध
त्वं प्रतीयते अत एव अनेन कौशाल
दीक्षितिले भूमिसमेरुपकाश्रमको
र्णोभूत्वा इति बोधायन वचनान्नयावि
ये आरूढपादोपि कुर्यात् व्यासः शि
रःप्रावृत्यकंठं वा मुक्तकच्छशिखोपि
वा अकृत्वा पादयोः शौचमाचांतोऽप्य
शुचिर्भवेत् तथा अपः पाणिनखा
ग्रेण आचामेद्यस्तु ब्राह्मणः सुरा
पानेन तत्तुल्यमित्येवमब्रवीत्
संहत्येति मनुर्वसंहत्य अंगुलीमकोष्टस
र्शी यथा न भवतीति तात्पर्यं तथा
च वशिष्ठः आचांतः पुनराचामेद्वा
सो विपरिधाय च ओष्ठौ च संस्पृश्य न
था यत्रस्यातामलोमकौ एवं च मा
र्जने हारीतवचने ओष्ठयोर्मार्जनं ॥

मृष्टं तत्सलोमकयोरेवेति। एत
दनंतरं वामहस्तं पादौ शिरश्च द
क्षिणेन पाणिनाऽभ्युक्षयेत् तथा
च कामधेनावापस्तंबः त्रिराचा
मेत् हृद्वाभिर्द्विरोष्ठौ परिमृजेत्
द्विरित्येके दक्षिणेन पाणिना स
व्यं प्रोक्ष्य पादौ शिरश्चेति गोभिलः
त्रिराचामेत् द्विःपरिमृजीत पादा
वभ्युक्ष्य शिरोऽभ्युक्षयेदिति इंद्रि
याण्यद्भिः स्पृशेत् अक्षिणी ना।
सिके कर्णाविति इंद्रियाणि इंद्रि
यायतनानि इंद्रियाणाममूर्त्तत्वात्
तिस्रभिरिति तर्जनीमध्यमाना
मिकाभिः सर्वांगुष्ठयोगेन आच
मनकारणमाह पैठीनसिः अग्निर
गुष्ठस्तस्मात्तेनापि सर्वाणि स्थाना
नि स्पृशेत् निष्ठीवनादावाचमनं
यथा वायुपुराणे। निष्ठीवने तथा
भ्यंगे तथा पादावसेचने उच्छिष्टस्य
च संभाषाद्शुच्युपहतस्य च संदे
हेषु च सर्वेषु शिखां मुक्त्वा तथैव च
विना यज्ञोपवीतेन नित्यमेव उपस्प
र्शेत् उष्ट्रवायससंस्पर्शे दर्शने वा त
वासिनां हारीतः सीम्नोच्छिष्ट
संभाषणे मूत्रपुरीषोत्सर्गदर्शने
देव महितांतकाभ्रं आचामेदिति।

याज्ञवल्क्यः स्नात्वा पीत्वा क्षुते सु
प्ते भुक्त्वा रथ्योपसर्पणे आचान्तः पु
नराचामेद्वासो विपरिधाय च ब्रह्म
पुराणे होमे भोजनकाले च संध्य
योरुभयोरपि आचान्तः पुनराचा
मेदन्यत्रापि सकृत् सकृत् द्विरा
चम्य ततः शुद्धः स्मृत्वा विष्णुं स
नातनं स्मृतिः स्नाने निष्ठीविते
तथा परिधानेऽश्रुपातने कर्म।
स्य एष नाचामेत् दक्षिणं श्रवणं
स्पृशेत् अत्र हेतुमाह पराशरः
प्रभासादीनि तीर्थानि गंगाद्याः
सरितस्तथा विप्रस्य दक्षिणे क
र्णे वसंतीति मनुरब्रवीत् सांख्या
यनः आदित्या वसवो रुद्रा वायु
रग्निश्च धर्मराट् विप्रस्य दक्षिणे
कर्णे नित्यं तिष्ठंति देवताः पुरा
णसार वायुपुराणयोः यः क
र्म कुरुते मोहादनाचम्यैव ना
स्तिकः भवंति हि वृथा तस्य
क्रियाः सर्वा न संशयः ॥ अथ
दंतधावनं तत्र शातातपः ॥
मुखे पर्युषिते नित्यं भवत्यप्र
यतो नरः तस्मात् सर्वप्रयत्ने
न भक्षयेद्दंतधावनं आहदिना
दौ तस्य वर्जनं यथा विष्णुः आह
जन्मदिने चैव विवाहे जीर्णे संभवे

अन्नेनैवोपवासेन वर्जयेद्दंतधावनं ।
दंतदावनमयाङ्गदं मुखः सोमस्त्वोवे
ति दंतलग्नस्य दंतलग्नत्वं यथा गोत
मः दंतश्लिष्टे दंतवदन्यत्र जिह्वाभिम
र्षणात् प्राक्च्युतेरित्येके च्युतेरा
स्राववद्विद्यान्निगिरन्नेव तत् शुचि
रिति जिह्वाभिमर्षणाद्योगपदेन ।
लग्नस्पर्शेनावगतकं न भवतीत्यर्थः
इदं चानुपलभ्यमानरसविषयं, दं
तवदंतलग्नेषु रसवर्ज्जमिति शंखव
चनात् जिह्वाभिमर्षणेपि प्रशौ
चाहरणेन दोषः भोजने दंतल
ग्नानि निर्हृत्याचमनं चरेत् दंतल
ग्नमसंहार्य्यं लेपं मन्येत दंतवत् ।
न तत्र कुर्य्यादृक्रशो यत्नमुद्धर
णे पुनः भवेदशौच मत्यर्थं तृण
वेधाद्व्रणे कृते इति देवलवचनात्
च्युतेष्वनुपलभ्यमानरसविषयं
आस्रावो लाला तद्वन्निगिरन्नित्य ।
र्थः अत एव श्रीणि ते यथा न भ
वति तथा तृणादिना दंतलग्नैः
सारणाचरणे द्वेदोपविशिष्टं ।
नारदपुराणेवानेयं प्रदेशांगुलमपा
टितं सत्वचं दंतकाष्ठं स्यात्तदग्रे
ण धावयेत् उत्थाय नेत्रे प्रक्षाल्य
शुचिर्भूत्वा समाहितः परिजप्य
त मंत्रेण भक्षयेद्दंतधावनं आयुर्व

लं यशो वर्च्चः प्रजाः पशु वसूनि च
ब्रह्मप्रज्ञां च मेधां च त्वं नो धेहि व
नस्पते शुचिर्भूत्वा द्विराचमनेन
ति शेषः नरसिंहपुराणे दंतका
ष्ठस्य वक्ष्यामि समासेन प्रशस्त
तां सर्वे कंटकिनः पुण्याः क्षीरि
णश्च यशस्विनः प्रमाणं स्योल्प
चाह विस्तः । कनीन्यग्रनिभस्थौ
ल्य सकूर्च्चं द्वादशांगुलं प्रातर्भू
त्वा च यतवाक भक्षयेद्दंतधावनं ॥
प्रक्षाल्य भुक्त्वा तज्जह्यात् शुचौ देशे
समाहितः सकूर्च्चं दलिनाग्रे द्वाद
शांगुलेन विप्राणां क्षत्रियाणां नवां
गुलं अष्टांगुलेन वैश्यानां शूद्रा
णां तु षडंगुलं भक्षयेत् शास्त्रदृष्टा
नि पर्वस्वपि च वर्जयेत् तिथिवि
शेषे तस्य वर्जनं यथा नरसिंहपुरा
णे प्रतिपद्दर्शषष्ठीषु नवम्यां चैव
सत्तमाः दंतानां काष्ठसंयोगाद्द
हत्यासप्तमं कुलं अलाभे दंतकाष्ठा
नां प्रतिषिद्धदिने तथा अपां द्वा
दशगंडूषैर्मुखस्य शुद्धिर्विधीयते ।
गारुडस्य दंतकाष्ठ कार्य्यकालि
लेपि न तत्र मंत्रान्वयः शातातपः प्र
तिपद्दर्शषष्ठीषु नवम्यां दंतधावनं ।
पर्णैरन्यत्र काष्ठैश्च जिह्वोल्लेखः स
दैव हि ॥ यथा ॥ ॥

कादि पत्रैर्दन्तधावनं निषिद्धं य
था क्रियाकौमुद्यां वशिष्ठः । गुवा
कतालहिंतालस्तथा ताडी च के
तकी खर्ज्जूरनारिकेलौ च सप्तैते ।
तृणराजकाः तृणराजशिरापत्रै
र्यः कुर्य्याद्दंतधावनं तावद्भवति
चांडालो यावद्गंगां न पश्यति यदा
प्रारभ्यापि याज्ञवल्क्यः नेष्टका
लोष्टपाषाणैरितरांगुलिभिस्त
था त्वक्ता अनामिकांगुष्ठौ वर्जये
दंतधावनं ॥ प्रचेताः मध्याह्नस्ना
नकाले तु यः कुर्य्याद्दंतधावनं नि
राशास्तस्य गच्छंति देवाः पितृग
णैः सह स्मृतिः वमनं जंभणा
नं च कुर्वंतं दंतधावनं अभ्यक्तशि
रसं चैव स्नांतं नैवाभिवादयेत् हारी
तः शुचिं देवाभिरक्षंति पितरः शु
चिमन्विषुः शुचे विभ्यति रक्षांसि
येचान्ये दुष्टचारिणः तथा स्नानं
दानं तपस्त्यागो मंत्रकर्म विधि ।
क्रियाः मंगलाचारनियमाः शौच
भ्रष्टस्य निष्फलाः शौचं तु द्विविधं
प्रोक्तं बाह्यमाभ्यन्तरं तथा मृज्ज
लाभ्यां भवेत् बाह्यं भाव शुद्धिस्त
था परं अथ प्रातःस्नानं संध्या व
ह्मपुराणे प्रातःस्नानं ततः कृत्वा
संक्षेपेण यथोदितं संध्यां चापि ।

तथा कुर्य्यात् नित्यनैमित्तिके त
था कात्यायनः । यथाहनि तथा
प्रातर्नित्यं स्नायादनंतरं दंतान्
प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रव
त् दंतान् प्रक्षाल्य प्रातरनंतरः
स्नायात् प्रातरं विशेषयति स्रा ।
पूर्व्वदीये स्नानमर्हति नेत्रास्यक
र्णरोगातिसारेषु आध्मानपीन
साजीर्ण भुक्तवत् स च गर्हितः तत्
कालमाह विस्तः । प्रातः स्नायादरु
णकिरणग्रस्तां प्राची मवलोक्य
स्नायात् इति समुद्रकरश्रुते म
त्तिका तिलकं कुर्य्यात् स्नात्वाऽकृ
त्वा च भस्मना दृष्टदोषविधाना
र्थं चोशलाध्यादिदर्शने उशनाः
अभावे तदकेनापि पितृदेवत म
र्च्चयेत् ब्रह्माण्डपुराणे कर्माद्दा
तिलकं कुर्य्यात्तु पत्रैहस्त्वं परं ।
गोप्रदानं जपो होमः स्वाध्यायः पि
तृतर्पणं भस्मी भवति तत्सर्वम
र्द्धपुंड्रं विना कृतं ब्रात्य अंगुष्ठः पु
ष्टिदः प्रोक्तो मध्यमायुष्करी भवेत्
अनामिकान्नदा नित्यं मुक्तिदा च
प्रदेशिनी व्यासः जाह्नवीतीरसं
भूतां मृदं मूर्ध्ना बिभर्त्ति यः बिभ
र्त्तिरूपं सोऽर्कस्य तमोनाशाय केव
लं गोपीचंदनमाह शातातपः ॥

गोमती तीर संभूतं गोपीदेहस
मुद्भवं स्वदेहे धारयेद्यस्तु सर्व
पापैः प्रमुच्यते ब्रह्माण्डपुराणे
ऊर्द्ध्वपुण्ड्रं सदा कुर्यात् त्रिपुण्ड्रं भ
स्मना सदा तिलकं वै द्विजः कुर्या
त् चन्दनेन यदृच्छया ऊर्द्ध्वपुण्ड्रं
द्विजः कुर्यात् क्षत्रियश्च त्रिपुण्ड्र
कं अर्द्धचन्द्रं च वैश्यश्च वर्तुलं शू
द्रयोनिजः आतराणांतु अपि
रक्तं भवेत् स्नाने स्नानाशक्तौ च
कर्मिणां आर्द्रेण वाससा वापि
मार्जनं दैहिकं विदुः इति ज्ञात्वा
लवचनात् शिरो विहाय गात्रप्र
क्षालनं। तदशक्तौ वार्द्रवाससा
गात्रमार्जनं कुर्यात् तदनन्तरं।
संध्यां कुर्यात् परतस्परमेव सा।
तः संध्यां ततः कुर्यात् दन्तधा
वनपूर्वक मिति याज्ञवल्क्य व
चनं इत्याह्निकाचारतन्त्रे ॥
प्रातःसंध्या स्त्री संध्या देहपूर्वार्द्ध
तदुत्पत्ति यथा तस्मिन् गिरौ चं
द्रभागे हदस्रो हिततीरगा संध्या
दृष्ट्वा व्यपगच्छ वशिष्ठः सादरं त
दा वशिष्ठ उवाच किमर्थमागता
भद्रे निर्जनं तु महीधरे कस्य वा
तनया गोरि किं वा तव चिकीर्षि
तं एतदिच्छाम्यहं श्रोतुं यदि गुह्यं

न ते भवेत् वक्तुं प्रतीचेद्दाम्भनिः
श्रीकं वा कथ्यं तव श्रीमार्कण्डेय
उवाच तत् श्रुत्वा वचनं तस्य व
शिष्ठस्य महात्मनः दृष्ट्वा च तस्य
ह्यात्मानं ज्वलंतमिव पावकं श
रीरयुग ब्रह्मचर्य सदृशं तं ज
टाधरं सादरं प्रणिपत्याथ संध्या
वाच तपोधनं संध्योवाच यदर्थ
मागतास्मि शैलं सिद्धं तन्मे तपोधन
तवदर्शन मात्रेण तन्मे सेत्स्यति
वा विभो तपः कर्तुं महं ब्रह्मन् नि
र्जनं शैलमागता ब्रह्मणोहं मनो
जाता संध्या नाम्ना च विश्रुता तो
पदेशमहं ज्ञाने तपसो मुनिस
त्तम यदि ते युज्यते गुह्यं मां त्वं
समुपदेशाय एतद्धि कीर्षितं गुह्यं
नान्यत् किंचन विद्यते अज्ञात्वात
पसो भावं तपोवनमुपस्थिता चिं
तया परिशुष्काहं वेपते च मनः
सदा श्रीमार्कण्डेय उवाच आकं
र्ण्य तस्या वचनं वशिष्ठो ब्रह्मणः
सुतः स्वयं स सर्वकृत्यज्ञो नान्यत्
किंचन सदृष्टवान् अथ तां नियता
त्मानं तपसे ति धृतोद्यमां वशिष्ठो
मं ययाचके गुरुवत् शिष्यवत्सदा।
वशिष्ठ उवाच परमं यो महत्तेजः प
रमो यो महत्तपः परमः परमाराध्यो।

विष्णुर्मनसि धीयतां मंत्रेणानेन
देवेशं विष्णुमजमप्रमेयं ओं नमो
वासुदेवाय इत्यनेन च संततं मा
र्कण्डेय उवाच उपदिश्य वशिष्ठो
ऽथ संध्यायै तपसः क्रियां तामा
भाष्य यथान्यायं तत्रैवांतर्दधे मु
निः यथोक्तं वशिष्ठेन मंत्रं त
पसि साधने व्रतेन तेन गोविंदं
पूजयामास भक्तितः प्रसन्नस्ते
न रूपेण यद्रूपं चिंतितं तया पुरः
प्रत्यक्षतां ययौ तस्याः विष्णुर्जग
त्पतिः निमीलिताक्ष्यास्तस्यास्तु
प्रविश्य हृदयं हरिः दिव्यं ज्ञानं द
दौ तस्यै वाचं दिव्यं च चक्षुषी दिव्ये
ज्ञाने दिव्यचक्षुर्दिव्यां वाचमवाप्य
सा प्रत्यक्षं वीक्ष्य गोविंदं तुष्टाव
जगतां पतिं अथ तस्याः शरीरं
तु वल्कलाजिन संवृतं परिक्षीण
जटाब्रातैः पवित्रं मूर्द्धि राजितं ॥
निरीक्ष्य कृपयाविष्टो हरिः प्रोवा
च तामिदं श्रीभगवानुवाच यः
पयस्यति सकामस्त्वां प्राणिग्राह
स्तेनैव स सद्यः क्लीवतां प्राप्य
दुर्बलत्वं गमिष्यति पतिस्तव म
हाभागस्तपोरूपसमन्वितः सप्त
कल्पांतजीवी च भविष्यति सह
त्वया अन्यच्च ते वदिष्यामि पूर्वं य

त्वमसि स्थिते अग्नौ शरीरत्यागस्ते
पूर्वमेव प्रतिश्रुतः। स च मेधा
तिथेर्यज्ञे मुने द्वादशवार्षिके।
हुतप्रज्वलिते वह्नौ न चिरात् क्रि
यतां त्वया तत्र गत्वा स्वयं छन्ने
मुनिभिर्नोपलक्षिता मत्प्रसादा
द्वह्निजाता तस्य पुत्री भविष्यसि
यस्ते वा वाञ्छनीयोस्ति स्वामी म
नसि कश्चन तन्निधाय निजस्वांते
त्यज वह्नौ वपुः स्वकं नारायणः
स्वयं संध्यां पस्पर्श चाग्रपाणिना
ततः पुरोडाशमयं तच्छरीरमभू
त् क्षणात् समिद्धे ग्नौ महायज्ञे
मुनिभिर्नोपलक्षिता तदा विष्णोः
प्रसादेन सा विवेश विधेः सुता
वह्निस्तस्याः शरीरं तत् दग्ध्वा सूर्य
स्य मण्डले शुद्धं प्रवेशयामास वि
ष्णो रेवाज्ञया पुनः सूर्यो द्विधा
विभज्याथ तत्शरीरं तदा रथे।
स्वके संस्थापयामास प्रीतये पितृ
देवयोः यदूर्द्ध्वभाग स्तस्यास्तु श
रीरस्य द्विजोत्तमाः। प्रातःसंध्या
भवत् सा तु अहोरात्रादि मध्यगा य
त् शेषभागस्तस्यास्तु अहोरात्रां
तमध्यगाः स सायमभवत् संध्या
पितृप्रीति प्रिया सदा सूर्योदया
च्च प्रथमं यदा स्यादरुणोदयः प्रा



तःसंध्यातदोदेतिदेवानांप्रीतिका
रिणी अस्तंगतेततःसूर्य्येप्रोण
पश्चिमा सदा उदेति सायंसं
ध्यापि पितॄणां मोदकारिणी इ
ति कालिकापुराणे ५२ अध्यायः
प्रातःकालकर्म्मवैदिकतान्त्रि
कोपासना विशेषः वैदिकेतद
नुष्ठानानि यथा मार्जनं १ प्रार्थनं
२ प्राणायामः ३ आचमनं ४ आपो
मार्जनं ५ अघमर्षणं ६ सूर्य्योप
स्थानं ७ देवतर्पणं ८ सावित्र्यावा
हनं ९ सावित्रीध्यानं १० सावित्रीज
पः ११ सावित्रीविसर्जनं १२ आदिम
प्रकर्षणं १३ आत्मरक्षणं १४
रुद्रोपस्थानं १५ ब्रह्मादिभ्योज
लदानं १६ सूर्य्यार्घ्यदानं १७ स्तु
प्रणतिः १८ तान्त्रिकेतदनुष्ठाना
नि यथा मंत्राचमनं १ जलशुद्धिः
२ करन्यासः ३ अंगन्यासः ४ अघ
मर्षणं ५ हस्तप्रक्षालनं ६ आचम
नं ७ सूर्य्यार्घ्यदानं ८ गायत्र्याजल
दानं ९ तर्पणं १० गायत्रीध्यानं ११ गाय
त्रीजपः १२ जपसमर्पणं १३ इष्टदेव
ध्यानं १४ प्राणायामः १५ मूलमंत्रज
पः १६ जपसमर्पणं १७ प्राणायामः १८
नमस्कारः १९ इति स्मृतितंत्रे। प्रातः।
स्नानं क्ली प्रभातकर्म्मावगाहना

दि यथा उषःकालेतु संप्राप्ते कृ
त्वा चावश्यकं बुधः स्नायान्नदीषु
शुद्धासु शौचं कृत्वा यथाविधि
प्रातःस्नानेन पूयंते येपि पाप
कृतो जनाः तस्मात् सर्व्वप्रय
त्नेनप्रातःस्नानं समाचरेत् प्रा
तःस्नानं प्रशंसंति दृष्टादृष्टकरं
हि तत् सर्व्वमस्य सततं लाला
याः संस्रवंति हि अतो नैवाचरेत्
कर्म्माण्यकृत्वा स्नानमादितः अ
लक्ष्मीः कालकर्णी च दुःस्वप्नंदुर्वि
चिंतितं प्रातःस्नानेन पापानि धू
यंते नात्र संशयः नच स्नानं विना
पुंसां प्राशस्त्यं कर्म्मसंस्मृतं होमे
जप्ये विशेषेण तस्मात्स्नानं समा
चरेत् अशक्तावशिरस्कं तु स्नान
मस्य विधीयते इति गारुडे ५० अ
ध्यायः अपिच। प्रातःसंक्षेपतः
स्नानेमध्याह्ने विधिविस्तरे प्रातः
मध्याह्नयोः स्नानं वानप्रस्थगृह
स्थयोः यतेस्त्रिसवनं प्रोक्तं सकृ
त्तु ब्रह्मचारिणः अपिच उषस्यु
षसि यत्स्नानं संध्यायामुदिते रवौ
प्राजापत्येन तत्तुल्यं महापातकनाश
नं यत्फलं द्वादशाब्दानि प्राजापत्ये कृते
भवेत् प्रातःस्नायी तदाप्नोति वर्षेणाश्र
द्धयान्वितः यस्तु हिफलाम्भोयानंचरन्सूर्य्य

ग्रहोपमान् प्रातःस्नायी भवेत्ति ।
त्य द्वौमासौ माघ फाल्गुनौ षट्ति
ली माघमासेतु प्रातःस्नायी हवि
ष्यभुक् अतिपापंमहाघोरंमासा
द्देवपोहति मातरंपितरंवापि
भ्रातरं सुहृदं गुरुं यस्तु द्विषपति
मज्जेत द्वादशाब्दाल्भेन्मसः इति
गारुडे २१५ अध्यायः ॥

प्रातराशः पुं प्रातःकालीनभो
जनं तत्पर्य्यायः कल्पवर्त्तः २।
इति हेमचन्द्रः प्रातर्भोजनं ३ इति
त्रिकाण्डशेषः कल्पजग्धिः ४
इति जटाधरः ॥

प्रातर्गेयः पुं प्रातःकाले गेय ई
श्वरादिर्येस्तुतिपाठकः तत्पर्य्या
यः स्तुतिव्रतः २ इति त्रिकाण्डशे
षः प्रभातगातव्ये त्रि ॥ प्रातर्भोक्ता
पुं काकः इति शब्दचंद्रिका प्रभा
ते भोजनकर्त्तरि त्रि प्रातर्भोजनं ।
क्ली प्रातराशः इति जटाधरः ॥

प्रातिका स्त्री जवा इति राजनि
र्घण्टः ॥

प्रातिपदिकः पुं अग्निः यथा
इत्यंभूतो महानग्निर्ब्बलक्रोधो
द्भवो महान् उवाच देवं ब्रह्माण
तिथिर्मे दीयतां प्रभो यस्यामहं
समस्तस्य जगतः ख्यातिमाप्नु ।
यां ब्रह्मोवाच । देवानां मध्य य
क्षाणां गंधर्वाणांच सत्तम आ
दौ प्रतिपदा येन त्वमुत्पन्नोसि
पावक । तत् पदात् प्रातिपदिकं
संभविष्यति देवताः । अतस्त्वं
प्रतिपन्नाम तिथि येषा भविष्यति
इति वराहपुराणे नाम्नि क्ली ।
यथा । अर्थात् विभक्त्यर्थवत् प्रा
तिपदिकं इति सुपद्मव्याकरणं

प्रातिभाव्यं क्ली प्रतिभूतो भावः
जामिनीइति भाषा यथा सांति
त्वप्रातिभाव्यंचदानेग्रहणमेव
च विभक्ता भ्रातरः ऊर्द्धन्नो विभ
क्ताः परस्परं । इति दायभागः ।

प्रातिस्विकं त्रि असाधारणं त
त्पर्य्यायः । अन्यासाधारणं २ ॥
आवेणिकं ३ । इति त्रिकाण्डशे
षः प्रातिहारः पुं प्रातिहारिकः
प्रातिहारकः (इत्यमरटीकायां
भरतः प्रातिहारिकः पुं मायाका
रः इत्यमरः ॥

प्रातीपः पुं प्रतीपपुत्रः । शा
न्तनुराजः इति त्रिकाण्डशेषः ।

प्राथमकल्पिकः पुं प्रथ
मारब्धवेदाध्यायनः ॥
प्रथमं शिक्षणीयं कल्पं शा
स्त्रमधीते यः इत्यर्थे ष्णिकः ।

तत्पर्य्यायः प्रोतः २ इत्यमरभ
रतौ ॥
प्राथमिकः त्रि प्रथमभवः यथा
यद्यविरलक्रमेण सिद्धिसिद्धाथ
पिपाठयिषाभिनयस्तत्र द्वितीयस्तेन
पतता संपन्नत्वं द्वितीयः सिद्धा
पपिपठिषा विरहो विशेषणमत्र ।
सिद्धेः प्राथमिकत्वं किमर्थं इति
पतत्प्रशिरोमणिः ॥
प्राथम्यं त्रि प्रथमस्यभावः यथा
अस्माभिरेव प्राथम्येन नाना मुनी
नां वचनैरेवंविधो निबंधः क्रिय
ते इति विजयरक्षितः ॥
प्रादुः स्व नाम प्राकाश्यं स्फु
टत्वं तत्पर्य्यायः । आविः २ यथा
प्रादुरासीत् । आविर्भूतः इत्यम
रभरतौ प्रकाशः संभाव्यं स्व
र्णिः इति शब्दरत्नावली ॥ प्रा
दुर्भावः पुं आविर्भावः यथा
वपुः प्रादुर्भावादनुमितमिदं
जन्मनि पुरा इति कुवलयानंदः
प्रादेशः पुं तर्जनीसहितवितस्ति
तांगुष्ठः इत्यमरः देशमात्रे ।
यथा । प्रादेशो देशमात्रे च
तर्जन्यंगुष्ठसम्मिते । इति मे
दिनी अंगुष्ठस्य प्रदेशिन्याश्चा
प्रादेशउच्यते इति देवीपुराणं च

प्रादेशनं क्ली दानं इत्यमरः । प्रा
दोषः प्रा } त्रिप्रदोषसंबंधी इति
दोषिकः } सिद्धान्तकौमुदी ॥
प्राधान्यं क्ली प्रधानत्वं । प्रधानस्य
भावः यथा वेदार्थोपनिबंधृत्वात्
प्राधान्यं हि मनोः स्मृतं । इति धर्म
दीपिका ॥
प्राध्वः त्रि दूरपथः । प्रकृ । बंधः
इति हेमचंद्रः रथः इति वो ।
पदेवः ॥
प्राध्वं अव्य अनुकूले इत्यमरः नम्र
इति मेदिनी ॥
प्रान्तः पुं अंतभागः शेषसीमा ।
यथा प्रान्तेषु संसक्तनमेरु शा
खंध्यानास्पदंभूतपतेर्विवेश इ
ति कुमारसंभवतृतीयसर्गः ॥
प्रान्ततः स्व अ प्रान्तभागे यथा प्रावी
रे प्रान्ततोवृतिः इत्यमरः ॥
प्रान्तरं क्ली दूरशून्योऽध्वा । इत्यमरः
छाया तरु जलादि रहिते पथि प्रा
न्तरं दूरं शून्यो दूरशून्यः दूरश्चासौ
शून्यश्चेति वा दूर शून्या जलादिव
र्जितत्वात् ईदृक् योऽध्वा स प्रान्तर
मित्यन्वयः प्रकृष्ट मन्तरं व्यव
धान मवकाशो वा अत्रेति प्रान्त
रं । इति भरतः विपिनं ॥ को
टरं ॥ इति मेदिनी ॥ ॥

प्रान्तशून्यं क्ली दूरशून्यपथः छा
या दिरहितपंथः इति शब्दरत्ना
वली प्रापणं क्ली नयनं प्राप्तिः
प्राप्ति प्रेरणा प्रकर्षेणाप्यापनं
न्यतादंश्यन्ताद्वा प्रपूर्वापधातो
र्भावेः लट् प्रत्ययः ॥
प्रापणिकः पुं पण्यविक्रयी इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
प्रापनीयं त्रि प्राप्यं प्राप्यतेयत् ।
प्रपूर्वापधातोः कर्मण्यनीयप्र
त्ययः प्रापयः पुं गंधर्वगणवि
शेषः यथा प्रवाद्य जनयत् पुत्रा
न् द्विपान् वैगायनोत्तमान् चत
र्दश देवगंधर्वाः प्रापेयाः परिकी
र्त्तिताः इत्याग्निपुराणे ॥
प्राप्तः त्रि प्रस्थापितः तत्पर्य्यायः
प्रणिहितः २ लब्धः तत्पर्य्यायः
विन्नः २ भावितः ३ आसादितः
४ भूतः ५ इत्यमरः ॥
प्राप्तपंचत्वं त्रि मृतं इत्यमरः प्रा
प्तभावः पुं जातोक्षः इति शब्द ।
चंद्रिका लब्धसम्पादो त्रि ॥
प्राप्तरूपः त्रि पंडितः मनोज्ञः
इत्यमरः रूपवांश्च ॥
प्राप्तव्यं त्रि प्राप्यं प्राप्यते यत् प्र
पूर्वापधातोः कर्मणितव्यप्रत्य
यः प्राप्तिः स्त्री उदयः धनादिवृद्धिः

अधिगमः लाभः इत्यमरभरतौ
प्रापणं ॥ संहतिः । इति शब्दर
त्नावली अणिमाद्यष्टैश्वर्य्यान्त
र्गतैश्वर्य्यविशेषः स च अभी
प्सित प्रापणं इति हेमचंद्रः भ
रतश्च ॥
प्राप्यं त्रि प्राप्तव्यं तत्पर्य्यायः ग
म्यं २ समासाद्यं ३ इत्यमरः ॥
प्राबोधिकः पुं उषःकालः इति
शब्दमाला । प्राबोधकोऽपिपाठः
प्राभवं क्ली श्रेष्ठत्वं इति शब्दचंद्रि
का प्राभाकरः पुं मीमांसकविशे
षः यथा व्याप्तिस्वरूपे निरूप्यप
रमत निराकरण पूर्वकं स्वमतेन
तद्ग्रहोपायमभिधायेत्प्रथमंप्रा
भाकरमतमुपदर्शयति सेयमि
त्यादिना इति व्याप्तिग्रहोपायचिं
तामणिः प्राभाकरमते व्याप्तेः स
कृद्दर्शन गम्यत्वं यथा तस्मात्
परिशेषेण सकृद्दर्शन गम्या सा
इति व्याप्तिग्रहोपायचिंतामणिः ॥
प्राभृतं क्ली उपढौकनं इत्यमरः
प्राभृतकं क्ली प्राभृतं तत्पर्य्यायः
कौशलिका २ इति हारावली ॥
प्राभावः पुं वासकः इति शब्द
चंद्रिका स्वार्थेऽस्य प्रमादः तस्य
भावे क्ली ॥ ॥

प्रामाणिकः त्रि हेतुकः मर्य्यादार्हः
प्रमाणतः परिच्छेदकः ॥ प्रमाण
कर्त्ता । इति प्रमाणशब्दात् कर्त्त
रि ठक् प्रत्ययः ॥
प्रामाण्यं क्ली प्रमाकरणत्वं प्रमा
णशब्दात् भावार्थे ष्यप्रत्ययः ॥ प्रा
माण्यवादः पु प्रमाकरणताक
थनं तद्धति तत् प्रकारकत्वरूप
प्रमात्वकथने चिन्तामणिन्यायग्रन्थ
विशेषः इति पूर्वाचार्याः सप्रथा
अथ जगदेव पंक निमग्नमहिधी
षु रष्टादशसु विद्यास्थानेष्वभ्यर्हि
त तमामान्वीक्षिकीं परमकारु
णिको मुनिः प्रणिनाय । तत्र
प्रेक्षावत् प्रवृत्त्यर्थं प्रमाणादि
पदार्थ तत्त्वज्ञानाय — प्रयसा ।
यिाम इत्यादावसूत्रयत् । तेषु
प्रमाणाधीना सर्वेषां व्यवस्थिति
रिति प्रमाणतत्त्वमत्र विविच्यते
इत्यादिगंगेशोपाध्यायः ॥
प्रामीत्यं क्ली ऋणं । इति त्रिकाण्ड
शेषः ॥ स्वतन्त्वेच ॥
प्रायः पु मरणे अनशनस्थ्रे
तल्पे । बाहुल्ये इति मेदिनी ॥
वयः इति हेमचन्द्रः ॥
प्रायः अ बाहुल्ये इत्यमरः ॥
प्रायश्चित्तं क्ली पापक्षयमात्रसाधनं
कर्म यथा हारीतः प्रयतत्वाद्वोप
चितमशुभं नाशयतीति प्रायश्चित्तं
तस्य व्युत्पत्ति यथा अङ्गिराः
प्रायो नाम तपः प्रोक्तं चित्तं नि
श्चय उच्यते तपो निश्चयसंयुक्तं
प्रायश्चित्तमिति स्मृतं ॥
निश्चयसंयुक्तं पापक्षयसाधन
त्वेन निश्चितमित्यर्थः पापञ्च
वैदिकप्रतिपाद्यो ऽनर्थः अनर्थ
स्यानिष्टसाधनं यथा विहितस्या
ननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतन
मृच्छति पापविशेषेणावस्था विशे
षमाह मनुः शरीरजैः कर्मदोषै
र्याति स्थावरतां नरः वाचिकैः पक्षि
मृगतां मानसैरन्त्यजातितां इह दु
श्चरितैः केचित् केचित् पूर्वकृतै
स्तथा प्राप्नुवन्ति दुरात्मानो नरा
रूपविपर्य्ययं यमः । स्वरूपावह
दानोग्रः सवर्णस्तेय कृन्नरः प
तितैः संप्रयुक्तश्च कृतघ्नो गुरुत
ल्पगः पतन्ति सर्वे पुनरके
ष्वनुपूर्वशः ॥ प्रायश्चित्त ॥
माहात्म्यं यथा अङ्गिराः उद्य
च्छन् यदादित्यस्तमः सर्वं
व्यपोहति । तद्वत् कल्याणमाति
ष्ठन् सर्वं पापं व्यपोहति ॥ पा

पं चेत् पुरुषः कृत्वा कल्याणम
भिपद्यते मुच्यते पातकैः सर्वैर्म
हाभ्रैरिव चन्द्रमाः कल्याणं प्रा
यश्चित्तं तस्यावश्यकर्त्तव्यत्वमा
ह यमः तपसोऽन्ते विशुध्यन्ति
कर्मणां वा परिक्षयात् । तस्मात्
कर्त्तव्यमेतत्तु प्रायश्चित्तं विशुद्ध
ये कर्मणां भोगेन परिक्षयादि
त्यर्थः प्रायश्चित्तार्हत्वमाह म
नुः अकुर्वन् विहितं कर्म निषिद्धं
तु समाचरन् प्रसज्जंश्चेन्द्रियार्थेषु
प्रायश्चित्तीयते नरः अज्ञानाद्य
दि वा ज्ञानात् कृत्वा कर्म विगर्हि
तं तस्माद्विमुक्तिमन्विच्छन् द्विती
यं न समाचरेत् प्रायश्चित्तस्य का
म्यत्वं नैमित्तिकत्वं नित्यत्वञ्च यथा
जाबालः काम्यानां सफलार्थञ्च
दोषघातार्थमेव च अतः काम्यं
नैमित्तिकञ्च प्रायश्चित्तमिति स्थि
तिः चरितव्यमतो नित्यं प्रायश्चि
त्तं विशुद्धये निन्द्यैर्हि लक्षणैर्युक्ता
जायन्ते निष्कृतैनसः ॥ ज्ञानाज्ञान
कृतपापयोः प्रायश्चित्तभेदो य
था अङ्गिराः । अकामतः कृते पा
पे प्रायश्चित्तं न कामतः स्यात्त्वका
मकृते यत्तु द्विगुणं बुद्धिपूर्वके
अथ प्रायश्चित्तिनः पर्षदुपस्थाने
तत्राङ्गिराः कृते निःसंशये पा
पे न भुञ्जीतानुपस्थितः भुञ्जा
नो वर्द्धयेत् पापमसत्यं पर्षदि
ब्रुवन् सचेलं वाग्यतः स्नात्वा ।
क्लिन्नवासाः समाहितः उपस्था
य ततः शीघ्रमार्तिमान् धरणीं
गतः गात्रैश्च शिरसा चैव न च किं
चिदुदाहरेत् उपस्थानेच ब्राह्म
णान् वस्त्रादिना तोषयित्वा का
र्यं महत्सु पापेषु राज्ञोऽप्युपस्थि
तिः कार्य्यमाह देवलः । स्वयं वा
ब्राह्मणैः कृच्छ्रे महद्दोषे विधीय
ते राज्ञा च ब्राह्मणैश्चैव महत्सु परि
चक्षते परिषदमाहाङ्गिराः प
ञ्चविंशति संख्याके मीमांसावे
दपारगैः वेदाङ्गकुशलैश्चैव प
रिषत् संप्रकल्पयेत् चान्वि
क्षिकी विकल्पी च अङ्गविद्धर्मपाठ
कः त्रयश्चाश्रमिणो वृद्धाः पर्षत्
स्याद्दशावरा । मनुः त्रिविद्यो
हैतुकस्तर्की नैरुक्तो धर्मपाठ
कः । त्रयश्चाश्रमिणः पूर्वे पर्ष
त्स्याद्दशावरा अङ्गिराः यथा
त लघुकार्येषु मध्यमेषु तु मध्य
मा महापातकि शोध्येषु शतशो
भूय एव वा प्रदर्शनार्थमिदं याव
द्भिरेव निरूपणं तावद्भिरेव परि
षत् । इत्यर्थस्त्वा देवनस्याः ॥



तथाच यमः । एको द्वौ वा त्रयो वापि यद्ब्रूयुर्धर्म्मपाठकाः । स धर्म्म इति विज्ञेयो नेतरेषां सहस्रशः । प्रायश्चित्ताकथने दोषा यथा आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः । जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः । अर्च्चिते रत्ना ते स्वहस्त्रैव संसदि प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः । न्यायतो मार्गमाणस्य द्विजादेः प्रणामिनः । अन्यथा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत् । हारीतः । यथा वयो यथा कालं यथा प्राणञ्च ब्राह्मणे । प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्म्मपाठकैः । तस्मात् कृच्छ्रमथार्द्धं पादं वापि विधानतः । ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत् । अशक्तावनुग्रहमाह पराशरः । दुर्ब्बलेऽनुग्रहः कार्य्यस्तथा बालवृद्धयोः । अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रही भवेत् । स्नेहादिनानुग्रहे दोषो यथा स्नेहाद्वा यदि वा लोभात् मोहाद्वाज्ञानतोऽपि वा । कुर्व्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति ॥ प्राणान्तिकप्रायश्चित्ते मृताकल्प पश्चादनुग्रहः कार्य्य इत्याह । गिरः । कृत्वा शुद्धं मृदाद्यारे यथोक्तं धर्म्मवक्तृभिः । पश्चात् कार्य्यानुसारेण प्राज्ञाः कुर्व्वन्त्यनुग्रहं ॥ वृद्धत्वादिभेदात् प्रायश्चित्तं यथा अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः । प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च । अथ पापनिष्क्रमणादिः । तत्र मनुः । ख्यापनेनानुतापेन तपसाध्ययनेन च । पापकृन्मुच्यते पापात्तथा दानेन चापदि । आपदीत्यनेनाध्ययनतपोदानमनुकल्पमित्युक्तं एतद्धिंसाव्यतिरिक्तविषयं हिंसायान्तु दानं मुख्यं यथा भविष्ये । हिंसात्मकानां सर्व्वेषां कीर्त्तितानां मनीषिभिः । प्रायश्चित्तं कर्त्तव्यानां दानं प्रथमउक्तं तथा मनुः । दानेन वधनिर्णेकं सर्पादीनामशक्नुवन् । एकैकशश्चरेत् कृच्छ्रं द्विजः पापापनुत्तये । सामान्यप्रायश्चित्तानि यथा संवर्त्तः । हिरण्यदानं गोदानं भूमिदानं तथैव च । नाशयन्त्याशु पापानि महापातकजान्यपि । यमः ॥ शोषणेन शरीरस्य तपसाध्ययनेन च । पापकृन्मुच्यते पापात् दानेन च दमेन च ॥ मनुः ॥ कृत्वा पापं हि सन्तप्य तस्मात् पापात्प्र-

मुच्यते । नैवं कुर्य्यां पुनरिति निवृत्त्या पूयते नरः । विष्णुपुराणे । प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परं । यमः । गायत्र्यादिकं देवपूजा वेदाभ्यासः प्रतिमास्तवः । नाशयन्त्याशु पापानि महापातकजान्यपि गौतमः । हिरण्यं गौर्व्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि एतान्येवानादेशे विकल्पेन क्रियेरन् एनसि लघूनि लघूनि गुरूणि गुरूणि । विष्णुपुराणे । एवं विषयभेदाद्वैकल्पस्थानानि पुत्रक । प्रायश्चित्तानि सर्व्वाणि गुरूणि च लघूनि च अन्यथा हि महाबाहो लघुनाप्युपदेशतः । गुरूणामुपदेशाद्धि निष्प्रयोजनतां व्रजेत् । महाभारते यत्कार्य्यं शते कृत्वा कृते गंगाभिषेचने सर्व्वं दहति गंगाम्भस्तूलवत् । शिखिवानलः । व्रतानि शुद्धिकारणान्याह विश्वामित्रः । कृच्छ्रो चान्द्रायणादीनि शुद्ध्यभ्युदयकारणं । प्रकाशो वा रहस्यो वा संशयेत्तु मके स्फुटे प्राजापत्यः शान्तपनः शिशुकृच्छ्रः पराकः । अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः महाशान्तपनः षड्रात्रमकृच्छ्रस्तु पावनः जलोपवासकृच्छ्रश्च ब्रह्मकूर्च्चस्तु शोधकः । एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा पातकादिषु सर्व्वेषु पापकेषु प्रयत्नतः । कार्य्याश्चान्द्रायणैर्युक्ताः केवला वा विशुद्धये शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा । यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति । उपवासस्त्रिरात्रं वा मासः पक्षस्तदर्द्धकं षड्रहद्वादशाहादि कार्य्यं शुद्धिफलार्थिना उपपातकयुक्तानामनादिष्टेषु चैव हि प्रकाशे च रहस्ये च अभिसंख्यापयेत्तथा जातिशक्तिगुणान् दृष्ट्वा सकृद्बुद्धिकृतं तथा अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमं प्रकाशकृतपापव्रतानि मुख्यानि रहस्यकृते जपादीनि यथा प्राजापत्यादीन्यभिधाय मनुः । एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः । अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत् । देवलः । प्रकाशादुत्कृष्यते किं विन्तु विंशभागो रहस्ये त्रिंशभागः षष्ठिभागः कल्प्य जात्याद्यपेक्षया । तत्र प्रायश्चित्तविवेकः अथ प्रायश्चित्तस्वीकारकाले शावाशौचिता

वाप्य केशान् नखान् सर्व्वं मुनं मा
शप्तहिर्निशि प्रत्येकं नियतेका
ल मात्मनो व्रतमादिशेत् प्राय।
श्चित्त मुपासीनो वाप्यन् शिखव
र्ज्जं स्पृशेत्। केशधारणेच्छया
द्विगुण व्रतादिकमाह हारीतः।
राजा वा राजपुत्रो वा ब्राह्मणो वा
बहुश्रुतः केशानावपनं कृत्वा
प्रायश्चित्तं समाचरेत्। केशानां
धारणार्थन्तु द्विगुणं व्रतमाचरे
त्। द्विगुणेन व्रतेनैवोक्ते द्विगुणा
दक्षिणा भवेत्। विद्वद्विप्रनृपस्त्री
णां नेष्यते केशवापनं ऋते महा
पातकिनो गोहन्तुश्चावकीर्णि
नः। अथवा स्त्रीणां विशेषमाह भ
वेदव्यमहर्षेवचनं वपनं नैव ना
रीणां नानुव्रज्या जपादिकं न गो
ष्ठे शयनं तासां नच दद्याद्वाजिनं
सर्व्वान् केशान् समुद्धृत्य छेदये
दङ्गुलिद्वयं। सर्व्वत्रैव हि नारीणां
शिरसो मुण्डनस्थले ग्रथनेन्तु
मस्त्यवस्था। तत्र संवर्त्तः।
प्राजापत्यव्रताशक्तौ धेनुं द
द्यात् पयस्विनीं। धेनोरभावे
दातव्यं तुल्यं मूल्यं न संशयः
पयस्विनी मिति विशेषणं ॥
दुग्धोपयोगाय। स च वत्सं
विना न सम्भवति। अतः स
वत्सायाएव दानं मत्वं तदभा
वे यथोचितमूल्यं तदसम्भवे पु
राणत्रयं द्वात्रिंशत् पणिका गा
वो वत्सः पञ्चपणिको भवेदिति का
त्यायन वचनात् षट्त्रिंशमतमि
ति कृत्वा पठन्ति। धेनुः पञ्चभिराण्डा
नां मध्यानां त्रिपुराणिकी कार्षा
पणैकमूल्या हि दरिद्राणां प्रकी
र्त्तिता ॥ प्रायश्चित्तोत्तरकर्त्तव्या
नि यथा भविष्ये। क्रियते शुद्ध
ये यत्र ब्राह्मणानान्तु भोजनं शु
द्ध्यर्थमिति तत् प्रोक्तं वैनतेय म
नीषिभिः॥ जावालः। आरम्भे सर्व्व
कृच्छ्राणां समाप्तौ च विशेषतः ॥
आज्येनैव हि शालाग्नौ जुहुयाद्दा
हृतीः पृथक् श्राद्धं कुर्य्याद् व्रतस्या
न्ते गोहिरण्यान्न दक्षिणं। प्राय
श्चित्तावसाने गोभ्यो यवसं दद्यात्।
यदि तु गावस्तद्भक्षणं न कुर्व्वी
युस्तदा पुनस्तावत् प्रायश्चित्तमनु
तिष्ठेत् यथा हारीतः। स्वशिरसा य
वसमादाय गोभ्यो दद्यात् यदि ताः
प्रमुदिता गृह्णीयु रथैनं प्रवर्त्तयेयुः
एवं कृत प्रायश्चित्तं इतरथा न।
इति प्रायश्चित्ततत्त्वं ॥
अथ प्रायश्चित्तविवेकोक्त नववि
धपापानां प्रायश्चित्तानि लिख्यन्ते ॥

अथातिपातकानि	प्रायश्चित्तानि	उक्ताशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
ब्राह्मणस्य मातृगमने दुहितृगमने स्नुषागमने च।	अज्ञानतो द्विगुण द्वादशवार्षिकव्रतं तन्महापातकदृष्टव्यं। ज्ञानत एतद्द्विगुणं।	३६ धेनवः	१०८ कार्षापणाः तन्मूल्यं स्वर्णादि वा।	२० गावः अशक्तौ २० कार्षापणाः।
क्षत्रियवैश्यशूद्राणां मातृदुहितृस्नुषागमने।	हुताशनप्रवेशो मरणं। चतुर्विंशतिवार्षिकव्रतं वा। एतत्त्व अकामतः कामतस्तु द्विगुणं मातृदुहितृस्नुषागमने। पिपनद्धनादिकं करणीयं।	३६ धेनवः	१०८ कार्षापणाः तन्मूल्यं। स्वर्णादि वा	२० गावः अशक्तौ। २० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि	उक्ताशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
अकामतो ब्राह्मणकर्त्तृकवधः।	द्वादशवार्षिकव्रतं। यथा मनुः। ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत् भैक्ष्याश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजं। मिताशी विवरे	१८० धेनवः	५४ कार्षापणाः तन्मूल्यं हिरण्यादिकं।	१०० गावः। तदशक्तौ १०० कार्षापणाः।



अथमहापातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
	द्वयामेवं वैश्येयं दिन मीवति।			
कामतो ब्राह्मण कर्तृक ब्रह्मवधः	याज्ञवल्क्योक्त प्रकारेणमरणं तथा लोमभ्यः स्वाहेत्यिरस्वा लोमप्रभृति वै तन्नं मज्जांतां जुहू याद्यापि मेत्रैरभि यथाक्रमं एतत्त कलौ ब्राह्मणेन रपरं तदशक्तावाषि कव्रतं।	३६ धेनवः	१०८ कार्षापणाः। तत्र्यम्यस्वर्णं दिवा।	२० गावः अशक्तौ। २० कार्षापणाः।
ज्ञानतो ब्राह्मण कर्तृक ब्राह्मणी गर्भवधः	ब्रह्मवधप्रायश्चित्तं अज्ञानतः एतद र्द्धं अनुपनीत बालकवधेप्येवं	३६ धेनवः	१०८ कार्षापणाः तत्र	२०० गावः। अशक्तौ २०० कार्षापणाः
अकामतः सवनस्थब्राह्मवधः।	द्विगुणद्वादशवा कव्रतं।	३६ धेनवः	१०८ कार्षापणाः तत्र्यम्यस्वर्णं दिवा।	२० गावः अशक्तौ॥ २० कार्षापणाः।
कामतः सवनस्थब्राह्मण वधः।	तद्द्विगुणं ४८ अष्टचत्वारिंश द्वार्षिकव्रतं।	१२ धेनवः	२१६ कार्षापणाः तत्र्यम्य। स्वर्णदिवा	४०० गावः अशक्तौ। ४०० कार्षापणाः।

अथमहापातकानि	प्रायश्चित्तानि	तदशक्तौधेनुदानं	तदशक्तौच चूर्णीदानं	दक्षिणा
ब्राह्मणकर्तृकमातृसोदरभ्रातृगुरु श्रोत्रियाहिताग्नीनां वधः।	४८ अष्टचत्वारिं शद्वार्षिकव्रतं एतच्चकामतः अकामतएत दर्द्धं २४ वार्षिक व्रतं।	४४ धेनवः	४६ कार्षापणाः तत्र्यम्यस्वर्णादि	४० गावः अशक्तौ ४० कार्षापणाः।
ज्ञानतो ब्राह्मण कर्तृकवेदपारगा ततोऽपि ब्राह्मणवधः		१० धेनवः	५४ कार्षापणाः तत्र्यम्यस्वर्णादि वा	१० गावः अशक्तौ १० कार्षापणाः।
अज्ञानतस्तस्य वधः।	तदर्द्धं ६ वार्षिक व्रतं।	६ धेनवः	२७ कार्षापणाः।	५ गावः। तदशक्तौ ५ कार्षापणाः।
ज्ञानतोऽज्ञानतो वा ब्राह्मणकर्तृकपतितब्राह्मणवधः अकामत।	तथा	तथा	तथा	तथा।
आग्रहारिकादिब्राह्मणवधः।	एकवार्षिकव्रतं	४ धेनवः	४५ कार्षापणाः।	८ गावः तदशक्तौ ८। ६। कार्षापणाः
कामतस्तस्य वधः	तद्द्विगुणं	तद्द्विगुणं	तद्द्विगुणं	तद्द्विगुणं।
अकामतः क्षत्रिय कर्तृक ब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्त तद्द्विगुणं तत्र २४ वार्षिकव्रतं	३६ धेनवः	१०८ कार्षापणाः तत्र्यम्यस्वर्णादि वा तद्द्विगुणं	२० गावः। अशक्तौ २० कार्षापणाः तद्द्विगुणं।
कामतस्तद्वधः।	तद्द्विगुणं।	तद्द्विगुणं	१६२ कार्षापणाः।	३०० गावः। अशक्तौ ३०० कार्षापणाः।
अकामतो वैश्यकर्तृकब्रह्मवधः	ब्राह्मणकर्तृकवधप्रायश्चित्त त्रिगुणं तत्र ३६ वार्षिकव्रतं	५४ धेनवः		



अथमहापातकानि।	प्रायश्चित्तानि	तदशक्तौधेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
कामतोवैश्यकर्तृकब्रह्मवधः	१२ वार्षिकव्रतं	१८० धेनवः	५४० कार्षापणाः।	९० गावः अशक्तौ ९० कार्षापणाः।
अकामतःशूद्रकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तचतुर्गुणं तच्च ४८ वार्षिकव्रतं।	७२ धेनवः	२१६ कार्षापणाः।	४० गावः अशक्तौ ४० कार्षापणाः।
कामतस्तद्वधः	तद्द्विगुणं	तद्द्विगुणं	तद्द्विगुणं	तद्द्विगुणं
अकामतोब्राह्मणकर्तृकब्राह्मणीवधः।	[illegible] ब्राह्मवधप्रायश्चित्तार्द्धं। तच्च ६ वार्षिकव्रतं।	९० धेनवः	२७० कार्षापणाः।	५० गावः अशक्तौ ५० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणं क्षत्रियस्य ब्राह्मणीवधे ब्राह्मणकर्तृकवधप्रायश्चित्तद्विगुणं। वैश्यस्य त्रिगुणं। शूद्रस्य चतुर्गुणं। अनेकब्राह्मणवधे। प्रायश्चित्तस्यैकत्वं। यदेव साक्षाद्वधकर्तुः प्रायश्चित्तं तदेव सहस्य प्रहर्तुरनुग्राहकस्य प्रयोजकस्य प्रव	तद्द्विगुणं	तद्द्विगुणं	तद्द्विगुणं।

अथमहापातकानि	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
	र्त्तकस्य प्रयोजकस्य च पादहीनं वधप्रतिरोधकस्य अनुग्राहकस्य प्रहन्तृप्रवर्त्तकस्य प्रयोजकस्य च अर्द्धं। अनुमन्तृनिमित्तिनश्च पादः। अशक्तौ स्त्रीबालवृद्धानां सर्वत्रार्द्धं			
ज्ञानत ब्राह्मणस्य पैष्टीसुरापाने द्विरभ्यस्ते गौडीमाध्वीपाने च।	अग्निसमस्पर्शानां सुरा गोमूत्र जल दुग्ध घृत गोमय रसानामन्यतमस्यामरणात्पाने चतुर्विंशतिवार्षिकव्रतं वा।	३६ धेनवः	१०८ कार्षापणाः तन्मूल्यस्वर्णादि वा।	२० गावाः। अशक्तौ २० कार्षापणाः।
अज्ञानतब्राह्मणस्यतत्पाने	एतदर्द्धं तच्च द्वादशवार्षिकव्रतं।	१८ धेनवः	५४ कार्षापणाः तन्मूल्यस्वर्णादि वा	१० गावः। अशक्तौ १० कार्षापणाः।
अज्ञानतः क्षत्रियस्य पैष्टीसुरापानं।	नववार्षिकव्रतं। ज्ञानत एतद्द्विगुणं।	१३५ धेनवः	४०५ कार्षापणाः तन्मूल्यस्वर्णादि वा।	७५ गावः अशक्तौ ७५ कार्षापणाः



अथ महापातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदान	दक्षिणा
अज्ञानतो वैश्यस्य पेष्टी सुरापाने।	षाड्वार्षिकव्रतं ज्ञानतस्तद्द्विगुणं स्त्रीबालवृद्धानामर्द्धादिकं।	९·धेनवः	२२·कार्षापणाः तत्तुल्यसुवर्णं दिवा।	५·गावः। अशक्तौ ५·कार्षापणाः।
अज्ञानतो ब्राह्मणकर्तृकब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयं	अपहृतद्रव्यं तत्स्वानुरूपं मूल्यं वा स्वामिने दत्वा द्वादशवार्षिकव्रतं करणीयं।	१८·धेनवः	५४·कार्षापणाः तत्तुल्यसुवर्णं दिवा	१०·गावः। अशक्तौ। १०·कार्षापणाः।
ज्ञानतस्तत्कर्तृकतत्स्तेयं।	एतद्द्विगुणं २४ वार्षिकव्रतं तु। एवं ब्राह्मणकर्तृकेन सर्वत्रार्द्धं।	३६·धेनवः	१०८·कार्षापणाः।	२०·गावः। अशक्तौ। २०·कार्षापणाः।
ज्ञानतः क्षत्रियवैश्यशूद्रकर्तृक। ब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयं	राजकर्तृकमुसलाघातेन मरणं। चतुर्विंशतिवार्षिकव्रतं वा।	३६·धेनवः	१०८·कार्षापणाः तत्तुल्यसुवर्णं दिवा	२०·गावः अशक्तौ २०·कार्षापणाः।
अज्ञानतस्तत्कर्तृकतत्स्वामिकतत्सुवर्णस्तेयं॥	द्वादशवार्षिकव्रतं स्त्री बालवृद्धानामर्द्धं। एकस्याभयधर्मवत्त्वे। पादः॥	१८·धेनवः	५४·कार्षापणाः तत्तुल्यसुवर्णं दिवा।	१०·गावः अशक्तौ १०·कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदान	दक्षिणा
ज्ञानतो गुर्वङ्गनागमनं अर्थात् विमातृगमनं शूद्रस्य ब्राह्मणीगमनं च।	गुरुतल्पगः पापमभिभाष्य तप्ते लोहमये स्वप्यात् ज्वलंतीं लोहप्रतिमां अन्मयीं प्रतिमां वा आलिंग्य क्रियेत स्वयं वा शिश्नवृषणावुत्कृत्य अञ्जलौ निधाय आमरणात् नैरृतीं दिशामातिष्ठेत्। चतुर्विंशतिवार्षिकव्रतं वा ऊर्ध्वं तेषुर्वेगनयापित्र नत करणीयं।	३६·धेनवः	१०८·कार्षापणाः तत्तुल्यसुवर्णं दिवा।	२०·गावः। अशक्तौ २०·कार्षापणाः।
अज्ञानतो गुर्वङ्गनागमः।	द्वादशवार्षिकव्रतं बालवृद्धयोरर्द्धं। एतच्चान्त्यवर्णविषये।	१८·धेनवः	५४·कार्षापणाः तत्तुल्यसुवर्णं दिवा	१०·गावः। अशक्तौ १०·कार्षापणाः।
चतुर्णां महापातकिनां संसर्गः तत्र गुरुसंसर्गो यथा पतितानाचार्णान्।	ज्ञानतः सकृत् प्रथमसंसर्गिणोः द्वादशवार्षिकव्रतं	२७·धेनवः	८१·कार्षापणाः तत्तुल्यसुवर्णं दिवा।	१५·गावः। अशक्तौ १५·कार्षापणाः।



अथमहापातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
वेदाध्ययनं १। पतितशिष्याय वेदाध्यापनं।२	अज्ञानतः सकृत्प्रथम संसर्गिणो नववार्षिक व्रतं॥	३५ धेनवः	४०५ कार्षापणाः	७५ गावः अशक्तौ ७५ कार्षापणाः
पतितेन ऋत्विजा ज्योतिष्टोमादियजनं ३ पतितस्य ज्योतिष्टो।	ज्ञानतो द्वितीय। संसर्गिणः नव वार्षिकव्रतं।	१३५ धेनवः	४०५ कार्षापणाः।	७५ गावः अशक्तौ ७५ कार्षापणाः
मादिनिष्पादन तृप्याजनं ४। पतितेन पतितया वापरिणयणं ५।।	अज्ञानतो द्वितीयसंसर्गिणः साई चतुर्वार्षिक व्रतं।	६८ धेनवः	२०२ कार्षापणाः।	३८ गावः अशक्तौ। ३० कार्षापणाः।
स्तेयादिपतितास्त्रब्राह्मणीगमनं॥	ज्ञानतस्तृतीयसंसर्गिणः षाड्वार्षिकव्रतं।	९० धेनवः	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः
६ पतितान्नस्य पतितेन सहैक पात्रेभोजनं ७।	अज्ञानतस्तृतीय संसर्गिणः त्रैवार्षिकव्रतं।	४५ धेनवः	१३५ कार्षापणाः।	२५ गावः। अशक्तौ ५० कार्षापणाः
	ज्ञानाज्ञानतश्चतुर्थसंसर्गिणः प्रायश्चित्ताभावः ब्राह्मणक्षत्रियवैश्यशूद्राणां ज्ञानाज्ञानतः संसर्गे तु क्रमेण			

अथमहापातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं।	तदशक्तौ चूर्णीदानं	दक्षिणा
	एतस्य द्विगुणं त्रिगुणं चतुर्गुणं ज्ञेयं			
तत्र लघु संसर्गो यथा उपनयनं विना पतिताय वेदाध्यापनं।१।	ज्ञानतः षण्मास संसर्गे प्रथमसंसर्गिणोः द्वादशवार्षिकव्रतं।	२७० धेनवः	८१० कार्षापणाः।	१५० गावः अशक्तौ १५० कार्षापणाः।
पतितान्महर्ष्यध्ययनं २ पतितयजमानस्याष्टकादियज्ञयजनं ३ पतितेनस्त्र	अज्ञानतः षण्मास संसर्गे प्रथमसंसर्गिणो नववार्षिकव्रतं।	१३५ धेनवः	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः
विनाष्टकादियज्ञयजनं ४ पतितस्त्रब्राह्मणीगमनं ५ पतितशूद्रागमनं।६।	ज्ञानतः षण्मास संसर्गे ¨ तीयसंसर्गिणो नववार्षिकव्रतं।	१३५ धेनवः	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
अपतितान्नस्य पतितेन सहैकपात्रे भोजनं।७। पतितोच्छिष्टभोजनं।८।	अज्ञानतः षण्मास संसर्गे द्वितीयसंसर्गिणः साई चतुर्वार्षिक। व्रतं।	६८ धेनवः	२०२ कार्षापणाः।	३८ गावः। अशक्तौ। ३७ कार्षापणाः।
	ज्ञानतः षण्मास संसर्गे तृतीयसंसर्गिणः षाड्वार्षिकव्रतं।	९० धेनवः	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।



अथमहापातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं।	तदशक्तौ चूर्णीदानं	दक्षिणा
	अज्ञानतःषन्मासंसर्गेत्तत्तीयांशे सर्गिणा सैववार्षिकव्रतं।	५५ धेनवः	१६५ कार्षापणाः।	५५ गावः अशक्तौ ५५ कार्षापणाः
	चतुर्थ संसर्गि। एते ज्ञानाज्ञानतः प्रायश्चित्ताभावः।	०	०	०
महापातकिनां लघुतरसंसर्गोयथा एकशय्या। शनयानादिः।	एभिस्त्रिभिर्लघुतरसंसर्गैरेको लघुसंसर्गः।			
तेनाल्पलघुतरयथा लापस्पर्शनिःश्वासादिः।	ज्ञानतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यं तेनाष्टादशवार्षिकव्रतं।	२७· धेनवः	८१· कार्षापणाः तत्तु भूस्वर्णादिना।	१५· गावः अशक्तौ १५· कार्षापणाः।
	अज्ञानतो वत्सरद्वयेन।	तथा	तथा	तथा।
	ज्ञानतत्रैकैकशो वत्सरत्रयेण।	तथा	तथा	तथा
	अज्ञानाद्वत्सरषड्केन।	तथा	तथा	तथा
	संलापादीनां त्रयाणामेकैक	तथा	तथा	तथा

अथमहापातककानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा।
	यानादिसमानत्वात् ज्ञानतो वत्सरत्रयेणपातः।			
	संलापादीनांत्रयाणांएकैकयानादिसमानत्वादज्ञानादर्धषड्केन पातः। तेनाष्टादशवार्षिकव्रतं।	२७· धेनवः	८१· कार्षापणाः तत्तु भूस्वर्णादिना।	१५· गावः। अशक्तौ। १५· कार्षापणाः।
	ज्ञानादेकैकशो वत्सरनवकेन।	तथा	तथा	तथा
	अज्ञानादेकैकशोऽष्टादशवत्सरैः पातः॥ ।	तथा	तथा	तथा
	नवविधपापान्वितानां मध्यात् येन पापीयसा यः संसृष्टः सतस्यैव तत्पादहीनं कुर्यात्। एतच्च प्रथम संसर्गिणां। द्वितीय संसर्गिणां द्विपादहीनं॥			



अथमहापातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
	तृतीयसंसर्गि णांत्रिपादहीनं सर्वत्रज्ञेयं ॥ संसर्गिणामृक कालस्तुनाधि केभागहारेण प्रायश्चित्तस्तना धिकं ज्ञेयं रघु नंदनमहाचा र्यमतेकलौल घुसंसर्गेषु प्रति ग्रहादिषुपाति त्याभावात् तत् प्रायश्चित्ताभावः			
पतितेनोत्पन्न मपिमहापात। किंसंसर्गिविशे षः ॥	यस्यपतितस्य तप्रायश्चित्तं त स्यपातित्यदशा यांजातस्यपुत्र स्य तत्तृतीयभा गप्रायश्चित्तं। तदानीं तज्जा तायाः कन्यायाः पतितेनोत्पन्न त्रप्रायश्चित्तंतृ तीयभागप्राय श्चित्तं।			

अथानुपातकानि	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
समुत्कर्षेअनृत तत्र समुत्कर्षनि मित्तं वाचा क्रियया वा अन्यथा प्रतिपा दनंयथाशूद्रस्य ब्राह्मणोऽहमिति वचनंयज्ञोपवीत धारणंच। अथवा परस्य सम्यगना। तिविषयेन् कर्षस तिनायंब्राह्मणोन चकिंचिदयं जा जानीते इत्यनृत वचनं १ राजगा। मिपैशुनं तत्वरा जनिर्दोषस्यदो षख्यापनं २ गुरो रलीकनिर्बंधः स तगुरोर्जन्मदातु। र्मिथ्यादोषाभियोगः ३ एतानित्रीणिज्ञा नतोऽसंताभ्या ॥ से अज्ञानकृतत्र।	द्वादशवार्षिकव्रतं एतच्च ज्ञानात्यन्ता भ्यासतः। एतन्म ध्याद्यउपपातके। हस्यपेतेनतदज्ञाना। दिनालघुविषयं चेत्यादिव्यवस्थेयं यच्चवशिष्ठवचनं ब्रह्मोज्झः कृच्छ्रेद्वा दशरात्रंचरित्वा पु नरुपयुंजीत वेद माचार्यात् विप्लुः समुत्कर्षान्तेगु रोश्चालीकनिर्बंधे तदाचारेणेव मासं पयसा वेर्तेन आत्मा र्थं परदारगमना। भिशापः। वशिष्ठः गुरोश्चालीकनि र्बंधेसचेलस्नातो गुरुं प्रसादयेत् प्रसादात् पूतो ॥	१८·धेनवः ॥	५४·कार्षा पणाः। ॥	१८·गावः अशक्तौ १८·कार्षा पणाः।



अथानुपातकानि	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
ह्महत्या समानि। यागस्थयोः क्षत्रियवैश्ययोर्वधः।४। गर्भिणीवधः ५ रजस्वलावधः ६ अत्रिगोत्रावधः ७ ब्राह्मणव्यतिरिक्ताविज्ञातगर्भवधः ८ शरणागतवधः ९ एतानि च अज्ञानकृतब्रह्महत्यासमानानि।	भवति एतानि प्रमादादिकृते बोध्यानि।			
ब्रह्मोज्झता। सा च असच्छास्त्राभियोगेन अधीतवेदविस्मरणं १ वेदनिन्दा अर्थिनो। अन्यतस्य २ कौटसाक्ष्यं ३ सुहृद्वधः। स च ब्राह्मणव्यतिरिक्तमित्रवधः ४ गर्हितान्नजग्धिः साव	द्वादशवार्षिकव्रत	१८०धेनवः	५४०कार्षापणाः तन्न भस्वर्णादि वा।	९०गावः अशक्तौ ९०कार्षापणाः।

अथानुपातकानि॥	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
ज्ञानतोऽभ्यस्ता। अभ्यासेनान्त्यजान्नभोजनं।५। गर्हितान्नजग्धिः ज्ञानतोऽभ्यासेन छत्राकलशुनादिभोजनं॥ ६। एतानि षट् अज्ञानकृतसुरापानसमानि।				
ब्राह्मणसंबंधिनिः क्षेपहरणं १ नरा २ अश्व ३ रजत ४। भूमि ५ वज्र ६ मणी ७ नां वा अभ्यासेन हरणं एतानि समब्राह्मणस्वामिकाशीतिरक्तिकापरिमितसुवर्णस्तेयसमानि।	ज्ञानतो द्वादशवार्षिकव्रतं अज्ञानतस्तदर्द्धं।	१८०धेनवः	५४०कार्षापणाः न ल्लम्पस्वर्णं दिवा।	९०गावः अशक्तौ ९०कार्षापणाः।
सपिंडस्त्रीगमनं १ ब्राह्मणकुमारीगमनं २ चाण्डालादिस्त्रीगमनं	ज्ञानतो महापातकोक्तप्रकारेणमरणं। तदै। कल्पिकं चतुर्विंशति॥	३६०धेनवः	१०८०कार्षापणाः तन्न भस्वर्णं दिवा।	३०गावः अशक्तौ ३०कार्षापणाः।



अथानुपातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
३। सवर्णामित्रस्त्रीगमनं ४ पुत्रस्यासवर्णास्त्रीगमनं ५ औरसेतरपुत्रभार्यागमनं ६	वार्षिकव्रतं। अज्ञानतो द्वादशवार्षिकव्रतं।	१८० धेनवः	५४० कार्षापणाः तन्मूल्यस्वर्णादि वा।	१०० गावः अशक्तौ १०० कार्षापणाः।
पितृष्वसृगमनं ७। मातृष्वसृगमनं ८।	पंचपुरुषाधिकगामिनीनां मासं गमने चान्द्रायणं।	८ धेनवः	२२ कार्षापणाः सार्द्धसमधेनुसं।	यथाशक्ति
गंतारमपेक्ष्य हीनवर्णापितृपत्नीगमनं ९ पितृव्यपत्नीगमनं १० मातामहपत्नीगमनं ११ मातुलपत्नीगमनं १२ श्वश्रूगमनं १३ स्वसृगमनं।१४ ज्येष्ठभ्रातृपत्नीगमनं १५ राजपत्नीगमनं १६ श्रोत्रियपत्नी।गमनं।१७ ऋत्विक् पत्नीगमनं।१८॥	अभ्यासव्यभिचारिण्याः सकृद्गमने प्रथात्समपुरुषगामिन्या गमने पराकः।	५ धेनवः	१५ कार्षापणाः।	यथाशक्ति
	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रं।	४ धेनवः	११ कार्षापणाः। पादोनधेनुचतुष्टयस्य ग्राह्यत्वात्	यथाशक्ति
	अज्ञानाद्दारोहणमात्रे संबंधविप्रकर्षे वा पराकस्तप्तकृच्छ्रो वा॥			

अथानुपातकानि॥	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
उपाध्यायपत्नीगमनं १९ शिष्यपत्नीगमनं २० स्वसखीगमनं २१ असवर्णाजातदुहितृगमनं।	ज्ञानतो महापातकोक्तप्रकारेण मरणं तद्विकल्पकं चतुर्विंशतिवार्षिकव्रतं॥	३६० धेनवः	१०८० कार्षापणाः तन्मूल्यस्वर्णादि वा	२०० गावः। अशक्तौ २०० कार्षापणाः।
२२ आचार्यपत्नीगमनं।२३। पुरश्चरणगतागमनं २४ प्रव्रजितागमनं २५ धात्रीगमनं २६ साध्वीगमनं।२७	अज्ञानतो द्वादशवार्षिकव्रतं	१८० धेनवः	५४० कार्षापणाः तन्मूल्यस्वर्णादि वा	१०० गावः। अशक्तौ १०० कार्षापणाः।
	पंचपुरुषाधिकगामिनीनां मासं गमने चान्द्रायणं॥	८ धेनवः	२२ कार्षापणाः सार्द्धसमधेनुसंकलनात्	यथाशक्ति
निःक्षिप्तस्त्रीगमनं २८ वर्णोत्तमागमनं।२९। एतानि गुरुतल्पगमनसमानि।	अभ्यासव्यभिचारिण्याः सकृद्गमने प्रथात्समपुरुषगामिन्या गमने पराकः।	५ धेनवः	१५ कार्षापणाः।	यथाशक्ति
इति चतुःप्रकाराण्यनुपातकानि मिलित्वा द्विपंचाशत्॥ संख्यायानि॥	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रं॥	४ धेनवः	११ कार्षापणाः पादोनधेनुचतुष्टयस्य ग्राह्यत्वात्॥	यथाशक्ति

अथोपपातकानि।	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
ब्राह्मणक्षत्रियवैश्यकर्तृक। ज्ञानकृतब्राह्मणस्वामिकगवीवधः।	त्रैमासिकव्रतं तद्यथा कृतसशिखवपनो ग्यापादिताघागोघ्नमिणाकृतपरिधानोमरावगुणवेनो मासमेकंगोमूत्रेण यवाकृतान् यवान पिवन्गोष्ठे वसेत्। अपरमासद्वये उपोष्य परदिने सायंस्वल्पंभुंजीत। त्रिनेद्विया गोमूत्रेण। स्नानं चरेत् दिवा गवानुगमनं कुर्वंस्तिष्ठन् गोरजःपानं च चरेत् गोःशुश्रूषां नमस्कारं च कुर्यात् रात्रौ वीरासनं वसेत्। तिष्ठन्तीषु गोषु स्तु तिष्ठेत् व्रजन्तीषु तास्वनुव्रजेत्॥	१२ धेनवो	३६ कार्षापणाः तत्सुवर्णादि वा।	१ वृषः ९। गावः। अशक्तौ १५ कार्षापणाः
		१७ धेनवो बहुसंमताः।	५१ कार्षापणाः।	तथा।

अथोपपातकानि	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदानं	दक्षिणा
मंडपस्य तु । राज्यं च विजय श्चैव
मायुर्वर्द्धन मेव च पुत्रलाभः स्त्रि
यः पुष्टि स्त्रिकोणादि क्रमाद्भवेत्
कर्ण्णानथ जादिसंख्या वा हादिगर्भ
गृहं तथा मंडपः समसंख्याभिपुत्ति
तः स्तम्भनस्तथा मंडपस्य चतुर्थांशा
दूर्द्धः कार्या विजानता स्पर्द्धागवात
कोपेतो निर्गवादोऽथवा भवेत् सा
र्द्धभित्ति प्रमाणेन भित्तिमाने न वा
पुनः भित्तैर्द्धरुपयेतो वापि कर्त्तव्या
मंडपाः क्वचित् प्रासादे मंजरीका
र्य्या विचित्रा विषम भूमिका ॥ परि
माण विरोधेन रेखा वैषम्य भ
मिका आधारस्तु चतुर्द्वार स्तम्भ
उप शोभितः शतशृङ्ग समायुक्तो
मेरु प्रासाद उत्तमः । मंडपोत्तस्य
कर्त्तव्या भद्रै स्त्रिभिरलंकृताः ॥
घटनाकारमानानां भिन्नाभिन्ना भ
वंति ये । कियन्तो येषु साधाराति
राधाराश्च केचन प्रतिछंदकभे
देन प्रासादाः संभवंति ते ।
अन्योन्य संकरा स्तेषां घटना नाम
भेदतः देवतानां विशेषाय प्रा
सादा बहवः स्मृताः प्रासादे नि
यमो नास्ति देवतानां स्वयंभुवां ।
तामेव देवतानां च पूर्वमानेन का
रयेत् चतुरस्रायतास्तत्र चतुष्कोण

समन्विताः चंद्रशालान्विताः कार्य्या
भेरीशिखरसंयुताः पुरतो वाहना
नां च कर्तव्यालयच् मंडपाः ॥ ना
ट्यशाला च कर्त्तव्या द्वारदेशसमाश्र
या प्रासादाद्देवतानां च कार्य्या दि
क्षु विदिक्ष्वपि ॥ द्वारपालाश्च कर्त्त
व्या मुख्या गत्वा पृथक् पृथक् ।
किंचिद्दिहूरतः कार्य्या मठास्तत्रापि
जीविनां प्राकृताजगतीकार्य्या फ
ल पुष्प जलान्विता प्रासादेषु सुरा
न्स्थाप्य पूजाभिः पूजयेन्नरः ॥ वासु
देवः सर्वदेवाः सर्वभाक् तद्गृहादि
कृत् इति गारुडे प्रासादकीर्त्तनं ।
नाम ४७ अध्यायः ॥
प्रासादकुक्कुटः पुं पारावतः इति
त्रिकाण्डशेषः ॥
प्रासिकः पुं प्रासास्त्रधारी । प्रासप्र
हारी तत्पर्य्यायः कौंतिकः २ ।
इत्यमरः ॥
प्रास्थिकः त्रि प्रस्थं संभवति प्रास्थि
कः कटाहः प्रस्थस्त्वस्मिन्समावे
शयतीत्यर्थः प्रास्थिकी ब्राह्मणी
प्रस्थमवहरति पचति वेत्यर्थः ।
इति सिद्धांतकौमुदी ॥
प्राह्लः पुं मल्लोपदेशः । इति शब्दमा
ला । निर्विसर्गश्चेत् मपूर्वमिवं तत्
बुधानां चप्यमप्यवं ॥ ॥
प्राह्णः पुं पूर्वाह्णः इत्यमरः ॥
प्राह्णे व्य पूर्वाह्णे इति सिद्धांतकौ
मुदी ॥
प्राह्णेतनः त्रि पूर्वाह्णसंबंधी इ
ति सिद्धांतकौमुदी ॥
प्राह्णेतरां व्य अतिशयपूर्वाह्णे ।
इति मुग्धव्याकरणं ॥
प्रियः पुं भर्त्ता इत्यमरः मृग
विशेषः इति जटाधरः ऋद्धिना
मौषधं वृद्धिश्च इति मेदिनी ॥
जीवकौषधं इति राजनिर्घण्टः
प्रियोऽप्रियश्च कार्य्यवशाद्भव
ति यथा न हि कस्य प्रियः को वा
विप्रियो वा जगत्त्रये कालेकार्य्य
वशात् सर्वे भवंत्येवाप्रियाः प्रियाः
इति श्रीकृष्णजन्मखंडे ५ अ
ध्यायः ॥
प्रियकः पुं पीतशालकः नीपः
चित्रमृगः अलिः प्रियंगुः ॥
कुंकुमं इति मेदिनी धाराकदम्बः
अशनवृक्षः इति राजनिर्घण्टः ॥
प्रियंकरः त्रि प्रियकारकः यथा
महांगलीनपेत्वाके वंशादाशार
थिर्मम पितुः प्रियंकरो भर्तादे
मकारस्तपस्विना इति भट्टिः ॥
प्रियंकरी स्त्री वृहज्जीवंती श्वेत
कण्टकारी अश्वगंधा इति राज



विभूतिद्वादशीव्रतं कृत्वा रत्याः सप
त्नीजाता यथा वेश्याऽनङ्गवतीनाम

इति भावप्रकाशः अपिच चारस्य
चफलं पक्वं हृद्यं गोल्पाम्लकं गुरु
तद्बीजं मधुरं हृद्यं पित्तदाहार्त्तिनाश
नं इति राजनिर्घण्टः ॥
प्रियाला स्त्री द्राक्षा इति राज नि
र्घण्टः ॥
प्रियोदितं त्रि चाटुवाक्यं इति श
ब्दरत्नावली प्रियवाक्यविषयश्च
प्री ञ तर्पणे इतिकविकल्पद्रुमः
प्री ङ. य प्रीतौ कान्तौ इतिकविक
ल्पद्रुमः ॥
प्री ग ञ कान्तौ । तर्पणे । इति क
विकल्पद्रुमः ॥
प्री क तर्पणे इतिकविकल्पद्रुमः ।
प्रीणः त्रि पुरातनः इतित्रिकाण्डशे
षः प्रीतः इतिव्याकरणं ॥
प्रीणनं क्ली तृप्तिकरणं तत्पर्य्यायः
तर्पणं २ अवनं ३ इत्यमरः ॥
प्रीणसः पुं गण्डकः इति राज नि
र्घण्टः ॥
प्रीतः त्रि प्रीतियुक्तः तत्पर्य्यायः
हृष्टः २ मत्तः ३ तृप्त ४ प्रह्लन्नः ५
प्रमुदितः ६ इत्यमरः हर्षितः ७
नर्म्म इति मेदिनी ॥
प्रीतिः स्त्री तृप्तिः तत्पर्य्यायः ।
मुत् २ प्रमदः ३ हर्षः ४ प्रमो
दः ५ आमोदः ६ सम्मदः ७ आ
नन्दथुः ८ आनन्दः ९ शर्म १०
सातं ॥ सुखं ११ इत्यमरः ॥
केचित्तु मदादि सप्तकं प्रीतौ
आनन्दथ्वादि पंचकं सुखे इ
त्याहुः । इति भरतः । इष्ट
दर्शन जन्यं सुखं इतिमे[illegible]
नीलकंठः कामपत्नी । सा पुरा
अनंगवती वेश्या आसीत् विभू
तिद्वादशीव्रतं समाप्य माघमा
सस्य द्वादश्यां लवणाचलं नि
वेद्य यत्नो गुरवे शय्यां चोपस्करा
न्वितां अलंकृत्य हृषीकेशं सौव
र्णमरपादपं सा वानंगवती वेश्या
कामदेवस्य मासस्य ते पत्नी सपत्नी
संजाता रत्याः प्रीति रिति श्रुता
इति मात्स्ये ९२ अध्यायः ॥
विष्कंभादिसप्तविंशति योगान्त
र्गतद्वितीययोगः तत्र जातफलं
प्रसूति काले यदि प्रीतियोगेन
रो स्याद्गः सावधानः विनोदी ।
रक्तानुरक्तो विदुषां प्रपन्नः सं
प्रार्थितो यच्छति वित्तमेव इति
कोष्ठीप्रदीपः प्रेम । इति मे
दिनी ॥
प्रीतिजुषा स्त्री अनिरुद्ध ।
पत्नी ॥ उषा ॥ इति श
ब्दरत्नावली ॥

प्रीतिदः पुं भण्डः भाँड इति भाषा
तत्पर्य्यायः । वासंतिकः २ केलि
कलः ३ वैहासिकः ४ विदूषि
कः ५ प्रहासी ६ । इति हेमचन्द्रः
हर्षस्त्वप्रेम दातरि त्रि ॥
प्रीतिदत्तं क्ली प्रीत्यादत्तवस्तु य
था प्रीत्या दत्तं यत् किंचित् श्व
श्र्वा श्वशुरेण वा । पाद वंदनिकं च
व प्रीतिदत्तं तदुच्यते इति मिता
क्षरा ॥ भावे क्तप्रत्यये प्रीति दा
नं च ॥
प्रीतिभोज्यं त्रि प्रीत्या भक्षणीयं
मन्नादि । यथा अन्नानि प्रीतिभो
ज्यानि आपद्भोज्यानि वा पुनः न च
संप्रीयसे राजन् न चैवापद्गता वयं
इति महाभारते उद्योगपर्व ॥
प्रु ङ. सर्पणे । इतिकविकल्पद्रुमः
प्रुष उ भस्मीकरणे इतिकविक
ल्पद्रुमः ॥
प्रुष ग स्नेके पूर्त्तौ स्नेहे । इति
कविकल्पद्रुमः ॥
प्रुष्टः त्रि दग्धः । इत्यमरः ॥
प्रुष्वः पुं ऋतुः दिवाकरः इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः ।
प्रुष्वा स्त्री जलबिन्दुः । इतिसिद्धान्त
कौमुद्यामुणादिवृत्तिः ॥
प्रेंखन त्रि चलनविशिष्टः संसक्ति
विशिष्टः यथा आकृष्टिवद्ध [illegible]
कामस्य पाणिपृष्ठ प्रेंखनस्तोमुच
यसंवलितोः विकायाः इत्याद्यम
रुशतकं ॥
प्रेंखा स्त्री दोला इत्यमरः पर्य्यटनं
अश्वगतिः संवेशनान्तरं । इति
मेदिनी नर्त्तनं । इति धरणिः ॥
प्रेंखितं त्रि कंपितं इतिअमरः ।
प्रेंखोल न क चापले चंचलीभा
वे इति कविकल्पद्रुमः ॥
प्रेंखोलनं क्ली दोला इतिहेमचंद्रः
प्रेंखोलितं त्रि दोलितं तत्पर्य्यायः
तरलितं २ लुलितं ३ प्रेंखितं ४
धुतं ५ चलितं ६ कंपितं ७ धूतं ८
वेल्लितं ९ आंदोलितं १० इति
हेमचंद्रः ॥
प्रेतः पुं नरकस्थप्राणी इतिअमरः
भूतभेदः ॥ मृते त्रि ॥ इति मेदि
नी वैदिकविधानेन और्द्ध्वदेहि
काभावात् विसृष्टदेषाच्च वर्कन
रकभोगान्ते प्रेतशरीरं भवति ।
यथा । लोमश उवाच ततो वक्र
तिथ्ये काले स राजा पंचतां गतः
वैदिकेन विधानेन न लेभे सोर्द्ध्व
दैहिकं विसृष्टदेष मात्रेण प्र

गानांसप्तविंशतिं भुक्त्वाच यात
नां यामीं निस्तीर्णे नकरोत्तपः स
मयागिरिराजेन पिशाचोभून्महा
महान् तस्य रूपंयथा देवद्युति
रथीयान् स्मश्रावकरुणामयः
समागत्यततस्तत्रतेपिशाचंदद
दर्शसः विकरालमुखंदीनंपि
शंग नयने भृशं ऊर्द्धमूर्द्धजरू
क्षांगंयमदूतमिवापरं चलज्जि
ह्वंचलंबोष्ठंदीर्घजंघशिराकुलं
दीर्घांघ्रिंशुष्कवक्त्रं च गम्भीराक्ष
कपंजरं । इति पाद्मोत्तरखण्डे १९
अध्यायः प्रेतादिजनकर्माणि
यथा ॥ हविर्जुह्वति नाग्नौ ये मो
विंदंनार्चयंति ये स्वभ्यंतेनात्म
विद्याच स्वतीर्थ विमुखाश्च ये ।
स्वर्णवस्त्रताम्रलेरत्नमंत्रफलं
जलं श्राद्धेभ्योनप्रयच्छंतिसर्वे
स्वकृतदारकाः ब्रह्मस्वंच स्त्री
धनानिलोभादेवहरंतिये वले
नछद्मना वापि धूर्ताश्च परवंच
काः नास्तिकाः जह्का घोरा
येषामेवकृतघ्नयः । बालवृद्धा
तरस्त्रीषु निर्दयाः सत्यवर्जिताः अग्नि
दागरदाश्चैवयेषामेकूटसाक्षिणः ।
अगम्यागामिनः सर्वे येषामेग्राम
याजिनः आधावरणसंपन्नावर्णा

दिधर्मवर्जिताः देवोपदेवदनुज
रक्ता यज्ञादिसेविनः सर्वदामा
दकद्रव्यपानमत्ता हरद्विषः देव
तोच्छिष्टपतितनुपश्राद्धान्नभोजि
नः असत्कर्मरतानित्यं सर्वपातक
पापिनः पाषाण्डधर्मचरणाः पु
रोधोवृत्तिजीविनः पितृमातृस्व
षापत्यस्वदारत्यागिनश्चये ये
कदर्याश्चलुब्धाश्च नास्तिकाध
र्मदूषकाः त्यजंतिस्वामिनंयुद्धेस
जंतिशरणागते गवांभूमेश्चहर्त्ता
रोयेचाम्येरत्नदूषकाः महादेवे
षुसर्वेषुप्रतिग्रहरताश्चये परद्रो
हरताये च तथा ये प्राणिहिंसकाः
परापवादिनपापा देवताः गुरु
निंदकाः ऊपतिग्राहिनः सर्वे संभ
वंति पुनःपुनः प्रेतराक्षसपै
शाचाः तिर्यग्वृत्तऊयोनिषु न
तेषांसुखलेशोस्ति इहलोकेप
रत्रच इति पाद्मोत्तरखण्डे १९
अध्यायः ॥ पंचप्रेतोपाख्यानं
यथा ब्राह्मण उवाच प्रेतानांना
मजातीतोयुष्माकंसंभवःकथं ।
किंतत्कारणमुद्दिश्य प्राप्तमीदृशंनाम
काः प्रेताऊचुः अहंपर्युषितसदाभक्ता
दर्पात्पर्युषितसदा एतत्कारणमुद्दिश्य
नाम ॥

पर्युषितंमम १ सूचितावदृवोने
नविप्राद्याह्यन्नकांक्षिणः एतत् ।
कारणमुद्दिश्य सूचीमुखमिमंवि
दुः २ शीघ्रंगच्छतिविप्रेणयाचितः
क्षुधितेन वै । यस्मात्भुंक्ते द्विजः शि
घ्रमेषशीघ्रक उच्यते ३ गृहोप
रि सदा भुंक्ते स्वादु द्विजभयेन हि
द्विजाय ऊर्ध्वितंदत्वापयरोहक
उच्यते ४ मौनेनापि स्थितोनित्यं
याचितो विलिखेन्महीं । अस्मा
कमपि पापिष्ठो लेखको नाम एष
वै ५ मत्फेणलेखको यातिरोहकः
पाश्वतः शिराः शीघ्रकंपंगुतां
प्राप्तः सूचीसूचीमुखोऽभवत् ॥
प्रेतानामाहारोयथा । द्विज उवा
च येजीवा भुवि तिष्ठंति सर्वेआ
हारमूलकाः युष्माकमपिआ
हारं श्रोतुमिच्छामि तत्वतः ॥
प्रेताऊचुः शृणु आहारः मस्माकं
सर्वसत्वविगर्हितं श्लेष्ममूत्रपुरी
षेण योषितांतमलेनच गृहाणि
त्यक्तशौचानि प्रेता भुंजंतितत्रवै ।
स्त्रीभिर्जग्धानिजीर्णानि संकीर्णा
पहृतानिच । मलेनाति जुगुप्सानि
प्रेता भुंजंति तत्र वै भयलज्जावि
हीनानि पतितैः सेवितानिच अन्या
यदस्युपक्वानि प्रेता भुंजंति तत्रवै

कलहान्वितशोकानित्यक्तशोभा
नि भद्रैः सवर्चस्कानि भाण्डानि
प्रेता भुंजंति तत्रवै बलिमंत्र वि
हीनानि द्विजादृष्टानि यानि तु ॥
नियमव्रतहीनानि प्रेता भुंजंति
तत्रैव गुरवो नैव पूज्यंते स्त्रीजिता
नि मलानिच सक्रोधाक्षपवित्रा
णि प्रेता भुंजंति तत्रैव भुंजंतिभि
न्नभांडेषु मर्यादारहितेषुच अन्या
न्याच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुंजते
सकेशमाक्षिकोच्छिष्टं पूतपर्यु
षितं तथा सक्रोधं च सशोकंच
तच प्रेतेषु भोजनं सनग्र भोज
नं यच्च नाग्नरीयपदा सो
चीयमास्तरीकदत्तं तच्च प्रेतेषु भो
जनं अर्द्धग्रासं महाग्रासं सोतदि
गं पतितं तथा दुर्भुक्तं गोष्ठिकंचै
व तच्च प्रेतेषु भोजनं सोतिकेस
तकेचैव रजस्वलयाकृतं निर्ही
पंक्तमिवत्याग्रेयद्भुक्तं प्रेतिकं तत
त् एतल्लेकथितं सर्वं यत्प्रेतेषु
वभोजनं निर्विण्णाः प्रेतजात्या वै
पृच्छामस्त्वां द्विजोत्तम ॥ प्रेतत्वा
भावकारणं यथा नप्रेतो जा
यते येन येन चैवेह जायते
एतत्सर्वं समासेन प्रब्रूहि
वदतांवर ॥ ब्राह्मण उवाच

पकरात्रैस्त्रिरात्रैर्वा कृच्छ्रं चान्द्राय
णादिकं । व्रतैश्चोपोषितो यस्तु
न प्रेतो जायते नरः ॥ मिष्टान्नपा
नदाताच सततं श्रद्धयान्वितः
देवपूजाकरो नित्यं नप्रेतोजा
यतेनरः त्रिरग्निरेकपंचाग्निर्नि
रग्निर्वाप्युपासकः । सर्वभूतद
यापन्नो नप्रेतोजायतेनरः ॥ तु
ल्यमानापमानश्च तुल्यः कांच
नलोष्ट्रयोः तुल्यः शत्रौच मित्रे
चनप्रेतोजायतेनरः देवताति
थिपूजासु गुरुजातिषु नित्यशः
वेदशास्त्ररतोनित्यंनप्रेतोजायते
नरः जितक्रोधोमदैश्वर्य्यत्वषसं
ग विवर्जितः क्षमाक्रोधस्तुशी
लश्च न प्रेतो जायते नरः देव
तातिथिपूजास्तु पर्वतांश्च न प्रे
तोजायतेनरः प्रेतत्वकारणं ।
यथा शूद्रान्नं यो द्विजो भुंक्ते यः
कामति द्विजोत्तमं । हतिहाद्वि
जदेवेषु स प्रेतो जायतेनरः ॥
मातरं पितरं वृद्धं ज्ञातिं साधुजनं
तथा । लोभात्त्यजति यः स्ने
हं स प्रेतोजायतेनरः अयाज्य
याजकश्चैव याज्यंच पति ।
वर्जयेत शूद्रान्नग्रहकर्त्ताच
सप्रेतो जायतेनरः ऊर्व्योति
षिक्रविषयस्तुजनेषुजेदेशकः
शूद्रसेवाकरोराज्ञांसप्रेतोजाय
तेनरः सेवकायापट्टतोयः से
वकस्यपरिग्रहः तातुभावपि
जायेते प्रेतौकाल्यान्नकिंप्रदः ॥
द्विजानोमंत्रितोभुंक्तेशूद्रान्नं वा
द्विजस्तत्तु शूद्रेणैव द्विजः प्रेतो
निरयान्नुपगच्छति गीतवाद्य
रतोनित्यंमद्यपस्त्रीनिषेवणात्
धूतमांसप्रियोयस्तु स प्रेतोजाय
तेनरः वृथारतो वृथामांसो वृथा
वादी वृथामतिः निंदको द्विज
देवानां स प्रेतो जायतेनरः वृ
द्धं बालं गुरुं विप्रं योवमन्यभुन
क्तिवै कन्यांददातिशुल्केन स
प्रेतोजायतेनरः न्यासापहर्त्ता
मित्रध्रुक् परपाकरतस्तथा विश्र
म्भघाती कूटस्थ सप्रेतोजायतेनरः
निर्दोषान् संदहेन्नारीं त्यजेत् का
लात्र पातियः । धर्महीनतयस्ते
षां स प्रेतोजायतेनरः दस्युचर
ध्ययानानिस्नतशय्यासनादियः
कृष्णाजिनंच गृह्णाति प्रेततापत्त्व
गतोद्विजः तथाभयमत्तवीकालं
सशैलां मेदिनीं द्विजं ऊरुवत्र
स्ययदानंचाणिलात् पतिता ।
तथा ॥ मात्सिकेपि नवश्राद्धे ॥

भुंजन् प्रेतात्वमृच्छते ब्रह्महागोव
धीस्तेयीसुरापो गुरुतल्पगः भू
मिकन्यापहर्त्ताचयः सप्रेतोजायते
नरः लाक्षासकरकृन्नित्यंवर्णसं
करकृत्तथा योनिसंकरकृच्चापि
सप्रेतोजायतेनरः विक्रीणाति ।
विषंशस्त्रं तिलानांलवणस्यत
गवां केशारिणं मोहात् विक्रयात्
प्रेततांव्रजेत् । कूटमाप्यचतोल्य
नक्रयंक्रीणाति विक्रयात् ॥ मद्य
तक्रपयो दध्नांसप्रेतोजायतेनरः
स्त्रीरक्तोमद्यपानेतुमृगया मनु
धावति नित्यनैमित्तिकेहीनास
प्रेतोजायतेनरः इति गरुडपुराणं
मनुष्याणांमातिवाहिकदेहानंत
रं प्रेतदेहो भवति यथा विष्णुध
र्मोत्तरे । तत्क्षणादेवगृह्णाति
शरीरमातिवाहिकं आतिवा ।
हिकसंज्ञोसौदेहो भवति भार्गव
केवलं तन्मनुष्याणां नान्येषां प्रा
णिनां क्वचित् प्रेतपिंडैस्ततोद
त्तैर्देहमाप्नोति भार्गव भोगदेह
मितिप्रोक्तं क्रमादेवनसंशयः
प्रेतपिण्डानदीयंते यस्य तस्य वि
मोक्षणं श्मशानिकेभ्यो देवेभ्य
आकल्पनेव विद्यते तत्रास्य ।
यातनाघोराः शीतवातातपो ।
द्भवाः ततः सपिण्डीकरणेबान्धवैः
सकृतेनरः पूर्णे संवत्सरे देह
मतोन्यंप्रतिपद्यते ततः सनरके
याति स्वर्गं वा स्वेनकर्मणा । इ
तिशुद्धितत्त्वं ॥

प्रेतकार्य्यं क्ली मृतस्यदाहादिस
पिण्डीकरणान्तंकर्म्म यथा अहं
त्वाप्रेतकार्याणिप्रेतस्य धनहार
कः वर्णानां यद्वधे प्रोक्तं तद्व्रतेनि
यतश्चरेत् इतिदायतत्त्वं ॥

प्रेतगृहं क्ली श्मशानं इतिहेम ।
चंद्रः ॥

प्रेततर्पणं क्ली मरणावधिसपिं
डीकरणपर्य्यन्तं प्रेतशब्दोल्लेखे
नजलदानं यथा अत्र प्रेततर्पणे
तिलास्तिति विशेषोपादानात्
सूर्य्यादिवारेणापि तिलैरेव त
र्पणं प्रतीयते तदनुष्ठानं यथा
अपः सर्वशावस्पर्शिनोगत्वापितृ
पदस्थानेप्रेतपदोहेन द्वितीया
न्तेन तर्पयेयुः पितृशब्दोच्चारणेपि
हृद्दा भवति एतेन अमुकगोत्रं
प्रेतं अमुकदेवशर्म्माणं तर्पया
मि इति सामगानां प्रयोगः ॥
यजुर्वेदिनांतुअमुकगोत्रप्रेत
अमुकदेवशर्म्मन् तृप्यस्व । इ
ति संबोधनान्तवाक्यं ॥



इति शुद्धितत्त्वं ॥
प्रेतनदी स्त्री वैतरणी इति शब्द
रत्नावली ॥
प्रेतपटहः पुं मरणकालेवादनी
यवाद्यविशेषः तत्पर्य्यायः भव
रुतः १ भस्मभंगुरकः २ इति त्रि
काण्डशेषः ॥
प्रेतपतिः पुं यमः इति हला
युधः ॥
प्रेतपिण्डः पुं मरणावधिसपि
ण्डीकरणपर्य्यन्त प्रेतसम्प्रदान
कपिण्डकारणं यथा न स्वधाञ्च
प्रयुञ्जीत प्रेतपिण्डे दशाहिके भा
वेनैतच्चैवपिण्डयत्तदनसमग्रकं
तस्मात् पिण्डस्य प्रेताङ्गकरणत्वं।
यथा ब्रह्मपुराणे। शिरस्त्वाद्येन
पिण्डेन प्रेतस्य क्रियते सदा द्वि
तीयेन तु कर्णाक्षि नासिकास्तु
समासतः गलांसभुजवक्षां।
सि तृतीयेन तथा क्रमात् च
तुर्थेन तु पिण्डेन नाभिलिङ्ग
गुदानि च ॥ जानुजंघे तथा पा
दौ पंचमेन तु सर्व्वदा सर्व्वम
र्म्माणि षष्ठेन सप्तमेन तु नाड्यः
दन्तलोमाद्यष्टमेन वीर्य्यं च नव
मेन तु दशमेन तु पूर्णत्वं तृप्त
तासुधिपर्य्ययः तदकरणे दो।
षो यथा प्रेतपिण्डानदीयतेयस्य
तस्य विमोक्षणं प्रमाणानि के
भ्योदेवेभ्यश्चाकल्पनैवविद्यते
पूरकपिण्डदानादेरितिकर्त्तव्यता
यथा पारस्करः प्रेताय पिण्डंद
त्वा अवनेजनदानप्रत्यवनेजनेषु
नामग्राहं सन्धये तो रात्रिं विहाय
सि क्षीरोदके निदध्युः प्रेतात्र स्ना
हि पिब चेदं क्षीर मित्यञ्चार्य्येति
अत्र दान शब्देन पिण्डदान मुक्त
बहुवचनात् तेनावनेजनपिण्ड
दान प्रत्यवनेजनेषु नाम ग्राहं
नाम गृहीत्वा प्रेतपिण्डानुष्ठानं स
माप्य। विहायसि रात्रौ क्षीरोद
के प्रेतात्र स्नाहि पिब चेदं क्षीरमि
त्यञ्चार्य्य निदध्युः प्रथमेऽहनि यो
दद्यात् प्रेतायान्नं समाहितः य
त्रामवस्त्र चाप्येष स एव प्रदद्यात्
पि प्रथम पिण्डकर्त्तृ नियमवत्
प्रथम पिण्ड इत्यनियम माह शु
नःपुच्छः प्रथमेऽहनि यद्द्रव्यं तदे
व स्याद्दशाहिकं सद्यः शौचे पिण्डा
स्तस्याः सर्व्वेऽपि युगपत्तथा अहा
शौचे प्रदातव्याः प्रथमे त्वेक ए
वहि द्वितीये द्वनि चत्वार स्तृतीये
पंच चैव हि एक स्तोयाञ्जलिस्त
व पात्रमेकञ्च दीयते ॥ ।

द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतु
रस्तथा पंचमे पंच षष्ठे षट् सप्त
मे सप्त एव च। अष्टमे ष्टौ च नव
मे नवैव दशमे दश। येनस्युः प
च पंचाशत् तोयस्याञ्जलयः क्र
मात् तोय पात्राणि तावंति संयु
क्तानि तिलादिभिः ॥ इति शु
द्धितत्त्वं ॥
प्रेतपुरं क्ली यमालयः यथा।
यावच्च कन्या तुलयोः क्रमादास्ते
दिवाकरः तावत् श्राद्धस्य कालः
स्यात् शून्यं प्रेतपुरं तदा इति श्रा
द्धतत्त्वं ॥
प्रेतराक्षसी स्त्री तुलसी इति रत्न
माला ॥
प्रेतवनं क्ली श्मशानं इति हेम।
चन्द्रः ॥
प्रेतवाहितः त्रि भूताविष्टः इति
त्रिकाण्डशेषः ॥
प्रेतशिला स्त्री पिण्डदानार्थगया
स्थित प्रस्तर विशेषः। यथा।
ब्रह्मोवाच येयं प्रेतशिलाख्याता
गयायां सा त्रिधा स्थिता प्रभासेप्रे
तकुण्डे च गयासुर शिरस्यपि धर्म्मेण
धारिता भूमौ सर्व्वदेवमयी शिला
प्रेतत्वं ये गतास्तेषां पिण्डाद्यैर्वाथवा
दयः ॥ ॥
तेषा मुद्धरणार्थाय यतः प्रेतशि
लातततः। अतोत्र मुनयो भूपा राज
पत्न्यादयः सदा तस्यां शिलायां।
श्राद्धादि कर्त्तारो ब्रह्मलोकगाः
गयासुरस्य यन्मुण्डं तस्य पृष्ठे शि
ला यतः मुण्डपृष्ठो गिरिस्तस्मात्
सर्व्वदेवमयो स्वयं मुण्डपृष्ठस्य पा
देषु यतो ब्रह्मसरो मुखाः अरवि
न्द वनं तेषु तेन चैवोपलक्षितः अ
रविन्दो गिरिर्नाम क्रौञ्चपदः पितॄणां
ब्रह्मलोकदः। गदाधरादयो देवा
आद्या आदौ व्यवस्थिताः। शिलात्र
पेण चव्यक्तास्तस्माद्देवमयी शिला
गयाशिरश्छादयित्वा गुरुत्वादास्थि
ता शिला स्नात्वा प्रेतशिलादौ तच
रणं वुस्तेन च। पिण्डं दद्यादिमै
र्म्मन्त्रैरावाह्य च पितॄन् परान् अस्म
त् कुले मृता ये च गतिर्येषां न वि
द्यते तेषामावाहयिष्यामि दर्भपृ
ष्ठे तिलोदकैः पितृवंशे मृता ये
च मातृवंशे च ये मृताः तेषामुद्ध
रणार्थाय इमं पिण्डं ददाम्यहं
मातामह कुले ये च गतिर्येषां
न जायते तेषामुद्धरणार्थी
य इमं पिण्डं ददाम्यहं ॥ अ
ज्ञातदन्ता ये केचित् ये च गर्भे



2660

षु पीडिताः तेषामुद्धरणार्थाय इ
मं पिण्डं ददाम्यहं बन्धुवर्गाश्च ये
केचिन्नामगोत्रविवर्जिताः स्वगो
त्रे परगोत्रे वा गतिर्येषां न विद्यते
तेषामुद्धरणार्थाय इमं पिण्डं द
दाम्यहं उद्बन्धनमृता ये च विषश
स्त्रहताश्च ये आत्मोपघातिनो ये
च तेभ्यः पिण्डं ददाम्यहं अग्निदा
हे मृता ये च सिंहव्याघ्रहताश्च ये
दंष्ट्रिभिः शृङ्गिभिर्वापि तेषां पिण्डं
ददाम्यहं अग्निदग्धाश्च ये केचिन्ना
ग्निदग्धास्तथा परे विद्युच्चौरहता
ये च तेभ्यः पिण्डं ददाम्यहं रौरवे चा
न्धतामिस्रे कालसूत्रे च ये गताः
तेषामुद्धरणार्थाय इमं पिण्डं ददा
म्यहं ॥ असिपत्रवने घोरे कुम्भी
पाके च ये गताः तेषामुद्धरणा
र्थाय इमं पिण्डं ददाम्यहं ॥ अ
न्येषां यातनास्थानां प्रेतलोक
निवासिनां तेषामुद्धरणार्थाय
इमं पिण्डं ददाम्यहं पशुयोनिग
ता ये च पक्षिकीटसरीसृपाः ।
अथवा वृक्षयोनिस्थास्तेभ्यः पि
ण्डं ददाम्यहं ॥ असंख्ययातना
संस्था ये नीता यमशासने ।
तेषामुद्धरणार्थाय इमं पिण्डं
ददाम्यहं ॥ जात्यन्तरसहस्राणि
भ्रमतः स्वेन कर्मणा मानुष्यं दुर्ल
भं येषां तेभ्यः पिण्डं ददाम्यहं ये बा
न्धवाः बान्धवा वा ये ये ऽन्यजन्मनि बान्ध
वाः । ते सर्वे तृप्तिमायान्तु पिण्डदाने
न सर्वदा ये केचित् प्रेतरूपेण व
र्त्तन्ते पितरो मम ते सर्वे तृप्तिमा
यान्तु पिण्डदानेन सर्वदा ये मे पि
तृकुले जाताः कुलेनातस्तथैव च ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा
मृताः ये मे कुले लुप्तपिण्डाः पुत्र
दारविवर्जिताः क्रियालोपगता
ये च जात्यन्धाः पङ्गवस्तथा ॥ वि
रूपा आमगर्भा ये ज्ञाताज्ञाताः कु
ले मम तेषां पिण्डं मया दत्तमक्षय्य
मुपतिष्ठतां साक्षिणः सन्तु मे देवा
ब्रह्मेशानादयस्तथा मया गयां
समासाद्य पितॄणां निष्कृतिः कृता
आगतोऽहं गयां देव पितृकार्य्ये ग
दाधर तन्मे साक्षी भवत्वद्य अन
णोऽहं ऋणत्रयात् इति गारुडे ग
यामाहात्म्ये ८५ । ८६ अध्यायः
प्रेतशौचं स्त्री मृतसंस्कारा
दि । यथा । याज्ञवल्क्य उवा
च प्रेतशौचं प्रवक्ष्यामि तच्छृ
णुध्वं यतव्रताः ॥ ऊनद्वि
वर्षं निखनेन्न कुर्य्यादुदकं ततः ॥

2661

आश्मशानादनुव्रज्य इतरो ज्ञाति
भिर्वृतः यमसूक्तं तथा जपञ्ज
वह्निलौकिकाग्निना ॥ स दग्धव्य
उपेतश्चेदाहिताग्न्यावृदर्थवत्
सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युप
यन्त्यपः अपनः शोशुचदघमनेन
पितृदिङ्मुखाः एवं मातामहाचार्य्य
प्रेतानां चोदकक्रियाः कामोदकाः
सखिप्रत्तस्वस्रीयश्वशुरर्त्विजः ।
नामगोत्रेणाप्युदकं सकृत् सिंचं ।
ति वाग्यताः पाषण्डपतितस्तेना
न कुर्य्युरुदकक्रियां न ब्रह्मचारि
णो ब्रात्या योषितः कामगास्तथा
सुरापा आत्मघातिन्यो नाशौचो
दकभाजनाः अन्ते न रोदितव्यं हि
अनित्या जीवसंसृतिः क्रियाका
र्य्या यथाशक्ति ततो गच्छेद्गृहान्
प्रति । विदश्य निम्बपत्राणि निय
ता द्वारि वेश्मनः आचम्याथाग्नि
मुदकं गोमयं गौरसर्षपान् प्रवि
शेयुः समालभ्य कृत्वाश्मनि पदं
शनैः प्रवेशनादिकं कर्म प्रेतसंस्प
र्शिनामपि इच्छतां तत्क्षणाच्छुद्धिः
परेषां स्नानसंयमात् क्रीतलब्धाश
ना भूमौ स्वपेयुस्ते पृथक् पृथक् ॥
पिण्डयज्ञावृता देयं प्रेतायान्नं दिन
त्रयं जलमेकाहमाकाशे स्थाप्यं ।
क्षीरं च मृण्मये वैतानोपासनाः का
र्य्याः क्रियाश्च श्रुतिचोदिताः आ
दन्तजन्मनः सद्य आचूडान्नैशिकी
स्मृता । त्रिरात्रमाव्रतादेशाद्दश
रात्रमतः परं ॥ त्रिरात्रं दशरात्रं वा
शावमाशौचमुच्यते । ऊनद्विव
र्षे उभयोः सूतकं मातुरेव हि ।
अन्तरा जन्ममरणे शेषाहोभि
र्विशुद्ध्यति दशाहाद्दशवर्षाणां त
था पञ्चदशैव च त्रिंशद्दिनानि च
तथा भवति प्रेतसूतकं अहस्त्वद
त्तकन्यासु बालेषु च विशोधनं गुर्व
न्तेवास्यनूचानमातुलश्रोत्रियेषु च
अनौरसेषु पुत्रेषु भार्य्यास्वन्यग
तासु च निवासराजनि तथा तद
हः शुद्धिकारणं हतानां नृप गो
विप्रैरन्वक्षं चात्मघातिनां विषा
दैश्च हतानां च नाशौचं पृथिवी
पते । सत्रिव्रतिब्रह्मचारिदातृब्रह्म
विदां तथा । दाने विवाहे यज्ञे च
संग्रामे देशविप्लवे आपद्यपि
हि कष्टायामसद्यः शौचं विधीयते
कालोऽग्निः कर्म मृद्वायुर्मनो ज्ञानं
तपो जलं । पश्चात्तापो निराहारः
सर्वेषां शुद्धिहेतवः इति गारुडे
९६ अध्यायः ॥
प्रेता स्त्री प्रेतभावापन्ना । यथा



विसर्जैं तत्र सदित्यादिभ्रमुक गो त्रायाः प्रेतायाः अमुकी देव्या श्र द्धोचानाद्वितीयेक्हि अमुक गोत्रा याः प्रेतायाः प्रेतत्व विमुक्ति पू र्वक स्वर्गलोके गमनकामः सो प करण चंदनांकित धेनुदान महंकरिष्यामि इतिमैार्थिहा ॥

मृता यथा प्रेतायाः पुत्रिकाया न भर्त्ता धन महत्यपुत्रायाः । इतिदायभागेशंखलिखितौ ॥

प्रेत्य त्र लोकान्तरे तत्पर्य्यायः । अमुत्र २। इत्यमरः ॥

प्रेमन् क्ली पुं सौहृद्यं तत्पर्य्यायः प्रेमा २ प्रियता ३ हृद् ४ स्नेहः ५ इत्यमरः नर्म इतिमेदिनी ॥

प्रेमपातनं क्ली रोदनं नेत्रजलं इतिशब्दचंद्रिका ॥

प्रेमा न पुं स्नेहः इत्यमरः वासवः वायुः इतिमेदिनी आयस्य लक्ष णं यथा सर्वथा ध्वंस रहितं स त्यपिध्वंस कारणे यद्भाव बंधनं यूनोः सप्रेमा परिकीर्त्तितः ॥ इत्युज्वलनीलमणिः ॥

प्रेमालिंगनं क्ली स्नेहेनपरिष्वंगः नायकनायिकयोरालिंगनविशे षः तल्लक्षणं यथा नायककटिं नायिकयैक पादेन वेष्टयित्वा द्वितीयपादं तस्यजंघोपरिस्थापयित्वा य दालिंगनं तत् इतिकामशास्त्रं ॥

प्रेमी त्रि प्रेमयुक्तः स्नेहविशिष्टः प्रेमशब्दादस्त्यर्थे इनप्रत्ययेणनि ष्पन्नः इतिव्याकरणं ॥

प्रेयसी स्त्री प्रियतमानारी तत्प र्य्यायः दयिता २ कांता ३ प्राणेशा ४ वल्लभा ५ प्रिया ६ हृदयेशा ७ प्राणसमा ८ प्रेष्ठा ९ प्रणयिनी १० इति हेमचंद्रः ॥

प्रेयान् पुं पतिः तत्पर्य्यायः ॥ दयितः २ कांतः ३ प्राणेशः ४ वल्लभः ५ प्रियः ६ हृदयेशः ७ प्राणसमः प्रेष्ठः ९ प्रणयी १० इतिहेमचंद्रः ॥

अतिप्रिये त्रि इति जटाधरः ॥

प्रेरणं क्ली प्रेषणं पाठान इतिभा षा । यथा धिक्चापले वत्स मिम वत् मन्तत्र यत् प्रेरणाकृत्ररली भवेन्या इति नैषधे ३ सर्गः ॥

प्रेरणा स्त्री चोदना फलभावना विधि रिति यावत् इति धर्मदी पिका ॥

प्रेरितः त्रि प्रेषितः यथा नपुंसक मितिस्ताव्या प्रियायैप्रेरितंमव । मनस्तवैवरमतेस्मः पाणिनिना वयं । इति प्राचीनाः ॥

प्रेत्वा न पुं समुद्रः । इति सिद्धांत कौमुद्यामुणादिवृत्तिः ॥

प्रेत्वरी स्त्री नदी । इति सिद्धांत कौ मुद्यामुणादिवृत्तिः ॥

प्रेष स्म गतौ । इतिकविकल्पद्रुमः

प्रेषः पुं प्रेषणं ॥ पीडा । इति ज टाधरः ॥

प्रेषणं क्ली प्रेरणं यथा जानीयात् प्रेषणेभृत्यान्बांधवान्व्यसनागमे मित्रंचापद्दिकालेचभार्य्यांचवि भवक्षये इतिचाणक्यसंग्रहः ॥

प्रेषितं त्रि प्रेरितं । तत्पर्य्यायः ॥ प्रस्थापितं २ प्रतिशिष्टं ३ प्रतिहतं ४ । इति हेमचंद्रः ॥

प्रेष्टः त्रि अतिशयप्रियः इत्यमरः

प्रेष्ठा स्त्री प्रेयसी इतिहेमचंद्रः ॥ जंघा । इति शब्दचंद्रिका ॥

प्रेष्यः त्रि दासः इत्यमरः प्रेरणी यश्च ॥

प्रेक्षणं क्ली चक्षुः इति शब्दरत्ना वली दर्शनं यथा संचारो रति मंदिरावधिपदन्यासावधि प्रेक्षणं इत्यादिरसमंजरी ॥

प्रेक्षणकूटः पुं चक्षुर्गोलकः य था त्वक्पोटनष्ठीवनगात्रसादस्र जक्षण प्रेक्षणकूट पोथाः । इति प्राणद्वागहर्षवृपेमाधवकरः । प्रे क्षा स्त्री नृत्येक्षणं ॥ प्रज्ञा इत्यमरः ईक्षणं इतिभरतः ॥ शाखा । इति शब्दरत्नावली ॥

प्रैषः पुं क्लेशः । मर्द्दनं उन्मादः प्रेषणं इति मेदिनी ॥

प्रैष्यः पुं प्रेष्यः इत्यमरटीकायां भरतः ॥

प्रोक्तं त्रि कथितं । प्रकर्षेणोक्तं यथा । अम्बरीष प्रकेपोक्तं निर्म भागवतंम्रण । इतिश्रीभागव ते प्रोञ्छनं क्ली प्रवर्जनं लोपनं मोछा इति भाषा । यथा । प्रोञ्छ नै वामपादेनदरिद्रोभवतिध्रुवं वैरिनाशकरंप्रोक्तं कवचं वश्य कारकं इतिरुद्रयामलेवैविहर काली कवचं ॥

प्रे··· सनंक्ली मारणं । इतिहेम चंद्रः ॥

प्रोज्झितं त्रि त्यक्तं यथा धर्म प्रोज्झितकैतवोत्रपरमो निर्मत्स राणांसतां । इत्यादिश्रीभागव ते ॥

प्रोणखः पुं पतद्ग्रहः । पीकदान इति भाषा । यथा । स्नादाचमनकःप्रो णखः कटकोलः पतद्ग्रहः । इति हारावली ॥

प्रोतं क्ली वस्त्रं । इति जटाधरः ॥

प्रोतं त्रि खचितं । इति मेदिनी ॥



2664

स्फिकं गुस्फितं इति हेमचंद्रः ॥
प्रोतोत्सादनं क्ली वस्त्रकृतहिमं
छत्रं । इति त्रिकाण्डशेषः ॥
प्रोतफलः पु वृक्षविशेषः । तत्
पर्यायः सिंहलांगूलः २ छत्री ३
छत्रा ४ पिच्छा ५ । इतिशब्दमाला
प्रोतफुल्ल त्रि विकसितं यथा ।
येवर्हिताः करिकपोलमदेनभृं
गाः प्रोतफुल्लपंकजरजःसुरभी
कृतांगाः तेस्ताप्तंतविधिवशाद्
मयनिकाल्ल निम्बेषुवार्कजसमे
षुकरीलकेषु इतिभामिनीविला
प्रोत्साहः पु प्रकर्षेणोत्साहः
कर्मसत्सकरप्रत्यय उत्साह इ
तिमधुः । कर्मस्पष्टफ्यत्नकार
केभावः उत्साह इतिरमानाथः
प्रत्ययउत्साह इतिनयनानंदः
प्रशाको वलोद्यम उत्साह इति
केचित् इत्यमरटीकायांभरतः
प्रोथ अ त्त पर्यायाणि सामर्थ्ये
इति कविकल्पद्रुमः परिपूर्णी
तायां । इति गोविंदभट्टः ॥
प्रोथः पुं क्ली अश्वनासिका
इत्यमरः ॥
प्रोथः पुं कटी इति मेदिनी ॥
प्राटकः । इति त्रिकाण्डशेषः ।
स्त्रीगर्भः । इति विश्वः ॥ गर्भः ।
भीषणं स्फिक् अध्वमुखं इति ।
संक्षिप्तसारोणादिवृत्तिः ॥
प्रोथः त्रि अध्वगः इति मेदिनी ॥
प्रथितः इति त्रिकाण्डशेषः ।
स्थापितः । इतिसिद्धान्तकौमुद्या
मुणादिवृत्तिः ॥
प्रोषः पुं संतापः इति राजनि
र्घण्टः ॥
प्रोषितः त्रि प्रवासगतः यथा
आर्त्तार्त्ते मुदिता हृष्टे प्रोषितेम
लिना कृशा । मृते म्रियेत या
पत्यौ साध्वी ज्ञेया पतिव्रता ॥ इ
तिस्मृतितत्त्वं ॥
प्रोषितभर्तृका स्त्री विदेशस्थपति
इतिजटाधरः । स्वीयादिनायिका
भेदः । तस्यालक्षणं यथा । दे
शान्तरे गते भर्त्तरि संतापाकुला
प्रोषितभर्तृका । अस्याश्चेष्टा द
शावस्था । यथा । अत्यभिलाषः १
चिंता २ स्मृतिः ३ गुणानुकीर्त्तनं ४
उद्वेगः ५ विलापः ६ उन्मादः ७
व्याधिः ८ जडता ९ निधनं १० । मु
ग्धाप्रोषितभर्तृका यथा । उःख
दीर्घतरेवहंत्यपि सखी वर्गायनो
भाषते प्रोवासैः शयनं सजंत्य
पि पुनः शोकेन बालज्जया । क
ण्ठे गद्गदवाच मंचति ॥

2665

तृष्णा यत्ने न वाक्सोदकं संतापं
सहते यदंबुजमुखी तद्धेद चेतो
भवः मध्याप्रोषितभर्तृका यथा
वासस्तदेव वपुषो वलयंतदेव
दूलस्य सैव जघनस्य च रत्नकां
ची वाचालभृंग सुभगो सुरतो
समस्त मद्याधिकं भवति तत्
सखि किंचिदानं ॥ प्रगल्भाप्रोषि
तभर्तृका यथा । माला बालांबुज
दलमयी मौक्तिकी हारयष्टिः ।
कांचीस्थानात् प्रसरति हरो स
द्रवः प्रस्थितेव स्मरद्रुमः किमपि
चमनी विघ्नेवानवेति जानंतवा
क्षोरहह वलयं पाणिमूलं प्रयाति
परकीयाप्रोषितभर्तृका यथा
श्वश्रूः पद्मदलं ददाति तदपि श्रु
संतया शृणुते सखी मर्मर शोक
यातचतथा संस्पृशते पाणिना
यातवीचि सुतजनस्यवचसा
प्रस्तन्नरं दीयते श्वासः किंतु न मु
च्यते कृतवरक्रूरः कुरंगीदृशा
यथा सामान्यवनिताप्रोषितभ
र्तृका यथा विरहविदितमंतः प्रे
मविज्ञायकांतः पुनरपिवसुभस्मा
देहमेदास्यतीति मरिवनियवमद्वा
स्नानमोदविहतस्तजतिवपुरयो
पहारदेशोपविष्टा इतिरसमंजरी
प्रोष्ठः पुं प्रोष्ठीमत्स्यः इत्यमरटीका
यांरायमुकुटः ॥ प्रोष्ठपदः पुं भाद्र
मासः इत्यमरः ॥
प्रोष्ठपदाः स्त्री पूर्वभाद्रपदनक्षत्रं
२५ उत्तरभाद्रपदनक्षत्रं २६ ।
तत्पर्यायः । भाद्रपदाः २ इत्य
मरः द्वेपूर्वभाद्रपदोत्तरभाद्रप
दास्तप्रोष्ठौगौः भद्रश्चगौः त
स्यैवपादश्चास्मोत्ता स्तथा पूर्वे
प्रोष्ठपदे द्वे उत्तरेत्तभाद्रपदे द्वेस
मुदायश्चास्मे चतुः संख्या इति
वहुवचनं । कदा पूर्वे प्रोष्ठपदे
कदा उत्तरे प्रोष्ठपदे इति भरतः ।
भद्रपदशब्देन तारका विशेषा
णांसमुदाय उच्यते तिरोहिताव
यवभेदपक्षेएकवचनं प्रोष्ठपदा
शब्दस्तु द्विकावयव भेद पक्षेव
हुवचनांतितिमेचयः इतिराय
मुकुट ॥
प्रोष्ठपदी स्त्री भाद्री पूर्णिमा यथा
प्रोष्ठपद्यामतीतायां तथा कृष्णा
त्रयोदशी चतास्त्वश्राद्धकालान्
वैनित्यानाह प्रजापतिः इतिति
थ्यादितत्त्वं अपिच लिखित्वा त
द्यो दर्शोद्दमसिंह समन्वितं ।



प्रौष्ठपद्यां पौर्णमास्यां सयाति प
रमां गतिं । इति श्रीभागवतटीका
यां श्रीधरस्वामी ॥
प्रोष्ठपादः त्रि प्रोष्ठपदासु जातः
इति सिद्धान्तकौमुदी ॥
प्रोष्ठी स्त्री पुं मत्स्यभेदः पुंटी
माछ इति भाषा तत्पर्य्यायः ।
शफरी २ शफरः ३ । इत्यमरः
तस्या गुणाः तिक्तत्वं कटुत्वं
स्वादुत्वं शुक्रकारित्वं कफवा
तनाशित्वंच इति राजवल्लभः
स्निग्धत्वं आस्यकण्ठरोगनाशि
त्वं श्रेष्ठत्वंच इति राजनिर्घण्टः
प्रोहः पुं हस्तिचरणः पर्व इति
विश्वमेदिन्यौ गजचरणपर्व
इति त्रिकाण्डशेषः शाश्वतश्च
त्यौ । प्रोहः त्रि निपुणः तर्कः
इति मेदिनी ॥
प्रोक्षणं क्ली यज्ञार्थपशुहननं
इत्यमरः वधः सेचनं इति मेदिनी
प्रोक्षितं त्रि निहतं सिक्तं इति
मेदिनी यज्ञार्थमन्त्रैः संस्कृतमांसा
दि यथा भक्षयेत् प्रोक्षितं मांसं सकृ
द्ब्राह्मणकाम्यया दैवे नियुक्तः श्राद्धे
वा नियमेन विवर्जयेत् आरण्यानां
मिदानीं तत्र प्रोक्षणापेक्षा नास्ति

यथा महाभारते आरण्याः स
र्वदैवत्याः प्रोक्षिताः सर्वशोम
गा अगस्त्येन पुरा राजन् मृगया
देवपूज्यते ॥ इति निष्पादितं च
प्रौढं त्रि वर्द्धितं तत्पर्य्यायः ।
प्रवृद्धः २ एधितः ३ । इत्यमरः ॥
प्रगल्भः इति हेमचन्द्रः निपुणः
इति राजनिर्घण्टः प्रकर्षेणऊढश्च
प्रौढपादः पुं आसनारोपितपा
दतलः आसनोपरिपादतलद्वय
संयोगपूर्वकोपवेशः वस्त्रादिना
कृतसह जानुजंघावन्धः वस्त्रादि
द्वारा सहजानु जंघाद्वय दृढवन्ध
नपूर्वकोपवेशः यथा आसनारू
ढपादस्तु जानुनोर्जंघयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढपादः
स उच्यते स्नाने माचमनं होमं भो
जनं देवतार्च्चनं प्रौढपादो नकु
र्वीत स्वाध्यायं पितृतर्पणं ॥
इति कात्यायनः अनेकोढास्येदा
स्थण्डिले भूमिसमे इष्टकाघ्र सं
कीर्णे भूता इति बौधायनवचना
न्तथाविधे आरूढपादोपि आचान्तः इत्या
ह्निकतत्वं प्रौढा स्त्री नायिकाभेदः
तत्पर्य्यायः चिरिण्टी २ सुवयाः ३
प्रगामा ४ दृष्टरजाः ५ इति राज ।

निर्घण्टः यथा बाला तु तरुणी
प्रौढा वृद्धा भवति नायिका गुण
योगेन रतव्या नारी वयसा भवेत्
दा त्रिंशद्वर्षादूर्द्ध्वं पंच पंचाशद्वर्ष
पर्य्यन्तं प्रौढावस्था यथा आषो
डशी भवेद्बाला तरुणी त्रिंशता
मता पंचपंचाशता प्रौढा भवे
द्वृद्धा ततः परं ॥ अस्यावश्यत्व
कारणं यथा अलंकारादिभि
र्बाला तरुणी रतियोगतः प्रेम
दानादिभिः प्रौढा वृद्धा च दृढता
डनात् तस्मादसमयोर्दोषा यथा ।
बालात् प्राणदा प्रोक्ता तरुणी ।
प्राणहारिणी प्रौढा करोति वृद्ध
त्वं वृद्धा मरणदा भवेत् इति र
तिमंजरी ॥ अस्यादि विविधान्त
गीतप्रगल्भा नायिका । तत्र प्रौढा
रविरता यथा मामुद्दीक्ष्य विप
क्षपक्ष्मलदृशः पादाम्बुजालक्त
के गलितमाननमानती कृतमुखी
विचापितेवा भवत् वृतं नोकव
तीनवा कृतवती निश्वासकोस्मा
दृशः प्रातर्मंगलमंगला करत
लादादर्शमादर्शयत् ॥ प्रौढाक
लहान्तरिता यथा अकरोः किमु
नेत्रशोणिमानं किमकार्षीः कर
पल्लवे निरोधं कलहे किमधाः कु ।

धारसक्ते द्वितमर्थन विदन्ति देवदृष्टाः
प्रौढा उत्कण्ठिता यथा भ्रान्तनि
कुञ्जसरित्सु रसालवनेषु मात्र
स्त्वमसि निपतितस्तिमिर प्रसीद ए
च्छामि किंच नवनीरधराभिरामो
दामोदरः कथय किं न समाजगा
म । प्रौढावासकसज्जा यथा ॥
कृतं वपुषि भूषणं चिकुरयोर्
गीपूरिता कृता शयनसन्निधौ
कमकरीटिका सम्भृतिः अकारि
हारिणी हशा भवनमेत्य देह द्विषा
स्फुरत्कनककेतकी कुसुमको
तिभिर्द्दिने प्रौढाभिसारिका यथा
स्फुरत्रसिञ्जभारभंगुरांगी किसल
य … मलकान्तिना पदेन अथ कथ
यकथं स्नेहेन गन्तु यदि न निष्प्रास
मनोरथो रथः स्यात् ॥ प्रौढा
प्रवत्स्यत्पतिका यथा । ना
यं मुञ्चति सकृदामपि तन्मयांग
वियोगज्वरस्तन्नाहं विहितांजलि
र्य इपतेः पृच्छामि सत्यं वद । नोह
लेकुसमं पटीरमदकं यदेहभि
दीयते तत्स्यादत्र परत्रवा किमु
विषज्वालावलीढः सह । इति र
समंजरी ॥ अस्यान् प्रगल्भा शब्दे
द्रष्टव्यं ॥
प्रौढिः स्त्री सामर्थ्यं । इति मुग्ध

वोधव्याकरणं। तत्पर्य्यायः ॥
उत्साहः २ प्रगल्भता ३ अभियो
गः ४ उद्यमः ५ उद्योगः ६ किय
द्देतिका ७ अध्यवसायः ८ ऊर्जः
९ इति हेमचंद्रः ॥
प्रोणः क्लि निपुणः इति केचित्।
प्रोष्ठपदः पुं भाद्रमासः इत्यमरः
प्रोहः पुं प्रकर्षेणोहः इति मुग्ध
वोधव्याकरणं ॥
प्लवं क्ली कैवर्तीमुस्तकं गंधतृणं
इति मेदिनी, प्लवगो त्रि ॥
प्लवः पुं प्लवंग भेलः भेकः ॥
श्वविः श्वपचः कपिः जलकाकः
ऊलकः प्लवणः पर्कटीद्रुमः।
कारण्डवविहङ्गः शब्दः प्रति ग
तिः इति मेदिनी प्रेरणं शब्दः
इति शब्दरत्नावली ॥ जलान्त
रे इति हेमचंद्रः ॥ पल्लवः ॥
पाल्हा इति भाषा इति त्रिकांड
शेषः जलकुक्कुटः इति मिता
क्षरा जलचरपक्षी यथा हंस
सारस कादम्ब वक क्रौंच सरा
रिकाः नंदीमुखी सकारवा
वल्लाकाद्याः प्लवाः स्मृताः प्ल
वंते सलिले यस्मादेते तस्मात्
प्लवाः स्मृताः एतेषां मांसगुणाः
प्लवाः पित्तहराः स्निग्धा मधुरा गुर

वोह्निमाः वातश्लेष्म प्रदाश्चापि
वलशुक्रकराः सराः इति भाव
प्रकाशः ॥
प्लवकः पुं खड्गधारादिनर्तकः
तत्पर्य्यायः केल्लकः २ इति त्रि
काण्डशेषः केकलः ३ नर्तः ४
केलिकोषः ५ कलायनः ६ इति
शब्दरत्नावली। चंडालः इति ह
लायुधः भेकः। प्लक्षः इति रा
जनिर्घण्टः ॥
प्लवगः पुं वानरः भेकः ॥ सूर्य्य
सारथिः। इति मेदिनी प्लवपक्षी
इति शब्दरत्नावली॥ शिरीष वृ
क्षः इति राजनिर्घण्टः ॥
प्लवगतिः पुं भेकः इति शब्दच
न्द्रिका ॥
प्लवङ्गः पुं वानरः इत्यमरः मृगः
इति शब्दचंद्रिका। प्लक्षवृक्षः।
इति राजनिर्घण्टः ॥
प्लवंगमः पुं भेकः वानरः इत्य
मरः प्लुतगतियुक्ते त्रि ॥
प्लवनः त्रि प्रवणः क्रमनिम्नभू
मिः यथा प्रागुदक प्लवना भू
मिकारयेत् यत्नतो नरः इति ति
थ्यादितत्वे मत्स्यपुराणं ॥
प्लत न भक्तगे इति कविकल्पद्
मः प्लक्षः पुं वृक्षविशेषः। पाकर

इतिभाषा तत्पर्य्यायः। जटी २ प
र्कटी ३। इत्यमरः। पर्कटिः ४ प्ल
क्षा ५ क्षीरी ६ जटिः ७। इति श
ब्दरत्नावली॥ कपीतनः ८ क्षीरी
९ सुपार्श्वः १० कमण्डलुः ११ शृंगी
१२ अवरोहशाखी १३ गर्द्दभाण्डः
१४ कपीतकः १५ दृढप्ररोहः १६
प्लवकः १७ प्लवंगः १८ महावलः
१९ ह्रस्वप्लक्षपर्य्यायः सूक्ष्मः २०
सुशीतः २१ शीतवीर्य्यकः २२ पुण्ड्रः
२३ महावरोहः २४ ह्रस्वपर्णः २५।
पिम्परिः २६ भिदुरः २७ मंगलच्छायः
२८ अस्य गुणाः कटुत्वं कषायत्वं।
शिशिरत्वं रक्तदोष मूर्च्छा भ्रम प्र
लापनाशित्वंच। इति राजनिर्घण्टः
व्रण योनिगद दाह पित्त कफ शो
थ रक्तपित्तनाशित्वं पर्कटी च
स्त्रियामपि इतिभावप्रकाशः ॥
कंदरालवृक्षः द्वीपभेदः अश्व
त्थवृक्षः इतिमेदिनी पक्षकः इ
ति हेमचंद्रः ॥
प्लक्षद्वीपः पुं सप्तद्वीपान्तर्गतद्वी
पविशेषः तस्य विवरणं यथा स्
तउवाच जंबुद्वीपस्य विस्ताराद्द्विगु
णेन समन्ततः संवेष्टयित्वा क्षीरो
दं प्लक्षद्वीपो व्यवस्थितः। प्लक्षद्वी
पेच विप्रेन्द्राः सप्तासन् कुलपर्वताः

ऋज्वायताः सुपर्वाणः सिद्धसंघ
निषेविताः गोमेदः प्रथमस्तेषां
द्वितीय श्चन्द्र उच्यते नारदो दुंदु
भिश्चैव सोमश्च ऋषभस्तथा ॥
विभ्राजः सप्तमः प्रोक्तो ब्रह्मणो
ऽत्यन्त वल्लभः ॥ तत्र देवर्षि गं
धर्वैः सिद्धैश्च भगवानजः ॥
उपास्यते स विश्वात्मा साक्षी स
र्वस्य विश्वसृक्। तेषु पुण्या ज
नपदा नाधयो व्याधयोपि च।
न तत्र पाप कर्त्तारः पुरुषा वा
कदाचन तेषां नद्यः सप्त चैव व
र्णानित समुद्रगाः। तासु ब्रह्म
र्षयो नित्यं पितामह मुपासते
अनुतप्ता शिखीचैव विपाशा त्रि
दिवा कृता अमृता सुकृता चैव
नामतः परिकीर्त्तिताः क्षुद्रनद्य
स्त्वसंख्याताः सरांसि सुबहून्यपि
न वै तेषु युगावस्थाः पुरुषा वै वि
रायुषः आर्य्यकाः कुरराश्चैव वि
दशा भाविनस्तथा। ब्रह्म क्षत्रिय
विट्शूद्रा स्तस्मिन् द्वीपे प्रकीर्त्तिताः
इज्यते भगवान् सोमः वर्णैस्तत्र नि
वासिभिः तेषां च सोम सायुज्यं
सारूप्यं मुनि पुंगवाः सर्वे धर्मपरा
नित्यं नित्यं मुदितमानसाः पंचवर्ष
सहस्राणि जीवंति च निरामयाः ३



तिकौर्मे भुवनकोषे ४६ अध्यायः
अपिच ऋषिरुवाच अतःपरं प्ल
क्षादीनां प्रमाणलक्षण संस्थान
तो वर्षविभाग उपवर्ण्यते जंबुद्वी
पो यावत्प्रमाणविस्तार स्तावता
क्षारोदधिना परिवेष्टितो यथा मेरु
र्जम्बवाख्येन। लवणोदधि रपि ततो
द्विगुण विशालेन प्लक्षाख्येन
परिक्षिप्तो यथा परिखा वाह्योपव
नेन प्लक्षो जंबुप्रमाणो द्वीपाख्या
तिकरो हिरण्मय उत्थितो यत्राग्नि रु
पास्ते सप्तजिह्वः। तस्याधिपतिः
प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं स
प्त वर्षाणि विभज्य सप्तवर्षनामभ्य
आत्मजेभ्य आकलय्य स्वयमात्म
योगेनोपरराम। शिवं वयसं सुभ
द्रं शांतं क्षेमं अमृतमभयमिति व
र्षाणि तेषु गिरयो नद्यश्च सप्तैवा
भिज्ञाताः। मणिकूटो वज्रकूट इं
द्रसेनो ज्योतिष्मान् सुवर्णो हिर
ण्यष्ठीवो मेघमाल इति सेतुशैलाः
अरुणा नृम्णा आंगिरसी सावि
त्री सुप्रभाता ऋतंभरा सत्यंभरेति
महानद्यः। यासां जलोपस्पर्श
न विधूत रजस्तमसो हंस पतंगो
र्द्ध्वायन सत्यांग संज्ञाश्चत्वारो व
र्णाः सहस्रायुषो विबुधोपमस
न्दर्शन प्रजननाः स्वर्गद्वारं त्रय्या
विद्यया भगवंतं त्रयीमयं सूर्य
मात्मानं यजंते प्रत्नस्य विष्णोरूपं
यत् सत्यस्य ब्रह्मणः अमृतस्य
च मृत्योश्च सूर्यमात्मानमीमहि
इति स्वत्वादिषु पंचसु पुरुषाणा
मायुरिंद्रियमोजः सहोवलं वुद्धिवि
क्रम इति च सर्वेषा मौत्पत्तिकी
सिद्धिरविशेषेण वर्तते प्लक्षा
त्समानेनेक्षुरसोदेनावृतः। इति श्री
भागवते ५ स्कंधे २० अध्यायः॥
प्लावनं क्ली द्रवद्रव्यस्योर्द्ध्वप्रापणं
उथलम इति भाषा यथा तापनं।
हृतनैलानां प्लावनं गोरसस्य च
तन्मात्र मुहूर्ते शुद्धेत् कविनंत्।
पयोदधि इति शुद्धितत्वं॥
मज्जनं। वकृतर जल संयोगः य
था। पततः स्कन्नाद्वचो राजा प्ला
वितुं भगीरथः। यत्र नाति प्ला
वीराणि सागराणां महात्मनां॥
प्लावनार्थं नरश्रेष्ठ पुण्येन सलि
लेन ह। इति महाभारते वनप
र्वणि १०९ अध्यायः॥
प्लावितं त्रि जलादिमग्नस्याना
दि यथा सप्तसप्त स्ववस्त्राकरु
णार्द्दतिर्जातनेत्रा सद्य प्लावितभूप
ष्टमार्दंगधानुलेपना॥ इति गंगा

फणिचक्रं क्ली विवाहादिकर्मसु शु
भाशुभज्ञानार्थं सप्तविंशति नक्ष
त्रघटित सर्पाकार त्रिनाडिकचक्रं
यथा अश्विन्यादि लिखेच्चक्रं सर्पा
कारं त्रिनाडिकं नक्षत्र वशात्त
यं विवाहादौ शुभाशुभं॥
त्रिनाडी वेध नक्षत्र मश्विन्याद्रा
पुनर्वसुः हस्तेन्द्र मूल वारुण्यः
पूर्वभाद्रपदास्तथा याम्यः सौम्या
गुरु योनि श्चित्रा मित्र जलाह्व
यं। धनिष्ठा चोत्तरा भाद्रा मध्य
नाडी व्यवस्थिताः कृत्तिका रोहि
णी सार्पमघा स्वाती विशाखेके
उत्तराश्रवणा पौष्ण पृष्ठनाडी व्यव
स्थिताः अश्विन्यादि नाडी वेध दोषं
द्वितीयकं क्रमात् याम्यादि नक्ष
त्रं च कृत्तिकादि द्विषट्ककं। प
वनिरीक्षयेद्धं कन्यामंत्रे गुरोस्त
रे पण्यस्त्री स्वामि मित्रश्च देश ग्रा
मपुरे गृहे॥ एक नाडीस्थ धिष्ण्या
नियदि स्युर्वरकन्ययोः। तदा वेधे
विजानीयाद्वर्जेद्दिषु तथैव च॥
एकटं यस्य जन्मर्क्षं तस्य जन्म
र्क्षतो व्यधः प्रणष्ट जन्मभं यस्य
तस्य नामर्क्षतो भवेत् द्वयोर्जन्म
भयो र्वेधेन कर्तव्यं कदाचन। ए
कनाडी स्थितो चेत् स्याज्जन्म
नीशाय चांगना॥ ॥
तस्मान्नाडी व्यधो वीक्ष्यो विवाहे सु
भमिच्छता यौनाड्यो वेधतो भर्त्ता
मध्यनाड्यो भवेत्तथा पृष्ठनाडी व्य
धे कन्या म्रियते नात्र संशयः॥
एकनाडी स्थिता यत्र गुरुर्मंत्रश्च दे
वता तत्रद्वेषं रुजं मृत्युं क्रमेण फ
लमादिशेत् समासन्नेव्यधे पीड्य
हस्ववेधे विरोधत॥ वेधान्तर भमा
नेन वर्षद्वंद्वं प्रजायते। अभ्ंःप
ण्यांगना मित्रं देशो ग्रामः पुरं गृहं
एकनाडी गता भव्या अभव्या वेध
वर्जिताः। एकराश्यपादियोगेन तः
नाडीदोषान विद्यते॥ इति ज्यो।
तिस्तत्वं॥ अपिच॥ कृत्तिकादि
यमदैवतशेषः पृष्ठसत इति सक
दयोगः क्रोडकां ताश्च वियोग॥
मध्यरेव विहित विवाह उभयोर्मि
रणं वदति वराहः। क्रोडपृष्ठय
शाउह्यानं मध्ये क्रोड वक्रसर्मीनं म
ध्यपृष्ठे भवति विवाहो वक्रस्तनवि
त्र मिति मुनिराह॥ इति समयप्र
दीपः॥
तस्य विन्यासो यथा ॥
पृष्ठे १ ६ ७ १२ १३ १८ १९ २४ २५
मध्ये २ ५ ८ ११ १४ १७ २० २३ २६
क्रोडे ३ ४ ९ १० १५ १६ २१ २२ २७
फणिजिह्वा स्त्री महाशतावरी म



ह्रस्वमंगा। इति राजनिर्घण्टः ॥
फणिज्झकः पुं रक्तपत्रतुलसी॥
जंबीरभेदः। इति केचित् जंबी
रस्तामान्यः। इति केचित् तत्पर्य्या
यः। समीरणः २ मरुवकः ३
प्रस्थपुष्पः ४ जंबीरः ५ इत्यमर
भरतौ ॥
फणिप्रियः पुं वायुः। इति शब्द
रत्नावली ॥
फणिफेणः पुं अहिफेणः आफिं
इति भाषा यथा जातीफलटंगण
मभ्रकंच हिंगुल गंधं परिमर्द्दया
मे। भाग द्वयं स्यात् फणिफेण
कस्य गोपालिकापत्ररसेन मर्द्य॥
इति रत्ना वली ॥
फणिवल्ली स्त्री नागवल्ली इति
राजनिर्घण्टः ॥
फणिहंस्त्री स्त्री गंधनाकुली इति
राजनिर्घण्टः ॥
फणिहृत् स्त्री वृहद्दुरालभा इति
राजनिर्घण्टः॥
फणी पुं सर्पः। इत्यमरः॥ सर्पिणी
नामकौषधिः। इतिराजनिर्घण्टः
फणीश्वरः पुं अनंतः। इतिशब्दर
त्नावली ॥
फण्डः पुं जठरं। इत्युणादिकोषः
फत् कारी पुं पक्षिमात्रं ॥
। ःः ॥ इति ॥

शब्दचंद्रिका ॥
फरं क्ली फलकं इत्यमरटीकायां
भरतः ॥
फरुवकं क्ली पूगपात्रं इति हारा
वली ॥
फर्फरीकं पुं चपेटः मार्द्दवेक्ली
इति मेदिनी ॥
फर्फरीका स्त्री पादुका मदनः
इतिसंक्षिप्तसारोणादिवृत्तिः ॥
फल त्रि — भेद। इति कविक
ल्पद्रुमः ॥
फल निष्पत्तौ। इतिकविकल्पद्रु
मः फल ज गतौ इति कविकल्प
द्रुमः ॥
फलं क्ली लाभः। शस्यं ॥ फलकं
हेतुकृतं। इत्यमरः जातीफलं मु
ष्टिः ॥ त्रिफला ॥ कक्कोलं ।
इति मेदिनी ॥ बाणाग्रं ॥ आर्त्त
वं इति शब्दरत्नावली ॥ फालः इ
ति हेमचंद्रः। दानं। इतिधरणिः
मुष्कः। यथा। अफलो भुज्यते
मेषः सफलस्तु न भुज्यते। इति
रामायणं ॥ जीवस्य कर्मफलभु
क्ति यथा। जीवः कर्मफलं भुंक्ते
आत्मा निर्लिप्त एव च आत्मनः
प्रतिबिंबश्च देही जीवः स एव च
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३
अध्यायः ॥ दानफलं यथा ॥

वाक्यावली ॥
प्लाक्षं क्ली प्लक्षवृक्षस्य फलं इ
त्यमरः प्लक्षस्य विकारः प्लक्षस्य
समूहः प्लक्षस्यभावः प्लक्षस्येदं
प्लक्षस्य
हितं इत्यादि व्याकरणं ॥
प्लिह उ. गतौ इतिकविकल्पद्रु
मः प्लिहा न पुं प्लीहरोगः यथा
यकृत् प्लिहाश्मानि मस्तादिव त्रि
पत्रिति वैद्यकं। इत्यमरटीकायां
भरतः ॥
प्लीहघ्नः पुं वृक्षविशेषः रोहडा
इति ख्यातः तत्पर्य्यायः। रोही २
रोहितकः ३ प्लीहशत्रुः ४ दाडि
मपुष्पकः ५ मांसदलनः ६ य
कृद्वैरी ७ वल्कच्छदः ८ इतिशब्दचं
द्रिका रोहितेयः ९ रोहितः १० रो
हीतकः ११ रोही १२ इतिशब्दरत्ना
वली ॥ अस्य गुणाः रोहितक श
ब्दे द्रष्टव्याः ॥
प्लीहशत्रुः पुं प्लिहघ्नवृक्षः। इत्य
मरः ॥
प्लीहा स्त्री प्लिहरोगः यथा यकृ
त् प्लीहच संबंधे इतिबालकास्यः
इत्यमरटीकायां भरतः ॥
प्लीहा न पुं कुक्षिवामपार्श्वस्थमां
सखण्डं पिला इति ख्यातं ॥
तत् पर्य्यायः ॥ ॥

गुल्मः २ प्लिहा ३ इत्यमरभरतौ
अस्यनिदानं। विदाह्यभिष्यंदि र
तस्य जंतोः प्रदुष्ट मत्यर्थ मस्र
क् कफश्च। प्लीहाभिवृद्धिं कुरु
तः प्रवृद्धोप्लीहोत्थ मेतज्जठरंवद
ति ॥ तद्वामपार्श्वे परिवृद्धिमेति
विशेषतः सीदति चातुरोऽत्र। मं
दज्वराग्निः कफपित्तलिंगै रुप
द्रुतः क्षीणबलोऽतिपाण्डुः इति
माधवकरः ॥ रक्तजस्य तस्य
लक्षणं। क्लमो भ्रमो विदाहश्च
वैवर्ण्य गात्र गौरवं। — हो र
क्तोदरत्वंच ज्ञेयं रक्तजलक्षणं ॥
पैत्तिकस्य तस्य लक्षणं। सज्व
रः सपिपासश्च सदाहे। मोह
संयुतः। पीतगात्रो विशेषेण प्ली
हा पैत्तिक उच्यते ॥ श्लैष्मिक
स्य तस्य लक्षणं ॥ प्लीहा मं
दव्यथः स्थूलः कठिनो गौर
वान्वितः अरोचक युतः पीतः
प्लीहा कफज उच्यते ॥ वातिक
स्य तस्य लक्षणं। नित्य मानद्ध
कोष्ठः स्यान्नित्योदावर्त्तपीडितः।
वेदनाभिः परीतश्च प्लीहा वाति
क उच्यते ॥ दोषत्रितयरूपाणि
प्लीह्नि साध्ये भवंति हि ॥ अथ
तस्य चिकित्सा पानव्यायुक्तितः

क्षारःदीर्घरोगेऽपि गुल्मजः तथा
उपेनपानतथाःपिप्पल्यःप्लीहशा
न्तये १ अर्कपत्रं सलवणं पुट
दग्धंसचूर्णितं निहन्तिमस्तुनापी
तंप्लीहानमपि दारुणं २ हिंगुत्रि
कटुकंकुष्ठं यवक्षारश्च सैंधवं ॥
मातुलुंगरसोपेतं प्लीहशूलह
रं रजः ३ पालाशक्षारतोयेन
पिप्पली परिभाविता । प्लीहगु
ल्मार्तिशमनी वह्निसंधाहरीम
ता ४ रसेन जंबीरफलस्य शं
खनाभीरजः पीतमवश्यमेव
शाणप्रमाणं शमयेत्प्रवृद्धं ।
प्लीहामयं कूर्मसमानमाशु ५
शरपुंखमूलकल्कस्तक्रेणालो
डितःपीतः प्लीहानं यदिनहरते
शैलोपिनदाजले प्लवते ६ लप
कसहकारस्यरसःक्षौद्रसमन्वि
तःपीतःप्रशमयत्येव प्लीहानं
नेहसंशयः ७ सुस्विन्नशाल्मली
पुष्पं निशापर्युषितंनरः राजि
काचूर्णसंयुक्तंखादेत्प्लीहोप
शान्तये ८ ।इतिभावप्रकाशः
पिप्पलीमधुपानाच्च तथाम
धुरभोजनात् प्लीहा विनश्यते रु
द्र इति ९ केतकीपत्रजंक्षारंहृतेन
सहभक्षयेत् तक्रेण शरपुंखाभ्यां
पीत्वा प्लीहां विनाशयेत् १०॥
इति गारुडे १९७।१९८ अध्या
यः॥
प्लीहारिः पुं अश्वत्थवृक्षः । इति
शब्दचंद्रिका ॥
प्लीहशत्रुः पुं प्लीहशत्रुः प्लीहघ्न
वृक्षः । इति केचित् ॥
प्लु उ. सर्पणे इति कविकल्पद्रुमः
प्लुतं क्ली अश्वगतिविशेषः स च
त्वरया क्रमेण गतिः । इत्यमर भ
रतौ तिर्यग्गतिः इति कलिंगः॥
प्लुतः पुं त्रिमात्रवर्णः इति मेदिनी
एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ
उच्यते त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंज
नं चार्द्धमात्रकं । इति दुर्गादासादि
धृत प्राचीनकारिका च ॥ क्रमगा
तियुक्ते त्रि ॥
प्लुष उ दहि । भस्मीकरणे इति
कविकल्पद्रुमः॥
प्लुष य ल दहि । इति कविकल्पद्रु
मः प्लुष सेके पूर्त्तौ ॥ स्नेहे इति क
विकल्पद्रुमः ॥
प्लोषः पुं दहनं इति प्लुषधातोर्भा
वे घञ् प्रत्ययः ॥
प्लुष्टः त्रि दग्धः । इत्यमरः ॥
प्सु स इर य दाहे विभागे । इति क
विकल्पद्रुमः ॥

प्सातिः पुं अग्निः इत्युणादिको
षः । स्नेदः ॥ गृहदाहः इति संक्षि
प्तसारोणादिवृत्तिः ॥
प्सेव ऋ उ. सेवने इति कविकल्प
द्रुमः ॥
प्सोषः पुं दाहः । इत्यमरः ॥
प्सा ल भक्षणे । इति कविकल्प
द्रुमः । प्सा स्त्री भक्षणं । इति त्रिकांड
शेषः प्सातं त्रि भक्षितं । इत्यमरः
प्सानं क्ली भोजनं । इति हेमचंद्रः

फ

फ फकारः । द्वाविंशतितमव्यंज
नवर्णः अस्योच्चारणस्थानं ओष्ठः
इति व्याकरणं ॥ तस्यतत्त्वं यथा ॥
फकारं परमेशानि रक्तविद्युल्ल
तोपमं । चतुर्वर्गप्रदं वर्णं पंचदेव
मयं सदा पंचप्राणमयं वर्णं सदा
त्रिगुणसंयुतं । आत्मादितत्त्वसं
युक्तं त्रिबिंदुसहितं सदा ॥ इति ।
कामधेनुतंत्रे पंचम पटलः ॥
वक्रा वामगता रेखा ततोऽधः
संगता भवेत् । तस्याहं गता
भूत्वा दक्षमारभ्य कुंडली ॥ ह्रला
हृदस्य विलग्नाकुंडली ब्रह्मरूपि
णी मात्रावामाद्दक्षिणतः क्रमशः
परिकीर्तिता ॥ इति वर्णोद्धारतंत्रे ।
तत्पर्यायः फकारस्य महेशानि
शिखीचैव जनार्दनः इति रुद्रया
मलोक्तवर्णाभिधानं ॥
फं क्ली रूक्षोक्तिः ॥ फत् कृतिः
निष्फलभाषणं । इति मेदिनी ॥
फः पुं यत्नसाधनं ॥ स्नानं ॥ फूत्का
वातः । इति मेदिनी ॥ वर्द्धकः ॥
जृंभा निष्फारः । स्फुटः फललाभः
इति विश्वः ॥ संज्ञाविशेषः ॥
यथा । हसोऽन्तः फः अचानन्त
रितो हसः फसंज्ञः स्यात् । इति
मुग्धबोधव्याकरणं ॥
फक्क असद्व्यवहारे ॥ शानेगीतो ।
इति कविकल्पद्रुमः ॥
फक्किका स्त्री असद्व्यवहारः फां
कि इति भाषा तत्पर्यायः चोद्य
२ देश्यं ३ पूर्वपक्षः ४ इति शब्द
रत्नावली न्यायसंबंधिव्याख्या ।
यथा श्रीमता मथुरानाथतर्के
वागीशधीमता विषदीकृतपद
र्पिते द्वितीयमणि फक्किकाः ॥
इत्यनुमानालोकटीकारंभे मथुरा
नाथः ॥ फंजिका स्त्री ब्राह्मणय
ष्टिका इत्यमरः । देवताड ऊरु
लभा इति शब्दचंद्रिका ॥
फंजिपत्रिका स्त्री आखुपर्णी इ
ति रत्नमाला ॥



फञ्जी स्त्री भार्गी इति राजनिर्घण्टः
फटः पुं स्त्री फणा । इत्यमरजटाध
रौ फट् व्य अनुकरणशब्दः अस्त्र
बीजं । यथा फडन्तं शस्त्रमायुधं ।
इति बीजवर्णाभिधानं ॥ प्रान्तिकं भ
ताडने अर्घ्यपात्रताडने अस्त्रम
न्त्रेण प्रक्षोपकरणाभ्युक्षणे अन्त
रीक्षविघ्नोत्सारणे विकिरक्षेप
णे गन्धपुष्पाभ्यां करशोधने अस्त्र
मर्षणेन पापपुरुषताडने करांग ।
न्यासे नैवेद्यप्रोक्षणे होमाग्नेः क
व्यादांशत्यागे होमाद्याशावाहने ॥
नदग्निप्रोक्षणादौ च फडिति मं
त्रस्य प्रयोगः ॥
फटा स्त्री फणा दंतः इति मेदिनी
कितवः इति हेमचन्द्रः ॥ स्यात्
पवर्गद्वितीयादिफटायां तु स्फटा
पि च । इति भरतधृतशब्दभेदः ।
फडिंगा स्त्री झिल्लिका फडिंग इ
ति भाषा इति शब्दचन्द्रिका ॥
फण त् निःस्नेह अनायासेना
न पतौ इति कविकल्पद्रुमः ॥
फण मिड् गतौ इति कविकल्पद्रु
मः फणः त्रि सर्पस्य विस्तृतमस्त
कं यथा फटायां तु फणा द्वयो रि
त्यमरः शाब्दीकारणफणा इति
क्लीवकांडे चन्द्रगोमी तत्पर्यायः ॥

फणा २ फणं ३ फटा ४ फटः ५
स्फटः ६ स्फटा ७ इत्यमरभरतौ द
र्वी ८ भोगः ९ स्फुटः १० इति हेम
चन्द्रः स्फुटा ११ दर्विः १२ फटी १३ इ
ति शब्दरत्नावली ॥
फणाकरः पुं भुजंगः इति शब्दर
त्नावली ॥
फणाधरः पुं सर्पः । इति शब्दरत्ना
वली ॥
फणाधरधरः पुं शिवः इति कवि
कल्पलता ॥
फणाभृत् पुं सर्पः इति हेमचन्द्रः
फणावान् पुं सर्पः इति शब्दरत्ना
वली ॥
फणा स्त्री सर्पफटा इत्यमरः ॥
फणाकरः पुं सर्पः इति शब्दर
त्नावली ॥
फणाधरः पुं सर्पः । इति शब्दर
त्नावली ॥
फणाभरः पुं सर्पः इति हारा ।
वली ॥
फणावान् पुं सर्पः इति शब्दर ।
त्नावली ॥
फणिकेसरं क्ली नागकेसरं इति
राजनिर्घण्टः ॥
फणिखेलः पुं भारती पक्षी भार
इति भाषा । इति त्रिकाण्डशेषः ॥

यथा भरतार्थैरावतानि विदेहा
ह्रास्य ऊर्ध्वान्विताः वर्षाणि कर्मभू
म्यः स्युः शेषाणि फलभूमयः
इति हेमचन्द्रः ॥
फलमुख्या स्त्री अजमोदा । इति
राजनिर्घण्टः ॥
फलमञ्जरिका स्त्री पिण्डखर्जूरः
इति शब्दमाला ॥
फललक्षणा स्त्री प्रयोजनवतील
क्षणा यथा अंगपस्य गूफागूफवा
द्विधास्युः फललक्षणाः । इति सा
हित्यदर्पणः ॥
फलवर्त्तुलं क्ली कालिंगं इति
राजनिर्घण्टः ॥
फलवान् त्रि फलयुक्तवृक्षः त
त्पर्यायः । फलिनः २ फली ३ इ
त्यमरः फलितः ४ इति राजनिर्घ
ण्टः फलवृक्षकः पुं पनसः इति
राजनिर्घण्टः ॥
फलशाकं यथा पत्रं पुष्पं फलं ना
लं कन्दं संस्वेदजं तथा शाकं ष
ड्विधमुद्दिष्टं गुरुविद्याद्यथोत्तरं ॥
इति राजवल्लभः ॥
फलषाडवः पुं दाडिमः । इति
त्रिकाण्डशेषः ॥
फलशैशिरः पुं वदरवृक्षः । इति

राजनिर्घण्टः ॥
फलश्रुतिः स्त्री कर्मफलश्रवणं
यथा फलश्रुतिरियं नृणां न श्रेयो
रोचनं परं श्रेयो विवक्षया प्रोक्तं य
था भैषज्यरोचनं ॥ अपि च ।
वेदोक्तमेव कुर्वाणो निःसंगोऽर्पि
तमीश्वरे । नैष्कर्म्यं लभते सिद्धिं
रोचनार्था फलश्रुतिः ॥
इति श्रीभागवते ११ स्कंधः इति
मलमासतत्त्वं ॥
फलश्रेष्ठः पुं आम्रवृक्षः इति श
ब्दचन्द्रिका ॥
फलसः पुं पनसवृक्षः इत्यम
रटीकायां भरतः ॥
फलस्नेहः पुं आखोटवृक्षः इति
राजनिर्घण्टः ॥
फलहारी स्त्री काली फलं हर
ति या फलं हरति कर्मोपपद
हृञ् धातोः णिनि ईप् प्रत्यय नि
ष्पन्नोऽयं शब्दः । सा ज्येष्ठे पंच द
श्यां वक्ष्यफलाद्युपहारैः पूजनी
या यथा ज्येष्ठे मासि अमायां वै म
हारात्रे महेश्वरि पूजयेत् कालि
कां देवीं नानाद्रव्योपहारकैः
नैवेद्यं सितपक्षे तु पंचदश्यां ति
शार्ङ्गके । पूजयेच्च फलैर्लिंगैः
पार्थिवैर्वापि कालिकां ॥

७ क्ली षड्विधशाकान्तर्गतफलरूपशाकं

इति मायातन्त्रे ७ पटलः ॥

फला स्त्री किञ्चिद्विशाल्यपः । इति राजनिर्घण्टः ॥

फलाढ्या स्त्री काष्ठकदली । इति राजनिर्घण्टः ॥

फलाध्यक्ष क्ली राजादनवृक्षः इत्यमरः फलानामधिकृते त्रि ॥

फलादनः पुं शुकपक्षी । इति हेमचन्द्रः । फलभक्षके त्रि ॥

फलादनः पुं वेशः इति शब्दमाला फलाम्ल क्ली वृक्षाम्ल इति राजनिर्घण्टः ॥

फलाम्लः पुं अम्लवेतसः इति राजनिर्घण्टः ॥

फलाशनः पुं शुकपक्षी । इति त्रिकाण्डशेषः फलभक्षके त्रि ।

फलिः पुं मत्स्यविशेषः फलुइ इति भाषा । अस्य गुणाः स्वादुत्वं गुरुत्वं । स्निग्धत्वं बलकारित्वं शुक्रवर्द्धनत्वञ्च इति राजवल्लभः

फलिका स्त्री निष्पावी इति राजनिर्घण्टः ॥

फलितं त्रि फलमस्य जातं । इति मुग्धबोधव्याकरणं ॥ वृक्षे पुं इति धरणिः ॥ शैलेय क्ली इति राजनिर्घण्टः ॥

फलिनः त्रि फलवान् इत्यमरः पनसे फलवति वृक्षे च पुं इति राजनिर्घण्टः ॥

फलिनी स्त्री प्रियङ्गुवृक्षः अग्निशिखावृक्षः इत्यमरः ॥

फली त्रि फलयुक्तवृक्षादिः इत्यमरः ॥

फली स्त्री प्रियङ्गुवृक्षः । इत्यमरः

फलिमत्स्यः । इति शब्दमाला ॥

फलूषः पुं लताभेदः । इत्युणादि कोषः ॥

फलेग्रहिः पुं यथासमयं फलधरवृक्षः । ऋतुमासे फलानि गृह्णाति धारयतीति फलेग्रहिः शाकन्त्वादित्यादिना इः सूत्रे फले इति निर्देशात् एकारः । किंवा फले गृह्णाति इति फलेग्रहिः कर्मण्याधार विवक्षा निपातनात् सप्तम्या अलुक् किं फलग्रहिश्च फलेग्रहिः फलग्रहि रिति वाचस्पतिः इह ग्रहि धारणार्थः स्वीकारार्थश्च अत्र धारणार्थे वृक्षएव वृद्धिः स्वीकारार्थे तु क्रियाशब्दनैव यथा फलेग्रहीन् हंसि वनस्पतीनामिति भट्टिः । इति रायमुकुटादयः इत्यमरटीकायां भरतः । फलग्रहणकर्त्तरि त्रि ॥

फलेग्राहिः पुं फलेग्रहिः । इति शब्दरत्नावली ॥

फलेन्द्रः पुं वृहज्जम्बुः । तत्पर्य्यायः नन्दः २ राजजम्बुः ३ महाफला ४ सुरभिपत्रा ५ महाजम्बुः ६ । अस्य गुणाः । स्वादुत्वं विष्टम्भित्वं । गुरुत्वं । रोचनत्वञ्च । इति भाव प्र । काशः ॥

फलेपुष्पा स्त्री क्षुद्रक्षुपविशेषः गूमा इति हिंदीभाषा तत्पर्य्यायः द्रोणा २ द्रोणपुष्पी ३ अस्या गुणाः गुरुत्वं स्वादुत्वं रूक्षत्वं उष्णत्वं । वातपित्त कारित्वं । क्षारत्व लवणत्वं । स्वादुपाकत्वं । कटुत्वं । भेदकत्वं । कफाम कामला शोथ तमक श्वास जंतु नाशित्वञ्च इति भावप्रकाशः ॥

फलेरुहा स्त्री पाटलिवृक्षः इत्यमरः ॥

फलोत्तमा स्त्री काकलीद्राक्षा इति राजनिर्घण्टः ॥

फलोत्पत्तिः पुं आम्रवृक्षः इति शब्दचन्द्रिका ॥

फलोदयः पुं लाभः सुरालयः हर्षः इति शब्दरत्नावली ॥ फलोत्पत्तिः यथा सोऽहमाजन्म शुद्धानामाफलोदय कर्म्मणां । आ । समुद्रक्षितीशानामानाकरथवर्त्मनां इति रघुः ॥

फल्कः पुं विस्तारितांगः । इत्युणादि कोषः ॥

फल्गु त्रि असारं । इत्यमरः निरर्थकं । इति त्रिकाण्डशेषः ॥

फल्गुः स्त्री गयास्थनदीभेदः तस्यामाहात्म्यादि यथा सार्द्धक्रोश द्वयं मानं गयायां परिकीर्त्तितं । पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः तत्र पिंड प्रदानेन तृप्तिर्भवति शाश्वती नगाज्जनार्द्दनाच्चैव कृपाच्चोत्तरमानसात् ॥ एतत्त्रयाधिक प्रोक्तं फल्गुतीर्थं तदुच्यते । तत्रपिण्ड प्रदानेन पितॄणां परमागतिः । पृथिव्यां यानि तीर्थानि ये समुद्राः सरांसि च फल्गुतीर्थं गमिष्यंति वारमेकं दिने दिने ॥ इति गारुडे ८२ अध्यायः अन्यत् गयाशब्दे द्रष्टव्यं

काकोडुम्बरिका काकडुमुर इति भाषा । इत्यमरः । अस्या गुणाः । गुरुत्वं । ग्राहित्वं । शीतलत्वं । स्वादुत्वं । कृमिकारित्वञ्च इति राजवल्लभः ॥ रोगभेदः ॥ फागु इति प्रसिद्धः मिथ्यावाक्यं इति शब्दरत्नावली ॥ वसन्तर्त्तुः इति जटाधरः ॥

फल्गुदा स्त्री गयानदी । यथा त
त्रदेशे गया नाम पुण्यदेशो नि
विश्रुतः । नदी च फल्गुदानाम
पितॄणांस्वर्गदायिनी इति वृह
द्धर्मपुराणे ५६ अध्यायः ॥
फल्गुनः पुं अर्जुनः फाल्गुनमासः
इत्यमरटीकायांभरतः ॥
फल्गुनालः पुं फाल्गुनमासः
इति भूरिप्रयोगः ॥
फाल्गुनी स्त्री नक्षत्रविशेषः त
त्तु पूर्वफल्गुनी उत्तरफल्गुनी च
इति भरभट्टन गोवर्द्धनानेरः का
कोदुंबरिका । इतिराजनिर्घण्टः
फल्गुवाटिका स्त्री काकोडुम्बरि
का इति राजनिर्घण्टः ॥
फल्गुवृन्ताकः पुं श्वेतवृन्ताकप्रभेदः
इति राजनिर्घण्टः ॥
फल्गूत्सवः पुं फल्गुकरणगोविं
दोत्सवः दोलयात्रा इति ख्यातः
यथा । गोविन्दानुगृहीतेन यात्रा
ऽनेन प्रकीर्तिता । फल्गून्
सर्वे प्रकुर्वीत पञ्चाहानि ग्रहा
णि वा इति दोलयात्रापद्धतिः
फल्यं क्ली कुसुमं इतिशब्दचन्द्रि
का फल्लकी पुं मत्स्यविशेषः
फलुइ इतिभाषा इतिशब्दमाला
फल्लफलः पुं सूर्पवातः कुलारवा

तास इति भाषा । इतिजटाधरः ॥
फाः पुं संतापः निष्फलभाषणं
यथा फिः कोपो फाश्च संतापे
तथा निष्फलभाषणे इतिशब्द
रत्नावली वृद्धिः । वर्द्धकः यथा
फाड्डो वर्द्धके पुमान् इतिविश्वः
फाटकी स्त्री स्फटी । इतिराजनिर्घ
ण्टः फाणिः स्त्री गुडः करम्भः इत्य
दिकोषः ॥
फाणितं क्ली अर्द्धावर्त्तितेक्षुरसः
फेणीति ख्यातः । इत्यमरभरतौ ॥
अस्य गुणाः । गुरुत्वं । अभिष्यन्दित्वं [बृंहणत्वं कफशुक्र...]
त्वं । मूत्रवस्तिविशोधनत्वंच इ
क्षो रसस्तु यः पक्वः किंचित्सान्द्रो
बहुद्रवः । स एवेक्षुविकारेषु ख्या
तः फाणितसंज्ञया इति भावप्रका
शः ॥
फाण्टं त्रि अनायासकृतं । इत्यम
रः ॥ कषायभेदः । यथा । क्षि
प्तोष्णतोये मृदितः फाण्ट इत्य
भिधीयते । अपिच । क्षुण्णे द्र
व्य पले सम्यक् जल मुष्णं विनिः
क्षिपेत् । पाचेतः पलमिति तत
स्तु स्रावयेज्ञा । सोऽयं चूर्णद्र
वः फाण्टो भिषग्भिरभिधीयते ॥
इति वैद्यक परि ॥ ॥
भाषा ॥ ॥

यथा फलन्ति शस्यानि सुतानिवा
पि कानि च । कृषिकाणांक्षेत्रभे
दे पात्र भेदे फलंतथा ॥ सामान्य
दिवसे विप्रदानं समफलं भवेत्
अमायां रविसंक्रान्त्यां फलं शतगु
णं भवेत् ॥ चातुर्मास्यां पौर्णमास्या
मनन्तं फलमेव च । ग्रहणेशशि
नः कोटि गुणंच फलमेव च ॥
सूर्यस्य ग्रहणेचापि ततोदश गु
णं भवेत् । अक्षयायामक्षयं चैवा
संख्यं फल मुच्यते एवमन्यत्र पु
ण्याहे फलाधिकं भवेदिह यथा
दाने तथा स्नाने जपेऽन्येन पुण्य
कर्मसु एवं सर्वत्रबोद्धव्यं नराणां
कर्मणां फलं । सामान्य देशे दानं
च विप्रे समफलं भवेत् तीर्थे देव
गृहे चैव फलं शतगुणं स्मृतं गंगा
यां च कोटिगुणं क्षेत्रे नारायणे ।
फलं एवं सर्वत्रबोद्धव्यं फला
धिक्यं क्रमेणच । यथाचैव कोटि
गुणं तथा च विष्णु मंदिरे केदा
रे च लक्षगुणं हरिद्वारे तथा फलं ।
पुष्करे भास्करक्षेत्रे दशलक्षगुणं
फलं एवं सर्वत्रबोद्धव्यं फलाधि
क्यं क्रमेणच । सामान्य ब्राह्मणे
दाने सम मेव फलं भवेत् लक्षं
त्रिसंध्य पूतेच पंडिते च जिते ॥

न्द्रिये । विष्णुमन्त्रोपासके च बुधे
कोटि गुणं भवेत् एवं सर्वत्रबो
द्धव्यं फलाधिक्यं गुणं भवेत् ।
यथा दण्डेन सूत्रेण पाशावेणज
वेनच कुंभनिर्माति चक्रेण कुंभका
रोऽस्सदा भुवि तथैव कर्मसूत्रेण
फलं धाता ददाति च इतिब्रह्मवैव
र्त्तं प्रकृतिखण्डे ३४ अध्यायः ॥
त्वप्रिय फलस्य विष्णु देयत्वं य
था भक्ष्याणि चानि पेयानि भोज्या
न्यभिमतानि च । फलं च वल्लभं
यच्च तत्तद्देयं जनार्द्दने इत्यग्नि पु
राणं ॥ इष्टकफलद्वारा फल पा
तन निषेधो यथा । न स्नातये दि
ष्टकाभिफलानि वैफलेन तत ।
म्लेच्छभाषां शिक्षेत नाकर्षेच्चापरा
सनं ॥ इति कौर्मे उपरिभागे १६ अ
ध्यायः ॥
फलः पुं कुष्टजहवृक्षः । इतिशब्द
रत्नावली ॥
फलकं क्ली पुं चर्म फलं इतिभा
षा इत्यमरः ॥
फलकः पुं अस्थिखण्डः । इतिज
टाधरः ॥ नागकेशरे । इतिशब्द
चन्द्रिका ॥ काष्ठादिपट्टकं । यथा
पाण्डुलेखेन फलके भूमौ वा प्र
थमं लिखेत् । ऊनाधिकं ततः शो

षं पश्चात् पत्रे निवेशयेत् इ
ति व्यवहारतत्त्वे व्यासः । रजकप
ट्टं । धोपारपाट इति भाषा ॥
यथा शाल्मले फलके श्लक्ष्णे
निर्ज्याह्वा सो सिनेजकः न च वा
सांसि वासोभिर्निर्हरेन्न च वासये
त् ॥ इति मिताक्षरा ॥

फलकपाणिः पुं चर्मी चाली इ
ति भाषा इत्यमरः ॥

फलकर्कशा स्त्री वनकोलिः इ
ति केचित् ॥

फलकी न पुं मत्स्यभेदः । फल
इ इति भाषा । फलकान्विते त्रि
इति मेदिनी ॥

फलकृस्सः पुं पानीयामलकं इ
ति शब्दचंद्रिका ॥

फलकेशरः पुं नारिकेलवृक्षः
इति जटाधरः ॥

फलकोषकः पुं मुष्कः इति त्रि
काण्डशेषः ॥

फलग्रहिः त्रि फलेग्रहिः यथा
समयफलधरवृक्षः । इत्यमरटी
कायां भरतः ॥

फलग्राही पुं वृक्षः इति धरणिः
फलग्रहणकर्त्तरि त्रि ॥

फलचमसः पुं दधिमिश्रितव
टत्वक्चूर्णं इति श्राद्धतत्त्वं ॥

फलचोरकः पुं चोरकनामगन्ध
द्रव्यं इति राजनिर्घण्टः ॥

फलत्रयं क्ली द्राक्षापरूषकाश्म
र्य्यः त्रिफला इति शब्दचंद्रिका ॥

फलत्रिकं क्ली त्रिफला शुण्ठी पि
प्पली मरिचानि । इत्यमरः ॥

फलदः पुं वृक्षः इति धरणिः ॥
फलदातरि त्रि ॥

फलपञ्चाम्लं क्ली अम्लपंचफलं
इति राजनिर्घण्टः ॥

फलपाकः पुं करमर्द्दकः । इत्य
मरटीकायां भरतः ॥ पानीयाम
लकं । इति शब्दचंद्रिका ॥

नेपाकांता स्त्री ओषधिः । धान्य
क दल्यादिः इत्यमरः ॥

फलपाकी पुं गर्द्दभाण्डः । इति
रत्नमाला ॥

फलपुच्छः पुं वरण्डालुः इति त्रि
काण्डशेषः ॥

फलपुष्पा स्त्री पिण्डखर्ज्जूरी इति
राजनिर्घण्टः ॥

फलपूरः पुं बीजपूरः इत्यमरः ।
फलपूरकः पुं बीजपूरः इति भाव
प्रकाशः ॥

फलप्रिया स्त्री प्रियङ्गुः इति राज
निर्घण्टः ॥

फलभूमिः स्त्री कर्मफलभोगस्थानं

फालं क्ली हलोपकरणं । इति मे
दिनी ॥

फालः पुं लांगलस्य भूविदारक
लोहः फल्यते विशीर्य्यते भूमि
रनेनेति । तत्पर्य्यायः कृषिकः
२ इत्यमरः ॥ कृषकः ३ फलं ४
इति भरतः । कुशिकः ५ फालं ६
इति मुकुटः । कुशिकं ७ । इति
हेमचंद्रः ॥ महादेवः बलदेवः
कार्पासवस्त्रे त्रि इति मेदिनी ॥
नवविध दिव्यान्तर्गताष्टम दि
व्यं । तस्य विधिर्यथा । बृहस्प
तिः । आयसं द्वादशपलं घ
टितं फालमुच्यते । अष्टांगुलं
भवेद्दीर्घं चतुरंगुलविस्तरं ॥
अग्निवर्णं ततश्चौरो जिह्वया
लेहयेत् सकृत् । न दग्धश्चेच्छु
द्धिमियादन्यथा तु स हीयते ॥
चौरोऽगोचौरः । गोचौरस्य प
दातव्यं तप्तफालावलेहनमि
ति स्मृतिरिति मैथिलाः । अत्रापि
त्वमग्ने इत्यादि मंत्रानंतरं आय
सं लिहानस्य जिह्वयापि समा
दिशेदिति पितामहोक्तेः प्राड्विवा
कः शोध्याभ्यामग्न्यभिमन्त्रणं कार्य्यं
तत्र प्रयोगः लौकिकं चत्वारिंशत् ।
तोलकमितं लौहं चेति ॥ ।
तमष्टयवमध्यात्मकांगुलाष्ट दी
र्घं तथाविध चतुरंगुलप्रस्तारं
फालमग्नौ तापयेत् । तत्र प्राड्वि
वाको धर्मावाहनादि हवनान्तक
र्म्म कृत्वा दक्षिणां दत्त्वा ओं त्वमग्ने वेदा
श्चत्वारस्त्वं च यज्ञेषु हूयसे । त्व
मुखं सर्वदेवानां त्वमुखं ब्रह्मवादि
नां । जठरस्थोऽसि भूतानां ततो वेत्
सि शुभाशुभं । पापं पुनासि वै
यस्मात् पावक उच्यते ॥ पापेषु
दर्शयात्मानमर्च्चिष्मान् भव पाव
क । अथवा शुभभावेन शीतो भव
हुताशन । त्वमग्ने सर्वभूतानाम
न्तश्चरसि साक्षिवत् त्वमेव देव
जानीषे न विदुर्यानि मानवाः । व्य
वहाराभिशस्तोऽयं मानुषः शुद्धि
मिच्छति तदेनं संशयादस्माद्धर्म
तस्त्रातुमर्हसि ॥ इत्येतैः फलस्य
मग्निमभिमंत्रयेत् । शोध्यस्तु प्र
तिज्ञापत्रं शिरसि निधाय त्व
मग्ने सर्वभूतानामन्तश्चरसि पा
वक साक्षिवत् पुण्य पापेभ्यो
ब्रूहि सत्यं कवे मम इत्यनेना
भिमंत्र्य अग्निवर्णं फालं जिह्व
या सकृल्लिह्यात् न दग्धश्चेत्
शुद्धः । इति दिव्यतत्त्वं ॥

फालाः पुं जंबीरबीजानि इति



दुर्गटीकाटिप्पनीकृत् कुलचन्द्रः
फाल्गुनः पुं गुडाकेशः नदीज
वृक्षः अर्जुनवृक्षः । तपस्यमासः
यथा फाल्गुनस्तु गुडाकेशे नदी
जार्जुनभूरुहे । तपस्यसंज्ञे मासे
तत् पूर्णिमायोगात् फाल्गुनी इति
हेत्वन्तवर्गे मेदिनी अत एव फा
ल्गुने गगने फेने णत्वमिच्छन्ति ब
र्बराः इति कारिका समूलिका अ
त्र णत्वमिच्छन्तीति अकारः प्र
श्लेषो भ्रान्तानां वैशाखादिद्वादश
मासान्तर्गतैकादशमासः फाल्गु
नीनक्षत्रयुक्ता पौर्णमासी यस्मिन्मा
से सः । इति तत्प्रायिकाभिप्रायं ॥
स च त्रिविधः मुख्यचान्द्रो गौणचा
न्द्रः सौरश्च यथा कुंभस्थ रवि प्रा
क् शुक्लप्रतिपदादि दर्शान्तो ।
मासो मुख्यचान्द्रः मुख्यचान्द्रफा
ल्गुनमासीय पौर्णमास्यन्तः कृ
ष्णप्रतिपदादिको मासो गौणचा
न्द्रः कुंभराशिस्थ रवि भोगोपल
क्षितकालात्मको मासः सौरः इ
ति मलमासतत्त्वानुसारात् तत्
पर्य्यायः तपस्यः २ फाल्गुनिकः
३ फल्गुनः ४ इत्यमरभरतौ वत
सरान्तकः ५ । इति राजनिर्घण्टः
तत्र जातफलं प्रियंवदः सज्जन

वल्लभश्च परोपकारी विमलाश
यश्च दाता नितान्तं प्रमदाभिला
षी स्यात् फाल्गुने यस्य जनस्य ज
न्म इति कोष्ठीप्रदीपः ॥ अथ फा
ल्गुनकृत्यं तत्र माघानन्तरं फाल्गु
न कृष्णाष्टम्यां कालशाक वास्तु
कशाकोपकरणेन श्राद्धं क
र्त्तव्यं गौणचान्द्रफाल्गुनकृष्णच
तुर्द्दश्यां शिवरात्रिव्रतं यद्दिने
प्रदोष निशीथोभयव्यापिनी च
तुर्द्दशी तद्दिने व्रतं उभयव्याप्त्यनु
रोधात् । यदा पूर्वेद्युर्निशीथव्या
पिनी परेद्युः प्रदोषमात्रव्यापिनी
तदा पूर्वेद्युर्व्रतं प्रधानकालव्या
प्तत्वात् यदा तु पूर्वेद्युर्न निशी
थव्याप्तिः परदिने प्रदोषव्यापि
नीति वचनात् मुख्यचान्द्रफा
ल्गुनशुक्लद्वादशी गोविंदद्वाद
शी फाल्गुने शुक्लपक्षस्य पुष्य
र्क्षे द्वादशी यदि गोविंदद्वादशी
नाम महापातकनाशिनी महा
पातकनाशकामो गंगायां स्नान
महं करिष्ये । अत्र पद्मपुराणी
यो मंत्रः । महापातकसंज्ञानि
यानि पापानि संति मे ॥ गो
विंदद्वादशीं प्राप्य तानि मे हर जा
ह्नवि ॥ फाल्गुनपौर्णमास्यां दो

लयात्रा । तीर्थचिंतामणौ ब्रह्मपु
राणं । नरो दोलागतं दृष्ट्वा गोविं
दं पुरुषोत्तमं । फाल्गुन्यां संयतो
भूत्वा गोविंदस्य पुरं व्रजेत् ॥
स्कंदपुराणीय पुरुषोत्तम माहा
त्म्ये त्रिंशाध्याये । फाल्गुन्यां क्रीड
नं कुर्य्यात् दोलायां मम भूपते ॥
इति कृत्यतत्त्वं ॥
फाल्गुनानुजः पुं वसंतकालः इ
ति हारावली ॥ अर्जुनस्य कनिष्ठ
भ्राता च ॥
फाल्गुनिकः पुं फाल्गुनमासः इ
त्यमरः ॥
फाल्गुनी स्त्री फाल्गुनमासस्य
पूर्णिमा इति मेदिनी पूर्वफल्गुनी
नक्षत्रं । उत्तरफल्गुनीनक्षत्रं । इत्य
मरटीकायां भरतः ॥
फिः पुं पापः निष्फलवाक्यं । इ
त्येकाक्षरकोषः ॥ कोपः इति श
ब्दरत्नावली ॥
फिंगकः पुं पक्षिविशेषः । फिंगा
इति भाषा । तत्पर्य्यायः । कुलिंगः
२ कलिंगः ३ धूम्याटः ४ इति शब्द
माला । भृंगः ५ । इत्यमरः ॥
फुः पुं मंत्रकं । तुच्छवाक्यं । इति
विश्वः ॥
फुत् अव्य अनुकरणशब्दः इति फुत्

कारशब्द दर्शनात् । तद्भाषणं ।
इति केचित् ॥
फुकः पुं पक्षी इति शब्दचंद्रिका
फूटः त्रि सर्पफणा इति हेमचंद्रः
फुत्करः पुं अग्निः । इति शब्द
चंद्रिका ॥
फुत्कारः पुं फुत्करणं फुँ इ
ति फूँकू इति च भाषा फुत्कारव
ति पावके आहुति निषेधो यथा
अल्पे रूक्षे सस्फुलिंगे वामावर्त्ते
भयानके । आर्द्रकाष्ठैः समुत्पन्ने ।
फुत्कारवति पावके । कृष्णार्च्चि
षि सुदुर्गंधे तथा लिहति मेदिनीं
– आहुतिं जुहुयाद्यस्तु तस्य नाशो
भवेद्ध्रुवं इति तिथ्यादितत्त्वं ॥
फुत्कृतिः स्त्री फुत्कारः । यथा
स्फूर्जत् फुत्कृति भीति संभ्रम
चमत्कार स्फुरत् संभ्रमा इति
काव्यचंद्रिका ॥
फुप्फुसः पुं पुप्फुसः कोष्ठवि
शेषः स च हृदयनाडिकासंलग्ना
शय विशेषः फापडाफुलकाका
पासे इति च लोके । इति सुश्रुतः ॥
यथा स्थानान्यामाग्निपक्वानां मूत्र
स्य रुधिरस्य च । हृदुण्डुकः फुप्फुस
श्च कोष्ठ इत्यभिधीयते इति माधव
करः अस्य व्याख्या । आमस्य स्थाने



आमाशयः नाभेरूर्द्ध्वं अग्नेः स्थानेपच्यमानाशयः नाभिमध्यं । पक्वस्य स्थानं पक्वाशयः नाभेरधः । मूत्रस्य स्थानं वस्तिः रुधिरस्य स्थानं यकृत् प्लीहानौ हृत् हृदयं इत्थं रस पाक मलवयः शोणित मलस्तज्ञः उण्डुकः सर्वात्र देशे व्यवस्थितः शरीराधाने फुप्फुसः हृदयस्य वामपार्श्वे फुप्फुस इति ख्यातः इति विजयरक्षितः ॥

फुल्लिः स्त्री फलनं इति मुग्धबोधव्याकरणं ॥

फुल्लं विकाशे इति कविकल्पद्रुमः फुल्लः त्रि विकसितः इत्यमरः ॥ पुष्प फुल इति भाषा । यथा ॥ श्रीपंचम्यां श्रियं देवीं फुल्लैः संपूजयेत् सदा । इति कालिकापुराणं ॥

फुल्लफालः पु सूर्पवातः इति त्रिकाण्डशेषः ॥

फुल्लदाम क्ली छंदोभेदः यथा मोगौ नौ नौगौ पार हय नरगैः फुल्लदाम प्रसिद्ध उदाहरणं यथा व्यस्तलोकानां प्रकटित कम्पानं ध्वस्त मालोका कंस कृष्ण्वेनोभि स्त्रिदिववसतिभिर्व्योम संस्थै र्विमुक्तं मुग्धामोदेन स्फारितदशदिशाभोग माहृतभृङ्गं मौलौ देवस्ये न्द्रपुत्रद्रवपतनं स्वस्तोः फुल्लदाम ॥ इतिछंदो मंजरी ॥

फुल्ललोचनः पु मृगविशेषः इति शाद्बचंद्रिका प्रफुल्लनेत्रयुक्ते त्रि

फुल्लरीकः पुं देशः सर्पः इति संक्षिप्तसारोणादिवृत्तिः ॥

फुल्लिः स्त्री विकाशः इङ् धातकथनेनिङ् वाल्हिङ् वाइतिसिद्धिमसारस्वतात् भावेइङ् प्रत्ययेन निष्पन्नः

फेणः पु फेनः जलद्रव्योपर्युत्थितवुद्बुदाकारवस्तु फेणा इति भाषा । यथा पयः फेण निभा शय्या दान्ता रुक्मपरिच्छदा इति पुराणं हिण्डीरः । समुद्रफेणा । इति भाषा । इत्यमरः अस्य मूर्द्धन्य णान्तस्य प्रमाणं यथा हंसश्रेण्या नदी तीरे निनदैः संप्रतीयिरे यथा सारस्वता मंत्रा श्रोतरे फेण संगता । इत्यमरटीकायां रघुनाथचक्रवर्त्ती ॥

फेणी स्त्री स्वनामख्यातमिष्टान्नविशेषः यथा वटा वेशवारान्तवङ्गेन फेणी समं पर्पटः शिग्रु बीजेन याति इति जीर्णमंजरी ॥

फेन कारिणी स्त्री तंत्रविशेषः यथा

उन्मत्त भैरवं नारसिंहं डामरभैरवं शिवाकारं मलिम्लाघ मत्सिताग्रादियामलं ॥ सिद्धयोगे श्वरं तंत्रं योगिनी जाल सम्बरं ॥ दृष्ट्वा कृत्वा विधिफेन कारिणी तंत्रं विरच्यते इति प्रथमश्लोकद्वयं ॥ फेन कारिणीतंत्रद्वयमयोक्तं कृत्वा समस्तागम सारभूता शास्त्रं । विनाशाय धनाय धर्म मोक्षाय । सम्यक् प्रयत्नो नियोज्या ॥ इति फेन कारिणीतंत्रस्य शेषश्लोकः

फेन कारीयः पु तंत्रविशेषः तंत्रसारादि संग्रहे फेन कारीये इति शासने लिखितं ॥

फेनः पु फेणः फेना इति भाषा । तत्पर्यायः हिण्डीरः २ अब्धिकफः ३ इत्यमरः । हिण्डिरः ४ इति शब्दरत्नावली समुद्रकफः ५ जलहासः ६ फेनकः ७ इति त्रिकाण्डशेषः स्फायते फेनः स्फायीङ् वृद्धौ नाम्नीति ङ्नः निपातनात् सलकुदंत्यानां तः । इत्यमरटीकायां भरतः अस्य दंत्यान्तस्य प्रमाणान्तरं यथा वानीरं गगने फेन मूलंच दंत्यान्वितं । श्लाकुं गगन मित्युक्तं केचिन्मूर्द्धण्यान्वितं ॥ इति भरतसेन विरचितं साखलेखनं ॥

फेनकः पु फेनः । इति त्रिकाण्डशेषः ॥ पिष्टकविशेषः । अस्य गुणाः । लघुत्वं । रूक्षत्वं । शुक्रकारित्वं । पित्त वायुनाशित्वंच इति राजवल्लभः ॥

फेनका स्त्री जलपक्वतण्डुलचूर्णं इतिशब्दचंद्रिका ॥

फेनदुग्धा स्त्री दुग्धफेनीक्षुपः इति राजनिर्घण्टः ॥

फेनलः त्रि फेनवान् इतिसिद्धान्तकौमुदी फेनवान् त्रि फेनिलः इतिसिद्धान्तकौमुदी

फेनवाही पु वस्त्र इति शब्दमाला

फेना स्त्री सातलाक्षुपः इति राजनिर्घण्टः ॥

फेनाग्र क्ली बुद्बुदं । इतिहारावली

फेनाशनिः पु इंद्रः इति शब्द । माला ॥

फेनिका स्त्री पक्वान्नविशेषः खाजा इति भाषा ॥ यथा सुमिताया घृताप्लाया वर्त्ती दीर्घाः समा चरेत् ॥ ताम्र सन्निहितादीर्घाः पीठस्योपरि धारयेत् ॥ ॥ वेल्लयेद्वेल्लनेनैतायथैकापर्पटीभवेत् । ततश्छुरिकया तांत संलग्नामेवकर्त्तयेत् ॥ ततस्त वेल्लयेद्भूयः



सहकेन च लेपयेत् शालिचूर्णं च्युतं तोयं मिश्रितं सहकं भवेत् ततः संहृत्य तां लोप्त्रीं विदधीत पृथक् पृथक् ॥ पुनस्तां वेल्लयेत् लोप्त्री यथास्यात्मण्डलाकृतिः ततस्तां सुपचेदाज्ये भवेयुश्च पुराः स्फुटाः सुगन्धया शर्करया तज्जुलन माचरेत् सिद्धेषा फेनिका नाम्नी मण्डकेन समा गुणैः ततः किंचिल्लघुरियं विशेषाय मदाह्वतः इति भाव प्रकाशः ॥

फेनिलं क्ली कोलिफलं मदनफलं सफेनत्रि इतिमेदिनी ॥

फेनिलः पु अरिष्टवृक्षः हारिष्ट इति ख्यातः इत्यमरः ॥ वदरवृक्षः । इति राजनिर्घण्टः ॥

फेरः पु श्रृगालः इतिशब्दरत्नावली ॥

फेरण्डः पुं श्रृगालः इति हेमचन्द्रः ॥

फेरवः पु श्रृगालः इत्यमरः । राक्षसः इति मेदिनी धूर्ते हिंस्रेच त्रि । इतिशब्दरत्नावली ॥

फेरुः पु श्रृगालः इत्यमरः ॥

फेल ऋ गतौ इतिकविकल्पद्रुमः फेल स्त्री भुक्तसमुज्झिते उच्छिष्ट इतिशब्दरत्नावली ॥

फेलकः पु भुक्तसमुज्झितं । इति जटाधरः ॥

फेला स्त्री भुक्तसमुज्झिते इत्यमरः फेलिः स्त्री उच्छिष्ट इतिजटाधरः फेलिका स्त्री उच्छिष्टं फेला शब्दात् स्वार्थे स्निकप्रत्ययेन निष्पन्नः ॥ फेली स्त्री भुक्तसमुज्झितं ॥ इतिशब्दरत्नावली

व

व वकारः । स च त्रयोविंशव्यंजनवर्णः तस्योच्चारणस्थान मोष्ठः इतिव्याकरणं तस्यस्वरूपं यथा वकारं श्रृणुचार्वंगि चतुर्वर्गप्रदायकं शरच्चन्द्र प्रतीकाशं पंचदेवमयं सदा पंचप्राणात्मकं वर्णं त्रिविन्दु सहितं सदा इति कामधेनुतन्त्रं त्रिकोण रूपिणी रेखा विल्वीश ब्रह्मरूपिणी मात्राशक्तिः परात्तेया ध्यान मस्य प्रवक्ष्ये तस्यध्यानादि यथा नील । वर्णां त्रिनयनां नीलांवर धरां परां नागहारोज्वलां देवी द्विभुजां पद्मलोचनां ॥ एवंध्यात्वा वकारंतु तन्मंत्रं दशधा जपेत् ॥ त्रिशक्ति सहितं वर्णं विविधात्मनं

लेपितं । स्वयं कुण्डलिनी देवी सततं प्रणमाम्यहं इति वर्णोद्धारतन्त्रं ॥

व व्य इवार्थः यथा नारिकेलासंबंधोधाः शाखवंव यशः पशुः इतिरघुकाव्यचतुर्थसर्गः ॥

वः पु वरुणः कुंभः इति शब्दरत्नावली । वः पुमान् वरुणेसिंधौ भगे ग्रंथगते तथा गाथने तत्वसंतानेष्वेव वपने स्मृतः ॥ इति मुक्ताकिना मेदिनी ॥

तस्य सांकेतिक नामानि यथा । युगंधरः १ सरभिः २ मुखविस्तुः ३ संहारः ४ वसुधाधिपः ५ इति वीजवर्णाभिधानं । भूधरः ६ दश्रागंडः ७ इति रुद्रयामलोक्त वीजाभिधानं ॥ अपिच । वारुणी भूधरो मार्गो चर्चरी लोचनप्रियः प्रचेताः कलसः पक्षी स्थलगण्डः कपर्दिनी ॥ दृष्टवंशो भयामात्रः शिखिवाहो युगंधरः मुखविन्दुर्वली चण्डो योद्धा त्रिलोचनप्रियः क्लेदिनी तापिनी भूमिसगनिर्द्वव लिप्रियः सरभिर्मुखविस्तुः सहाना वसुधाधिपः षष्ठश्च वपरावुमारको गगनं प्रति पृष्टा षाफा मध्यलिंगशानिः कुंभ स्तनीयकौ ॥

इतितन्त्रान्तरे ॥

वः त्रि युष्मदशब्दस्यद्वितीया चतुर्थी षष्ठीनां बहुवचनान्त पदं यथा युष्मान् युष्मभ्यं युष्माकं इति व्याकरणं ॥

वंहिष्ठः त्रि अतिशायबहुलः इत्यमरः ॥

वठ [illegible] सामर्थ्ये इति कविकल्पद्रुमः ॥

वडवा स्त्री घोटकी । इत्यमरः ॥ अश्विनी नक्षत्रं इतिज्योतिषं ॥

वाडवाग्निः अस्योत्पत्ति र्यथा अथाकाशगता देवाः क्रुद्धं दृष्ट्वा महेश्वरः प्रसीद जगतां नाथ कामे क्रोधं परित्यज ॥ इति स्म वदतां तेषां ममरूपं ततः नलः ललाट चक्षुः संभूतो भस्माकार्षीत्मनोभवं ब्रह्मा क्रोधाग्निमल्पं शोभाधत्ते तस्य सकलान् जनान् वडवारूपिणं चक्रे देवानां पुरतस्तदा वडवांतो ततो देवाः सौम्यां ज्वालामुखी प्रभो । दृष्ट्वा निविघ्नमनसो बभूवः हर्षपीडिताः ॥ वडवांतां समादाय ततो ज्वालामुखी विधिः सागरप्रययौ लोकहिताय जगतां प्रभुः गत्वा च सागरेज्वाला प्रोक्ता च परिकल्पिताः ॥



यथा वडेन विप्रेंद्राः समयंच निवे
शयन् अयंक्रोधो महेशस्य वडवा
रूपधृक् त्वया ज्वालामुखः सदा धा
र्य्यो यावन्न विलयाम्यहं ॥ यदा ।
त्वामहमागम्य वदामि सलिलंप
ते । तदा त्वया परित्यज्यः क्रोधो
यं वडवामुखः ॥ भोजनं भवत
स्तोयमेतस्मात् भविष्यति । य
त्नादेव विधार्य्यो यं यथा नो याति
चांतरं ॥ इत्युक्तो ब्रह्मणा सिंधु
रंगीचक्रे तदाक्रुधं ग्रहीतं वड
वा वक्त्रं शंभोस्त्राप्राक्य मप्परं ।
ततः प्रविष्टो जलधौ पावको
वाडवामुखः । वार्य्योघ विहृ
हृसंसज्ज्वालामालातिदीपितः
इति कालिकापुराणे ४१ अध्यायः
वडवाहृतः पुं पंचदशदासांत
र्गतदासविशेषः यथा भक्तदा
सश्चविज्ञेय स्तथैव वडवाहृतः
इति नारदः वाडवा दासी तल्लाभा
दंगीकृत दास्यः । इति दायक्र
मसंग्रहः ॥ क्वचित् वडवाभृ
तोवडवाहृतोःपि पाठः ॥
वडवाग्निः पुं समुद्रस्याग्निः ।
तत्पर्य्यायः सलिलेंधनः २ व
डवामुखः ३ काकधनः ४ वाणि
जः ५ स्कंदाग्निः ६ तृणधृक् ७ का
ष्ठधृक् ८ इति ॥ ॥

त्रिकाण्डशेषः ॥
वडवानलः पुं वडवाग्निः तत्प
र्य्यायः और्वः २ वाडवः ३ इत्यम
रः और्वस्य ऋषे रपत्यं और्वः स्मः
वडवायां विघ्नतोनावाडवः स्मः
वडवाया अनलो वाडवानलः
आधाराधेय भाव संबंधः पुरा
किल और्वेण मुनिना अयोनिजं पु
त्रमिच्छता चलो मथितं तत्र ज्वाला
मयः पुरुषो जातः स च समुद्रे
वडवामुखे अवस्थापितः । इति
पौराणिकाः इति तट्टीकायां भ
रतः ॥ तस्यविवरणं यथा और्व
र्वस्य तपसा विष्टा निवेश्यापाहं
ताशाने मममैकेनदर्भेणासत
स्य व्रतधारिणः । तस्मात् सहसा
भित्वा ज्वालामाली सुनिंदनः अ
गतो तहना कांतो त्रयोऽग्निः सम
पद्यते और्वस्याहं विनिर्भिद्य और्
वीं नामांतकोःनलः दिधक्षन्त्रि
व लोकांस्त्रीन् जज्ञे परमकोप
नः उत्पन्नमात्रश्चोवाच पितरं
दीनया गिरा क्षुधामे वाधतेतात
तज्जगद्धत्त्यजस्वमां ॥ त्रि
दिवारोहिभिर्ज्वालै र्जृंभमाणो दि
शो दश निर्दहन्सर्वभूतानि व
र्द्धयेसोःनकोःनलः पतसि ।

न्नंतरे ब्रह्मा मुनिमौर्व्वं समागतः उ
वाच वार्य्यतां पुत्रो जगतश्च दयां
कुरु अस्यापत्यस्य ते विप्र करिष्ये
स्थानमुत्तमं तथ्यमेतन्मम व
चः शृणुत्वं वदतां वर और्व्वउवा
च धन्योस्म्यनुगृहीतोस्मि य
न्मेद्य भगवान् शिशोः । मति
मेतां ददातीह परमानुग्रहाय
वै प्रभातकाले संप्राप्ते कांक्षि
तव्ये समागमे । भगवं स्तर्पितः
पुत्रः कैर्हव्यैः प्राप्स्यते सुखं कु
त्र वास्य निवासःस्याद्भोजनन्तु
किमात्मकं विधास्यतीह भगवा
न्वीर्य्यतुल्यं महौजसः ब्रह्मोवा
च वडवामुखेःस्य वसति समुद्रे
के भविष्यति । मम योनि र्जलं वि
प्र तत्रमेतोयदं मुखं अग्राहमासे
नियतं पिबन् वारिमयं हविः ॥
तद्धविस्तव पुत्रस्य विसृजाम्यान
यंस्मृतं ततो युगांते भूतानां मे
चवाहंच पुत्रक सहितो विचरि
ष्यावो निष्प्रणकरा विह पश्चा ।
ग्निरंतकाले न शालिलाशी मया
कृतः दहनः सर्वभूतानां सदेवा
सुर रक्षसां एवमस्त्विति तं सोग्निः
संहृतज्वालमंडलः । प्रविवेशा
र्णवमुखे विप्रनष्टांतर प्रभं ॥

इति मात्स्ये ५१ अध्यायः ॥
लंकाया दक्षिणे पृथिव्या अन्तर्थ्य
भाग रूप स्थान विशेषः इति सि
द्धांतशिरोमणिः ॥
वडवामुखः पुं वाडवानलः इति
हेमचंद्रः ॥
वडवासुतो पुं अश्विनीकुमारो य
था स्वर्वैद्यावश्विनी पुत्रावश्विनौव
डवासुतौ इति हेमचंद्रः ॥
वडवाहृतः पुं वडवाकृतः । पंच
दशदासांतर्गतदासविशेषः यथा
वडवा गृहदासी तया हृत स्तल्लोभे
न तामुद्वाह्य दासत्वेन प्रविष्टः ।
इति मिताक्षरा ॥
. . . . । इति कविकल्पद्रुमः
धणः पुं शाहः इत्यमरटीकायां
रमानाथः ॥
वणिक् पुं क्रयविक्रयकर्त्ता वाणि
ज्यकारकः तत्पर्य्यायः वैदेहकः
२ सार्थवाहः ३ नैगमः ४ वणिजः ५
पण्याजीवः ६ आपणिकः ७ क्रय
विक्रयिकः ८ इत्यमरः वैदेहः ९
विदेहः १० वाणिजः ११ वाणिजिकः १२
क्रयिकः १३ विक्रयिकः १४ ।
इति भरतादयः वाणिजकः १५ ।
वाणिज्यकारः १६ इति शब्दरत्ना
वली करणांतरं इति मेदिनी ॥

वैपण्यः इति राजनिर्घण्टः
वणिक् स्त्री वाणिज्य इतिमेदि
नी वणिग्बन्धुः पुं नीलीवृक्षः इति
शब्दचन्द्रिका ॥
वणिग्भावः पुं वाणिज्यं तत्पर्यायः
सत्यानृतं २। इत्यमरः ॥
वणिग्वहः पुं उष्ट्रः। इति शब्द
चन्द्रिका ॥
वणिजः पुं वणिक् इत्यमरः व।
वाद्येकादश करणान्तर्गत षष्ठकर
णं तज्जातफलं यथा प्रात्तः कृतज्ञो
गुणवान् गुणज्ञो वणिग्जन प्राप्त
मनोरथः स्यात् यस्यप्रसूतौ वणि
जाभिधाने भाप्रधाने हविर्णे।
हितस्य इतिकोष्ठीप्रदीपः।
वणिज्यं क्ली } वाणिज्य इत्यमर
वणिज्या स्त्री } भरतौ ॥
वद ० स्थैर्ये इतिकविकल्पद्रुमः
वदरं क्ली सेविफलं इति राजनि
र्घण्टः कार्पासफलं कोलि फलं
इति हेमचन्द्रः ॥ कोलिविशेषः
शेयोकोलि इति ख्यात ॥ व
दति स्थिरीभवति छिन्नस्यापि पुनः
प्ररोहणात् वदरं वृक्षफलेः पि।
क्लीव इति भरतः ॥ तत्पर्यायः
घोण्टा २। इत्यमरः ॥
गोपघोण्टा १ इति सभूतिः ॥

हस्तिकोलिः ४ गोपघोण्टी ५
वदरीच्छदा ६ स्रृगालकोलिः ७
कर्कन्धुः ८ इतिरत्नकोषः। अस्य
विवरणं कोलशब्दे द्रष्टव्यं ॥
वृहत्कोलिः तत्पर्यायः सौवीरं २
इतिरत्नमाला ॥ कोलिमात्रं।
तत्पर्यायः। कर्कन्धुः २ वदरी ३
कोलं ४ फेनिलं ५ कुवलं ६
घोण्टा ७ सौवीरं ८ अजाप्रिया ९
कुहा १० कोलिः ११ विषमः १२ भय
कंटकः १३ इति भावप्रकाशः ॥
सौवीरकः १४ गुडफलः १५ वाले
ष्टः १६ फलशैशिरः १७ दृढबीजः
वृत्तफलः १९ कंटकी २० वक्रकं
टकं २१ सुरसः २२ सुफलः २३ स्व
च्छः २४ अस्यगुणाः मधुरत्वं क
षायत्वं अम्लत्वंच परिपक्वस्य त
स्य गुणाः मधुराम्लत्वं। उष्णत्वं
कफकारित्वं पवनातिसार रक्तश्र
मदोषाग्निविनाशित्वं। रुच्यत्वंच
इति राजनिर्घण्टः राजवदर भूव
दर लघुवदराणां पर्याय गुणौ त
त्तत् शब्दे द्रष्टव्यौ॥ अथ वदर विशे
षाणां लक्षणानि गुणाश्च पच्यमा
नं सुमधुरं सौवीरं वदरं महत्।
सौवीरं वदरं शीतं भेदनं गुरु
लं हृहणं पित्तदाहास्र क्षयतृष्णा

निवारणं ॥ सौवीरालघु संप।
क्वं मधुरं कोल मुच्यते कोलंतु
वदरंग्राहिरुच्युष्णंचवातनुत्।
कफपित्तकरंचापि गुरुसारकमी
रितं कर्कन्धुः क्षुद्र वदरं कथितं पू
र्वसूरिभिः। अम्लं स्यात् क्षुद्र
वदरं कषायं मधुरं मनाक् ॥
स्निग्धं गुरु च तिक्तंच वात पित्ता
पहं स्मृतं। शुष्कं भेदग्निकृत् सर्वं
लघु तृष्णाक्लमास्रजित् इतिभा
वप्रकाशः। वदरः पुं कोलिवृक्षः
तत्पर्यायादिगुणाः। वदरस्य पत्र ले
पो ज्वर दाह विनाशनः। त्वचा।
विस्फोट शमनी वीजं नेत्रामया प
हं इति राजनिर्घण्टः ॥
अस्य पर्यायः फलगुणाश्च क्लीव
लिङ्ग वदर शब्दे द्रष्टव्याः ॥ देवस
र्षपवृक्षः। इतिराजनिर्घण्टः ॥
कार्पासास्थि। कापासेरविवि इति
भाषा। इतिमेदिनी। तत्र ग्रन्थस्य
वकारादिशब्द मध्ये गृहीतोऽयं ॥
वदरफली } स्त्री भूवदरी। इतिरा
वदरवल्ली } जनिर्घण्टः ॥
वदरा स्त्री वराहक्रान्तावृक्षः का।
र्पासीवृक्षः। इत्यमरः पलाप।
र्णी। इतिमेदिनी विस्रक्रान्ता ॥

इतिविश्वः ॥
वदरामलकं क्ली प्राचीनामलकं
इति हारावली ॥
वदरिः स्त्री कोलिवृक्षः इति शब्द
चन्द्रिका ॥
वदरिकाश्रमः पुं क्ली तीर्थविशे
षः स तु नारायणस्य व्यासस्य चाश्र
मः यथा नारायणो विभुर्विश्वः प्रा
प्तः पुरुषोत्तमः तस्यातियश
सः पुण्यां विशालां वदरीमनु।
आश्रमः ख्यायते पुण्य स्त्रिषु लोके
षु विश्रुतः उष्णतोयवहा गंगा
शीततोयवहा पुरा सुवर्णसिक
ता राजन् विशाला वदरी मनु।
ऋषयो यत्र देवाश्च महाभागा म
होजसः प्राप्य नित्य नमस्यंति ना
रायणमजं विभुं यत्र नारायणो
देवः परमात्मा सनातनः तत्र कृ
त्स्नं जगत् पार्थ तीर्थान्यायतना
नि च तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं
तत्तपोवनं ॥ तत् परं परमं देवं
भूतानां परमेश्वरं शाश्वतं परमं
चैव धातारं परमं पदं यं विदित्वा
न शोचन्ति विद्वांसः शास्त्रदृष्टयः
तत्र देवर्षयः सिद्धाः सर्वे चैव तपो
धनाः आदिदेवो महायोगी यत्रास्ते
मधुसूदनः ॥



पुण्यानामपि तत्पुण्यं तत्रते संप्रा।
योत्तमा॥ एतानि राजन् पुण्या
नि दृष्टिगो पृथिवीपते कीर्तिता
नि नरश्रेष्ठ तीर्थान्यायतनानि च
एतानि वसुभिः साध्यैरादित्यैर्म
रुद्भिः ऋषिभिर्ब्रह्मकल्पैश्च
सेवितानि महात्मभिः चरंश्चैता
नि कौंतेय सहितैर्ब्रह्मवादिभिः
भ्रातृभिश्च महाभागैरुत्कंठा
विहरिष्यसि इत्यारण्यके पर्वणि
धौम्यतीर्थयात्रायां ९२ अध्यायः
वदरी स्त्री कोलिवृक्षः इत्यमरः
कार्पासी इति शब्दरत्नावली॥
कपिकच्छुः इति राजनिर्घण्टः।
वदरीच्छदा स्त्री हस्तिकोलिवृक्षः
शंखनखी इति रत्नमाला॥
वदरीपत्रः पुं नखीनामगंधद्र
व्यं इति राजनिर्घण्टः॥
वदरीपत्रकं क्ली नखीनामगं।
धद्रव्यं इति जटाधरः॥
वदरीफला स्त्री नीलशेफालि
इति शब्दमाला॥
वदरीशैलः पुं हिमालयपर्व
तैकदेशः वदरीवनं वदरिका
श्रम इति च ख्यातः सत्रपीनगरा
ख्यदेशोऽलकनंदानदी पश्चिमतो
रेवर्तते इति पुराणान्तरं॥

वद्धं त्रि वद्धनयुक्तं वाँधा इति
भाषा तत्पर्यायः संदानितं २
मूतं ३ उद्धितं ४ संदितं ५ सितं ६
इत्यमरः॥ निगडितं ७ नद्धं ८ की
लितं ९ यंत्रितं १० संयतं ११। इ
ति हेमचंद्रः॥
वद्धगुदं क्ली उदररोगविशेषः॥
तस्य निदानं यथा यस्यांत्रमन्नैरुप
लेपिभिर्वा वालाश्मभिर्वा पिहि
तं यथा वत् संचीयते तस्य मलः
सदोषात् शनैः शनैः संकर वच्च
नाड्यां निरुध्यते तस्य गुदे शरीर
निरेति कृच्छ्रादपि चाल्पमल्पं।
हृन्नाभिमध्ये परिवृद्धमेति तस्योद
रं वद्धगुदं वदंति॥ इति माधवकरः
तस्य चिकित्सा यथा स्निग्धस्विन्नस्या
भ्यक्तस्याधोनाभेर्वामतश्चतुरंगुल
मपहाय रोमराज्यादुदरं पाटयित्वा
चतुरंगुलप्रमाणमंत्राणि निष्कृष्य
निरीक्ष्य वद्धगुदस्यांत्रप्रतिरोधकर
मश्मानं वालं वापोह्य मलजातं वा
ततो मधुसर्पिभ्यामभ्यज्यांत्राणि॥
यथा स्थाने स्थापयित्वा वास्यव्रण
मुदरस्य सीव्येत् हितग्रीयोक्तेन।
विधानेन च रोपयेत्॥ :०: ॥
इति सुश्रुतः॥ ॥

वद्धशिखि क्ली वद्धप्राणिः मुष्टिः इति
पुराणान्तरं। वद्धाप्पी तिचपाठः॥
वद्धफलः पुं करंजवृक्षः इति रा
जनिर्घण्टः॥
वद्धमूलं त्रि दृढमूलं उत्पाटना
नर्हमूलं यथा त्वयाविप्रकृतश्चैद्य
रुक्मिणीं हरता हरे। वद्धमूलस्य
मूलं हि महद्वैरतरोः स्त्रियः॥
इति माघद्वितीयसर्गः॥
वद्धमुष्टिः त्रि दृढमुष्टिः कृपणः
यथा स्वजीवमप्यर्थिमुदे ददज्ज
स्तव त्रपा निहंश वद्धमुष्टेः इति
नैषधतृतीयसर्गः॥
वद्धरसालः पुं त्रिविधराजाम्रान्त
र्गताम्रमाम्रः तत्पर्यायः च
क्रतलाम्रः २ मधाम्रः ३ सितजा
म्रकः ४ वनेज्यः ५ मन्मथानंदः
६ मदनेच्छाफलः ७। तस्य कोम
लफलगुणाः कटुत्वं अम्लत्वं पित्त
दाहदत्वं च तस्य सुपक्वफलगुणाः
स्वादुत्वं मधुरत्वं पुष्टिवीर्यवलप्रद
त्वं च इति राजनिर्घण्टः॥
वद्धशिखः त्रि शिशुः इति मेदिनी।
शिखावंधनविशिष्टः यथा सदोप
वीतिना भाव्यं सदा वद्धशिखेन त वि
शिखो व्युपवीतश्च यत्करोति न तत्
कृतं इति प्रायश्चित्त॥ ॥

तत्त्वसूत वचनं॥
वद्धशिखा स्त्री उच्चटा इति मेदिनी
सम्बद्धकेशाश्च॥
वध ङ निंदे वंधे इति कविकल्प
द्रुमः॥
वध क वंधे। इति कविकल्पद्रुमः
वधः पुं प्राणवियोगफलकव्यापा
रः तत्पर्यायः प्रमापणं २ निव
र्हणं ३ निकारणं ४ निशारणं ५
प्रवासनं ६ परासनं ७ निषूदनं ८
हिंसनं निर्वासनं १० संज्ञपनं ११
निर्ग्रंथनं १२ अपासनं १३ निस्तर्ह
णं १४ निहननं १५ क्षणनं १६॥
परिवर्जनं १७ निर्वापणं १८ विश
सनं १९ मारणं २० प्रतिघातनं २१
उद्वासनं २२ प्रमथनं २३ क्रथनं
२४ उज्जासनं २५ आलम्भः २६॥
पिंजः २७ विशरः। २८ घातः। २९
उन्मंथः ३०। इत्यमरः। हिंसा ३१
घातनं ३२ विदारणं ३३ पिंजनं ३४
पातः ३५ परिघः ३६ परिघातनं
३७ कदनं ३८ निवारणं ३९ समा
घातः ४० निर्गंथनं ४१ मारिः ४२ मा
री ४३ उत्पातः ४४ मारकः ४५ म
रकः ४६ मारः ४७ संघातः ४८
इति शब्दरत्नावली। पुण्यपदं
वधो यथा एकस्य यत्र निधने प्रहेत



दुष्टकारिणः बहूनां भवति क्षेमं
तस्य पुण्यप्रदो वधः एकस्मिन्यौ ह
तापश्च ब्रह्महा गुरुतल्पगः आ
त्मानं घातये यस्तु तस्य पुण्यप्रदो
वधः इति कालिकापुराणे ८४ अध्या
यः अपि च कथं न स्त्रीवधं कुर्य्यां
महापातकिनामपि स्त्रीवधेन म
हापापं यथा ब्रह्मवधे मते इति
रामवचः श्रुत्वा विश्वामित्रस्तमाह
वै यस्मात्त्वत्कृतो माऽसान्न विद्यते
पि वजन्मनः न पापं विद्यते तेन
न दोषोऽत्र पतेदत्र यस्मात्तु ति
धनाद्राम जनाः सर्वः सुखिनो भ
वेः भवंति सततं तेन तस्मात्तस्याः पुण्य
प्रदो वधः इत्यग्निपुराणं ॥
अपि च नैकस्यार्थे बहून् हन्यादिति
शास्त्रेषु निश्चयः एकं हत्वा बहू
नां हित पापी नैव जायते इति।
वामनपुराणे ५५ अध्यायः ॥
नाततायि वधे दोषो हंतु भवति
कश्चन इति गीताटीकायां स्वामी
पापजनकवधः प्रायश्चित्तशब्दे
द्रष्टव्यः ॥ वधवधो पूर्वकर्म
वशेन यथा न कश्चित्कस्यचित्केना
पि वध्यते हन्यते पिबा वध बधो
पूर्वकर्म वशेनात्र पतिनंदन ॥
इति वामनपुराणे ६२ अध्यायः

पारिभाविक वधो यथा वपनं द्र
विणादानं देशान्निर्यापनं तथा
एष हि ब्रह्मबंधूनां वधो नान्यो
स्ति दैहिकः इति महाभारते सौ
प्तिकपर्व ॥
वधकः पु वधकर्त्ता इति सिद्धांत
कौमद्यामुणादिवृत्तिः। हिंस्रः
व्याधिः मृत्युः इति संक्षिप्तसारोणा
दिवृत्तिः ॥
वधत्रं क्ली अस्त्रं इत्युणादिकोषः
वधस्थली स्त्री प्राणिवधस्थलं म
शान इति भाषा। तत्पर्य्यायः आ
घातः २ इति त्रिकाण्डशेषः प्रधा
नः ३ वधस्थानं ४ इति शब्दरत्नाव
ली आघातनं ५ इति हारावली ॥
वध्यानं क्ली वधस्थली इति हारा
वली ॥
वधांगकं क्ली कारावेश्म इति
त्रिकाण्डशेषः ॥
वधार्हः त्रि वध्य हननयोग्यः यथा
बृहस्पतिः वधार्हः सुवर्णस्तेने द
मेदाप्यस्तु शूद्रकः अंगच्छेदार्हकस्त
द्वैसदशाद्दं स्तदह्नके मत्स्यशाद्दं
द्वांगुलि तर्जन्योश्छेदः इति प्राय
श्चित्तविवेकः ॥
वधिरः त्रि श्रवणेंद्रियरहितः श्रु
तिशक्तिहीनः काला इति भाषा ॥

तत्पर्य्यायः एडः २ इत्यमरः ॥
कल्लः ३ श्रवणापटुः ४ इति श
ब्दरत्नावली ॥ उच्चैः श्रवाः ५।
इति संक्षिप्तसारोणादिवृत्तिः वा
धिर्य्यनिदानं यथा यदा शब्दवह
वायुः श्रोतस्यावृत्य तिष्ठति। शुद्धः
श्लेष्मान्वितो वापि वाधिर्य्यं तेन
जायते इति माधवकरः ॥ अस्य
थ वाधिर्य्यमाह। वाधिर्य्यं बाल
वृद्धोत्थं चिरोत्थंच विवर्जयेत् ॥
इति भावप्रकाशः ॥ अस्यौषधं।
कर्णशूले कर्णनादे वाधिर्य्ये क्ष्वे
डे एव च चतुर्ष्वपि च रोगेषु सामा
न्यं भेषजं स्मृतं ॥ शृंगवेरंच म
धु च सैंधवं तैलमेव च। कदु
ष्णं कर्णयो र्धार्य्यमेतत् स्यादुद
नापहं १॥ कर्णशूले कर्णनादे वा
धिर्य्ये क्ष्वेडएवच पूरणं कटु तैल
न हितं वातघ्नमौषधं २॥ शिख
रिकारजवारितक्षारेतकल्केन सा
धितं तैलं। अपहरति कर्णनादं
वाधिर्य्यं चापि पूरणात्। शिखरी।
अपामार्गः ३ गवां मूत्रेण बिल्वानि
पिष्ट्वा तैलं विपाचयेत्। सजलंच स
दुग्धंच तद्वाधिर्य्यहरं परं ॥ क्षीरम।
जाजं ग्राह्यं। बिल्वतैलं ४ इति।
भावप्रकाशः ॥

शुष्कमूलकशुंठीनां क्षारो हिंगुलना
गरं शुष्कं चतुर्गुणं दद्यात्तैलमेतत् वि
पाचयेत् ॥ वाधिर्य्यं कर्णशूलंच प
यस्त्रावश्च कर्णयोः क्रिमयश्च विन
श्यन्ति तैलस्यास्य प्रपूरणात् ५॥
इति गारुडे १९७ अध्यायः ॥
वधी त्रि वधकर्त्ता प्राणवियोगफल
कव्यापारो वधः तन्निष्पादकत्वंच।
साक्षात् परस्परोदासीनं स्मृतिकार
परिगणितं वधित्वं। तच्च पंचविधं
स्मृति स्वरसात् कर्त्ता प्रयोजकोऽनु
मंताऽनुग्राहको निमित्तीचेति ॥
तत्रांतरव्यापाराव्यवधानेन वध
साधकः कर्त्ता। १। यः कर्त्तारं का
रयति प्रयोजकः २ स च द्विविधः
एकः स्वतोऽप्रवृत्तमेव प्रवर्त्तयति।
वेतनादिना प्रेरयति। अपरः स्व
तः प्रवृत्तमेव मंत्रोपायोपदेशादि
नाधीनं साहययति ॥ अनुमतिदा
ताऽनुमंता ३ अनुमतिश्च द्विविधा
एका यद्विरोधाद्धननं न भवति।
तस्य विरोधिनो मया निरोधः क
र्त्तव्य इति प्रयुक्तिरनुमतिः अपरा
यत्र हन्मीति वचने शक्तस्याप्रति
षेध एव ॥ अनुग्राहकोपि द्वि
विधः एको वध्यप्रतिरोधकः अ
परः स्वल्पसहकर्त्ता ४ ॥

उद्देश्यत्वे सति हन्तृमिच्छन् पातको ।
निमित्ती ५ अत्र प्रयोजकस्य कर्तृप्र
युक्तिद्वारेणैव वधकारणत्वं । अ
नुमन्तुश्च हन्तुर्निर्भयत्वेन दृढतर
प्रहारोत्पत्तिद्वारेण ॥ अनुग्राहक
स्य पलायनाद्यसंभवेन हननीय
स्यैर्थ्यं कुर्वतः प्रहारसौकर्योत्प
त्ति द्वारेण वा कारणत्वं । निमित्ति
नो हन्तृमन्युत्पादनद्वारेणेति ॥
प्रयोजकादीनां चतुर्णां अवशिष्टे ।
न हननकारणानामेवान्तर भे
दाभेदः अतः पंचविधं वधित्वं
इति प्रायश्चित्तविवेकः ॥
वधू स्त्री नारी स्नुषा स्नुषा इ
त्यमरः शारिवौषधिः स्पृक्का ।
वा स्त्री भार्य्या इति मेदिनी ॥
भरतेन पवर्गीयवकारादिर्वध
धातुना निष्पादितोऽयं मेदिनी
कारेणान्तःस्थवकारादिशब्द
मध्ये संगृहीतः ॥ अथ नववधू
द्विरागमनयात्रा तत्राष्टमदश
मद्वादश षष्ठचतुर्थवर्षाणि विषि
द्धानि मासाः मार्गशीर्षफाल्गुन
वैशाखा विहिताः पक्षः शुक्लः ।
पुष्यस्वातीहस्ता धनिष्ठाश्रवणाश्विन्यु
त्तरफल्गुन्युत्तराषाढोत्तरभाद्ररेवती मृग
शिरोरोहिणीपुनर्वसु एतेषां प
ञ्चदश नक्षत्राणि ॥

विहितानि सोमबुधबृहस्पति
शुक्राणां वारा विहिताः तिथयो
यात्राप्रकरणोक्ताः चंद्रतारा
शुद्धौ कालशुद्धौ अहस्पर्शवा
रवेला दिक्शूलादीन् परित्यज्य
कर्मेव्या [illegible] ज्योतिषं । कृत्वेपा
णिग्रहे गत्वा पितुः पतिगृहं
प्रति पुनरागमने वधास्तद्वि
रागमनं यदि तदा सर्वमिदं
चिंत्यं [illegible] युग्माब्दे विचक्षणैः ।
भुक्ता पितृगृहे नारी भंक्ते स्वामि
गृहे यदि दौर्भाग्यं जायते तस्याः
प्राप्नोति कुलनायिका ॥ इति ।
ज्योतिस्तत्त्वं ॥
वधूजनः पुं वधूः इति त्रिकाण्ड
शेषः ॥
वधूटिः } स्त्री पुत्रभार्य्या इति भ
वधूटी } रतरत्नकोषः अ
ल्पा वधूः यथा नूतनजलधररुच
ये गोपवधूटीदुकूलचौराय । त
स्मै नमः कृष्णाय संसारमहीरु
हस्य बीजाय इति भाषापरिच्छेदः ॥
वधूत्सवप्रसवः पुं रक्ताम्लानः
इति राजनिर्घण्टः ॥
वधोद्यतः त्रि परवधायोद्युक्तः
तत्पर्य्यायः ॥
सन्नद्धः २ आततायी ॥

३ इत्यमरः आततायि वधापवा
दमाह बृहस्पतिः नाततायिवधे
हन्ता प्राप्नुयात् किल्बिषं क्वचित्
विनाशार्थिन मायान्तं घातयन्ना
पराप्नुयात् कात्यायनः आतता
यिनमायान्तमपि वेदान्तपारगं जि
घांसन्तं जिघांसीयात् न तेन ब्रह्म
हा भवेत् ॥ जिघांसीमन्तरेयात्
गच्छेदित्यर्थः देवलः उद्यम्य शस्त्र
मायान्तं भ्रूणमप्याततायिनं । नि
हत्य भ्रूणहा न स्यादहत्वा भ्रूणहा
भवेत् भ्रूणो ब्राह्मणविशेषः दो
षदर्शने नियमार्थं मनुविष्णू ।
गुरुं वा बालवृद्धौ वा ब्राह्मणं वाव
हुश्रुतं । आततायिनमायान्तं ह
न्यादेवाविचारयन् ॥ एवकारोऽनि
यमार्थः तथा नाततायिवधे दोषो
हन्तुर्भवति कश्चन प्रकाशं वाप्रका
शं वा मन्युस्तन्मन्युमृच्छति । यस्मा
द्धन्तुर्मन्युर्हन्यमानमन्युनाशयति
न पुनः पुरुषो हन्तीति हन्यते वेति
हननविधेरपवादः । आततायि
नमाह वशिष्ठः । अग्निदो गरदश्चै
व शस्त्रपाणिर्धनापहः क्षेत्रदाराप
हारी च षडेते आततायिनः विष्णु ।
कात्यायनौ । उद्यतासिर्विषाग्निश्च
शापोद्यतकरं ॥ [illegible] ॥

तथा आथर्वणेन हन्तारं पिशुनं चै
व राजसु भार्य्यातिक्रामिणं चैव वि
द्यात् सप्ताततायिनः यशोवृत्ति
हरानन्यानाहुर्धर्मार्थहारकान् ॥
विशेषमाह कात्यायनः । अनातता
यिना पूर्वो यः स्वापराधे प्रवर्त्तिते ।
प्राणद्रव्यापहारे च प्रहृतस्याततायि
ता अनाततायिनोऽनपकृतः ।
तेन पूर्वकृतापराधस्य मारणोद्यत
स्याततायिता । एतेन सत्यपका
रिवधे दोष एव । ननु आततायिनो
ऽपि गोब्राह्मणयो हनने दोषमा
ह सुमन्तुः । आततायिवधे न
न्यत्र गोब्राह्मणात् यदाहन्यात्
प्रायश्चित्तं कुर्य्यात् । तथा भविष्य
त्पुराणमपि गोविप्रमहत्वा ह्येकदा
चन । अतः पूर्ववचनविरोधः ।
अत्र व्यवस्थामाह कात्यायनः आ
ततायिनि चोत्कृष्टे तपःस्वाध्या
यजन्मतः । वधस्तत्र तु नैव स्यात्
पापे हीने वधो भृगुः जन्मपदेन
जातिकुलं चोच्यते तेन हन्त्रपेक्षया
तपो विद्या जाति कुलैरुत्कृष्टो
नाततायी वध्यः तदन्यो वध्य एव
भगवद्गीतायामाह पापमेवाश्र
येदस्मान् हत्वैतानाततायिन इति
एतान् भीष्मादीनन्तेतान् कृष्णा

निमर्थः एवंभूतानततायिनश्चाहन
ने फलमप्याह बृहस्पतिः । आत
तायिन मुत्कृष्टं हन्तस्वाध्यायसंयु
तं योनहन्याद्वधमाप्नोसोऽश्वमेध ।
फलं लभेत् यद्यपि गुरुं वकृष्कृतं
हन्यादिनिष्कृयतेनेनष्यापिगुरोः स
काशात् ऊलविद्या तपोभिः शि
ष्यस्याप्युत् कर्षसंभवादेवं वकृ
ष्कृतादपि एवमधम वर्णस्य उत्त
मवर्णेनवध्यः स्त्रीपराधकृतवि
षयेवा समंत वचनं गौराननाय
यिन वध्यः । नविनांश्रृंगीणांचैव
दंष्ट्रिणांचाननतायिनां हत्याषानां
तथान्येषां वधेहंता नदोषदाग्नि
तिकात्यायनवचनं गो व ति
रिक्तश्रृंगिविषयं विशेषमाह
कात्यायनः उद्यतानांतपापानां
हंतदोषोनविद्यते निवृत्तास्तु
यदारंभाद्ग्रहणेनवधः स्मृतः ॥
इति प्रायश्चित्तविवेकः ॥
वध्यः त्रि वधार्हः । तत्पर्यायः
शीर्षच्छेद्यः २ इत्यमरः । किं
तथान कृते लोके अवध्याः शा
स्त्रयोषितः हीनवर्णोपभुक्तायां
त्याज्यावध्यापिवाभवेत् ॥ इतिप्रा
यश्चित्ततत्वं अवध्या यथा गोब्रा
ह्मणहृद्धमप्यापिस्त्रंभं बालंस्व ।

वंधु ललनां सद्दृष्टां कृतापराधा
नपि नैव वध्यादाचार्यमथवागु
रवस्तथैव इतिवामनपुराणे ५५
अध्यायः ॥
वध्यपालः पुं कारागृहरक्षकः य
था साधी विक्रयकृद्वध्यपालः
केशादिविक्रयी तथैलोहतपचा
ते यश्चभक्तं परिवर्जयेत् ॥ इति वि
ष्णुपुराणे २ अंशे ६ अध्यायः ॥
वध्रं क्ली सीसकं इत्यमरः वध्रमि
ति पठति स्वामी ॥
वध्री स्त्री चर्मरज्जुः इत्यमरः वध्री
हिरेफेति केचित् वद्ध्री चर्म बंधे
भवा वार्द्ध्री दीर्घादि ति हद्दुः
वन २ उ उ. याचने इति कविक
ल्पद्रुमः ॥
वंथ ऊ ग वंधे इति कविकल्पद्रुमः
वंथ क वंधे इति कविकल्पद्रुमः ॥
वंधः पुं आधिः । वंधनं इतिमेदि
नी शरीरे इतिहेमचंद्रः ॥
गृहादिवेष्टनं इतिशब्दरत्नावली
नहिवरणं यथा । नृपाष्टकैर्विनि
हतो भवनस्य वंधः कर्तःस्वमा,
दा मिह युगम शरेकनिघ्नं । एकी
कृतं रस निशाकर युगम भक्त ।
शेषं ततो भवति पिण्डपदं ॥
गृहस्य ॥ गृहभूमि समाहत ॥

पिण्डपदं वसुलोचन रंध्रगजैर्गु
णितं रवि भूधर त्रिंशद्योगहृतमा
यव्यय स्थिति ऋक्षपदं ॥ नृपा
ष्टकै रेकाशीत्या विनिहतः प
रितः भवनस्य वंधः दीर्घप्रस्तार
मिलितहस्ताः स्वमृदंनत् सं
ख्यानयुगमशरैकनिघ्ने द्विपंचाश
दुत्तरशतत्रयरितेएकीकृत पूर्वोक्ते
नमिलितेरसनिशाकरयुगमभक्ते
शेषं षोडशाधिक द्विशत हतावं
शिष्टतत् संख्यानं पिण्डपद सं
ज्ञंगृहस्य भवति तद्गृह भूमिसमा
हृतपिण्डपदंवसुलोचनरंध्रगजैः
अष्टद्विनवाष्टभिर्यथाक्रमंगुणि
तं पृथिते यथाक्रमं रवि भूधर त्रिं
शद्योगहृतं द्वादशसप्तत्रिंशत्
सप्तविंशतिभिः हृतं गृहस्य यथा
क्रममाय व्ययस्थितिऋक्षपदं भव
तीत्यर्थः रुद्रहस्तमितवंधभरण्या
योगतो यथा । आयादयो भवंत्यत्र
वसुषट्तिथि षुमिताः अत्र नत्वे
दीयते पश्चात् देवायाति । अन्यक्
दक्षिणायो भेद्विविणघे विदित्व द
हतादि पूर्वोत्तरयो गृहयो रुभि ।
त्यादि भाति सुः । यत्र तु षोषा ।
नास्ति तत्र हारकांकः शेषः शेषा
केनफलेवाप्येशेषाभावे ॥

तद्धारकात् अंकादेवफलंवोध्यमि
ति तंत्रविदांमत मित्युक्तत्वात् ख
याधिकं तत्कर्मबंधगृह मायाधिकं
शुभं इति ज्योतिस्तत्वं ॥
षोडश प्रकारा रतिवंधा यथा प
द्मासनोनागपदोलतावेष्टोऽर्द्धसं
पुटः कुलिशं सुंदरश्चैव तथाके
शरएव च । हिंदोलोनरसिंहोपि
विपरीतस्तथापरः क्षुब्धोवेधनक
श्चैव समुत्कंठ स्ततः परं । सिंह
सनो रतिनागो विद्याधरस्तु षोड
इतिरतिमंजरी ॥ एतेषां लक्षणा
नि तत्तत् शब्दे द्रष्टव्यानि संख्याप्र
भेदेनग्रन्थान्तरे पि वद्धास्ति । यथा ।
कामप्रदो विपवीजनागरो रति
पाशकः केयूवःसीयतोपश्च
ततः समपदस्तथा ततश्चैकप
दो ज्ञेयः सस्फुट श्चार्द्धसंपुटः ।
ततः स्तनभवश्चैव नतो नुरतिसुं
दरः कूर्मपीडुस्मरचक्रोतनश्चा
स्ततक्रमः स्मृतः । वेष्टकोहंसकी
लस्तु ततो लीला समस्तथा अ
ष्टादशाक्रमाद्वंधाः स्त्रीणां वकृ
स्त्र्यवमदाः पुंसांस्तावकाश्चैव
कथितास्तुक्रमागतः इतिस्मर
दीपिका अनभिसंधित कर्मकं तं
वंधाभावो यथा पंचाग्निदानेरक्षभं



नुयते: नभिसंधितैः फलैस्तथोप
भोगैश्च पूर्वकर्मशुभाशुभैः एवं
तबंधो भवति जर्वतः कारणं विना
नच बंधाय तत् कर्म भवत्यनभि
संधितं इति मार्कण्डेयपुराणं ॥
बंधकं क्ली ऋणाय स्थापितवस्तु
बंधा इति भाषा इति व्याधिशब्दत्ना
नार्थे अमरः इदानीं व्याधि निरू।
प्यते व्याधिर्नाम गृहीतस्य द्रव्यस्य
परिविश्वासार्थमधमर्णेनोत्तमर्णे
ऽधिक्रियते आधीयत इत्याधिः।
सच द्विधैव कृतकालोऽकृतका
लश्च। पुनश्चैकैकशो द्विविधः
गोप्यो भोग्यश्च यथाह- रदः।
अधिक्रियत इत्याधिः सविज्ञेयो
विलक्षणः कृतकालः पनेयश्च
यावद्देयोद्यतस्तथा ॥ सपुनर्द्वि
विधः प्रोक्तो गोप्यो भोग्यस्तथैव
चेति कृते काले आधान काल
एवामुस्मिन्काले दीयेत सवा
दी मयायमाधिर्मोक्तव्यः स्या।
द्या तवैवाधि र्भविष्यतीत्येवं नि
रूपिते काले पनेयः आत्मस
मीपे नेतव्यो मोचनीय इत्यर्थः
देयं दानं देय मनतिक्रम्य या
वद्देयं उद्यतो नियतः स्थापित
इत्यर्थः यावद्देयं उद्यतो यावद्दे।

योद्यतः गृहीतधनप्रत्यर्पणावधि
रनिरूपितकाल इत्यर्थः गोप्ये
रक्षणीयः एवं चतुर्विधस्याधे र्वि
शेषमाह व्यासः आधिःप्रणश्येत् द्विगुणे
धने यदि न मोच्यते काले काल।
कृतो न श्येत फलभोग्यो न नश्यति
प्रयुक्ते धने स्वकृतया वृद्ध्या काल
क्रमेण द्विगुणीभूते यद्याधिरधम
र्णेन द्रव्यदानेन मोच्यते तदा नश्ये
त्तधमर्णस्य धनप्रयोक्तुः स्वं भवति
काल कृतः कृतकालः आहिता
आदिपाठात् काल शब्दस्य पूर्वनि
पातस्तत्र काले निरूपिते आमे नश्ये
द्द्वैगुण्यपात् प्रागूर्द्ध्वं वा फलभोग्यः
फलं भोग्यं यस्यासौ फलभोग्यः दे
वारामादिः सन कदाचिदपि न
श्यति। कृतकालस्य गोप्यस्य
भोग्यस्य च तत् कालातिक्रमेणा
श उक्तः काले काल कृतो नश्ये
दिति अकृतकालभोग्यस्य नाशा
भाव उक्तः फलभोग्यो न नश्यतीति
पारिशेष्यादाधिः प्रणश्येद्विगुणे
दकृत काल गोप्याधिविषय मव
तिष्ठते द्वैगुण्याभिक्रमे निरूपित
कालातिक्रमेण च विनाशे चतुर्द
श दिवसप्रतीक्षणं कर्त्तव्यं बृहस्प
ति वचनात् हिरण्ये द्विगुणे ॥

आह। तत्काल कृत मूल्यो वा तत्
त्रतिष्ठेद्वृद्धिकं नस्मिन्काले
यत्रस्याधेर्मूल्येन तत् परिकल्पनेन
बधनिनिर्तमाधिं वृद्धिरहितं स्थाप
येत् ततऊर्द्धं धनेवृद्धे याबद्धनी
धने गृहीत्वा तमाधिं मुंचेति याव
द्वा तन्मूल्य द्रव्यमर्पितेन प्रवेशय
ति यदा तु द्विगुणी भूतेनापि धने
द्विगुणं धनमेव गृहीतव्यं नत्वाधि
नाश इति विचारितम्मूलं ग्रहणं।
काल एव तदा द्विगुणी भूते द्रव्ये
असन्निहिते वाधमर्णे धनिना किं
कर्त्तव्य मित्यत आह। विना धार
णकाद्वापि विक्रीणीत ससाक्षि
कं। धारणकादधमर्णाद्विनाप्य
धमर्णे असन्निहिते साक्षिभिस्तदा
प्तैश्च सहतमाधिं विक्रीय तद्धनं गृ
ह्णीयाद्धनी वा शाह्यो वा स्थितविक
ल्पार्थः यद्दर्णं ग्रहणं काले द्विगु।
णीभूतेपि धनेधनमेव ग्रहीतव्यं न
त्वाधि नाश इति न विचारितं तदा
आधिः प्रणश्येद्द्विगुण इत्यस्याधि
नाशः विचारितत्वेपथ इति। भो
ग्याधौ विशेषमाह यदा तु द्विगुणी
भूतमणमाधौ तदा खलु मोक्ष आधि
स्तत्रत्पत्रे प्रविष्टे द्विगुणे धने। यदा
प्रयुक्ते धने स्वकृतया वृद्ध्या द्विगुणीभू
ते तदाधौ कृते तद्गत् पत्रे ॥ ।

आधमुत् पत्रे द्विगुणे धनिनः प्रवि
ष्टे धनिना धिर्मोक्तव्यः यदि वादा
वेवाधौ दत्ते द्विगुणीभूते द्रव्ये त
याधि र्मोक्तव्य इतिपरिभाषया का
रणांतरेण वा भोगाभावेन तदा
द्विगुणीभूत मृणं तदाधौ भोगा
र्थं धनिनि प्रविष्टे तद्गत पत्रे द्व्ये
द्विगुणे सत्याधि र्मोक्तव्यः आधिको
पभोगे तदपि देयं। सर्वथा सह
द्विक मूल्यर्णापाकरणार्थोपयुप
भोगविषय मिदं वचनं नेमनेत्त
यामाचक्षते लौकिकाः यत्र तु
वृद्ध्यर्थ एवाध्याभाग इतिपरि
भाषा तत्र द्वैगुण्यातिक्रमेपि या
वन्मूल्य – नैतावद्भुपभुक्ते एवा
पिं एतदेवं लीष्टीकृतं बृहस्पति
ना ऋणी बंध : मयात् फल
भोगं पूर्णकालं दत्वाद्रव्यंच सा
मकं यदि प्रकर्षितं तत्स्यात्तदा
न धनभागधनी। ऋणी च न लभे
द्बंधं परस्परमतं विनेति अस्यार्थः
फलं भोग्यं यस्यासौ फलभोग्यः
बंधआधिः सच द्विविधः सवृद्धि
कमूल्यापाकरणार्थो वृद्धि मा
त्रापाकरणार्थश्च तत्रैव वृद्धिमू
ल्यापाकरणार्थं बंधं पूर्णकाले
पूर्णः कालो यस्यासौ पूर्णकाल
स्तमाम्नयाहार्णि यदा सवृद्धिकं।

मल्यंकलाह्वारेणाधनिनः प्रविष्ट
न्तदा बंधमवाप्नुयादित्यर्थः वृद्धि
मात्रापाकरणार्थं तु बंधं सामकं
दत्वाप्नुयादणी समं मूल्यं सममेव
सामकं अस्यापवादमाह यदि प्र
कर्षितं तत्स्यात्तद्बंधकं प्रकर्षितं
मतिशायितं वृद्धेरभ्यधिक फलं
यदि स्यात्तदा न धनभाग्धनी सा
मकं न लभेद्बंधं मूल्यमदत्वैवर्णी
बंधमवाप्नुयादिति यावत् अथाप्र
कर्षितं तद्बंधकं वृद्धयेणापर्याप्तम
स्तदा सामकं दत्वापि बंधं लभेता
धमर्णः वृद्धिशेष मदत्वैव लभेते
त्यर्थः पुनरुभयत्रापवादमाह
परस्परमतत्त्विनात्रुभमर्णाधम
र्णयोपरस्परवानुमत्याभावे यदि
प्रकर्षितं मित्याप्युक्तं परस्परा
नुमतौ तु तत्कृष्टमपि बंधकं यथा
मूल्यदानं तावद्रुपभुंक्ते धनी नि
कृष्टमपि मूलमात्रदानेनैवाधम
र्णो लभते इति मिताक्षरा ॥

बंधकः पुं विनिमयः इति विश्व
मेदिन्यौ आधिः इति शब्दरत्ना
वली ॥ रतहिण्डकः । इति ।
नानार्थरत्नमाला ॥

बंधकी स्त्री पुंश्चली इत्यमरः
स्वैरी ॥ इति मेदिनी हेमच
न्द्रौ ॥

पंचपुरुषगामिनी इति महा
भारते आदिपर्व ॥

बंधनं क्ली बंधनक्रिया बाँधा इ
ति भाषा । तत्पर्यायः उद्दानं २
इत्यमरः कंकनं ३ बंधः ४ सं
यमनं ५ इति शब्दरत्नावली ।
बधः इति मेदिनी हिंसा इति
शब्दरत्नावली रज्जुः इति हेम
चंद्रः बध्यते ऽनेनेति करण
ल्युट् पाशः त्रि ॥

बंधनवेश्म क्ली कारागारं इति
हारावली ॥

बंधनालयः पुं कारागारं इत्यम
रः ॥

बंधनस्तंभः पुं हस्तिबंधनस्तंभः
तत्पर्यायः आलानं २ इत्यमरः ॥
शंकुः ३ अर्द्धोरुः ४ इति शब्द र
त्नावली ॥

बंधित्रं क्ली कामदेवः इत्युणादि ।
कोषः चर्मव्यजनं इति संक्षिप्तसा
रोणादिवृत्तिः ॥

बंधुः पुं स्नेहेन मनो बध्नाति यः
तत्पर्यायः सगोत्रः २ बांधवः ३
ज्ञातिः ४ स्वः ५ स्वजनः ६ इत्यम
रः दायादः ७ गोत्रः ८ इति श
ब्दरत्नावली बंधवस्त्रिविधाः ।
आत्मबंधवः पितृबंधवो मा
तृ ॥ ॥

भूतेद्धर्णे काले कृतावधौ बंधक
स्य धनी स्वामी द्विसमाहं प्रतीक्ष्य
च तदंतराधनं दत्वा ऋणी बंध
मवाप्नुयादिति किंच गोप्याधि ।
भोगतो वृद्धिः सोपकारेऽथ हापि
ते नष्टो देयो विनष्टश्च दैवराजकृ
ताहते गोप्याधेस्ताम्रकटाहादेरु
पभोगेन वृद्धिर्भवति अल्पेऽप्युप
भोगे महत्यपि वृद्धिर्हातव्या सम
समयातिक्रमात् तथा सोपका-
रेऽप्युपकारकारिणि बलीवर्दताम्र
कटाहादौ भोग्याधौ सवृद्धिके हा
पिते हानिं व्यवहारात्तमत्वं गमि
तेनो वृद्धिरिति संबंधः नष्टोवि
कृतिं गतस्ताम्रकटाहादिश्छिद्र
भे... दिना पूर्ववत् कृत्वा देयः तत्र
गोप्याधिर्नष्टश्चेत् पूर्ववत् कृत्वा
देयः उपभुक्तोऽपि चेत् वृद्धिरपि हा
तव्या भोग्याधिर्यदि नष्टस्तदा पूर्वव
त् कृत्वा देयः वृद्धिसद्भावे वृद्धिर्वा
हातव्या । विनष्ट आत्यंतिकं नाशं
प्राप्तः सोपि देयो मूल्यादिद्वारेण ।
तद्दाने सवृद्धिकं मूल्यं लभते यदि
न ददाति तदा मूलनाशः विनष्टे
मूलनाशः स्याद्दैवराजकृताद्दृते
इति नारदवचनात् । दैवराजकृ
ताद्दृते । दैवमग्न्युदकदेशोपप्ल
वादि ॥

दैवकृताद्विनाशाद्विना तथा स्वाप
राधरहिताद्राजकृतात् दैवराज
कृते तु विनाशे सवृद्धिकं मूल्यं दा
तव्य मधमर्णेन आध्यन्तरं वा यथा
ह सोऽनस्तापहृते हते च राज्ञा चैवाप
हारिते । आधिरन्योऽथ कर्तव्योदेय
वाधनिनेधनमिति तत्रस्तोनस्याप
लन इति दैवकृतोपलक्षणं । अपि
च आधेः स्वीकरणात् सिद्धी रक्ष्य
माणोऽप्यसारतां यातश्चेदन्य आ
धेयो धनभाग्वा धनी भवेत् ॥ आ
धेर्गोप्यस्य भोग्यस्य च स्वीकरणा
दुपभोगादाधिग्रहणसिद्धिर्न साक्षि
लिखितमात्रेणनाप्युद्देशमात्रे
ना यथाह नारदः । आधिस्तु
द्विविधः प्रोक्तो जंगमः स्थावरस्त
था सिद्धिरस्योभयस्यापि भोगो य
द्यस्ति नान्यथेति अस्य च फलं आधौ
प्रतिग्रहे क्रीडे पूर्वा तु बलवत्तरेति
याज्ञीकारांता क्रिया सा पूर्वा बल
वती स्वीकाररहिता तु पूर्वापि न ब
लवतीति स चाधिः प्रयत्नेन रक्ष्य
माणोऽपि कालवशेन यद्यसारता
मविकृत एव सवृद्धिकमूल्यदः ।
आपर्याप्तमतागतस्तदाधिरन्यः
कर्तव्यः तेनेवाधनं देयं रक्ष्यमा
णोऽप्यसारतामितिवदनादाधिः
प्रयत्नेन ॥



रक्षणीयो धनिनेति ज्ञापितं स्त्रा
धिः प्रमादे द्विगुणं इत्यस्यापवा
दमाह। चरित्रं बंधक कृते सय
त्या दापयेद्धनं सत्यंकार कृतं द्रव्यं
द्विगुणं प्रतिदापयेत्॥ चरित्रं शो
भनाचरितं चरित्रेण बंधकं चरि
त्रबंधकं तेन यत् द्रव्यमात्मसा
त्कृतं पराधीनं वा कृतं धनं तु कं
भवति धनिनः स्वच्छाशयत्वेन व
हुमूल्यमपि द्रव्यमाधीकृत्याधम
र्णेनाल्पमेव द्रव्यमात्मसात्कृतं
यदि वाधमर्णस्य स्वच्छाशयत्वेना
ल्पमस्य माधिं गृहीत्वा बहु द्रव्यमे
वंवंधनमाधमर्णाधीनं कृतमिति त
द्धनं वृद्ध्या सह दापयेत् अयमा
शयः वं एवं बंधके द्विगुणीभूते
पि न नश्यति किंतु द्रव्यमेव द्वि
गुणं दातव्यमिति तथा सत्यंकार
कृतं करणं कारः भावे घञ् सत्य
स्य कारः सत्यंकारः कारे सत्यागद
दस्येति मुम् सत्यंकारेण कृतं स
त्यंकारकृतं अयमभिसंधिः य
दा वैधिकार्पण समय एव इदं
परिभाषितं द्विगुणीभूतेपि द्रव्ये
मया द्विगुणं द्रव्यमेव दातव्यं ना
धिनाश इति तदा तत् द्विगुणं
दापयेदिति अन्योऽर्थः चरित्र।
शब्देन ॥

गंगास्नानाग्निहोत्रादि जनित
म पूर्वमुच्यते यत्र तदेवाधीकृत्य
यत् द्रव्यमात्मसात्कृतं तत्र तदे
व द्विगुणीभूते दातव्यं नाधिनाश इ
ति आधिप्रसंगादन्यदुच्यते सत्यं
कारकृतमिति क्रयविक्रयादि व्य
वस्था निर्वाहनाय यदंगुलीय
कादि परहस्ते कृतं तद्व्यवस्थाति
क्रमे द्विगुणं दातव्यं तत्रार्पयेता
गुलीयकाद्यर्पितं स एव चेद्व्य
स्यातिवर्त्ती तेन तदेव हातव्यं। इति
रश्चेद्व्यवस्थातिवर्त्ती तदा तदेवांगु
लीयकादि द्विगुणं प्रतिदापये
दिति किंच उपस्थितस्य मोक्षव्य
आधिः स्तेनोन्यथा भवेत् प्रयोज
के सति धनं कुले न्यस्याधिमाप्नु
यात् धनदानेनाधिमोक्षणायोप
स्थितस्याधिर्मोक्तव्यो धनिना वृद्धि
लोभेन तस्यापधितव्यः अन्यथा
अमोक्षणे स्तेनश्चौरवद्दण्ड्यो भवेत्
असन्निहिते पुनः प्रयोक्तरि कुले
तदाप्तहस्ते सवृद्धिकं धनं निधाया
धमर्णः स्वीयं बंधकं गृह्णीयात्॥
अथ प्रयोक्ताप्यसन्निहितस्तदा
माप्तश्च धनस्य गृहीता तेन संनिय
द्विवाद्यसन्निहिते प्रयोक्तरि आधिवि
क्रयेणाधनदिनः धमर्णस्य तत्र
किं कर्तव्यमित्यपेक्षित ॥ ।

त्वबंधव इति यथोक्तं। आत्म पितृ।
वसुः पुत्रा आत्ममातृष्वसुः सुताः
आत्ममातुल पुत्राश्च विज्ञेया आत्
मबांधवाः पितुः पितृष्वसुः पु
त्राः पितुर्मातृष्वसुः सुताः पितु
र्मातुल पुत्राश्च विज्ञेयाः पितृबां
धवाः मातुः पितृष्वसुः पुत्रा मातु
र्मातृष्वसुः सुताः। मातुर्मातुल
पुत्राश्च विज्ञेया मातृबांधवा इति
तत्र चांतरंगत्वात् प्रथमं आत्मबं
धवो धनभाजः तदभावे पितृब
न्धवः तदभावे मातृबंधव इति क्र
मो वेदितव्यः। बंधुता सभावे।
आचार्य्यः इति मिताक्षरा॥

बंधुकः। मित्रे भ्राता इति मे
दिनी॥

बंधुकः पुं बंधुकवृक्षः इति श
ब्दरत्नावली॥

बंधुजीवः पुं बंधूकवृक्षः इति श
ब्दरत्नावली॥

बंधुजीवकः पुं बंधुकवृक्षः इति
शब्दरत्नावली॥ इत्यमरः।

बंधुता स्त्री बंधूनां समूहः बंधो
र्भावः इत्यमरः॥

बंधुरं क्ली मुकुटं इति शब्दरत्ना
वली॥

बंधुरः पुं स्त्री चिक्कं तिलकल्क
बंधुकः बधिरः हंसः इति मेदिनी
विडंगः इति हेमचंद्रः॥
ऋषभौषधं इति राजनिर्घण्टः॥
वकः विहंगः इति शब्दरत्ना
वली॥

बंधुरः त्रि रम्यं नम्रं इति मेदिनी
उन्नतानतं इत्यमरः॥

बंधुरा स्त्री पण्ययोषा इति मेदिनी

बंधुराः पुं शाकवः बहुवचनांतो
ऽयं इति मेदिनी॥

बंधुलः पुं असतीसुतः इत्यमरः
बंधुकः इति शब्दरत्नावली॥

बंधुलः त्रि सुंदरः नम्रः इत्यज
पालः॥

कः पुं पीतशालकः इति मे
दिनी पुष्पवृक्षविशेषः बांडुली
इति वंगभाषा दोपहरिया इति
हिन्दीभाषा तत्पर्य्यायः रक्तकः
२ बंधुजीवकः ३ इत्यमरः बंधु
कः ४ बंधु ५ बंधुलः ६ बंधुजीव
कः ७ बंधुजीवः ८ बंधुलिः ९
बंधूरः १० इति शब्दरत्नावली॥
रक्तः ११ माध्याह्निकः १२ इति भा
वप्रकाशः अर्कपुष्पः १३ अर्कव
ल्लभः १४ मध्यंदिनः १५ रक्तपुष्पः १५
रागपुष्पः १६ हरिप्रियः १७ अस्य गु
णाः असित सित पीत लोहित पुष्प

विशेषाच्चतुर्विधा वंधुकः ज्वरह
रो विविधादि ग्रहपिशाचशमनः
प्रसादनः सवितुः स्यात् इतिरा
जनिर्घण्टः ॥ वंधुकः कफकृद्ग्रा
हीरक्तपित्तहरो लघुः इति भाव
प्रकाशः खपुष्पे क्ली वंधुक इति
ख्यातम् यथा खपुष्पकं वंधुजीवे
स्यात् खपुष्पे स्यान्नपुंसक मिति
हट्टचंद्रः ॥
वंधूकपुष्पः पुं पीतशालः इत्य
मरः बीजकः इतिराजनिर्घण्टः ।
वंधुरः पुं विवरं इत्युणादिकोषः
वंधुरः त्रि रम्यः नम्रः यथा वंधु
रः वंधुरौ रम्येनम्रेहं .. नवंधुरः
इतिरभसः उन्नतानतं स ..
त् यत्र .. अपाधिवशादीवन्न
ते .. नत् क्वचिदुन्नतंक्वचिदान
तं स्थलादिकं इतिकेचित् इत्य
मरटीकायांभरतः ॥
वंधुलिः पुं वंधुकवृक्षः इति
शब्दरत्नावली ॥
वंध्यः त्रि ऋतुप्राप्तावपि फलर
हितवृक्षादिः तत्पर्य्यायः अफ
लः २ अवकेशी ३ इत्यमरः वि
फलः ४ निष्फलः ५ इति राजनि
र्घण्टः वंधनीयः इतिवंधधातोः क
र्मणिय प्रत्ययः ॥

वंध्या स्त्री अप्रजसी वांझा इति
भाषा । इति मेदिनी ॥ अप्रजस्य
स्य गौः तत्पर्य्यायः वशा २ ॥
इत्यमरः वालाख्यगंधद्रव्यं इ
तिशब्दचंद्रिका वृषलीविशेषः
यथा वंध्याच वृषली ज्ञेया वृ
षलीचमृतप्रजा अपरावृषली
ज्ञेया कुमारी या रजस्वला ॥ इ
तिश्राद्धविवेके उशनसोव
चनं योनिरोगविशेषः यथा ।
उदावर्त्ता तथा वंध्या विप्लुता च
परिप्लुता वातला योनिजा रो
गा वातदोषेण पंचधा तस्या
लक्षणं यथा साफेनिलमुदाव
र्त्तरजः कृच्छ्रेण मुञ्चति वंध्या नि
ष्टार्त्तवा ज्ञेया विप्लुता नित्यवेदना
परिप्लुता या भवति ग्राम्यधर्मेण
रुजाभृशं वातला कर्कशा स्तब्धा शू
लनिस्तोद पीडिता तस्याश्चिकि
त्सा यथा वला सिता सितावला
मधुकं वटस्य शुंगं गजकेशरं च
पतन्मधुक्षीरघृतेन पीय वंध्या
सुपुत्रं नियतं प्रसूते अश्वगंधा
कषायेण सिद्धं दुग्धं घृतान्वितं ।
ऋतुस्नाताऽङ्गना प्रातः पीत्वा गर्भं
दधातिहि पुष्योद्धृतेन लक्ष्मणाया
मूलं दुग्धेन कन्यया पिष्ट्वा पीता

ऋतुस्नाता गर्भं धत्ते वंशशायः
कुरुण्टमूलं धातकाः कुसुमानि
वटांकुराः नीलोत्पलं पयो युः ।
क्रमेण गर्भप्रदं ध्रुवं यावलापि
वतिपार्श्वपिप्पलं जीरकेण सहि
तं हितनाशना । स्वनया विशिव
पुरुषायुतं सा सुतं जनयतीह ।
ताताख्या इति भावप्रकाशः ॥
वंध्याकर्कोटकी स्त्री तिक्तकर्कोट
की वाँझखखसा इति वाँझखचे
ल इति वाँझककरोल इतिच हिं
दीभाषा तत्पर्य्यायः वंध्या १ देवी
२ नागारातिः ४ नागहंत्री ५ मनो
ज्ञा ६ पथ्या ७ दिव्या ८ पुत्रदा ९
सुकंदा १० श्रीकंदा ११ कंदवल्ली १२
ईश्वरी १३ सुगंधा १४ सर्पदमनी १५
विषकण्टकिनी १६ परा १७ कुमारी
१८ भूतहंत्री १९ । अस्या गुणाः । ति
क्तत्वं कटुत्वं उष्णत्वं कफापहत्वं
स्थावरादिविषघ्नत्वं रसायनत्वंच
इति राजनिर्घण्टः ॥
वभ्र गतौ इतिकविकल्पद्रुमः ॥
वभ्रवी स्त्री दुर्गा इतिभूरिप्रयोगः
वभ्रिः पुं वज्रं इति केचित् वभ्रुः ।
पुं अग्निः शिवः विष्णुः विशालः ॥
नकुलः इति मेदिनी ॥
मुनिविशेषः इति हेमचंद्रः ॥

देशभेदः इति शब्दरत्नावली ॥
सितावरशाकः इतिराजनिर्घण्टः
वभ्रुः त्रि पिंगलः इत्यमरः ॥
खलतिः इति हेमचंद्रः ॥
वभ्रुधातुः पुं सुवर्णं गैरिकं इति
राजनिर्घण्टः ॥
वर्व गतौ इतिकविकल्पद्रुमः
वरं क्ली कुंकुमे त्वचे वालके ॥
आर्द्रकं इतिराजनिर्घण्टः ईष ।
दिष्टे केचिदाकल्पदव्ययं इति
मेदिनी ॥
वरः पुं जामाता वृतिः देवता ।
देवभीप्सितः षिङ्गः । श्रेष्ठ ॥
इति मेदिनी ॥
वरा स्त्री फलत्रिकं इतिमेदिनी
गुडूची मेदा ब्राह्मी विडं .. पा
ठा हरिद्रा इति राजनिर्घण्टः
वरी स्त्री शतावरी इति मेदिनी
वर्व गतौ इति कविकल्पद्रुमः
वर्वटः पुं राजमाषः वर्वटीइति
ख्यातः इतित्रिकाण्डशेषः ॥
वर्वटी स्त्री पण्ययोषा व्रीहि
भेदः । इति मेदिनी ॥
वर्वणा स्त्री नीलमक्षिका इ
त्यमरः वर्ह उ. स्तौ हिंसायां
दाने वाचि इति कविकल्पद्रु
मः वर्हं क्ली मयूरपिच्छ पत्रं ।

इत्यमरः परीवारः इतिहेम ॥
चंद्रः ॥
वल ज धान्यावरोधे ॥ जीवने ।
इतिकविकल्पद्रुमः ॥
वल म दाने । वधे निरूपणे इ ।
तिकविकल्पद्रुमः ॥
वल क म जीवने इतिकविकल्प
द्रुमः वल क ङ. निरूपणे इतिक
विकल्पद्रुमः ॥
वलं क्ली सैन्ये स्थाम्नि सामर्थ्ये ।
अत्रशौर्यस्यपर्यायः इविणं १ तरः
२ सहः ३ शौर्यं ४ स्थाम ५ शुष्मं ६
कि: ८ पराक्रमः ९ प्राणः १०
इत्यमरः तत गर्भस्य वालस्य
मासिभवति इतिसुखवोध
रूपे इति मेदिनी ॥
स्थूले । इति हेमचंद्रः । वपुः ॥
इति जटाधरः ॥ पल्लवे इति ।
शब्दरत्नावली रक्तः इतिशब्द
चंद्रिका वलयुक्तेपि इतिमेदि
नी पारिभाषिकवलानि यथा
विद्याभिजनमित्राणिवृद्धिसत्व
धनानिच तपःसहायवीर्याणि ।
णिदैवेवदशामे वलं इति महा
भारते आपद्धर्मे अपिच अव
लस्य वलंराजा वालस्यरुदि
तंवलं वलंमूर्खस्य मौनंच त
स्करस्यानृतंवलं मघो वलक
राणि वलहराणि च यथा सद्य
वलकरा स्त्रीणि वालाभ्यंगं स
भेजनं सद्यो वलहरा स्त्रीणि अ
ध्वानं मैथुनं ज्वरः । वलकारकौ
षधं यथा शिवामलकचूर्णंवै
मधुना उदकेन वा । वलानि कृ
ष्णानाशाया सन्मुखे भवत्पाणिव
इति माहेश्वर ११५ । १९६ अध्यायो ॥
अपिच क्षत्रियाणांवलंयुद्धं व्यापा
रश्च वलंविशां भिक्षा वलंभिक्ष
काणांशूद्राणांविप्रसेवनं । ह
रौ भक्ति हरेर्दास्य वैष्णवानांवलं
हरिः हिंसा वलं खलानांच तप
स्याचतपस्विनां वलंवेशश्चवेश्या
नां योषितां यौवनं वलं । वलंप्रता
पो भूपानां वालानांरुदितं वलं स
तां सत्यं वलंमिथ्या वलमेवासतां
सदा अन्नमानामनुगमः स्वल्पस्वा
नांच संचयः । विद्यावलंपंडितानां
वाणिज्यंवणिजांवलं शश्वत्सत्कर्म
शीलानांगांभीर्यंसाहसंवलं । धनं
वलंचधनिनांसुचीनांच विशेषतः
वलंविवेकःशांतानां गुणिनां वल
मेकतां गुणो वलंच गुणिनां चौ
राणांचौर्यमेवच ॥ विप्रवाक्यं
च काय ॥

वामधर्मस्वरूपिणां वरं ॥ हिंसाच
हिंस्रजंतूनां सतीनांपति सेवनं
वरुणापोस्वराणांचशिष्याणांगु
रुसेवनं ॥ वलंधर्मो गृहस्थानां
भृत्यानांराज सेवनं । वलंस्व
वःस्वावकानांब्रह्मचवलचारि
णां यतीनांचसदाचारोन्यासःस
न्यासिनांवलं पापंवलंपातकि
नांसभक्तानांहरि र्वलं पुण्यंव
लंपुण्यवतां प्रजानां नृपति र्व
लं फलं वलंच वृक्षाणां जलधी
नांजलंवलं मलंवलंचशास्त्रा ।
नांमत्स्यानांचजलंवलं । शांति
र्वलंच भूपानां विप्राणांच विशेष
तः ॥ इति ब्रह्मवैवर्त्तेगणेशखंडे
३५ अध्यायः ॥
वलः पुं काकः वलदेवः इत्यम
रः । अस्य पत्नी दीनांनामानि यथा
रेवती नाम तनया रेवतस्यमही ।
पतेः । उपयेमे वल स्तस्यां जाता
ते निशठोल्मकौ ॥ इति विस्णु ।
राणे ५ अंशे २५ अध्यायः ॥
वरुणवृक्षः । इति शब्दचंद्रिका ॥
दैत्यविशेषः इति मेदिनी ॥
तस्य विवरणंयथा आसीद्दैत्याव
लो नाम महावल पराक्रमः ।
देव गंधर्व यक्षाणां चेंद्रस्य भय ॥
कारकः ॥ येन विस्त्रर्यमः स्त्रर्यो
भग्न आजौ प्रपीडिताः । अनिला न
ल रक्षश्च वरुणश्च वशीकृताः ।
संयमः येन नागेंद्रा महाभोगामहा
विषाः । गरुडश्च कृतो भृत्यः स
दासा मभिवर्तिनः येन संलिख्य
शैलेंद्रः कंडूकाकारकारिताः । क्री
डार्थे येन विप्रेंद्र गिरयः प्रथिता
भुवि तेन देवाः सब्रह्माद्यादिवः
सर्वेपलायिताः दृष्ट्वास्थानत्वपा
तालसमयेशरद्दोषाते । तथाते
भयमापन्नामानस्तत्कागतागुरु
पृच्छति विनयात् सर्वे शाक्र ... हि
नकादिः ॥ केनोपायेनदे
स्वर्गवासो भवेद्विज । भयादि
नयवेत्ताचउपा
त्वमेव शास्त्रवेत्ता च हितःशाक्र
स्यनित्यशः शक्रोदधिनिमग्नाना
मतिपोतो भव द्विज एवंपृष्टःस
देवैस्तु गुरुर्वचन मब्रवीत् वृह
स्पतिरुवाच । यदयं दानवः शा
क्रेन युद्धभवतो वपुः । रणेनच
यमायातिप्राजेयः संगरे यतः
अतःकपटमास्थाय प्रार्थनीयः
क्रतुप्रति दानासत्ववलोपतः
स्वकायमर्थितेष्वपि अतस्तस्य
प्रार्थयितावित्र्मायामहोदधिः
द्विजरूपधरो भूत्वा याचनाय ।



वधायच गुरुणाचोदितादेवाःस्व
र्गात्तेनिधनंप्रति गताः सर्वे ततः
र्यत्र यत्रदेवोजनार्दनः माधवे
न तदा देवा हृष्टा भय समाकुलाः
कमलाक्षी सन संलापैः सर्वैते स
स्तुता भृशं संपृष्टिता स्तदा सर्वे
किमायातावदन सुराः देवाऊचुः
वलेन वलिना देव सर्वे विद्राविता
वयं मायावीत्वं वधे तस्य नान्यो
पायो भवेत क्वचित् विष्णुरुवाच
करोमि भवता मिष्टं किंत्वा सौ व
लसंज्ञकः सात्विको नयवेत्ता च
सर्वमंत्रार्थ पारगः गूढमंत्र वि
चारीस्याद्दमैकक्रतु निश्चयः।
तस्मात् कथं कर्त्तुं शक्यते स
रसत्तम ` ` ` तविद्यामम ह।
मात ` लिना मोहनी नाम वि
ख्याता मोहं सा कुरुते भृशं तया
हं तस्य नाशाय स्मरामि परमेश्व
री स्मरिता परमां विद्यां द्विजभा
वोजनार्दनः मध्यकायः स्वे
शस्त्रवेदपाठी सविहरी पवित्रा
ही कृताशस्यदत्तपद्मो ब्रजेध
जेन यज्ञार्थयाचनाकस्मकरो।
मि कथ्यतां मम। तं दृष्ट्वा स्वर्ग
तेजाभ मङ्कं विप्रैर्व्रजन् स च।
वलस्तै यत्र निष्पत्तिं करो।
ति द्विजसत्तम ॥ ॥

हेमकूटे महाशैले तिष्ठते दान
वोत्तमः सर्वज्ञोऽपि महामायी
वंचनाय तदा गतः मोहनीजप
मानस्तु विद्यां परम सिद्धिदां वि
चित्रं दनुराजस्य पुरं सर्वपुरोत्तम
म्प्रविश्याहदं वेदान्ता पठमानो ज
नार्दनः दानवेंद्र पुरं रम्यं ज्ञात्य
सेवेयहो नमः द्वारं गतोसरेद्रस्य
ऊर्ध्वा माध्यवने तदा द्वार पालो
ऽवदत्सर्वं श्रुत्वा वेदध्वनिं शुभां
पुराणि रत्नानि शुभं द्रदानियाच
तावरं इष्टदाने द्विजश्रेष्ठ लभं
च महामते तेनोक्तं दर्शनं द्वाःस्थ
दीयतां दनुसत्तमे तदा सदैव मा
दिष्टः प्रेषयामास तं तत्पं। वलि
ने वलसपत्नं दानवं सुरमर्दनं ॥
दानोद्यतकरो भद्रं दृष्ट्वा प्रीत्या व
भाषत। किमायातो भवान्नात्र का
र्य्यं विप्र तद्वदि ॥ मोहनीजपमा
नस्तु वदते द्विजकेशवः ब्रह्मोवाच
अहं संप्रेषयामास विद्धि मां कश्य
पात्मजं। यज्ञाः सेंद्रैः समारब्धा ऋ
षिभिश्चासुराधिप तस्य निष्पत्तये
नाथ ह्यागतोऽहं तवांतिकं ॥
दानं मे दीयतां राजन् सिद्ध्यते
येन तत्क्रतुः ॥ वलउवाच।
येन संसिद्ध्यते यज्ञो ॥

देवारव्यो द्विजोत्तम। तथा चाहं
धनं दारान् शिरश्च ददामि ते।
ब्रह्मोवाच। येन संसिद्ध्यते यज्ञो
देवानाम सुराधिप तद्देयं तत्त्व।
आदिष्टं सत्य मत्रावयोरपि॥ व
लउवाच। याच्यतां येन तत्कार्य्यं
सर्वं विप्र ददामि ते संसत्य मोह
नीविद्या वदते द्विज सत्तमः ॥
ब्राह्मण उवाच न ते धनैः सुदारै
र्वा न भूम्या गज वाजिभिः रत्नैः
कार्य्यं महावाहो देवयज्ञोऽसुराधि
प। येन निष्पाद्यते यज्ञः स्तव।
दस्त्व दिवौकसां तमहं याचयि
ष्यामि दीयतां तद्धि तेन तव एतत्
कार्य्यं मम भद्रं ऋषीणां च विशे
षतः देवार्थं तव कार्य्येन सिद्ध्यते
तत्क्षणोत्तमः तदा दत्ता तनुस्तेन
दानवेन महात्मना विष्णुनापि स्व
चक्रेण शिरस्याभिहतोऽसुरः यावत्
तं देहमनस्य दिव्यकायस्य भूतले।
दा तस्यावयव संजाता वज्राद्या रत्न
जातयः लोचने स्वरतेजांसि पद्मरा
गाणि चाभवन् विप्रेन्द्र पात्र ॥
दानेन कायो रत्नाकरोऽभवत् इति
देवीपुराणे ४० अध्यायः ॥
वलजे स्त्री क्षेत्रे पुरद्वारे इत्यमरः
प्रासे॥ युद्धे इति मेदिनी ॥

वलजन्येत्रि ॥
वलजा स्त्री वरयोषा पृथ्वी इ
ति मेदिनी ॥
वलती स्त्री प्रासादोपरिमण्डलि
का ॥ इति पुराणं ॥
वलदः पुं जीवकः इति राजनि
र्घण्टः पौष्टिक कर्माग होमाग्निः
यथा पौष्टिके वलदः स्मृतः। इ
ति तिथ्यादितत्त्वं वलदातत्रि
वलदा स्त्री अश्वगंधा इतिराज
निर्घण्टः ॥
वलदीनता स्त्री ग्लानिः इति हे
मचन्द्रः ॥
वलदेवः पुं वलरामः तत्पर्य्यायः
वलभद्रः २ मल्ल ` ` अच्युत `
जः ४ रेवतीरमणः ५ रामः ६ का
मपालः ७ महायुधः ८ नीलाम्ब
रः ९ रौहिणेयः १० तालांकः ११
मुषली १२ हली १३ संकर्षणः १४
सीरपाणिः १५ कालिंदीभेदनः १६
वलः १७ इत्यमरः रुक्मिदर्पः १८
मधुप्रियः १९ हलधरः २० हल
भृत २१ हालभृत् २२ सौनंदी २३
गुप्तवरः २४ संवर्त्तकः २५ वली २६
इति शब्दरत्नावली अस्य ध्याने
वलदेवं द्विबाहुंच शंखकुंदेंदु स
न्निभं वामे हलायुधधरं दक्षिणे।
मुषले ॥




करे हालालोलं नीलवस्त्रं हेला
वंतं स्मरेत् परं इति कश्चिन्निबंध:
वायु:। इति मेदिनी ॥
वलदेवा स्त्री त्रायमाणौषधि:
इति मेदिनी ॥
वलप्रसू: स्त्री रोहिणी वलराम
माता इति शब्दरत्नावली ॥
वलभद्र: पुं वलदेव: इत्यमर: ॥
अनंत: वलशाली इति हेमचंद्र:
लोध्र: इति शब्दचंद्रिका। गवय:
इति राजनिर्घण्ट: ॥ वलदेवस्य
नाम्नां कारणानि यथा कृतेनित्र
पितेनाम्नां कनिष्ठस्य यथा कृतं
ज्येष्ठस्य हलिनो नाम्न: सर्वतेस
वमन्वितान् ॥ गर्भसंकर्षणादेव
नाम्ना संकर्षण: स्मृत: नासंतो
स्यैव वेदेषु तेनानंत इति स्मृत:
वलदेवो वलोद्रेकाद्धली च हल
धारणात् सितिवासा नीलवासा
त्तमुषली मुषलायुधात् रेवती
सहसंभोगाद्रेवतीरमण: स्वयं
रोहिणी गर्भवासात्तु रौहिणेयो
महामति: इत्येवं ज्येष्ठ पुत्रस्य।
कृतंनाम निवेदितं। इति ब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अ
ध्याय: विष्णुपूजनोक्ताष्टदल
पद्मस्थ योगि विशेष: यथा सर्वत

मंडलं कार्य्यं वासुदेवस्य पूजने
एवमेव न्यसेच्छ्रेष्ठ निष्कलं चाना
द्येन रत्न वलभद्रश्च कामश्च अ
निरुद्धस्तथैव: नारायणस्तथा ब्रह्मा
विष्णुरेष: प्रकीर्तित: नरसिंहो व
राहश्च योगिनोष्टौ प्रकीर्तिता:
पूर्वाद्यष्टदलेष्वेतान् वर्णतो मं
त्रत: पृथक् पूजयेत् कर्णिकाम
ध्ये वासुदेवं तु नायकं विमलाना
यिका तस्य वासुदेवस्य कीर्तिता
वलभद्र सखानांत योगिन्य: स्व
णपार्थिव आद्यावृतकर्णिणीज्ञे
यास्तानाथपश्चात् क्रिया परा यो
गप्रज्ञा तथेशानी अनुग्राही त
स्तनी सर्वाश्चतुर्भुजा: प्रोक्ता:
शंखचक्र गदाधरा: योगिने ॥
वलभद्रत्त कामं विधि पूते तथा
विधे रूपंतु पूर्वोक्तं हलं च मुसलं
तथा शंखं चक्रं च धत्तेस गदापा
र्श्वस्थितान्तथा इति कालिकापु
राणे ८२ अध्याय: ॥
वलभद्रा स्त्री कुमारी त्रायमाणा
इति मेदिनी ॥
वलभद्रिका स्त्री त्रायमाणा इत्य
मर: ॥
वलराम: पुं वलदेव: यथा वलरा
मानुज: श्रीमान् गजेंद्रस्त तथा ॥

दक:। इति नारदपंचरात्रे चतुर्थ
रात्रीय ८ अध्याय:। अस्यध्यानं
अंतरे स्थिभ उद्याने हरिचंदनसंग
के तत्राधस्तात् स्वर्णपीठे विचि
त्रे मणिमंडपे तन्मध्ये मणि मा
णिक्य दिव्य सिंहासनोज्वले त
त्रोपरि च वेरत्न संकर्षणहला
युधं ईश्वरस्याभयानंत मभित्रय
णत्रूपिणं शुद्धस्फटिक संकाशं
रक्तांवुजदलेक्षणं नीलचेलधरं
स्निग्धं दिव्यगंधानुलेपनं। कुंड
लाश्लिष्टसत्कर्णं दिव्यभूषावरस्र
जं मधुपाने सदासक्तं मदाघूर्णित
लोचनं मुषलं दक्षिणे पाणौ वल
रामं सदा स्मरेत्। इति कश्चिन्निवंध
वलल: पुं वलराम: इत्यमरटी
कायां भरत: ॥
वलवत् क्ली अतिशयं इत्यमर:
वलवान् त्रि वलविशिष्ट: तत्प
र्य्याय: मांसल: २ अंशल: ३ इत्य
मर: वीर्य्यवान् ४ वली ५ इति।
शब्दरत्नावली ॥
वलवर्द्धिनी स्त्री जीवकौषधि: इ
ति जटाधर: ॥
वलविन्यास: पुं युद्धार्थं सैन्यस्य
देश विशेषे विभज्य उल्लेख्यत्वनि
विंतस्थापनं तत्पर्य्याय: व्यूह:।

२ इत्यमर: ॥
वलसूदन: पुं इंद्र: इति हला
युध: ॥
वलस्थिति: स्त्री शिविरं इति त्रि
काण्डशेष: ॥
वलहा पुं श्लेष्मा इति शब्दरत्ना
वली ॥
वलक्ष: पुं धवल: इत्यमर: ॥
वलते: क्विप् वलं अक्षत्यस्मिन्
चक्ष वलक्ष इति कष संयोगवा
न् इति रायमुकुट:। अवलक्षात
इति वलक्ष: चक्ष अकारलोप:
इति स्वाम्यादय: एतन्मते अत्रस्य
वकारादि: ॥
वला स्त्री क्षुपविशेष: वाडियां
ला इति भाषा तत्पर्य्याय: वाट्या
लक: २ इत्यमर: समंगा ३ ओद
निका ४ भद्रा ५ भद्रोदनी ६ खर
काष्ठिका ७ कल्याणिनी ८ भद्रव
ला ९ मोटा १० पाटी ११ वलाढ्या ॥
अस्या गुणा: अतितिक्तत्वं मधु
रत्वं पित्तातिसारनाशित्वं वलवी
र्य्यप्रदत्वं पुष्टिकफरोधविशोध
नत्वं च इति राजनिर्घण्ट: ॥
अथ वलाचतुष्टयनामादि वला
वाट्यालिका वाट्या सैव वाट्याल
कोपि च महावला पीतपुष्पा सहदे



देवीचसासुरता ॥ ततोऽन्यातिवला । ऋष्यप्रोक्ता कंकतिका सह । गांगेरुकी नागवला झषा ह्रस्वा गवेधुका वलाचतुष्टय गुणाः वलाचतुष्टयं शीतं मधुरं वलकान्तिकृत् स्निग्धं ग्राहि समीरास्त्र पित्तास्त्र हतनाशनं वलामूलत्वच चूर्णं पीतं सक्षीरशार्करं मूत्रातिसारं हरति दृष्ट मेतन्नसंशयः ॥ इति भावप्रकाशः ॥ अपिच वाट्यालके वाट्यपुष्पी समांशा विलला वला श्वेतवाड़ियाला इति भाषा ऋष्यप्रोक्ता त्वतिव पीतपुष्पी महावला पीतवाड़ियाला इतिरत्नमाला स्निग्धा ... ला वृष्या ग्राहिणी वीतपित्त ... इति राजनिर्घण्टः ॥

... काखी वकजातिविशेषः तत्पर्य्यायः विषकण्ठिका १ इत्यमरः विषकण्ठा ३ वलाकी ४ इति शब्दरत्नावली ॥ विषकण्ठी ५ भृङ्गागा ६ दीर्घकन्धरा ७ धर्मोत्ता ८ कामुकी ९ प्रेपता १० मेघानन्दा ॥ जलाश्रया १२ अस्यामांसगुणाः सारसहंसवलाका चक्रक्रौञ्चादयो जले प्लवनात् प्लवसंज्ञाः कथितास्तेन न्मांसगुरुस्नेहवलदायि अपिच । अन्येवक वलाकाद्या गुरवः प्राणिभक्षणात् इति राजनिर्घण्टः ॥ अपिच । हंस सारस काचाक्ष वक क्रौंच सरारिकाः नंदीमुखी सकादंवा वलाकाद्याः प्लवाः स्मृताः प्लवंते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः । प्लवाः पित्तहराः । स्निग्धा मधुरा गुरवो हिमाः वातश्लेष्मप्रदाश्चापि वल शुक्र कराः सराः इति भावप्रकाशः ॥

वलाचिता स्त्री रामवीणा इति शब्दरत्नावली ॥

वलाटः पुं मुद्गः इतिहेमचन्द्रः ॥

वलात् अ हठात् वलादिति दिपानोहठार्थे इतिस्वामी ॥ इत्यमरटीकायांभरतः यथा वलात् संदूषयेद्यस्तु परभार्य्यां नरः क्वचित् वधदण्डो भवेत्तस्य नापराधो भवेत् स्त्रियाः इति मात्स्ये २९ । अध्यायः ॥

वलात्कारः पुं हठात् करणं तत्पर्य्यायः । प्रसभं २ हठ ३ इत्यमरः हठात्कारः ४ प्रसभः ५ । इति शब्दरत्नावली मन्त्राभियुक्तसौवाल वलात्कारकृतेन चयत् । तदप्रमाणं लिखितं भयोपधिकृतं तथा । इति ऋणादाने मिताक्षरा ॥ ।

धृत नारद वचनं ॥

वलात्मिका स्त्री हस्तिशुण्डीवृक्षः इति शब्दरत्नावली ॥

वलाया स्त्री वला इति राजनिर्घण्टः

वलानुजः पुं श्रीकृष्णः इतिपुराणं

वलामोटा स्त्री नागदमनी । इति भावप्रकाशः ॥

वलायः पुं वरुणवृक्षः इति शब्दचंद्रिका ॥

वलारातिः पुं इन्द्रः इत्यमरः ॥

वलालकः पुं पानीयामलकं इति शब्दचंद्रिका ॥

वलाशः पुं श्लेष्मा इतिहेमचंद्रः ॥

लासमः पुं वुद्धः इति त्रिकाण्डशेषः ॥

वलाहकः पुं मेघः मुस्तकः इत्यमरः पर्वतः दैत्यविशेषः ॥ नागविशेषः इति मेदिनी रमागर्भोद्भवः कल्किदेव पुत्रः यथा तथा रमासिते पक्षे वैशाखे द्वादशी दिने जामदग्न्याह्वते चक्रे पूर्णवर्ष चतुष्टयं महोत्सवं करेव । द्वा भोजयित्वा द्विजान् वहून् । भुक्त्वाह विष्णवीरा कंससमिष्ट स्वामिना सह ॥ वुभुजे पृथिवी सर्वामपूर्वां स्वजनै र्हता । सा पुत्रौ ससुवे साध्वी मेघमालवलाहकौ ॥ देवानामुपकर्त्तारौ यज्ञ दान तपोव्रतौ महोत्साहौ महावीर्य्यौ सुभगौ कल्किसंमतौ ॥ इति कल्किपुराणे ३१ अध्यायः ॥

वलाकंदः पुं शृंगचकंदः इति राजनिर्घण्टः ॥

वलिः पुं करः राजग्राह्योभागः उपहारः पूजासामग्री इत्यमरभरतौ चामरदण्डः ॥ पंच महायज्ञान्तर्गत भूतयज्ञः इतिहेमचंद्रः ॥ दैत्यभेदः इति मेदिनी सच दैत्यो विरोचनपुत्रः । तस्य अनायापत्न्यां वाण्येष्ट पुत्र शतं जातं । इति श्रीभागवतंच तथा विरे ... पुत्रस्तु वलिरेकः प्रतापवान् वलेः पुत्रशतंत्वेते राजानः सर्वएव ते ॥ तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहावलाः सहस्रवाहुर्ज्येष्ठश्च कन्येह्ववले शुभे ॥ वलेः पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः वालेयानाम विख्यातागणो विक्रान्त पौरुषः । इत्यग्निपुराणं ॥

तस्य पूर्वजन्म वृत्तान्तो यथा ॥ शुक्र उवाच धर्मध्वजो नाम वभूव राजा विदेह देशे निजधर्मशीलः यज्वा सदाश्री शुभकर्म कर्त्ता सवि

सुभक्तोऽनुदिनं महात्मा तस्यात्मा
सीदयते: सुभक्तो द्वेष्टा द्विजानां
पिशुनो विवेकी द्वेष्टा गुरूणाञ्च
ततस्त्वदात्मा नो साधुस्तेन वन्धमवा
लोकं ॥ एवं विधस्त्वल्पसत्त्वमे
न प्रोक्तः क्रुद्धश्च विनाशनाय ।
स्नानेन हरेर्येन सर्वं विहितल्पेषु लोके
परेण महता तेन वापि श्रुत्वा भवा
न्तद्वचनं चकार स्नानेस्तनेनापि
जनार्द्दनस्य । दानेन तथा गोः कृत
वान् विभक्त्या तस्मात्फलं विद्धि
तवाऽमेय एवं त्वया प्राप्य मशे
षराज्यं देवासुराणां महत्तं विय ।
दैः संलप्स्यसे त्वं पुनरेव सर्व
मैश्वर्यमभक्तियतः सुरेशाः स्म
त्रिपुराणं वलिराजयस्वेवामन
देवमिन्द्रा यथा । लोमहर्षण उवा
च । स एवं तत्ववनाद्व्वीं दृष्ट्वा सं
स्तभितो वलिः परमक्रोशनसं ।
प्राक्कं प्रणिपत्य कृताञ्जलिः श्रा
चार्य्यो भमयाति साविभ्रस्तद्द
नामही कस्माद्धनास्सरानभागा
स्मृतिगृह्णन्ति वह्नयः इति दृष्ट्वाथ
वलिना काव्यो वेद विदां वरः ।
उवाच दैत्याधिपतिं चिरं ध्यात्वा
महामतिः अवतीर्णो जगद्योनिः
कश्यपस्य गृहे हरिः वामनेन ।
रूपेण परमात्मा सनातनः स
नूनं यज्ञमायाति तव दानव पुंगव
तस्य पाद प्रविक्षेपादियं प्रचलि
ता मही । इय मस्य जगद्धात्रमी
या कृत्स्नस्य सात्वती तत्स्मिथा
नादसुरा भागार्हा नासुरोत्तम भंज
तेनासुरान् भागानपि तेन त्रयोऽग्नयः
शुक्रस्य वचनं श्रुत्वा हृष्टलोमा
ब्रवीद्वलिः धन्योऽहं कृतपुण्यश्च
यतो जगत् पतिः स्वयं । यज्ञम
भ्यागतो ब्रह्मन्मत्तः कोऽन्योऽधिकः
पुमान् । यं योगिनः सदोयुक्ताः प
रमात्मानमव्ययं ॥ द्रष्टुमिच्छन्ति दे
वोऽसौमनाध्वरमुपैष्यति ॥ य
न्मया चार्घ्यकर्त्तव्यं तन्ममादिश म
हर्षे । शुक्र उवाच त्वयाऽस्य दैत्याधि
पते स्वल्पकेऽपि हि वस्तुनि ॥ प्रति
ज्ञा नैव वोढव्या वाच्यं साम तथा ।
फलं । वलिरुवाच ब्रह्मन् कथम
हं ब्रूया मन्येनापि हि याचितः ना
स्तीति किमु देवेशे संसारौघहरा
रिणि लोमहर्षण उवाच इत्येवं व
दतस्तस्य संप्राप्तः स जनार्द्दनः
सर्वदेवमयोऽचिन्त्यो माया वामन
रूपधृक तं दृष्ट्वा यज्ञवाटं प्रविष्ट
मसुराः प्रभं जाममुः प्रभावात्तस्ता
भंते तेजसा तस्य निष्प्रभाः ॥

सचार्घ्यमादाय वलिः प्रोद्भूतपुलक
स्तदा पूजयामास गोविन्दं प्राह चेदं
महासुरः वलिरुवाच । सुवर्ण र
त्न संघातान् गजाश्वमहिषास्तथा
स्त्रियो वस्त्राण्यलंकारान् गावः कु
ञ्च पुष्कलं तदहं दामि वृणुष्वेष्टं
ममार्थी सततं प्रियः इत्युक्तो दै
त्यपतिना प्रीतिगर्भान्वितं वचः
प्राह सस्मितं गंभीरं भगवान् वा
मनाकृतिः ममाग्निशरणार्थाय
देहि भूमिं पदत्रयं सुवर्णग्रामर
त्नादि तदर्थिभ्यः प्रदीयतां एतच्छ्रु
त्वा गदितं वामनस्य महात्मनः द
दौ तस्मै महाबाहुः वामनाय पदत्रयं
पाणौ तु पतिते तोये वामनोऽभूद
वामनः । सर्वदेवमयं रूपं दर्शया
मास तत्क्षणात् जित्वा लोकत्र
यं कृत्स्नं हत्वा चासुरपुंगवान् ।
पुरन्दराय त्रैलोक्यं ददौ विष्णुरु
रुक्रमः सुतलं नाम पातालम
थस्तात्तस्य पातालं वलेर्द्दत्तं भगव
ता विष्णुना प्रभविष्णुना अथ दैत्ये
श्वरं प्राह विष्णुः सर्वेश्वरेश्वरः यत्व
या सलिलं दत्तं गृहीतं पाणिना म
या कल्पप्रमाणं तस्मात्ते भविष्य
त्यायुरुत्तमं वैवस्वते तथा तीते
वले मन्वन्तरे तथा ॥ सावर्णिके
तु संप्राप्ते भवानिन्द्रो भविष्यति । इ
दानीं भुवनं दत्तं सर्वं शक्राय सर्वदा
यदा सुरैश्च विप्रैश्च विरोधं त्वं क
रिष्यसि । वंधिष्यति तदा पाशा
वारुणा घोरदर्शनाः ॥ वलिरु
वाच तत्रासतो मे पाताले भगव
न् भवदाज्ञया किं भविष्यत्युपा
दानमुपभोगोपपादकं ॥ श्री
भगवानुवाच दानान्यविधिदत्ता
नि श्राद्धान्यश्रोत्रियाणि च हुतान्य
श्रद्धया यानि तानि दास्यन्ति ते फलं
अदक्षिणास्तथा यज्ञाः क्रियाश्च
विधिना कृताः फलानि तव दास्य
न्त्यधीतान्यव्रतानि च उदकेन ति
लैर्व्वापि विना दर्भेण या क्रिया । आ
ज्येन च विना होमं फलं दास्यन्ति ते
वले इति वामनपुराणे ३१ अध्या
यः ॥ ययातिवंशोद्भव सुतपा
राजपुत्रः यथा तितिक्षोरपि रुष
द्रथः पुत्रोऽभूत् तस्यापि हेमः
हेमस्य सुतपाः सुतपसश्च वलिः
इति विष्णुपुराणे ४ अंशे १८ अ ।
ध्यायः वलिवैश्व नामक पञ्च य
ज्ञान्तर्गत यज्ञविशेषः । यथा
येऽश्नीयन्ति सदा विप्र निष्फलेन
नान्तरात्मना तत भूयोऽभिजायं
ते श्वानद्वीपनिवासिनः ॥ एवं प्रज



विधानेन ह्यतिथिं भोजयेत्ततः । सायंप्रातर्यदन्नं स्यादुत्थाग्निनैव नहलिं इति वह्निपुराणे ॥ ततोऽग्रे तर्पणं कुर्य्याद्दद्याच्च वलिमित्यथ ॥ ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च धन्वन्तरिं समुद्दिश्य प्रागुदीच्यां वलिं क्षिपेत् । प्राच्यां शक्राय याम्यायां यमाय वलिमाहरेत् प्रतीच्यां वरुणाय च सोमायोत्तरतो वलिं दद्याद्धात्रे विधात्रे च वलिं द्वारे गृहस्य च अर्य्यमे च वलिं द्वारे गृहस्य च ~~अर्थ्य~~ दद्यात् गृहेभ्यश्च समन्ततः नक्तञ्चरेभ्यो भूतेभ्यो वलिमाकाशतो हरेत् पितॄणां निर्व्वपं ... दक्षिणाभिमुखस्थितः पृ ... ततस्तोयमुपादाय तेष्वेवाचमनाय वै स्थानेषु निक्षिपेत् प्राज्ञस्तास्ता उद्दिश्य देवताः एवं गृहवलिं कृत्वा गृहे गृहपतिः शुचिः आप्यायनाय भूतानां कुर्य्यादुत्सर्गमादरात् श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि वैश्वदेवं हि नामैतत् सायंप्रातरुदाहृतं इति मार्कण्डेयपुराणे ॥ अथ वलिः वैश्वदेव पश्चाद्भूमौ जलं दिमानेच्छयोत्रेन सांगुष्ठेन देवतीर्थेन ओं विश्वेभ्यो देवेभ्यो नमः इति वलिं दद्यात् तदुपरि जलमनेन मन्त्रेण दद्यात् एवं सर्व्वत्र जलप्रक्षेपः तदुत्तरे ओं सर्व्वेभ्यो देवेभ्यो नमः उभयोर्दक्षिणे प्राचीनावीती पातितवामजानुर्दक्षिणामुखो दक्षिणाग्रकुशत्रयोपरि सतिलमन्त्रभुग्नकुलत्रयेण पितृतीर्थेन ओं पितृभ्यः स्वधा ततः सर्व्वेषां वलीनामुपरि सर्व्वत्र मन्त्रैकं जलनिषेकः ततउपवीती देवतीर्थेन वलिपात्रं प्रक्षालनोदकेनानेन पश्चान्या ओं यक्ष्मैतत्ते नमस्ते क्षमा मा हिंसीः ओं यक्ष्मणे नमः इत्यनेन दद्यात् जलं च देयं इत्यावश्यकवलिः अथ काम्यवलिः वलीनां पश्चिमे जलेनोत्तराग्रां रेखां कृत्वा भूमौ जलं दत्वा ओं देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तं पिपीलिकाः कीटपतङ्गकाद्या बुभुक्षिताः कर्म्मनिबन्धबद्धाः प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु येषां न माता न पिता न बन्धुर्नैवान्नसिद्धिर्न तथान्नमस्ति तत्तृप्तयेऽन्नं भुवि दत्तमेतत् ।

प्रयान्तु तृप्तिं मुदिता भवन्तु ॥ ओं भूतानि सर्व्वाणि तथान्नमेतदहं च विष्णुर्न यतोऽन्यदस्ति तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषां चतुर्द्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूतसंघाः तृप्त्यर्थमन्नं हि मया विसृष्टं । तेषामिदं ते मुदिता भवन्तु इत्युच्चार्य्य वलिं दद्यात् ओं ऐन्द्रवारुणवायव्याः सौम्या वै नैर्ऋतास्तथा । वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितं ओं वायसेभ्यो नम इति पुनर्जलं देयं । भूमौ जलं दत्वा ओं श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ ताभ्यां पिण्डं प्रयच्छामि । स्यातामेतावहिंसकौ ॥ ओं श्वभ्यां नमः ततः पुनर्जलं देयं । भूमौ जलं दत्वा ओं चाण्डाल पतित पापरोगिभ्यो नमः पुनर्जलं देयं भूमौ जलं दत्वा ओं धर्मराजचित्रगुप्ताभ्यां नमः ततः पुनर्जलदानं ततो जलं । स्पृष्ट्वा अग्निं विसृज्य नमस्कृत्य संप्राप्य जले क्रियमाणे वलीनग्रजलेवादिपेत् पिण्डवत् अन्नाभावे केवलं । जलेन पात्रान्तरस्थ जले कुर्य्यात् ततः कुशाकुसुमसहितं जलपूर्णं ताम्रादिपात्रं द ॥ ... । सेतिधाय महावामदेव्यऋषिर्विराडुगायत्री छन्दः इन्द्रो देवता शान्तिकर्म्मणि जपे विनियोगः ओं कया नश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता ओं कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढा चिदारुजे वसु ओं अभीषुणः सखीनामविता जरितॄणां शतं भवास्यूतये । इति वामदेव्यं गीत्वा गानाशक्तो त्रिः पठित्वा ओं स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ओं स्वस्तीति त्रिः पठेत् ... हादिकरणे पार्व्वणादिकं कृत्वैव वैश्वदेवादिकं कार्य्यं ... वपि पाकसत्वे यत् किञ्चिद्द्रव्य ... वा वैश्वदेववलिकर्म्मणोः कुर्य्यात् । शूद्रस्य ब्राह्मणाभावे मन्त्रार्थभावयन् नमो नम इति मन्त्रेण कुर्य्यात् अविभक्तानामेककरणादेव सर्व्वेषां सिद्धिः इत्याह्निकाचारप्रयोगतत्त्वं नवग्रहवलिर्यथा गृहोदनं रवेर्दद्यात् सोमाय घृतपायसं । यावकं मङ्गलायैव क्षीरान्नं सोमसूनवे दध्योदनं च जीवाय शुक्राय तु घृतोदनं शनैश्चराय कृसरमाजमांसमथो राहवे विप्रो



दनेच केतभ्यः सर्वभद्रैः समर्चये
त् सर्वभद्रैस्ततस्तस्माभावेय्यथा
लाभेपपन्नै र्भद्रैः । इति ब्रह्मय
त्ततं ॥ पद्मादि वलिदान वि
धि र्यथा । वलिदान विधानेचक्र
यतां मुनि सत्तम मायाति महि
षैश्छागैर्यान्मेषादिकैं तथा ॥ स
हस्रवर्षं सा प्रीता दुर्गा मायाति दा
ततः महिषेण वर्षशतं दशवर्ष
चछागलात् वर्षमेकेन कुष्मा
ण्डैः पक्षिभिर्ईक्षैस्तथा दशव
र्षं कृष्णसारैः सहस्राहेव गण्डकैः
कृत्रिमैः पिष्टनिर्माणैः षण्मासं प
क्षिभिस्तथा मासस्तथात्वोदिफ
लैरन्नैरितिनारद ॥ एवकंद्मा
धिहीनं च समस्तं लक्षणान्वितं ।
विमुक्तमविकारांगं सवर्णं पुष्टमे
वच शिशुना वलिना दातईतिष्ठ
रेवचंडिका हृष्टैनैव गुरुजनेन क्र
येन बांधवेन तथा कृत्स्ले चवाधिका
गेन हीनांगेन प्रजातथा कामि
नीष्णभगेन काणेन भ्रातरेत
था चेलिकेन भवेन्स्तु विश्वच ।
चित्र मस्तके । स्तनंमिवेनाम्र ए
षेष्वहृष्टोः पुच्छहीनके ॥ मा
र्यातीनां च निर्गीतं कथ्यतां मुनि
सत्तम वदन्मपंचवेदोक्तफल
हानिश्चितिकमे अथ नरवलिः

पित्रमातृविहीनेन च शुवकं व्याधि ।
वर्जितं विवाहितं दीक्षितंच पार
दविहीनकं अज्ञातिकं विमुक्तंच ।
सन्तमुदंमूलकं वरं ततेहपुत्रय
नेदत्वा कौंड्रमूल्यानिरेकतः ।
स्नापयित्वा च तं धर्मी संपूज्य व
स्त्रचंदनैः माल्ये र्धूपैश्च सिंदूरै
पि गोरोचनादिभिः तेच वर्षप्र
मथित्वा चरद्वारेण यत्नतः वर्षा
नेच समुत् स्त्र्य दुर्गायैन निवेदये
त् ॥ अष्टमी नवमी संधौ दद्यान्मा
याति मेवच । इत्येवं कथितं सर्वं
वलिदान प्रसंगतः अपि सप्त ।
म्यां पूजनं कृत्वा वलिं दद्याद्विचत
एः । अष्टम्या पूजने शस्तं वलि
दानविवर्जितं अष्टम्यां वलिदाने
न विपत्तिर्जायते ध्रुवं । दद्याद्विव
दणे भक्त्या नवम्यां विधिवद्वलिं
वलिदानेन विप्रेन्द्र दुर्गा प्रीतिर्भवे
द्रणं हिंसाजन्यंचपापंचलभेत
नात्र संशयः उत्सर्गकर्ता दाता च छे
त्ता पोष्टा च रक्षकः अग्रपश्चान्निरो
द्धा च सप्तैत वधभागिनः यो यं हंति
सतं हंति चेति वेदोक्तमेवच । कु
र्वंति वैस्ववीपूजां वैसवा स्तेन
हेतुना ॥ इति ब्रह्मवैवर्त्ते ॥
प्रकृतिखण्डे ६१ । ६२ ॥ ।

अध्यायः ॥ श्रीभगवानुवाच क्रमे
ण वलिदानस्य सत्रयं रुधिरादिभिः
यथा स्यात्प्रीतये सम्यक् तथाव
क्ष्यामि पुत्रको वैस्वी तेत्रकल्पो
क्तः क्रमः सर्वत्र सर्वदा । साधकै
र्वलिदानेषु ग्राह्यः सर्वसुरस्यतु ।
पक्षिणः कच्छपा ग्राहा मत्स्या न
वविधा मृगाः । महिषो गोधिका
गावश्छागो वभ्रुश्च शूकरः खड्ग
श्च कृष्णसारश्च गोधिका सरभो ह
रिः शार्दूलश्च नरश्चैव स्वगात्र रु
धिरं तथा चंडिका भैरवादीनां वल
यः परिकीर्त्तिताः वलिभिः साध्य
ते मुक्तिं वलिभिः साध्यते दिवं ॥
वलिदानेन सततं जयेत् शत्रून् ।
पार्थिवः ॥ मत्स्यानां कच्छपानां
च रुधिरैः सततं शिवा मासैकं तृ
प्तिमाप्नोति ग्राहैर्मासांस्त्रीनथ
मृगाणां शोणितेनैर्देवी मराणाम
पि शोणितैः अष्टौ मासानवाप्नो
ति तृप्तिं कल्याणदा च सा गो गो
धिकानां रुधिरैर्वार्षिकीं तृप्तिमा ।
प्नुयात् कृष्णसारस्य रुधिरैः शूकर
स्य च शोणितैः आप्नोति सततं दे
वी तृप्तिं द्वादशवार्षिकीं अजावि ।
कानां रुधिरैः पंचविंशति वार्षि
कीं ॥ महिषाणां च ख ॥

ड्गानां रुधिरैः शतवार्षिकीं तृप्तिमा
प्नोति परमां शार्दूलरुधिरैस्तथा ।
सिंहस्य सरभस्याथ स्वगात्रस्य च
शोणितैः ॥ देवी तृप्तिमवाप्नोति
सहस्रं परिवत्सरान् । मांसे र
पि तथा प्रीती रुधिरे यस्य यावती
कृष्णसारमृगे खड्गे तथा मत्स्य च
रोहिते । वाध्रीनस युगं चापि फ
ले तेषां पृथक् स्मृणु ॥ कृष्णसा
रस्य मांसेन तथा खड्गेन चंडि ॥
का वर्षाण् पंचशतान्येव तृप्तिमा
प्नोति केवला रोहितस्य .. मत्
स्यस्य मांसै चीध्रीनसस्य .. तृ
प्तिमाप्नोति वर्षाणां शतानि त्रीणि
मत्प्रिया ॥ त्रिपिवं त्विंद्रियक्षी
णः श्वेतो हृद्धस्तु सायतिः वाध्रीन
सः प्रोच्यते सो हृष्टक ..
सतकृतः नीलग्रीवो रक्तशीर्षः
कृष्णपादः शितच्छदः । वाध्रीन
सः स्यात् पदीशो मम विष्णो र
तिप्रियः । नरेण वलिना देवी स
हस्रं परिवत्सरान् विधिदत्तेन
चाप्नोति तृप्तिं लक्षं त्रिभिर्नरैः ना
रेणैवाथ मांसेन त्रिसहस्राणि
वत्सरान् तृप्तिं प्राप्नोति कामा
ख्या भैरवो मम रूपधृक् मंत्रपूते
प्राणितंत्वपीयूषं जायते सदा सत्व
कं चापि ॥




तस्यान्निमांसंचाप्यिसदा शिवा ॥
तस्मात् पूजने दद्याद्बलेः शीर्षंच
लोहितं। भोज्ये होमे च मांसानि।
नियुञ्जीयाद्विचक्षणः ॥ पूजास्व
नाम मांसानि दद्याद्वै साधकः क्व
चित् अनेन लोहितं शीर्षमस्तं
तत्र जायते कूष्माण्ड मित्युदंडंच
मद्य मासव मेवच। एते बलिस।
माः प्रोक्तास्तैश्छागसमाः सदा
चंद्रहासेन कर्त्रीवा छेदने मुख्य
मिष्यते। दात्रासिधनुककचसंकु
लामित्यमध्यमं तरत्तरम भेले
… धमपरिकीर्तितं। एभ्योऽन्यैः
शक्तिबाणाद्यैर्वलिं छेद्यः कदापि
न नासिदेवीवलिंतत्तदाता …
म … स्तेनच्छेदयेद्यस्तु प्री
तितं साधकः पशुं ॥ यतिंग वा
बलिहत्वा सोवाप्नोति सङ्कः सहा
नामंत्र्य खड्गेन बलिं नियुञ्जीत वि
चक्षणः खड्गस्यामंत्रणो मंत्रायां
वतः कथितास्तु शुरा महामाया
बलौतेवैयोज्याः स्मृतोदिता बुधैः
तैः सार्द्धमेतेमंत्रास्तु योज्याः ख
ड्गाभिमंत्रणे। पूजने पारदादी
नां कामाख्याया विशेषतः ह्रीं
कालीति ततो देव्या वज्रेश्वरिपद
स्तथा ततोत्र लोहदंडायै नमः

शोषेत् योजयेत् संपूज्यानेनमं।
त्रेण खड्गमादाय पाणिना का
लरात्र्यास्तु मंत्रेण तं खड्ग मभिमं
त्रयेत्। तेमवीजस्य मध्यस्तु द्विराद्
स्त्वप्रयोजयेत्। ततोनुकालीति वि
कटदंष्ट्रे ततःपरं ह्रामादीनात
तीयेन स्वरेणैकादशेनच योजि
तो नादविंदुभ्यां द्वौ तत पश्चान्नियो
जयेत् फट्कारिणि पदं तस्मात् खा
दय च्छेदयेतिच सर्वदुष्टानिति त
तो हिंमारय ललापक ॥ खड्गेन
छिंधि छिंधीति ततः किलकिले
ति वै ततश्चिकिचिकीत्येव ततः पि
व पिवेतिच ॥ ततो स्तुरुधिरंचैव
स्फें स्फें किरि किरीति। कालि
कायै नम इति कालरात्र्यास्तुमंत्र।
कं इत्यनेन तु मंत्रेण करवालः
भिमंत्रितं। कालरात्रिः स्वयं तस्मि
न् प्रसीदत्यविहानये ॥ बलेः पू
र्वोदितान्मंत्रानित्यशो साधकस्तु साथ
कैः अयं मंत्रस्तु वक्तव्य स्तस्य हत्या
विहानये। यज्ञार्थे पशवः सृष्टाः
स्वयमेव स्वयंभुवा। अतस्त्वाद्य
तयिष्यामि तस्माद्यज्ञे वधोऽवधः
ततो दैवत मुद्दिश्य काममुद्दिश्य
चात्मनः छेदयेत्तेन खड्गेन बलिं
पूर्वैस्तनंतरं ॥ अथवोक्तखड्गं

स्वयं पूर्वमुखस्तथा पूर्वोक्तान्
मैथवादीस्तु रक्ते वक्त्रं नियोजये
त् सौवर्णं राजतं ताम्रं रैत्यं पत्रपु
टंचवा। माहेयकांस्य मश्यवा य
ज्ञकाष्ठमयंचवा ॥ पात्रे रुधिरदा
नायकर्तव्य विभवावधि। नलौ
हे वाल्कले वापि रैत्ये वांगे शिश्
शके। दद्याद्रक्तं वलीनां तु भूमौ
क्वचित्कथंचन। नचदे भूतले
नापि न दत्ते पानभाजने रुधिराणि
प्रदद्यात् भूतिकामो नरोत्तमः ॥
… रस्यतु सदा रक्तं माहेयेनेजसैः
थवा ॥ दद्यात्तु रपतिस्तत्तु नपुटा
दौ कदाचन हयमेधमृते दद्यान्न
कदाचिद्धयं बलिं तथा दिक्पाल
मेघेषु गजं दद्यान्नराधिपः न क
दाचित्तथा देव्यै प्रदद्याद्धय हस्ति
नौ हयाकर्षं चामरं तु बलिं दद्या
न्नराधिपः सिंहव्याघ्रेन रञ्चापि स्व
गात्ररुधिरं तथा नदद्याद्ब्राह्मणो
मद्यं तथा देव्यै कदाचन सिंहव्या
घ्र नरान्दत्वा ब्राह्मणो नरकं व्रजे
त् इहापिस्यात् सहीनायुः सुख
सौभाग्य वर्जितः स्वगात्ररुधिरं द
त्वा वात्महत्यामवाप्नुयात् मद्यं द
त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते
नकुष्मांडं विनिवेद्य बलिं तु ॥ ।

वक्षियःक्वचित् ददतःकुस्मसारंतु
बलिहत्या भवेद्यतः यत्र सिंहस्य व्या
घ्रस्य नरस्य विहितो वधः ॥ ब्राह्म
णोक्तंतु वल्यादौ तत्रायं विहितः
क्रमः कृत्वाह्यतमयं व्याघ्रंनरंसिं
हंचभैरव अथवा पृथविकृतं यव
शोदमयंचवा। ध्यानयेच्चंद्रहासे
नेमेनमंत्रेणसंस्कृतं ॥ प्रभूत व
लिदाने तु होवा प्रीन वाग्रतः कृ
तान् पूजयेत् प्रमुखान् कृत्वास
वीन् तंत्रेणसाधकः सामान्यपू
र्वकथिता … पूर्वतो मया वि
… शोयत्र यथास्तितन्मनः शाण
भैरव ॥ महिषा …
भैरवे भैरवायवा अनेनैव तु मं
त्रेण तथा तं पूजयेद्बलिं ॥ यथा
वाहं भवान् हष्टि यथा वहसि चं
डिकां तथा मम विघ्नं हिंसम्
भवह ललापक ॥ यमस्य वाह
नेत्वस्तु वरव्याय धराव्यय। आयु
र्वित्तं यशो देहि कायणायनमोस्तु
ते खड्गस्यतु यदादानं क्रियते तव
मंत्रणं जलेनाभ्युक्षणं कुर्वीत गुह्य
जातेति भाषयन् देवे पित्रे च स
भगः खड्ग खड्ग सन्निभः छिं।
धि विघ्नान् महाभाग गुह्यजात न
मोस्तुते प्रदाने कुष्मसारस्य मंत्रो



ऽयं परिकीर्त्तितः। कृष्णसार ब्रह्म
मूर्त्ते ब्रह्मतेजोविवर्द्धन चतुर्वेदम
यः प्राज्ञः प्रज्ञां देहि यशो मम ॥
तथाशरभ हृज्जायामन्त्र मेतत् प्र
कीर्त्तितं त्वमष्टपादो विध्वंश चं
द्रभाग सम्भवः अष्टमूर्त्ते महा
भागभैरवाख्य नमोऽस्तुते यथा
भैरवरूपेणावराहो निहतस्त्वया।
तथाशरभ रूपेण रिपुविघ्नान्विम
र्दय हरिस्वरूपेण यथा वह
सि ... तथा प्रभाति मे निशं
वक्रविघ्नांश्च मर्दय न ... ः शि
रूपेण जगत् प्रस्मह रूपिणं ज
यान येन प्रसेन हिरण्यकशिपु
हवत् रक्षैवं सिंह हृज्जायांक्रम
उक्तो मयातव नरे स्वगात्ररुधि
रे पर्याय मृगभैरव पीवेचेही
यते मर्त्यं बलिं दद्यात् श्मशान
के श्मशाने हेरुकाख्ये च तत्
पूर्वं प्रतिपादितं कामाख्या नि
कटे शैल तेशादौ विदितं तत्कर्मं
मम रूपं श्मशानं तु भैरवाख्येन
कथ्यते नैऋतं तपः सिद्धो
त्रिभागं न भविष्यति पूर्वांशे भै
रवाख्ये तु सम्भूत् स्वहि तेरसाव
रहितांगेषु शिरो दद्यात् भैरवा
मृगरूमाल्यया रुधिरं पाद्यसमा।

शेत हेरुकाख्ये नियोजयेत् द
त्वा संपूज्य च नरं विसृज्यागमन
क्रमे पीठश्मशानेषु बलिं नेते
न बलिदायकं अन्यत्रापि यत्तेय
त्रदीयतेऽयं महाबलिः तत्राप्य
न्यत्र चोत्सृज्य छिन्नान्यत्र शिरो
म्बरं। निवेदयेत् साधकस्तु वि
स्मयन विलोकयेत् सस्तानं मनु
जं दीप्तं पूर्वोक्तं नियतात्मवं। मां
सं मैथुन भोग्येन हीनं स्वक्चन्द
नोदितं कृत्वोत्तरामुखं तत्र त
द्देशेषु च देवताः पूजयेत्ता
त्रान देवतेन च मानुषं ब्रह्मरं
ध्रेषु ब्रह्माणं नाशायां च मेदि
नीं कर्णयोस्तत्तथाकाशजिव्हा
यां सर्वतेजोमुखं ज्योतीषि नेत्रयो
र्विष्णुं वदने मरिपूजयेत् ललाट
पूजयेच्चेन्द्रं शाक्रं दक्षिणगण्डेन।
वामगण्डे तथा वह्निं ग्रीवायां यम
वर्त्तितं केशाग्रे निर्ऋतिं मध्येभ्रुवो
श्चापि प्रचेतसं नासामूले च [illegible]
[illegible] धनेश्वरं। हृदये सर्प
राजं तु पूजयित्वा पठेदिदं नरवर्म
महाभाग सर्वदेव मयोत्तम रत
मां प्राणापन्नं मद्वाक्यं चैवांधवं॥
मत्ताश्रमाश्रमसमा [illegible] गाम्याम।
स्थितं रक्षतु परित्यज प्राणान्।

मरणे नियते सति महामायाभिदा
नैश्वर्यं त्वेयेत् साधकेन्द्रणां तन्मेद
हि महाभागास्त्वं चापि मामुद्दिश्य।
ये राक्षसाश्च पिशाचाश्च वेताला
ये सरीसृपाः नृपाश्च रिपवश्चा
प्येनमात्तेच्छन्नत्वन कृते ॥ तत्कं
ठनालगलितैः शोणितैरंग संयु
तैः। आप्यायस्वान्यवृन्दस्वामर
णे नियते सति ॥ एवं संपूज्य वि
धिवत् पूर्वं तं देवपूजयेत्। पूजि
तो मत्स्वरूपोऽयं दिक्पालाः पि
ष्ठितो भवेत् अधिष्ठितस्तथाऽन्ये
श्च ब्रह्माद्यैः सकलैः सुरैः कृत
पापोऽपि मनुजो निष्पापो मत्
जायते तस्य निष्कलुषस्याश्रूपी
युषं श्रोणितं भवेत्। प्रीणाति च
महादेवी जगन्माया जगन्मयी सो
पि कायं परित्यज्य मानुषं न चिरा
त्ततः भवेद्गणानामधिपो मया
पि वकृ सत्कृतः इत्येषा पाप
युक्तं मलमूत्रवसायुतं नैव बलिं न
हि शक्नोति कामाख्या पितामतः
ग्रसेष्ठो महिषादीनां बलीनामथ
पूजनात् कायो मेध्यत्वमायाति।
रक्तं शक्नोति वे शिवा अन्येभ्योऽपि च
देवेभ्यो यदा यदा प्रदीयते तद
र्चितं प्रदद्यात् ॥ :९: ॥

जितायसरायवै कार्ण्डं गं चाति
वृद्धरोगिणां च गलत्व्रणं। क्लीवं ही
नाग मथवा हुहलिंगं गलत्कुष्ठं ॥
श्वित्रिणं चातिकृशं च महापातकि
नं तथा अहाद्दशाकं वर्षीयं शिशु
सूतकसंयुतं। ऊर्द्धं संवत्सराच्चा
पि महागुरुनियातितं कर्मितो वैतो ल चर्म ये
पि पक्षीणां पक्षिणां चापि नराणां
च शेषतः स्त्रियं न दद्यात् बलिं
त्वा नरकमाप्नुयात्
दानेषु योषितं पशु पक्षिणोः
बलिं दद्यान्मानुषीं तु स्त्रकामसवा
तश्रजितं न विमासीयकान्यूनं प
शुं दद्यात् शिवावलिं। न च त्रिप
क्षकं न्यूनं प्रदद्याद्वैपतत्रिणं का
न्यूनं प्रदद्याद्वैपतत्रिणं काणांध्र
गादि [illegible] न पशुपक्षिणां तथा
देवे दद्याद्यथा मर्त्यं तथैव पशु
पक्षिणो छिन्नलांगूल कर्णादि
भग्नदन्तं तथैव च भग्नशृंगादिकं
चापि न दद्यात् कदाचन न ब्राह्म
णं बलिं दद्यात् चाण्डालमपि पार्थि
व [illegible] द्विजदेवेभ्यः सूपते
[illegible] विजितं दद्या
[illegible]
देवापि पितरे च विरोधितं विदुःप
पतिं च न दद्यात् भागिनेयं च मा
तुलं। ॥



तलं अन्यस्मान्नापि दद्यात् तथाः
त्सानानस्यगाहिनात् उत्कालाभे प्र
दद्यात्तदर्दभंवाष्टमेवच त्वामेः
मेषानविनदेद्याच्चमृष्टंवरंतथा
संपूज्यविधिवन्मंत्रपश्चपद्मिणा
मेववा संछिद्यचापिमंत्रेणमंत्रे
णैवनिवेदयत् नारंसमेषशिरोर
क्तं देव्याः सम्यङ्निवेदयेत् । छा
गेनवाममतोदद्यान्माहिषं वितरेत्
पुरः पश्चिमंवामतो दद्यादश्वतो
देह शोणितं क्रव्यादानांपश्चतोत
पश्चिमंचशिरोसजं ॥ वामे नि
वेदयेत् पार्श्वे जलजानाथी
कूर्म स्य कूर्मस्य खङ्गस्य;
शाकस्य च ग्राहानामथमत्स्यानां
मग्र एव निवेदयेत् । सिंहस्यद ।
क्षिणे दद्यात् खङ्गिनोपिच दक्षि
णे पृष्ठदेशेनदद्यात्शिरोवाह
पिरंवलेः । उष्ट्रमेव द्रणेवापि ।
सर्पस्य विनेत्रमरं यः कश्चिद्रज
पुरुषो मानवस्तपि कदाचन व
लिदानदिनात्पूर्वदिवसेनव
लिनरं मार्जकोकेति मंत्रेण देवी
स्नानवतेणव गंधद्वारेत्यनेन ।
पि खङ्गशीर्षे निधायच नखिन
खङ्गेच गंधादिस्नानेना पिवास
येत् गंधादिकंनवखङ्गसंयोगलेनतस्यमस

येन् ग्रीवेः स्विकेति मंत्रेणरौद्रेण
भैरवस्यच एवंतु संस्कृतेमंत्रे
देवी रक्षति तंवलिं । न तस्याद्या
पद्यश्चापि त्वग्गणे तारजनोनचन
सूतकेहर्षयेत्तस्मात्तन पत्निम
नादिकं ॥ छिन्ननरस्य शीर्षन्त
पतितंयत्रयत्रच यत्भूभंचा
भंवापि पक्षादीनांचनतस्त्रण
छिन्नशिरस्तथैव शाल्मानावदिष्टा
घड्रादसे पतितंगान्महानिचवि
नाशंच विनिर्दिशेत् पूर्वाग्रिया
स्यवाहणवायव्यादिगतंकमात्
श्रियंमुष्टिं भयं लाभं पुत्रलाभं
धनंतथा कमादिनिर्दिशोन्नारंछि
न्नशीर्षन्त भैरव उन्नतादिकमादे
वमहिषस्यापि मस्तकः पतितो
वापु काष्ठांते स्तब्धेयेनस्याण्व
नत भोगंहानि स्तब्धैस्पृष्टंविनं
तिष्कृतयो भयं राज्यलाभश्रियंचा
पि कमान्नदिदि भैरव । पश्चूनांचै
व सर्वेषांछागादीनामशेषतः ।
एवं फलं कमाहिद्याहतेजलभवा
णंनो । जलस्थाने पश्चिमंतवा
स्य नैर्ऋतंयो भयं अन्यत्र नश्रि
यंदद्यात् पतितंमासितंशिरः यः
स्यात्कदकलशाहोदेन्नानांछिन्नम
स्तके ॥ नरागांपश्चपक्षादि ॥

ग्राहादीनांच रोगदः लोतकंचव
षोजीतं यदि स्रवति मस्तके । छि
न्नेनरस्यराजस्यतदाहानिविनिर्दि
शेत् माहिषे मस्तके नेत्राद्यदि स्र
वतिलोतकं ॥ छिन्नेनिवेदितेवैरि
भूपसत्त्वंतदादिशेत् अन्येषाम
प्य पक्षादि वलीनां शिरसोदिता
त् निर्गतेलोतकं धने परांभीतिं
गदंतथा । हसति छिन्नशीर्षंच
व्रारंस्यात् रिपु क्षयः ॥ श्रीहृद्धि
रायुषोवृद्धिः सदा दात रसशयः
यघहाको निगदति तथाभवति
वाचिरात् हुंकारादान्यहानिःस्या
त् श्लेष्मस्रावाच्च पंचता । देवा
नांयदिनामानिभाषते छिन्नमस्त
कः विभूतिमतलांविंद्यात् षण्मा
साभ्यंतरे नदा । रुधिरादानकाले
त शाकन्मुखे यदि स्रवेत् ॥ कायं
तदाधश्चोर्द्ध वा दातः सम्भरणं त
था श्राद्धेपादाम यादस्यमहारोगः
प्रजायते अन्यश्राद्देपवदणेःक
ल्याणमुपजायते महिषस्यतुर ।
क्तस्य मानुषस्याथ साधकः अग्र
ष्ठानामिकाभ्यांतु किंचिदुद्धृत्य भू
तले महाकौशिकमंत्रेण निति
पेद्बलि सत्तमं ॥ देवेभ्यः पूतना
दिभ्यो नैर्ऋत्यां दिशि पू ॥

र्वतः । महिषः पंचवर्षीयः पंचविं
शतिवार्षिकः वलिर्देयोनरोदे
व्ये तस्य रक्तंतु भूतले नेत्रवीज
त्रयं कामवीजं ह्यातात् प्रजापतिः
वह्निवीजंवदस्वराभ्यांसपृक्तम्
तथा परः । स एवेता स्तथैताव
दादि वर्गान्त संयुतः षष्ठस्वर शि
खाविंदु चेदु युक्तस्तथापरः हि
नीशिका वीजकांतः कौशिकीस्य
भिमंत्रणं । एषबलिः स्वाहेतिच
मंत्रोयंकौशिकः स्मृता नृपावैरि
वलिंदद्यात् खङ्गमामंत्र्यपूर्ववतः
महिषंवाथवाछागः वैरि
मंत्रच त्रेणवदंनवह्ना त्रिधा त
स्य च मंत्रकैः । छित्वा तस्यान्तमा
गत्र दत्त्वोद्दद्यात्प्रयत्नतः ॥
यदा रिपो हृद्धिर्वलिदानं तदाप
रं दद्यात्तथा शिरश्छित्वा रिपो
स्तस्यलयायच प्राणप्रतिष्ठांच
रिपोः कुर्यात्तस्मिन् पश्चावद्य न
स्मिन् क्षीणो रिपुप्राणाः क्षीयते
विपदायुताः आदौ विश्वरूपिणी
च चंडिकेति ततःपरं वैरिणंत
भुक्ष्वचेतिस्वाहेत्यंवेति तं पुनः ।
वह्निभार्या ततः पश्चात् खङ्गमं
त्रं प्रकीर्तितं स्वयं सवैरीया द्वे
षितमिमं पशुरूपिणं विनाशय



महामायि स्कंदस्कंदं खादय खादय
इमनेनतु मंत्रेण वलेः शिरसि पु
ष्पकं दद्यात्तत स्तु रुधिरं द्रुतं।
ताभ्यां निवेदयेत् महानवम्या
पारदिग्ये वैदीयते वलिः तदा
तदा तदंगभैवमांसे हीमसमाच
रेत् दुर्गातंत्रेण मंत्रेण प्राणीतेदह
नेमुचौ एवं दत्वा वलिं मत्यो विपुल
त्वमवाप्नुयात् नाभेरधस्तात्तु रुधि
रं पृष्ठभागस्य चाप्रिये स्वगात्र रु
धिरं दद्यात्र कदाचन साधकः नोष्ठ
स्य चिवुकस्यापि नेन्द्रियाणां च मान
वः क भिन्नष्वहं वा क्वचित्।
पाणिसनेनथा प्रद्योद्गुधिरं ग्रान्त
नातिक्रम्याच्च साधकः गण्डयो
स्त्र ललाटस्य द्भ्रुवोमध्यस्य शोणि
तं कर्णयुग्मस्य च वाह्वोस्तनयोः
हृदरस्य च कंठाधोनाभिनिष्ठोर्द्ध
गुह्यागस्य यतस्ततः पार्श्वयोश्च
पि रुधिरं दुर्गायै विनिवेदयेत्।
न गुल्फतोः स्वकं दद्यात् यथोभो
पि च साधकः नचरोमा विलादंगा
त्स्पर्शानात्तुभैरव नखदंशच कृतात्
व्रातात्स्वकोत्तं चमांसं स्वं
रक्तं पद्याद्वृषपुष्पस्य पत्रके
सौवर्ण राजते पात्रे कांस्ये वाले।
वमानवः निधाय देव्यै दद्यात्।

तद्रक्तं चेद् मंत्रकैः द्वाणेनकुरि
कावङ्गं संकुल्यादि यदस्त्वकं च्या
तेन हृद्दत्तस्य महाफलमवा
प्नुयात् पद्मपुष्पस्य पत्रेन यावद्रु
क्तं निःशोणितं तत्प्रमाणं च तत्र मा
गाधिकं रक्तं साधकः नकदाचित्
प्रदद्यात् नाङ्गच्छेदमथाचरेत् यः
स्वहृदयसंजातं मांसं माषप्रमा
णतः तिलमुद्ग प्रमाणं वा दे
व्यै दत्वा नभक्तिनः षण्मासाभ्य
न्तरे तस्मात् काममिष्टमवाप्नुयात्
दीर्घकालं तु कं धूपं दीपं यो दद्यात् दी
पवर्तिका हृदये वास्तुपात्रे वि
नाभक्त्या न साधकः तत्क्षणमात्रेण
न दीप्रदानस्य फलं स्मरेत् भुक्ता
चविपुलान्भोगान् देवीगेहे यथा।
छाया कल्पत्रयं तस्याय सार्वभौ
मो नृपो भवेत्। महिषस्य शिरश्छि
न्नं सप्रदीपं विकार्यपरः॥ हस्ताभ्यां
यः समादाय रात्रिं च तिष्ठति
स चिरायुः प्रतन्मूर्ति ईह भुक्त्वा काम
तो स्मात् भोगांस्तेन मद्गणाग्रणी
नामधिपो भवेत् नरस्य शीर्षमा
दाय साधको दक्षिणे करे॥ वामे
तद्रुधिरं पात्रे गृहीत्वा निशि जाग्र
तः यावद्रात्रे स्थितो मर्त्यो राजा।
भवति चेह वै॥ स्वने च मम पुरं॥

प्राप्य गणानामधिपो भवेत्। ताल
मात्रं वलीनां यः शिरोरक्तं करं हि।
ये गृहीत्वा चिन्तयेद्देवीं पुरस्तिष्ठति
मानवः सकामानिह सं प्राप्य दे
वी लोके महीयते महामायेज
गन्नाथे सर्वकामप्रदायिनि दत्ता
मिदेहरुधिरं प्रसीद वरदा भव।
इत्युक्त्वा मूलमंत्रेण नत्ति पूर्ववि
चरणः स्वगात्र रुधिरं दद्यात्मान
वः सिद्धसन्निभः येनात्ममांसस
त्वनदद्यामीस्वरि भूतये निर्वाणते
तत्स्मात्न देहि हुं फट्नमोनमः इत्य
नेन तु मंत्रेण स्वमांसं विनिवेदयेत्।
सोभाग्य सर्वसंपन्नं प्रदीपप्रथमं
प्रचिं दीपयन्मांसमिहज दीपं
ह्रीं फें नमो नमः इत्यनेन तु मं
त्रेण दीपं दद्याद्विचक्षणः। महा
नवम्यां शारदी रात्रौ स्कन्द विशाखा।
याः यवचूर्णमयं कृत्वा पिंडं म
मायमेव वा शिरश्छित्वा वलिंदद्या
त् कृत्वा तस्यान्तमंत्रतः अनेनैवतु
मंत्रेण खड्गमामंत्र्य यत्नतः रक्तं कि
लकिली घोरे घोर धार विहिंसकः
व्रलपिंशी विकाशिख्यम मर्कचा
रि सत्तमं भाते विसर्गसहितः स
च विन्दुयुक्तः परः वलाग्नियोगमस्त्रं दहेण
विन्दुना च॥

समन्वितः शिरश्छित्वा वलिं दद्या
त् कृत्वा तस्य तु मंत्रतः अनेनैव
तु मंत्रेण विन्दुनाच समन्वितः फ
ट्कारेनावलिषु प्रोक्तः खड्गः स्कंद वि
शाखयोः रक्तद्रवैः सेचयित्वा त्री
त्रिमंत्रेण पिंडं वलिं कृत्वा चन्दनस्य तिल
कं ललाटे भिनिवेशयेत् रक्तमा
ल्यधरं कृत्वा रक्तवस्त्रधरं तथा क
ण्ठेबद्धा रक्तसूत्रे नीभौ प्राल्पचक्र
त्रिनं हस्तोर्ध्वं शिरस्कं यः कृत्वाव
द्धेन छेदयेत् शिरस्तस्य ततो द
द्यात् स्कंदायुते नमस्तनःच तद्दृ
शास्त्राग्निभ्यां संसक्तः मपरः स
मः परतः परतः पूर्वं चन्द्रविन्दुस
मन्वितः स्कन्दस्य मूलमंत्रो यं
तेन तस्मै वलिं महेत् चतुर्दश
स्वराग्निभ्यां पद्मनाभं तु पूर्ववत्
प्रोक्तो विशाखमंत्रो यं तेन तस्मै
वलिं सृजेत् कुटिला कोण कस्य पिं
गवर्णो रक्तांशुधारिणी त्रिमु
ले करवालं च पाणिभ्यां दक्षिणे
तथा विभ्रतो स्वकपालं च कर्त्ती
कं चापि वामतः त्रिनेत्रो नरमुण्ड
त्वं माला मुरसि विभ्रतो विक
टोदष्ट्रनो भीमो गणेशो द्वारपा
लको ध्यानेन चिन्तयेद्देव्याः पुरतः
संस्थितो मदा। चैत्रमासि सिते



एतेचवत्सरं स्पर्शाद्विशेषतः बलि
भिर्म्महिषैश्छागैर्मीच भैरवरूपि
णं तोषयेन्मधुभिर्मत्स्यैर्मांसैर्न
तच्छागास्य दत्ततो । चण्डिका बलि
दानेन बलेः शीर्षं जलेन तु ॥ अ
भिषिच्य तु मन्त्रेण मूलेनैव निवेद
येत् ईषत् प्राणान्त वक्रं या कालि
ते पूर्वमर्च्चितं वीक्षेत कामस्य सि
द्धिं तु सिद्धो भावेश्च साधकः । सिन्न
मेनो रुधिरस्येयं योगपीठस्य सन्नि
भः । ध्यायेयस्मिन् महामायासि
द्धिं तोषयते नमः । अनेनामन्त्रितः
शीर्षं न विरायदि वेपते ॥ तत्
कार्यस्य तदा सिद्धिरसिद्धिं तु वि
पर्य्ययात् । एवं दद्याद्बलिं वीरे
‥ क विधि ‥
त्वर्वर्गमाप्नोत्यसंशयं एवं बलि
प्रदानस्य क्रमो रूपं तथैव च क
थितो हि धिराध्याय उपचारान्तर
णुष्व मे इति कालिकापुराणे ६६
अध्यायः । बलिदान निषेधो यथा
जीवानुकम्पा विज्ञानं तत्तो तु में
सदाशिवः एतत्कथय मे प्रीत्या
गूढमेतद्धि वो मया सर्वं विस्मय ।
प्राणीनान्त्वद्भक्ताश्च कथयाशिव म
न्ते मे अन्येषां पतिः कथं काममया
वयं मयाकरं रहस्यमिमं वाहि भद्रे ।

स्तनिस्थितं शांकरी तद्वचः श्रुत्वा
शिववक्त्रविनिर्गतं भीतात्पतति
उल्लेखं प्रत्युवाच सदाशिवं ॥ श्री
पार्वत्युवाच ये ममार्च्चनमित्युक्त्वा
प्राणिहिंसनं तत्पराः । तत्पू
जनं ममामेध्यं यदोषात्तदधोग
तिः मदर्थं शिव कुर्वन्ति तामसा
जीवघातनं आकल्पकोटिनि
येतेषां वासोन संशयः ममनाम्ना
यज्ञवा यत्ते पशुहत्यां करोति यः ॥
क्वापि तन्निष्कृतिर्नास्ति कुम्भीपाक
मवाप्नुयात् देवपित्रे तथात्मार्थं
यः कुर्यात् प्राणिहिंसनं । कल्प
कोटिशतं शंभो रौरवे स वसेत् प्र
भुं यो मोहात्मानमेवेह हत्यां कु
र्यात् सदाशिव एकविंशतिकुलं
ध्वस्तं तत्तयो नितु जायते यज्ञे यज्ञे ।
पशून् हत्वा कुर्य्यात् शोणितक
र्दमं । स एव नरके नाव यावल्लो
मानि तत्पशोर्हे हत्वा कर्मानतथोत्सर्ग
कर्मा धर्मा तथैव च तत्समा भवति
सर्वे नरकं वनरकगामिनः ममो
द्देशे पशून् हत्वा सरर्के पावमत्तस
जेत यो मूढः सत्त्वरौरवमेघदि
न संशयः देवतान्तरमन्नाम योजन
लोकन्या तथा । हत्वा जीवांश्च यो
मद्येन निर्म नरकमाप्नुयात् ॥

यूपे वद्धा पशून् हत्वा यः कुर्य्या
द्रक्तकर्द्दमं । तेन चेत् प्राप्यते
स्वर्गो नरकं केन गम्यते । उप
देष्टा वधहन्ता कर्त्रीधर्मोचवि
क्रयी उत्सर्गकर्त्ता जीवानां स
र्वेषां नरकं भवेत् मत्स्यस्यैव
यायापि प्राणिनां क्रयविक्रये ।
तथा हुत्वा स्थल्तनायां कुम्भीपाको
भवेद्ध्रुवं स्वयंकामाशायो भक्ष्यो
त्तानेन विमोहितः हत्यमानात् वि
विधान् जीवान् कुर्य्यान्मन्नाम प्रशं
कर तत्रास्य वंशस्य त्रितत्तातिदा
गादि संपदः अचिराद्ध भवेत्पापो
त्मनः स नरकं व्रजेत् देवयज्ञेपि
न श्राद्धे तथा मांगल्यकर्मणि ।
तस्यैव नरके वासो यः कुर्याज्जी
ववातनं ॥ तथा । महाजेन पशू
न् हत्वा यो भवेत् सह बन्धुभिः तत्र
य लोमसंख्या हि रक्षिपत्रवने वसे ।
त् अत्रावयो रन्वेदानां तान्याच मरक
मणि यः संपोष्य पशून् हन्यात् सो
पतामिस्रमाप्नुयात् पशून् हत्वा
तथात्मांसा यो ऽत्ति येन्मांसशोणि
तैः तावन्न नरके वासो यावत् हृति
वाकृतो निवेदिभस्म तत्पतन व
कृ हत्वेण यत्कृत यस्मिन् यज्ञे प्र
मोहाभो जीवहत्या भवेद्ध्रुवं ॥

वं यज्ञमारभ्य चेत् शाक्तः कुर्य्या
द्धे पशुघातनं स तदा घोरानि
गच्छेदितरेषां च का कथा आव
योः पूजनं मोहाद्ये कुर्य्युर्मांस
शोणितैः पतन्ति कुम्भीपाके ते
भवन्ति पशवः पुनः फलका
मास्तु वेदोक्तेः पशोरालभनं
मखे पुनस्तत्तत् फलं भुक्त्वा
ये कुर्वन्ति पतन्त्यथः स्वर्गकामो
ऽश्वमेधं यः करोति निगमात्त
या तज्ञो गात्रे पतेद्यः स जन्मा
नि भवार्णवे । यो हताः पशवो
लोके निहत्वार्थे पुको विदेः ते
परत्र तत्तान् हन्युस्तत्थ्याखे त
शाकर आत्मपुत्र कलत्रादिस
म्पत्ति कुलेच्छया यो दुरात्मा प
शून् हत्वा ‥ त्मार ‥ तये
त् सत्त्व जानन्ति तो वेदपुर मनं
ये कर्मठाः पण्डितमानयुक्ताः
लोकाधमास्ते नरके पतन्ति
कुर्वन्ति मूर्खाः पशुघातनं चेत् ॥
येऽज्ञानिनो मन्दधियो ह्यनार्या
भवे पशुघ्नान्ति न धर्मशास्त्रं जा
नन्ति ताके नरकं न मुक्तिं गच्छ
न्ति घोरं नरकं नराश्च ते प्रका
शान्तविदन्ति शाकाः नयधर्मतामोपप्रमा
पितव्य यापनं तत्पशुघातनं काप
एयो दवासो भवन्तीरतेषां जीवान



कस्यांनविदंतिमूढात्मानात्स्वये
सन् पश्चिनोनधर्मस्सार्तोभवे
प्राणिवधंनकुर्य्यात्तेयांनिमस्तः
खलैरैरवाख्ये नरकेखलुजंत
नोघ्नानेंनेनोकरिष्यति स्युहात्मा
धर्मवान् ज्ञानीप्राणंतेनैवमान
वः यदीच्छेदात्मनःश्रेयंतस्मात्ता
नेतदानरः जीवान्कानपिनोहन्या
नसंकटापन्नएवचेत् संपन्नोच
विपन्नोवा परलोकेसुखकःप्रभा
नकदाचित्प्राणिनोहिंसांनकुर्य्या
त्तत्त्ववित्सुधीः मानवोयःपरत्रे
हनंतमिच्छेत् सदाशिव सर्वदि
स्वप्नपतनेननकुर्य्यात् प्रा`` व
धाद्यतियोमर्त्योजीवान्तत
त्त्वधर्मवित् किं पुनरेतत्स्वदेहे
हेवलादत्रस्तनरदति योरेतन्
चानतान् शंभोजीवमात्रंदया
परःक्रममियतमोनित्यंसर्व
रक्षांकरोतिसःएकस्मिन्नति
नेन्द्रीत्रैलोक्येनेनरक्षितंव
धात्शंकरवैयेनतस्मात्तत्तेत्र
ज्ञानेयेत् तथा पशुहिंसाविधि
र्येनपुराणेनिगमैस्तथा अङ्गोर
जस्याभ्यासकेवलंतमसावृते।
तानरकस्वर्गसेवार्थंसमासाद्य
प्रवर्त्तितः यन्नत्तत् कर्मभोगेन
गमनागमनं ॥

भवेत् समेन सात्वेन गृहे सवि
धिनैव शंकर प्रवृत्तिनोनिह।
त्तिस्तु यद्यपि सात्विकी क्रिया
एवंनानाविधं कर्म पशोरात
भनादिकं कामाशयःफला
कांक्षीकृत्वात्वनेनमानवःपश्वा
ज्ञानाशिनाच्छित्वाभ्रांमाशांता
मंसीसदा यमभीतिहरंभजाय
दिगोविंदं माश्रयेत् इतिपाद्मो
त्तरखंडे १०४।१०५ अध्यायः॥

बलिः स्त्री जरयाश्लथचर्म तस्य
पर्यायः चर्मतरंगः२ त्वगूर्म्मिः३
त्वक्तरंगः४ इति राजनिर्घण्टः।
जठरावयवः। गृहदारुप्रभेदः
इति मेदिनी गुह्याङ्कुरः यथा।
पंचात्मामारुतःपित्तंकफोगुदव
लित्रयं सर्वएवप्रकुप्यंति गुद
जानां समुद्भवे तस्मादर्शांसिदुः
खानिबहुव्याधिकराणिच सर्व
देहोपतापीनिप्रायःकृच्छ्रतमानि
च वाताद्याःत्रिवलीजातानान्येकदो
षोल्वणानिच अर्शांसिसुखसा
ध्यानि नचिरोत्पतितानिच॥
द्वंद्वजानि द्वितीयायांवलौया
न्याश्रितान्यपि। कृच्छ्रसाध्यानि
तान्याहुःपरिसंवत्सराणिच।
सहजानि त्रिदोषाणि यानि।

चाभ्यंतरा वलिं। जायंतेऽर्शांसि
संश्रित्य तान्यसाध्यानि निर्द्दिशे
त् इति माधवकरः॥

बलिका स्त्री अतिबला इतिराज
निर्घण्टः॥

बलिदानं क्लौ देवोद्देशेन यथा
विधि पूजोपहार त्यागः। दुर्गा
दि देवतोद्देशेन संकल्प पूर्वक
च्छागादि पशुघातनं यथा बलि
दानेन सततं जयेच्छत्रून्नृप
इति कालिकापुराणे अस्य विधि
निषेधौ बलिशब्दे द्रष्टव्यौ॥

अथ बलिदान क्रमः स्वयमुत्तरा
भिमुखः पूर्वाभिमुखंबलिंसम्मुखा
वयवं संस्थाप्य पुष्पमाल्य क``
वेष्टयित्वा स्नानं समानीय कृतांज
लिः पठेत् ओंवाराही यमुना गंगा
करतोया सरस्वती कावेरी चन्द्रभा
गा च सिंधुभैरव सागराः पशुस्ना
नविधानाय सान्निध्य मिह कल्प
य इति तीर्थान्यावाह्य ओंपशुःप
शुरासीत्तेना यजंत स एतल्लोक
मजयत्तस्मिन्नग्निः सतेलोको भ
विष्यति तं जेष्यसि पिबैताऽपः।
ओंवायुःपशुरासीत्तेनायजंत स
एतल्लोकमजयत्तस्मिन् वायुः स
तेलोकोभविष्यतितंजेष्यसिपि ॥

बैताऽपः। ओंसूर्य्यःपशुरासीत्तेना
यजंतसएतल्लोकमजयत्तस्मिन्सू
र्य्यःसतेलोकोभविष्यतितंजेष्यसि
पिबैताऽपः। ओंवाचंतेशुंधामिप्रा
णंतेशुंधामि श्रोत्रंतेशुंधामि मे
ढ्रंतेशुंधामि पायुंतेशुंधामि मन
स्त आप्यायतां वाक्त आप्याय
तां प्राणस्त आप्यायतां चक्षुस्त आ
प्यायतां श्रोत्रंत आप्यायतांयत्ते
क्रूरं यदास्थितं तत्त आप्यायतां
तत्तेनिष्ठायतां तत्ते शुध्यतु शमहो
भ्यः स्वाहा इतिमंत्रैः स्नापयित्वा
ओंमेघाकार खंभमध्ये पशुंबंध
य बंधय सर्वांगावयवं पशुं बं
धय बंधय ब्रह्माण्डखाण्डरूप स्त
म्भे पशुं बंधय बंधय फट्स्वा
हा ओंह्रां ह्रीं ह्रूं चंडिकायैइम
पशुं मोहामि स्वाहा इति मोहयि
त्वा ततः सर्वांगावयवं पशुं मोह
ह्रूं ह्रूं स्वाहेति मोहं कृत्वा दम
स्वेति ललाटे सिंदूरं दत्वा ओंच्छाग
पशवे नमः इति पाद्यादिकं दत्वा प
तत्पश्चात्ये ओंपाशाय नमः पशन्
संप्रदानीयायै ह्रीं दुर्गायै नमः इ
ति पुष्पं दत्वा पशोरंग देवताः।
पूजयेत् यथा शिरसि ओंरुधिरदे
व्यै नमः ललाटे ओंपांतिन्यै नमः



क्रमध्ये ॐभृंगायैनमः चक्षुषोः
ॐत्रिनेत्रायै नमः कर्णयोः ॐपार्व
त्यैनमः घ्राणे ॐगोप्यै नमः चिबु
के ॐचण्डिकायैनमः दन्तपंक्तौ ॐ
उग्रचण्डिकायैनमः जिह्वायां ॐ
चण्डवत्यै नमः मुखे ॐविरूपा
क्षायैनमः ग्रीवायां ॐचण्डायैन
मः पृष्ठे ॐमहाभैरव्यैनमः उदरे
ॐवैष्णव्यैनमः चरणद्वये ॐचण्ड
प्रियायैनमः पार्श्वयोः ॐसर्वेश्व
र्यैनमः कटिदेशे ॐविरूपाक्षायै
नमः खड्गाग्रे ॐकौशिकैनमः लां
गूले ॐमहर्षिगणेभ्यनमः सर्वांगे ॐ
पश्वधिष्ठान देवताभ्यो नमः इति
संपूज्य उत्सर्जेत् त्रिसूत्रः ॐतत्सद
द्यादि :: सिध्य : देश अमुक ति
थौवार्षिकशरत्कालीन दुर्गाम
होत्सवे अमुकगोत्रस्य श्रीअमुक
स्य दुर्गाप्रीतिकामनया दुर्गादेव्यै
इमं पशुं वह्निदैवतं त्वभ्यमहं दा
तुमिच्छामि इत्युत्सृज्य कृतांजलिः
पठेत् ॐछागत्वं बलिरूपेण मम
भाग्यादुपस्थितः प्रणमामि ततः
सर्वरूपिणं बलिरूपिणं यज्ञार्थे प
शवः सृष्टाः स्वयमेव स्वयंभुवा अ
तस्त्वां घातयिष्यामि तस्माद्यज्ञे वधो
ऽवधः पशुर्योनिषु लोमसिद्धाहोमादि

कर्मस्तु तस्माभवतुसादेवी सरक्षा
पिशिनेस्तव चण्डिकाप्रीतिदानेन
दातुरापद्विनाशनः चामुण्डाब
लिरूपाय बलत्वभ्यं नमोस्तुते ततः
पशुपाशाय विद्महे शिरश्छेदाय।
धीमहि तन्नः पशुः प्रचोदयात् इ
तिकर्णे जपेत् ततः खड्गमानीय
क्रीं इति बीजाक्षरं लिखित्वा ध्या
येत् कृष्णंपिनाकपाणिंच का
लरात्रिस्वरूपिणं उग्रंरक्तास्यनय
नं रक्तमाल्यानुलेपनं रक्ताम्बरध
रंचैव पाशहस्तं कुटुंबिनं पिबमानं
च रुधिरं भुंजानं क्रव्य संहतिं एवं
खड्गं ध्यात्वा गृहीत्वा ॐरसना ::
चण्डिकायाः सुरलोक प्रसाधकः
इतिमिमंत्रयेत् ऐंक्रीं खड्गायनम इति
पाद्यादिभिः संपूज्य ततः मंत्रो ॐम
हादेवायनमः धारे ॐयमायनमः
अग्रे ॐवरुणायनमः ॐशक्तिर्विश
सनः खड्ग तीक्ष्णधारो दुरासदः
श्रीगर्भो विजयश्चैव धर्मपालनमो
स्तुते इत्यष्टौ तव नामानि स्वयमुक्ता
नि वेधसा नक्षत्रं कृत्तिकास्तभ्यं गुरु
र्देवो महेश्वरः हिरण्यं च शरीरं ते
धाता देवो जनार्दनः पिता पिता
महो देवस्त्वं मां पालय सर्वदा नी
लजीमूतसंकाशस्तीक्ष्णदंष्ट्रः।

कृशोदरः भावशुद्धो मर्षणोग्र
श्च तितेजास्तथैव च ॐतीक्ष्णदं
ष्ट्रायनमः इति पुष्पं दत्वा ॐक्रीं
फट् इति खड्गमादाय ॐकालि
कालि वज्रेश्वरि लोहदण्डायैनमः
इति जपित्वा छागस्य ग्रीवायां ए
कं त्वं शीघ्रं छिन्धि छिन्धि फट् फट्
स्वाहा इति पूर्वाभिमुखं बलिं स्वयं
मुत्तरामुखः उत्तराभिमुखं बलिं।
स्वयं पूर्वाभिमुखो वा सकृत् प्रहा
रेण छिन्द्यात् ततो मस्तकादि पा
त्रे रुधिरमादाय चतुर्भागं कृत्वा।
पूर्वस्यां ॐविदारिकायै नमः आ
ग्नेय्यां ॐपूतनायैनमः नैर्ऋत्यां।
ॐपापराक्षस्यैनमः वायव्यां ॐकौ
शिक्यैनमः ॐतत्सदद्यामुके मा।
सि अमुकपक्षे अमुकतिथौ वार्षि
क शरत्कालीन दुर्गामहोत्सवे अ
मुकगोत्रस्य श्रीअमुकस्य दशवर्षी
वच्छिन्न श्रीदुर्गाप्रीतिकामः श्रीदुर्गा
देव्यै छागपशु रुधिरं दास्यामि इति
संकल्प्य ॐकालि कालि महाकालि
कालिके पापनाशिनि प्राणितंचैव
लिगृह्ण वरदे वामलोचने पशुरुधि
रबलिः ॐदत्तमस्त्विति मंत्रेणदद्यात्
ततः ऐंह्रींश्रीं कौशिकि रुधिरेणाप्या
यतामिति वदेत् ॥

ततः शिरसि ज्वलत् प्रदीपं दत्वा ॐत
त्सदद्यामुके मास्यमुक पक्षे अमुक
तिथौ वार्षिक शरत्कालीन दुर्गा
महोत्सवे अमुकगोत्रस्य श्रीअ
मुकस्य श्रीमद्दुर्गा दर्शनाभिवंदन
स्पर्शनाभिपूजन स्नपन तर्पणज
नित सर्व पूर्वाधिक पुण्याधिक
पुण्य प्राप्तिकामो दुर्गादेव्यै सप्र
दीप छागपशुशीर्षं दास्यामीति
संकल्प्य एवं सप्रदीप छागपशु
शीर्षबलिः क्रीं दुर्गायैनम इत्यु
त्सृज्य ॐजय त्वं सर्वभूतेशे सर्व
भूत समावृते रक्ष मां निज भूते
भ्यो बलिं भुंक्ष नमोस्तुते ततः
खड्गरुधिरमादाय ॐयं यंस
च्छामि पादेन :: स्पृशामि च
वक्षा सम मे वशमन्यायान्त यदि
शक्र समो भवेत् इति ललाटे
तिलकं कुर्यात् मेषचानेन
मेषस्नेहेन योन्ये मेषरुधिरदा
ने तथैकवर्षावच्छिन्न दुर्गाप्रीति
कामः प्रभूत बलिदानेन होवाची
नवाञ्छयनः कृत्वा संप्रोक्ष्य ततन्
पशुभ्यो नम इति संपूज्य छागत्व
मित्यकवचनान्तरेण प्रयोगः पश्च
तोयेधरे वाक्ये त्तपनान् पश्यन् त
भ्यमहं घातयिष्ये रुधिरदानेन
पतान् रुधिर बलीन् दास्यामि



इति संकल्प प्रत्येकेन दद्यात् शी
र्षदानमप्येवं ततो मूलमंत्रं यथा
शक्ति जप्त्वा समर्पयेत् प्रणमेदिति नं
दिकेश्वरपुराणोक्तपद्धतिः ॥
अथ तांत्रिकबलिदानविधिः त
त्र सल्लक्षणं पशुं देव्यग्रे संस्थाप्य
वक्ष्यमाणविधिना उत्सृजेत् ।
तदुक्तं यामले देव्यग्रे स्थापयित्वा
तु पशुं लक्षणसंयुतं स्नपयेत् सर्व
पविलेपात् भूतानुत्सारयेत्ततः
अर्घोदकेन संप्रोक्ष्य अस्त्रेण सं
रक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रया
अमृतीकृत्य गंधपुष्पादिभिः पशुं
संपूज्य मूलेन सप्तधा ततः पशु
इयाप्रोक्षणं कृत्वा कर्णे इमं मंत्रं
पठेत् पशुपाशाय विद्महे विश्व
कर्मणे धीमहि तन्नो जीवः प्रचोद
यात् ततो ह्रीं कालिकालि वज्रे
श्वरि लौहदंडायै नमः इति मंत्रेण
खड्गं पूजयेत् ततः खड्गस्याग्रम
ध्य मूलं क्रमेण पूजयेत् यथा
ॐ वागीश्वरी ब्रह्मभ्यां नमः ॐ
लक्ष्मीनारायणाभ्यां नमः उमा
महेश्वराभ्यां नमः । ततो ब्रह्म
विष्णु शिव शक्ति युक्ताय खं
ड्गाय नमः । इति सर्वत्र पूजयि
त्वा प्रणमेत् खड्गाय खरधारा
य शक्तिकार्यार्थतत्पराय पशुश्छेद्यस्त्वया
शीघ्रं खड्गनाथ नमोऽस्तु ते ततो
महावाक्यं अमुकदेवता प्रीति
कामः अमुकदेव्यै इमं पशुमहम्
महं संप्रददे ततो निवेदयेत्
यथोक्तेन विधानेन तुभ्यमस्तु
समर्पितं ततो बलिं छिंद्यात् त
तो रुधिरं समांसं देव्यै दद्यात् त
तो वशिष्टं वटुकाभ्यो बलिं द
द्यात् । यथा ॐ वटुकाय न
मः इति गंधादिभिः ॥ संपूज्य
पूर्ववन्मंत्रेण वायव्ये बलिं दद्या
त् ॐ यां योगिनीभ्यो नमः इति सं
पूज्य पूर्वमंत्रेण ईशाने बलिं दद्यात्
ॐ क्षां क्षेत्रपालाय नमः इति संपू
ज्य पूर्ववन्मंत्रेण नैर्ऋत्यां बलिं द
द्यात् ॐ गां गणपतये नमः इति सं
पूज्य पूर्ववन्मंत्रेण आग्नेय्यां गणे
शाय बलिं दद्यात् इति तंत्रसारः
वलिध्वंसी पुं विष्णुः इत्यमरः ॥
वलिनः त्रि वलिभः जरया श्लथ
चर्मयुक्तः इत्यमरः ॥
वलिनंदनः पुं बाणासुरः । इति
शब्दरत्नावली ॥
वलीनी स्त्री वाद्यालकः ॥
इति शब्दचंद्रिका ॥ ॥

वलिपुष्टः पुं काकः इत्यमरः
वलिपोदकी स्त्री उपोदकी इति
राजनिर्घण्टः ॥
वलिप्रियः पुं लोध्रवृक्षः इति
शब्दचंद्रिका ॥
वलिभः त्रि वलिनः इत्यमरः ।
वलिभुक् पुं काकः इत्यमरः ॥
वलिमंदिरं क्ली अधोलोकः पा
तालं इति शब्दमाला ॥
वलिमान् त्रि वलिनः जरया श्ल
थचर्मयुक्तः इत्यमरटीका ॥
वलिमुखः पुं वानरः इत्यमरटीका
यां रमानाथः ॥
वलिष्टः पुं उष्ट्रः इति राजनिर्घण्टः
वलिष्ठः त्रि अतिशयबलवान् ।
यथा प्रायश्चित्तं विना हन्तात्मेवभु
हमानसा अकामाया वलिष्ठेन त
स्त्रीजारेण इच्छति इति ब्रह्मवैवर्त्ते प्र
कृतिखण्डे ५५ अध्यायः वलि ।
ष्ठा यथा वायुः १ विष्णुः २ गरुडः ३
हनूमान् ४ यमः ५ महावराहः ६ स
र्तः ७ सत्यनिष्ठा ८ गजः ९ ऋक्षरा
जः १० बलरामः ११ वाली १२ वलि
१३ भीमः १४ सती १५ शेषः १६ पुरा
कृतं १७ इति कविकल्पलता ॥
वलिसः त्रि अपमानितः इत्युणा
दिकोषः ॥
वलिसद्म क्ली रसातलं इत्यमरः
वलिहा पुं विष्णुः इति हेमचंद्रः
वली पुं बलरामः इति शब्दरत्ना
वली उष्ट्रः महिषः वृषभः ॥
सूकरः कफः कुंदवृक्षः । इति
जटाधरः माघः वलयुक्ते त्रि ।
तत्पर्यायः । अंशलः २ निर्ह्रीयः
३ मांसलः ४ उपचितः ५ इति
हेमचंद्रः ॥
वली स्त्री वलिः जरया श्लथच
र्म इत्यमरटीकायां भरतः ॥
वलीकं क्ली पटलप्रांतं ओविइ
ति भाषा । इत्यमरः ॥
वलीमुखः पुं वानरः इत्यमरः ।
वलीयान् त्रि अतिशयबलयुक्तः
यथा आगमादेशयोर्मध्ये वलीया
नागमो विधिः इति दुर्गादासटीका
वलीवर्दः पुं वृषः इत्यमरः ॥
तैर्थ्ययात्रां गतो नरो वृषस्कंधे यो य
ष्ठा वलीवर्दं समारूढः शृणु त
स्यापि यत् फलं नरके वसते
चोरे गवां क्रोधे हि दारुणे ॥
सलिलेच न गृह्णंति पितरस्त
स्य देहिनः इति मात्स्ये ८८ अध्यायः
वलं क्ली प्रधानधातुः शुक्रं बल



करोति इति मेदिनी ॥
बल्पः पुं वृद्धभिल्लकः इति त्रि
काण्डशेषः ॥
बल्या स्त्री अति बला अश्वगंधा
शिम्बीड्रीदलपः प्रसारिणी इति
राजनिर्घण्टः ॥
बहु उ. स्तने हिंसायां दाने वा
चि इति कविकल्पद्रुमः ॥
बष्कयणी
बष्कयिणी } स्त्री चिरप्रसूतागौः
बष्कयिनी } इत्यमरभरतौ ॥
बहु त्रि आदिसंख्या विपुलः ॥
इति मेदिनी तत्पर्यायः प्रभूतं २
प्रचुरं ३ प्राज्यं ४ अदभ्रं ५ बहु
लं ६ पुरुहं ७ पुरु ८ भूयिष्ठं ९
स्फिरं १० भूयः ११ भूरि १२ ॥
इत्यमरः ॥
बहुकः पुं कर्कटः अर्कः दा
त्यूहः जलखातकः इति मेदिनी
बहुकंटकः पुं क्षुद्रगोक्षुरः य
वासः हिंतालः इति राजनिर्घ
टः बहुकंटका स्त्री अग्निदमनी
इति राजनिर्घण्टः ॥
बहुकंदा स्त्री कंटकारी इति रा
जनिर्घण्टः ॥
बहुकंदः पुं सूरणः इति राज
निर्घण्टः ॥

बहुकंदा स्त्री कर्कटी । इति रा
ज निर्घण्टः ॥
बहुकरः पुं उष्ट्रः इति त्रिकांड
शेषः ॥
बहुकरः त्रि मार्जनकारी तत्प
र्यायः खलपूः २ इत्यमरः ॥
भूमिसंमार्जकः ३ इति शब्दरत्ना
वली बहुकार्यकर्ता यथा निर्ह
ता वैरकारणं सर्वा बहुकरः ।
सदा । पारम्पर्यिकरामस्य शाके
तनकरोरणे ॥ इति भट्टि ५ सर्गः
बहुकरी स्त्री संमार्जनी इति हेम
चंद्रः ॥
बहुकर्णिका स्त्री आखुकर्णी ।
इति राजनिर्घण्टः ॥
बहुकूर्चः पुं मधुनालिकेरिकः
इति राजनिर्घण्टः ॥
बहुगंधं क्ली त्वचं इति राजनिर्घंटः
बहुगंधः पुं कुंदरुकः इति रा
जनिर्घण्टः ॥
बहुगंधदा स्त्री कस्तूरी इति राज
निर्घण्टः ॥
बहुगंधा स्त्री चम्पकलिः पृथ्वि
का कृष्णजीरकः इति राजनिर्घण्टः
बहुगर्ह्यवाक् त्रि अतिलवहुवादी
इत्यमरः ॥
बहुग्रंथिः पुं झावकः इति शब्द

चंद्रिका ॥
बहुच्छिन्ना स्त्री कंदगुडूची । इति
राजनिर्घण्टः
बहुतः अ बहुभ्यः इति सिद्धान्त
कौमुद्यां तसिलप्रत्ययेन निष्पन्नं
बहुतयिः त्रि बहुतयविशिष्टः ।
यथा बहुतयिःकायः बहुतयी
ग्रीवा बहुतयिगात्रं यथा विभ
न्य नक्तंदिवमस्तनत्रिलोति किरात
रूस्वेकारात तंत्रि शब्दस्य प्रयोगः
इति संक्षिप्तसारः ॥
बहुतयीः त्रि बहुतयविशिष्टः य
था बहुतयी ग्रीवा बहुतयी धमनी
इति सिद्धांतकौमुदी एवं बहुतयीः
कायः बहुतयिगात्रं ॥ तयीकः
त्रि बहुतयविशिष्टः । यथा ॥
बहुतयीका वीणा इति सिद्धांतकौ
मुदी ॥ एवं बहुतयीकः पटः ॥
बहुतयीकं वस्त्रं ॥
बहुतरकणिशः पुं रागीधान्यं ।
इति राजनिर्घण्टः ॥
बहुता स्त्री बहुनां भावः बहुशब्दा
त् तलोभावे इति तलप्रत्ययनिष्पन्ना
बहुतिक्ता स्त्री काकमाची इति
राजनिर्घंटः ॥
बहुतिथः त्रि बहूनां पूरणः इति
व्याकरणं ॥

बहुत्र अ बहुषु इति सिद्धांतकौ
मुद्यां एलप्रत्ययेन निष्पन्नं ॥
बहुत्वं क्ली बहूनां भावः बहुश
ब्दात् त्व प्रत्ययेन निष्पन्नं ॥
बहुत्वक् पुं भूर्जवृक्षः इति श
ब्दमाला ॥
बहुत्वक्कः पुं भूर्जवृक्षः इति
हेमचंद्रः ॥
बहुदण्डिकः त्रि बहुदंडविशि
ष्टः यथा बहुदण्डिका नगरी बहु
दण्डिको ग्रामः इति सिद्धांतकौमु
दी बहुदुग्धः पुं गोधूमः इति
राजनिर्घण्टः ॥
बहुदुग्धा स्त्री बहुदुग्धा गौः त
त्पर्यायः वंजुला २ इति हेम
चंद्रः ॥
बहुद्रविका स्त्री स्नुहीवृक्षः
इति शब्दचंद्रिका ॥
बहुधा अ बहुप्रकारं इति व्या
करणं ॥
बहुधारं क्ली वज्रं इति राजनि
र्घंटः बहुनाडिकः त्रि कायः
इति सिद्धांतकौमुदी ॥
बहुनाडीकः त्रि दिवसः इति
संक्षिप्तसारः स्तम्भः इति सि
द्धांतकौमुदी ॥
बहुनादः पुं शंखः इति राजनिर्घंटः



बहुपटुः त्रि ईषदूनः पटुः । इति
व्याकरणं बहुप कर्म्मसदृशम् ।
बहुपत्रं क्ली अभ्रकं । इति राज
निर्घण्टः ॥
बहुपत्रः पुं पलाण्डुः इति राज
निर्घण्टः अनेकपत्रयुक्ते त्रि ।
बहुपत्रा स्त्री तरुणीपुष्पं इति
राजनिर्घण्टः ॥
बहुपत्रिका स्त्री भूम्यामलकी मे
थिका महाशतावरी इति रा
जनिर्घण्टः ॥
बहुपत्री स्त्री लिङ्गिनी गृहकन्या
तुलसी जतुका बृहती गोरक्ष
दुग्धा इति राजनिर्घण्टः ॥
बहुपर्णः पुं सप्तच्छदवृक्षः इ
ति राजनिर्घण्टः अनेकपत्रयु
क्ते त्रि बहुपर्णिका स्त्री आखुक
र्णी इति राजनिर्घण्टः ॥
बहुपर्णी स्त्री मेथिका इति रा
जनिर्घण्टः ॥
बहुपाद् पुं वटवृक्षः इत्यमरः
बहुपादः पुं वटवृक्षः इति राज
निर्घण्टः ॥
बहुपुत्रः पुं सप्तपर्णः इति
शब्दचन्द्रिका अनेकसन्तविशि
ष्टे त्रि ॥ बहुपुत्री स्त्री शतमूली
इति रत्नमाला ॥

बहुपुष्पः पुं पारिभद्रवृक्षः इति
राजनिर्घण्टः ॥
बहुपुष्पिका स्त्री धातकी इति रा
जनिर्घण्टः ॥
बहुप्रजः पुं मुञ्जतृणं इति राजनि
र्घण्टः शूकरः इति हेमचन्द्रः ॥ ब
ह्वीप्रजा यस्येति विग्रहे अन्यस्मिन् त्रि ॥ ब
हुप्रतिज्ञः त्रि अनेकपदसंकीर्णः
पूर्वपक्षविशिष्टव्यवहारः यथा
यत्त्वनेकपदसंकीर्णः पूर्वपक्षो
न सिद्ध्यतीति तन्न यद्यनेकवस्तुसंकी
र्णत्वमेतेनदोषः मदीयमनेन
हिरण्यं वासो रूपकादि चापहृत
मित्येवं विधस्याऽदुष्टत्वात् गण
न पद संकरे पक्षाभास इति
तदपि न मदीया रूपका अनेन
हा गृहीताः सुवर्णं चास्य हस्ते निक्षि
प्तं मदीयं क्षेत्रमपहरति चेत्यादीनां
पक्षत्वमीप्सितमेव [illegible] तु क्रियाभेदा
त् क्रमेण व्यवहारो न युगपदित्ये
तावत् यथाह कात्यायनः बहुप्र
तिज्ञे यत्कार्य्यं व्यवहारेषु निश्चितं
कामं तदपि गृह्णीयाद्राजा तत्त्व बुभु
त्सयेति ॥ तस्मादनेक पद संकीर्णः
पूर्वपक्षो युगपन्न सिध्यतीति तस्यार्थः
इति मिताक्षरा ॥ अनेक प्रति-

ज्ञायुक्ते त्रि ॥
बहुप्रदः त्रि मधूरदाता तत्पर्य्या
यः वदान्यः २ स्थूललक्षः ३ दानशौ
ण्डः ४ इत्यमरः स्थूललक्ष्यः ५ दा
नवीरः ६ दानशूरः ७ इति शब्द
रत्नावली ॥
बहुप्रसूः स्त्री बहुसन्तानप्रसवका
रिणी तत्पर्य्यायः क्रमिला २ इति
हेमचन्द्रः ॥
बहुफलः पुं कदम्बवृक्षः इति मे
दिनी विकंकतः तेजःफलः इ
ति राजनिर्घण्टः ॥
बहुफला स्त्री क्षविका माषपर्णी
काकमाची त्रपुसी प्राशाङ्गुली
दक्षकारवेली इति राजनिर्घण्टः
भूम्यामलकी इति भावप्रकाशः
बहुफलिका स्त्री भूबदरी इति रा
जनिर्घण्टः ॥
बहुफली स्त्री मयोर्वीरु इति राज
निर्घण्टः आमलकी इति मेदिनी ॥
बहुफेना स्त्री सातला इति राजनि
र्घण्टः ॥
बहुबलः पुं सिंहः इति राजनिर्घ
ण्टः अतिशयबलयुक्ते त्रि ॥ बहु
मञ्जरी स्त्री तुलसी इति भावप्रकाशः
बहुमलः पुं सीसकं इति रत्न ॥

माला अनेकमलयुक्ते त्रि ॥
बहुमार्गी क्ली चत्वरं इति हेम
चन्द्रः अनेकपथयुक्ते त्रि बहु
मूर्त्तिः स्त्री वनकार्पासः । इति
शब्दचन्द्रिका नानाकारश्च ॥
बहुमूर्द्धा पुं विष्णुः इति श
ब्दरत्नावली ॥
बहुमूलः पुं इक्कटः इति त्रिका
ण्डशेषः शिग्रुः स्थूलशरः इ
ति राजनिर्घण्टः अनेकमूलयु
क्ते त्रि । बहुमूलकं क्ली उशीरं इ
ति भावप्रकाशः ॥
बहुमूलक पुं इक्कटः इति जटा
धर भूरिप्रयोगौ ॥
बहुमूला स्त्री शतावरी इति
राजनिर्घण्टः ॥
बहुमूली स्त्री माकन्दी इति रा
जनिर्घण्टः ॥
बहुमूल्य त्रि महार्घवस्तु तत्प
र्य्यायः महाधनं २ इत्यमरः ॥
बहुरन्ध्रिका स्त्री मेदा । इति रा
जनिर्घण्टः ॥
बहुरसा स्त्री महाज्योतिष्मती इ
ति राजनिर्घण्टः ॥
बहुरुहा स्त्री कंदगुडूची इति राज
निर्घण्टः ॥
बहुरूपः पुं सर्जरसः इत्यमरः ॥



शिवः विष्णुः कामदेवः। सरटः इति मेदिनी ॥
इति मेदिनी ॥ ब्रह्मा ॥ केशाः
इतिशब्दरत्नावली बुद्धविशे
षः इतित्रिकाण्डशेषः नानारू
पयुक्तेत्रि ॥
वहुरूपकः पुं जाहकजंतुः इ
ति राजनिर्घण्टः ॥
वहुरूपा स्त्री दुर्गा। यथा अरूपा
परभावत्वाद्बहुरूपाक्रियात्मिका
ज्ञानाशैलेंद्रगेहस्थाशैलराजस
ता ततः इति देवीपुराणे ४५ अ
ध्यायः ॥
वहुरेखा स्त्री मनुरदीर्घविक्रंव
क्ररेखायुक्तायाः स्त्रियाद्दोषा य
था रेखाभि वहुभिःक्लेशंस्वल्पा
भि ‥‥ रक्ताभि ‥ त्यमो।
क्रस्माभिः प्रेष्यतां रजेत । इ
ति गारुडे ६४ अध्यायः ॥
वहुरेतः पुं ब्रह्मा इतिशब्दरत्ना ॥
वली ॥
वहुरोमा पुं मेषः इति हारावली लोमशो त्रि ॥
वहुलः पुं अग्निः कृष्णपक्षः इ
ति मेदिनी ॥
वहुलं क्ली आकाशं इति मेदिनी
सितमरीचं इति राजनिर्घण्टः ॥
वहुलं त्रि प्रचुरं कृष्णवर्णः इति।

वहुलगंधा स्त्री एला इति राज
निर्घण्टः ॥
वहुलच्छदः पुं रक्तशिग्रुः इति
राजनिर्घण्टः ॥
वहुलवणं क्ली औषरकं इति रा
जनिर्घण्टः ॥
वहुला स्त्री नीलिका एलाः गोः
इति मेदिनी। देवीविशेषः ॥
यथा दृष्टा सा तेन मुनिनातिःस्
मरविमंडलात् वहुला सागनात्
ऐप्रस्यमानस भूम्सतः मम्महेन
त्रसाविशी गायत्री वहुला तथा
सरस्वतीवहुपरापचैनामानसा
चल इति कालिकापुराणे २२
अध्यायः ॥
वहुलाः स्त्री कृत्तिका नक्षत्रं त्रिषं
वहुवचनांतायं शब्दः इति मेदिनी
वहुलीकृतं त्रि अपनीततपथाम्या
दि वराल्लात इतिभाषा तत्पर्य्यायः
स्तं २। इत्यमरः ॥
वहुवल्कः पुं पियालः इति राजनि
र्घण्टः ॥
वहुवल्ली स्त्री ओडिल्लयः । इतिरा
जनिर्घण्टः ॥
वहुवारः पुं वृक्षविशेषः वहुया
वहुवारकः इति ख्यातः ॥

तत्पर्य्यायः शेलुः २ शीतः ४
श्लेष्मातः ५ श्लेष्मातकः ६ उद्दा
लः ७ उद्दालकः ८ इतिशब्दर
त्नावली सेलु ९ इत्यमरटीका
यां भरतः अस्य फलगुणाः हि
मत्वं श्लेष्मकृत्वं कृमिकारित्वं गु
रुत्वं दुर्जरत्वं मधुरत्वंच इतिरा
जवल्लभः ॥
वहुविधः त्रि नानाप्रकारः तत्प
र्य्यायः विविधः २ नानारूपः ३
पृथग्विधः ४। इत्यमरः ॥
वहुविस्तीर्णा स्त्री ऋचिकाहृदः
ऋचइ इतिभाषा इतिशब्दचंद्रिका
वहुवीजं क्ली गाण्डगात्रं आता
इति भाषा इतिशब्दचंद्रिका ॥
अस्य गुणाः आत्मप्रशब्दे द्रष्टव्याः
वहुवीर्य्यः पुं विभीतकः इति
जटाधरः तण्डुलीयशाकः शा
ल्मलिवृक्षः मरुवः इति राज
निर्घण्टः ॥
वहुवीर्य्या स्त्री भूम्यामली इति
राजनिर्घण्टः ॥
वहुव्रीहिः पुं षट् समासान्तर्गत
समासविशेषः अस्य सांकेतिक।
संज्ञारः यथा अन्यार्थाकोदाता
सतः उदाहरणं यथा पीतमंब
रं यस्यासौ पीताम्बरो हरिः।

इति वोपदेवः ॥ सच तत्त्वाधि
करणानां पदानां अन्यार्थेत्वे।
स्यादिति वोध्यं। यथा पीताम्बरा
दि भिन्नाधिकरणानांत पुत्राय
धनमस्य शिष्याय विद्या अस्य इ
त्यादौ तस्यात् समानकइत्युदा
हरणेन कदाचिद्भिन्नाधिकरणा
नांच स्यात् धर्मेहृति यस्यासौ धर्म
हृतिः एवंकामहृतिःउरसि लोमा
केठे काल इत्यादि। एवंपीताम्बर
इत्युदाहरणा विशेषण विशेष्ययोः
समासे विशेषणमेव पूर्वं स्यादिति
सूचितं। तेन पीताम्बरइत्यत्र अम्बर
पीत इतिन स्यात् एवंत्रिलोचनः
चतुर्भुजः दीर्घकेशीत्यादि एवंपी
तांवरइत्युदाहरणा क्वचित् स्यात्
विशेषणं पूर्वं स्यात् क्वचित् पर
वा स्यात् इतिसूचितं तेन अव्याह
तस्वैर गतेरिति अपेप्सितंभर्त
रूपस्थितेऽद्ययमिति सहमत्रुइत्य
ल काकपदकेत्यादि रघुः।
सत्वजातः सुराषीतोऽल्पजमथो मा
लधारय इति एवंजातदंतः दंतजा
तः जातश्मश्रुः श्मश्रुजातः पीत
तैलः तैलपीतः पीतहृतः हृत
पीत इत्यादि भार्य्योभार्य्याढ्यः गत।
भार्य्यः भार्य्यागतः गतार्थः अर्थगतः



अग्न्याहितः आहिताग्निः पुत्रजातः
जातपुत्रः जातपामः पामजातः
दुःखजातः जातदुःखः गडुकण्ठः
कण्ठगडुः इत्यादि बोध्यं एवं उद्यत
चक्रः चक्रोद्यतः उद्यतासिः असू
द्यतः उद्यतगदः गदोद्यतः उद्यत
उद्यतखड्गः खड्गोद्यतः इति आद्य
येभ्यो निष्ठापूर्वमिति तोमराः यथा
उद्यतचक्र इत्यादि एवं सर्वनामस
कलात् पूर्वं सर्वमेतेः संख्या स
र्वनाम्नोः संख्यापूर्वस्मात् द्विपरः
त्रिपूर्वः सममस्मिन् मत्वादेः सप्त
म्यन्त पदं पूर्वस्मात् चंद्रादेः ।।
धर्मिं कृति येषामसौ धर्मकृतिः ।
लोमायनकाल इत्यादौ उरसि
जवत् केवलकं चंद्रादेरत्र चेदृशो ।
खरः चन्द्रकृतः पद्मनाभः शूलपा
णिः कण्ठेकालः प्रियो वा गुरुप्रियः
प्रियगुरुः किंच आरूढो वानरो
यं स आरूढवानरो वृक्षः दृष्टः क
ष्टो येन सह स्पृष्टकष्टो भक्तः दग्धा भू
मिर्यस्मात् सदग्धभूमिर्विप्रः निर्गताः
पतिर्येन यस्मात् कृतात् सनिर्ग
तपती कृतः चलानो भुजा यस्या
सौ चलद्भुजो विटः बहूनि नदोषा
णि यस्मात् कृतनयमाकाशं इतिहिरी
वामायस्य पदार्था बहुव्रीहयः सर्वे मंते
स्वमते न प्रथमान्तस्य पदार्थो
पि यथा सहस्रमात्रावर्त्तन्ते योसौ स
मानकः एवं सपत्रकः सनाम
कंबालगमानिनी इत्यादि इति दुर्गा
दासः प्रचुरधान्ययुक्ते त्रि यथा
स्वहोद्विग्नैरपि चाहं मस्येहि नित्य
मव्ययीभावः तत्पुरुष कर्म
धारय येनाहं बहुव्रीहिः स्या इ
ति प्राचीनाः ।।
बहुप्रजः पु वटकः इति शब्द
चंद्रिका ।।
बहुप्रः स्त्र बहुन् इति व्याकरणं
बहुशल्य पु रक्तखदिरः इति रा
जनिर्घण्टः । अनेकशल्ययुक्ते
त्रि बहुपालः पु स्नुही इति राज
निर्घण्टः ।।
बहुशिखा स्त्री जलपिप्पली इ
ति राजनिर्घण्टः अनेकशिखा च
बहुसन्ततिः पुं ब्रह्मयष्टिः बड
वां इति भाषा इति शब्दचंद्रिका
अनेकसन्तानयुक्ते त्रि ।।
बहुसंपुटः पुं विष्कन्दः । इति
राजनिर्घण्टः ।।
बहुसारः पुं खदिरः इति रा
जनिर्घण्टः ।।
बहुसुता स्त्री शतमूली इत्यमरः
बहुसूः स्त्री शूकरी इति शब्दरत्ना

वली बहुप्रसवा च ।।
बहुसूतिः स्त्री बहुकल्पा गौः इ
त्यमरः ।। बहुसन्तानप्रसवा च ।।
बहुस्रवा स्त्री शल्लकीवृक्षः इति
शब्दचंद्रिका अनेकक्षरणशीला
च बहुस्वनः पुं पेचकः इति केचि
त् अनेकशब्दयुक्ते त्रि ।।
बह्वपत्यः पुं स्त्री शूकरः मूषकः
इति राजनिर्घण्टः ।। बहुसन्तानयु
क्ते त्रि ।।
बह्वाशी त्रि बहुभोजनशीलः
बह्वाशनविशिष्टः यथा बह्वाशी
स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शु
नो गुणाः इति चाणक्यः ।।
बह्वृक् स्त्री ऋग्वेदः ऋक् ऋची इति
मुग्धबोधव्याकरणं ।।
बह्वृची स्त्री ऋग्वेदवेत्तः पत्नी इति
जटाधरः ।।
वा व्य उपमा विकल्पः ।। इत्यमरः
उपमायां यथा आसीद्विषो वासक्त
दः स्यूर्यो वा भुवि निर्गतः भीमो
न कोवा समरे गदापाणि रहस्पए
नेति भारत विकल्पे यथा यवैर्व्री
हिभिर्वा यजेत । इत्यमरटीकायां
भरतः ।। अन्ये शब्दाः मेदिनीका
रेण अन्तान्ते बकाः ।। ।।
रादिवर्गे लिखितः ।।
बाड़ ऋ ङ. आप्लावे स्नाने इति
कविकल्पद्रुमः वोपदेवेन अ
स्य वकारादौ गृहीतः ।।
बाडवं क्ली वडवासमूहः इत्यमरः
बाडवः पुं ब्राह्मणः बाडवानलः
इत्यमरः तत्पर्य्यायः और्वः २
संवर्त्तकः ३ अब्ध्यग्निः ४ वड
वामुखः ५ इति हेमचंद्रः ।।
बाडवाग्निः पुं वडवानलः इ
ति जटाधरः ।।
बाडवाग्र्यः पुं ब्राह्मणश्रेष्ठः
यथा इत्युक्तो वचनस्तस्य बा
डवाग्र्यस्य धीमतः पप्रच्छ स्पष्ट
मानस्तु तीर्थयात्राविधिं मुनिः
इति पाद्मे पातालखंडे १९ अध्यायः
बाडवेयो पुं अश्विनीकुमारौ इ
ति शब्दमाला ।।
बाड्व्यं क्ली ब्राह्मणसमूहः इ
त्यमरः ।।
बाढिंगनः पुं वार्त्ताकः इति रत्न
माला ।।
बाणः पुं अस्त्रविशेषः तीर इति
भाषा तत्पर्य्यायः पृषत्कः २
विशिखः ३ अजिह्मगः ४ खगः ५
आशुगः ६ कलम्बः ७ मार्गणः ८
शरः ९ पत्री १० रोपः ११ इषुः १२ ।

५



१३ ग्रमरः चित्रपुंखः १४ शायकः
१४ वीरतरः १५ मृगाक्षेडः १६ का
एडः १७ विपर्वकः १८ प्राकृः १९
वाजी २० पत्रवाहः २१ अस्त्रकंट
कः २२ लोहमयबाणस्य पर्या
यः प्रक्ष्वेडनः १ लोहनालः २ ना
राचः ३ विलिप्तबाणस्य पर्यायः प्र
दिग्धः १ लिप्तकः २ विषाक्तबाण
स्य पर्यायः तीक्ष्णः १ लिप्तकः
२ दिग्धः ३ तीरो निष्फलमाय।
के इति शब्दरत्नावली बलिरा
जस्य ज्येष्ठपुत्रः यथा बलिःपुत्र
शतंत्वासीद्बाणज्येष्ठतनो द्विजाः
बाणः सहस्रबाहुः स्यात् सर्वा
स्त्रगुणसंयुतः तपसा तोषितो
यस्य पुरे वसति शूलधृक् महा
कालत्वमगमत् साम्यं यस्य पि।
नाकिनः इति मत्स्यपुराणे ५ अ
ध्यायः बाणगंगा स्त्री रावणबा
णनिर्भिन्न सोमेश्वरगिरिभवनदी
विशेषः यथा सोमेशाद्दक्षिणे
भागे बाणेनाद्रिं विभिद्यैव राव।
णेन प्रकटिता तत्र यथा तिपुण्य
दा बाणगंगेति विख्याता या स्नाता
द्विव हारिणी स्नात्वा बाणगंगा
यां द्दष्ट्वा सोमेश्वरं विभुं गंगास्नानफ
लं प्राप्य मोदते देववद्दिवि इति वा

राहे सोमेश्वरादिलिंगमहिमाव
मुक्तिक्षेत्र महिमा त्रिवेणीयादिम
हिमा नामाध्यायः ॥
बाणपुरं क्ली बाणराजनगरं त
त्पर्यायः देवीकोटः १ कोटीव
र्षं ३ ऊषावनं ४ शोणितपुरं ५ उ
तिविकाण्डशेषः आग्नेयं ६ उमा
वनं ७ कोटवीपुरं ८ इति शब्द
रत्नावली ॥
बाणयुद्धं क्ली बाणराजेन सह श्री
कृष्णस्य संग्रामः तस्य विवरणं यथा
श्रीशुक उवाच बाणः पुत्रशतज्ये
ष्ठो बलेरासीन्महात्मनः सहस्र
बाहुर्वाद्येन ताण्डवेऽतोषयन्मृडं ॥
भगवान्सर्वभूतेशः शरण्यो भक्तव
त्सलः वरेण छन्दयामास स तं वव्रे
पुराधिपं स एकदाह गिरिशं पार्श्व
स्थं वीर्यदुर्मदः किरीटेनार्कवर्णे
न संस्पृशंस्तत्पदाम्बुजं नमस्ये त्वां
महादेव लोकानां गुरुमीश्वरं पुंसा
मपूर्णकामानां कामपूरामराङ्घ्रिप
दोः सहस्रं त्वया दत्तं परं भाराय मे
भवत् त्रिलोक्यां प्रतियोद्धारं ॥
नलेभे त्वदृते समं ॥ कण्डू।
त्या निभृतैर्दोर्भिः युयुत्सुर्दिग्ग
जानहं। आद्यायां चूर्णयन्नद्रीन्

भीतास्तेऽपि प्रदुद्रुवुः तच्छ्रुत्वा
भगवान्रुद्रः केतुस्ते भज्यते य
दा तदर्पघ्नं भवेन्मूढ संयुगं म
त्समेन ते इत्युक्तः कुमतिर्हृष्टः
स्वगृहं प्राविशन्नृप प्रतीक्षन् गि
रिशादेशं स्ववीर्यनशनं कुधीः
तस्योषा नाम दुहिता स्वप्ने प्राद्यु
म्निना रतिं कन्यालभतकान्तेन
प्रागदृष्टश्रुतेन सा सा तत्र तम
पश्यन्ती क्वासि कान्तेति वादिनी
सखीनां मध्य उत्तस्थौ विह्वला व्री
डिता भृशं बाणस्य मंत्री कुम्भाण्ड
श्चित्रलेखा च तत्सुता सख्य पृच्छ
त् सखीमूषां कौतूहलसमन्विता
कं त्वं मृगयसे सुभ्रू कीदृशस्ते म
नोरथः। हस्तग्राहं न तेऽद्यापि राज
पुत्र्युपलक्षये ऊषोवाच दृष्टः क
श्चिन्नरः स्वप्ने श्यामः कमललोच
नः। पीतवासा बृहद्बाहुर्योषितां
हृदयंगमः तमहं मृगये कान्तं।
पाययित्वाधरं मधु क्वापि यातः स्पृ
हयन्तीं क्षिप्त्वा मां वृजिनार्णवे चित्रले
खोवाच। व्यसनं तेऽपकर्षामि त्रिलोक्यां
यदि भाव्यते तमानेष्ये वरं यस्ते मनोहर
स्तं मानादिश ॥ इत्युक्त्वा देवगंधर्व
सिद्धचारणपन्नगान् दैत्यविद्या
धरान् यक्षान् मनुजांश्च यथा ॥

लिखत् मनुजेषु च सा वृष्णीन् शूर
मानकदुन्दुभिं व्यलिखद्रामकृष्णौ
च प्रद्युम्नं वीक्ष्य लज्जिता अनिरुद्धं
विलिखितं वीक्ष्योषावाङ्मुखी ह्रिया
सोऽसावसाविति प्राह स्मयमाना
महीपते चित्रलेखा तमाज्ञाय पौ
त्रं कृष्णस्य योगिनी। ययौ विहाय
सा राजन् द्वारकां कृष्णपालितां
तत्र सुप्तं सुपर्यङ्के प्राद्युम्निं योग
मास्थिता गृहीत्वा शोणितपुरं स
ख्यै प्रियमदर्शयत् सा च तं सुन्द
रवरं विलोक्य मुदितानना दुष्प्रे
क्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना स
मं परार्घ्यवासः स्रग्गंधधूपदी।
पासनादिभिः पानभोजनभ
क्ष्यवाक्यैः शुश्रूषणार्चितः
गूढः कन्यापुरे शश्वत् प्रवृद्ध।
स्नेहया तया। नाहर्गणान्स बु
बुधे ऊषयापहृतेन्द्रियः तां त
था यदुवीरेण भुज्यमानां हत
व्रतां हेतुभिर्लक्षयां चक्रुरापी
तां दुरवच्छदैः भटा आवेदया
चक्रू राजन् ते दुहितुर्वयं विचेष्टि
तं लक्षयामः कन्यायाः कुल
दूषणं अनपायिभिरस्माभिर्गुप्ता
याश्च गृहे प्रभो कन्याया दूषणं
पुम्भिर्दुष्प्रेक्ष्याया न विद्महे ततः
प्रव्यथितो बाणो दुहितुः श्रुत।



दृषणः त्वरितः कन्याकागारंस्था।
म्रोःद्वाहीयदृहदं॥ कामात्मजं तं
भुवनैकसुंदरं श्यामं पिशंगांबर मं
बुजेक्षणं। बृहद्भुजं कुण्डलकुंतल
त्विषा स्मितावलोकेन च मंडितान
नं। दीव्यन्तमक्षैः प्रिययाभिनृम्ण
या तदंगसंगस्तनकुंकुमस्रजं बा
ह्वोर्दधानं मधुमल्लिकाश्रितां त
स्याग्र आसीनमवेक्ष्य विस्मिताः।
सतं प्रविष्टं वृतमाततायिभिर्भटै
रनीकैरवलोक्य माधवः। उद्यम्य
मौर्वं परिघं व्यवस्थितो यथांतको
दंडधरो जिघांसया जिघृक्षया
तान्परितः प्रसर्पतः शुनो यथा
शूकरयूथपो हनत् ते हन्यमा
ना भवनाद्विनिर्गता निर्भिन्नमू
र्धोरुभुजाः प्रदुद्रुवुः तं नागपा
शैर्बलिनंदनो बली घ्नन्तं स्वसै
न्यं कुपितो बबंध ह। ऊषा भृश
शोकविषादविह्वला बद्धं नि
शम्याश्रुकलाक्ष्यरौत्सीत्।
इति श्रीभागवते महापुराणे पा
रमहंस्यां संहितायां वैयासिक्यां
दशमस्कंधे बाणयुद्धे द्विषष्टि
तमोऽध्यायः। श्रीशुक उवाच।
अपश्यतां चानिरुद्धं तद्बंधूनां च
भारत चत्वारो वार्षिका मासा व्य
तीयुरनुशोचतां नारदात्तदुपाकर्ण्य

वर्तं स्यकर्मच प्रययुः शोणित
पुरं वृष्णयः कृष्णदेवताः प्रद्युम्नो
युयुधानश्च गदः शांबोऽथ शार
णः। नंदोपनंद भद्राद्या रामकृष्णा
नुवर्तिनः अक्षौहिणीभिर्द्वादश
भिः समेताः सर्वतो दिशं। रुरुधु
र्बाणनगरं समंतात् सात्वतर्षभाः।
भज्यमान पुरोद्यान प्राकाराट्टा
लगोपुरं प्रेक्षमाणो रुषाविष्ट
स्तुल्यसैन्योऽभिनिर्ययौ॥ बाणार्थे
भगवान्रुद्रः ससुतः प्रमथैर्वृतः
आरुह्य नंदि वृषभं युयुधे रामकृ
ष्णयोः आसीत् सुतुमुलं युद्धमद्भु
तं लोमहर्षणं। कृष्णशंकरयो रा
जन्प्रद्युम्न गुहयोरपि॥ कुंभाण्डकू
पकर्णाभ्यां बलेन सह संयुगं सां
बस्य बाणपुत्रेण बाणेन सह सा
त्यकेः ब्रह्मादयः सुराधीशा मुन
यः सिद्धचारणाः। गंधर्वाप्सरसो
यक्षा विमानैर्द्रष्टुमागमन् शंक
रानुचराञ्छौरिर्भूत प्रमथ गुह्यकान्
डाकिनीर्यातुधानांश्च वेतालान्सवि
नायकान् भूतमातृपिशाचांश्च कु
ष्माण्डान् ब्रह्मराक्षसान् द्रावया
मास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः
पृथग्विधानि प्रायुंक्त पिनाकास्त्रा
णि शार्ङ्गिणे प्रत्यस्त्रैः शमयामास

शार्ङ्गपाणिरविस्मितः ब्रह्मास्त्र
स्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतं
आग्नेयस्य च पार्जन्यं नैजं पाशुपत
स्य च मोहयित्वा तु गिरिशं जृंभ
णास्त्रेण जृंभितं बाणस्य पृतनां
शौरिर्जघानासिगदेषुभिः स्कंदः
प्रद्युम्नबाणौघैरर्द्यमानः समंततः
असृग्विमुंचन् गात्रेभ्यः शिखिना
पाद्रवद्रणात् कुंभाण्डः कूपक
र्णश्च पेततुर्मुषलार्दितौ दुद्रुवु
स्तदनीकानि हतनाथानि सर्वशः
विशीर्यमाणं स्वबलं दृष्ट्वा बाणो
त्यमर्षितः कृष्णमभ्यद्रवत् संख्ये र
थी हित्वैव सात्यकिं धनूंष्याकृष्य
युगपद्बाणः पंचशतानि वै एकैक
स्मिन् शरौ द्वौ द्वौ सन्दधे रणदुर्म
दः तानि चिच्छेद भगवान् धनूंषि
युगपद्धरिः सारथिं रथमश्वांश्च
हत्वा शंखमपूरयत् तन्माता को
टवी नाम नग्ना मुक्तशिरोरुहा पु
रोऽवतस्थे कृष्णस्य पुत्रप्राणरिर
क्षया ततस्तिर्यङ्मुखो नग्नामनिरी
क्षन् गदाग्रजः बाणश्च तावद्विर
थश्छिन्नधन्वाविशत्पुरं विद्रावि
ते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात्
अभ्यधावत दाशार्हं दहन्निव दिशो
दश। अथ नारायणो देवस्तं दृष्ट्वा
व्यसृजज्ज्वरं ॥ ॥

ज्वरं माहेश्वरो वैष्णवश्च युयुधाते
ज्वरावुभौ माहेश्वरः समाक्रंदन्
वैष्णवेन बलार्दितः अलब्ध्वा
भयमन्यत्र भीतो माहेश्वरो ज्वरः
शरणार्थी हृषीकेशं तुष्टाव प्र
यतांजलिः ज्वर उवाच नमामि
त्वानंतशक्तिं परेशं सर्वात्मानं
केवलं ज्ञप्तिमात्रं विश्वोत्पत्ति
स्थानसंरोधहेतुं यत्तद्ब्रह्म ब्र
ह्मलिंगं प्रशांतं कालो दैवं कर्म
जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आ
त्माविकारः तत्संघातो बीजरो
हप्रवाहस्त्वन्मायैषा तन्निषेधं
प्रपद्ये नानाभावैर्लीलयैवोप
पन्नैर्देवान् साधून् लोकसेतून् वि
भर्षि हंस्युन्मार्गान् हिंसया वर्त
मानान् जन्मैतत्ते भारहाराय भू
मेः तप्तोऽहं ते तेजसा दुःसहेन
शांतोग्रेणात्युल्बणेन ज्वरेण ता
वत्तापो देहिनां तेंघ्रिमूलं नो से
वेरन् यावदाशानुबद्धाः श्रीभ
गवानुवाच। त्रिशिरस्ते प्रस
न्नोऽहं व्येतु ते मज्ज्वराद्भयं यो नौ स्म
रति संवादं तस्य त्वन्न भवेद्भय
इत्युक्तोऽच्युतमानम्य गतो मा
हेश्वरो ज्वरः बाणस्तु रथमारु
ढः प्रागाद्योत्स्यन् जनार्दनं॥
ततो बाहुसहस्रेण ॥ ।



नानायुधधरोन्तपः मुमोच परम
क्रुद्धो बाणांस्त्रकायुधेन्तपः तस्मा
स्पेतेःस्त्राणयस्तकश्चक्रेणान्तरेत
मिना विच्छेद भगवान् बाहून्सहस्रा
त्वाडवनस्पतेः बाहुषुच्छिद्यमा
नेषु बाणस्य भगवान् भवः भक्ता
नुकंप्युपव्रज्य चक्रायुधमभाषत
श्रीरुद्रउवाच त्वंहि ब्रह्मपरंज्योति
र्गूढं ब्रह्मणि वाङ्मये यंपश्यंत्य
मलात्मानमाकाशमिव केवलं
नाभिर्नभोग्निर्मुखमंबुरेतो द्यौः
शीर्षमाशाः श्रुतिरंघ्रिरुर्वी चंद्रो
मनो यस्य दृगर्क आत्मा अहं समु
द्रो जठरं भुजेंद्रः रोमाणि यस्यौ
षधयोंबुवाहाः केशा
विरिंचो धिषणा वि [illegible] प्रजाप
तिर्हृदयं यस्य धर्मः [illegible] स भवान्
पुरुषो लोककल्पः तवावता
रोयमकुंठधामन् धर्मस्यगुप्त्यै ज
गतो भवाय वयंच सर्वे भवता
नुभाविता विभावयामो भुवना
नि सप्त त्वमेक आद्यः पुरुषो
द्वितीयस्तुर्यः स्वदृग्घेतुरहेतु
रीशः प्रतीयसेथापि यथा वि
कारं स्वमायया सर्वगुणप्रसि
द्ध्यै यथेव सूर्यः पिहितः स्वच्छा
यया छायांच रूपाणिच संचका
स्ति एवं गुणेनापिहितो गुणांस्त्वमा
त्मप्रदीपो गुणि ॥

नसभूमन् यन्मयामोहितवि
यः पुत्रदारगृहादिषु उन्मज्जं
ति निमज्जंति प्रसक्ता वृजिनार्ण
वे देवदत्तमिमं लब्ध्वा नरलोकम
जितेंद्रियः यो नाद्रियेत त्वत्पादौ
स शोच्यो ह्यात्मवंचकः यस्त्वां
विसृजते मर्त्य आत्मानं प्रियमी
श्वरं विपर्ययेंद्रियार्थार्थं विष
मत्यमृतं त्यजेत अहं ब्रह्माथ वि
बुधा मुनयश्चामलाशयाः स
र्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठ
मीश्वरं तं त्वां जगत्स्थित्युदयांत हे
तुं समं प्रशांतं सुहृदात्मदैवं अन
न्यमेकं जगदात्मकेतं भवापवर्गा
य भजाम देव । अयं ममेष्टो दयि
तोनुवर्ती मया भयं दत्तममुष्य देव
संपाद्यतां तद्भवतः प्रसादो यथा
हि ते दैत्यपतौ प्रसादः श्रीभगवा
नुवाच यदात्थ भगवंस्त्वं नः करवा
म प्रियं तव भवतो यद्व्यवसितं त
न्मे साध्वनुमोदितं ॥ अवध्योयम
माख्येष वैरोचनसुतोसुरः ।
प्रह्लादाय वरो दत्तो न वध्यो मे तवा
न्वयः दर्पोपशमनायास्य प्रवृक्णा
बाहवो मया सूदितंच बलं भूरि
यच्च भारायितं भुवः ॥ चत्वारोस्य भु
जाः शिष्टा भविष्यत्यजरामरः ॥

पार्षदमुख्यो भवतो न कुतश्चिद्भ
योसुरः इति लब्ध्वा भयं कृष्णं
प्रणम्य शिरसा सुरः प्राद्युम्निर
थमारोप्य सवध्वा समुपानयत्
अक्षौहिण्या परिवृतं सुवाससम
लंकृतं । सपत्नीकं पुरस्कृत्य यो
रुद्रानुमोदितः स राजधानीं स
मलंकृतां ध्वजैर्मनोरमैः भूषि
तमार्गा चत्वरां विवेश शंखानक
दुंदुभिस्वनैः स्वस्त्युपेतः पौरसुहृ
द्विजातिभिः य एवं कृष्णविज
यं शंकरेणच संयुगं संस्मरेत् ।
प्रातरुत्थाय न तस्य स्यात् पराज
यः ॥ इति श्रीभागवते महापुरा
णे पारमहंस्यां संहितायां वैया
सिक्यां दशमस्कंधे बाणासुर सं
ग्रामे श्रीकृष्णविजयो द्विषष्टित
मोध्यायः ॥
बाणलिंगं स्त्री नर्मदानद्युद्भवशि
वलिंगे तस्य विवरणं यथा नर्म
दाजलमध्यस्थं बाणलिंगमिति स्म
ते बाणलिंगे स्वयंभूतेचंद्रकांते
हृदिस्थिते चांद्रायणशतं कार्यं
प्रभोर्नैवेद्यभक्षणात् ग्राह्याग्राह्य
विभागोयं बाणलिंगे न विद्यते ।
तदर्पितं जलं वान्नं ग्राह्यं प्रसा
दसंज्ञया । शिवनाभ ॥

मयं लिंगं सदा पूज्यं महर्षिभिः ॥
यतस्तु सर्वलिंगेभ्यस्तद्विशुद्धतमं
मतं चतुरंगुलमुच्छ्रायं रम्यं वेदिक
यायुतं उत्तमं लिंगमाख्यातं पंच
सूत्रसमन्वितं तदर्द्धं मध्यमं प्रो
क्तं तदर्द्धं मवरं स्मृतं । तस्मान्न्यूनं
पूजनीयं न कदापि न तत्फलं ॥
रुद्राक्षं शिवलिंगंच स्थूलस्थूलं
प्रशस्यते शालग्रामो नार्मदश्च
सूक्ष्मः सूक्ष्मो विशिष्यते पार्थिवा
दिलिंगापेक्षया बाणलिंगस्य
श्रेष्ठत्वं यथा कोमलेषु तल्लिं
गेषु पार्थिवं श्रेष्ठमुच्यते कवि
तेषु त पाषाणं पाषाणात् स्फा
टिकं परं स्फाटि[illegible] त् पद्मरा [illegible]
[illegible] गतः काश्मी
रात् पुष्परागोथ मिंद्रनीलो
द्भवं ततः इंद्रनीलाच्च गोमेद गो
मेदाद्विद्रुमोद्भवं विद्रुमान्मौ
क्तिकं श्रेष्ठं तस्मात् श्रेष्ठं तु राज
तं हैरण्यं राजतात् श्रेष्ठं हैरण्या
द्धीरकं वरं हीरकात् पारदं श्रेष्ठं
बाणलिंगं ततः परं इति मेरुतं
त्रे ९ प्रकाशः ॥ अथ बाणलिं
लक्षणं वीरमित्रोदये धृतकाल
त्तरे बाणलिंगान्यथाते यभुक्तिमु
क्तिप्रदायकं उत्पत्ति बाणलिंगस्य



लक्षणं शेषतः शृणु नर्मदादेवि
कायाश्च गंगायमुनयोस्तथा सं
तिष्ठन्ति नदीनां च बाणलिंगानि
षण्मुख इन्द्रादि पूजितान्यत्र तवि
कै विहितानि च सदा सन्निहित
त्रशिवः सर्वार्थदायकः इन्द्रलिंगा
नितान्याहुः साम्राज्यार्थप्रदानि च
इंद्रीद्रलिंगलक्षणं । आरुणं हि
त कीलालमस्य स्पर्शाक रोत्पल
आग्नेयं तत्र शक्तिनिभ मथवा
शक्तिलांछितं इदं लिंगवरस्या
प्यतेजसाधिपतिर्भवेत् इत्याग्ने
यलिंग लक्षणं दण्डाकारं भवे
— त्समस्यस्य रसनाकृति यद्य
ढ्कं सदृशैर्नैर्निर्लिंक्रमायेन न।
दानिविक्रतिं नेनेनक्रियतेस्या
पितेनन् इतियाम्यलिंगलक्ष।
णं राक्षसं खड्गसदृशं ज्ञानयो
गफलप्रदं । कर्करादि प्रलिप्त
नक्रैवकृति युतेनथा राक्षसेनि
कृतेलिंगं गार्हस्थे न सुखप्रदं।
इति नैर्ऋतलिंगलक्षणं वारुणं
वर्तुलाकारं पाशांकं चालिवर्च
सं हृद्दिसखादेवैस्तत्समभोगा
न्तनमध्यगो इतिवारुणलिंगलक्ष
णं कृष्णधूम्रनवाहधेनुधनाभं धम
पं चलं मस्तकेस्थापितेनस्पन्दनमूर्ध्वमि

नस्तनः इतिवायुलिंगलक्षणं ॥
तूणपाशगदाकारं गुह्यकेश
समप्रभं इति कौबेरलिंगलक्ष
णं हितं वाप्यथवा रात्रि सस्मा
हृद्धिकरे वलं अस्थि स्थूलांकि
ते रौद्रं हिमकुण्डल वर्च्चस इति
रौद्रलिंग लक्षणं ॥
चतुर्वर्णमयं वापि वैष्णवं ज्ञायते
ग्रतः वैष्णवं शंखचक्रांकगदा
ब्जादि विभूषितं श्रीवत्सकौस्तु
भांकं च सर्वसिंहासनांकितं वैन
तेय सुमांकं वा तथा विष्णुपदां
कितं वैष्णवनामतत्प्रोक्तं सर्व
स्वर्गफलप्रदं इति वैष्णवलिंग
लक्षणं शालग्रामादि संस्थं तु
शशांकं वा श्रीविवर्द्धनं पद्मांक
स्वस्तिकांकं श्रीवितसांकविभू
तये इत्यपि वैष्णवलिंगलक्षणं।
हेमाद्रिधृत लक्षणकाण्डे ना
रद उवाच अथ वाच्यामि ते विप्र
चिह्नमेकादशोपरं श्रवणाद्यस्य
पापानि नाशमायाति तत्क्षणात्
मधुपिंगलवर्णाभं कृष्णकुण्डलि
काधुतं स्वयंभूलिंगमाख्यातं सर्वसि
द्धिनिषेवितं नानावर्णसमाकीर्णं
ताम्रपूल समन्वितं स्वसृजयाकर्यलि
गमस्रासरनमस्कृतं ॥ दीर्घो।

कारं धूम्रवर्णकृष्णबिन्दु समन्वितं
नीलकंठ समाख्यातं लिंगं शुभं
सुरासुरैः शुक्लाभं शुक्लकेशं
च नेत्रत्रयसमन्वितं त्रिलोचनं म
हादेवं सर्वपाप प्रणोदनं ज्वल
लिंग जटाजूट कृष्णाभं स्थूल वि
ग्रहं कालाग्निरुद्रमाख्यातं सर्व
सत्वैर्निषेवितं मधुपिंगलवर्णा
भं श्वेत यज्ञोपवीतकं श्वेतपद्मास
मासीनं चंद्ररेखा विभूषितं प्रल
याष्ट समायुक्तं त्रिपुरारि समा
ह्वयं शुभ्राभं पिंगलजटं मुण्डमा
लाधरं परं त्रिशूलधरमीशानं लि
गं सर्वार्थसाधनं त्रिशूलडमरुधरं श्
भ्रकार्द्धभागतः । अर्द्धनारीश्वराख्य
नं सर्वदेवैरभीष्टदं ईषद्रक्तमयं कामं
स्थूलं दीर्घं समुज्वलं महाकालं समा
ख्यातं धर्मकामार्थमोक्षदं । एतल्लक
ष्यितं तल्लिंग विकं महेशितुः एके
नैव कृतार्थस्यात् बहुभिः किमु स
त्वन । इति बाणलिंग विकृति वीर ।
मित्रोदये धृत कालोत्तरे डुर्क्कोकेश
यसेयोऽस्य शीर्षमंत्र विवर्जयेत् ॥
यमवर्णगत यलिंगं यमांकं वा कम
ण्डलु दण्डांकसंवविकं वा बलक्ता

तान्वितं मतं शशिवर्णमहाकाले
नंदीशापस्मारगावत् शशधराणि
भं सर्वं मुहाभं सिद्धि पूजितं मो
क्तिकाभं नीलनिभ रुद्रादिभिः प्र
पूजितं वसुदेः सेन्द्र यक्षराक्षसके
यातुधानकैः नानावर्णमयं नीलं
शशांकमण्डलप्रभं ॥ इति
बाणलिंग लक्षणं । वीरमित्रो
दयधृतं ॥ इत्यतल्लक्षणं प्रोक्तं
परीक्षातत्वकोविदैः । त्रिः सप्त
चवारं वा तुलासाम्यं न जायते ॥
तदा बाणं समाख्यातं शेषं पाषा
णसंभवं तुलाकरणेन तण्डुले
न अपर तुलादिषु तण्डुला य
धिकाः स्युस्तदा तल्लिंगं गृहि
णां श्रेयमवधार्य लिंकं चेदधिकं
ततोदासीनमूर्ज्यं तद्भिं किंवदन्ती
हेमाद्रिधृतलक्षणकाण्डे । सुतसं
हितायां । समकृत्वा तुलारूढं
वृद्धिमेतिनहीयते बाणलिंगमि
ति ख्यातं शेषं नार्मदमुच्यते त्रिप
चवारं यस्यैव तुलासाम्यं न जाय
ते तदा बाणं समाख्यातं शेषं पा
षाणसंभवं वीरमित्रोदये नर्मदा
वाप्रतिपूज्या यदा तदुपलभ्यते
बाणलिंगं तदा विद्धिमस्तं सुखवि
वर्द्धनं इतिबाणलिंग परीक्षा ॥



बाणपाद् युत यति रपि नस्यैवा
अथबाणं समाख्यातं यथावत्स्पेन
याद्दितः बाणः सदाशिवो देवो बा
णो बाणान्तरोपि च तेन यस्मै कृते
तस्माद्बाणलिंगमुदाहृतं सदास
निहितस्तत्र शिवः सर्वदायकः ॥
कृतप्रतिष्ठं तल्लिंगं बाणाख्येन शि
वेन च पंकजस्य फलाकारं कंड
लस्य समाकृति पंकजफलं प
द्मवीजं पक्वजम्बुफलाकारं कुक्कु
टाण्ड समाकृतीति हेमाद्रिधृत
लक्षणकाण्डे पाद्मः भुक्तिमुक्ति
प्रदं चैव बाणलिंगमुदाहृतं या
ज्ञवल्क्यसंहितायां देवीप्रति ।
शिववाक्यं । प्रशस्तं नार्मदं लिंगं
पक्वं जम्बुफलाकृति मधुक'' न
या भ'' ' लं' रक्तनिभं हंस'
वाकृति पुनः स्थापनायां प्रशस्य
ते स्वयंसम्भवे लिंगे गिरिनिर्मनर्म
दाजले पुरा बाणासुरेणाहं प्रार्थि
तोऽनर्मदातटे अविवासं गिरौ त
त्र लिंगरूपी महेश्वरः बाणलिं
गमपि ख्यातमतो॰ध्यो जगतीत
ले अन्येषां कोटि लिंगानां पूज
नेयत् फलं लभेत् तत्फलं लभ
ते मर्त्यो बाणलिंगैकपूजनात् तथा
ताम्रवास्फाटिकी स्वर्णी पाषाणी


राजती तथा वेदिका च प्रकर्त
व्या तत्र संस्थाप्य पूजयेत् प्रत्यहं
यो र्च्चयेल्लिंगं नार्मदं भक्तिभावतः
ऐहिकं किं फलं तस्य मुक्तिस्तस्य
करे स्थिता ॥ इत्यप्रत्यह्वाणलि
गपूजाफलं सूतसंहितायां ॥
संस्थाप्य श्रीबाणलिंगं रत्नकोटि
गुणं भवेत् रसलिंगे ततो बाणात्
फलं कोटिगुणं स्मृतं गुणं तत्
रसलिंगस्य वक्तुं शक्नोति शंकरी
सिद्धये रसलिंगेषु राणि मायाः स्व
संस्थिताः केदारखंडे रत्नधातुम
यान्येव लिंगानि कथितान्यपि । प
विर्ष्णाण्येव रूप्याणि सर्वकामप्रदा
नि च यत्तेषामपि सर्वेषां काश्मीरं
हि विशिष्यते काश्मीरादपि लिंगा
च्च बाणलिंगं विशिष्यते बाणलिं
गात् परं नान्यत् पवित्रमिह दृश्यते
ऐहिकामुष्मिकं सर्वं पूजाकर्त्तः प्र
यच्छति इति बाणलिंगप्रशंसा
निंद्यलिंगमाह तत्रैव कर्कशे बा
णलिंगे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभंगो
भवेद् ध्रुवं । एकपार्श्वस्थिते येतु पु
त्रदारधनक्षयः शिरसि स्फुटिते
बाणे व्याधिर्मरणमेव च ॥ छिद्र
लिंगेः छिन्ने बाणे विदेशगमनं ।

भवेत् । लिंगे च कर्णिकां दृष्ट्वा व्या
धिमान् जायते पुमान् अन्यत्रापि ।
विलाग्रे तु गोधनानां क्षयो भवेत्
हेमाद्रिधृतं । तीक्ष्णाग्रं वक्रशीर्षं च
त्र्यस्रलिंगं विवर्जयेत् । अतिस्थू
लं चातिकृशं स्वल्पं वा भूषणान्वि
तं । गृही विवर्जयेन्नादं कृतद्धिमो
क्षार्थिनो हितं इति दुष्टबाणलिंगल
क्षणं । शुभलिंगमाह वीरमित्रोदये
अर्घ्यदं कपिलेलिंगं चनाभं मोक्ष ।
कांक्षिणां । लघुवा कपिलं स्थूलं र
हीनं बार्द्धयेत् क्वचित् पूजितव्यं ग्र
हस्थेन वर्णेन भ्रमरोपमं तत्सपी
ठमपीठं वा मंत्रसंस्कारवर्जितं ॥
सिद्धिमुक्तिप्रदं लिंगं सर्वप्रमाणपी
ठगं इति शुभबाणलिंगलक्षणं
सूतसंहितायां भैरववाक्यं ॥
बाणासुरः पुरा भेजे शिवस्यातीव
वल्लभः जितः क्रोधानरक्षाशि
वपूजाविधौ रतः वक्रित्वो निपुण
श्चैव शिष्ट्यो लक्षणान्वितः दिने
दिने स्वयंदृष्टा लिंगं स्थाप्य प्रपूजये
एवं वर्षशतं देवि दिव्यमानेन पूज
येत् । तदा तद्भक्तिसंलभः प्रत्य ।
प्रत्यक्षः शंकरो भवेत् शंकरउ
वाच ॥ तुष्टोः हंतवहं बाण वर

ब्रुहि किमिच्छसि । शंकरस्य वचः
श्रुत्वा बाणो वचनमब्रवीत् यदि तु
ष्टोऽसि हीनाय मह्यं त्वं मंदभागिने
क्लिष्टाः हे भवदेवेशालिंगं कृत्वा
दिने दिने तत्तल्लक्षणसंसिद्धल
क्षणं शास्त्रनिर्मितं प्राप्यध्येतु
लभो देव सिद्ध्यर्थं अहं लभ
तस्मात् यदि मे तुष्टो लिंगं देहि
सलक्षणं सर्वकाम कृतार्थं च
सर्वसत्वानुकंपने सर्वेषां च हिता
र्थाय प्रसादं कुरु शंकर इत्येवं वच
नं तस्य शिवः परमकारणं श्रुत्वा
कैलासमूर्द्धानं शंकरेण विनिर्मि
ताः लिंगानां कोटिसंख्याः तथा
चैव चतुर्दश । सिद्धलिंगं तदा त
तत्सर्वं ' ' ' ' ' ' अयोगेव
समं पूर्णं बाणस्य च समर्पितं अ
तया फलं देवाणं स्थाप्यमाने च
नित्यशः संपूर्णबाणः सद्भावं कृत्वा
प्रणयेन तदा । तद्भावं स्वपुरं नीत्वा
तेन चिंतयते शुचिः अत्यर्थं यदि
संसिद्धं स्थाप्यमाने दिने दिने ॥
सतां सिद्धिहेत्वर्थं बाणस्यान्ते
समं रये लिंगानां कालिकागर्भे
संचितास्ते त्रिकोटयः ॥ श्रीशैले
कोटयस्तिस्रः कोटैका कन्यका
श्रमे माहेश्वरे च कोटिस्तु कन्याती

षीतकोटिक महेन्द्रैवैवनेपालेप
कैकाकोटिरेवच। बाणार्थीक
नेलिंगंबाणलिंगमतःस्मृतं वा
णेनबाणशिवस्यकस्तत्कृतंबाण
मुच्यते। तस्मात्तेषु प्रदेशेषु पुण्य
स्थानेषुतेषुवा स्थितंतच्छिवसन्ना
वेशिवस्याकृतिविग्रहे हेम्नातदा
कृतिल्लवणासमुच्चयेऽपि स्वयंभू
लिंगवद्बाणलिंगभक्तोस्वमक्रेय
मरहस्यफलमवस्माद्यास्यापन
शुजने श्रीशैलेकालिकागर्भेलिं
गाष्टोकन्यकाश्रमे कन्यातीर्थवने
यानेमहेन्द्रेवामरेश्वरे स्थितानिबा
णलिंगानिशिवेनैवकृतानित।
सिद्धान्तशेखरेबाणलिंगान्यधिकृ
त्य तदनेकप्रकारंस्यादस्यबाण
मपीवकं लक्षणंनिविहीनंचबा
णंतत्स्वपुलायकमिति ॥बाण
लिंगेष्वावाहनादिनकर्त्तव्यं तदुक्तं
भविष्ये। बाणलिंगानिराजेन्द्रस्थि
तानिभुवनत्रये न प्रतिष्ठानसंस्का
रस्तेषामावाहनं नचेति योगसारे
पंचमपरिच्छेदे। ब्राह्मे मुहूर्त्तेवो
त्थायचःस्मरेद्बाणलिंगकं सर्वत्र
जयमाप्नोतिसत्यंसत्यंमहेश्वर ॥
अथबाणलिंगध्यानं तत्रैव।
ॐ प्रमत्तंशक्तिसंयुक्तंबाणाख्यंच
महाप्रभं। कामबाणान्वितंदेवंसं
सार दहन क्षमं। शृंगारादि रसो
ल्लासं बाणाख्यं परमेश्वरं। एवंध्या
त्वाबाणलिंगंयजेत्तंपरमंशिवं॥
मनसा गंध पुष्पाद्यैः संपूज्यास्यम
न्त्रंस्मरेत्। तथा प्राणायामं ततः
कृत्वा बाणलिंगंत तोषयेत्। तदि
ष्टदेवयोरैक्यंविभाव्यबाणभवंजपे
त्॥ ततोजपंसमाप्याथस्तवेना
नेन तोषयेत्॥ अथ स्तवः। ॐ
बाणलिंग महाभागसंसारात्त्रा
हिमांप्रभो। नमस्ते चोग्ररूपाय।
नमस्तेव्यक्तयोनये॥ संसार का
रिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक्।
प्रमन्नायमहेशाय कालरूपायवै
नमः दहनाय नमस्तुभ्यं नमस्ते
योगकारिणे भोगिनांभोगकर्त्रे।
मोक्षदात्रेनमोनमः नमः कामांग
नाशाय नमः कल्मषहारिणे न
मो विश्वप्रदात्रेच नमो विश्वस्वरूपि
णे बाणस्यवरदात्रेच रावणस्य त्
रायच रामस्यानुग्रहार्थाय राज्य
प्रदायतस्यच मुनीनांयोगदात्रेच
गतस्मानांतथायच नमस्तुभ्यंन
मस्तुभ्यंनमस्तुभ्यंनमोनमः पेशादि
काशक्तियुक्ताय महामायाप्रियाय
च। भगप्रियाय सर्वाय वैरिणा।

निग्रहाय च परित्राणाय योगिनां
कौलिकानांप्रियायच। कुलांग।
नानांभक्ताय कुलाचाररताय च
कुलभक्ताय योगाय नमोनाशाय
णायच मधुपान प्रमत्ताय योगे।
शाय नमोनमः कुलनिंदाप्रणा
शाय कौलिकानां सुखायच कुल
योगाय निष्ठाय शुद्धाय परमात्म
ने परमात्मस्वरूपाय लिंगात्मला
त्मकायच सर्वेश्वराय सर्वाय शि
वाय निर्गुणायच इत्येतत्परमं
गुह्यंबाणलिंगस्पर्शकरं यःपठेत्
साधकश्रेष्ठो गाणपत्यंलभेतसः॥
स्तवस्यास्य प्रसादेन योगी योगित्व
माप्नुयात् राज्यार्थी नाभवेद्राज्यं भो
गिनांभोगएवच। साधूनांसाधनेदेव
कौलिकानांकुलंभवेत् यंयंकाम
यते मंत्रीतंतमाप्नोतिलीलया बा
णलिंगप्रसादेन सर्वमाप्नोतिसत्व
रं किमन्यत् कथयामीह सर्ववेत्
सि कुलेश्वर महाभयेसमुत्पन्ने वा
ज्यद्वारे कुलेश्वर। देशान्तर भये प्रा
प्ते दस्युचौरादि संकुले पठनात्
स्तवराजस्य नभयं लभते क्वचित्
बाणलिंगस्य माहात्म्यं संक्षेपात्
कथितंमया। तस्यश्रवणमात्रेण
नरोमोक्षमवाप्नुयात् बाणलिंगे।
सदाराध्येयोगिनां योगसाधने ॥
कौलिकानांकुलाचारे यत्नतो प्रा
च्यनिग्रहे। वेदज्ञानांवेदपाठेरो
गिणांरोगनाशने ॥ यो यो नाम
पठेदेनं सर्वं तन्निष्फलं भवेत्।
इतिश्रीयोगसारे सर्वागमोत्तमे
पार्वतीशिवसंवादे बाणलिंग।
स्तोत्रं समाप्तं ॥
बाणा स्त्री पुं नीलझिंटी इत्यमरः
बाणा स्त्री बाणमूलं इतिमेदिनी
बाणिः स्त्री वस्त्रादीनांवयनक्रिया
तत्पर्य्यायः व्यूतिः २ इत्यमरः॥
व्यूतिः २ इतितट्टीकायांभरतः॥
बाणिजः पुं वणिक् इत्यमरः
वाडवाग्निः इतित्रिकाण्डशेषः॥
बाणिजिकः पुं वाडवाग्निः वणिक्
इति मेदिनी धूर्त्तः इति शब्दर
त्नावली ॥
बाणिज्यं क्ली वैश्यवृत्तिभेदः इत्य
मरः बाणिजःकर्मभावो वा। व
णिज्यमपिदृश्यते इति भरतः।
तत्पर्य्यायः। सत्यानृतं २ बाणि
ज्या ३ वणिक्पथः ४ इतिजटाध
रः क्रयविक्रयरूपस्य तस्य वि
वरणादि यथा मानेन तुलया
वापियोयांशमष्टमकं हरेत् द्रु
सहाप्य हिंसतं हेद्राहामो च



कल्प्यते ॥ यः पुन र्वणिक् व्रीहि
कार्पासादेः पण्यस्याष्टमभागं क्र
यमानेन क्रयमूल्याद्वाभ्यधिकप
हरत्यसौ पणानां द्विशतं दण्डनी
यः अपहृतस्य पुनर्द्रव्यस्य वृद्धौ ।
हानौ च दण्डस्यापि वृद्धिहानी क
ल्प्ये ॥ भेषजस्नेहलवणगन्धधान्य
गुडादिषु पण्येष्वपहृतमल्पमहीनेप
णेन ह्रासयतः षोडशपणा भेषजमौष
धद्रव्यं स्नेहाच्छृतादिः । गन्धद्रव्यमु
शीरादि आदिशब्दाद्धिंगुमरिचादि
पनेषु सारद्रव्यं विक्रयार्थं मिश्रय
तः षोडशपणो दण्डः ॥ किंच ॥
मृच्चर्ममणिसूत्रायःकाष्ठवल्कल
वाससाम् । अजातौ जातिकरणे वि
क्रेयाष्टगुणो दमः ॥ मृद्विषये
बहुमूल्या जाति यस्मिन्कर्मादिके
तदजातिः तस्मिन् जातिकरणे वि
क्रयार्थं गन्धवर्णरसान्तरसंचार
णेन बहुमूल्यजातीयमाध्यसं
पादने यथा मल्लिकामोदसंचारणे
न मल्लिकागन्धधामलकमिति
मार्जारचर्मणि वर्णोत्कर्षापादने
न व्याघ्रचर्मेति स्फटिकमणेर्वर्णा
न्तरकरणेन पद्मराग इति कार्पासि
के सूत्रे गुणोत्कर्षाधानेन पट्टसूत्र
मिति कार्ष्णायसे वर्णोत्कर्षाधानेन

रजतमिति बिल्वकाष्ठे चन्दनामोद सं
चारणेन चन्दनमिति कंकोले लवंगा
ख्यं लवंगमिति कार्पासिके वाससि
गुणोत्कर्षाधानेन कौशेयमि
ति विक्रयस्यापादितस्य द्रव्यस्य
मौल्यात् पण्यस्याष्टगुणो दण्डो वेदि
तव्यः समुद्रपरिवर्त्तं च सारभाण्डं
च कृत्रिमं । आधानं विक्रयं वापि
नयतो दण्डकल्पना । भिन्ने पणे तु
पञ्चाशत् पणे तु शतमुच्यते द्वि
पणे द्विशतो दण्डो मूल्यवृद्धौ च
वृद्धिमान् समुद्रं पिधानं मुद्रेन सह
वर्त्तत इति समुद्रं करण्डकं परिव
र्त्तनं व्यत्यासः । योऽन्यदेव मुद्रकान्ता
पूर्णं करण्डकं दर्शयित्वा हस्तला
घवेनान्यदेव स्फटिकादिपूर्णं क
रण्डकं समर्पयति यश्च सारभाण्डं
कस्तूरिकादिकं कृत्रिमं कृत्वा विक्र
यमाधिं वा नयति तस्य दण्डकल्पना
वक्ष्यमाणा वेदितव्या । कृत्रिमकस्तू
रिकादेर्मूल्यं भूतेषु पणेषु भिन्नेषु न्यू
नपणमूल्यमिति यावत्तस्मिन् कृ
त्रिमे विक्रीयते पञ्चाशत्पणो दण्डः
पणमूल्ये पुनः शतं द्विपणमूल्ये द्वि
शतो दण्ड इत्येवं मूल्यवृद्धौ दण्डवृ
द्धिरूहनीया ॥ वाणिजः प्रसादः । सं
भूय कुर्वतामर्घं सबाधं कारु

शिल्पिनाम् । अर्घस्य ह्रासं वृद्धिं वा ।
जानतां दम उत्तमः ॥ राजनिरूपिता
र्घस्य ह्रासं वृद्धिं वा जानतोऽपि वणि
जः संभूय मिलित्वा कारूणां रज
कादीनां शिल्पिनां चित्रकरादीनां स
बाधं पीडाकरमर्घमन्यं लाभलोभा
त् कुर्वतः पणसहस्रं दण्डनीयाः ।
किंच संभूय वणिजां पण्यमनर्घे
णोपरुन्धतां । विक्रीणतां वा वि
हितो दण्ड उत्तम साहसः ॥
ये पुनर्वणिजो मिलित्वा देशान्तरा
दागतं पण्यमनर्घेण हीनमूल्येन ।
प्रार्थ्यमाना उपरुन्धन्ति महार्घे
ण वा विक्रीणते तेषामुत्तमसाह
सो विहितो दण्डो मन्वादिभिः केन
पुनरर्घेण पणितव्यमित्याह राज
नि स्थाप्यते योऽर्घः प्रत्यहं तेन वि
क्रयः क्रयो वा निस्रवस्तस्माद्वणि
जां लाभकृत् स्मृतः ॥ राजनि सन्नि
हिते सति यस्तेनार्घः स्थाप्यते नि
रूप्यते तेनार्घेण प्रतिदिनं क्रयो
विक्रयो वा कार्यः । निर्गतः स्रवो नि
स्रवः विशेषस्तस्माद्राजनिरूपिता
र्घान्निस्रवः स एव वणिजां लाभका
री न पुनः स्वच्छन्दपरिकल्पितात् ॥
मनुनाप्यर्घकरणे विशेषो दर्शि ।
तः पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा

गते कुर्वीत चैषां प्रत्यक्षमर्घसंस्थाप
नं नृपः इति किंच स्वदेशपण्ये
च शतं वणिक् गृह्णीत पञ्चकं ।
दशकं पारदेश्ये तु यः सद्यः क्र
यविक्रयी स्वदेशप्राप्तपण्यग्राही
त्वा यो विक्रीणीते सः पञ्चकं श
तेऽपणशते पणपञ्चकं लाभं गृ
ह्णीयात् परदेशप्राप्तं पुनः पण्य
शतपणमूल्ये दशपणान् लाभं
गृह्णीयात् यस्तु पण्यग्रहणदिव
स एव विक्रयः संपद्यते । यः पुनः
कालान्तरेऽपि विक्रीणीते तस्य का
लेन कर्षवशाल्लाभोत्कर्षक
ल्पः । एवं च यथार्घनिरूपिते
पणशते पञ्चपणो लाभो भव
ति [illegible] राज्ञा स्वदेशपण्ये
विध [illegible] स्था [illegible] यः ॥ परदेश
पण्ये अर्घनिरूपणप्रकारमाह
पण्यस्योपरि संस्थाप्य व्ययं
पण्यसमुद्भवं । अर्घोऽनुग्रहकृत्का
र्यः क्रेतुर्विक्रेतुरेव च । देशान्तरा
गमनप्रत्यागमनभाण्डग्रहणशु
ल्कादिस्थानेषु यावान् व्ययः कार्य
स्तावन्तमर्घं परिगणय्य पण्य
मूल्येन सह मेलयित्वा यथा
पणशते दशपणो लाभः सम्प
द्यते तथा क्रेतृविक्रेत्रोरनुग्रह
कार्योऽर्घो राज्ञा स्थापनीयः ।



प्रासंगिकं परिसमाप्याधुनाविक्रीयासंप्रदानं प्रक्रमते तत्स्वरूपं नारदेनाभिहितं । विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते विक्रीयासंप्रदानं तद्विवादपदमुच्यते तत्र विक्रेयद्रव्यस्य जङ्गमस्थावरभेदेन द्वैविध्यमभिधाय पुनः षड्विधत्वं तेनैवमप्यपादि ॥ लोकेऽस्मिन् द्विविधं द्रव्यं जङ्गमं स्थावरं तथा षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः । गणिमं तुलिमं मेयं क्रियया रूपतः श्रियेति गणिमं क्रमुकफलादि तुलिमं कुङ्कुमादि मेयं शाल्यादि क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि रूपतः पण्याङ्गनादि श्रिया दीप्त्या मरकतपद्मरागादि इत्येवं तत् षट्प्रकारमपि पण्यं विक्रीयासंप्रयच्छतो दण्डमाह । गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति । सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते गृहीतमूल्यं यत्पण्यस्य विक्रेत्रा तदहीनमल्पं यदि विक्रेता प्रार्थ्यमानाय स्वदेशवणिजे क्रेत्रे न समर्पयति । तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत् कालान्तरेऽल्पमूल्येनैव लभ्यते तदार्घह्रासकृतो

य उदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः । यदा मूल्यकृतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यत्तो मूल्यस्य यत्पण्यमिति प्रतिपन्नं तावदेव तदा तत्पण्यमादाय तस्मिन् देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं देशिकमित्यादि प्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेतुर्वाञ्छावशाद्दापनीयः ॥ यथाह नारदः । अर्घश्चेदवहीयेत सोदयं पण्यमावहेत् । स्थानिनामेष नियमो दिग्लाभं दिग्विचारिणामिति ॥ यदा तदर्घमहत्त्वेन पण्यस्य न्यूनभा[illegible] स्तदा तत् [illegible] उपभोगः तदाच्छादनस्त्रवनिवासादिरूपो विक्रेतुस्तेन सहितं पण्यमसौ दाप्यः यथाह नारदः । विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलमिति विक्रेतरुपभोगः तत्र उच्यते । क्रेतुः संबन्धित्वेन दीयमानानां पुनः कुङ्कुपातप्रायस्य । ह्रासादिरूपः । तस्य तु । उपहन्येत वा पण्यं दह्येतापह्रियेत वा विक्रेतुरेव सोऽनर्थो विक्रीयासं ।

प्रयच्छत इत्यनेनोक्तत्वात् यदा त्वसौ क्रेता देशान्तरात् पण्यग्रहणार्थमागतस्तदा तत्पण्यमादाय देशान्तरे विक्रीणानस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः । अयं च क्रीतपण्यसमर्पणनियमोऽनुशयाभावे द्रष्टव्यः । सति त्वनुशये क्रीत्वा विक्रीय वा किंचिदित्यादिमनूक्तं वेदितव्यं ॥ किंच विक्रीतमपि विक्रेयं पूर्वं क्रेता न गृह्णाति हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत् यदा पुनर्जातानुशयः क्रेता पण्यं

दत्तमिति तदा विक्रीतमपि पण्य

अयन्त विक्रेयं यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत् पण्याग्रहणरूपेण क्रेतृदोषेण नाशितत्वात् अपि च राजदैवोपघातेन पण्ये दोषमुपागते हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः । यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अजातानुशयोऽपि तच्च राजदैविकेनोपहतं भवति तदासौ हानिर्विक्रेतुरेवातोऽन्यदुष्टं पण्यं विनष्टं ॥ ॥

सदृशं क्रेत्रे देयं ॥ किंच । अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्यदि विक्रीणीते दमस्तत्र मूल्यात् द्विगुणो भवेत् ॥ यः पुनर्विनैवानुशयमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यमाच्छादितदोषं विक्रीणीते तदा तत्पण्यमूल्यात् द्विगुणो दमो वेदितव्यः । नारदेनाप्यत्र विशेषो दर्शितः अन्यहस्ते तु विक्रीय योऽन्यस्मै तत् प्रयच्छति । द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥ निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति । स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव तु इति सर्वत्रायं विधिर्दत्तमूल्यपण्ये द्रष्टव्यः । अदत्तमूल्ये पुनः पण्ये वाचा क्रये केवले क्रेतुर्विक्रेतुर्निर्गमकारिणः समयाहते ग्रहणेऽग्रहणे वा न कश्चिद्दोषः यथाह नारदः । दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः । अदत्तेऽन्यत्र समयान्न विक्रेतुरतिक्रम इति । विक्रयानुशयोऽभिहितः क्रीतानुशयस्वरूपं तु प्रपंचितमधुना तदुभयसाधारणं धर्ममाह । क्षयं वृद्धिं च वणिजा पण्यानामविजानता । क्रीत्वा नानुशयः कार्यः कुर्वन् ष



ज्ञागद्दणभाक् परीक्षितं क्रीतपण्य
नोऽक्रयानन्तरकाले क्रियकालपरिमा
णान्तोर्थं कृतानुह्निमपष्यता क्रेत्रा
नुशयेन कार्य्यः विक्रेत्रा च मह
त्यनिर्बन्धेन पण्यहृय मपश्यतान्ता
नुशयितव्यं हानिदय परिक्षाने
पुनः क्रेतृविक्रेत्रोरनुशयो भवती
त्यतिरेकादर्थं भवति अनुशय
कालावधिश्च नारदेनोक्तः क्रीत्वा
मूल्येन यः पण्यं दुःक्रीतं मन्यते
क्रयी विक्रेतुः प्रतिदेयं तत्तस्मिन्ने
वाह्न्यविक्षतं द्वितीयेऽह्नि दद्यत्
क्रेता मूल्यात्त्रिंशांशमावहेत्
द्विगुणं तत्तृतीयेऽह्नि परतः क्रे
तुरेव तदिति ॥ अपवीक्षितक्र
यविक्रये ... पण्ये ... ति ...
... शयावधिदशोक पंच स
माह्न्यादिना दर्शित एव । तदन
या वाचो युक्ता हानिदयपरिक्षा
नस्यानुशय कारणत्व मवग
म्यते । यथा पण्य परीक्षाविधि
वलात् पण्य दोषाणां ज्ञानः प
ण्यदोषतत् हानि त्य कारण
त्वि तया भावेनुशयकालाभ्यन्त
रेपियद्यनुशयं करोति तदापि
पणषड्भागंदण्डनीयः अनुशय
कारण सद्भावेप्यनुशयकालाति
क्रमेणानुशयं कुर्वतोप्ययमेव दण्डः
उपभोगेनाविनश्वरेषु स्थिरार्थे
ष्वनुशय कालातिक्रमेणानुश
यं कुर्वतो मनुक्तो दण्डो द्रष्टव्यः प
रेणानुदशाहस्यानदद्यान्नापिदाप
येत् आददानो ददच्चैव राज्ञा दण्ड्यः
शतानि षडिति ॥ इति मिताक्षरा
यां विक्रीयासम्प्रदानं नाम प्रकरणं
अथ बृहस्पतिः कृषीदकृषिवाणि
ज्यं प्रकुर्वीतास्वयंकृतं आपत्का
ले स्वयं कुर्वन्नैनसा लिप्यते द्विजः
लब्धलाभः पितॄन्देवान् ब्राह्म
णांश्चैव पूजयेत् ते तुष्टास्तस्य तं
दोषं शमयन्ति न संशयः वणिक्
कृषीदीदद्यात् वस्त्रगो कांचनादिकं
वणिक्कृषीयदोषः स्यात् ब्राह्म
णानां च पूजनात् ॥ इत्याह्निकतत्वं
वाणिज्या स्त्री वाणिज्यं इति जटा
धरः ॥
वाणिनी स्त्री विदग्धा नर्त्तकी म
त्तयोषित् । इत्यजयपालः ॥
वाणी स्त्री स्तुतिः सरस्वती इति
मेदिनी वाक्य । इत्यमरः ॥
वादरः पु कार्पाससूत्रः इति ।
हेमचंद्रः कार्पास निर्मित वस्त्रे
त्रि इत्यमरः ॥
वादरा स्त्री कार्पासवृक्षः । तत्
पर्य्यायः ॥ ॥

कार्पासी १ तूलपुष्पा २ वदरी
४ समुद्रान्ता ५ तलिरेकेरी ६ का
र्पासिका ७ इति शब्दरत्नावली
अस्याः पर्य्यायान्तराणि अस्य का
र्पासीशब्दे द्रष्टव्याः ॥
बाध अ उ विहतौ । इति कविक
ल्पद्रुमः अ अबवाधत् उ कृत्वं
त बाधित्वा बाधिकोऽववाधे इति दुर्गा
दास धृतरघुः ॥
बाधः पु प्रतिबंधकः व्याघातः
न्यायमते साध्याभाववत् पक्षः
यथा ह्रदो वह्निमान् इति सामा
न्यनिरुक्तिर्गादाधरी ॥
बाधकः पं स्त्रीरोगविशेषः यथा
रक्तमाद्री तथा षष्ठी चांकुरो जल
कुमारकः चतुर्विधो बाधकः स्या
न्नारीणामृतिविभाषितः तेषांस्व
भावं वक्ष्यामि यथा शास्त्रविधान
तः यत्नेषाह्मजं कार्य्यं जनैः सं
तानकांक्षिभिः निःसारणं स्यापि
तेन चवलिदानं जपस्तथा कर्त्तव्यो
गुरुवाक्येन यथाशास्त्र विचक्षणैः
चतुर्विधा बाधकस्तु जायते ऋत
कालतः तस्य लक्षणं यथा ब
धाकस्तेन तथा नाभेरधः पार्श्वेस्त
नेपि च । रक्तमाद्री प्रदोषेणाङ्गा
यते फलहीनता ॥ मासमेकं द्वय
वापि अत्र योगो भवेद्यदि रक्तनाड्री
प्रदोषेण फलहीना तदा भवेत् ॥
इति रक्तमाद्याः ॥ नेत्रे हस्ते भवेज्ज्वा
ला योनौ चैव विशेषतः ॥ ला
लासंयुत रक्तंच षष्ठी बाधक यो
गतः ॥ मासेकेन भवेद्यस्या ऋ
तुस्नान द्वयं तथा । मलिना रक्त
योनिः स्यात् षष्ठी बाधक योगतः
इति षष्ठ्याः ॥ उद्वेगो गुरुता देहे
रक्तस्रावो भवेद्बहु । नाभेरधो
भवेत् शूलं चांकुरः सतु बाधकः
ऋतुहीना च त्रिमासं त्रिमासं वा
भवेद्यदि । कृशाङ्गी कर पादे च
ज्वाला चांकुर योगतः ॥ इति चां
कुरस्य ॥ स स्थूला च स गर्भा
च स्तम्भ कदेहस्य — का जलकु
स्य दोषेण जायते फलहीनता
या कृशाङ्गी भवेत् स्थूला वक्रका
ल ऋतु स्तथा गुरुस्तनी स्वल्प र
क्ता जलकुमारस्य लक्षणात् इति
जलकुमारस्य इति वैद्यकं बाधा
जनके त्रि ॥
बाधनं क्ली पीडा इति शब्दरत्ना
वली प्रतिबंधकश्च ॥
बाधा स्त्री पीडा इत्यमरः निषे
धः । इति हेमचंद्रः ॥
बाधितः त्रि बाधायुक्तः निवर्त्तः

यथा। सकृद्गत विप्रतिषेधेन यद्बा
धितं तद्बाधित देव। इति मुग्धबो
धटीकायां दुर्गादासः॥
वाधिर्य्यं क्ली वधिरस्य भावः कर्ण
रोगविशेषः। तस्य निदानं। यथा
यदा शब्दवहं वायुः स्रोत आवृत्य
तिष्ठति। शुद्धः श्लेष्मान्वितो वापि
वाधिर्य्यं तेन जायते॥ इति माध
वकरः॥ अस्यौषधं यथा। अ
र्कमूलक शुण्ठीनां क्षारो हिङ्गु
लनागरं। शुक्तं च तद्गुणं दद्यात्तै
लमेतैर्विपाचयेत्॥ वाधिर्य्यक
र्णशूलं च पूयस्रावश्च कर्णयोः
कृमयश्च विनश्यन्ति तैलस्यास्य
प्रपूरणात्। अपि च प्रस्थेहैगर
मालाना क्वाथयेद्दोनमस्मसा च
तम्भोणवशेषेन तैलप्रस्थं विपा
चयेत् कांजिकस्याढकं दत्वा पि
ष्ट्वैतानि दापयेत्। पुनर्नवा।
गोक्षुरकं सैन्धवं शुषणं वचा॥
सरलं सुरदारु च बृहती कंटका
रिका। तस्य पानाद्धरत्येव कर्ण
शूलं हनुग्रहं वाधिर्य्यं सर्वरोगं च
अपभागञ्च महेश्वर। इति गारुडे
१९८ अध्यायः॥
वाध्यं त्रि वाधनीयं। वाधितव्यं।
निवर्त्त्यं। यथा। सांगचिन्तालिंग
दर्शनात् प्रकरणमिदं वाध्यं
इति ब्रह्मसूत्रस्य समंजसावृत्तिः
वाध्यता स्त्री वाध्यत्वं वाध्यस्य
भावः इत्यर्थे तप्रत्यय निष्पन्नो
ऽयं शब्दः॥
वांधकिनेयः त्रि असतीसुतः इत्य
मरः॥
वांधवः पुं ज्ञातिः इत्यमरः॥
सुहृत्। इति मेदिनी। अस्य विव
रणं वंधुशब्दे द्रष्टव्यं॥
वाभ्रवी स्त्री दुर्गा। इति त्रिकाण्ड
शेषः॥
वारकीरः पुं द्वारयाही वाडवः
युका वेणिवेधिनी नीराजित
हयः। इति मेदिनी॥
वार्वटीरः पुं त्रपु आम्रास्थि॥
अंकुरः गणिकासुतः इति हे
मचन्द्रः॥
वालं क्ली पुं गंधद्रव्यविशेषः।
वाला इति ख्यातं इति मेदिनी॥
तत्पर्य्यायः ह्रीवेरं २ वर्हिष्ठं ३
उदीच्यं ४ केशनामकं ५ अम्बुनाम
कं ६ इत्यमरः ह्रिवेरं ७ वर्हिःष्ठं
८ इति भरतः वालकं ९ वारिदं १०
इति शब्दरत्नावली॥ वरं ११॥
ह्रीवेरकं १२ केश्यं १३ वज्रं १४
पिंगं १५ ललनाप्रियं १६ जलं।

लोशीरं १७ कचामोदं १८ अस्य गुणाः
शीतलत्वं। तिक्तत्वं। पित्तवांति।
तृषा ज्वर कृष्णातिसार श्वास व्रण
नाशित्वं। केशहितत्वं च। इति रा
जनिर्घण्टः॥ अपि च वाला वाट्या
लिका वाट्या सैव वाट्यालिका पि च
महावला पीतपुष्पा सहदेवी च
सा स्मृता ततोऽन्यातिवला ऋष्य
प्रोक्ता कंकतिका सह। गांगेरु
कीनागवला झसा ह्रस्वा गवेधु।
का॥ अस्य गुणाः। वला चतुष्टयं
शीतं मधुरं वलकान्तिकृत्। स्निग्धं
ग्राहि समीरास्रपित्तास्रक्षतनाशनं
वालाचतुष्टय विशेष गुणाः व
ला मूल त्वच चूर्णं पीतं ...
शार्करं। मूत्रातिसारं हरति दृष्टमे
तन्न संशयः॥ हरेन्महावला कृच्छ्रं
भवेद्वातानुलोमनी हन्यादतिवला
मेहं पयसा सितया सह॥ इति
भावप्रकाशः॥
वालः त्रि मूर्खः॥ अर्भकः। इति
मेदिनी॥ द्वितीयस्य पर्य्यायः मा
णवकः २ इत्यमरः वालकः ३ मा
णवः ४ किशोरः ५ वटुः ६ मुषिं।
पयः ७ वटकः ८ किशोरकः ९
इति शब्दरत्नावली॥ पाकः १० ग
र्भः ११ हितकः १२ पृथुकः १३ शि
शुः १४ शावः १५ अर्भः १६ डिम्भकः
१७ डिम्बः १८। इति राजनिर्घण्टः
स तु षोडशवर्षपर्य्यन्तः प्रथम
वयस्कः। यथा। आषोडशाद्भ
वेद्वाल स्तरुणस्तत उच्यते वृद्धः
स्यात् सप्ततेरूर्द्धं वर्षीयान्नवतेः
परं॥ इति स्मृतिः॥ इति भरतः
तस्य रक्षकाः सर्वदेवताः यथा
अनाथ वालवृद्धानां रक्षकाः स
र्वदेवताः इति ब्रह्मवैवर्त्ते श्रीकृ
ष्णजन्मखण्डे ८६ अध्यायः॥
अथ वालस्य परिचर्य्याविधिः वा
लं मे केसुविदष्यानचैनं तर्जयेत्
क्वचित्। सहसा वोधयेन्नैव नायो
ग्यमुपवेशयेत् अयोग्यमुपवे
शनासमर्थं। नाकष्ठ स्थापयेत्
क्रोडे न दिवसे शायनं क्षिपेत्। रो
दयेन्न क्वचित् कार्य्यविधमाव
श्यकं विना आवश्यको विधिः भे
षजदान तैलाभ्यंगोद्वर्त्तनादि॥
तच्चित्तमनुवर्त्तेत सेव्यानुमोद
येत्। संसेवितमना यत्के नित्यमे
वाभिवर्द्धयेत् वालान्यततिदृ
ष्टिं धूमानल जलादितः नेत्रा
च्चस्यानतश्चापि रक्षेत् वालं प्रय
त्नतः॥ वालस्य स्वभावाद्धि
तान्याह। अभ्यंगोद्वर्त्तनं स्ना
नं नेत्रयो रञ्जनं तथा। वसनं
मृदु यत्नश्च तथा मृद्वनुलेपनं॥



जन्मप्रभृति पथ्यानि वालस्यैता
निसर्वथा ॥ वालस्य कवलादेः
समयमाह । कवलः पंचमाद
र्षाद्विंशते स्त्रैव मैथुनं ॥ वाल्या
दे रवधिमाहस्वश्रुतः । वयस्त्रि
विधंवाल्यमध्यमंवार्द्धकंतथा ॥
ऊनषोडशवर्षस्तु नरो वालो निग
द्यते ॥ त्रिविधः सोपिदुग्धाशी दु
ग्धान्नाशीतथान्नभुक् । दुग्धाशी
वर्षपर्यंतं दुग्धान्नाशी शरद्वय
तदुत्तरंस्यादन्नाशी एवं वाल स्त्रि
धा मतः ॥ मध्यं षोडश सप्तत्या म
ध्यमः कथितो बुधैः चतुर्धामध्य
मंप्राहुर्वृद्धा द्वात्रिंशतोमतः चत्वा
रिंशत्समायावान्नेष्ट [illegible] व्यादिषु
विभु ततः क्रमेण [illegible] णः स्यायथा
वद्वर्तिसम्प्रतिः वीर्य्यादीन्यादि
शद्धेनरसादि सर्वधातिंद्रिय व
लोत्साहाद्यपैते हीणःसर्वधा
त्विंद्रियबलोत्साहैर्हीनः तत
स्तुसमेतेद्वर्द्धीणधातुरसादि
हीयमाणेंद्रिय वलः क्षीणरे
तो दिने दिने ॥ वली पलित ।
खालित्य युक्तः कर्मस्वचात
मः कासश्वासादिभिः क्लिष्टो
वृद्धो भवतिमानवः वाल्ये वि
वर्द्धतेश्लेष्मापित्तं स्यात्मध्यमा
द्धिकं । वार्द्धके वर्द्धते वायु ।

र्विचार्यैतदुपक्रमेत ॥ उपक्रमेत्
चिकित्सेत ॥ तंत्रांतरेत । वाल्ये
वृद्धि छवि मेधा त्वग्दृष्टिः शुक्र
विक्रमौ । बुद्धिः कर्मेंद्रियं रेतोजी
वितं दशतो हसेत् इति भा
वप्रकाशः ॥
वालः पुं शिरोभवाच्छादनविशेषः
चुल इति भाषा तत्पर्य्यायः चिकु
रः २ कचः ३ केशः ४ कुंतलः ५
कुंजरः ६ शिरोरुहः ७ शिरसि
रुहः ८ शिरोरुहः ९ शिरजः १० ॥
इति शब्दरत्नावली ॥ छोटकशि
शुः तत्पर्य्यायः किशोरः २ इत्य
मरः ॥ अश्ववालधिः । करिवाल
धिः नारिकेलः । इति मेदिनी पं
चवर्षी यदस्ती यथा । पंचवर्षात्म
जो वालः स्यात पोतो दशवर्षकः
इति हेमचंद्रः पुच्छः । इति शब्द
रत्नावली मत्स्यविशेषः ॥ इति
शब्दचंद्रिका ॥
वालकं क्ली ह्रीवेरं इति राज नि
र्घंटः अंगुलीयकं पारिहार्य्यं ॥
इति विश्वः ॥
वालकः पुं शिशुः ॥ अश्वः ।
हयवालधिः ॥ हस्तिवालधिः
अंगुरी यवकं ॥ ह्रीवेरं ॥
वलयं ॥ इति मेदिनी ॥

इति मेदिनी केशः । इति विश्वः ॥
वालाशौचं यथा । अजातदंता ये
वाला ये च गर्भाद्विनिःसृताः न
तेषामग्निसंस्कारो न पिंडं नोद
कक्रिया यदि गर्भो विपद्येत स्रव
ते वापि योषितः । यावन्मासान
स्थितो गर्भस्तावद्दिनानि सूतकं
आनामकरणात्सद्य आचूडांता
दहर्निशं आव्रतस्यात्त्रिरात्रेण त
दूर्द्ध्वं दशभिर्दिनैः इति गारुडे ९६
अध्यायः ॥ वालकस्वरूपं यथा
आदायकंसस्य संप्रत्ता यशोदापित
तो द्विज गोपुच्छभ्रामणेनाशु वा
लदोषनपाकरोत् गोपुरीषमथा
दाय नंदगोपोऽपि मस्तके । कृत्स्न
स्य प्रददौ रक्षां कवित्रिदमुदीरयन्
नंद उवाच रक्षतु त्वामशेषाणां भू
तानां प्रभवो हरिः यस्य [illegible] हिसम ।
भूतप्रद्युग्नादभवज्जगत् येनदंष्ट्रा
ग्रविधृता धारयत्यवनीजगत् [illegible]
ह्यापद्यकृ देवः स त्वां रक्षतु केश
वः नखा [illegible] रविनिर्भिन्नवैविवक्षः
स्थलो विभुः नृसिंहरूपी सर्वत्र
स त्वां रक्षतु सदा भवंत यत्क्षणाद
भूत् त्रिविक्रम [illegible] तत्रैलो
क्याः स्फुरदायुधः शिरपातुगो ।

विंदः कंठं रक्षतु केशवः । गुह्यं सज
ठरं विष्णु जंघा पादं जनार्दनः मुखं
बाहू प्रवाहू च मनः सर्वेंद्रियाणि
च । रक्षत्वव्याहतैश्वर्य्यस्तवनारा
यणोऽव्ययः ॥ शार्ङ्गचक्रगदाच
क्रशंखनादहताः क्षयं । गच्छ
तु प्रेतकूष्माण्डा राक्षसा ये तवा
हिताः ॥ त्वां पातु दिक्षु वैकुंठो वि
दिक्षु मधुसूदनः । हृषीकेशो
ऽम्वरे भूमौ रक्षतु त्वां महीधरः
एवं कृतस्वस्त्ययनो नंदगोपेनवा
लकः [illegible] शकटस्य [illegible]
[illegible] इति विष्णुपुरा
णे ५ अंशे ५ अध्यायः ॥
वालकप्रिया स्त्री इंद्रवारुणि क
दली इति राजनिर्घंटः ॥
वालकृमिः पुं केशकीटः इति
जटाधरः ॥
वालक्रीडनं क्ली वालकखेला
यथा वालक्रीडनमिंद्रशोर्ववरथ
नेर्भ [illegible] वधिप्रकृता इत्यादिम
हानाटकं वालक्रीडनकः पुंक
पर्द्दकः इति राजनिर्घंटः ॥
वालखिल्यः पुं वालखिल्यमुनिः
यथा विधिना निर्मिता पूर्वं वेदी
परमपावनी अग्निवेषपादिमुनयो

बालखिल्याद्यः स्थिताः इति ह
द्रामायणे चित्रकूटमाहात्म्ये सर्गः
बालगर्भिणी स्त्री प्रथमगर्भवती
गौः तत्पर्य्यायः । प्रष्ठौही २ इत्य
मरः ॥
बालगोपालः पुं श्रीकृष्णमूर्त्ति
विशेषः यथा नीरपयोनिधि वृ
त्तनिवासं हास्यकटाक्षं वेशिनि
नादं प्रणमत सुंदरनृत्यविला
पं ते प्रणमामि च बालगोपालं
इति नारदपंचरात्रे गोपालाष्ट
कं ॥
बालग्रहः पुं बालकर ·· हविशे
षः यथा । बालग्रहा अनाचारा
त् पीडयंति शिशून् यतः तस्मात्
उपसर्गेभ्य रक्षेद्बालं प्रयत्नतः ॥
अथ बालग्रहाणां नामान्याह स्कं
दग्रहस्तु प्रथमः स्कंदापस्मार ए
व च शकुनी रेवती चैव पूतना
गंधपूतना पूतनाशीतपूर्वा च
तथैव मुखमंडिका नवमो नैग
मेयश्च प्रोक्ता बालग्रहा अमी ॥
अथ ग्रहाणामुत्पत्तिमाह नरस्कं
दादयः प्रोक्ता बालानां ये ग्रहा अमी
श्रीमंतो दिव्यवपुषो नारीपुरुषवि
ग्रहाः एते स्कंदस्य रक्षार्थं कृत्तिकोमाग्नि
शूलिभिः । सृष्टाः शरवनस्थस्य
रक्षितस्य स्वतेजसा स्कंदः सृष्टो भ
गवता देवेन त्रिपुरारिणा बिभर्त्ति
चापरां संज्ञां कुमार इति स ग्रहः ।
अयं हि कार्त्तिकेयादन्यः ॥ स्कंदा
पस्मारसंज्ञो यः सोग्निना तत्सम
द्युतिः स च स्कंदसखो नाम्ना वि
शाख इति चोच्यते ग्रहाः स्त्री वि
ग्रहा ये ते नानारूपाः प्रकीर्त्तिताः
देवानां कृत्तिकानां ते भागाराज
सतामसाः नैगमेयस्तु पार्वत्या
सृष्टो ह्येषां ततो ग्रहः । कुमारस्य
हि देवस्य गुहस्यात्मसमो सिवै ॥
ततो भगवति स्कंदे सुरसेनापतौ
कृते उपतस्थुर्ग्रहा ये ते दीप्तशक्ति
धरं ग्रहं ऊचुः प्रांजलयश्चैनं वृत्ति
र्नौ दीयतामिति तेषामर्थेन ततः स्कंदः
शिवं देवमचोदयत् ततो ग्रहांस्तान्
वाच भगवान्भगनेत्रहृत् तिर्य्य
ग्योनिं मानुषं चैव देवं च त्रितयं जग
त् परस्परोपकारेण वर्त्तते धार्य्य
ते तथा देवान्नरान्प्रीणयंति तैर्यग्यो
नीस्तथैव च यथाकालं प्रवृत्तास्तु
उष्णवर्षहिमानिलैः इज्यांजलिन
मस्कारैर्जपहोमैस्तथैव च ॥
सम्यक्प्रयुक्तैस्तु नराः प्र ॥

णयंत्यपि देवताः भागधेयं विभक्तं
च शेषं किंचिन्न विद्यते ॥ तद्युष्
माकं शुभा वृत्तिर्बालेष्वेव भवि
ष्यति ॥ अथ बालग्रहाणां बालग्र
हणकारणमाह । कुलेषु येषु ने
ज्यन्ते देवाः पितर एव च । ब्राह्मणाः
साधवो वापि गुरवोतिथयस्तथा
निवृत्तशौचाचारेषु तथा कृत्स्नेन
वर्त्तिषु निवृत्तभिक्षावलिषु भग्न
कांस्यगृहेषु च गृहेषु तेषु बालांस्ता
न् ग्रहा हिंसंत्यशंकिताः । तत्र वो
विपुला वृत्तिः पूजा चैव भविष्यति
एवं ग्रहाः समुत्पन्ना बालान् हिंसंति
चाप्यथ । ग्रहोपसृष्टा बालास्तु
दुश्चिकित्स्यतमास्ततः ॥ अथा
मान्यग्रहजुष्टानां बालानां लक्षण
माह क्षणादुद्विजते बालः क्षणा
त्त्रस्यति रोदिति । नखैर्दंतैर्दारय
ति धात्रीमात्मानमेव च ॥ ऊर्द्ध्वं
निरीक्षते दंतान् खादेत् कूजति ।
जृंभते । भ्रुवौ क्षिपति दंष्टोष्ठः फेनं
वमति वा सकृत् । क्षामोतिनिशि
जागर्त्ति शूनाक्षो भिन्नविट्स्वरः ।
मत्स्यशोणितगंधश्च न चाश्नाति
यथा पुरा ॥ दुर्बलो मलिनांगश्च
नष्टसंज्ञोपि जायते । सामान्य ।
ग्रहजुष्टस्य लक्षणं समुदा ॥
हृतं ॥ अथ विशिष्टग्रहजुष्टानां ल
क्षणान्याह । स्कंदग्रहः तत्र सर्वां
धिक स्तनद्विट् वक्रास्पंदितचरणो
कपतनेत्रः उद्विग्नः सलिलचद
न्तोरोदी स्कंदार्त्तो भवति च गाढमुष्टि
वर्च्चाः ॥ निःसंज्ञो भवति पुनर्ल
ब्धसंज्ञः संरब्धः करचरणैश्च नृ
त्यतीव । विण्मूत्रे सृजति विनद्य जृंभ
माणः फेनं वा सृजति च तत्सखाभि
जुष्टः तत्सखो भिजुष्टः स्कंदापस्मार
युक्तः स्रस्तांगो भयचकितो विहंग
गंधिः संस्रावव्रणपरिपीडितः समं
तात् स्फोटैश्च प्रचिततनुः सदाह
पाकैर्विज्ञेयो भवति शिशुः क्षतः शकु
न्या रक्तास्यो हरितमलोतिपाण्डु
देहः श्यावो वा ज्वरमुखपाकवेदना
र्त्तः मेकृतिव्यथिततनुश्च कर्णौ ।
नासं रेवत्याभृशमभिपीडितः प्र
मारः ॥ स्रस्तांगः स्वपिति सुखं दिवा न
रात्रौ विड्भिन्नं सृजति च काकतुल्य
गंधिः छर्द्यार्त्तो हृषिततनूरुहः
कुमारस्तृष्णालुर्भवति च पूतनागृही
तः यो द्वेष्टि स्तनमतिसारकासहिक्का
छर्दिभिर्ज्वरसहिताभिरर्द्यमानः ।
दुर्वर्णः सततमधःशयोम्लगंधिस्तं
ब्रूयाद्भिषगण गंधपूतनार्त्तं ॥ ॥
आक्रंदन परिचकितः सवेपमानः ।




संलीनो भवतिव्यथास्वकूजगृह्णकः
स्वस्तंभो भृशमतिस्राव्यते च यो
वैनं श्वयाद्विषवाद्यशीलस्तननार्त
स्तानोगः सरुधिर पाणि पाद व
क्त्रो वक्राक्षी कलुष शिराहतोद
रोगः। स त्वयः शिशुरथ रक्तमे।
ड्किार्तः सोहरो भवति च मत्स्य
ल्य गंधिः ॥ यः फेनं वमति विनम
तेच मध्ये सोद्वेगो विहसति वोर्द्ध
मीक्षमाणः। कूजेच्च प्रततमथो
वसास्वगंधिर्विः संज्ञो भवति सनै
गमेय जुष्टः ॥ अथसामान्यग्रह
जुष्टानां चिकित्सामाह। सहामुख
निको ``चक्राथस्तानं ग्रहापहं स
हामाषपर्णी ॥ सपदसमय निशा
` दनेस्यानुलेपयेत्। सर्षप कुल
स्थु` मत्री सर्षपाः शिष्टपल्लवाः वि
डालविड्जालोम मेषशृंगी वचा
मधु धूपः शिशोर्ज्वरघ्नोः यमशोष
ग्रहनाशनः वालशांतीष्टकर्मी
णि कार्याणि ग्रहशांतये वचा
कुष्ठं तथा ब्राह्मी सिद्धार्थकमथा
पिच सारिवा सैंधवंचैव पिप्पली
घृतमष्टमं सिद्धं हन्ति मेध्येपि
वेत प्रत दिने दिने इदुस्मृतिः
स्त्रि प्रमेधा कुमारो बुद्धिमान् भवेत्
न पिशाचा न रक्षांसि न भूता न च।

मातरः न भवंति कुमाराणां पि
वतां मष्टमंगलं ॥ अष्टमंगलंघृ
तं अथ विशिष्ट ग्रहजुष्टानां चिकि
त्सामाह। सोमवल्ली मिंद्रवृत्त
वटार्क विषं जशमी स्वगादस्याश्च
मूलानि ग्रथितानि विधारयेत् ॥
नव स्कंदग्रहजुष्टस्य चिकित्सामा
ह स्कंदग्रहोपसृष्टस्य कुमारस्य
प्रशस्यते वातघ्न द्रुम पत्राणां क्वा
थेन परिषेचनं ॥ देवदारुणि रा
स्नायामधुरेषु गणेषु च सिद्धं सर्पि
क्षीरं पानमस्मै प्रदापयेत् ॥
सर्षपाः सर्पनिर्मोको वचा काका
दनी घृतं उष्ट्राजावि गवां चापि रो
मा धूपनं भवेत् काकादनीस्व
गुंज। सोमवल्लीमिंद्रवल्लं नावावि
षजशामी। स्वगादस्याश्च मूलानि
ग्रथितानि विधारयेत् सोमवल्ली सो
मलता इंद्रवल्लाक कुभ। स्वगादनी
इंद्रवारुणी रक्तानि माल्यानि त
था पताकां रक्तां गंधान् विवि
धांश्च भक्ष्यान् घृतं च देवाय बलिं
निवेद्य सकुक्कुटं स्कंदगृहे निधाय
स्नानं त्रिरात्रं निशि चत्वरेषु कुर्यात्
परे शालि यवैर्निवेद्य ॥ गाय
त्रि पुत्रा गिरयो ब्रिरश्चि प्रज्वालये
द्दारुनिमिश्रधीमान् रक्षामतः प्र

वक्ष्यामि वालानां पापनाशिनी अ
हन्यहनि कर्त्तव्या याभिरक्षिरतं
द्रितैः तपसां तेजसांचैव यशसां
वपुषां तथा। निधानं योव्ययो दे
वः सतेस्कंदः प्रसीदतु ॥ ग्रहसे
नापति र्देवो देवसेनापतिर्विभुः
देवसेनारिपुहरः पातु त्वां भगवा
न् गुहः ॥ देवदेवस्य महतः पाव
कस्य च यः सुतः गंगोमा कृत्ति
कानां च सतेशर्म प्रयच्छतु ॥
रक्तमाल्याम्बरधरो रक्तचंदनभू
षितः। रक्तदिव्य वपुर्देवः पा
तु त्वां क्रौंचसूदनः। अथ स्कंदाप
स्मारग्रहजुष्टस्य चिकित्सामा
ह। विल्वः शिरीषो गोलोमी
सुरसादिश्च योगणः परिषेकः
प्रयोक्तव्यः स्कंदापस्मारशांतये
गोलोमी श्वेतदूर्वा। सुरसादिग
णो यथा। सुरसा श्वेत सुरसा पा
ठाफंजी फणिज्झकः। सौगंधि
कं भूस्तृणको राजिका श्वेतवर्धरी
कटफलं खरपुष्पाच कासमर्दश्च
शल्लकी विडंगमथ निर्गुंडी कार्णिका
रडूदेवरः बलाच काकमाची च मथा
चविषमुष्टिका कफः कृमिहरः स्मृतः
सुरसादिरयंगणः सुरसा कृष्ण तुल
सी ॥ श्वेतसुरसा श्वेततुलसी फंजी

भार्गी। फणिज्झकः मरुवकः सौ
गंधिकं कह्लारं। भूस्तृणकः सुग
धतृणं। खरपुष्पा वर्वरी कासम
र्दः कसौदी विषमुष्टिका वकाइनि
अष्टमूत्र विपक्वं च तैलमभ्यंजने
हितं मूत्राष्टकमाह गोजाविमहि
ष्याश्वानां खरोष्ट्र करिणां स्तथा।
मूत्राष्टक मितिख्यातं सर्वशास्त्रेषु
संमतं क्षीरीवृक्ष कषायेण काको
ल्यादिगणेन च विपक्वं घृतं पक्षा
हातव्यं पयसा सह ॥ काकोल्या
दिगणेन कल्कीकृतेन तैलं पक्व
वं। काकोल्यादिगणो यथा। का
कोली क्षीरकाकोली जीवक ` क
स्तथा। ऋद्धिर्वृद्धिस्तथा मेदा महा
मेदा ` ` ` ` मुद्गपर्णी माषप
र्णी पद्मकं वंशरोचना शृंगीप्र
पौण्डरीक ` च जीवंती मधुयष्टिका
द्राक्षा चेति गणो नाम्ना काकोल्या
दिरुदीरितः स्तन्यकृद् वृंहणो वृ
ष्यः पित्तरक्तानिलापहः तस्मादनं
वचा हिंगुयुक्त मत्र प्रकीर्तितं सु
धोलूक पुरीषाणि केशा दन्ति
नखाहृतं। वृषभस्य च रोमाणि
योज्यानि ` पने सदा अनंता कुक्कु
टी विंबी मर्कटीचापि धारयेत्।
अनंता यवासा अतिलोके कुक्कुटीया



प्रमली मक्कान्यामानि मांसानि प्र
सन्नं रुधिरं पयः मद्योदनेन निवेद्या
पस्कन्दापस्मारिणे बटे वटेवट्टन
ले बलिं निवेदयेत्स्वयं । तेन स्कन्दा
पस्मारिणा स्नानं कारयेदित्यन्वयः
चतुष्पथे कारयेच स्नानं तेन ततः
पठेत् । स्कन्दापस्मार संज्ञोयः स्क
न्दस्य दयितः सखा विशाखः संज्ञि
तो रस्य शिवायास्तु शुभाननः ॥
अथ शकुनी ग्रहजुष्टस्य चिकित्
सामाह शकुनी ग्रहजुष्टस्य कार्य्यं
वैद्येन जानता । वेतसाम्र कपित्था
नां क्वाथेन परिषेचनं ह्रीवेर मधु
कोशीर सारिवोत्पल पद्मकैः
लोध्र प्रियंगु मंजिष्ठा गैरिकैः प्रदि
हेच्छिशुं प्रदिहेत् लिम्पेत् । चू
र्णसिद्धिराघ्नत्वात् स्कंदग्रहोक्ता
धूपाश्चहिता अत्र भवंति हि स्कं
दापस्मार शमने चूत मन्नापि पू
जितं शतावरी सगेवी रुनागदं
ती निदिग्धिकाः लक्षणं महदेवा
च वृहतीं चापि धारयेत् सहावीरुः
वशीङ्इवाकरुणी । नागदंती नाग
फली इति लोके प्रसिद्धा ॥ तिल
तण्डुलकं माल्यं हरितालं मनः
शिला । बलिश्च निकुंजेषु निवे
द्यो नियतात्मना निकटे च प्रयो
क्तव्यं स्नानं मस्य यथा विधि । श्वे
त शिरीष गंधाष्ट कुष्ट गुग्गुल स
र्षपैः सिद्धमभ्यंजने तैलं धारणं
पूर्वमेवतु शकुनीग्रहरूपं तत्सर्वप्र
देहं कारयेद्धितं । कुर्याच्च विविधां
पूजां शकुन्याः कुसुमैः शुभैः नि
कुंभोक्तेन विधिना स्नपयेत्ततः
पठेत् अंतरीक्षचरा देवी सर्वालं
कार भूषिता अयोमुखी तीक्ष्णतुं
डा शकुनी ते प्रसीदतु दुर्दर्शनाम
हाकाया पिंगाक्षी भैरवस्वरा । लं
बोदरी शंकुकर्णी शकुनी ते प्रसी
दतु अथ रेवती ग्रहजुष्टस्य चिकि
त्सा माह । अश्वगंधाजशृंगी ।
शारिवाथ पुनर्नवा । सहा विदारी
नाम्ना क्वाथेन परिषेचनं ॥ अज
शृंगी मेषशृंगी सहा सेवती पु
ष्पजातिः । तैलमभ्यंजने कार्य्यं कु
ष्ठ सर्जरसे तथा पलंकषायां नलदे
तथा गौरकदंबके । सर्जरसः रालः
पलंकषा गुग्गुलः । नलदं लामज्जक
मशीर वत् पीतच्छविः गौरकदंब
कः हारिद्रकः हरद्रुया कदंब इति
लोके । धवाश्वकर्णककुभशालकी
तिंदुकेषु च काकोल्यादो गणे चापि
सिद्धं सर्पिः प्रियङ्गुषः अश्वकर्णः
शालवृक्ष इति लोके प्रसिद्धः ॥ कुल ।

त्याः शंखचूर्णं च प्रदेहः सार्षपं
थिकः गृध्रोलूकपुरीषाणि यवा
न्यवफलेहूते सध्ययोरुभयोः का
र्य्यमेतद्धूपनं शिशोः यवफलो
वंशांकुरः मल्लाः सुमनसो लाजाः
पयः शाल्योदनं दधि बलिर्निवेद्यो
गोतीर्थे गौरवस्प्रयतात्मना गो
तीर्थे गोष्ठे ॥ स्नानं धात्रीकुमारा
भ्यां संगमे कारयेद्भिषक् नाना
वस्त्रधरा देवी चित्रमाल्यानुलेपना
चलत्कुण्डलिनी श्यामा रेवती
ते प्रसीदतु उपासते यां सततं देव्या
विविधभूषणाः लंबा करालावि
नता तथैव बहुपुत्रिका रेवती
शुष्कनामा च तं भ्यं देवी प्रसीदतु
अथ पूतनाग्रहजुष्टस्य चिकित्
सामाह कपोतवंकापणनाकोव
दारणः पारिभद्रकः आस्फोता चै
व योज्याः स्युर्बालानां परिषेचने
कपोतवंका ब्राह्मी इति लोके ।
पारिभद्रो निम्बः आस्फोता अपरा
जिता नवा पयस्या गोलोमी हरि
तालं मनःशिला कुष्टं सर्जरसश्च
वतैलार्थं कल्कं इष्यते नवापयस्या
नूतना क्षीर विदारी । गोलोमी श्वे
तहवी द्वितच्छुतनगालीख्यासति
हंमधुके पिच कुष्टताली ॥ ।
सखदिराः स्पंदनो र्जुन एवच प
नसः ककुभश्चापि मज्जानो बदरस्य
च । ककुदास्थि हुतं चापि धूपनं
सह सर्षपैः स्पंदनः स्पन्दन इति
वनाम्ना प्रसिद्धः काकादनीचि
त्रफला विंबी गुंजा च धारयेत्
काकादनी श्वेतगुंजा चित्रफला
वृहद्दिन्द्रवारुणी । मत्स्यौदनं व
लिं दद्यात् कृशरं पललं तथा स
रावसंपुटं कृत्वा तं स्वे शून्ये गृहे भि
षक् उष्णोदकेनाभिषिंचेत्स्य शिशोः
स्नपनमिष्यते कुष्ठताली सखदिरे
चंदनं स्पन्दनं तथा देवदारु वचा हि
ंगु कुष्ठं गिरिकदंबकः । पलाशैरण
वश्चापि योज्या उद्धपने सदा ॥ म
लिनांबर संवीता मलिना कृत्स्न मू
र्द्धजा शून्य गाराश्रया देवी दारकं
पातु पूतना अथ गंधपूतनाग्रहजुष्ट
स्य चिकित्सामाह । तिक्तद्रुमाणां
पत्रेषु क्वाथं कार्य्यं भिषेचने तिक्त
द्रुमानाह निम्बः पटोलः तद्दा च
गुडूची वासकस्तथा । विसर्पकुष्ठ
घ्नत्वं ख्यातो गणः ये पंचतिक्तकः
पिप्पली पिप्पलीमूलं वर्गी म
धुरको मधु । शालपर्णी बृहत्यौ
च घृतार्थं सम माहरेत् सर्वगंधैः
प्रदेहश्च गात्रे वास्त्रोश्च शीतलैः



सर्वगंधैः कुंकुमागुरु कर्पूर क
स्तूरी चंदनैः। अनेनोक्तशीतलैः
चंदन कर्पूरैः नत कस्तूरी कुंकुमा
गुरुभिर्लेपो मुख्यत्वात् पुरीषं।
कौक्कुटं केशं चर्म सर्पं भवंतथा
जीर्णांचाभी त्वर्शोवासो धूपनायो
पकल्पयेत् कर्कटी मर्कटी विं
बी मर्ततोचापि धारयेत्। मांस
मांसंतथा पक्वेशोणितंच चतुष्प
थे निवेद्य मंतस्य गृहे शिशोः स्न
पनमिष्यते करालापिंगला मुक्ता
कषायांवरसंवृता। देवीवालमि
मंपीता रक्तं त्वं गंधपूतने।अथ।
शीतपूतना ग्रहजुष्टस्य चिकित्
सामाह। गोमूत्रं वस्तमूत्रंच मुस्ता
मरं दारुच। कुष्ठंच ... धान्य
लार्थमवधारये सर्वगंधानुचंद
नादीन् रोहिणी निम्ब खदिर प
लाशु ककुभत्वचः। निःक्वाथ्यत
स्मिन्निःक्वाथे सदीरे विपचेत् शुने
रुभोलूक पुरीषाणि वस्तिगंधा म
हित्वचं निम्बपत्राणिच तथा धूप
नार्थ समाहरेत्॥ धारयेदपि गुंजांच
वलांकाकादनी तथा नद्यां मुद्गौ
दनेनापि तर्पयेच्छीतपूतना॥
जलाशयांतेवालस्य स्नपनंचोपदि
श्यते। जलाशयांते जलाशयतीरे
देवैदेय श्चोपहारोवारुणीरुधिरं
तथा। मुद्गौदनाशिनी देवी सु
रा शोणित पायिनी जलाशयर
ता नित्यं पातुत्वांशीतपूतना॥
अथमुखमंडिका ग्रहजुष्टस्य चि
किस्सामाह। कपित्थं बिल्व तर्का
री वासा गंधर्वहस्तकाः। कुवेरा
क्षी च योज्याः स्युर्बालानां परिषेच
ने॥ तर्कारी गणियारि इति लोके
गंधर्वहस्तकः श्वेतएरंडः। कुवेरा
क्षी पाडरि इतिलोके। सुरसं भृंग
वृक्षाणां तथैव ह्यगंधया। तैलं
वचांचसंयोज्यमपिचेदभ्यंजने शिशोः
भृंगवृक्षः भंगरा इति लोके वचा
सर्जरसः कुष्ठसर्पिश्चोद्धूपने हितं।
वर्णकं चूर्णकं माल्यमंजनं पारदं
तथा मनःशिलांचोपहरेत् गोष्ठम
ध्ये मलिन्नतः पायसं सपुरोडाशं त
द्बल्यर्थमुपाहरेत् मंत्रपूताभिरद्भि
स्तु तथैव स्नपनं हितं जलाभिमंत्र
णमंत्रमाह अलंकृता कामवती
सुभगा कामरूपिणी। गोष्ठमध्या
लयरता पातुत्वां मुखमंडिका॥
अथ नैगमेय ग्रहजुष्टस्य चि
कित्सामाह। बिल्वाग्निमंथ।
पूतीकैः क्वाथः स्यात् परिषे
चनं॥ पूतीकः ॥ ...।

चोरा करंज इति लोके प्रसिद्धः प्रि
यंगु पाटलानंता शतपुष्पा कुटन्न
टैः। पचेत्तैलं सगोमूत्रं दधिमस्तु
म्ल कांजिकां॥ कुटन्नटं वितुन्नक
नाम्नो वृक्षविशेषस्य त्वक्। गुड
तजी इति लोके प्रसिद्धा। मुस्ता
कृतिः स्पृक्का कोवा वचा वयस्था
जटिलांगोलोमींचापिधारयेत्।
वयस्था आमलकी गुडूची वा॥
उत्सादने हितंचात्र स्कंदापस्मा
रनाशने मर्कटोलूक गृध्राणां
पुरीषाणि पितृगृहे। धूमःस्नप
जने कार्योवालस्य हितमिच्छता
पितृगृहे नैगमेय गृहे। तिलत
ण्डुलकं माल्यं भक्ष्याणि विविधा
न्यपि कौमार पितृमेषाय सतत
ल्लेनिवेदयेत् मेषायनैगमेय ग्र
हाय। अथस्नानं क्षीरवृक्षस्य सप
त्रैश्चोपदिश्यते अजाननश्चलाक्षि
भ्रुः कामरूपीमहायशाः बालपा
लयिता देवोनैगमेयोभिरक्षतु॥
इतिभावप्रकाशः॥
वालचर्य्यः पुं कार्त्तिकेयः इतित्रि
काण्डशेषः॥ वालकस्यचरित्रे
क्ली वालतनयः पुं खदिरवृक्षः
इत्यमरः॥
वालकपत्रम्ब्र ॥वालतंत्रं क्ली
गर्भिणीचर्य्या। तत्पर्य्यायः कु
मारभृत्या २ गर्भिण्यवेक्षणं ३।
इति त्रिकाण्डशेषः॥
वालतृणं क्ली नवतृणं। तत्पर्य्या
यः शष्पं २। इत्यमरः॥
वालदशाकः पुं खदिरवृक्षः इत्य
मरटीकायां भरतः॥
वालधिः पुं केशयुक्तलांगूलं इत्य
मरः॥
वालपत्रः पुं खदिरवृक्षः इत्य
मरटीकायां भरतः॥ यवासः।
इतिराजनिर्घण्टः नूतनपर्णे क्ली
वालपत्रकः पुं खदिरवृक्षः इति
त्रिकाण्डशेषः॥
वालपाश्या स्त्री सीमंतिकास्थि
तस्वर्णादिवचोपाहि— । सिंथी इ
तिभाषा तत्पर्य्यायः पारितथ्या २
इत्यमरः वालपाशास्थितमणिः
इतितट्टीकायांतर्कवागीशः वा
लपुच्छिका स्त्री पृच्छिका इतिरा
जनिर्घण्टः॥
वालपुष्पी स्त्री यूथिका इतिज
टाधरः॥
वालभद्रकः पुं विषभेदः तत
पर्य्यायः शाम्भवः २ इति शब्द
चंद्रिका॥
वालभैषज्यं क्ली रसांजनं इति।



राजनिर्घण्टः ॥ वालकस्यौषधं च
वालभोज्यः पुं चणकः । इति राज
निर्घण्टः ॥ वालकभक्षणीये त्रि
वालमूषिका स्त्री क्षुद्रमूषिका छि
छ्का इंदुर इति भाषा तत्पर्य्यायः ।
गिरिका २ इत्यमरः ॥ चिक्कः ३
वेश्मनकुलः ४ चिक्का ५ इति श
ब्दरत्नावली ॥
वालयज्ञोपवीतकं क्ली उपवीत
विशेषः तत्पर्य्यायः उरस्कटः २
पंचवटः ३ इति त्रिकाण्डशेषः ॥
वालराजं क्ली वैदूर्य्यं । इति शब्द
रत्नावली वालकश्रेष्ठे पुं ॥ वा
लरोगः पुं वालकस्य व्याधिः
तस्य निदानं लक्षणानि चाह ।
धात्र्यास्तु गुरुभिर्भोज्यैर्विषमैर्दो
षजैस्तथा दोषा देहे प्रकुप्यंति
ततः स्तन्यं प्रदुष्यति ॥ मिथ्याहा
र विहारिण्या दुष्टा वातादयः
स्त्रियः दूषयंति पयस्तेन जा
यंते व्याधयः शिशोः वातदुष्टं
शिशुः स्तन्यं पिवन् वातगदातुरः
क्षामस्वरः कृशांगः स्याद्बद्धवि
ण्मूत्रमारुतः स्विन्नो भिन्नमलो वा
लः कामला पित्तरोगवान् तृष्णा
लुरुष्णसर्वांगः पित्तदुष्टं पयः पि
वन् श्लेष्मदुष्टं पिवन् क्षीरं लाला
लुः श्लेष्मरोगवान् निद्रार्दितो जडः
शूनवक्त्राक्षः छर्दनः शिशुः ज
राद्या व्याधयः सर्वे वयस्तेमह
तां तथा वालानामपि ते तद्वद्बो
द्धव्या भिषगुत्तमैः वालानामेव
ये रोगा भवंति महतां न च तालु
कंठकमुख्यांस्तानवधारयय त्
नतः तत्रादौ तालुकंटकमाह । ता
लुमांसे कफः क्रुद्धः कुरुते तालुकं
टकं तेन तालुप्रदेशस्य निम्नता
मूर्द्ध्नि जायते तालुपातात् स्तनद्वे
षः कृच्छ्रात् पानं शकृद्द्रवं तृडक्षि
कंठास्यरुग्ग्रीवादुर्द्धरता वमिः पा
नस्तनस्य । शकृद्द्रवं द्रवरूपः ॥
अथ महापद्ममाह । विसर्पस्तु शि
शोः प्राणनाशनः शीर्षवस्तिजः ।
पद्मवर्णो महापद्मरोगो दोषत्रयो
द्भवः शंखाभ्यां हृदयं याति हृदया
द्वा गुदं व्रजेत् पद्मवर्णः लोहितव
र्णः तत्र शीर्षजो विसर्पः शंखाभ्यां
हृदयं याति हृदयात् गुदं व्रजेत्
एवं वस्तितो गुदं याति गुदतो हृद
यं हृदयाच्छिरो याति इति वाह
व्यं ॥ अथ कुकूणकमाह । कु
कूणकः क्षीरदोषात् शिशूनामे
व वर्त्मनि जायते तेन नेत्रे क
ण्डूः स्रवेन्मुहुः । शिशुः ऊ ॥

र्षी ललाटाक्षिकूटनासाप्रघर्षणं
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मील
ने क्षमः कुकूणकः कोथुया इति
लोके ख्यातः ॥ अथ नाभिगुदपा
कमाह । वातेनाध्मापिता नाभिः
सरुजा तुण्डिरुच्यते वालस्य गुद
पाकाख्यो व्याधिः पित्तेन जायते
अथाहिपूतनमाह । शकृन्मूत्र
समायुक्तेऽधौतेऽपाने शिशोर्भवे
त् स्विन्ने वास्नाप्यमानस्य कण्डूर
क्तकफोद्भवा ॥ कण्डूयनात्ततः
क्षिप्रं स्फोटाः स्रावश्च जायते एकी
भूतं व्रणं घोरं तं विद्यादहिपूतनं ।
स्विन्ने स्वेदिते ॥ अथाजगल्लीमा
ह स्निग्धा सवर्णा ग्रथिता नीरुजा ।
मुद्गसन्निभा । कफवातोत्थिता
ज्ञेया वालानामजगल्लिका । ग्रथि
ता गुल्फितेव मुद्गसन्निभा मुद्गाकृ
तिः ॥ अथ पारिगर्भिकमाह मा
तुः कुमारो गर्भिण्याः स्तन्यं प्रायः
पिवन्नपि । कासाग्निसाद वमथु
तन्द्रा कार्श्यारुचिभ्रमैः युज्यते कोष्ठ
वृद्ध्या च तमाहुः पारिगर्भिकं रोगं
परिभवाख्यं च तत्र युंजीत दीपनं
पिवन्नपीत्यपि शब्दात् पिवन्नपि पा
रिगर्भिकः । अहीरी इति लोके
परिभवाख्यं परिभवति नामांतरं ।
अथ दंतोद्भेदकान् रोगानाह ।
दंतोद्भेदः शिशोः सर्वरोगाणां
कारणं स्मृतं । विशेषाज्ज्वर वि
ड्भेद कासच्छर्दि शिरोरुजं अ
भिष्यन्दस्य पोथक्या विसर्पस्य
च जायते । कारणमित्यन्वयः
पोथक्याः वर्त्मरोगविशेषस्य
अथ वालरोगाणां चिकित्सा ॥
भेषजं पूर्वमुद्दिष्टं महतां यज्ज्व
रादिषु तदेव कार्य्यं वालानां कि
न्तु दाहादिकं विना दाहादिकं वि
ना अग्निदाहादित्वारवमन विरे
चन सिराव्यधादिकं ‥ ना महा
कष्टे चोत्पन्ने वमनविरेकावुपद
ध्यात् यतश्चाह सुश्रुतः विरेक
वस्तिवमनान्यन्ते कुर्य्याच्च तत्पय
दिति अत्ययात् विनाशकरक
ष्टात् ऋते विना तत्र दोषा ह
व्याश्च ज्वराद्या व्याधयश्च तेन अत
स्तद्वत् भेषजं मात्रा त्वस्य कनी
यसी अस्य वालस्य । कनीय
सी मात्रामाह विश्वामित्रः । वि
डंगफलमात्रस्तु जातमात्रस्य
भेषजं अनेनैव प्रमाणेन मासि
मासि प्रवर्द्धयेत् विडंग परिमि
तं भेषजं चूर्णीकृतस्य किंवा कल्की
कृतस्याथवावलेहीकृतस्य दद्यादि ।

त्पर्थः तेषांतरेत्वन्यथाभिहितं
प्रथमे मासि वालाय देयाभेष
जरक्तिका अवलेला तकर्मेवा
मधुक्षीर सिताद्यैः एकैकांवर्द्ध
येत्तावद्यावत् संवत्स भवेत् त
दूर्द्धमाष वृद्धिः स्याद्यावत् षोड
शवत्सराः एकैकांरक्तिको त
दूर्द्धवर्षोपरि माष वृद्धिः प्रतिव
र्षं पंच गुंजात्मकस्य माषस्य वृ
द्धिर्भवति । गुंजाः पंचाद्यमाषक
इत्यमरसिंहः । ततः स्थिरा भवे
त्तावद्यावद्वर्षाणि सप्ततिः ततो
वालक वत्मात्रा ह्रासनीया श
नैः शनैः ॥ ततः षोडशवत्
रोपरि चूर्णकल्कावलेह्यानां ।
मियं मात्रा प्रकीर्तिता । कषाय
स्य पुनः सेव विज्ञातव्यावत्
क्षीरपस्य शिशोर्देयमौषधं क्षीर
सर्पिषा धात्र्यास्तु केवलं देयं
न क्षीरेणापि सर्पिषा क्षीराना
दस्य पूर्ववत् क्षीरसर्पिषा । प्र
कारांतरेणौषधप्रमाणमाह स्वल्प
नः येषां गदानां ये योगाः प्रवक्ष्य
ते गदंकराः तेषु तत्कल्कसंलि
प्तौ पाययेत् शिशुं स्तनौ अवचना
तो वालानां मध्यत्तरव्याधिज्ञानोपाय
माह अंगप्रत्यंगदेशेन रुजा यत्रास्य ।
जायते मुहुर्मुहुः स्पृशतितं ॥
स्पृश्यमानेन रोदिति निमीलिता
क्षो मूर्द्धस्थे रोगेना धारयेच्छिरः व
स्तिस्थे मूत्र संगार्त्तो तथा तृष्पि
गच्छति विण्मूत्रसंगवैकल्याच्छ
र्द्याध्मानांत्रकूजनैः कोष्ठ आधीन
विजानीयात् सर्वत्रस्थाश्च रोदनैः
अथादौ ज्वरस्य चिकित्सा माह ।
सर्वं निर्वार्यते वाले स्तन्यं नैव नि
वार्यते । मात्रया लंघयेद्धात्री शि
शो रेतद्धि लंघनं ॥ मात्रया लंघये
त् लघु भोजयेत् । भद्रमुस्ता भ
या निंव पटोलमधुकैः कृतः । क्वा
थः कोष्णः शिशोरेष निःशेषः ज
रनो भद्रमुस्तादि क्वाथः सर्व
ज्वरे । घनकृष्णारुणाशृंगी चूर्णं
क्षौद्रेण संयुतं शिशोर्ज्वरातिसार
घ्नं कासंश्वासं च विनिर्हरेत् ॥ अरुणा
अतिविषा । घनभद्रिका ज्वराति
सारेषु ॥ विल्वं च पुष्पाणि च धात
कीनां जलं सलोध्रं गजपिप्पली च
क्वाथावलेहौ मधुना विमिश्रौ वा
लेषु योज्याव तिसारितेषु ॥ जलं
वाला । विल्वादिक्वाथावलेहौ अ
तीसारेषु ॥ समंगा धातकी लोध्र
सारिवाभिः सृतं जलं दुर्द्धरेपि शि
शोर्देयमतीसारे समाक्षिकं ॥

समंगा लज्जालुमूलं । समंगादि
क्वाथो दुर्द्धरे तीसारे ॥ विडंगा
न्यजमोदा च पिप्पली तण्डुलानि
च पथ्यामालीढ्य चूर्णानि सुविन
मेन वारिणा आमे प्रवृत्तेतीसा
रेऽर्भकाय पाययेद्भिषक् विडंगा
दिचूर्णमतीसारे ॥ मोचारसः स
मंगा च धातकी पद्मकेशरं पि
ष्टैरेतैर्यवागूः स्याद्रक्तातीसार
नाशिनी मोचरस लज्जालुम्
ल धावेफुल कमलकेशर सम
दित तोला १ तण्डुलकोवुदी
तोला १ जल तोला ११ सर्वमे ।
कीकृत्य यवागूः साधनीया ॥
मोचरसादि यवागू रक्तातिसा
रे ॥ नागरातिविषा मुस्ता राज
कैंद्रयवैः सृतं । कुमारं पाययेत्
प्रातः सर्वातीसार नाशनं नागा
रादिक्वाथः सर्वातीसारे ॥ लाजा
स्य यष्टिमधुका शर्करा क्षौद्रमेव
च तण्डुलोदक योगेन क्षिप्रं ह
ति प्रवाहिकां ॥ लाजादिचूर्णं
प्रवाहिकायां ॥ रजनी सरला दा
रु वृहती गजपिप्पली पृश्निप ।
र्णी शताह्वा [illegible] लीढ माक्षिकस
र्पिषा दीपने [illegible] गीर्हन्ति मारुता
तिसकामला [illegible] तीसारपाण्डुत्र
वालानां सर्वरोगनुत् रजन्यादिच ।
र्णं ग्रहण्यादौ ॥ पौष्करातिविषा
शृंगी मागधी धन्वयासकैः कृतं
चूर्णंतु सक्षौद्रं शिशूनां पंचका
सजित् ॥ पौष्करादिचूर्णं कासेषु
पौष्करातिविषा वासा कणा पं
चीरसे लिहन् । मधुना मुच्यते वा
लः कासैः पंचभिरुच्छितैः मुस्त
कादिरसः कासेषु । धात्री कुसुम
संजात केशरे रवलेहिका । मधु
ना चिरसंजातान् शिशोः कासान्
व्यपोहति कासे ॥ धान्यशर्कर
या युक्तं तण्डुलोदकसंयुतं ।
पानमेतत् प्रदातव्यं कासश्वासा
पहे शिशोः धान्यादिपानं कास
श्वासयोः द्राक्षावासाभयाकृष्णा
चूर्णं क्षौद्र सापथा लाहं श्वसं
निहन्त्याशु वासध ननकं तथा
तमकं श्वासभेदं । द्राक्षादिचूर्णं
कासश्वासयोः चूर्णं कटुकरो
हिण्या मधुना सह योजयेत् हि
क्कां प्रशमयेत्क्षिप्रं छर्दिंश्चापि
विरोधितो । हिक्कायां छर्द्यो च
अमास्थिलाजासिंधूत्थं सक्षौ
द्रं छर्दिं नुदत्रवेत् । छर्द्यो । पी
ते पीतं वमेद्यस्तु स्तन्यं तं मधुस
र्पिषा हिवार्मीका फलरसं
पंचकोलं च लेहयेत् ॥ हि
वार्मीको वृहती ह्य । पंचकोला



त्रिपिप्पली पिप्पलीमूल चव्यचि
त्रकनागराणि क्षीरकंट्यौ क्षीव
रशर्करा द्राक्षादली फलस्मारवरेच
रं। घृतेन सिंधु विस्पैलालिशु भा
र्ङ्गीरजालिहन आनाहवातिकं श
लं हन्यात्तोयेन वा शिशुः आनाहे
वातमूले च ॥ कणामरणसिताक्षौ
द्र सूक्ष्मैला सैंधवैः कृतः मूत्रग्रहे
प्रयोक्तव्यः शिशूनां लेहउत्तमः
मूत्राघाते ॥ यदा तु दुर्बलो बालः
खादन्नपि च वह्निमान् विदारी
कंद गोधूम यवचूर्णं घृतप्लुतं।
खादयेत्तदनु क्षीरं सृतं समधुश
करं कार्श्ये ॥ मस्तकुष्माण्डवी
जानि भद्रदारु कलिंगकान् पि
ष्टानो येन संलिप्य लेपोऽयं शो
थहृत् शिशोः शोथे ॥ पटोल त्रि
फलारिष्ट हरिद्रा क्वथितं पिबे
त्। हतनवीसर्पविस्फोटज्वराणां
प्रशान्तये शिशुः ॥ हतनवीसर्पवि
स्फोटज्वरेषु ॥ गृहधूम निशाकु
ष्ठराजिकेंद्रयवैः लेपस्तक्रेण
हन्त्याशु सिध्म पाम विचर्चिकां
सारिवा तिल लोध्राणां कषा
यो मधुकस्य च । संस्राविणि
मुखे शस्तो धावनार्थं शिशोः
सदा ॥ मुखस्रा[illegible] ॥ अश्व
त्थत्वग्दलक्षौद्रैर्मुखपाकप्र

लेपनं मुखपाके ॥ पिप्पली
त्रिफलाचूर्णं घृतक्षौद्रपरि
प्लुतं बालो रोदिति यस्तस्मै
प्रदद्यात् सुखावहं रोदने ॥
हरीतकी वचा कुष्ठ कल्कं मा
क्षिकसंयुतं पीत्वा कुमारः स्त
न्येन मुच्यते तालुकंटकात् ता
लुकंटके फलत्रिक लोध्र पुनर्न
वे च सशृंगवेरं बृहती द्वयं च।
आलेपनं श्वयथुहरं सुखोष्णं कु
कूणके कार्यमदा हरंति कुकू
णके। स्तनपिप्पलीनाग्नितप्तेन क्षीर
सिक्तेन सोष्मणा स्वेदयेदुत्थितां ना
भिं शोथस्तेनोपशाम्यति नाभिशो
थे॥ नाभिपाके निशा लोध्र प्रि
यंगु मधुकैः शृतं। तैलमभ्यंजने
शस्तं अभिर्वा प्यवधूलनं दग्धेन
छागशकृता नाभिपाके च चूर्णितं
त्वक्चूर्णैः क्षीरिणां वापि कर्य्यांवं
दन रेणुना। नाभिपाके ॥ गुद
पाके तु बालानां पित्तघ्नीं कारयेत्
क्रियां। रसांजनं विशेषेण पानलेप
नयोर्हितं ॥ शंखयष्ट्यंजनैश्चूर्णं
शिशूनां गुदपाकनुत्। अंजनं र
सांजनं। गुदपाके ॥ शंखसौ
वीरयष्ट्याह्वैर्लेपो देयोऽक्षि
शूलने। अहिपूतने [illegible] ॥
पारिगर्भिक [illegible] ॥

रोगेषु प्रशमने वह्निदीपने। पा
रिगर्भिके ॥ दंतपालिन मधुना
चूर्णेन प्रतिसारयेत्। धातकी
पुष्प पिप्पल्योर्धात्रीफलरसेन
वा दंतोत्थानभवा रोगाः पीडयं
ति बालकं जाते दंते हि शाम्यंति
यत्नस्त्वेतनका गदाः दंतोद्भेदज
रोगेषु ॥ सौवर्णसकृतं चूर्णं
कुष्ठं मधु घृतं वचा। मत्स्याक्षकः
शंखपुष्पी मधु घृतं चूर्णितं कन
कं वचा। सहेमचूर्णं कैटर्य्यं श्वेता
दूर्वा घृतं मधु ॥ चत्वारोऽभिहिताः
प्राशार्द्धश्लोक समापनाः कुमा
राणां वपुर्मेधा बल बुद्धिकराः।
स्मृताः सौवर्णचूर्णं चतुर्ष्वपि यो
गेषु मारितं स्वर्णचूर्णं। मत्स्याक्ष
कः ब्राह्मी इति लोके व[illegible] इत्येके
अर्कपुष्पी अर्कसंज्ञापुष्पलता।
कैटर्य्यः कट्फलं श्वेता दूर्वावि
शेषणं वचेति केचित् संवत्सरं
यावदेते योगाः प्रयोज्याः द्वादश
वर्षाणीति केचित् बालानां च व
पुर्मेधा बल बुद्धिकराः स्मृताः। ला
क्षारससमे तैलमस्तु सप्तचतुर्गु
णे रास्नाचंदनकुष्ठाब्दवाजिगंधा
निशायुतैः शतावर्य्या दारुयष्ट्याह्व

मूर्वा तिक्ताहरेणुभिः संसिद्धं त्व
रसेनोत्तं बल वर्णकरं शिशोः
लाक्षादि तैलं बालेषु इति भाव
प्रकाशे बालरोगाधिकारः ॥
बालवायजं क्ली वैदूर्य्यं इति त्रि
काण्डशेषः ॥
बालवासः क्ली केशनिर्मितव
स्त्रं बालकस्य वस्त्रं च इति केचित्
बालवास्यः पुं वनच्छागः इति
हारावली ॥ बालकवस्तनीये त्रि
बालव्यजनं क्ली चामरं तत्पर्य्यायः
रोमगुच्छः २ प्रकीर्णकं ३ इति
हेमचंद्रः बालकस्य व्यजनं च ॥
बालव्यजनमोजस्य मक्षिकादीन्
व्यपोहति। इति द्रव्यगुणः ॥
बालव्रतः पुं मध्ययोषनामक
पर्वजिनविशेषः इति त्रिकाण्ड
शेषः बालसंध्याभः पुं अरुण
वर्णः इति हेमचंद्रः ॥
बालसूर्य्यं क्ली वैदूर्य्यमणिः इ
ति त्रिकाण्डशेषः प्रातःकाली
नसूर्य्ये पुं बालसूर्य्यकं क्ली वैदू
र्य्यं। इति शब्दरत्नावली ॥
बालहस्तः पुं बालधिः। लोमयु
क्तलांगूलं इत्यमरः बालासीना
विकेलः हरिद्रा। मल्लिकाभेदः अले



कारभेदः मेघे भूतिः ॥ स्त्री इति
मद्रांकितामेदिनी ॥ हूतकुमारी
ह्रीवेरं इतिशब्दचंद्रिका ग्रोवष्टा
नीलकिणी। इतिराजनिर्घंटः॥
एकवर्षवयस्कागौः यथा वर्ष
मात्रात्तुवालास्यादितिवालाद्विवा
र्षिकी इति प्रायश्चित्ततत्त्वं षोडश
वर्षीयास्त्री साग्रीष्मशरत्का
लेचप्रशंसनीया दृष्टदाच इति
राजवल्लभः ऊनद्विवार्षिकीक
न्यातस्यास्तद्वयस्कवालस्यचअ
ग्निसंस्कारादिनिषेधो यथा अ
जातदंताये वाला येच गर्भाद्वि
निःसृताः न तेषामग्निसंस्का
रो न पिंडंनोदकक्रिया इति
गारुडे ९ अध्यायः ॥

वालार्कः पुं प्रातःकालीनसू
र्य्यः यथा रक्तवस्त्रपरीधानेनवा
लार्कसदृशीतनुं इत्यादिविश्व
सारेजगद्धात्रीध्यानं कन्यारा।
शिस्थसूर्य्यः यथा भुक्तमांसस्त्रि
योवृद्धावालार्कस्तरुणंदधि प्रभा
तेमैथुनंनिद्रा सद्यःप्राणहरा।
णिषट् इति चाणक्य ॥

वालादी स्त्री केशपुष्पाहृदः तत्प
र्य्यायः मालती २ जातीपुष्पी ३ के
शधारिणी ४ इतिशब्दचंद्रिका॥

वालिः पुं कपिविशेषः तत्पर्य्या
यः। पेंद्रः २ वाली ३ इति त्रिका
ण्डशेषः ॥

वालिका स्त्री वाला कन्या वा
लुका पत्रकाहला कर्णभूषणं
इति मेदिनी पत्रा इति शब्दरत्ना
वली कन्यास्वरूपलक्षणं यथा
कन्यादेव्याःस्वयंप्रोक्ताकन्यारू
पानुशूलिनी यावद्दशयोनिः
स्यात्तावद्देवीस्वरूपिणी इति दे
वीपुराणं ॥

वालखिल्याः पुं पुलस्त्यकन्यायां
सन्नत्यां क्रतोः षष्टिसहस्रसंख्य
कपुत्राः ऋषिविशेषाः यथा प्रीतं
पुलस्त्यो भगवान् दत्तात्रि मसृजत्
प्रभुः पूर्वजन्मनि सोगस्त्यः स्मृतः
स्वायंभुवेऽन्तरे वेदवाहुस्तथा कन्या
सन्नतीनामनामतः पुत्राणां ष
ष्टिसाहस्रं सन्नतिः सुषुवे क्रतोः
तेचोर्द्धरेतसः सर्वे वालिखिल्या
इति स्मृताः इति कौर्मे १२ अध्या
यः अपिच क्रतोश्च सन्नतिर्भा
र्य्या वालिखिल्यानसूयत षष्टि
र्यानि सहस्राणि ऋषीणामूर्द्ध
रेतसां इति मार्कण्डेयपुराणे
८ सर्गः ॥ तेषामंगुष्ठपरिमा
णस्य प्रमाणं यथा।

अथापश्यदृषीन्लम्बानंगुष्ठो
दरवर्ष्मणः। पलाशवृंतिकामे
कांसहितान् वहतः पथि प्रली
नान्स्वेष्वंगेषु निराहारांस्तपो
धनान् क्लिश्यमानानमेदवला
न्गोष्पदे संप्लुतोदके इतिमहा
भारते आदिपर्वणि ३१ अध्यायः
वालखिल्याणिपाठः। यथा ऋ
ग्वेदान्तर्गतवालखिल्यनेकाद
शसूक्ते वालखिल्याः शंसति अ
णवेवालखिल्याः इतिचरण
व्यूहभाष्यं। वालिनी स्त्री अ
श्विनीनक्षत्रं। इतिहेमचंद्रः॥

वालिशः क्ली उपधानं इति श
ब्दमाला ॥

वालिशः त्रि शिशुः मूर्खः इ
तिमेदिनी ॥

वालिहंता पुं श्रीरामचंद्रः इ
तिशब्दरत्नावली उद्देशेनांतगी
तग्रामविशेषश्च ॥

वाली पुं इंद्रपुत्रवानरराजविशे
षः सतु श्रीरामचंद्रेण हतः त
स्योत्पत्तिर्यथा। मेरुर्नगवरः श्री
मान् जांबूनदमयः शुभः तस्य
यन्मध्यमंशृंगं सर्वदेवप्रपूजितं॥
तस्मिन् दिव्यासभारम्या ब्रह्मणः
शतयोजना तस्यामास्ते सदा दे
वः पद्मयोनिश्चतुर्मुखः योगाभ
भ्यासरतस्तस्य नेत्राभ्यां यदश्रुस्र
वत् तद्गृहीतं भगवता पाणि
नाचर्चितेचतत्र निःक्षिप्तमात्रं
तदश्रौ ब्रह्मणालोककर्त्तृणा
तस्मिन्नश्रुकणाद्राम वानरः सं
भूवह उत्तरं मेरुशिखरं गतस्तत्र
च दृष्टवान् नानाविहंगसंघुष्टं
प्रसन्नसलिलंसरः आलत्यचाप
तत्तस्मिन् ऋक्षवानरसत्तमः उ
तल्लस्य तस्मात् सत्वरादुत्थितःस्त
वगःपुनः तस्मिन्नेवक्षणे राम स्त्री
त्वंप्राप सवानरः तद्रूपमद्भुतं दृ
ष्ट्वामाजितोधैर्य्यमात्मनः ततस्त
स्यास्सुरेंद्रेण स्कंधे शिरसि पातितं अ
नासाद्यैवतांनारीसाचरूपमथाभ
वत् ततः सावानरपु जज्ञेवान
रमीश्वरं। अमोघरेतसस्तस्य वा
सवस्यमहात्मनः वालेषु पतितं
वीजंवालीनामवभूवह। भास्करे
णापितस्यांवैकंदर्पवशवर्त्तिना
वीजं निषिक्तं ग्रीवायां विधानम
नुवर्त्तत। ग्रीवायां पतिते वीजे सु
ग्रीवः समजायत इति रामायणे
उत्तरकाण्डे ३७ सर्गः ॥ अपिच।
वानरेंद्रं महेंद्राभमिंद्रोवालिनं।
मात्मजं। सुग्रीवं जनयामास त



यतस्तपतांवरः इति रामायणे
वालकाण्डे ९ सर्गः ततः शु
रेणाभिहतो रामेण रणकर्क
शः पपात सहसा वाली निकृ
त्त इव पादपः इति किष्किंधाका
ण्डे ९ सर्गः ॥ वालविशिष्टे त्रि
वालीशः पुं मूत्रकृच्छ्ररोगः
इति शब्दरत्नावली ॥
वालुः स्त्री एलवालुकनामकग
न्धद्रव्यं इत्युणादिकोषः ॥
वालुकं क्ली एलवालुकं इत्यम
रः वालुकः पुं पानीवालः इति
राजनिर्घण्टः ॥
वालुका स्त्री रेणुविशेषः वालि
इति भाषा तत्पर्यायः सिकता २
सिक्ता ३ शीतला ४ सूक्ष्मशर्क
रा ५ प्रवाहिः ६ महासूक्ष्मा ७ सू
क्ष्मा ८ पानीयचूर्णिका ९ अस्या
गुणाः मधुरत्वं । शीतत्वं संताप
श्रम नाशित्वं च सेकप्रयोगतश्च
वशाद्वोशोषानिलापहा इति रा
जनिर्घण्टः शाखोटस्तपादादि
कर्कटी । इति जटाधरः कर्परः
यंत्रविशेषः इति शब्दचन्द्रिका ॥
वालुकागडः पुं मत्स्यविशेषः
वालिया इति भाषा तत्पर्यायः
सिनाकः २ । इति हारावली ॥

वालुकात्मिका स्त्री शर्करा इति
शब्दचन्द्रिका वालुकामये त्रि ॥
वालुकाप्रभा स्त्री नरकविशेषः
इति हेमचन्द्रः ॥
वालुकामयं त्रि सिकतामयं इ
ति सैकतशब्दटीकायां भरतः ॥
वालुकायंत्रं क्ली औषधपाकार्थ
यंत्रविशेषः यथा भाण्डे विनिक्षि
प्य गंभीरे मध्ये निहितकूपिके कू
पिकाकंठपर्यन्तं वालुकाभिश्च
पूरिते भेषजं कूपिकासंस्थं वह्नि
ना यत्र पच्यते । वालुकायंत्रमेत
द्धि यंत्रं तत्र बुधैः स्मृतं ॥ इति ।
भावप्रकाशः ॥
वालुकास्वेदः पुं तप्तवालुकाभि
स्स्वेदनं यथा वातश्लेष्मकृते स्वेद
कारयेद्बहुनिर्मितान् स्निग्धः स्वे
दो निषिद्धोऽग्नौ नाकेवलवात
जान् खर्परभ्रष्टपटस्थितकांजि
कसिक्तवालुका स्वेदः शम
यति वातकफामयं मस्तकशूलं
गभंगादीन् स्वेदनं समाद्रवस्त्रता
नीता पावकमाश्रयं । हन्ता वातक
फलंभ स्वेदो ज्वरमपोहति इति ।
भावप्रकाशः ॥
वालुकी स्त्री कर्कटीभेदः तत्पर्या
यः । वक्रफला २ स्निग्धफला ३

क्षेत्रकर्कटी ४ क्षेत्रफला ५ कारि
का ६ मूत्रला ७ । अस्या गुणाः ।
वालुकी वातशमनी शीता हृद्या
श्रमापहा पित्तास्रशमनी रुच्या
ऊरुहतकासपीनसौ स्याद्वालुकी
शरदि वर्षज दोषकर्त्री हेमन्त
जा च बलं पित्तहरा च रुच्या ।
तृप्तिं करोति खलु पीनसमर्द
पक्वापक्वा नवनीव मधुरा फल
कारिणी च इति राजनिर्घण्टः
वालुकी स्त्री कर्कटी इति त्रिका
ण्डशेषः ॥
वालुंगिका } स्त्री कर्कटी इति श
वालुंगी } ब्दरत्नावली ॥
वालुकः पुं विषभेदः इति हेम
चन्द्रः ॥
वालेयः पुं रासभः । इत्यमरः ।
दैत्यविशेषः इति धरणिः ॥ अ
गारवल्ली इति विश्वः चाण
क्यमूलका । इति राजनिर्घण्टः
वालेयः त्रि मृदुः ॥ वालहितः
इति मेदिनी ॥
वालेयशाकः पुं ब्राह्मणयष्टि
का इत्यमरः ॥
वालेष्टः पुं बदरः इति राजनि
र्घण्टः वालकाभिलषिते त्रि ॥
वालोपवीतं क्ली वालकपरिधान

वस्त्रं । तत्पर्यायः पंचावटं २
उरस्कटं ३ इति हारावली ॥ द्वि
जवालकानां यज्ञसूत्रं च ॥
वाल्मीकिः पुं मुनिविशेषः य
था तपःस्वाध्यायनिरतं तपस्वी
वाग्विदां वरं नारदं परिपप्रच्छ वा
ल्मीकिर्मुनिपुंगवं इति रामाय
णप्रथमश्लोकः ॥ वाल्मीकिः
वल्मीकस्यापत्यं वल्मीकप्रभवो
यस्मात्तस्माद्वाल्मीकिरित्यसावि
ति ब्रह्मवैवर्तोक्तिः वल्मीकप्रभ
वत्वं तपोगोपीपुच्छादिवद्गौणमस्य
वल्मीकापत्यत्वगृहीत्वैव साधुर
यत्नोऽर्थः । यद्वा वल्मीक इति ऋ
षिविशेषस्य संज्ञेत्याहुः अपि च
ततस्तदनुग्रहलब्धं रामचरितं
सरहस्यं निरूपशेषं तत्प्रसादा
देव सम्यक् विज्ञेय भूलोकवर्ति
मोचनं गिर्वाणैर्नानापत्रयविमो
चनाय ब्रह्मांशभूत एव भगवान्
प्राचेतसो वाल्मीकिः स्वकृतशत
कोटिरामायणसारभूतं चतुर्विंश
त्यक्षरगायत्र्याख्यापरब्रह्मविद्या
विलासभूतं रामायणं चतुर्विंशति
सहस्रश्लोकरूपेणांशत्वाभाषामग्रा
द्दूयत् । इति तट्टीका ॥ अपि च ।
नारायणात्मकाः सर्वे रामसत्पा

ग्रजो भवेत्। रावणान्तकरो राजा रघूणां वंशवर्द्धनः॥ वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः। इति मात्स्ये १२ अध्यायः॥

बाल्यं क्ली बालस्य भावः तत्पर्य्यायः शिशुत्वं २ शैशवं ३ इत्यमरः तच्च षोड़शवर्षपर्य्यन्तं। आषोड़शाद्भवेद्बाल इत्युक्तः इति भरतः॥

बाष्पः पुं ऊष्मा॥ अश्रु। इत्यमरः

बाहः पुं } बाहुः इत्यमरटीकायां रमानाथः॥
बाहा स्त्री }

बाहाबाहवि अव्य बाहुभिर्बाहुभिर्पीत्य युद्धंतत् इति मुग्धबोधव्याकरणं बाहुः पुं कक्षाधोङ्गुल्यग्रपर्य्यन्तावयवविशेषः तत्पर्य्यायः भुजः प्रवेष्टः २ दोष ४ इत्यमरः। तस्य प्रशस्तलक्षणं यथा निम्नौ मांसौ चैव भग्नास्थिश्लिष्टौ च विपुलौ भुजौ आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे॥ इति गारुड़े ६५ अध्यायः कूर्परस्य ऊर्द्धभागः। यथा। मुखे बाहुप्रबाहुश्च मनः सर्व्वेन्द्रियाणि च रत्नवाह्वौ तेज ऐश्वर्य्यं सत्त्व नारायणोऽव्ययः। अस्य टीका बाहुप्रबाहुश्च कूर्परस्य ऊर्द्धाधोभागौ इति विष्णुपुराणे ५ अंशे ६ अध्यायः॥

बाहुकः पुं नलराजा तत्पर्य्यायः पुण्यश्लोकः २ अश्ववित् ३ नैषधः ४ इति त्रिकाण्डशेषः॥

बाहुकुण्ठः त्रि कुण्ठितबाहुयुक्तः कोपा इति भाषा तत्पर्य्यायः कुंपः २ दोर्गडुः ३ इति जटाधरः॥

बाहुकुन्त्यः पुं पक्षः यथा गरुत्पक्षच्छदाः पत्रं पतत्रञ्च तनूरुहं देहधि देहकोषस्य बाहुकुन्त्यस्य कथ्यते इति शब्दचन्द्रिका

बाहुजः पुं क्षत्रियः इत्यमरः। कीरः स्वयंजाततिलः इति मेदिनी बाहुजाते त्रि॥

बाहुत्राणं क्ली अस्त्राघातनिवारणार्थबाहुबद्धलौहादि तत्पर्य्यायः बाहुलं २ इति हेमचन्द्रः॥

बाहुदन्ती पुं इन्द्रः इति भूरिप्रयोगः॥

बाहुदा स्त्री नदीविशेषः तत्पर्य्यायः सैतवाहिनी २ इत्यमरः कदाचिल्लिखितनामर्षिभ्रीतः स्वभ्रात्राश्रमे फलभक्षणाच्छिन्नौ बाहू लिखितो तौ चास्यां तपस्तेल्लब्धजाताविति इत्यमरटीकायां भरतः बाहुदा सीच॥ बाहु-

भूषा स्त्री केयूरं। इति हेमचन्द्रः बाहुभूषणमात्रञ्च॥

बाहुभेदी पुं विष्णुः इति भूरिप्रयोगः॥ बाहुभेदके त्रि॥

बाहुमूलं क्ली कक्षः। बगल इति भाषा। इत्यमरः॥

बाहुयुद्धं क्ली भुजाभ्यां संग्रामः मल्लयुद्धं। तत्पर्य्यायः नियुद्धं २ इत्यमरः॥ तस्य क्रमो यथा॥ कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सकङ्कटैः। सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टितैः तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा बलप्राणेन शूराणां समाजोत्सवसन्निधौ॥ इति विराटपर्व्वणि १२ अध्यायः॥ सकङ्कटैः कङ्कटः करचर्षणजः किणः कड़ा इति प्रसिद्धः। कृतम्तिकृतैः परप्रयुक्तिप्रतिकृतैः। चित्रैर्विचित्रैर्बन्धैरिति शेषः सन्निपातेत्यादि एते मल्लानां शिक्षाविशेषाः सन्निपातैः परस्परसंघट्टैः। अवधूतैर्वहुमुष्टिभुजाघातैः। प्रमाथैः पातयित्वा पेषणैः। उन्मथनैः अन्तरीदत्तभुजाभ्यां मथनैः। क्षेपणैः स्थानात् प्रच्यावनैः। बद्धाङ्गुलिकरो मुष्टिः। अवाङ्मुखविक्षेपपाते भ्रामयित्वा तथैवयः क्षितिस्पर्शाद्धः सभवेद्वराहोद्धूतनिस्वनः तर्जन्यङ्गुष्ठमध्येन प्रसारितकरो द्वियः संप्रहारस्तलाख्यस्तु संग्रहो वज्रमिष्यते। अर्द्धचन्द्रतलं मल्लमुष्टिर्वज्रमित्यर्थः प्रसृताङ्गुलिहस्तेन प्रसृष्टिः प्रहृतिः स्मृता। द्विगुणीकृतबाहुर्यस्तदीयार्थं यथाबलं। प्रहारः सशालाकास्यात् पादोद्धूतः पदाहतः। जानुभिश्चाश्मनिर्घोषैः पाषाणघोषसदृशध्वनिभिः करणैर्यान्यवघट्टनानितैः। बलप्राणेन बलोत्कर्षेण। इति तट्टीका॥

बाहुलं क्ली बाहुत्राणं। इति हेमचन्द्रः बहुलभावश्च॥

बाहुलः पुं अग्निः इति शब्दरत्नावली। कार्त्तिकमासः इत्यमरः बाहुलेयः पुं कार्त्तिकेयः इत्यमरः॥

बाहुसहस्रभृत् पुं कार्त्तवीर्य्यार्जुनः



इति त्रिकाण्डशेषः ॥
वाह्लवाट्ट वि व्य वाकभिर्वीकभि
र्येत् युद्धं कृतवन्त । ह्वातम्हाति इ
तिभाषा । इति मुग्धबोधव्याकर
णे विद् इ अशे । अवयव इत्यर्थः
इति कविकल्पद्रुमः इविंयते विं
दुरिति शह्वृत् पदार्थमेवाय
यात् मनवानत्वमायः प्रयोगः
इति यात्वपारायणे । इति दुर्गा
दासीयटीका ॥
विलक शा विभेदने । इति कविक
ल्पद्रुमः पंचमस्वरी कोपधः । व
गादिपदे कथने कादिपदे अ
कुरादिशह् : यमिति रमानाथः
कवेलयति शाविलति इति दुर्गादासः
विस्मरयदेपे । इति कविकल्पद्रुमः
यविस्मति इव अविस्मत अवेसीत् अ
स्मात् पुष्पाभिलानिःस्र । इत्येव । इ
ति दुर्गादासः वीभत्सः पुं अर्जु
नः इति मेदिनी ॥ वीभत्सः ।
त्रि क्रूरः घृणात्मा विकृतिः इति
मेदिनी पापी इत्यजयः शृङ्गारा
ष्टरसान्तर्गत षष्ठरसः तत्पर्या
यः विकृत २ इत्यमरः । तस्य ।
लक्षणादि यथा जुगुप्सा स्था
यिभावस्तु वीभत्सः कथ्यते रसः
नीलवर्णो महाकालदेवतोयमु
दाहृतः वैकृतंच यथा अति
पूतिलितयाहृष्यमभिहितंतु
वैकृतमिति सभिनंदः हयमिद
रसेक्लीवं । तदालम्बने तन्मांस
पेशादिमात्रो विषु इति तट्टीकायां
भरतः । वीभत्सः पुं अर्जुनः यथा
अर्जुनः फाल्गुनो जिष्णुः किरीटी
श्वेतवाहनः वीभत्सुर्विजयः
कृष्णसव्यसाची धनंजयः इति
विराटपर्वण्युत्तरगोग्रहः ॥
वृक्क किस्मादिशाह्वो इति कविक
ल्पद्रुमः पंचमस्वरी कोपधः चा
दिपदे कथने कादिपदे कुक्कु
रादिशह्वः यमिति रमानाथः ।
कि वृक्कयति वाचावकलोकः
वृक्कतिस्म इति दुर्गादासः ॥
वृक्कं त्रि वक्ते अपतरमांसविशेषः
तत्पर्यायः अग्रमांसं २ हृदयं ३
हृत् ४ इत्यमरः ॥ केचित्तुवृक्का
त पृथगेव हृदयान्तर्गत मांस
विशेषे पद्माकारे हृदयादि हय
माहुः धातोरनेकार्थत्वात् वृ ।
क्यते स्वादुत्वात् मक्षते वृक्कं वृक्का
किस्मादिशाह्वे चस्त । तान्तः पुलि
गेऽप्ययं स्त्रीलिंगोऽपीत्येके । इति
स्वामी । वृक्का स्त्री वृक्कः पुमानपि
शोणितेषु स्त्रियां वृक्का वृक्कः समये

हृद्योरितिरभसात् । तदादित्वा
त् स्त्रियां वृक्कीत्यन्ये वृक्कं तान्ते
क्लीवमव्युत्पन्नमिति रुद्र कलिं
गादयः उरस्यपि च वृक्का गोहृद
येमांससेपि चेति त्रिकाण्डशेषः
वृक्कशब्दस्य उकारस्य ऋकारादे
शे तथैव वृक्कादि रूपच अग्रे
च तन्मांसे चेति अग्रमांसवक्क
स्याग्रस्थमुखी भूतंमांसं वृक्काग्र
मांसमित्येकं नामेत्यन्ये इति त
ट्टीकायां भरतः ॥
वृक्कः पुं छागः इति त्रिकाण्डशे
षः समये पुं स्त्री इति रभसः ॥
वृक्काने क्ली ऊक्कुरशब्दः तत्पर्या
यः भषणः २ इति हेमचन्द्रः ॥
वृक्की स्त्री वृक्कं इत्यमरटीकायां भ
रतः ॥ शोणिते इति रभसः ॥
वृक्का पुं वृक्कं । इत्यमरटीकायां ।
भरतः ॥
वृक्काग्रमांसं क्ली हृदयं इत्यमर
टीकायां रायमुकुटः ॥
वृक्कारः पुं सिंहध्वनिः इति हारा
वली ॥
वृक्की स्त्री वृक्कं । इत्यमरटीकायां
भरतः ॥
वुट कि हिंसे इति कविकल्पद्रुमः
किवोटयति वोटति । इति ॥ ।
दुर्गादासः ॥
वुड शि उत्सर्गे संवृतौ । इति
कविकल्पद्रुमः शि वुड इति अवु
डीत् वुवोड इति दुर्गादासः ॥
वुद इर अ उ निशामने । इति क
विकल्पद्रुमः पंचमस्वरी । इर
अबुदत् अबोदीत् । अ वोदति
वोदते । उ वोदित्वा वुत्वा निशा
मन मालोचनं प्रतिधान मि
ति यावत् इति दुर्गादासः ॥
वुद्धः पुं भगवदवतारविशेषः स
तु दशावतारान्तर्गत नवमावता
रः यथा ततः कलौ संप्रवृत्ते स
म्मोहाय सुरद्विषां बुद्धो नाम्ना
जनसुतः कीकटेषु भविष्यति ।
इति श्रीभागवते १ स्कंधे ३ अध्या
यः ॥ अंजनस्य सुतः । अजन
सुत इति पाठे अजिनोपि सप
व । कीकटेषु मध्ये गयाप्रदे
शे इति श्रीधरस्वामी ॥ तत्
पर्यायः सर्वज्ञः २ सुगतः ३
धर्मराजः ४ तथागतः ५ समन्त
भद्रः ६ भगवान् ७ मारजि
त् ८ लोकजित् ९ जिनः १०
षडभिज्ञः ११ दशबलः १२ अद्व
यवादी १३ विनायकः १४ मुनीन्द्रः १५
श्रीघनः १६ शास्ता १७ मुनिः १८ ३
समरः धर्मः १९ त्रिकालज्ञः २० धातुः २१



बोधिसत्त्वः २२ महाबोधिः २३ आर्यः
२४ पंचज्ञानः २५ दशार्हः २६ दश
भूमिगः २७ चतुस्त्रिंशज्जातकज्ञः
२८ दशपारमिताधरः २९ द्वादशा
क्षः ३० त्रिकायः ३१ संगुप्तः ३२ द
याकूर्चः ३३ खजित् ३४ विज्ञान
मातृकः ३५ महामैत्रः ३६ इति हेम
चन्द्रः ॥ ईश्वरनिरूपणे बुद्धविशे
षाणां मतमाह सर्वज्ञ इति सौ
गताः निरावरण इति दिगंबराः
लोकव्यवहारसिद्ध इति चार्वा
काः । शरीरात्मवचेतनानिरो
धेः हंजानामीत्यादित्तानेनगौ
रववज्ञानवत्त्वयोः सामाना
धिकरण्यानभवादिति चार्वी
काणां मतेच । तेषांमतेजगतः
क्षणभंगुरत्वेनक्षणक्षणभंगः
पूर्वज्ञानाद्योत्तरज्ञानोत्पादस्त
थाच पूर्वज्ञानिष्टएव ऊर्ध्वरूपत्वा
ख्य ज्ञानविशेषः स्मरणजनक
तावच्छेदक इति दोषः इति क्र
मेणातन्निपक्षमस्तवकटीका
यांरामभद्रः बुद्धानांदशविध
मतभेदमाह वदंति पुत्रमात्मे
ति। ह्यक्प्राकृतबुद्धयः देहमा
त्मेतिरचार्वाकाश्चेन्द्रियाण्यपरे
चते। तेन्ये प्राणमन्ये मन
५ आत्मेतिवादिनः। बुद्धिरात्मेति
६ बौद्धाश्चेकृत्स्नमात्मेति ७ मपरे ॥
याज्ञिकास्तुपुरुषंसर्वज्ञं ८ सौग
ताविदुः निरावरणं ९ मार्ड्यंदिगं
वरमतानुगाः चार्वाकाश्चापिलो
कानांव्यवहारप्रसिद्धकं १० इत्या
त्मप्रकाशः पंडितः । बुधिते त्रि ।
इति मेदिनी ॥
बुद्धद्रव्यं क्ली लौपिकं लोतं इति
भाषा इति त्रिकाण्डशेषः ॥
बुद्धिः स्त्री निश्चयात्मिकान्तःकर
णवृत्तिः इति वेदान्तसारः सविक
ल्पकज्ञानं । इति चंडीटीकायां ना
गभट्टः ॥ तत्पर्यायः मनीषा २
धिषणा ३ धीः ४ प्रज्ञा ५ शेमुषी ६
मतिः ७ प्रेक्षा ८ उपलब्धिः ९ चि
त् १० संवित् ११ प्रतिपत् १२ ज्ञप्तिः
१३ चेतना १४ इत्यमरः ॥ धारणा १५
प्रतिपत्तिः १६ मेधा १७ मननं १८
मनः १९ ज्ञानं २० बोधः २१ हृल्ले
खः २२ संख्या २३ प्रतिभा २४ ॥
इति राजनिर्घण्टः ॥ आत्मजा २५
पण्डा २६ विज्ञानं २७ । इति शब्द
रत्नावली ॥ अस्याः स्वरूपं यथा
बहिर्विवेचनारूपा सा ज्ञानजननी
श्रुतौ । इति ब्रह्मवैवर्ते प्रकृतिख
ण्डे २३ अध्यायः ॥ अस्या अ।
ध्यात्माधिभूताधिदैवतानि ॥

यथा अध्यात्मंरितिप्राहुः षडिंद्रि
य विचारिणी । अधिभूतंचमंत
व्यंब्रह्मातत्राधिदैवतं इति महा
भारते आश्वमेधिकपर्व ॥ साच
सात्त्विकराजसतामसभेदेन त्रि
विधा। सात्त्विकी यथा। प्रवृत्तिंच
निवृत्तिंचकार्याकार्येभयाभये
बंधंमोक्षंचयावेत्तिबुद्धिः सापार्थ
सात्त्विकी राजसीयथा यथाधर्म
मधर्मंचकार्यंचाकार्यमेवच अ
यथावत्प्रजानाति बुद्धिः सापार्थ
राजसी। तामसीयथा। अधर्मंध
र्ममितियामन्यते तमसावृता स
र्वार्थान्विपरीतांश्चबुद्धिः सापा
र्थतामसी॥ इतिश्रीभगवद्गीता
तस्यागुणा यथा इष्टानिष्टविप
त्तिश्च व्यवसायः समाधिता संश
यः प्रतिपत्तिश्च बुद्धेः पंचगुणान्
विदुः इति महाभारते मोक्षधर्मः
इष्टानिष्टविपत्तिः इष्टानिष्टानांह
ितविशेषाणांविपत्तिर्नाशः तद्रू
पा हानिरित्यर्थः व्यवसायः उत्सा
हः समाधिता चित्तस्थैर्यं चित्तवृत्ति
निरोध इत्यर्थः । संशयः कोटिद्व
यस्पृक्ज्ञानं। प्रतिपत्तिः प्रमत्वादि
प्रमाणवृत्तिः इति तट्टीका॥ त
स्याः सप्तगुणा यथा शुश्रूषाश्रव
णंचैवग्रहणंधारणंतथा ऊहा
पोहोर्थविज्ञानंतत्त्वज्ञानंचधीगु
णाः इति हेमचंद्रः तस्यावृत्तिः
पंचधा यथा प्रमाणं १ विपर्य्य
यः २ विकल्पः ३ निद्रा ४ स्मृतिः ५
इति पातंजलं ॥ बुद्धिक्षयकरा
यथा शोकः क्रोधश्च लोभश्च का
मो मोहः परासुता ईर्ष्या मानो वि
चिकित्सा कृपासूया जुगुप्सता
द्वादशैतेबुद्धिनाशहेतवो मान
सामलाः इति कालिकापुराणे
८९ अध्यायः । अपिच । बुद्धिक्षय
करा एते माषकास्सवसात्तिकाः
बुद्धिवृद्धिकरा यथा। तिलादरः
यत्नाश्च बुद्धिवृद्धिकरामताः
बुद्धिक्षयकरान्नित्यंते जदाजाच
भोजने भोजयेद्व बुद्धिवृद्धि
हेतवेत्पाशम। इति कालिकापु
राणे ८९ अध्यायः ॥ न्यायमते
साविभुगुणः पुनर्द्विविधा अनुभू
तिस्स्मृतिश्च। यथा विभुर्बुद्ध्यादि
गुणवान्बुद्धिस्तुद्विविधामता।
अनुभूतिः स्मृतिश्च स्यादनुभूति
श्चतुर्विधा प्रत्यक्षमप्यनुमितिः
स्तथोपमितिशाब्दजे इति भाषाप
रिच्छेदः बुद्धिमान् त्रि बुद्धियुक्तः ज्ञा
नवान् यथा तदृश्रेयाहिनमभूतपोष



सद्बुद्धिमान् येन करोति पापं
इति गारुडे ११५ अध्यायः ॥
बुद्धिसहायः पुं मन्त्री । इति ह
लायुधः ॥ मन्याः साहाय्यकर्म
च बुद्धीन्द्रियं क्ली ज्ञानेन्द्रियं य
था मनः कर्णौ तथा नेत्रे रसा
ना त्वक् च नासिके बुद्धीन्द्रियमि
ति प्राहुः शब्दकोषविचक्षणाः
इति शब्दरत्नावली ॥
बुद्बुदः पुं वर्त्तुलाकारजलवि
कारः जलविम्बकी इति भुरभु
डि इति च भाषा । बुद्बुदो स्फो
टः स्थासकः इत्यमरभरतौ अपि
च । अभ्रच्छाया तृणादग्निर्नीच
सेवा पथि जलं । वेश्या रागः ख
ले प्रीतिः ते बुद्बुदोपमाः इ
ति गारुडे ११५ अध्यायः गर्भस्या
वयवविशेषः । यथा पञ्चरात्रे ।
एककलनं बुद्बुदाकारं तं ब्रजेत्
इति तत्त्वबोधः ॥
बुध ञो विज्ञापने इति कविक
ल्पद्रुमः । ञो बोद्धा बोधति शिष्यं
गुरुः । इति दुर्गादासः ॥
बुध इर् म ञ वेदने इति कवि
कल्पद्रुमः इर् अबुधत् अबोधी
त् म बोधः बुधः । ञ बोधति बोध
ते । इति दुर्गादासः ॥

बुध य ङ औ वेदने इति कविक
ल्पद्रुमः । य ङ बुध्यते शास्त्रं सु
धीः औ बोद्धा । इति दुर्गादासः ॥
बुधः पुं पण्डितः । तत्पर्यायः वि
द्वान् १ विपश्चित् २ दोषज्ञः ३ सन्
४ सुधीः ५ कोविदः ६ धीरः ७
मनीषी ८ ज्ञः ९ प्राज्ञः १० संख्या
वान् ११ पण्डितः १२ कविः १३ धी
मान् १४ सूरिः १५ कृती १६ कृष्टि
१७ लब्धवर्णः १८ विचक्षणः १९
दूरदर्शी २० दीर्घदर्शी २१ इत्यमरः
नवग्रहान्तर्गत चतुर्थग्रहः स तु बृ
हस्पति भार्य्या तारागर्भे चन्द्राज्जा
तः । तत्पर्यायः रौहिणेयः १
सौम्यः २ इत्यमरः ॥ हेमा ४ वि
त् ५ ज्ञः ६ बोधनः इन्दुपुत्रः ८ इ
ति ज्योतिस्तत्त्वं ॥ तस्य जन्मादि
वृत्तान्तं यथा महाबलेपाद्म सक
ल देवगुरो बृहस्पतेस्तारां नाम प
त्नीं जहार बहुशास्त्र बृहस्पतिबो
धितेन भगवता ब्रह्मणा चोद्यमा
नः सकलैश्च देवर्षिभिर्याच्यमा
नोपि न मुमोच । तस्य बृहस्पति
द्वेषात् उशना पार्ष्णिग्राहोऽभूत् ।
अङ्गिरसस्य सकाशात् उपलब्ध
विद्यो भगवान् रुद्रो बृहस्पतेः
साहाय्य मकरोत् । यतश्चोश

ना ततो हि जम्भकुम्भाद्याः
समस्ता एव दैत्य दानव निकाया
महान्त मुद्यमं चक्रुः । बृहस्पते
रपि सकलदेवसैन्यसहायः श
क्रोऽभवत् एवं तयो रतीवोग्रः
संग्रामस्तारा निमित्त स्तारका
मयो नामाभवत् । ततश्च सम
स्तशस्त्राण्यसुरेषु रुद्रपुरोगमा
देवाः । देवेषु चाशेषदानवा मु
मुचुः । एवं च देवासुराहवक्षो
भक्षुब्ध हृदय मशेषमेव जग
द्ब्रह्माणं शरणं जगाम । ततश्च
भगवानप्युशनसं शंकर मसुरा
न् देवांश्च निवार्य्य बृहस्पतये ।
तारा मदात् तां चान्तः प्रसवा म
वलोक्य बृहस्पतिराह नैषमम
क्षेत्रे भवत्यान्यस्य तनयो धार्य्य उत्सृ
जैनं अलमलमति धार्ष्ट्येनेति ।
साच तेनैव मुक्ता पतिव्रता भर्त्तृ
वचनान्तमिषीकास्तम्बे गर्भ मु
त् ससर्ज । सचोत्सृष्टमात्र एवा
ति तेजसा देवानां तेजांस्याचिक्षे
प । बृहस्पति मिन्दुञ्च तस्य कुमार
स्यातिचारुतया साभिलाषौ दृ
ष्ट्वा देवाः समुत्पन्न सन्देहास्तारां प
प्रच्छुः सत्यं कथयास्माक मतिसु
भगे कस्यायमात्मजः सोमस्याथ
बृहस्पते रित्युक्तापि सा नाह्रिया

न किंचिदुवाच । यदा बहुशोऽप्यभिहि
ता यदासौ देवेभ्यो नाचचक्षे त
तः स कुमारस्तामशप्तुमुद्यतः प्रा
ह च । दुष्टाम्ब कस्मान्मम तातं
नाख्यासि अद्यैव ते अलीकलज्जा
वत्यास्तथा शास्तिमहमहं करो
मि यथा नैवमद्याप्यतिमन्थरव
चना भविष्यतीति । अथ भगवान्
पितामहस्तं कुमारं सन्निवार्य्य स्व
यमपृच्छत्तारां । कथय वत्से क
स्यायमात्मजः सोमस्याथ बृह
स्पतेरित्येवमुक्ता लज्जमानाह
सोमस्येति । ततः स्फुरदुच्छसि
तामलकपोलकान्तिर्भगवानु
डुपतिः कुमार मालिङ्ग्य साधु साधु
वत्स प्राज्ञोऽसीति बुध इतिनाम
चक्रे । इति विष्णुपुराणे ४ अंशे ६
अध्यायः मत्स्यपुराणे च तद्विशा
ध्याये विशेषस्त्वयं । सूत उवाच
ततः संवत्सरस्यान्ते द्वादशादि
त्यसन्निभः । दिव्यपीताम्बरधरः
पीताभरणभूषितः ॥ सर्वार्थ
शास्त्रविद्विद्वान् हस्तिशास्त्रप्रव
र्त्तकः । नाम्नः सोमस्य पुत्रत्वाद्राज
पुत्रो बुधः स्मृतः ॥ जातमात्रः
स तेजांसि सर्वाण्येवाक्षिपद् बली
ब्रह्माद्यास्तत्र ते जग्मुर्देवा देव
र्षिभिः सह ॥ बृहस्पति गृहे स
र्वे जातकर्मोत्सवं तदा । पप्रच्छुश्च



सराह्नायां केन जातः कुमारकः। ततः सा लज्जिता तेषां न किंचिद् वदत् तदा। पुनः पुनस्तदा पृष्टा लज्जयन्तीव राङ्गना॥ सोमस्येति चिरादाह ततो गृह्णाद्विधुः सुतं। बुध इत्यकरोन्नाम प्रादाद्राज्यं च भूतले। अभिषेकं ततः कृत्वा प्रधानमकरोद्विभुः। ग्रहसाम्यं प्रदाय च ब्रह्मा ब्रह्मर्षिसंयतः॥ पश्यतां सर्वभूतानां तत्रैवान्तरधीयत इलोदरे च धर्मिष्ठं बुधः पुत्रमजीजनत्। अन्यत्सर्वमाख्यानमेकमेव। अस्य वर्णः दूर्वाश्यामः। स च उत्तरदिक्प्रभुः [illegible] अथर्ववेदः रजोगुणः मिश्रितरसः मिथुनराशिमारकतमः मगधदेशानामधिपतिः। अस्य मित्रे आदित्यः शुक्रश्च। अस्य शत्रुः शशी। अस्य राशिभोगः अष्टादश दिनानि इति ज्योतिस्तत्त्वम्॥ स तु मगधदेशोद्भवः। अत्रिगोत्रजातः। द्व्यङ्गुलदीर्घः पीतवर्णः। वैश्यजातिः। चतुर्भुजः। वामोर्द्ध्वक्रमतश्चर्मवरखड्गगदाधारी। सर्वास्यः सिंहवाहनः। सौम्यः पीतवस्त्रः। अस्याधिदेवता नारायणः। प्रत्यधिदेवता विष्णुः। धनिष्ठानक्षत्रयुक्ते द्वादश्यां जातः इति ग्रहयज्ञतत्त्वम्॥ स च ग्रामचारी शुभग्रहः॥ नीलवर्णः सवर्णद्रव्यस्वामी वर्त्तुलाकृतिः शिशुः ईशान्यकाष्ठसंचारी। वातपित्तकफात्मकः। स्त्रीग्रहः प्रातःकाले प्रबलः। पक्षिस्वामी। सकलरसप्रियश्च। इति ज्योतिषं॥ अस्य वारेजातफलं यथा। गुणी गुणज्ञः कुशलः क्रियादौ विलासशीलो मतिमान् विनीतः मृदुस्वभावः कमनीयमूर्त्तिर्बुधस्य वारे प्रभवो मनुष्यः इति कोष्ठीप्रदीपः॥ सूर्यवंशीयराजविशेषः यथा। तस्मात्कृतिरथस्तस्माद्देवावकस्ततो बुधः। बुधाच्च विबुधश्चैव तस्मान्महाधृतिस्ततः इत्याग्निपुराणं॥

बुधचक्रं क्ली बुधग्रहस्य स्वसंचारादष्टादशदिनोत्तरराश्यन्तरसंचारनक्षत्रावधिसप्तविंशतिनक्षत्रदिननरशुभाशुभज्ञानार्थं नराकारचक्रं यथा भोगो मस्तके मध्यमर्द्धिकचतुर्थरोगाः षट्पाणिभे खवदने मुखदंष्ट्रकेते च। दुःखपदाधिसुयशो हृदि सप्त राज्यं नाभौ द्विभे ह्रिभगलेति पदं बुधस्य॥ इति समयामृतं॥

बुधतातः पुं चन्द्रः॥

इति शब्दचन्द्रिका॥

बुधरत्नं क्ली मरकतमणिः। इति राजनिर्घण्टः॥

बुधवारः पुं बुधग्रहस्य वासरः। यथा येः कृताः श्रवणमासि अष्टमी रोहिणी युता। किं पुनर्बुधवारेण सोमेनापि विशेषतः॥ इति तिथ्यादितत्त्वं॥

बुधसानुः पुं पर्णं यज्ञपुरुषः इति संक्षिप्तसारोणादिवृत्तिः॥

बुधसुतः पुं पुरूरवाः इति पुराणं बुधास्त्री जटामांसी इति शब्दचन्द्रिका॥

बुधानः पुं गुरुः॥ विज्ञः इति मेदिनी। बलवादी॥ प्रियवादी। इत्युणादिकोषः॥ कविः। इति जटाधरः॥

बुधाष्टमी स्त्री व्रतविशेषः। यथा बुधाष्टमीव्रतं चैत्र पौष हरिशयनादीतरत्रासु कर्त्तव्यं। यदाह राजमार्त्तण्डः। चतुर्मासकरे याते देवे जाग्रति माधवे। बुधाष्टमी प्रकर्त्तव्या वर्जयित्वा तु चैत्रकं॥ प्रसुप्ते च जगन्नाथे संध्याकाले मधौ तथा बुधाष्टमी न कर्त्तव्या हन्ति पुण्यं पुराकृतमिति॥ एतद्वचनमारभ्यमपि चैत्रादौ न कर्त्तव्यमिति। यथा। स्मृतिः। मीने धनुषि देवेशे सुप्ते शुद्धिदिने तथा बुधाष्टमीं न कुर्वीत पूर्वविद्धामपि क्वचित् इति व्रतकालविवेकः॥ अपि च अष्टमी बुधवारेण पक्षयोरुभयोर्यदा भविष्यति तदा तस्यां व्रतमेतत् कथा शुभा॥ तस्या नियमकर्त्तारो न स्युर्दुर्गतिभाजनाः। तण्डुलस्याष्टमुष्टीनां वर्जयित्वाङ्गुलीद्वयं भक्तं सङ्कल्पे श्रद्धाम्पाकामनायुक्तमानवः आम्रपत्रपुटे कृत्वा यो भुङ्क्ते कुशवेष्टिते कलविकासि कोपे काम्यं तस्य फलं भवेत्। बुधं पञ्चोपचारेण पूजयित्वा जलाशये शक्तितो दक्षिणां दद्यात् कर्कनालैकताम्रिमां च बुधेति बीजाणैः स्वर्णो वा कमलादिके वाणचापधरं दले चोपाणिमध्यतः बुधाष्टमीकथां पुण्यां श्रोतव्या व्रतिभिर्ध्रुवं॥ पुरे पाटलिपुत्राख्ये वीरो नाम द्विजोत्तमः। रम्भा भार्या च तस्यासीत् कौशिकं पुत्र उत्तमः। दुहिता विजया नाम धनपालो वृषो भवत्। गृहीत्वा कौशिकस्तं च ग्रीष्मे गङ्गां गतोऽरमत्॥ गोपालकैर्वृषश्चौरैः क्रीडतस्य हृतो बलात् गङ्गातः स च उत्थाय



वनं वभ्राम दुःखितः ॥ जलार्थी वि
जयाच्चागात्‌ आज्ञा सार्द्धं च साध्वगा
न्‌ पिपासितो मरणार्थी आग
तोऽस्य सरोवरे ॥ दिव्यस्त्रीगणं चश
तादि दृष्ट्वा चाप्यथ विस्मितः स च
गत्वा यथा चाज्ञं सानुजोऽहं बुधदि
नः स्त्रियोऽर्जुन व्रतं कर्तुं दा ।
स्यामस्त्र करु व्रतं यस्यार्थं मन्नपा
नार्थं पूजयामास तद्बुधं ॥ पुटक
हृदयं गृहीत्वा मं बुधजाते मदनकं ।
स्त्रियो गत्वा गर्भो तौ न धनपालम
पश्यन्तौ चौरे हृतं गृहीत्वाथ प्रदो
षे ग्रामवान्‌ गृहं । चौरं च
पितं नत्वा राज्ञो समा यथा स्वयं
चत्वारि तेन हृष्टा कस्यदेयास्तना
मया । यमायेत्य वदी हुतात्‌ स वा
याद्ध तस्य तत्फलात्‌ स्वर्गं गतो चापि
नरो व्रतं राज्याय कौशिकः चक्रे
योध्या महाराज्यं दत्वा च भगिनी
यमे ॥ यमोऽपि विजया मार्द्र गृह
स्यातं पुरान्तरे । नोद्घाट्य यान्यत्र
गतो यमे स्नान तथा करोत्‌ अप
श्यन्मातरं स्वां सा यामिकां पा ।
शयानतो ॥ अयोद्विग्ना कौ
शिकाय ग्रावदताग विमुक्ति
दे । व्रतं चक्रे ततो मुक्ता माता
तस्माद्धरे ह्वते ॥ इति गारुडेब्र ।
याष्टम्यादि १९९ अध्यायः ॥ वि
स्तरस्तु ब्रह्मपुराणोक्त बुधाष्ट
मीव्रतपद्धतौ द्रष्टव्यः ॥
बुधितं त्रि बुद्धं । ज्ञातं । इत्यमरः ॥
बुधिलः त्रि विद्वान्‌ । इत्युणादिको
षः बुध्नः पुं वृक्षमूलं इत्यमरः ॥
शिवः । यथा । निवेश्य बुध्ने चरणं
स्मितानना गुरुं समारोढुमथोपच
क्रमः । इति हरिविलासे राजसे
खरः इति भरतः ॥
बुद } इर भ उ निशामने । ह्वोपं
बुन्द } चमस्वरिणो । इर अबुदत्‌
अबोदीत्‌ अबुदत्‌ अबुंदीत्‌ अबो
दति बोदते बुंदति बुन्दते उ बोदि
त्वा बुत्वा । निशामन मालोचनं प्र
णिधानमिति यावत्‌ दिवे नेति बु
न्दस्य । श्रेष स्मात्तद्यादि दित्स
के इति दुर्गादासः ॥
बुन्ध इर भ उ निशामने । इति क
विकल्पद्रुमः ॥ पंचमस्वरी । ह्रुवं
अबुधत्‌ अबुंधीत्‌ । न बुन्धति बुन्ध
ते उ बुन्धित्वा बुद्धा । निशामन मा
लोचनं प्रणिधानमिति यावत्‌ ।
इति दुर्गादासः ॥
बुन्ध क बंधे । इति कविकल्पद्रुमः
पंचमस्वरी । क बुन्धयति । इति
दुर्गादासः ॥

बुधमानः पुं आचार्य्यः ॥ देवः
पंडितः । इति संक्षिप्तसारोणा
दिवृत्तिः ॥
बुभुक्षा स्त्री क्षुधा । इत्यमरः ॥
बुभुक्षितः त्रि क्षुधितः इत्यमरः
बुल क मज्जने । इति कविकल्प
द्रुमः ॥ क बोलयति प्लवः प
यसि । तालव्यवर्गाद्यादिरय मि
ति केचित्‌ । इति दुर्गादासः ॥
बुलिः स्त्री भयं । इति हेमचंद्रः
बुसं क्ली बुसं तुच्छधान्यं आगडा
इति भाषा । यथा । उन्मेषमेषत
षतो ष कषाभिलाष झल्माष ।
माषबुषवेषतुषारदोषाः इतिम्र
ह्रण्यमध्ये पुरुषोत्तमः इति भर
तः तय इर हानौ इति कविकल्प
द्रुमः । यबुसाति जलं मेघः स्यज
तीत्यर्थः । इर अबुसत्‌ अबोसी
त्‌ अस्मात्‌ पुषादित्वान्नित्यपर इत्य
न्ये । इति दुर्गादासः ॥
बुसं क्ली तुच्छधान्यं आगडा इति
भाषा । तत्पर्य्यायः । कडंगरः २ ।
इत्यमरः । बुषं ३ इति भरतः ॥
बुषं ४ इति शब्दरत्नावली ॥
बुस्त क अनादरे । आदरे । इति
कविकल्पद्रुमः कबुस्तयति वि
त्तं लोकः बुस्तयति धीरं साधुः इति
दुर्गादासः ॥
बुस्तं क्ली मांसपिण्डकविशेषः
स्थालीभृष्टमांसं पनसादिफल
स्यासारभागः भोंता इति ख्यातः
इत्यमरभरतौ ॥
बृक्कं त्रि बुक्कं । हृदयं । इत्यमरः
टीकायां रमानाथः ॥
बृक्कं त्रि बुक्कं इत्यमरटीकायां
सारसुंदरी ॥
हृणि हृम्मा भस्मा । इति कविक
ल्पद्रुमः ॥ किह्नणोति ह्नणः च
र्णाः इति दुर्गादासः ॥
बेकटः पुं मत्स्यभेदः तरुणः
विदूषकः । इति शब्दरत्नावली
बोकडी स्त्री वन्ध्या इति राज
निर्घण्टः ॥
बोद्धा त्रि बोधकर्ता यथा बो
द्धारो मत्सरग्रस्ताः प्रभवः स्मय
दूषिताः । अज्ञानोपहता श्चा
न्ये जीर्णमंगे सुभाषितं ॥ इति
भर्तृहरिः ॥
बोधः पुं ज्ञानं । इति त्रिकाण्ड
शेषः ॥
बोधकः पुं सूचकः इति शब्द
माला पुस्तकान्तरे बोधकोऽपि
पाठः बोधजनके त्रि ।
बोधकरः पुं निशान्ते बोधकारकः



तत्पर्य्यायः । वैतालिकः २ इत्य
मरः ॥
बोधनः पुं अभिप्रायवेत्ता श्री
कृष्णः । यथा । सर्वभावविदां श्रे
ष्ठो बोधनः कामशास्त्रवित् का
मिनीर्बोधयामास वासयामास
वत्सलः इति श्रीकृष्णजन्मखण्डे ४४
अध्यायः । बोधनं क्ली गन्धदीपनं
इति मेदिनी । वेदने विज्ञापने इति
बुधधात्वर्थ दर्शनात् । दुर्गाया बो
धने यथा । देवीपुराणे । इष मा
से सितपक्षे कन्याराशिगते रवौ
नवम्यां बोधयेद्देवीं क्रीडाकौत
कमङ्गलैः ॥ अत्र कृष्णादिवा
दिवसेष्वपि गौणाश्विन परे ··
एवकालकौमुदीविधृते क
ल्पके द्वैतसम्मता धृतक्रिया
श्विने । तत्रार्द्रायां बोधयेद्देवीं त्
श्विने । तत्र नार्द्रा नमिति बोध
येदिति शेषः । तत्रापि नवमी
बोधने कन्यायामेव तथैव सम्भ
वात् तेन सिंहार्के तुलार्केऽप्याश्वि
नेत्वेतद्वाक्यरचना । एवं मलिम्लुच
कर्मश्वानादार्द्रादिने तल्लाभेपि
बोधनादिकार्य्यं नक्षत्रयोगस्त
फलातिशयाय । तथाच लिङ्गपु
राणे मूलाभावेपि सप्तम्यां केवला

यां प्रवेशयेत् । तथा तिथ्यन्तरेष्वे
व मूलेषुच फलोच्चयः केवलः
तिथि नक्षत्रयोर्योगे द्वयोरेवानु
पालनं । योगाभावे तिथि र्ग्राह्या
देव्याः पूजनकर्मणि । कृष्णनव
म्या मार्द्रा योगो विधौ मन्त्रे च कल्प
येत् । तथा लिङ्गपुराणे । कन्या
यां कृष्णपक्षेतु पूजयित्वार्द्रभे दि
वा । नवम्यां बोधयेद्देवीं महावि
भवविस्तरैः ॥ चतुर्थीपादेगौणनवा
दिमतिः स्यादिति कालिकापुरा
णपाठः इष मास्यसितेपक्षे नव
म्यामार्द्रयोगतः । श्रीवृक्षे बोधया
मि त्वां यावत् पूजां करोम्यहं ॥ ये
·· स्म वधार्थाय रामस्यानुग्रहा
य च अकाले ब्रह्मणा बोधो देव्या
स्त्वयि कृतः पुरा । इति मन्त्रलिङ्गं ।
अकाल इति तत्रापि त्वेन दक्षिणा
यनस्य । तथा श्रुतिः । तपस्तप
स्यौ शैशिरावृतः मधुश्च माधव
श्च वासन्तिकावृतः शुक्रश्च शुचिश्च
ग्रैष्मावृतः अथैतदुत्तरायणं देवा
नां दिनं नभश्च नभस्यश्च वार्षिका
वृतः इषश्च ऊर्जश्च शारदावृतः स
हाश्च सहस्यश्च हैमन्तिकावृतः अ
थैतद्दक्षिणायनं देवानां रात्रिरिति
एवं च रात्रावेव महामायाया ब्रह्मणा बो
धिता ॥


पुरा । तथैव वचनात् कृत्यप्रतिसं
वत्सरं त्वयैवेतद्विषयं । अतए
व लिङ्गपुराणकालिकापुराण
योर्दिवसोक्तेः । एवं च कालिकापु
राणे बोधने रात्रावितिपदं देवता
रात्रिपरं ॥ ततश्च पूर्व्वोक्ते नवम्या
मार्द्रायुक्तायां बोधनं पूर्व्वाह्णेतर
काल एव आर्द्रालाभे दिवेत्यत्र
दिवापदात्तत्रापि बोधनं अन्यथा
दिवापदं व्यर्थं स्यात् ज्योतिषार्ण
वे व्यक्तमुक्तं वराहेण । कन्यादि
मीन पर्य्यन्तं यत्र संप्राप्यते शिवः
तत्र बोधः प्रकर्तव्यो देव्या राज्ञो
ऽभयप्रदः । शिव आर्द्रा ··
चाभयदिने पूर्व्वोक्ते नवमीलाभे
परत्रार्द्रालाभे परत्र बोधनं तत्
युग्मात् पूर्व्वत्र । युग्मबाधक पूर्व्वो
क्तस्य बाधकमतत्रानुरोधात् दि
वानतत्रालाभेन पूर्व्वोक्ते एव नव
म्यां उभयत्र पूर्व्वोक्ते लाभे पूर्व्वदिन
एव युग्मात् अतः केवलनवम्यां बो
धनविधेर्नक्षत्रस्यापि गुणफलत्वा
च्च मास्यस्य फलाभेवापि भवेद्धमा
चसप्तमी । मा करोति च यत् प्रोक्तं
तत्प्रायो हन्ति दर्शनादिति सौराग
मात् माकर्ण्यादिवत् आर्द्रा योग
इत्यस्य प्राधिकत्वेनाभिधानं प्रती

यते । तत आर्द्रारहिते बोधने सं
शेत्तत्वानुपदेशात् तन्मन्त्रः प्राग
वधुक्तत्वेन प्रयुक्तेन । यन्मुनं चा
तिरिक्तं च यच्छिद्रं यदयज्ञियं य
दमेध्यमशुद्धं च यातयामं च यद्
वेत् तदोङ्कारप्रयुक्तेन सर्व्वं चा
विकलं भवेत् इति योगियाज्ञव
ल्क्यात् षष्ठ्यां बोधनेप्येवं ॥ नवम
बोधनासामर्थ्ये तु षष्ठ्यां सायं बोध
ने । तथा भविष्ये । षष्ठ्यां बिल्वतरौ
बोधं सायंसन्ध्यासु कारयेत् स
ध्योक्ता वराहेण । अर्द्धास्तमयात्
सन्ध्या व्यक्तीभूता न तारका याव
त् षष्ठ्यां बोधने तु प्रागुक्तमेवास्
वधार्थायेति अहमप्याश्विने ष ।
ष्ठ्यां सायाह्ने बोधयाम्यत इति प
ठेत् यदा तु पूर्वदिने सायं षष्ठी
लाभः तदा पूर्वेद्युर्बोधनं परदि
ने सायमामन्त्रणं ॥ यदा तूभय
दिने सायं षष्ठीलाभस्तदा परेद्यु
रिति पूर्वोक्ते षष्ठ्यां बोधनं बोधये
द्बिल्वशाखायामिति षष्ठ्यां देवीफले
षु च षष्ठ्यां बोधने तु नक्षत्रानुप
देशात्तदादरः ॥ इति तिथ्यादि
तत्वं ॥ बोधनी स्त्री बोधः ॥
पिप्पली । इति मेदिनी ॥
कार्त्तिकशुक्लैकादशी । सा तु



उत्थानैकादशी । यथा । शय-
नी बोधनी मध्ये या कृष्णैकाद-
शी भवेत् । सैवोपोष्या गृहस्थेन
नान्या कृष्णा कदाचन ॥ इति ति-
थ्यादितत्त्वं ॥ अपिच तावद्गर्ज-
न्ति तीर्थानि वाजिमेधादयो मखाः ।
मथुरायां प्रिया विष्णोर्यावन्ना-
याति बोधनी । इति हरिभक्तिवि-
लासे पद्मपुराणवचनं ॥
बोधनीयः त्रि बोध्यः । बोधितव्यः
बोधयोग्यः । इति बुधधातोः क-
र्मण्यनीयप्रत्ययेन निष्पन्नः ॥
बोधवासरः पुं भगवतः प्रबोध-
दिनं । उत्थानैकादशी । यथा ।
जन्मप्रभृति यत्पुण्यं नरेणोपार्जि-
तं भुवि । वृथा भवति तत्सर्वं न कृ-
त्वा बोधवासरं । इति हरिभक्तिवि-
लासधृतस्कन्दपुराणवचनं ॥
बोधानः पुं गीष्पतिः विज्ञः ॥
बुधभेदः । इति शब्दरत्नावली
बोधिः पुं समाधिभेदः । पिप्पल-
वृक्षः इति मेदिनी । बोधः । इति
त्रिकाण्डशेषः ॥ ज्ञानं त्रि ।
इत्युणादिकोषः ॥
बोधितं त्रि ज्ञापितं । यथा । रा-
त्रावेव महामाया ब्रह्मणा बोधि-
ता पुरा । इति तिथ्यादितत्त्वं ॥
बोधितरुः पुं अश्वत्थवृक्षः । इति
हेमचन्द्रः ॥
बोधितव्यं त्रि ज्ञापितव्यं । यथा
बोधितव्योऽयं शर्वपक्षः । इति
शांकरभाष्यं ॥
बोधिद्रुमः पुं अश्वत्थवृक्षः इत्य-
मरः ॥
बोधिवृक्षः पुं अश्वत्थवृक्षः इति
राजनिर्घण्टः ॥
बोधिसत्त्वः स्त्री बुद्धविशेषः इति
हेमचन्द्रः ॥
बौद्धं स्त्री बुद्धकृतनिरीश्वरशास्त्रं
तत् सर्वैः शास्त्रकारैः खण्डितं त्व-
ग्राह्यं इति श्रीभागवतं । बौद्धशा-
स्त्रसंस्थापनकर्त्ता वृहस्पतिः य-
था । प्राग्वाचस्पतिर्देवैः पठितो-
स्मि रजेः सुतैः नयस्व । गोराज्ये
न निर्जितश्च वृहस्पते राज्यलाभा-
य मे यत्नं विधत्स्व धिषणाधि-
प । ततो वृहस्पतिः शाक्रमकरोद्-
बलदर्पितं ॥ ग्रहशान्तिविधानेन पौ-
ष्टिकेन च कर्मणा । गत्वाथ मोह-
यामास रजिपुत्रान् वृहस्पतिः ॥
जिनधर्मं समास्थाय वेदबाह्यं स
वेदवित् । वेदत्रयीपरिभ्रष्टांश्च का-
रयिषणाधिपः । वेदबाह्यान् परि-
ज्ञाय हेतुवादसमन्वितान् ॥

जघान शक्रो वज्रेण सर्वधर्मबहि-
ष्कृतान् । इति मात्स्ये २४ अध्यायः
बौद्धः पुं बुद्धशास्त्रावलम्बी तत्-
पर्यायः ॥ भिक्षुकः २ क्षपणः ३
अश्लीकः ४ वैनायिकः ५ इति त्रि-
काण्डशेषः ॥
बौधः पुं बुधस्य पुत्रः स च पुरू-
रवाः । इति हेमचन्द्रः ॥
ब्ध्य ञ्ञ य नाऊ । इति कविकल्प-
द्रुमः । य विध्यति शत्रुं श्वः । ञौ
अबव्यात् सीत् । कश्चित्तद्धिभ्नतस्या-
निकारीभूतयकारस्य व्यर्थेव का-
रोऽवयः अमुत्रदेश्यः इति मल्लानः
समिविभ्यत् सतीत्याह इति दुर्गा-
दासः ॥
ब्रुके इत सृति । उत्सर्गे कव्योय
घति वनंदाता । श्याघ त्रिकटु इति
दुर्गादासकृतधातुदीपिकायां गो-
विंदभट्टः ॥
ब्रण शब्दे इति कविकल्पद्रुमः
ब्रणति इति दुर्गादासः ॥
ब्रततिः स्त्री लता विस्तारः इत्य-
मरः ॥
ब्रध्नः पुं सूर्यः वृक्षमूल अर्कवृक्षः
इत्यमरः शिवः । इति हेमचन्द्रः ॥
मेदिनीकारेण तालव्यवकारादौ ।
लिखितोऽयं शब्दः ॥ रोगवि-
शेषः । तस्य लक्षणं । यथा अभ्य-
भिष्यन्दिगुर्वामसेवनान्निचयं गतः
करोति ग्रन्थिवच्छोथं दोषो वङ्क्ष-
ण संधिषु ॥ ज्वरशूलाङ्गसादा-
ढ्यं तं ब्रध्नमिति निर्दिशेत् । इ-
ति माधवकरः ॥ तस्य चिकि-
त्सा । अष्ट क्षीरेण तैलेन सम्य-
क् कल्कोऽभयाभवः । कृष्णा सैं-
धवसंयुक्तो ब्रध्नरोगहरः परः ॥
अजाजी हबुषा कुष्ठं गोमेदं बदरा-
न्वितं । काञ्जिकेन तु संपिष्टं तल्ले-
पो ब्रध्नजित् परः ॥ गोमेदं पत्र-
तथा च निचुलो धन्वन्तरिः ।
पत्रं दलाह्वं रामं गोमेदं रसना
क्रयमिति । इति भावप्रकाशः
ब्रह्म स्त्री वेदः ॥ तत्त्वं । तपः ।
इत्यमरः ॥ ब्रह्म च चतुर्विधं यथा
विराट् १ हिरण्यगर्भः २ ईश्वरः ३
तुरीयः ४ । इति वेदान्तसारः ॥
अस्य लक्षणं । यथा । यल्लाभा-
न्नापरो लाभो यत्सुखान्नापरं सु-
खं यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्य-
वधारयेत् ॥ यद्दृष्ट्वा नापरं दृश्यं
यद्भूत्वा न पुनर्भवः । यज्ज्ञात्वा
नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ।
तिर्यगूर्द्ध्वमधः पूर्णं सच्चिदानं-
दमद्वयं । अनन्तं नित्यमेकं यत्



ब्रह्मत्वमवधारयेत् ॥ अनन्याहृति
रूपेण वेदान्ते लक्ष्यते द्वयं । अ
खण्डानन्दमेकं यत्तद्ब्रह्मत्वमवधा
रयेत् ॥ दृश्यते श्रूयते यद्यद्ब्रह्म
णोऽन्यन्न तद्भवेत् । तत्त्वज्ञानाच्च त
द्ब्रह्म सच्चिदानन्दमद्वयं सर्वगं स
च्चिदात्मानं ज्ञानचक्षुर्निरीक्षते ।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानु
मन्धवत् इत्यात्मबोधः ॥ अपिच
सत्यमानन्दमद्वयमसक्तमेकरू
पं वाङ्मनसोऽगोचरं सर्वगं सर्वा
तीतं चिदेकरसं देशकालाप
रिच्छिन्नमपादमपि शीघ्रगाम
पाणिच सर्वग्रहमचक्षुरपि स
र्वद्रष्टृ अश्रोत्रमपि सर्वश्रोतृ अ
चिन्त्योऽपि सर्वज्ञं सर्वनियन्तृ सर्व
शक्ति सर्वेषां सृष्टिस्थितिलयक
र्तृ किमपि वस्तु ब्रह्मेति वदावदे
ति । शुद्धबुद्धस्वभाव इत्यौपनिष
दाः १ आदिविद्वान् सिद्ध इति का
पिलाः २ क्लेशकर्मविपाकाश
यैरपरामृष्टो निर्माणकायमधि
ष्ठाय संप्रदायप्रद्योतकोऽनुग्राहक
श्चेति पातञ्जलाः ३ लोकवेदविरु
द्धैरपि निर्लेपः स्वतन्त्रश्चेति महापा
शुपताः ४ । शिव इति शैवाः ५ पु
रुषोत्तम इति वैष्णवाः ६ पितामह
इति पौराणिकाः ७ यज्ञपुरुष
इति याज्ञिकाः ८ सर्वज्ञ इति सौ
गताः ९ निरावरण इति दिगम्बराः
१० । उपास्यत्वेन देशित इति मी
मांसकाः ११ लोकव्यवहारसि
द्ध इति चार्वाकाः १२ । यावदु
क्तोपपन्न इति नैयायिकाः १३
विश्वकर्मेति शिल्पिनः । १४ ॥
इति कुसुमाञ्जलिः ॥ योगशा
स्त्रमते । ब्रह्मतेजोमयं शुक्लं यस्य
सर्वमिदं रसः । एकस्य भूतं भूतस्य
द्वयं स्थावरजङ्गमं इति महाभार
ते मोक्षधर्मः ॥ तस्य टीका ब्रह्म
णः स्व .. मेनवा विस्मरणार्थमा
ह ब्रह्मतेजोमयमिति निर्ग्गतेजोमयं ज्ञा
नात्मकं । शुक्लं बीजमव्यक्तं । यस्य ..
मिदं रसः । सनीयं ज्ञेयं सर्वं यस्यैक
स्य भूतं सत्यं न तु विवर्त्तवादिनामि
वासत्यं भूतस्य सिद्धस्य अकल्पित
स्य तत्त्वं सर्वस्थावरजङ्गमोपाधिव
शात् द्वयं द्वेधा ॥ उक्त सगुणनि
र्गुणभेदेन द्विविधं यथा । ब्रह्मै
कं मूर्त्तिभेदस्तु गुणभेदेन संततं ।
तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं
शिव मायाश्रितो यः सगुणो मा
यातीतश्च निर्गुणः स्वेच्छामयश्च
भगवान् निच्छया विकरोति च इच्छाश

क्तिश्च प्रकृतिः सर्वशक्तिमयः सदा
केचिदेकं वदन्त्येवं ब्रह्मज्योतिः सना
तनं । केचिद्वदन्ति द्विविधं ब्रह्मप्र
कृतिः सर्वकं सगुणेषु च वदन्त्येकं
प्रकृतिपुरुषयोः परं तस्माद्ब्र
तितो द्वैतं च तद्ब्रह्म सर्वकारणं अ
थवैकं परं ब्रह्म द्विविधं भवतीच्छया
इच्छाशक्तिश्च प्रकृतिः सर्वशक्ति
मयः सदा तत्रास्तु कृष्णः सगुणः
सशरीरी च प्राकृतः निर्गुणस्तत्र
निर्लिप्तो ह्यशरीरी निरङ्कुशः स
चात्मा भगवान्नित्यः सर्वधारः स
नातनः सर्वेश्वरः सर्वसाक्षी सर्व
कर्म्मफलप्रदः शरीरं द्विविधं श
भो नित्यं प्राकृतमेव च नित्यं विना
शरहितं नश्वरं प्राकृतं सदा अहं
त्वं चापि भगवान्नावयोर्नित्यविग्र
हः आवयोरंशभूता ये प्राकृता
नष्टविग्रहः रुद्रादयस्त्वं दश
श्चमं दशविश्वरूपिणः ममाप्येवं
द्विधा रूपं द्विभुजं च चतुर्भुजं चतुर्भु
जोऽहं वैकुण्ठे पद्मया पार्षदैः सह
गोलोके द्विभुजोऽहं च गोपीभिः स
ह राधया । द्विविधं ये वदन्त्येवं ते
प्रधानं भुक्तिमन्ते पुरुषश्च सदाति
त्योनित्या प्रकृतिरीश्वरी सदा तौ हि
चं संश्लिष्टौ सर्वेषां पितरौ शिव ॥
सशरीरो निःशरीरो स्वेच्छया सर्व
रूपिणौ ॥ प्राधान्यं च यथा पुंसः
प्रकृतेश्च तथा सदा ॥ इति ब्रह्मवै
वर्त्ते श्रीकृष्णजन्मखण्डे ४३ अध्या
यः ॥ तद् यशोदां प्रति श्रीकृष्णस्य ॥
वाक्यं यथा मामेव परमं ब्रह्म भ
गवन्तं सनातनं । ध्यायं ध्यायं पु
त्र बुद्धिं त्यक्त्वा लभ परं पदं ॥ इति
तत्रैव १२७ अध्यायः ॥
सगुणस्य तस्य नवधा रूपं यथा
योगिनो यं वदन्त्येवं ज्योती रूपं सना
तनं १ ज्योतिरभ्यन्तरे नित्यरूपं भ
क्ता वदन्ति यं २ वेदा वदन्ति सत्य
यं ३ नित्यमाद्यं विचक्षणाः ४ ॥
यं वदन्ति सदाः सर्वपरं स्वेच्छामयं
प्रभुः ५ अहं दासमनयः सर्वं सर्वद्रू
पं वदन्ति यं ६ । यमनिर्वचनीयं च
योगीन्द्रः शङ्करो वदेत् ७ स्वयं धा
ता च प्रवदेत् कारणानां च कारणं
८ शेषो वदेदनन्तं यं नवधा रूपमीश्व
रं ९ ॥ तर्काणामेव षण्णां यं षड्वि
धं रूपमीप्सितं । वैष्णवानामेकरूपं
वेदानामेकमेव च पुराणानामेक
रूपं तस्मात्त्रिविधमस्तु तं । न्यायोऽनि
र्वचनीयं च यन्मतं शङ्करोऽब्रवीत्
नित्यं वैशेषिकास्त्यं तद्वदन्ति च वि
चक्षणाः सांख्या वदन्ति तं देवं ज्यो

तीरूपं सनातनं मीमांसा सर्वरू
पं च वेदान्तः सर्वकारणं पातञ्ज
लोऽनन्तं च वेदाः सत्यस्वरूपकं
स्वेच्छामयं पुराणं च भक्ताश्च नित्य
विग्रहं इति तत्रैव १२८ अध्यायः
सगुणनिर्गुणभेदेन तस्य च त
थीरूपं यथा । चतुर्विभागः संस
र्गाय च तथा संस्थितः स्थितौ प्रल
ये च करोत्यन्ते च तद्भेदो जनार्दनः
एकेनांशेन ब्रह्मासौ भवत्यव्य
क्तमूर्त्तिमान् ॥ मरीचिमिश्राः
पतयः प्रजानां मन्यभागतः ॥
कालस्तृतीयस्तस्यांशः सर्वभूता
नि चापरः इत्थं चतुर्धा संस्थोऽवर्त्त
ते सौरजो गुणः ॥ एकांशेन स्थि
तो विष्णुः करोति परिपालनं म
न्वादिरूपी चान्येन कालरूपोऽपरे
ण च सर्वभूतेषु चान्येन संस्थितिं क
रोति स्थितः सत्वगुणमुपाश्रित्य
जगतः पुरुषोत्तमः आश्रित्य त
मसो वृत्तिमन्तकाले तथा प्रभुः
रुद्रस्वरूपो भगवानेकांशेन भवत्य
जः अग्न्यन्तकादिरूपेण भागेना
न्येन वर्त्तते कालस्वरूपो भागोऽन्यः
सर्वभूतानि चापरः विनाशं कुर्वत
स्तस्य चतुर्द्धैवं महात्मनः इति वि
ष्णुपुराणे १ अंशे २ अध्यायः ॥

ब्रह्मध्यानं यथा ब्रह्मध्यानं प्रवक्ष्या
मि मायानन्दविमर्दकं यच्छेद्वाङ्मन
सि प्राज्ञस्तं यच्छेज्ज्ञान आत्मनि ज्ञानं
महति संयच्छेत् तं यच्छेच्छान्त आत्म
नि देहेन्द्रियमनोबुद्धिप्राणाहं
कारवर्जितं ॥ वर्जितं भूततन्मात्रै
र्गुणजन्माशनादिभिः स्वप्रका
शं निराकारं सदानन्दमनादिमत्
नित्यं शुद्धं बुद्धमुक्तं सत्यमानन्दम
द्वयं तुरीयमक्षरं ब्रह्म अहमस्मि
परं पदं ॥ अहं ब्रह्मेत्यवस्थानं स
माधिरिति गीयते । आत्मानं र
थिनं विद्धि शरीरं रथमेव तु ॥
र्थिं विद्धि मनः प्रग्रह
मेव च इन्द्रियाणि हयानाहुर्विषया
स्तेषु गोचराः ॥ आत्मेन्द्रियमनो
युक्तो भोक्तेत्याहुर्मनीषिणः यस
विज्ञानवानात्मा युक्तेन मनसा स
दा न स तत्पदमाप्नोति : कनम
नसा तदा स तत्पदमवाप्नोति स
द्भिर्भूयो न जायते विज्ञानसारथिर्य
स्तु मनःप्रग्रहवान्नरः सोऽध्वनः पा
रमाप्नोति तद्विष्णोः परमं पदं ॥ अ
हिंसादि यमः प्रोक्तः शौचादि निय
मः स्मृतः आसनं पद्मकाद्युक्तं प्रा
णायामो मरुज्जयः ॥ प्रत्याहारेज
यः प्रोक्तो ध्यानमीश्वरचिंतनं ॥

मनोधृतिर्धारणा स्यात् समाधिर्ब्रह्म
नः स्थितः ॥ साकारस्य तस्य ध्यानं ॥
यथा अस्मिंश्चेत् स्थिरी न स्यात्तनोमू
र्त्तिं विचिन्तयेत् । हृत्पद्मकर्णिका
मध्ये शङ्खचक्रगदाब्जवान् श्रीव
त्सकौस्तुभयुतो वनमाली श्रिया
युतः नित्यः शुद्धो बुद्धियुक्तः सत्या
नन्दोऽद्वयः परः ॥ आत्माहं परमं ब्र
ह्म परमं ज्योतिरेव तु । चतुर्विंश
तिमूर्त्तिः स शालग्रामशिलास्थि
तः द्वारकादिशिलासंस्थो ध्येयः
पूज्योऽपि वा हरिः मनसोऽभीप्सि
तं प्राप्य देवो वैमानिको भवेत् नि ।
ष्कामो मुक्तिमाप्नोति मूर्त्तिध्याय
न् वन्जपनः इति गारुडे मूर्त्तिम
न्त्रध्यानाख्य अध्यायः ॥ ब्रह्मप
दस्याधिकारिणो यथा । ब्रह्मणाधा
य कर्माणि निःसङ्गः कामवर्जितः
प्रसन्नेनैव मनसा कुर्वाणो याति त
त्पदं इति कूर्मपुराणे २ अध्या
यः ॥ सर्वब्रह्म यथा । ब्रह्मैवेदं
जगत् सर्वं ब्रह्मणोऽन्यन्न विद्यते
ब्रह्म यद्भाति चोन्मिथ्या यथा मरु
मरीचिका इत्यात्मबोधः ब्रह्म ।
कन्यका स्त्री सरस्वती इति ॥
त्रिकाण्डशेषः ब्राह्मी । इति राज ॥
निर्घण्टः ॥

ब्रह्मकर्मसमाधिः पुं ब्रह्मण्येक
कर्मात्मके समाधिश्चित्तैकाग्र्य
स्य यथा । ब्रह्मार्पणं ब्रह्म हविर्ब्र
ह्माग्नौ ब्रह्मणा हुतं । ब्रह्मैव तेन
गन्तव्यं ब्रह्मकर्मसमाधिना इति
श्रीभगवद्गीतायां ४ अध्यायः ॥
ब्रह्मकुण्डं क्ली ब्रह्मणा निर्मितस
रोवरविशेषः ॥ यथा पौर्णमास्य
स्यामस्यां ब्रह्मकुण्डाह्वयं सरः ब्र
ह्मणा निर्मितं पूर्वं स्नानाय सर्वदा
सिनां आयामेन शतव्याम विस्ती
र्णेन तदर्द्धयं सर्वपापहरं पुण्यं
देवलोकात् समागतं तत्र स्नान
मन्त्रः कमण्डलुसमुद्भूत ब्रह्म
कुण्डामृत स्रवा हरमे सर्वपापा
नि पुण्यं स्वर्गं च साधय ॥ इत्यनेन
तु मन्त्रेण स्नाति तस्मिन् सरोजले
पाण्डुनाथं च संपूज्य विष्णुसायुज्य
माप्नुयात् । ब्रह्मकुण्डजले स्नात्वा
पूजयित्वा उमापतिं ब्रह्मकूटसमा
ख्यं मुक्तिमेवाप्नुयान्नरः इति का
लिकापुराणे ८१ अध्यायः ॥
ब्रह्मकूटः पुं पर्वतविशेषः यथा
ब्रह्मकुण्डजले स्नात्वा पूजयित्वा
उमापतिं ब्रह्मकूटसमाख्यमु
क्तिमेवाप्नुयान्नरः इति कालि
कापुराणे ८१ अध्यायः ॥



ब्रह्मकूर्च्चं क्ली व्रतविशेषः तत्र उपवासपूर्व्वं पञ्चगव्यपानं यथा अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः। पञ्चगव्यं पिवेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः॥ इति प्रायश्चित्तविवेकः॥

ब्रह्मकोषी स्त्री अजमोदा इति राजनिर्घण्टः॥

ब्रह्मगर्भा स्त्री आदित्यभक्ता इति राजनिर्घण्टः॥

ब्रह्मगिरिः पुं ब्रह्मशैलः इति शब्दरत्नावली॥ अपि च। तत्रस्तु नीलकूटाख्यं कामाख्यानिलयं परं तत्पूर्व्वभागे वसति ब्रह्मा ब्रह्मलिङ्गिनः॥ इति कालिकापुराणे । अध्यायः॥

ब्रह्मघ्नी स्त्री गृहकन्या इति राजनिर्घण्टः। ब्रह्मचारिणी च॥

ब्रह्मचर्य्यं क्ली आश्रमविशेषः यथा ब्रह्मचर्य्यस्थितो नैकमन्नमद्यादनापदि ब्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीडयन्॥ मधुमांसं तथाश्नीत नित्यादि परिवर्ज्जयेत्। प्रतिवेद ब्रह्मचर्य्यं द्वादशाब्दानि पञ्च वा ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशः॥ इति गारुडे ९४ अध्यायः॥

ब्रह्मचारिणी स्त्री भार्ग्गी इति रत्नमाला॥

ब्रह्मचारी [न्] पुं प्रथमाश्रमी इति भरतः। उपनयनानन्तरं नियमं कृत्वा गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति यः सः। द्विविधः उपकुर्व्वाणः नैष्ठिकश्च तस्य नियमा यथा यद्यस्य विहितं चर्म्म यत्सूत्रं या च मेखला। यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि॥ सेवेतेमांस्तु नियमान् ब्रह्मचारी गुरौ वसन्। संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः॥ नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्। देवताभ्यर्च्चनञ्चैव समिदाधानमेव च॥ वर्ज्जयेन्मधुमांसञ्च गन्धं माल्यं रसान् स्त्रियः। शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम्॥ अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम्। कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्॥ द्यूतञ्च जनवादञ्च परिवादं तथानृतम्। स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च॥ एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत् क्वचित्। कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः॥ स्वप्ने सिक्त्वा ॥ ९ ॥

ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्॥ उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्। आहरेद्यावदर्थानि भैक्षञ्चाहरहश्चरेत्॥ वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु। ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥ गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु। अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत्॥ सर्व्वं वापि चरेद्ग्रामं पूर्व्वोक्तानामसम्भवे। नियम्य प्रयतो वाचमभिशस्तांस्तु वर्ज्जयेत्॥ दूरादाहृत्य समिधः सन्निदध्याद्विहायसि। सायंप्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः॥ अकृत्वा भैक्षचरणमसमिध्य च पावकम्। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्॥ भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती॥ भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता॥ व्रतवद्देवदैवत्ये पित्र्ये कर्म्मण्यथर्षिवत्। काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते॥ ब्राह्मणस्यैव कर्म्मैतदुपदिष्टं मनीषिभिः॥ राजन्यवैश्ययोस्त्वेवं नैतत् कर्म्म विधीयते॥ चोदितो गुरुणा नित्यमप्रचोदित एव वा। कुर्य्यादध्ययने यत्नमाचार्य्यस्य हितेषु च॥ शरीरञ्चैव वाचञ्च बुद्धीन्द्रियमनांसि च। नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम्॥ नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः। आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः॥ हीनान्नवस्त्रवेशः स्यात् सर्व्वदा गुरुसन्निधौ॥ उत्तिष्ठेत् प्रथमं चास्य चरमञ्चैव संविशेत्॥ प्रतिश्रवणसम्भाषे शयानो न समाचरेत्। नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः॥ आसीनस्य स्थितः कुर्य्यादभिगच्छंस्तु तिष्ठतः। प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः॥ पराङ्मुखस्याभिमुखो दूरस्थस्येत्य चान्तिकम्। प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः॥ नीचं शय्यासनञ्चास्य सर्व्वदा गुरुसन्निधौ। गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्॥ नोदाहरेदस्य नाम परोक्षमपि केवलम्। न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम्॥ गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥ परीवादात् खरो भवति श्वा वै भवति निन्दकः। परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी॥ दूरस्थो नार्च्चे



यैर्देयं न कुद्धो नांतिके स्त्रियाः या नासनस्थश्चैवेन नवकुर्याभिवादयेत् प्रतिवातेनुवातेचनासीत गुरुणासह। असंसत्वेचैवगुरोर्न किंचिदपिकीर्तयेत् गाः श्वोष्ट्रयान प्रासाद प्रस्तरेषुकटेषु च आसीत गुरुणासार्द्धं शिलाफलकनौषुच गुरोर्गुरौ सन्निहिते गुरुवद्वृत्ति माचरेत् नचातिसृष्टो गुरुणास्वान् गुरून भिवादयेत् विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु। प्रतिषेधत स्वाधर्मात् हितंचोपदिशत्स्वपि श्रेयःसु गुरुवद्वृत्तिंनित्यमेवसमाचरेत् गुरुपुत्रेषुचार्येषु गुरोश्चैव स्वबंधुषु बालः समानजन्मावाशिष्योवायज्ञकर्मणि अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति उत्सादनंच गात्राणां स्नापनोच्छिष्टभोजने नकुर्याद्गुरुपुत्रस्य पादयोः श्चावनेजने गुरुवत् प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः अभ्यंजनंस्नापनंच गात्रोत्सादनमेवच गुरुपत्न्यानकार्याणि केशानांच प्रसाधनं गुरुपत्नीतुयुवतिर्नाभि-

वाद्येह पादयोः पूर्णविंशतिवर्षेण गुणदोषौविजानता स्वभावएषनारीणां नराणामिहदूषणं अतोर्थान्न प्रमाद्यंति प्रमदासुविपश्चितः अविद्वांसमलंलोके विद्वांसमपिवापुनः प्रमदाह्युत्पथंनेतुं काम क्रोध वशानुगं मात्रास्वस्रादुहित्रावानविविक्तासनो भवेत् बलवानिंद्रियग्रामोविद्वांसमपिकर्षति कामंतु गुरुपत्नीनांयुवतीनांयुवाभुवि। विधिवद्वंदनं कुर्यादसावहमितिब्रुवन् विप्रोष्य पादग्रहणं मन्वहंचाभिवादनं॥ गुरुदारेषुकुर्वीत सतांधममनुस्मरन्। यथा खनन् खनित्रेण नवार्यधिगच्छति। तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति मुंडो जटिलोवास्यादथवा — शिखाजः — नैनं ग्रामेभिनिम्लोचेत् सूर्योनाभ्युदियात् क्वचित् तंचेदभ्युदियात् सूर्यः शयानंकामचारतः निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनं सूर्येणह्यभिनिर्मुक्तः शयानोभ्युदितश्चयः प्रायश्चित्तमकुर्वाणोयुक्तः स्यान्महतैनसा आचम्य प्रयतो नित्यमुभेसंध्ये समाहितः शुचौदेशे जपन् जप्य मुपासीत यथा विधि इतिमानो-

२ अध्यायः। अपिच। श्रीऔर्वउवाच बालः कृतोपनयनोवेदाहरणतत्परः गुरुगेहेवसेद्भूपब्रह्मचारीसमाहितः शौचाचारवता तत्र कार्यं शुश्रूषणं गुरोः। व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना। उभे संध्ये रविं भूप तथैवाग्निं समाहितः उपतिष्ठेत्तथा कुर्याद्गुरोरप्यभिवादनं स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीतचासति शिष्यो गुरोर्नृपश्रेष्ठप्रतिकूलंनसंभजेत् तेनैवोक्तः पठेद्वेदं नान्यचित्तः पुरःस्थितः अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणाततः अवगाहेदपः पूर्वमाचार्येणावगाहिताः समित्जलादिकंचास्य काल्यं कल्यमुपानयेत् गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्यवै गार्हस्थ्यमावसेत्प्राज्ञो निष्पन्नगुरुनिष्कृतिः॥ इति विष्णुपुराणे ३ अंशे ९ अध्यायः॥ अपिच भिक्षाचर्याथशुश्रूषा गुरोः स्वाध्याय एवच संध्याकर्माग्निकार्यंच धर्मोयं ब्रह्मचारिणः इति गारुडे ४९ अध्यायः। सतद्विविधः यथा ब्रह्मचार्युपकुर्वाणो नैष्ठिको ब्रह्मतत्परः योऽधीत्यविधिवद्वेदान् गृहस्थाश्रममाव्रजेत् उपकुर्वाणकोज्ञेयोनैष्ठिकोमरणांतिकः इति कौर्मे २ अध्यायः ब्रह्मचारिणी स्त्री दुर्गा यथा वेदेषुचरते यस्माच्चेन सा ब्रह्मचारिणी इति देवीपुराणे ४५ अध्यायः करुणीवृक्षः इति राजनिर्घण्टः ब्रह्मशाकः इति रत्नमाला ब्रह्मचर्यव्रतधारिणी यथा आसीतामरणात्क्षांता नियता ब्रह्मचारिणी योधर्मएकपत्नीनांकांक्षंती तमनुत्तमं इति मिताक्षरा॥ ब्रह्मजटा स्त्री दमनकवृक्षः इति राजनिर्घण्टः॥ ब्रह्मजीवी पुं द्विजकार्येषु मूल्येन पविचायकः यथा अश्वत्थवाह्तेयको राज भृत्यो वृत्तारोपकः इति गीर्वाणः ग्रहो मयवृग्राज्योहृणवृत्तीर्गोपजीवी स्वाध्यायिकः शूद्रोपाध्यायोहुबल्लीपतिर्भारिकोनक्षत्रोपजीवी च वृत्तिर्ब्रह्मजीवी चिकित्सकोदेवलकः पुरोहितः किन्नवो मद्यपः कूटकारकोपत्यविक्रयी मनुष्यपशुविक्रेता चेतिमानुद्धृवेत् समेत्यस्वाध्यायतो ब्राह्मणाद्व्यवस्थया सर्वद्रव्यत्यागेन चतुर्थकालाहाराः संवत्सरंत्रिस



वर्णमुपस्पृश्य गुरुस्तां ते देवपितृ
तर्पणं गवाह्निकं चैवं ब्रह्मव्रता
र्थः इति मिताक्षरायां प्रायश्चि
त्ताध्याये प्रचेतसो वचनं ब्रह्मज्ञः
पुं श्रीगोपालः यथा वाग्दाता
वाक्प्रदो वाणीनाथो ब्राह्मण
रक्षकः । ब्रह्मज्ञो ब्रह्मकृद्ब्रह्मा
ब्रह्मकर्मप्रकाशकः इति नारद
पंचरात्रे गोपालसहस्रनामस्तो
त्रे ८ अध्यायः ॥

ब्रह्मज्ञः त्रि ब्रह्मवेत्ता । यथा । स
ब्रह्मज्ञः स वेदज्ञः सोऽग्निहोत्री ।
स दीक्षितः । चीनाचारक्रमाचारै
र्यो यजेन्मातृकिणीं नरः इति चीना
चारप्रयोगविधिः ॥

ब्रह्मज्ञानं क्ली ब्रह्मविषयकज्ञानं
इति समन्तसावृत्तिः तत्त्वमस्यादि
वाक्यजन्य प्रतिफलितब्रह्मा
कृज्ञानं इति वेदान्तलघुचन्द्रि
मिथ्यावासना विरहविशिष्टमा
त्मभिन्नभिन्नज्ञानं इति मुक्तिवादः
क्लेशकर्मविपाकाशयनिर्बन्धक
हिरण्यगर्भविषयकज्ञानं इति वे
जयन्तीधृतपातञ्जलमतं प्रकृ
तिपुरुषयोर्विवेकविषयज्ञानं इ
ति वैवसांख्यमतं सूत उवाच ।
वेदान्तसांख्यसिद्धान्तब्रह्मज्ञानं व
दाम्यहं । अहं ब्रह्म परंज्योतिर्विष्णु
रित्येव चिन्तयन् सर्वेऽद्ध्याग्निव
त्रोचभ्यातिरेकं विपाश्रितं यथा
सर्पिशरीरस्थं गवां न कुरुते बलं
निर्गतं कर्मसंयुक्तं दत्ते तासां म
हाबलं तथा विष्णुः शरीरस्थो
न करोति हितं नृणां विनाराधन
याद्देवः सर्वगः परमेश्वरः आह
हृद्धमतीनां तु कर्मज्ञानमुदा
हृतं आरुरुक्षयोगवृद्धानां ज्ञानं
त्यागः परं मतं ज्ञानमिच्छति शाद्व
दीनराग ... यजायते लोभो
मोहः क्रोधयुतैर्युक्तः पापतरस्त्वे
तं हत्वा वृषस्यमदं वाक् चतुर्थी
चतुष्टयं पतनं संयतं यस्य स
विप्रः कष्णे तु यैः परवित्तं न गृ
ह्णाति हिंसां न कुरुते तथा नात्तक्री
डारतो यस्तु तस्य हस्तौ सुसंयतौ
परस्त्री वर्जनपरस्तस्योपस्थं सु
संयतं अलोलुपो मितं भुङ्क्ते जठ
रं तस्य संयतं । सत्यं हितं मितं ब्रूते
यः सदा तस्य वाग्यता ॥ यस्य सं
यतान्येतानि तस्य किं तपसाध्वरैः
पञ्चयज्ञहिमनसोविद्धि याणाच
सर्वदा विष्णवे परदेवे ध्यानमेत
त्प्रकीर्तितं कर्मयोग्यस्थिता बुद्धिर्वि
षयेषु न क्रियः ॥ ९ ॥

न च ब्रह्माणमित्येते पुराणे निश्चयं
गताः इति मार्कण्डेय पुराणे ।
कल्पभेदे तस्य जन्मानि यथा
त्वत्तो मे मानसं जन्म प्रथमं द्वि
जपूजितं चाक्षुषं वै द्वितीयं मे ज
न्म चासीत् पुरातनं त्वत्प्रसादा
त्तु मे जन्म तृतीयं वाचिकं महत् ॥
त्वत्तः श्रवणजं चापि चतुर्थं जन्म
मे विभो नासत्यं चापि मे जन्म त्व
त्तः षष्ठं विनिर्मितं इदं च सप्तमं
जन्म पद्मजन्मेति मे प्रभो सर्गे
सर्गे ह्यहं पुत्रस्तव त्रिगुणवर्जि
त ॥ भारते शान्तिपर्वणि मोक्ष
धर्मे ॥ निरुद्ध रूप विष्णु प्रतिपा
द्यकल्पीय ब्रह्मवचनं ॥ तस्य
पतनकालो यथा द्वात्रिंशदह
कोट्यस्तु तथाहं दाष्टकं भवेत्
एवं द्वयं निखर्वं च शङ्कुत्रययु
तं तथा ॥ पद्ममेकं समुद्राश्च
त्रयो ब्रह्म समागते ब्रह्माविष्णु
दिने चैकः पतन्त्येवं वदन्ति ते ॥
मनीषिणस्तथा विष्णु रहस्ययस्य
श्रीकरः ईश्वरस्य तथा चासौ स
सांख्ये प्रकृते तथा अनन्तः परं परे
धाम्नि कालसंख्यानविधौ ते ब्रह्म
णोऽनन्तः परं संख्या नास्ति चैतन्मतं
द्विजः अपि च । यकाणि चेतु त्रै
लोके ब्रह्मा नारायणात्मकः भो
गिशय्यागतः शेते त्रैलोक्यग्रा
सबृंहितः जनलोकस्थैर्योगिभिर्देव
श्चिन्त्यमानोऽब्जसम्भवः यतीतो
योगनिद्रायां संबुद्धः सृजते पुनः
एवं तु ब्रह्मणो वर्षं तथा वर्षश
तं भवेत् शते वर्षे प्रयाते ब्रह्मा पर
मात्मनि लीयते इत्यग्निपुरा
णे ॥ ब्रह्मायभूः पुं चोटकः ।
इति हारावली ॥

ब्रह्माञ्जलिः पुं सामवेदपाठस्वर
विभागार्थोऽञ्जलिः क्रियते सः
अध्ययनस्यादावन्ते च गुरुवेषु
णावोच्चारणपूर्वकोऽञ्जलिः क्रि
यते सः तत्पाठार्थत्वात् ब्रह्म
णोऽञ्जलिः इत्यमरटीकायां भ
रतः ॥

ब्राह्मणी स्त्री ब्रह्मणः पत्नी इति
शब्दमाला ब्रह्मणोऽङ्गशरीरा
त् तस्या उत्पत्तिर्नामान्तरं च ।
यथा ततः संजपतस्तस्य भित्त्वा
देहमकल्मषं स्त्रीरूपमर्द्धम
करोदर्द्धं पुरुषरूपवत् शतरू
पा च सा ख्याता सावित्री च निगद्य
ते सरस्वत्यथ गायत्री ब्रह्माणी
च परंतप ॥ इति मत्स्यपुरा
णे ३ अध्यायः ॥

अपिच हंसपृष्ठविमानाग्रेस्मात
सूत्र कमण्डलुः। आद्यानाब्रह्म
णः शक्तिर्ब्रह्माणी सामिधीयते
इति मार्कण्डेयपुराणे देवीमाहा
त्म्य ॥ दुर्गा। यथा। ब्रह्माणीब्र
ह्मजननाद्ब्रह्मादर परा मता।
इति देवीपुराणे ४५ अध्यायः
रेणुका नाम गंधद्रव्यं इति रत्न
माला राजरीतिः इति राज
निर्घण्टः ॥
ब्रह्माण्डं क्लीं भवनकोषः विश्व
गोलकः यथा ब्रह्माण्ड रचना
ख्याने अयतां सावधानतः ब्र
ह्माण्डवचनार्थं च भक्ता जानंति
येनतः मुनयश्च सुराः सन्तः किं
चिज्जानंति दुःखेनः जानामिवि
ष्णुर्वीर्थं ब्रह्मानंतो महेश्वरः।
धर्माः सनत्कुमारश्च नरनाराय
णावृषी कपिलश्च गणेशश्च
दुर्गालक्ष्मीः सरस्वती वेदाश्च
वेदमाताच सर्वज्ञा राधिका स्व
यं एते जानंति विश्वार्थं नान्यो
जानातिकश्चन वैष्णवार्थं च
सुधियः सर्वे विज्ञात मदाश्वाः
नित्याकाशाययथात्माच तथा।
नित्या दिशो दश यथा नित्या च प्र
कृतिस्तथैव विगोलकः गोलोक

श्च यथा नित्यस्तथा वैकुण्ठ एव
च एकदा नयिगोलोके रासे
नित्यं प्रकुर्वति आविर्भूता च बा
मांगाद्बाला षोडश वार्षिकी॥
श्वेतचम्पकवर्णाभा पार्वचंद्रस
मप्रभा अतीव सुंदरी वश्या रम
णीतापरात परा ईषद्धास्याप्र
सन्नास्या कोमलांगी मनोहरा।
वह्निशुद्धांशुकाधाना रत्नाभर
णभूषिता यथा जलद पंक्ति
श्च वलाकाभिर्विभूषिता सिं
दूर विन्दुना चारु चंद्र चंदन
विंदुभिः कस्तूरी विंदुभिः सा
र्द्ध सीमंतास्यलोज्ज्वला अमू
ल्यरत्ननिर्मास्त्रिग्धकिरणो
ज्ज्वला रत्नकुण्डलयोर्गण्ड
स्थल समुज्ज्वला कुंकुमालक्त
कस्तूरी चारुचंदन पत्रके।
विचित्रैश्च सुचित्रैश्च सुकपोल
स्थलोज्ज्वला खगेंद्रचंचुविजि
तनासा चार्वीसुशोभिता गजें
द्रगण्डनिर्मुक्तमुक्ताभदंतपंक्ति
मनोहरा। वलिता ललितानीव
पक्वविंबाधरावरा शोभन पूर्ण
इनिंदास्यापदानिंदितलोचना॥
कूलसारनिभोद्भिन्नसुचारुकज्वलो
ज्ज्वला अमूल्यरत्ननिर्माणकेयूरकं

कणोज्ज्वला मणीन्द्रराजराजीभिः शं
खयुग्मकरोज्ज्वला रत्नांगुरीयकैर्वि
भिमस्ताङ्गुलिभूषिता रत्नेंद्रराज
राजेन क्वणन्मंजीर रंजिता। रत्न
पाषकराजीभिः पादांगुलि विराजि
ता सुंदरालक्तरागेण चरणाधः
स्थलोज्ज्वला गजेंद्रगामिनी रामा
कामिनी वामलोचना मांदद्धी
कटाक्षेण रमणी रमनोत्सुका
रासे संभूय रामा सा दधाव पुर
तो मम तेन राधा समाख्याता पु
राविद्भिः प्रपूजिता प्रकृष्ट प्रकृ
ति श्चास्यास्तेन प्रकृति रीश्वरी
शक्ता स्यात्सर्वकार्येषु तेन श
क्तिः प्रकीर्तिता॥ सर्वाधारास
र्वरूपा मंगलार्हा च सर्वतः सर्व
मंगल दक्षा सा तेनस्यात सर्व
मंगला॥ वैकुण्ठे सा महालक्ष्मी
मूर्तिभेदे सरस्वती। प्रसूय वेदा
न् विदिता वेदमाता च सा सदा॥
सावित्री साच गायत्री धात्री त्रिज
गतामपि पुरा संहृत्य दर्पं च साड
गी च प्रकीर्तिता तेजः सुसर्वदे
वानामाविर्भूता पुरा सती तेना
प्यप्रकृतिर्ज्ञेया सर्वासुरविमर्दिनी
सर्वानंदा च सानंदाद् दुःखहा सिद्धिदा।
शिनी शत्रूणां भयदात्री च भक्तानां
भयहारिणी दक्षकन्या सती सा च शै

लजा तेन पार्वती सर्वाधारस्वरूपा
सा कलयासा वसुंधरा कलयात
लसी गंगा कलया सर्वयोषितः।
सृष्टिं करोमि च यया तया पारत्र्या
पुनः पुनः दृष्ट्वा तां वासमध्यस्था
मम क्रीडा तया सह। कल्पवस्तु
विरं तात यावद्वै ब्रह्मणः शांत
अत्यद्भुतं कौतुकं च महाशृंगार
मीप्सितं तयोर्ह्रियो धर्मराशिः सु
स्राव रासमण्डले तस्मान्मनो
हरं जातं नाम्ना काम सरोवरं पपात
धर्मधारा धारा वेगेन विश्वगोलके
बहुवजलपूर्णं च ब्रह्माण्डानां च
गोलकं जलपूर्णं पुरा सर्वसृष्टि
शून्यं ब्रजेस्मिन्न शृंगारान्ते च तस्यां
वीर्याधानं मया कृतं। दधार गर्भं
सा राधा यावद्वै ब्रह्मणः शतं सुसा
वसा ततस्तेच डिम्बं तत्परमाद्भुतं
चुकोप देवी तं दृष्ट्वा रुरोद विष
सादसा पादेन प्रेरयामास तमधो
विश्वगोलके स पपात जलेनात
सर्वाधारो महान् विराट् दृष्ट्वापत्यं
जलस्थं च मया शशाप च सापरा। अ
नपत्या च॥ राधा मत् शापेन पुरा
विभो तेन प्रसूता क्रमतो दुर्गाल
क्ष्मीः सरस्वती। चतस्रः परिपूर्णा
सा प्रसूता श्च स निश्चितं देवो ऽन्या



स्थापिकाभिर्यो न प्रसन्नाव्रजेश्च
र कल्पयाम्भवोयांलोकांश्चाशे
न ब्राह्म जज्ञेमहान् विराट्तेन
डिंबेन कल्पयाश्रय: अस्मांग
त्वर्पाप्रथमयादत्रपपोचस: ॥
जले स्थावरस्तूपस्य स शेते निज
कर्मणः उपाधानजलंभल्पत।
स्पयोगबलेनच तस्य लोम्नाच
कूपानिजलपूर्णानिसंततं प्रत्ये
कंक्रमत स्तेषु शेते क्षुद्रविराट्
पुनः सहस्रपत्रकमलंजज्ञेत्दा
त्रस्यनाभितः तत्रयत्तस्स्वयंब्रह्मा
तेनापकमलोद्भवः तत्राविभू
यस विधिविन्तायंस्तावभवच
कमाहेहः कमाता मेपिता वा
कोच बांधवः दिव्यंत्रिलक्ष वर्षच
वस्थासकमलांतरे ततोदृष्टेपच
लंदत्तसस्मार तपसा चत्र्मा तदाम
यादत्रमेवंजजाप कमलांतरे दिव्यं
सप्तवर्षलक्षंनियतंसंयतःशुचिः
तदा मत्रो वरंलब्धा स्रष्टा सृष्टिंच
कारसः मायया प्रति ब्रह्माण्डब्रह्म
विष्णुशिवात्मकाः दिक्पालाद्वाद
शादित्या रुद्राश्चैकादशापिवा।
मवश्चाहाष्टौ वसवो देवाः कोटिचय
स्तथा ब्राह्मणादक्षविट्शूद्रायक्ष
गंधर्व किन्नराः भूतादयो राक्षसा
स्थाप्येवंसर्वं चराचरं ॥ विश्वेविश्वे।
विनिर्माणंस्वर्गः सप्तकमेणवै।
सप्तसागरसंयुक्ता सप्तद्वीपावसुंध
रा कांचनी भूमिसंयुक्ता तमो युक्त
स्थलंततः पातालाश्च तथा सप्त
ब्रह्माण्डमेभि रेवच विश्वेविश्वेचंद्र
सूर्यो ग्रहण क्षेत्रंच भारतं। तीर्था
न्येतानि सर्वत्र गंगादीनिव्रजेश्वर
यावंतिलोमकूपानिमहाविष्णोः
क्रमेणच विश्वान्येवहितावंति
ह्यसंख्यानि पितुर्भवं इतिब्रह्म
वैवर्ते श्रीकृष्णजन्मखण्डे ८४ अ
ध्यायः ॥ अपिच देवास्तत्रया
विष्टमण्डंच कोटिविस्तरं ब्रह्मा
दिस्तंवपर्यंतमत् यत्र सचराच
रं अण्डहिरण्य गर्भस्य यज्ञई
गर्भसंस्थितं ततोतत्पत्रमिदंश्चो
मत्र्पाणि यो मही भवेत् अथो
र्ध्वंकांचनमय श्चतुरस्रोच्छ्रितो
महान् उन्नपत्रः स चतुःश्रृंगो मे
रुर्देवतसंश्रयः पृथिवी पद्म दि
क् क्षेत्रं मेरु स्तस्य तु कर्णिका॥
युगाष्टकोटिविस्तीर्णं तत्रकुतार
पंरवि: देवीवशाहंतोदेवं याति
तस्य प्रदक्षिणं। इतिदेवीपुराणं
अथ ब्रह्माण्डगोलमाह। भू
भूधरत्रिदशदानवमानवाद्या ये

याश्च धिष्ण्यगणोश्चरचक्रकक्षाः लो
कश्चवस्थितिरुपर्युपरि- दिष्टा ब्र
ह्माण्डभाण्ड जठरे तदिदंसमस्त
अथान्योदितंब्रह्माण्डमानंखवीक्ष
मपि प्रसंगादनुवदति स्म कोटिघ्नै
र्नखनंदषट्कनखभूभूभृद्भुजंगेंदु
भि र्ज्योतिःशास्त्रविदो वदंतिनभ
सः कक्षामिमां योजनैः तद्ब्रह्मा
ण्डकटाह संपुट तटे केचिज्जगु
र्वेष्टनं केचित् प्रोचुरदृश्यदृश्यक
गिरिपरिधिकाः सूरयः ॥ कर
तल कलितामलक वदमलं स
कलं विदंति ये गोलं दिनकरक
रनिकर निहत तमसे
दितस्तेः ब्रह्माण्डमेता
न्नतमस्तनोवाकस्पग्रहः कोम
तियोजः यावंतिपूर्वैरिहतत्प्रमा
णं प्रोक्तं खकक्षाख्यमिदंमतंनः।
इति सिद्धान्तशिरोमणौ गोलाध्या
ये भुवनकोशः महादानविशेषः
यथा। मत्स्य उवाच अथातः संप्रव
क्ष्यामि ब्रह्माण्डविधिमुत्तमं। यच्छ्रे
ष्ठं सर्वदानानां महापातकनाशनं
पुण्यंदिनमथासाद्य तुलापुरुषवदा
नवत् ऋत्विंमण्डपसंभार भूषणा
च्छादनादिकं ॥ लोकेशावाहनं त
द्वदधिवासनकं तथा कुर्य्याद्विंश
पलादूर्ध्वमासहस्राच्चशक्तितः
सकल हय संयुक्तं ब्रह्माण्डं का
चनं बुधः। दिग्गजाष्टक संयुक्तं
षड्वेदांगसमन्वितं लोकपाला
ष्टकोपेतंमध्यस्थितचतुर्मुखं
शिवाच्युतार्कशिखरं उमालक्ष्मी
समन्वितं वस्वादित्यमरुद्गर्भं
महारत्नसमन्वितं वितस्तेरंगु
लशतं यावदायाम विस्तरं कौशे
य वस्त्रसंवीतं तिलद्रोणोपरिन्य
सेत् तथाष्टादश धान्यानि समंततः
त् परिकल्पयेत् पूर्वेणानंतश
यनंप्रद्युम्नं पूर्वदक्षिणे प्रकृतिं
दक्षिणे देशासंकर्षण मतःपरं
पश्चिमे चतुरोवेदाननिरुद्धमतः
परं अग्निमुत्तरतोहेमं वासुदेवम
तः परं अग्निमूर्त्तरतो हेमं वासु
देवमतः परं समंताद्बलपीठ
स्था मर्चयेत् कांचनीं बुधः स्था
पयेद्वस्त्र संयुक्तान् पूर्णकुंभान्
दशैवतु दशैव धेनवो देयाः स
हेमांबर दोहनाः पादुकोपानह
च्छत्रचामरासनदर्पणैः भक्ष्यभो
ज्यान्नदीपेक्षु फलमाल्यानुलेप
नैः होमाधिवासनांते तु स्थापितादे
वपुंगवे: इममुच्चारयेन्मंत्रं त्रिःकृ
त्वाथ प्रदक्षिणं नमोस्तु विश्वेश्वर वि
श्वधामजगत्सवित्रे भगवन्नमस्ते

सप्तर्षिलोकामरभूतलेशा ग-
णेशमार्ईवितसमिरंता येऽशखि-
ताश्चित्रविनो भवन्तु प्रयातपा-
पानि चराचराणां तद्दानपात्रा
हतपातकानां ब्रह्माण्डदोषाः प्र-
लयं व्रजेत् एवं प्रणम्यामरवि-
श्वमार्यदद्याद्द्विजेभ्यो दशाथा
विभज्य ॥ भागद्वयं तत्र गुरोः प्र-
कल्प्य समं भजेच्छेषमतः क्रमे-
ण स्वल्पे तु होमे गुरुरेक एव ज-
प्यी स्वयैकाग्निविधानयुक्त्या ॥
स एव संपूज्यतमोऽल्पवित्तैर्यथा-
ऽऽकवस्त्राभरणादिकेन इत्थं य ए-
तदखिलं पुरुषोऽत्र कुर्याद्ब्रह्मा-
ण्डदानमधिगम्य महद्विमानं नि-
र्धूतकल्मषविमुक्ततनुर्मुरारे-
रानन्दकृत्पदमुपैति सहाप्स-
रोभिः संतारयेत् पितृपिता-
महपुत्रपौत्रान् बन्धुप्रियाति-
थिकलत्रशताधिकः सः ।
ब्रह्माण्डदानसकलीकृतपापको-
षमानन्दयेच्च जननीकुलमप्यशे-
षं इति पठति शृणोति वा यत्र तत्
सुरभवनेषु गृहेषु धार्म्मिकाणां
मतिमपि च ददाति मोदते सोऽमर-
पतेर्भवने सहाप्सरोभिः ॥ इति मत्स्य-
पुराणे महादानानुकीर्त्तने ब्रह्मा-
ण्डदानं नाम २५४ अध्यायः ॥ अपि च
इदानीं कार्त्तिकी चेयं वर्त्तते धनदाधि-
प ब्रह्माण्डं सर्वसंपन्नं भूतरत्नौषधी-
युतं देवदानवयक्षैश्च युक्तमेतत्
सदा विभो एतद्धेममयं कृत्वा सर्व-
वीजरसान्वितं सरत्नं गुरवे कृत्वा
कार्त्तिक्यां द्वादशीदिने अथवा पञ्च-
दश्यां वै कार्त्तिक्यां चैव नान्यतः पु-
रोहिताय गुरवे दापयेद्भक्तिमान्नरः
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि
पार्थिव तानि दत्तानि तेनैव समा-
सात् कथितं तव यो यत्र यजते रा-
जन् सहस्रवरदक्षिणैः सैकोद्दे-
शो यजेत् तस्य ब्रह्माण्डस्य विशेषतः
यः पुनः सकलं चेदं ब्रह्माण्डं दा-
तुमिच्छति तेन यष्टं कृतं दत्तं पठि-
तं कीर्त्तितं भवेत् वराह उवाच एत-
त्कृत्वा ततो राजा हैमं कुम्भं प्रकल्प्य
ने ब्रह्माण्डं स्वषये प्रादात् सविधानं
च तत्क्षणात् सर्वकामैः समन्वि-
तो ययौ स्वर्गं नराधिपः । इति वरा-
हपुराणं ॥

ब्रह्माण्डभूः पुं अम्बः इति शब्द-
माला ॥

ब्रह्मादनी स्त्री हंसपदी इति
राजनिर्घण्टः ।

ब्रह्मादिजाता स्त्री गोदावरी ॥
इति राजनिर्घण्टः ॥

ब्रह्मापेतः पुं माघमासे सूर्य्यनिकट-
स्थितराक्षसः यथा ब्रह्माचयमद-
ग्निश्च कम्बलः श्वतिलोमम् ब्रह्मा-
पेतोऽथ ऋतजिद्धनराष्ट्रश्च सप्तमः ।
माघमासे वसन्त्येते सप्त मैत्रेय भास्क-
रे इति विष्णुपुराणे २ अंशे १० अ-
ध्यायः ॥

ब्रह्मारण्यं क्ली वेदपाठभूमिः इ-
ति त्रिकाण्डशेषः ॥

ब्रह्मार्पणं क्ली ब्रह्मणि समर्पणं
तत्प्रकारो यथा ब्रह्मणा दीयते
देयं ब्रह्मणे संप्रदीयते ब्रह्मैव दी-
यते चेति ब्रह्मार्पणमिदं परं नाहं
कर्त्ता सर्वमेतद्ब्रह्मैव कुरुते तथा
एतत् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्त-
त्त्वदर्शिभिः प्रीणातु भगवानीशः
कर्मणानेन शाश्वतः । करोति स
ततो बुद्ध्या ब्रह्मार्पणमिदं परं ॥
यद्वा फलानां संन्यासं प्रकुर्यात्
परमेश्वरे । कर्मणामेतदप्याहु-
र्ब्रह्मार्पणमनुत्तमं इति कूर्मपुरा-
णे ३ अध्यायः ॥

ब्रह्मावर्त्तः पुं देशविशेषः । तत्
पर्य्यायः । तपोवटः २ इति त्रिका-
ण्डशेषः तत्परिमाणं यथा ॥
सरस्वतीदृषद्वत्योर्देवनद्योर्यद-
न्तरं तं देवनिर्मितं देशं ब्रह्मावर्त्तं
प्रचक्षते इति मनुः ॥

ब्रह्मासनं क्ली ध्यानासनं यो-
गासनं इत्यमरः ध्यानं परमार्थ-
चिन्तनं योगश्चित्तनिरोधमात्रं ध्या-
नं निराकारभावनं । योगः साका-
रभावनमिति वा । तयोः पद्मस्व-
स्तिकाद्यासनं यत् तत्र ब्रह्मासनं
स्यात् इति भरतः ॥

ब्रह्मास्त्रं क्ली ब्रह्मस्वरूपास्त्रं यथा
तदा रामेण क्रुद्धेन ब्रह्मास्त्रं प्रति-
वारणे नारायणविधाताद्यैश्चिन्ति-
तं चन्द्राननं । मंत्रमेव च दारुणा
हस्वरदर्भकृताजिनं कुस्कारशा-
वतुन मागत्य पुरतः स्थितं इ-
ति देविपुराने ॥

ब्रह्मास्त्री दुर्गा यथा ब्रह्मभावे
दमाद्यन्तत्वात् गायत्री चरणाग्र-
जा वेदेषु कथ्यते यत्तु तेन सा ब्रह्म-
चारिणी । इति देवीपुराणे ४ अ-
ध्यायः ब्राह्मी स्त्री पङ्कगण्डकम-
त्स्यः पाकाल इति भाषा ॥
इति त्रिकाण्डशेषः ॥ पङ्कका-
दः शाकभेदः ब्राह्मी शाकस्य
पर्य्यायः मत्स्याक्षी २ सुव-
र्च्चसा ३ वयस्था ४ ब्रह्मचारिणी
५ इति रत्नमाला ॥ अस्याः
गुणाः । भेदकत्वं स्वरकारित्वं



पित्तकफनाशित्वं च इति राजव
ल्लभः ॥ अस्याः पर्य्यायान्तरगुणा
ब्राह्मीशब्दे द्रष्टव्याः ॥
ब्राह्मीघृतं क्ली औषधविशेषः । ब्रा
ह्मीरसेन घृतमिति व्युत्पत्तिः । यथा सम्
लपत्रामृतपाठा ब्राह्मीपद्मालय
वारिणा उद्वर्त्तयेद्यित्वा रसं
वस्त्रेण गालयेत् रसे चतुर्गुणे
तस्मिन् घृतप्रस्थं विपाचयेत् । र
से च तद्गुणे तस्मिन् घृतप्रस्थं वि
पाचयेत् हरिद्रामालतीकुष्ठ
त्रिवृतासहरीतकी पलेनांपलि ।
कैर्भागैः शेषास्तु कार्षिकाः स्मृ
ताः पिप्पल्याथ विडङ्गानि सैन्धं
वं शर्करा वचा सर्वमेतत् स ।
मालोड्य शनैर्मृद्वग्निना पचेत् ।
एतत् प्राशितमात्रेण वाग्वि
द्धिः प्रजायते सप्तरात्रप्रयोगे
न किन्नरैः सह गीयते अर्द्धमा
सप्रयोगेण सोमराजो भवति कोकि
लः मासमेकं प्रयोगेण भवेत् ।
श्रुतिधरो नरः पञ्चगुल्मान् प्रमे
हांश्च कासं पञ्चविधं जयेत् बन्ध्या
नां चैव नारीणां नराणाम् अल्परेत
सां घृतं सारस्वतं नाम बलवर्णवपुः
प्रदं इति जयनारायणकृतवैद्यकि
तत्सारसंग्रहः ॥ ब्रह्मोत्तं त्रि ब्रह्म

णा ग्रासम्यक्प्रकारेण कृतं यथि
ते । इति मुग्धबोधव्याकरणं ॥
ब्रह्मोत्तरं त्रि ब्राह्मणस्वामिकम् ।
स्मादि ब्रह्म ब्राह्मण उत्तरः प्रधा
नं यस्य इति व्यवहारप्रसिद्धं ॥
ब्रह्मोद्यं क्ली ब्रह्मणो वाक्यं इति
मुग्धबोधव्याकरणं ॥
ब्रह्मोपनेता पु पलाशवृक्षः ।
इति राजनिर्घण्टः ॥ ब्राह्मणोपन
यनकर्त्ता च ॥
ब्रह्मोदनं क्ली यज्ञे ऋत्विग्भोजन
मन्न इति वैदिकाः ॥
ब्राह्मं क्ली ब्रह्मतीर्थं तलवत्तदङ्गु
ष्ठमूले वर्त्तते इत्यमरः ॥ अने
न तीर्थेन द्विजस्याचमनं यथा ।
अन्तर्जानु शुचौ देशे उपविष्ट उद
ङ्मुखः । प्राग्वा ब्राह्मेण तीर्थेन द्विजो
नित्यमुपस्पृशेत् अङ्गुष्ठान्तरतो रेखा
याः पाणेर्दक्षिणस्य च एतद्ब्राह्म
मिति ख्यातं तीर्थमाचमनाय वै ॥
इत्याह्निकतत्त्वे ब्रह्मपुराणं य
था ब्राह्मं पाद्मं वैष्णवं च शैवं भा
गवतं तथा ॥ इति मलमा
सतत्त्वधृतविष्णुपुराण ५
वचनम् ॥
ब्राह्मः पु नारदः इति ।
जटाधरः ॥ ॥

विवाहविशेषः यथा व मनुः यथा
प्राक्स्वलंकृता कन्या यत्र दीयते सः
यथा आच्छाद्य चार्चयित्वा च श्रुत
शीलवते स्वयं आहूय दानं कन्या ।
या ब्राह्मो धर्मः प्रकीर्त्तितः इत्यु
द्वाहतत्त्वं ॥
ब्राह्मणं क्ली ब्रह्मसंघातः ब्राह्म
णसमूहः वेदभागः इति मेदि
नी ब्राह्मणः पु ब्रह्मणो विप्रस्य प्र
जायते ब्राह्मणः इति भरतः तत्पर्या
यः द्विजातिः २ अग्रजन्मा ३ भूदेव
४ वाडवः ५ विप्रः ६ इत्यमरः ॥
द्विजः ७ सूत्रकंठः ८ ज्येष्ठवर्ण ९
१० अग्रजातकः ११ द्विजन्मा १२ वक्त्र
जः १३ नेत्र १४ वेदवासः १५ नव १६
गुरुः १७ इति शब्दरत्नावली ब्रह्मा १८
षट्कर्मा १९ द्विजोत्तमः २० इति रा
जनिर्घण्टः अयं सर्ववर्णश्रेष्ठः ब्र
ह्मणो मुखाज्जातः प्लक्षद्वीपे तस्य
संज्ञा हंसः शाल्मलद्वीपे श्रुतिधरः
कुशद्वीपे कुशलः क्रौञ्चद्वीपे गुरुः
शाकद्वीपे ऋतव्रतः पुष्करद्वीपे ।
सर्वे एकवर्णाः अस्य शास्त्रनिरूपि
तधर्मः त्रयः अध्ययनं यजनं दानं
च । जीविका त्रिस्रः । अध्यापनं

अयमन्त्रब्रह्म वेदलक्षणीयेवा सः ॥

याजनं प्रतिग्रहश्च अयमाश्र
मचतुष्टयमान् भवति यथा
ब्रह्मचारी गृहस्थो वानप्रस्थः संन्या
सी च इति श्रीभागवतं । ब्राह्म
णी क्षत्रिया वैश्यासु ब्राह्मणाज्जा
तो ब्राह्मणः यथा क्षत्रियायां
स्त्रयः पुत्रो ब्राह्मणः सोप्यसंश
यः । ब्राह्मण्यां ब्राह्मणाज्जातो ब्रा
ह्मणः स्यान्न संशयः क्षत्रिया
यां तथैव स्याद्वैश्यायामपि चैव
हि इति महाभारते दानधर्मः ।
तस्य लक्षणं यथा ॥ जात्या कुले
न वृत्तेन स्वाध्यायेन श्रुतेन च
एभिर्युक्तो हि यस्तिष्ठेन्नित्यं स
द्विजमुच्यते ॥ इति वह्निपुराणं
अपि च । न क्रुध्येन्न प्रहृष्येच्च
मानितोऽमानितश्च यः सर्वभूत
ष्वभयदस्तं देवा ब्राह्मणं विदुः ॥
अध्वरगणाज्जीतः सोदित्वात्म
रकाः कुणपादिव च स्त्रीभ्यस्तं दे
वा ब्राह्मणं विदुः येन केनचिदाच्छ
न्नो येन केनचिदाशितः यत्र क्वचन
शायी तं देवा ब्राह्मणं विदुः विमु
क्तं सर्वसङ्गेभ्यो मुनिमाकाशवत्
स्थितं मेकचरं शान्तं तं देवा ब्राह्मणं
विदुः जीवितं यस्य धर्मार्थं धर्मो रत्य
र्थमेव च अहोरात्राश्च पुण्यार्थं तं



देवा ब्राह्मणं विदुः निराशिषमना
रम्भं निर्नमस्कारमस्तुतिं अक्षी
णं क्षीणकर्माणं तं देवा ब्राह्मणं वि
दुः इति महाभारते मोक्षधर्मः अ
पिच विशाखयूपउवाच विप्रस्य
लक्षणं ब्रूहि त्वद्भक्तिः का च तत्फ
ला यतस्त्वदनुग्रहेणैवाभवाणः
ब्राह्मणाः कृताः कल्किरुवाच
वेदा मामीश्वरं प्राहुरव्यक्तं व्य।
क्तिमत्परं ते वेदा ब्राह्मणमुखे
नाना धर्माः प्रकाशिताः यो ध
र्मो ब्राह्मणानां हि सा भक्तिर्म
म पुष्कला तयाहं तोषितः श्री
शः संभवामि युगे युगे ऊर्द्धं त्रि
वृतं सूत्रं सधवानिर्मितं शनैः
तन्तुत्रयमधोवृतं यज्ञसूत्रं विदु
र्बुधाः त्रिगुणं तद्ग्रन्थियुक्तं वेद
प्रवरसम्मितं शिरोधरान्नाभिमध्यं
पृष्ठार्द्धपरिमाणकं यजुर्विदां
नाभिमितं सामगानामयं विधिः वा
मस्कन्धोपवीतं यज्ञसूत्रं बलप्रदं स
दस्मचेदनाधेयं धारयेत्तिलकं द्वि
जः भाले त्रिपुण्ड्रं कर्माङ्गं केशप
र्यन्तमुज्ज्वलं पुण्ड्रं मङ्गुलिमानं तु
त्रिपुण्ड्रं तद्विधा कृतं ब्रह्मविष्णुशि
वावासं दर्शनात् पापनाशनं ब्राह्म
णानां करे स्वर्गा वाचो वेदाः करे हरिः

गात्रे तीर्थानि यागाश्च नाडीषु प्रकृति
स्त्रिवृत् सावित्री कण्ठ — कुहरा हृदयं
दयं ब्रह्मसंज्ञितं तेषां स्तनान्तरे धर्मो
पृष्ठेऽधर्मः प्रकीर्त्तितः भूदेवा ब्राह्मणा
राजन् पूज्या वन्द्याः स — क्तिभिः चा
तुराश्रम्यकुशला मम — धर्मप्रवर्त्त
काः बालाश्चापि ज्ञानवृद्धास्तपोवृ
द्धा मम प्रियाः तेषां वचः पालयि
तुमवतारः कृतो मया महाभा
ग्य ब्राह्मणानां सर्वपापप्रणाशनं
कलिदोषहरं शान्तमुच्यते सर्वतोऽभ
यात् इति कल्किपुराणे ४ अध्यायः
अपि च कर्मणा ब्राह्मणो जातः करो
ति ब्रह्मभावनां स्वधर्मनिरतः
शुद्धस्तस्माद्ब्राह्मण उच्यते इति ब्रह्म
वैवर्ते गणेशखण्डे २४ अध्यायः अ
पि च जातकर्मादिभिर्यस्तु संस्कारैः सं
स्कृतः शुचिः वेदाध्ययनसम्पन्नः षट्
सु कर्मस्ववस्थितः शौचाचारपरो
नित्यं विघसाशी गुरुप्रियः नित्यव्रती
सत्यपरः स वै ब्राह्मण उच्यते सत्यं
दानमथाद्रोह आनृशंस्यं कृपा घृणा
तपश्च दृश्यते यत्र ब्राह्मणः इति स्मृतः
तस्य धर्मं यथा ब्राह्मणस्तत्रयोध
र्मस्तं — वक्ष्यामि केवलं इमम् एवम
हाराज धर्ममाहुः पुरातनं ॥ स्वाध्या

याभ्यसनं चैव तत्र कर्म समाप्यते न
— हि तं व्यपाश्रित्य हस्ते मानं स्वकर्म
णि अकुर्वाणं विकर्माणि प्राप्तं प्र
ज्ञानतर्पितं कुर्वीतोपेत्य सन्तान
मथ दद्याद्यजेत च संविभज्यापि
भोक्तव्यं धनं सद्भिरितीष्यते परि
निष्ठितकार्य्यस्तु स्वाध्यायेनैव ब्रा
ह्मणः कुर्य्यादन्यन्न वा कुर्य्यान्मै
त्रो ब्राह्मण उच्यते । इति पाद्मे स्व
र्गखण्डे २६ अध्यायः तस्य माहा
त्म्यादि यथा सर्वेषामेव वर्णा
नां ब्राह्मणः परमो गुरुः तस्मै दा
नानि देयानि भक्तिश्रद्धासमन्वि
तैः सर्वदेवाग्रजो विप्रः प्रत्यक्षत्रि
दशो भुवि स तारयति दातारं दु
स्तरे विश्वसागरे हरिशर्म्मोवाच
सर्वदेवगुरुर्विप्रस्त्वया प्रोक्तः स
त्तम तेषां मध्ये च कः श्रेष्ठः क
स्मै दानं प्रदीयते ब्रह्मोवाच स
र्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः
सदैव हि अविद्वांश्च सविद्यो वा
नात्र कार्य्या विचारणा तेषां हि
दोषमलिप्राय ब्राह्मणान् ब्राह्मणोत्त
म आत्मभोगहीनाश्च तेभ्यो
नकरोचवन्ननाचाराद्विजाः ख्या
न च शूद्रा जितेन्द्रियाः अभक्ष्यभ

कागावः कोलाः समता यान च ॥
माहात्म्यमपि देवानां विशेषादुच्य
ते मया तवस्नेहाद्द्विजश्रेष्ठ निशा
मय समाहितः क्षत्रियाणां च वै
श्यानां शूद्राणां गुरवो द्विजाः अ
न्यान्य गुरवो ज्ञेयाः पूजनीयाश्च
भूसुर ब्राह्मणं प्रणमेद्यस्तु वि
ष्णुबुद्ध्या नरोत्तम आयुः पुत्रा
श्च कीर्त्तिश्च सम्पत्तिस्तस्य वर्द्धते
न च नोति द्विजं यस्तु मूढधीर्मा
नवो भुवि सद्दर्शनेन तत्कीर्षद्धन्त
मिच्छन्ति केशव पृथ्वी दिशस्तु ब्राह्म
णस्य प्रणाममति षेधोयथा पुष्य
हस्ते पयो हस्ते देवस्कंच भस्म
र नमेद् ब्राह्मणं प्राप्तं स्नेलाभ्य
न विश्वदं जलस्थं देवदेवपमप्य
ध्यान मर्जितचेतसं देवपूजां च
कुर्वन्तं न नमेद् ब्राह्मणं बुधः वरि
षां प्रकुर्वन्तं भू — न च द्विजोत्त
म तथा सामानि गायन्तं न नमेद् ब्रा
ह्मणं बुधः ब्राह्मणाय नमन्ति हीति
बहवो द्विजसत्तम प्रत्येकं तेन नमस्का
रस्तत्र कार्य्यो न धीमता ज्ञानाभिवा
दनं विप्र भक्त्या योनाभिवादयेत्
स च चाण्डाल समो ज्ञेयो नाभिवाद्यः
कदाचिच्च कृतप्रणामं तेनाप्यनते न
मापितरो न च कृतप्रणामाः स



वैपिनमस्कार्य्या द्विजैर्द्विजाः । कृत
दोषान् द्विजान् राजा न द्विषन्ति वि
चक्षणाः । द्विषन्ति वापि मोहेन ते
षां कष्टः सदा हरिः । यावकान् ब्रा
ह्मणान् यस्तु कोपदृष्ट्या प्र
पश्यति । सूचीप्रवेशनं तस्य नेत्र
योः कुरुते यमः । विप्रनिर्भर्त्स
नं कृत्वा येन वक्त्रेण भर्त्सते त
स्मिन् वक्त्रे यमस्तप्तं लौहपिण्डं
ददाति वै ॥ ब्राह्मणो गृहमभ्येति
तद्गृहे केशवः स्वयं देवताः सक
लाश्चैव पितरश्च सदर्षयः । तस्य
पादोदकादि माहात्म्यं यथा । वि
प्रपादोदकादि [illegible] मात्रं वदे
हुधः देहस्थपातकान् सर्वा
मेवाप्नुनश्यति कोटिब्रह्माण्ड
मध्ये सन्ति तीर्थानि यानि वै नी ।
र्थानि तीर्थानि सर्वाणि वसन्ति द्विज
पादयोः । विप्रपादोदके नित्यं तिष्ठ
स्याद्यस्य मस्तके स स्नातः सर्वती
र्थेषु सर्वयज्ञेषु दीक्षितः । सर्वपा
पानि घोराणि ब्रह्महत्यादिकानि च
सद्य एव विनश्यन्ति विप्रपादाम्बुपार
णात् । तथाधा व्याधयः सर्वे परम
क्लेशदायकाः । गच्छन्ति विलयं सद्यो
विप्रपादाम्बुभक्षणात् । पितृर्ण्यानि
तोयानि दीयन्ते विप्रपादयोः ॥

तैस्तृप्ताः पितरः स्वर्गे तिष्ठन्त्याचन्द्र
तारकं ॥ प्रक्षाल्य विप्रचरणौ गृ
हीभिर्योऽर्चयेद् बुधः । तेनार्चितो जग
न्नाथो विष्णुः सर्वसुरोत्तमः ॥
विप्राणां पादनिर्माल्यं यो मर्त्यः
शिरसा वहेत् । सत्यं सत्यमहं वच्मि
तस्य मुक्तिर्[illegible] ॥ तस्य प्र
दक्षिणफलं । विप्रं प्रदक्षिणीकृ
ता तेन सप्तद्वीपा वसुन्धरा ॥
तस्य पादसेवनफलं । यो दद्यात्
फलताम्बूलं विप्राणां पादसे
वने इह लोके सुखं तस्य परलो
के ततोऽधिकं पुत्रार्थी लभते पु
त्रं धनार्थी लभते धनं मोक्षार्थी
लभते मोक्षं विप्रादस्य सेव
नात् रोगी रोगात् प्रमुच्येत पा
पी मुच्येत पातकात् मुच्यते बं
धनाद्बद्धो विप्राणां पादसेवनात्
अनपत्याश्च या नार्य्यो मृतापत्या
श्च याः स्त्रियः । बहुपत्या जीववत्साः
स्युर्विप्रपादसेवनात् इति पाद्मे
क्रियायोगसारे २० अध्यायः ॥
तस्य संध्याया अकरणे दोषो य
था नोपतिष्ठति यः पूर्वां नोपास्ते
यस्तु पश्चिमां । स शूद्रवद्बहिः
कार्य्यः सर्वस्माद्द्विजकर्मणः ॥

तस्याः संध्याकरणफलं यथा यावज्जी
वनपर्यन्तं यस्त्रिसंध्यं करोति च ।
स च सूर्य्यसमो विप्रस्तेजसा तपसा
सदा तत्पादपद्मरजसा सद्यः पूता
वसुन्धरा जीवन्मुक्तः स तेजस्वी सं
ध्यापूतो हि यो द्विजः तीर्थानि च प
वित्राणि तस्य संस्पर्शमात्रतः त
तः पापानि यान्त्येव वैनतेयादिवो
रगाः संध्याया अकरणे दोषो य
था नाश्नन्ति सुरास्तस्य पितरः
पिण्डतर्पणं वह्नियाच द्विजतस्य
त्रिसंध्यरहितस्य च तस्य निंदित
कर्माणि यथा विष्णुमन्त्रविही
नश्च त्रिसंध्यावर्जितो द्विजः एका
दशीविहीनश्च विषहीनो यथोर
गः हरेर्नैवेद्यतोभोजी धावको वृ
षवाहकः शूद्रान्नभोजी विप्रश्च
विषहीनो यथोरगः शवदाही
च शूद्राणां यो विप्रो वृषलीपतिः
शूद्राणां सूपकारी च शूद्रयाजी
च यो द्विजः असिजीवी मसीजी
वी विषहीनो यथोरगः यो विप्रो
वीरान्नभोजी ऋतुस्नातान्नभोजकः
भगजीवी वार्द्धुषिको विषहीनो य
थोरगः यः कन्याविक्रयी विप्रो यो
हरेर्नामविक्रयी यो विद्याविक्रयी

विप्रो विषहीनो यथोरगः सूर्योद
ये च द्विर्भोजी मत्स्यभोजी च यो द्विजः
शिलापूजादिरहितो विषहीनो य
थोरगः इति ब्रह्मवैवर्त्ते प्रकृति
खण्डे २१ अध्यायः ॥ अपि च यदि
शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः
स भ्रष्टो विप्रजातेश्च चाण्डालात्
सोऽधमः स्मृतः विष्ठासमश्च तत्
पिण्डो मूत्रं तस्य च तर्पणं तत्पि
तॄणां सुराणां च पूजने तत्समं
सप्तकोटिजन्मार्जितपुण्यं संध्या
र्च्चातपसार्जितं द्विजस्य वृषलीभो
गात्प्रणश्येव न संशयः ब्राह्मण
श्च सुरापीती विड्भोजी वृषलीपतिः
हरिवासरभोजी च कुम्भीपाके व्रजे
द्ध्रुवं अपि च करोत्यन्यहं संध्यां च
संध्यां वा न करोति यः त्रिसंध्यं वर्ज
येद्यो वा संध्याहीनश्च स द्विजः ना
रायणक्षेत्रादितीर्थे तस्य प्रतिग्रह
दोषो यथा तत्र नारायणक्षेत्रे कु
रुक्षेत्रे हरेः पदे वाराणस्यां वद
र्य्यां गङ्गासागरसंगमे पुष्करे भा
स्करक्षेत्रे प्रभासे रासमण्डले हरि
द्वारे च केदारे सोमे वदरपाचने स
रस्वती नदीतीरे पुण्ये वृन्दावने वने
गोदावर्य्यां च कौशिक्यां त्रिवेण्यां च हि



मालये एतेष्वन्येषु दानं प्रतिग्र।
हातिकामतः सच तीर्थप्रतिग्रा
हीकुंभीपाकं प्रयातिच यादिभा
षिकमहापातकि ब्राह्मण यथा
शूद्रस्योद्भिक्षयाजी ग्रामयाजी
तिकीर्तितः देवोपजीवजीवीच
देवलश्च प्रकीर्तितः शूद्रपाको
पजीवीयः सूपकारः प्रकीर्ति
तः संध्या पूजा विहीनश्च प्रम
त्तः पतितः स्मृतः एते महापा
तकिनः कुंभीपाकं प्रयांतिते इ
ति ब्रह्मवैवर्ते प्रकृतिखण्डे ५०
अध्यायः ब्राह्मणाशीर्वचनं स्व
स्तिस्वस्त्ययनं यथा आशिषं क
र्तुमर्हति प्रसन्नमनसाशिष्टु
ष्टिस्वस्त्ययनं सदेवाद्विप्राशीर्वच
नंध्रुवं इति ब्रह्मवैवर्ते श्रीकृष्ण
जन्मखण्डे ९ अध्यायः ॥
ब्राह्मणानां स्वधर्मा यथा ब्राह्म
णस्य स्वधर्मश्च त्रिसंध्यमर्चनं ह
रेः तत्पादोदकनैवेद्य भक्षणं च सुधा
धिकं अन्नं विष्ठा जलं मूत्रमनिवेद्यं
हरेरपि भवंतिस्म करा सर्वे ब्राह्म
णा यदि भुंजते आजीवं भुंजते विप्रा
एकादश्यां न भुंजते कृष्णजन्मादिने
चैव शिवरात्रौ समन्त्रिके तथा रामनव
म्यां च यत्नतः पुण्यवासरे ब्राह्मणानां

स्वधर्मश्च कथितो ब्राह्मणानां यथा इति ब्र
ह्मवैवर्ते श्रीकृष्णजन्मखण्डे ५९ अ
ध्यायः गृहस्थ ब्राह्मणनियमा यथा
वेदं वेदौ तथा वेदान धीत्य न समाहि
तः तदर्थमभिगम्याथ ततस्नायाद्वि
जोत्तमः गुरवे तु धनं दत्वा स्नायीत
तदनुज्ञया चीर्णव्रतोथ युक्तात्मा
सशक्तः स्नातुमर्हति वैणवीं धार
येद्यष्टिमंतर्वासस्तथोत्तरं यज्ञोप
वीतद्वितयं सोदकं च कमण्डलुं
छत्रंचोष्णीषममलं पादुके चाप्यु
पानहौ रौक्मे च कुण्डले धार्ये कृ
त्तकेशनखः शुचिः स्वाध्याय नि
त्ययुक्तः स्याद्बहिर्माल्यं न धारये
त् अन्यत्र कांचनाद्विप्रो न रक्तं बिभृ
यात्स्रजं शुक्लाम्बरधरो नित्यं सु
गंधः प्रियदर्शनः न जीर्णमलव
द्वासा भवेद्वै विभवे सति न रक्तमुल्ब
णं चान्यधृतं वासो न कुण्डिका नोपा
नहौ स्रजं वाथ पादुके च प्रयोजयेत्
उपवीतमलंकारं कुंभान् कृष्णाजि
नानि च नापसव्यं परीदध्याद्वासो
न विकृतं वसेत् आहरेद्विधिवद्दी
नान् सहपान्नात्मनः शुभान् दृपल
द्दारानसुक्तानयोनिदोषविवर्जितान्
अमातृगोत्रप्रभवामसमानार्षगोत्र

जां आहरेद्ब्राह्मणो भार्यां शील
शौचसमन्वितां ऋतुकालाभिगा
मिस्याद्यावत् पुत्रोभिजायते व
र्जयेत् प्रतिषिद्धानि प्रयत्नेन दि
नानि तु षष्ठ्यष्टमी पंचदशी द्वाद
शी च चतुर्दशी एवं सर्वत्र
ब्रह्मचारी भवेन्नित्यं तद्वज्जन्मत्र
याहनि आदधीताव सथ्याग्निं जु
हुयाज्जातवेदसं व्रतानि स्नात
कोनित्यं पावनानि च पालयेत्
वेदोदितं स्वकं कर्म नित्यं कुर्या
दतंद्रितः अकुर्वाणः पतत्याशु
नरकानतिभीषणान् अभ्यसेत्
प्रयत्नेन नित्यं वेदं यत्नान्न हापयेत्
कुर्याद्गृह्याणि कर्माणि संध्यो
पासनमेव च सख्यं समाधिकैः
कुर्यादुपेयादीश्वरं सदा दैवमा
न्यपि गच्छेत्तु कुर्याद्भार्याभिपोष
णं न धर्मं ख्यापयेद्विद्वान् न पापं
गूहयेदपि कुर्वीतात्महितं नित्यं सर्व
भूतानुकंपकः वयसः कर्मणोर्थ
स्य श्रुतस्याभिजनस्य च देशवा
ग्बुद्धिसारूप्यमाचरन् विचरेत् सदा
श्रुतिस्मृत्युदितं सम्यक् साधुभिर्यश्च
सेवितः तमाचारं निषेवेत नेहेतान्य
त्र कर्हिचित् येनास्य पितरो याता येन
याताः पितामहाः तेन यायात् सतां मा


र्गं तेन गच्छन्न रिष्यति नित्यं स्वाध्याय
शीलः स्यान्नित्यं यज्ञोपवीतिमान् स
त्यवादी जितक्रोधो ब्रह्मभूयाय कल्प
ते संध्यास्नानपरो नित्यं ब्रह्मयज्ञप
रायणः अनसूयुर्मृदुर्दान्तो गृहस्थः
प्रेत्य वर्द्धते वीतरागभयक्रोधो लोभ
मोहविवर्जितः सावित्रीजापनिरतः
श्राद्धकृन्मुच्यते गृही मातापित्रो
र्हिते युक्तो गोब्राह्मणहिते रतः दा
न्तो यज्वा देवभक्तो ब्रह्मलोके महि
यते त्रिवर्गसेवी सततं देवतानां च
पूजनं कुर्यादहरहर्नित्यं नमस्ये
त् प्रयतः सुरान् विभागशीलः स
ततं क्षमायुक्तो दयालुकः गृहस्थ
स्तु समाख्यातो न गृहेण गृही भवेत्
क्षमा दया च विज्ञानं सत्यं चैव दमः
शमः अध्यात्मनिरतं ज्ञानमेत
द्ब्राह्मणलक्षणं एतस्मान्न प्रमा
द्येत विशेषेण द्विजोत्तमः यथा
शक्ति चरन् कर्म निन्दितानि विव
र्जयेत् विधूय मोहकलिलं ल
ब्ध्वा योगमनुत्तमं गृहस्थो मु
च्यते बंधात्तत्र कार्या विचारणा
विगर्हातिक्रमक्षेप हिंसाबं
धवधात्मनां ॥ अन्यमन्युसमु
त्थानां दोषाणां वर्जनं क्षमा ॥
स्वदुःखेष्विव कारुण्यं परदुःखे

पुत्रोऽस्य दात । दयायज्ञमनयः प्राज्ञः
सात्वा हर्म्मस्य साधनं । चतुर्दशानां
विद्यानां धारणं हि यथार्थतः वि
ज्ञान मितरं विद्या येन धर्मो वि
वर्द्धते अधीत्य विधिवद्विद्या मर्थ
चैवोपलभ्यते । धर्मकार्यान्निवृ
त्तश्चेन्न तद्विज्ञान मिष्यते सत्येन
लोकं जयति सत्यं तत्परमं पदं
यथाभूत प्रसादस्तु सत्यमाहुर्म
नीषिणः दमः शरीरोपरतिः श
मः प्रज्ञा प्रसादजः अध्यात्ममक्ष
रं विद्या यत्र गत्वा न शोचति यया
स देवो भगवान् विद्यते यत्र वि
द्यते साक्षादेव महादेव तद्ज्ञाना
मिति कीर्तितं तन्निष्ठस्तत्परो
विद्वान्नित्यमक्रोधनः शुचिः म
हायज्ञपरो विप्रो लभते तदनुत्त
मं धर्मस्यायतनं यत्नाच्छरीरं प
रिपालयेत् नहि देहं विना रुद्र
पुरुषैर्विद्यते परः नित्य धर्मार्थ
कामेषु युञ्जीत नियतो द्विजः न
धर्म वर्जितं काम मर्थं वा मनसा
स्मरेत् सीदन्नपि हि धर्म्मेणैव न
धर्मं समाचरेत् धर्मो हि भग
वान् देवो गतिः सर्वेषु जन्तुषु ॥
भूतानां प्रियकारी स्यात्परद्रोह
कर्मधीः न वेद देवता निन्दां कुर्या

त्तैश्च न संवदेत् यस्त्विमं नियु
तो विप्रो धर्माध्यायं पठेत् शुचिः
अध्यापयेच्छ्रावयेद्वा ब्रह्मलोके
महीयते इति कौर्मे व्यासगीतो
क्त अध्यायः अपिच सूतश्चाव
आनृशंस्यं क्षमा सत्य महिंसा
दम मार्दवं ध्यानं प्रसादो माधु
र्यमार्जवं शौच मेवच इज्याह
नं तपः सत्यं स्वाध्यायो ह्यात्मनि
ग्रहः व्रतोपवासौ मौनंच स्नानं
पैशुन्य वर्जनं पञ्चिर्युक्तो भवति
श्रेष्ठाय सदा वर्त्तते द्विजः कृत्वा
भूपावकं सर्व परब्रह्माधिगच्छ
ति अविद्यो वा सविद्यो वा निर
ग्निः साग्निकोऽपिवा योऽग्निप्रत्यप
स्यायुक्तः सपरं स्वर्गमाप्नुयात् स
र्वेषामुत्तमं श्रेष्ठं विमुक्ति फलदा
यकं ब्राह्मणस्य तु पावनं नित्यं ति
गदन्नः स्वर्ग सायंप्रातस्तु यः सं
ध्यामुपासीत् एकमानसः जपन्हि
पावनीं देवीं गायत्रीं वेदमातरं तप
सा भावितो देव्या ब्राह्मणः पूत
किल्बिषः न सीदेत् प्रतिगृह्णन्
सन्नापि पृथ्वीं समागरां हे संध्येण
पतितेन सावित्री प्रयतः शुचिः
यस्तस्य दुष्कृतं नास्ति एवं तः पुरतो
पिवा यत्तसत्यं ततो विद्वान् सान

सांग वेदस्य पावकः गायत्री ध्यान
पूतस्य वर्णानां हि तिष्ठोऽशीः प
र्व किल्विष युक्तस्तु विनिर्दहति पा
तके उभे संध्ये तूपासीत तस्मान्नि
त्यं द्विजोत्तमः नस्यादेहापवित्रत्व
यथा । यथा देहापवित्रत्वं विप्रा
दीनां यतो भवेत् देवर्षिस्पर्शा न
स्पर्शनेन राज्ञा मात्र पूर्विकं ज्ञात
केभ्यतकैः स्नाते जलौकाभिः ह
ते तथा अपवित्रो हि जातो नोदे
हस्तु संध्यादि कर्मसु अशूतनन्तु
न्सर्गेन रोमनखपुरीषयोः असृ ।
एष स्पर्शनेचैव ब्रह्मयज्ञ जपादिषु
रक्तपानेन विष्मग्नं तत्त्वज्ञादिभिः
युतो विप्रो देव शुचिः काष्ठपुः कं
टकादिभिः भक्षेत्स्नानेनोच्छिष्ट
पवित्रः स्नानमेषु ते अपवित्रो हि जातो दि
नोऽपशरीरं त्वरं कर्माणि ज्वरादिभि
स्त्रवः षष्ठि रोगयुक्तो द्विजन्मनां व
पुरश्चयज्ञसन्ध्यानहोमजपादिषु
मांसादिविभोशनाक्षमितात्रादिभो
जनेः तथाच गेनस्वलने मर्त्यदे
हापवित्रता अपवित्रे द्विजातीनां
वपुः स्पाश्रुद्रदर्शने गर्हित दान
ग्रहणे पतिते पातकादिभिः अ
पौचोतेन शुद्धिः स्याज्ज्ञातके मृत

केद्विज सर्ववर्णाश्रमादीनां ततोः
संध्यादिकर्मस्तु इतिपाद्योत्तरखं
डे ९१ अध्यायः अथ ग्राहीय
ब्राह्मण निर्णयः मांधातोवाच
कीदृशेभ्यः प्रदातव्यं भवेच्छ्राद्धं
महामुने द्विजेभ्यः किं गुणिभ्यो वा
तन्मे व्याख्यातु मर्हसि नारद उवाच
ब्राह्मणान्न परीक्षेत ज्ञात्वा वर्णाश्र
यान्यप दैवकर्मणि पित्र्येच न्याय्य
माहुः परीक्षणं । दैवताः पूजयन्ती
ह दैवे नैव हि तेजसा उपेयुस्तस्मा
त्तेभ्यः सर्वेभ्यो दापयेन्नरः श्रा
द्धेत्वथ महाराज परीक्षेद्ब्राह्मणं बु
धः कुलशीलवयोरूपैर्विद्यया
ऽभिजनेन च तेषामन्ये पंक्ति दूषास्त
थान्ये पंक्तिपावनाः अपांक्तेयास्तु
ये राजन् कीर्तयिष्यामि तान् शृणु
अपांक्तेयाय यथा कितवो भ्रूणहा
यक्ष्मी पशुपालो निराकृतिः ग्रा
मप्रेष्यो वार्धुषिको गायनः सर्व
विक्रयी अगारदाही गरदः कुण्डा
शी सोमविक्रयी सामुद्रिको राज
भृत्यस्तैलिकः कूटकारकः पित्रा
विवदमानश्च यस्य चोपपतिर्गृहे ।
अभिशस्तस्तथा स्तेनः शिल्पं यश्चो
पजीवति पर्वकारश्च सूची च मित्रध्रु



कृपरदारिकः अव्रतानामुपाध्यायः
काण्डपृष्ठस्तथैव च अभिशस्तश्च यः
पतिः कामेषः श्वना दष्ट एव च प
रिवित्तिश्च यश्च स्याद्दुश्चर्मा गुरुत
ल्पगः कुशीलवो देवलको नक्षत्रै
र्यश्च जीवति ईदृशा ब्राह्मणा ये च
अपांक्तेयास्तु ते मताः रक्षांसि ग
च्छते हव्यं यदेषां तु प्रदीयते श्रा
द्धे भुक्त्वा महाराज उश्रमी गुरु
तल्पगः श्राद्धं नाशयते तस्यापि
नरोऽपि न भुंजते सोमविक्रयिणे
दत्तं विष्ठा तत्स्यं भवेन्नृप भिषजे
शोणितं समं नष्टं देवलके तथा
अप्रतिष्ठं वार्धुषिके निष्फलं परि
कीर्तितं वणिजके दत्तं नेह ना
मुत्र तद्भवेत् भस्मनीव हुतं हव्यं त
था पौनर्भवे द्विजे ये तु धर्मव्यपेते
षु चरित्रापगतेषु च हव्यं कव्यं
प्रयच्छन्ति तेषां तत्प्रेत्य नश्यति
ज्ञानपूर्वं तु ये तेभ्यः प्रयच्छन्त्य
ल्पबुद्धयः पुरीषं भुंजते तस्य
पितरः प्रेत्य निश्चितं एतान् वि
द्धि महाबाहो अपांक्तेयान् द्विजा
धमान् शूद्राणामुपदेशं तु ये कुर्वन्त्य
ल्पबुद्धयः षष्टिं काणः शतं षण्ढः श्वि
त्री यावत् प्रपश्यति पंक्त्यां समुपविष्टा
यां तावद्दूषयते नृप यद्वेष्टितशि
रा भुंक्ते यद् भुंक्ते दक्षिणामुखः सोपा
नत्कश्च यद् भुंक्ते सर्वं विद्यात्तदासुरं
असूयता च यद्दत्तं यच्च श्राद्धादिव
र्जितं सर्वं तदसुरेन्द्राय ब्रह्मा भाग
मकल्पयत् श्वानश्च पंक्तिदूषाश्च
नावेक्षेरन् कथंचन तस्मात्परिवृते दद्या
त्तिलांश्चान्वविकीरयेत् तिलैर्विर
हितं श्राद्धं कृतं क्रोधवशेन च ।
यातुधानाः पिशाचाश्च विप्रलु
म्पन्ति तद्धविः अपांक्तेयो यतः
पंक्त्यां भुंजानो नतु पश्यति ता
वत्फलाद्भ्रंशयति दातारं तस्य बालि
शं पंक्तिपावना[illegible]
भुज श्रेष्ठ विज्ञेयाः पंक्तिपावनाः
विद्यावेदव्रतस्नाताः ब्राह्मणाः स
र्व एव हि सदाचारपराश्चैव विज्ञेयाः
पंक्तिपावनाः मातापित्रोर्यश्च वश्यः
श्रोत्रियो दशपूरुषः ॥
ऋतुकालाभिगामी च धर्मपत्नीषु
यः सदा वेदविद्याव्रतस्नातो विप्रः
पंक्तिं पुनात्युत अथर्वशिरसोऽध्ये
ता ब्रह्मचारी यतव्रतः सत्यवादी ध
र्मशीलः स्वकर्मनिरतश्च यः येषु च पु
ण्येषु तीर्थेषु अभिषेककृतश्रमाः
मखेषु च समन्तेषु भवन्त्यवभृतप्लुताः
अक्रो

यतात्मनश्चपलाः शान्ता दान्ता जिते
न्द्रियाः सर्वभूतहिता ये च श्राद्धे
ष्वेतान्निमन्त्रयेत् एतेष्वस्तमत
या येते वै पंक्तिपावनाः यतयो
मोक्षधर्मज्ञा योगाः सुचरितव्र
ताः ये चेतिहासं प्रयताः श्रावयं
ति द्विजोत्तमान् ये च भाष्यविदः
केचिद्ये च व्याकरणे रताः अधी
यते पुराणं ये धर्मशास्त्राण्यथा
प्युत अधीत्य च यथान्यायं विधि
वत्तस्य कारिणः उपपन्नो गुरुकुले
सत्यवादी सहस्रदः अग्र्याः सर्वेषु वे
देषु सर्वप्रवचनेषु च यावदेते प्रप
श्यन्ति पंक्त्यास्तावत्पुनन्ति च ततो हि
पावनात्पंक्त्या उच्यन्ते पंक्तिपावनाः
अन्त्यिमनुपाध्यायः सचेद्ग्रासनेन्न
जैन् ऋत्विग्भिरननु— तः पंक्त्या
दूरतिदृष्ट्वा अथ चेद्वेदवित्सर्वैः पंक्ति
दोषैर्विवर्जितः नच स्यात्पतितो राजन्
पंक्तिपावन एव सः तस्मात्सर्वप्रयत्नेन
परीक्षामंत्रयेद्द्विजान् स्वकर्मनिरता
न्यातान्कुलेजातान् बहुश्रुतान् ।
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि
च नप्रीणाति पितॄन् देवान्स्वर्गं च न स
गच्छति ब्राह्मणोऽश्नाति यत्र त्वलवणा
ग्निशिखा भाति । तस्मिन् श्राद्धे
मद्दत्तं नहि भस्मनि हूयते ऋ
षीणां समये नित्यं ये चरन्ति महो
पते निश्चिताः सर्वधर्मज्ञास्तान्
देवा ब्राह्मणान् विदुः स्वाध्यायनि
ष्ठा निरता ज्ञाननिष्ठास्तथैव च ।
तपोनिष्ठाश्च बोद्धव्याः कर्मनिष्ठा
श्च पार्थिव कव्यानि ज्ञाननिष्ठेभ्यः
प्रतिष्ठाप्यानि भूमिप । तत्र ये ब्राह्म
णान् केचिन्न निन्दन्ति हि ते वराः ॥
ये तु निन्दन्ति जल्पेषु न तान् श्राद्धे
षु भोजयेत् ब्राह्मणा निन्दिता रा
जन् हन्युस्ते पूरुषं सदा वैखान
सानां वचनमृषीणां श्रूयते नृप
दूरादेव परीक्षेत ब्राह्मणान् वेदपार
गान् प्रियो वाप्यप्रियो वापि तेषां
न श्राद्धमावपेत् इति पाद्मे स्वर्गख
ण्डे श्राद्धपात्रनिर्णयो नाम २५ अध्यायः
आततायिब्राह्मणवधे दोषाभावो
यथा आत्मानं हन्तुमायान्तमपि
वेदान्तपारगं न दोषो हनने तस्य
न तेन ब्रह्महा भवेत् प्रायश्चित्तं
हिंसकानां न वेदेषु निरूपितं व
धे सम्भवति तेनेषां मित्याह कम
लोद्भवः इति ब्रह्मवैवर्ते गणप
तिखण्डे २५ अध्यायः ब्राह्मण
ब्रुवः ब्राह्मणजातिमात्रोपजीवी यथा

विप्रः संस्कारयुक्तो न नित्यं सन्ध्यादिकर्म्मयः। नैमित्तिकन्तु नो कुर्य्यात् ब्राह्मणब्रुव उच्यते॥ युक्तः स्यात् सर्व्वसंस्कारैर्द्विजस्तु नियमव्रतैः। कर्म्म किञ्चिन्न कुरुते वेदोक्तं ब्राह्मणब्रुवः॥ गर्भाधानादिभिर्युक्तस्तथा पनयेन च। न कर्म्मकृन्न चाधीते स ज्ञेयो ब्राह्मणब्रुवः॥ अध्यापयति नो शिष्यान्नाधीते वेदमुत्तमम्। गर्भाधानादिसंस्कारैर्युतः स्याद्ब्राह्मणब्रुवः॥ इति पाद्मोत्तरखण्डे १०९ अध्यायः॥ तस्मै दानफलविशेषो यथा॥ सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। अधीते शतसाहस्रमनन्तं वेदपारगे॥ इति मानवे ७ अध्यायः॥

ब्राह्मणयष्टिका स्त्री ह्रस्वविशेषः बामनहाटी इति भाषा। तत्पर्य्यायः — जिका २ ब्राह्मणी ३ पद्मा ४ भार्ङ्गी ५ अङ्गारवल्ली ६ बालेयशाकः ७ वर्व्वरः ८ वर्द्धकः इत्यमरः ब्रह्मयष्टिः ९ ब्रह्मयष्टी ११ — जीका १२ यष्टी ११ ब्रह्मयष्टिका १४ हूर्व्वरा १५ अङ्गारवल्लरी १६ बालेयः १७ ब्रह्मलिका १८ इति शब्दरत्नावली भृगुभवा १९ पद्या २० खरशाकः २१ हञ्जिका २२ ब्रह्मा... गुणाः। भार्ङ्गी रूक्षा कटुस्तिक्ता रुच्योष्णा पाचनी लघु दीपनी तुवरा गुल्मरक्तनुन्नाशयेद्ध्रुवं शोथकासकफश्वासपीनसज्वरमारुतान् इति भावप्रकाशः॥

ब्राह्मणयष्टी स्त्री भार्ङ्गी इति राजनिर्घण्टः॥

ब्राह्मणहितः त्रि ब्राह्मणस्य हितकारी तत्पर्य्यायः ब्राह्मण्यः २ इति जटाधरः॥

ब्राह्मणायनः पुं शुद्धसन्तानजो विप्रः इति त्रिकाण्डशेषः॥

ब्राह्मणी स्त्री फेञ्जिका स्पृक्का ब्राह्मणपत्नी इति विश्वः वरटी इति त्रिकाण्डशेषः पिपीलिकाभेदः तत्पर्य्यायः स्थूलशीर्षिका २ इति हेमचन्द्रः ब्राह्मणीगमने दोषो यथा कुलटाविप्रपत्नीनां गमने स्वविप्रयोः ब्रह्महत्याषोडशांशः पातकन्तु भवेद्ध्रुवं तासामुपस्थितां च गमनेनन्त्वतथैके त्यागो धर्म्मो नास्ति पापमित्याह कमलोद्भवः विप्रपत्नीं सतीं तां च गमनेन बलेन चेत् ब्रह्महत्याशतं पापं भवेदेव श्रुतौ श्रुतं इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः॥

॥ ॥

ब्राह्मण्यं ब्राह्मणसमूहः इत्यमरः ब्राह्मणत्वे इति मेदिनी ब्राह्मण्यः शनिग्रहः इति शब्दमाला

ब्राह्ममुहूर्त्तः पुं अरुणोदयकालस्य प्रथमार्द्धे ब्राह्ममुहूर्त्तः। माहू पित्रः रात्रेश्च पश्चिमे यामे मुहूर्त्तो ब्राह्म उच्यते पश्चिमे यामे शेषार्द्धप्रहरे शेषार्द्धप्रहरे ब्राह्मो मुहूर्त्त इति मदनपारिजातात् नापि सूर्य्योदयात् प्रागर्द्धप्रहरमुहूर्त्तात्मको ब्राह्मः द्वितीयार्द्धः इत्याह्निकतत्त्वे॥ ब्राह्मे मुहूर्त्ते चोत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः शरीरचिन्तां निर्वर्त्य मेकर्म्म समाचरेत् इति राजवल्लभः तत्कृत्यं यात तत्कृत्यशाहे द्रष्टव्यं

ब्रह्मणो हूर्त्तः सप्तचकमनुस्थितिकालदैविकानां युगानां तत्सहस्रब्रह्मणदिने मन्वन्तरं तथैव कः तस्याग्रश्वन्तदेशाः इति लिङ्गपुराणवनात्॥

ब्राह्मोहोरात्रः पुं ब्रह्मणो दिनयामिन्यौ सहस्रयुगसहस्रद्वयेन भवति सच ग्राकल्पद्वयकालः तत्र दिनमहाकल्पः रात्रिश्च क्षयकल्पः इत्यमरटीकायां भरतः देविकानां युगानान्तु सहस्रं परिसंख्यया ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेवच तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः रात्रिं च तावतीमेव तेहोरात्रविदो जनाः इति मानवे १ अध्यायः॥

ब्राह्मिका स्त्री ब्राह्मणयष्टिका इति शब्दरत्नावली॥

ब्राह्मी स्त्री दुर्गा। यथा ब्रह्मदक्षशरीरेयप्रमेय प्रमाणतः बृहद्विस्तीर्णमित्युक्ता ब्राह्मी देवी ततः स्मृता इति देवीपुराणे ४५ अध्यायः॥ शिवस्याष्टमातृकान्तर्गतमातृकाविशेषः साच ब्रह्मशक्तिः सरस्वती शाकभेदः तत्पर्य्यायः मत्स्याक्षी २ वयस्था ३ सोमवल्लरी ४ इत्यमरः चत्वारि सोमलतायां ब्राह्मीशाके इति केचित् इति तट्टीकायां भरतः ब्राह्मीशाकस्य पर्य्यायान्तरं यथा सरस्वती ५ सौम्या ६ सुरश्रेष्ठा ७ सुवर्च्चला ८ कपोतवेगा ९ वैधात्री १० दिव्यतेजाः ११ ॥

महौषधी १२ स्वायम्भुवी १३ सोमलता १४ सुरेष्टा १५ ब्रह्मकन्यका १६ मण्डूकमाता १७ मण्डूकी १८ सरसा १९ मध्या २० वीरा २१ भारती २२

वरा २१ परमेष्ठिनी २४ दिव्या २५ शा
रदा २६ अस्या गुणाः हिमत्वं कषाय
त्वं तिक्तत्वं वातास्रपित्तनाशित्वं बुद्धि
प्रज्ञा मेधाकारित्वं आयुर्वर्द्धकत्वंच इ
तिराजनिर्घंटः अपिच ब्राह्मी क त
वली स्यात् सोमवल्ली सरस्वती अ
थब्रह्ममाण्डूकी मण्डूकपर्णी माण्डू
की त्वाष्ट्री दिव्या महौषधी अस्यागु
णाः ब्राह्मीहिमा सरा तिक्ता लघु मे
ध्या च शीतला कषायामधुरा स्वा
दुपाका ऽपस्माररमायनी स्वर्य्यास्मृति
प्रज्ञष्ट्यांड्मेहास्रकासजित् विष
शोथज्वरहृशीतह्वमण्डूकपर्णिनी
इतिभावप्रकाशः – जिका वाम
नहाफ्री इतिभाषा प– गउम
न्यः पाँकालइतिभाषा सोमवल्ल
री सोमलताइतिख्याता इति मे
दिनी महाज्योतिष्मती वड़ीमा
लक– नी इतिहिंदीभाषा ॥
मत्स्याक्षी मछाजी इतिज
न मजरिया इति च हिंदीभा
षा ॥ वाराहीकन्दः ॥
हिलमोचिका हिंचा इति।
भाषा इतिराजनिर्घंटः ॥
रोहिणीनक्षत्रं इतिहेमचंद्रः
ब्राह्माकंदः पुं वाराहीकंदः॥

इतिराजनिर्घंटः।
ब्राह्मं क्ली विस्मय रूपं
इतिधरणिः ब्रह्मविधिप्रति
त्रि निर्यकार ब्राह्मणहार्थी
पत्र।॥ ब्रुवन् त्रि ब्रुयेन
वक्ता यथा कृते ।ः से शा
ये पापेनभुंजीतान्यस्थितः
भुंजानोवर्द्धयेत् पापमसत्य
संसदि ब्रुवन् इतियाज्ञ
वल्क्य ॥
ब्रुवाणः त्रिवक्ता यथा इति
ब्रुवाणोमधुरं हितंकर्मांगिरं
नैवखिलयत्तभूमि वंमुनिः
प्रीतिमनामवांते यदा मिताक्षा
तिजिमूतविष्णन शंभहि ष्प
गी ॥

फल न उक्तो इति कोकल्पद्रु
मः लज्ज ब्रवीति ब्रुतेबृतिः
कटकेकृतेत्यत्रअत्रवितिकार्य्य
स्यानित्यत्वात्र वचादेशः इति
दुर्गादासः ॥ ॥

2856

2857

अथ मद्यपानकानि	प्रायश्चित्तानि	तदशक्तौ धेनुदानं	तदशक्तौ चूर्णीदान	दक्षिणा
अज्ञानतोवैश्यस्य पेयसुरापानं	षाड्वार्षिकव्रतं। ज्ञानतस्तद्द्विगुणं स्त्रीबालवृद्धानामर्द्धादिकं।	१०·धेनवः	२०·कार्षा। पणाः तज्ज भ्यस्वर्णादि वा	५·गावः अशक्तौ ५·कार्षापणाः।
अज्ञानतोब्राह्मणकर्तृब्राह्मणस्वाकार्षातिरक्तापरिमितसुवर्णस्तेयं	अपहृतद्रव्यं तत्स्वानुरूपं मूल्यं वा स्वामिने दत्वा द्वादशवार्षिकव्रतं करणीयं।	१८·धेनवः	५४·कार्षापणाः तच्छ्भ्यस्वर्णं दिवा।	१०·गावः। अशक्तौ १०·कार्षापणाः।
ज्ञानतस्तत्कर्तृकनतंच।	एतद्द्विगुणं स्ववार्षिकव्रतं। गुणवब्राह्मणकर्तृके तु सर्वत्रार्द्धं।	३६·धेनवः	१०८·कार्षापणाः।	२०·गावः। अशक्तौ। २०·कार्षापणाः।
ज्ञानतःक्षत्रियवैश्यप्रस्तानकं	राजकर्तृकमूषलाघातेनमरणं	३६·धेनवः	१०८·कार्षा	२०·गा







श्रावक कल्पसूत्र

(२०६ग)



